१०१/१

Rgveda Bhashyam अथ

101/1

ग्रन्थनामः-	"ऋग्वेद भाष्यम्"	
कर्तृनामः-	"सायणाचार्यः"	(द्वितीयाष्टकम्)
विषयः-	वैदिकसाहित्यम्'	

63

॥१॥ ॥श्रीगणेशायनमः॥ श्रीचंद्रकुलपरमेश्वर्यैनमः॥ ॥वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे॥ यंनत्वा कृतकृत्याः
स्युस्तंनमामिगजाननं॥१॥ यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत्॥ निर्ममेतमहंवंदे विद्यातीर्थमहेश्वरं॥२॥
प्रक्रियाप्रथमेष्टकेसाकृत्स्नेनोपवर्णिता॥ अतऊर्ध्वंततोज्ञेयास्मार्यतेच क्वचित्क्वचित्॥३॥ अथद्वितीयाष्टके प्रथ
मोध्याय आरभ्यते॥ तत्रार्चिनमाद्येमंडलेचतुर्विंशत्यनुवाकाः॥ तेषुकक्षीवत्दृष्टादशानुवाकेषुदृष्टसूक्तानि। तत्रप्रवंपां
तमिति द्वितीयंसूक्तं पंचोनेत्यनुवर्तमाना पंचदशर्चं ऋषिश्चान्यस्मात्तृचेति परिभाषयाकक्षीवानृषिः अनादेशपरि
भाषया त्रिष्टुब्विश्वेदेवादेवता प्रवोवैश्वदेवमित्यनुक्रमणिका॥ अस्यविशेषविनियोगोलैंगिकः॥ ॥तत्रप्रथमामृ
चमाह॥ प्रवःपांतंरघुमन्यवोंधोयज्ञंरुद्रायमीळ्हुषेभरध्वं॥ दिवोअस्तोष्यसुरस्यवीरैरिषुध्येवमरुतोरोदस्योः
॥१॥ प्रवःपांतमिति॥ हेरघुमन्यवः लघुक्रोधा अक्रोधिन ऋत्विजो वोयुष्माकं पांतं पातनशीलं वायज्ञं त्यागसाधन
मंधोन्नं आज्यसोमादिलक्षणं रुत्दुःखं तद्धेतुभूतं दुरितं दुरितंवा तस्यद्रावयित्रे एतन्नामकाय मीळ्हुषे फलस्य श्रीः ॥१॥

वर्षित्रे तदर्थं भरध्वं प्रकर्षेण संपादयत। अहं च इषुध्येव इषुधा तूणीरं यथा निरस्यति तथा वीरैः अमित्राणांविविध
मीरकैः वीर्योपेतैर्वा तदनुचरैर्मरुद्भिः सह दिवो द्युलोकस्य असुरस्य तु उपलक्षणमेतत्। लोकत्रयादपि असुरस्य निर
सितव्यानां असुराणां निरसितुः कर्मणि षष्ठी निरसितारं तमेव देवं रोदस्योः निरोधकयोः द्यावापृथिव्योर्मध्ये वर्तमा
नान्मरुतश्च अस्तोषि। स्तौमि। पांतं। पांतमित्यत्र पातेः शतृ पिबतेर्वा तृणादिकोडुः। मीळ्हुषे। दाश्वान्साह्वानिति क्व
सुप्रत्ययो निपातितः। चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनांचेति षत्वं। दिवः ऊडिदमित्या
दिना षत्वं विभक्तेरुदात्तत्वं। अस्तोषि। स्तौतेर्लटि छांदसो लुङ्। इषुध्येव इषवो धीयंते ऽस्यामितीषुधिः सप्तम्यधिकरणे चेति द
धातेः किः। कृत्स्वरेणांतोदात्तः उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं॥ ॥द्वितीयामृचमाह॥ पत्नीव पूर्वहूतिं वा
वृधध्या उषासानक्ता पुरुधा विदाने॥ स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः॥२॥ पत्नीव पूर्वहूतिमिति।
पत्नीव पत्नी यथा पूर्वहूतिं प्रथमाह्वानं वावृधध्यै वर्धयितुं प्रगतिर्भवति। तद्वत्। उषासानक्ता अहोरात्रे देवते

अपि पुरुधा बहुप्रकारं बहुविधैः स्तोत्रैर्विदाने स्तूयमाने सत्यौ पूर्वहूतिं वावृधध्यै अस्मदीयं पूर्वाह्वानं शीघ्रमाग
च्छतमिति शेषः। यद्वा वावृधध्यै अस्मद्वर्धनाय बहुधा प्रकारं विदाने वर्धनोपायानां जानंतौ भवतमिति शेषः। उषा
सानक्ता उषासोषस इति पूर्वपदस्योषसादेशः देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। अथवा कालेषा उच्यते
स्तरीः शत्रूणां हिंसकः तेजसा चान्हा वा आदित्यः स इव हिरण्यैः हिरण्यवर्णै रश्मिभिः व्युतं विततं विशेषणसंबध्यं
अंतं संततं वा रूपं वसाना आच्छादयंती धारयंती सूर्यस्य श्रिया शोभया सह दृशी शोभने दृश्यमाना स्वस्य पुरो
गामिनी रश्मिभिः स्वत्वेषो षा जगद्भासयति ता हि युषा अस्मत्पूर्वहूतिं पालयात्वित्यर्थः। यद्वा। हिरण्यैर्हितरम
णीयैः प्रकाशैर्धनविशेषैः वसि हागच्छतु। व्युतं वाञ् निष्ठायां वचिस्वपियजादीनां संप्रसारणं स्तरीः अविन्दस्तृ इ
तीकारप्रत्ययः॥ ॥ तृतीयामृचमाह॥ ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान्। शिशीतमिंद्रापर्व
तायुवं नो विश्वे वरिवस्यंतु देवाः॥ ममत्तु न इति॥ सोस्मान् वसर्हा वसना हर्ता गार्हपत्यादिरूपेण यद्वा वासको

द्विवं होतस्तद्धठसमानार्थः ह्यातव्याय्येश्रुयन्नेत प्रसिद्धौ नाश्विनौ अत्र यद्यपि विशेषो न श्रुतः तथापि सूक्तस्य वै
श्वदेवत्वादुषःसंबंधात् द्विवचनाल्लिंगाच्च अश्विनाविति गम्यते। तादृगावश्विनौ श्वेतनायै इति षष्ठ्यर्थे चतुर्थी
विश्वं जगत् श्वेतयंत्या उषसः तत्संबंधिनि काले उषःकालीनाह्वानाय यतेयमिति शेषः। हे ऋत्विजः वो यूयं प्रथ
मार्थे द्वितीया अपामुदकानां नपातं न पातयितारं तासां नप्तारं वाग्निं अद्भ्य ओषधिवनस्पतयः ताभ्योग्निरिय
पां नप्तृत्वमग्नेः तं देवं प्रकृणुध्वं कुरोतियत्र क्रियासामान्यवाची तत्र क्रियाविशेषे स्तोत्रे पर्यवस्यति प्रकर्षेण स्तो
ध्वमित्यर्थः॥ किंच रास्पिनस्य रपतेरसतेर्वा ग्राहृतार्थस्वस्मैतस्य हूतस्य कारपवारोपजनस्य रास्पिन इति भवति।
न दस्यास्तीति रास्पिः स्तोत्रं तद्वमरास्पिना स्तोता तस्य आयोः तादृशस्य मनुष्यस्य मम उत नसा मातरा मातृवन्नि
र्मातृकारिण्यावहोरात्रदेवते अपि प्रकृणुध्वं अथवा रास्पिनस्य एकोमन्वर्थे प्रत्ययश्छंदसः प्रवर्षणाध्वनियुक्तस्य
हृस्मुदकस्य गमनशीलस्य निर्मात्र्यावहोरात्रे देवे प्रत्यकृणुध्वं। युतां पातारा उभयत्र सुपां सुलुगिति आकारलोपः

पंचमीमृचमाह॥ ॥आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नंशे॥ प्र वः पूष्णे दावन आँ अच्छा वोचे
य वसुतातिमग्नेः॥१॥ ॥आ वो रुवण्युमिति॥ हे देवाः उशिजः कक्षीवान् हे वो युष्माकं संबंधिने रुवण्युं रवणीयं
शब्दनीयं शंसं स्तोतारं स्तोत्रं उत हुवध्यै। युष्मदाह्वानाय अच्छ वोचेय आभिमुख्येन ब्रवीमि। यद्वाप्येत्राश्विनावु
च्येते। तस्मिन्पक्षे बहुवचनं पूजार्थं। हे अश्विनौ वो युष्मान् घोषेव एतन्नामिका ब्रह्मवादिनीव सा यथा अर्जुनस्य
श्वेतवर्णस्य स्वशरीरगतत्वग्रोगस्य नाशनाय यथाश्विनोः शंसनमकार्षीत्। तद्वदहमपीत्यर्थः। हे देवाः युष्मा
त्संबंधिने दावने आभिमुख्येन पूष्णस्य दात्रे पूष्णे पोषकाय एतन्नामकाय देवायापि आकारस्यात्रेनुनासिकश्छंदसि
इति प्रकृतिभावः। अत्र आँ आभिमुख्येन गमान वोचेय स्तौमि। वच परिभाषणे। लिङ्याशिष्यङ्। वच उमिति उम्। किंच अग्ने
र्वसुतातिं तत्संबंधि वसुदरमपि वोचेन स्तौमि तमेवाग्निं॥ ॥इति द्वितीयस्य प्रथमो वर्गः॥ ॥षष्ठीमृचमाह॥ श्रुतं मे
मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीं। श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिंधुरद्भिः॥ ॥श्रुतं म इति॥

हे मित्रावरुणा एतन्नामानाव होरात्राभिमानिनौ देवौ युवां इमा इमानि हवा अस्मदाह्वानानि श्रुतं शृणुतं न केवलं
मदाह्वानं उत अपि च सदने यागगृहे विश्वतः उरु आदिभिः सर्वतः क्रियमाणं सीं एतत् एतत्स्तोत्रमपि श्रुतं । किंच ।
श्रोतुरातिः सर्वत्र श्रूयमाणधनः तादृग्दानो वा सुश्रोतुः अस्मदाह्वानस्य सम्यक् श्रोता सिंधुः जलाभिमानी देव
सुक्षेत्राभिः अद्भिः वृष्टिजलैः कुदयन्निति शेषः । यद्वा अस्मत्क्षेत्राण्यद्भिः सुक्षेत्राणि सस्यादिसमृद्धानि कुर्वन् ते
हवं शृणोतु सुक्षेत्रत्वलाभाय शृणोत्वित्यर्थः ॥ हवा इमा उत यत्र विभक्त्या आकारः । श्रुतमित्यत्र बहुलं छंदसी
ति विकरणस्य लुक् ॥ ॥ सप्तमीमृचमाह ॥ स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे । श्रुतरथे प्रिय
रथे दधाः सद्यः पुष्टिं निरुधाना सो अग्मन् ॥ हे मित्रावरुणा देवौ युवा महं स्तुषे स्तवै व्यत्ययेन मध्यमः । युवयोः या संबंधि
नी सा प्रसिद्धा रातिः दानं शता शतानां शतसंख्याकानां अपरिमितानां गवां संबंधिनी असंख्याता गोः पज्रे अंगि
रोगोत्रोत्पन्नमपि पृक्षयामेषु वातेषु निमित्तभूतेषु भवतीति शेषः । किंच मित्रादयो देवाः श्रुतरथे सर्वत्र प्रसिद्ध

नामच्छायानां वृक्षादीनां हंतारिः । अथवा वसर्हा वासराहर्वासरस्य गमयिता परिज्मा परितो गंता आदित्यो ममत्तु मा
दयतु तथा पां वृष्टयुदकानां वृषण्वान् वर्षणवान् वृष्ट्युत्पादको वातो वायुः अस्मान्ममत्तु । किंच हे इंद्रापर्वता इंद्रः
प्रसिद्धः पर्वतः पर्वतान् वृक्षादिपूरणवान् परिज्मा पर्जन्यस्तौ युवां नोऽस्मान् सम्बुधिं वा शिशीतं तेतीक्ष्णीकुरु
तं क्रोधयतामित्यर्थः । तत्तस्मात् यस्मादहं सर्वान् देवान् स्तौमि तस्माद्विश्वे सर्वेऽपि देवाः नोऽस्मान् वरिवस्यंतु । प्र
भूतमन्नं प्रदातुमिच्छंतु समृद्धान्नप्रदानेन पालयंत्वित्यर्थः । ममत्तु मदी हर्षे । अंतर्भावितण्यर्थात् लोटि छंदसि
विकरणस्य श्लुः द्विर्वचनं । शिशीतं । ई हल्यघोरितीत्वं बहुलं छंदसीत्यभ्यासस्येत्वं । इंद्रापर्वता अन्यत्र देवताद्वंद्वे इति
पूर्वपदस्यानङादेशः ॥ ॥ चतुर्थीमृचमाह ॥ उत त्या मे यशसा श्वेतनायै व्यंता पांतौशिजो हुवध्यै ॥ प्रवो नपात
मपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ॥ ॥ उत त्येति । औशिजः उशिजः पुत्रः कक्षीवान् अहं मे तादर्थ्ये चतुर्थी म
दर्थं यशसा यशस्करसन्नबलं कीर्तिं चोद्यन्ते । तद्वंतौ व्यंता भक्षयंतौ चरुपुरोडाशादिकं पांतौ पिबंतावाज्यसोम

द्वि॰भा॰
॥५॥

वक्षु : यज्ञा वा अंगिरस इति श्रुतेः। तेभ्यो वाजिनीवान् वाजोन्नं तद्वती क्रिया वाजिनी तया तद्वान् भवति। यद्वैकौ मत्वर्थी
यं छांदसः अस्मभ्यं प्रदेयेन अस्मभ्यं दत्तेन वान्नेन तद्वान् भवतीत्यर्थः। यः देवसंघो ऽश्वावतं बहुभिः तद्वैरश्वैर्युक्त
द्रुतारथिनो रथावाला मह्यं मे सूरिः प्रेरको भवति॥ अश्वानां रथानां प्रेरयितारं देवसंघस्तु वेदित्यर्थः। सूरीराः वी
रवयौ चेयुक्तरपदा द्युदात्तत्वं। अश्वावतः अश्वशब्दस्य मंत्रे। सोमाश्वेन्द्रियादिना मतुपि दीर्घत्वं॥ ॥नवमीमृचमा
ह॥ जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक्। स्वयं स यक्ष्मं हृदये निधत्त आप यदीं होत्राभि
र्ऋतावा॥ ॥जनो य इति॥ हे मित्रावरुणौ वां युष्माकं यो जनः अभिध्रुक्। अभिद्रोग्धा भवति। यश्च वां अपो न सुनो
ति। अयष्टा भवतीत्यर्थः। यश्च अक्ष्णया ध्रुक् वक्रेण मार्गेण द्रुह्यति। अन्यथा प्रकारेण द्रुह्यति। द्रुह प्रकारमुच्य
ते। वां युवां अपः सोमरसान् न सुनोति। अभिषवं न करोति। युवामतिक्रम्य अन्यदेवतार्थं सुनोतीत्यभिप्रायः। अ
यमेव अक्ष्णया द्रोहः समुदो द्विविधो जनः स्वयं यक्ष्मं व्याधिं हृदये स्वचित्ते निधत्ते स्थापयति। अनुष्ठातॄणां भो

श्री
॥५॥

गान् प्रत्ययनु व्यथितो भवतीत्यर्थः। य इति लिंगव्यत्ययः। यस्तु ऋतलक्षणः पुमान् ऋतवा यज्ञवान् परिगृहीतयज्ञः हो
त्राभिर्वाङ्नामैतत् स्तुतिं वाग्भिः ईमेतं सोमरसं आप आप्नोति सु वत् सोमम भिषुणोतीति यावत्। स नरः इष्ट
यातीति वक्ष्यमाणेन सह संबंधः। अभिध्रुक् द्रुहेः सत्सूद्विषेति क्विप्। चस्तावेति संहितायां दीर्घत्वं॥ ॥दशमी
मृचमाह॥ ॥स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः। विसृष्टरातिर्याति बाळ्हसृत्वा विश्वासु पृ
स त्सु सदमिच्छूरः॥२॥ स व्राधत इति॥ हे मित्रावरुणौ युवां गतमंत्रावसानो ऋतलक्षणो युष्मत्सु जवो जमो दंसु सू
तः दांतै रश्वैः सुष्टु प्रेरितः अतएव नरां नराणां शर्धस्तरः अतिशयेनाभिभविता अथवा अतिशयेन बलवान्
नराणां स्वसमानानां मध्ये गूर्तश्रवाः उद्गूर्णदीप्तिः प्रख्याततनाम्नो वा विसृष्टरातिः अर्थिभ्यः प्रदत्तधनः एवंम
हानुभावः सन् विश्वासु पृत्सु सर्वेषु संग्रामेषु व्राधतः महान्नामैतत् हिंसकान् महतोपि नहुषो मनुष्यनामैतत् म
नुष्यान् विशत्रून् बाळ्हसृत्वा भृशं सर्जं अप्रतिहतगमनः सदमित् सदैव शूरः सन् याति गच्छति। दंसुजूतः दामे

द्विचतुर्ती यावृमर्मलीति पूर्वपदप्रकृतिस्वरत्वं। गूर्त्तश्रवाः गुरी उद्यमने। नसत्तेतिसन्नानुत्तप्रतूर्त्तेत्यादौ निपातना
निष्ठानत्वाभावः। विसृष्टरातिः विपूर्वात्सृजतेर्कर्मणि निष्ठा गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। बहुव्रीहौ पूर्वपद
प्रकृतिस्वरत्वेन स एवावशिष्यते। पृत्सु। पादादिषु मांस्पृत्स्नूनामुपसंख्यानमिति पृतनाशब्दस्य पृदादेशः। सावेकाच
इति। विभक्तेरुदात्तत्वं वाल्हृस्वत्वात्सार्वत्रनन्येभ्योपि दृश्यंते इति क्विप्॥ ॥इति द्वितीयस्य प्रथमे द्वितीयो वर्गः॥ ॥
एकादशीमृचमाह॥ ॥अध ग्मंता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मंद्राः। नभोजुवो यन्निरवस्य राधः प्र
शस्तये महिना रथवते॥ ॥अध ग्मंतेति॥ हे राजतो राजमानाः सर्वस्येश्वरा वा मंद्रा मादयितारो यूयं अमृत
स्य अमरणस्य सूरेः स्तोत्रादिप्रेरकस्य नहुषो मनुष्यस्य मम हवमाह्वानं श्रोत शृणुत। बहुलं छंदसीति शपो लुक्।
अमृतस्येत्यत्र बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं अध अथ श्रवणानंतरं ग्मंत। आगच्छत।
गमेः छांदसो लेलुङ्। मध्यमबहुवचनस्य व्यत्ययेन तप्। बहुलं छंदसीति शपो लुक्। गमहनेत्युपधालोपः। कि

रथोपेते प्रियरथे प्रीयमाणरथे निरुंधानासः अवरुंधानौ अस्मास्वेव स्थापयंतः यद्वा मयि पुष्टिं दनाः कुर्वाणाः निरुं
धानासः। कृत्नामेव पुष्टिं मयि स्थिरां कुर्वंतः संतः अग्मन् आगच्छंतु रातिरादाने भावे क्तिन् मंत्रे वृषेत्यादिना क्ति
न् उदात्तत्वं। रता। सुपां सुलुगिति षष्ठ्या पूर्वसवर्णदीर्घः। दधानाः जुहोत्यादित्वाच्छपः श्लुः। अभ्यस्तानामादिरिय
द्युदात्तत्वं। अग्मन् गमेश्छांदसो लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। गमहनेत्युपधालोपः॥ अष्टमीमृचमाह॥ ॥
अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः॥ जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं
सूरिः॥ अस्य स्तुष इति॥ महिमघस्य महिमहत्पूज्यं मघो धनमन्नं वा यस्य देवसंघस्य स तथोक्तः। तादृशस्य रा
५ धो धनं स्तुषे स्तुवे व्यत्ययेन मध्यमः। धनलाभाय प्रभूतं धनसंघं स्तौमीत्यर्थः। किंच नहुषः मनुष्यनामैतत् परस्प
रेण संबंधोपेताः मनुष्या वयं वृक्षीवंतः सुवीराः शोभनपुत्राद्युपेताः संतः सचा सहस्य समर्थे तं सनेम लद्धं तं ध
नं संभजे मलुभेमहि। देवसंघो विशेष्यते यो जनो देवजनः यश्च देवसंघः यज्ञेभ्यः अंगिरोगोत्रोत्पन्नेभ्यः वृक्षी

धादित्वात्पूर्वपदांतोदात्तः। यद्वा स्वार्थिकस्तातिल्। रारन्निति रमतेर्यङ्लुगंतस्य लिटि रूपं। विश्वे सर्वे देवाः प्रभृतेषु प्रकृ-
ष्टभरणेषु यागेषु वाजमन्नं संचंतु ददतु। प्रयच्छंतु वेणुदात्ते। यद्वा यस्य सूरेः स्वभूतस्य च दशतयस्य च दशाचम-
सेषु वस्थितस्य सोमस्य प्राप्तये वयमाहूताः स्म। एतं नु धियं धामेत्स्यवोचत। यस्मादेवं तस्मात्तत्र भृथेषु यागेषु वाजं ता-
दशसोमलक्षणमन्नं सन्वंतु संभजंतां। वनषणसंभक्तावित्यस्य व्यत्ययेन उप्रत्ययः। वृद्धेषु यज्ञेषु वसूतातिर्वसू-
नां हविर्लक्षणानां धनानां वा विस्तारयिता रन्धीजौ वचनव्यत्ययः। ह्युष्मानिद्धोतमाना विहवेषि रारन्। इति इ। रारन्-
ने लोटि छांदसः श्लुपः श्लुश्छंदस्युभयथेत्यार्धधातुकत्वात् ङितो लोप इति चेत्यायुकारलोपः। अत एवाभ्यस्तानामा-
दिरित्याद्युदात्तत्वाभावश्च॥ ॥त्रयोदशीमृचमाह॥ ॥मंदामहे दशतयस्य धासेर्द्विर्यत्पंच बिभ्रतो यंत्यन्ना।
किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋंजते नॄन्॥ ॥मंदामह इति॥ मंदामहे स्तुमो वयं देवानामादिस्सतो
इत्यादित्यानुस्मृ। किमर्थं दशतयस्य धासेः दशेंद्रियतृप्तिसाधनत्वेन दशावयवस्यान्नस्य यत्तेयस्मात् द्विः पंचद-

त्वविधान्यन्नानि दश च मसगृहीतत्वाद्दशविधत्वं एवंविधं अन्नं धारयंते। दशविधान्यन्नानि विश्वेभ्यो देवेभ्यो होतुं धार-
यंतो यंति यदा तदा मंदामह इति तवेष्टाश्वप्रभृतीन् यष्टॄन् विहाय कस्मादस्मान् प्रगृह्य आगमिष्यंतीति वाच्यं। तहषाश्व-
णां तारकाः नतरात शोणादिको स्कंनतेन्दनकर्मणां एवं महानुभावात्। वरुणादीनि इष्टाश्वः एतन्नामकौ राजकौ मेतेस्तुता देवाई-
शानासः स्वामिनः कुशला दशाना तरुषा शत्रूणां तारकाः स्कंदनकर्मणि वा हकारान् अस्मानिष्टाश्वादयः। किं साधयंति कि मुपद्र-
वंति न प्रभवंतीत्यर्थः॥ ॥चतुर्दशीमृचमाह॥ ॥हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यंतु देवाः॥ अर्यो गिरः
सद्य आ जग्मुषीरोस्राश्चाकंतूभयेष्वस्मे॥ ॥हिरण्यकर्णमिति॥ हिरण्मयकारकुंडलाद्युपेतं कर्णं मणिग्रीवं रत्नाद्युपे-
तकंठं एतद्द्वयं सर्वावयवस्याप्युपलक्षणं एवं सर्वांगाभरणयुक्तमर्णः वरिवस्यंतु परिचरंतु प्रयच्छंत्वित्यर्थः। अर्यः अर-
णीयो विश्वेषां देवानां सद्य जग्मुषी स्तोतुमुखान्निर्गच्छंती गिरः स्तुती उस्रा अविकारप्रकृतिशब्दः क्षीराज्यादीनि च
हे वीषि च अद्य अस्मदागमनानंतरमेव कनुकामयंतां छांदसः शपः श्लुः परस्मैपदं च यद्वा यङ्लुकि तुभावा आ चाकं

क्षितिर्वा योज्यं पर्याप्तं कामयंतामित्यर्थः॥ देदिष्टि तिन्नुच्यते अस्मे अस्माकं संबंधिषु उभयेषु स्तोतृषु पशुषु च यद्वा अस्मासु
उभयेषु दोहितृषु मुष्णितृषु विषयेषु भयविधेषु कृत्स्नेषु॥ ॥पंचदशीमृचमाह॥ ॥चत्वारो मा मशर्शारस्य शिश्वस्त्रयो
राज्ञ आयवसस्य जिष्णोः॥ रथो वां मित्रावरुणा दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत्॥ ३॥ चत्वार इति॥ मा मां वृ
श्चीवंते मशर्शारस्य मशर्शारो नृपस्य भृशं शृंखलेति तिर्यास्यति च। मित्रानिति मशर्शारस्य एतन्नामकस्य राज्ञः शिश्वः शि
शिवः प्रवृद्धाः चत्वारः पुत्रा मां बाधंत इति शेषः। शिशुशब्दस्य जसादिषु वा वचनमिति गुणाभावः। तथा आयवसस्य
एतन्नाम्नो राज्ञो जयशीलस्य पुत्रास्त्रयस्ते बाधंत इति शेषः॥ हे मित्रावरुणा एतन्नामानौ देवौ वां युवयोः संबंधी स
र्वदा दीर्घाप्साः अप्स इति रूपनाम अतिविस्तृतरूपः स्यूमगभस्तिः स्यूममिति सुखनाम सुखवृद्धरश्मिः सन् सूरो न
सूर्य इव अद्यौत् द्योततां युक्तानामस्माकं विरोधिनां पुरतः स्फुरतु॥ भयजनको भवत्वित्यर्थः॥ द्युतेश्छंदसी लुङ् लङ्
लिट इति लुङ् द्युद्भ्यो लुङीति परस्मैपदं सिचि वृद्धिः परस्मैपदेष्विति वृद्धिः। बहुलं छंदसीतीडभावे हल्ङ्यादिसं श्री ॥८॥

मर्थमागमनमुच्यते। नभो जुवो नभसि व्याप्ताः सूर्ये यद्वा स्मान्निरवस्य निर्गतरक्षकस्य युष्मद्व्यतिरेकेण रक्षांतररहितस्य
अथवा निर्गतो मुखाद्बुद्धाः शितो रवः शब्दः स्तोत्ररूपो यस्य तादृशस्य रथवतो यजमानस्य षष्ठ्यर्थे चतुर्थी महिनामहि
म्ना माहात्म्येन महतः स्वलोपश्छांदसः। तत्प्रराधः समृद्धिसाधनैः हविर्लक्षणैः संराधकः स्तोत्रैर्वा प्रशस्त्यै प्रशंसितुं काम
यध्वे। तस्मादस्मदाह्वानं शृणुत आगच्छ वेति॥ ॥द्वादशीमृचमाह॥ एतं शर्धं धाम यस्य सूरेरित्यवोचंदशतयस्य
नंशे। द्युम्नानि येषु वसुताती रारन्विश्वे सन्वंतु प्रभृथेषु वाजं॥ ॥एतं शर्धमिति॥ यस्य सूरेः प्रेरकस्य यजमान
स्य संबंधिनो दशतयस्य दशेंद्रियसंवर्धकत्वेन दशप्रकारस्य अन्नस्य नंशे प्राप्तये वयमागताः स्म तस्मै यजमानाये
तमिदानीं दातृत्वेन वर्तमानं शर्धं परेषामभिभावकं मन्नेत स्थानं हेतुबलं वा धाम विदधामकं स्याम इत्यवोचन्
ये देवाः धाम दधातेर्लुङि गातिस्थेति सिचो लुक् वचेरस्यति वक्ती ह्यादिना ते रङ् येषु च देवेषु द्युम्नानि द्योतमाना
नि अन्नानि वसूतातिः वसूनां धनानां ततिर्विस्तारः रथ्य वसन्त्येव रारन् रमंते भृशं ततोतेः नित्यं स येनात्वं मरुत्व

द्वि॰भा॰ आस्थितवंतः । देवयजनं गंतुं आरूढा इत्यर्थः । अनंतरं सोषाः कृष्णात् निकृष्टवर्णात् नैशात्तमसः सकाशात् उदस्था
॥९॥ त् उदिताभूत् । कृष्णं कृष्यते निकृष्टो वर्ण इति यास्कः । कीदृशी सा आर्या जरणीया विहायाः विविधगमनयुक्ता महती
वा विहाया इति महन्नाम विहायाः यह्व इति तमसः पाप्म मानुषाय क्षयाय मनुष्याणां वासाय । चिकित्संती अंधकारनि
वारणरूपां चिकित्सां कुर्वती तमो निवारयंतीत्यर्थः ॥ ॥ द्वितीयामृचमाह ॥ ॥ पूर्वा विश्वस्माद्भुवनादबोधि जयंती वा
जं बृहती सनुत्री ॥ उच्चा व्यख्यद्युवतिः पुनर्भूरोषा अगन्प्रथमा पूर्वहूतौ ॥ ॥ पूर्वा विश्वस्मादिति । विश्वस्माद्भुवना
त् सर्वस्मात्प्राणिजातात् पूर्वा प्रथमा सती इयमुषा अबोधि बुध्यमाना भूत् । उषःकालमवगम्य हि पश्चात्सर्वे प्राणि
नः प्रतिबुध्यंते । कीदृशी सा वाजं गमनशीलं प्रकाशनिवर्त्यमंधकारं जयंती पराभवं कुर्वती यद्वा वाजशब्दो ऽन्नना
म सः पठितत्वादन्ननाम अन्नं वै वाज इति श्रुतेश्च । यजमानार्थमन्नं संपादयंतीत्यर्थः । कीदृशी सा युवतिः । मिश्र
णशीला नित्ययौवनत्वात् पुनर्भूः पुनर्भवनशीला प्रतिदिनं वर्तमानत्वात् । सोषाः पूर्वहूतौ सर्वेषां प्रथमा मुख्या श्री ॥९॥

प्रकृष्टा सती अगन् देवयजनदेशं प्रत्यागच्छति प्रथम इति मुख्यनाम प्रथमो भवतीति यास्कः । इतरेतरदेवेभ्यः पू
र्वमाहूता सती शीघ्रमेवागच्छतीत्यर्थः ॥ ॥ तृतीयामृचमाह ॥ यदद्य भागं विभजासि नृभ्य उषो देवि मर्त्यत्रा सु
जाते ॥ देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय ॥ ॥ यदद्य भागमिति ॥ सुजाते शोभनजनने दे
वि देवनशीले हे उषः उषःकालाभिमानिनि देवते मर्त्यत्रा मनुष्याणां पालयित्री त्वं अद्यास्मिन्काले नृभ्यो मनु
ष्येभ्यो यत्त्वं भागं भजनीयं स्ववीर्यप्रकाशस्यांशं विभजासि विभज्य ददासि ॥ यद्वा मर्त्यत्रा मनुष्येषु मध्ये नृभ्यो
नेतृभ्यो मनुष्येभ्यो यजमानेभ्यो ऽभिमतफलं दानमनाः यद्वा दांतमनाः दमूनाः दममना वा दांतमना वेति निरु
क्तवचनं ॥ तादृशः सविता प्रेरको देवो नो ऽस्मान् अनागसो वोचति पापान्यगयोग्यान् ब्रवीतु ॥ अनुगृह्णा
त्वित्यर्थः ॥ किमर्थं सूर्याय अस्मद्यागदेशं प्रति सूर्यस्यागमनार्थं ॥ ॥ चतुर्थीमृचमाह ॥ गृहंगृहमहना यात्य
च्छा दिवेदिवे अधि नामा दधाना ॥ सिषासंती द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनां ॥ ॥ गृहंगृहमिति ।

अहना उषो नामैतत्। अहना द्योतनेति तन्नामस्वरूपागात्। सा देवी। दिवे दिवे प्रत्यहं। दिवे दिवे द्युविषयवीप्स्यह
र्निमिस्वरूपाद्वा गृहं गृहं अच्छ अभिमुख्येन याति गच्छति। कीदृशी। अधि अधिकं नाम नमनं प्रवृत्तं प्रतिहत
मुद्योगं प्रकाशनरूपं दधाना आधारयंती यद्वा अधिदधाना। अधिधारयंती। किंच सिषासंती संभक्तुमि
च्छंती द्योतनशीला नूनं शश्वदिति दिनं आगात् आगच्छति। पूर्वं यातीत्युक्तत्वात्पुनरागादिति वचनमावृत्य द्योत
नार्थं आगच्छच वसूनां धनानां हविर्लक्षणानां अग्रमग्रमित् तत्तच्छ्रेष्ठं भागं भजते सेवते स्वीकरोतीत्यर्थः
॥ पंचमीमृचमाह॥ भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व। पश्चा स दध्या यो अघस्य
धाता जयेम तं दक्षिणया रथेन॥५॥ भगस्य स्वसेति॥ सूनृता सुष्ठु मनुष्याणां नेत्रि उषः हे उषो देवते भग
स्य सर्वैर्भजनीयस्यादित्यस्य स्वसासि स्वसृस्थानीयासि। सहोत्पद्यमानत्वात्। जनयं सुसादयं सस्यामप
यमयैन्य इति जामिः। यद्वा जमति गच्छति स्वोत्पत्तिस्थानादन्यत्रेति उक्तनिर्वचनद्वयमभिप्रेत्याह आह।

योगांतलोपौ। यद्वा द्यु अभिगमने। अदादिकः। छांदसे लङि। उतो वृद्धिर्लुकि हलीति वृद्धिः॥ ॥इति द्वितीयस्य प्रथमे तृती
यो वर्गः॥ ॥कृदिच्छेत्यस्मिन्नष्टादशोनुवाकेषु सूक्तानि तत्र पृथुरथ इति तृपं सूक्तं त्रयोदशार्चं अनुक्रमणिका पृथुः सं
तोनोषस्य त्विति। दीर्घतमसः पुत्रः कक्षीवानृषिः ऋषिश्चान्यस्मादिति परिभाषितत्वात्। अनादेशपरिभाषया त्रिष्टुप्छं
दः तु ह्यादि प्रयोगादिदमादिके सूक्ते उषो देवताके प्रातरनुवाके उषस्ये क्रतावस्यचोत्तरस्य च विनियोगः। आथौषस्य
इति खंडे सूत्रितं। पृथू रथ इति सूक्ते प्रत्यर्चिरिष्टाविति। तथाश्विनशस्त्रे इदमादिसूक्तद्वयस्य विनियोगः। प्रातरनु
वाकन्यायेनेत्यतिदिष्टत्वात्॥ ॥तत्र प्रथमामृचमाह॥ ॥पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः॥
कृष्णादुदस्थादर्या विहायाश्चिकित्संती मानुषाय क्षयाय॥ ॥पृथू रथ इति॥ दक्षिणायाः प्रवृद्धायाः स्वव्यापारकुश
लायाः उषोदेवतायाः पृथुर्विस्तीर्णो रथो अयोजि अश्वैर्युक्तः सन्नद्धो भूत्। अत्र यद्यपि देवताविशेषो न श्रुतः तथा
प्युषस्त्वादुष इति गम्यते॥ एतं सन्नद्धं रथं अमृतासो अमरणधर्माणो देवासो देवनशीला हविर्भाजो देवा अस्थुः।

यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इति श्रुतेः प्राणप्रज्ञयोरेकत्वात्प्रज्ञायाः शरीरधारणमविरुद्धं तथा अग्नयः
आहवनीयाद्याः शुशुचानासः अत्यंतं दीप्यमाना उदस्थुः उत्थितवंतु प्रज्वलयंत्वित्यर्थः ॥ किमर्थमेवमिति तदु
च्यते यतो विभाती विविधं भासमाना उषसः उषो देवता तमसापगूढ्हानि अंधकारेण संगोपितानि वसूनि व
सयोग्यानि यज्ञसाधनभूतहविरादीनि आविष्कृण्वं तियथावत्प्रवृत्तीः कुर्वंति तस्मात्स्तोत्रादिकं कुर्वंत्वित्यर्थः ॥
॥ सप्तमीमृचमाह ॥ ॥ अपान्यदेत्यभ्य१न्यदेति विषुरूपे अहनी संचरेते ॥ परिक्षितोस्तमो अन्या गुहाकरद्यौ
दुषाः शोशुचता रथेन ॥ अपान्यदेति ॥ इदानीमहोरात्रस्तुतिद्वारा उषास्तूयते विषुरूपे वक्ष्यमाणप्रकारेण
नारूपे अहनी अहश्च रात्रिश्चोभे संचरेते समियेकीभावे सहैवाव्यवधानेन चरतः ॥ अत्राह्नः सहचर्यत्वात्तियो
गित्वाच्च रात्रिरप्यहरित्युच्यते ॥ उक्तं च मंत्रांतरे अयमेवार्थः स्पष्टः आम्नातः । अहश्च कृष्णमहरर्जुनं च विव
र्तेते रजसी वेद्याभिरिति ॥ तयोर्मध्ये अन्यत् रात्रिरूपमहरपेति अपगच्छति प्रतिलोमं गच्छति वा अयेस्तस्य

प्रतिलोम्यमिति यास्कः ॥ अन्यच्च दिवसाख्यमहः अभ्येति आभिमुख्येन गच्छति । अभीत्याभिमुख्यमिति यास्कः ॥ रा
त्र्यां प्रतिनिवृत्तायां अहरभिमुखमागच्छतीत्यर्थः ॥ विषुरूपे संचरेते इति यदुक्तं तदेव स्पष्टीक्रियते ॥ परिक्षितोः प
र्यायेण निवसतोः परिक्षिपयतितो र्वा प्राणिनां अहस्वतीतेषु आयुषः क्षयात् परिक्षपणं प्रसिद्धं तयोर्मध्ये अन्या
रात्रिः तमस्तमोरूपो गुहा क्षयापित्रो गुहार्थानो गूहनं अकः करोति । अन्या अहरेकदेशभूता वोषाः शोशुचता भृ
शं दीप्तेन रथेन अद्यौत् । प्रकाशते । प्रकाशयति वा । सर्वरात्रिस्तमोरूपत्वात्सर्वं जगदावृणोति उषास्तु सर्वान्भा
वान् प्रकाशयतीत्युषसः श्रुतिः ॥ ॥ अष्टमीमृचमाह ॥ सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचंते वरुणस्य धाम ॥
अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परियंति सद्यः ॥ ॥ सदृशीरिति ॥ अस्मिन्नहनि सदृशीरित् परस्परं स
दृश्य एव खवइत परस्मिन्नाप्यहनि सदृशीः परस्परं सदृश्य एव उक्तं ह्योपि शब्दार्थः ॥ इद्धं ईद एवार्थः अद्यतनान्य
पि खस्तनीभिः सहैव दृश्यः श्वस्तन्यश्चाद्यतनीभिरेव महमंतरेण सादृश्यं कथं सादृश्यमिति तदुपपद्यते । यद

द्वि·भा·

॥१२॥

नक्षत्राणि न दृश्यंते सूर्यश्च नोदेति स उषःकालः स चैकत्रिंशति घटिकाभिः षट्त्रिंशतिपराभिश्च संमितः सूर्यो हि प्रति
दिनं एकोनषष्ट्यधिकपंचसहस्रयोजनानि मेरुं प्रादक्षिण्येन परिभ्रमति॥ तथा सति यत्र लंकादिभूप्रदेशे सूर्यो ग
च्छति तस्य तस्य पुरस्ताद्योजने उषा अभिगच्छति सूर्ये यस्मिन्देशे गच्छति तत्र त्रिंशद्योजने पुरस्ताद्देशस्थितानां उ
दितो दृश्यते। एवं सर्वप्रदेशेष्वपि। तथोषा अपि यत्र गच्छति ततः पुरस्तात् त्रिंशद्योजनभूभागवर्त्तिनां उदिता ए
वं लंकादिसर्वप्रदेशस्थितानामपि उषस उदयो वगंतव्यः एवं च सति कस्मिन्भूभागे यावत्कालं यथोषाः प्रकाशय
ति यथा भूभागांतरेपि तावंतं कालं प्रकाशयति एवमुक्तरीत्या एकस्मिन्नेवाहनि सर्वप्रदेशवर्त्तिनामपि उषसः सद्
स्यः प्रदेशबाहुल्यमपेक्ष्य उषसां बहुत्वाद्बहुवचनं एवमेकरूपा उषसः अनवद्याः शुभ्राः तासामुदयास्ते वैभाव
अनवद्या भविष्यंति इति किमु वक्तव्यं॥ तासां समनवद्यत्वे दीर्घे उक्तरीत्या अयं तमापतं वरुणस्य तमोनिवारकस्य सू
र्यस्य धाम स्थानं। मेरुवलयं स च तं प्रतिदिनं सेवंते। कियद्दूरमिति तदुच्यते। त्रिंशतं योजनानि त्रिंशद्योजनानि

श्रीः

॥१२॥

जामयेन भगि— जामिरत्व्ये स्वां जनयंति जामपर्याजमतेवस्याद्गत्विकर्मणो निर्गमन प्राया भवतीति। तादृशीत्वं प्रथ
मा इतरदेवेभ्यः पूर्वं विकृष्य वासनी जरस्व स्तुता भव जरतिः स्तुत्यर्थः। जरा स्तुतिर्जरतेः स्तुतिकर्मण इति यास्कः॥
पश्चात्तस्याः सनंतरं यो अघस्य धाता यः कश्चिद् दुःखस्य तदुत्पादकपापस्य वा धारयिता अस्ति स दघ्या गच्छतु वच
नव्यत्ययः दध्यतिर्गत्यर्थः दध्यतिर्दध्नोतीति गत्यर्थेषु पाठात् यदि स पापी जोषान् तं दक्षिणया प्रवृद्धया सहायभू
तया त्वया रथेन अस्मदीयरथादिसाधनेन च जयेम॥ ॥ इति द्वितीयस्य प्रथमे चतुर्थो वर्गः॥ ॥ षष्ठीमृचमा
ह॥ ॥ उदीरतां सूनृता उत्पुरंधीरुदग्नयः शुशुचानासो अस्थुः॥ स्पार्हा वसूनि तमसापगूळ्हाविष्कृण्वंत्यु
षसो विभातीः॥ ॥ उदीरतामिति। सूनृताः प्रियसत्यात्मिका वाचः उदीरतां उद्गच्छंतु। हे ऋत्विजः उत्कृष्टं यथा
भवति तथा स्तोत्रं प्रवर्त्तयध्वं। तथा पुरंधीः पुरंधयः पुरं शरीरं यासु धीयते याभिर्वा ताः पुरंधयः प्रज्ञाः प्रयोग
विषयाः ता अपुषेन्मितु यज्ञोपलक्षितानि कर्माणि प्रवर्त्तंतामित्यर्थः॥ यद्यपि प्राणवायुना शरीरं धार्यते तथापि

नहि नास्तीति । किं तु अहरहः सर्वेषु यागदिवसेषु । निष्कृते हविरादीनां प्रकाशरूपमलंकारं आचरंती कुर्वती ता दध्युषा अजनिष्टेति पूर्वत्रान्वयः ।। ।।दशमीमृचमाह ।। कन्येव तन्वा शाशदानाँ एषि देवि देवमियक्षमाणं ।। संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ।। ।।कन्येवेति ।। तन्वा शरीरेण शाशदाना शाशद्यमाना स्पष्टतां प्राप्नुवती शाशदानः शाशद्यमान इति यास्कः । कन्येव कमनीया कन्येव । कन्या कमनीया भवति क्वेयं नेतव्येति यास्कः । सा यथा जनांतिके वसना संचरति तथा हे उषस्त्वं कन्या कमनीया अप्रगल्भा सती तन्वा शरीरेण शाशदाना स्पष्टतां गच्छंती दृश्यसे पश्चात् प्रगल्भा सती हास्यं कुर्वती विभाती अत्यंतभासमाना वक्षांसि वक्षसोपलक्षितान् अवयवान् आविष्कृणुषे । प्रकटीकरोषि । यद्वा युवतिरुपमा यथा लोके प्रगल्भा योषित् प्रियतमस्य पुरतः संस्मयमाना दंतप्रदर्शनाय ईषद्धसनं कुर्वती वक्षांसि वक्षसोपलक्षितानि गोप्यानि बाहुमूलस्तनादीन्याविः करोति । तथा त्वमपीत्यर्थः ।। यद्वा पुरस्तात् पूर्वस्यां दिशि संस्मयमाना स्मितोपलक्षिता प्रकाशं कुर्वती युवतिः सर्वेषु भावेषु मिश्रणशीला

वक्षांसि वक्ष इति रूपनामसु पठितं तस्थानानि नीलपीतादीनि रूपाण्याविः करोति ।। ।।इति द्वितीयस्य प्रथमे पंचमो वर्गः ।। एकादशीमृचमाह ।। ।। सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कं ।। भद्रा त्वमुषो वितरं व्युच्छ न तत्ते अन्या उषसो नशंत ।। ।।सुसंकाशेति ।। हे उषो देवि मातृमृष्टा मात्रा जननीभिः शुद्धीकृता योषेव सुसंकाशा अत्यर्थं प्रकाशमाना त्वं तन्वं स्वकीयां तनुं दृशे सर्वेषां दर्शनाय आविष्कृणुषे । यथा लोके मात्रादिना स्वलंकृता अत्यंतं शोभमाना सती स्वकीयं लावण्योपेतं सर्वशरीरं दर्शनायाविः करोति । तद्वत्त्वमपीत्यर्थः ।। अत्र कमिति पादपूरणः । अत्र विशेषस्याभावात् शिशिरं जीवनाय कमितिवत् । तथा च यास्काचार्यः । मिताक्षरेष्वनर्थकाः कमीमिद्विति । यद्वा कमिति सुखवचनं सुखं यथा भवति तथा आविष्कृणुष इत्यर्थः । हे उषः यतः एवं करोषि । अतो भद्रा कल्याणशीला सती त्वं वितरं व्युच्छ । आवरकं अंधकारं विप्रकृष्टं यथा भवति तथा विवासय । अत्र यद्यपि विशेषो न श्रुतः । तथापि प्रकाशनिवर्त्यत्वात् परिहरणीयत्वाच्चासुदर्शनीयं तम एवेति गम्यते । अत्र यद्यत्किंचित्ते तव सुदर्शनं अन्या उषसः अतीता आगामिन्यश्च न नशंत । त

ह्याप्नुवंति तथा युच्छंतीति भावः।। नप्राति व्यापिधर्मा हिंछति नप्राति नक्षलतीति व्यापिधर्मस्य पालनात्।। ।।द्वादशीमृचमा
ह।। ।।अश्वावतीर्गोमतीर्विश्ववारा यतमाना रश्मिभिः सूर्यस्य।। पराच यंति पुनराच यंति भद्रा नाम वहमाना उ
षासः।। ।।अश्वावतीरिति। अश्ववतीः अश्ववत्यः बहुभिरश्वैस्तद्वत्यः तथा गोमती बहुभिर्गोभिस्तद्वत्यः।। वि
श्ववाराः विश्ववारा वरणीयाः कृत्स्ना यासां तथोक्ताः सार्वकालीन इत्यर्थः। यद्वा विश्वे वरिवारो यासां ताः विश्ववाराः
विश्वैर्वरणीया इत्यर्थः।। सूर्यस्य रश्मिभिर्यतमानाः सूर्यरश्मिभिः सार्धं तमोपि निवारणाय प्रयत्नं कुर्वाणाः य
द्यपि सूर्यरश्मय एव जगत्प्रकाशनाय भवंति। तथापि सूर्योदयात्पूर्वं तमोनिवारणस्यापेक्षितत्वात्। भासामपित्र
यतनमविरुद्धं रश्मिदेवता अपि प्रकाशिका इत्यर्थः।। किंच भद्रं कल्याणं स्तूयमानानाम नमनं सर्वजनानां कल्पे वहमा
नाधारयमाणाः उषसः उषोदेवताः पराच यंति च तथा पुनराच यंति च परस्परापेक्षयो भत्र च प्राहुः या एवाती
तेषु गतास्ता एव पुनः पुनर्दिनांतरेषु आयंति जगन्निर्वाहाय प्रतिगतं गतागतं कुर्वतीत्यर्थः।। ।।त्रयोदशीमृच

पुरतः सूर्यो यत्रोदेति। ततस्तत्र त्रिंशद्योजनं पुरस्तादुद्यतीत्यर्थः।। किंच आसां मध्ये एकैकोषाः लंकाद्येकैकभूभागवर्तिनां
क्रतुं गमनागमनादिरूपं कर्म तद्विषयां प्रज्ञां वा। तथा च निरुक्तं। क्रतुं दधिक्राः कर्म वा प्रज्ञां वेति। सद्यस्तदानीमेव सोदय
काल एव परियंति परितो गच्छंति निर्वहंतीत्यर्थः। तत्तद्भूभागविशेषेण सूर्यस्योदयो ज्योतिःशास्त्रे प्रसिद्धः।। उदयो लंकायो
कायां सोस्तमयः सवितुरेव सिद्धपुरे। मध्यान्हो यमकोट्यां रोमकविषये ऽर्धरात्रं स्यादिति।। ।।नवमीमृचमाह।। ।।
जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची। ऋतस्य योषा न मिनाति धामाहरहर्निष्कृतमाचरंती।।
जानत्यह्न इति।। ।। उषाः प्रथमस्य मुख्यस्य प्रथमानस्य वा अन्हो दिवसस्य नाम नमनमागमने जानती अवग
राग च्छंती प्राणिनां प्रज्ञापयंतीत्यर्थः।। सोषाः शुक्रा स्वतो दीप्ता अत एव श्वितीची श्वैत्यं श्वेतीयं गच्छंती प्रकाशं प्राप्नुवंती कृ
ष्णात् तमसः सकाशादजनिष्ट प्रादुर्भवति। यद्यपि तमसः सकाशान्नोत्पद्यते तथापि तदनंतरभावित्वात् तमस उत्पद्य
त इत्युपचर्यते।। ऋतस्य सत्यभूतस्य यज्ञस्य धाम देवयजनाख्यं स्थानं योषा मिश्रणशीला सती न मिनाति।

ह्या हवनीयादयः प्रज्वाल्यंते। उच्छंती तमो विवासयंती उर्विया उरु बाहुलं ज्योतिः प्रकाशं अश्रेत् सेवते प्रकाशते प्रकाश
यति वा सर्वं। कर्म्मिव उद्यन् सूर्य उपमा प्रधानो निर्देशः उदितः सूर्य इव सूर्यो यथा प्रकाशयति तथेत्यर्थः। अर्थात्तदुद
यानंतरं अस्मिन् कर्मणि वा सविता देवः सर्वस्य प्रेरकः सूर्यो नो स्मदर्थं नु क्षिप्रं अर्थ इत्येतद्विशेषणवाची नपुंसकलि
गः अर्येतर्याणि कृण्वन्नपांसीत्यादौ तथा दृष्टत्वात् अरणीयं द्विपत् पादद्वयोपेतं मनुष्यादिरूपं धनं प्रासावीत् अनु
जानातु ददात्वित्यर्थः॥ तथा च तुष्पत् पादचतुष्टयोपेतं गवादिरूपं धनं प्रासावीत्॥ किमर्थमित्येतद् द्विपदां चतुष्पदां
च गमनाय यद्वा नद्यादिसंबंधः। अस्मद्गमनागमनादिव्यापारायेत्यर्थः॥ ॥द्वितीयामृचमाह॥ अमिनती दैव्यानि व्र
तानि प्रमिनती मनुष्या युगानि॥ ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत्॥ ॥अमिनती इति॥ दैव्या
नि व्रतानि देवसंबंधीन्यग्निहोत्रादीनि कर्माणि व्रतमिति कर्मनाम व्रतं कर्म इति तन्नामसु पाठात्। तानि कर्माणि अमिनती
अहिंसती आनप्रदानेनानुकूलं कुर्वती तथा मनुष्याणां युगानि युगोपलक्षितान्निमिषादिकालावयवान् प्रमिनती प्रक

र्षेण हिंसती आयुः क्षपयंतीत्यर्थः॥ यद्वा युगानि युग्मानि परस्परसंयोगं प्रमिनती हिंसती वियोगं कुर्वतीत्यर्थः॥ उषःकाले
सर्वे यथा यथं स्वस्वव्यापाराय गच्छंतीति प्रसिद्धं॥ किंच॥ ईयुषीणां गच्छंतीनां प्रथमा आगामिनीनां उषसां प्रथमा भाविनी
सती व्यद्यौत्। विशेषेण प्रकाशते। यद्वा ईयुषीणां गमनशीलानां पश्वादीनां शश्वतीनां संतति प्रवाहरूपेण नित्यानां उपमा।
तद्वन्नित्येत्यर्थः। तथा आयतीनां रात्र्यवसानसमये उत्पद्यमानानां प्रत्नावागादीनां प्रथमभाविनी उषस्यागतायां वाचो बुध्य
यश्चस्फुरंतीति प्रसिद्धं। तादृशी देवी व्यद्यौत प्राणिनामनुग्रहाय द्योतते॥ ॥तृतीयामृचमाह॥ एषा दिवो दुहिता प्रत्यदर्शि
ज्योतिर्वसाना समना पुरस्तात्॥ ऋतस्य पंथामन्वेति साधु प्रजानतीव न दिशो मिनाति॥ एषा दिव इति॥ एषोषाः दिवो
द्योतमानात्स्वर्गस्य द्युलोकस्य दुहितुः स्थानीया। तत उत्पद्यमानत्वात् दुहितेत्युपचर्यते॥ पुरस्तात्पूर्वस्यां दिशि प्रतिप्रत्ये
कं अदर्शि दृश्यते। सर्वेषामपि प्राणिनामाभिमुख्येन प्रकाशत इत्यर्थः॥ कीदृशी सा ज्योतिर्वसाना तेजोरूपं वस्त्रमाच्छाद
यंती तेजसा प्रकाशयंती समना सम्यगनयित्री वेपयित्री अंतर्भावितण्यर्थोयं यद्वा सह युगपदेव मन्यते बध्यते प्राणिभि

ऋ॰भा
॥१६॥

शिति समनाय्य. यच्च नवधारणादनवग्रहः। सा हि ते श्री ऋतस्यादित्यस्य पंथां पंथानं मेरुप्रांतप्रदेशं अनुक्रमेण साधु सम्यगेति। गच्छति सूर्यो यत्र यत्र गच्छति तत्र तत्र पुरस्तादुषा अपि गच्छतीत्यर्थः॥ सैव विशेष्यते। प्रजानती प्रियभूतस्य सूर्यस्य मार्गोऽनया दिगंतव्य इति चेतयंतीव यथा लोके प्रियतमेनुरागयुक्ता काचित् स्त्री तं भर्तारं सर्वास्ववस्थासु न विमुंचति तथेत्यर्थः॥ चतुर्थीमृचमाह॥ उपो अदर्शि शुंध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि॥ अद्मसन्न ससतो बोधयंती शश्वत्तमागात् पुनरेयुषीणां॥ ॥उपो अदर्शीति॥ एषोषाः उपो इति निपातद्वयसमुदायात्मक एको निपातः सर्वैः समीप एव अदर्शि दृश्यते। तत्र दृष्टांतः। शुंध्युवो न वक्षः॥ अत्र नकार उपमार्थीयः उपरिष्टात् प्रयुज्यमानत्वात्। यत्र तु प्रतिषेधो विवक्षितः तत्र पुरस्तान्नकारः प्रयुज्यते। तथा च यास्कः॥ पुरस्तादुपचारस्तस्य यत्प्रतिषेधतीति तस्योदाहरणं। नेंद्रं देवममंसतेति। उपरिष्टादुपचारस्तस्य येनोपमिमीत इति। तस्योदाहरणं। दुर्मदासो न सुरायामिति शुंध्युरादित्यः सर्वेषां शोधकत्वात्। तस्य वक्षो वक्षःस्थानीयो रश्मिसमूहः स यथा प्रकाशमानो दृश्यते तथेत्यर्थः। यद्वा शुंध्युरिति च जलचरः श्वेतवर्णः

श्रीः
॥१६॥

माह॥ ऋतस्य रश्मिमनुयच्छमाना भद्रंभद्रं क्रतुमस्मासु धेहि॥ उषो नो अद्य सुहवा व्युच्छास्मासु रायो मघवत्सु च स्युः॥ ऋतस्य रश्मिमिति॥ हे उषः ऋतस्य सत्यभूतस्यादित्यस्य रश्मिं रश्मीन् अनुयच्छमाना आनुकूल्येन वर्तमाना त्वं भद्रंभद्रं क्रतुं वस्तुकल्याणं सर्वं लौकिकं वैदिकं कर्म तद्विषयां प्रज्ञां धेहि स्थापय। हे उषः नोस्मदर्थं सुहवा सुष्टु आह्वाता सती व्युच्छ तमो विवासय प्रकाशं कुर्वित्यर्थः॥ किमर्थमिति तदुच्यते। मघवत्सु मघमिति धननाम हविर्लक्षण धनयुक्तेष्वस्मासु यजमानेषु रायश्च स्युः॥ बहुविधानि धनानि संभवंत्विति पूर्वोक्तेन क्रतुना सहचर्यार्थश्चशब्दः॥ इति द्वितीयस्य प्रथमे षष्ठो वर्गः॥ ॥उषा उच्छंतीति त्रयोदशर्चं चतुर्थं सूक्तं दैर्घतमसः कक्षीवतः आर्षं त्रैष्टुभमुषस्यं उषा उच्छंतीति अनुक्रांतं विनियोगस्तु पूर्वसूक्त एवोक्तः॥ तत्र प्रथमामृचमाह॥ उषा उच्छंती समिधाने अग्ना उद्यन् सूर्य उर्विया ज्योतिरश्रेत्। देवो नो अत्र सविता न्वर्थं प्रासाविद्द्विपत्प्र चतुष्पदित्यै॥ ॥उषा उच्छंतीति॥ एषोषाः समिधाने अग्नौ अग्नित्वसामान्येकवचनं अग्निषु समिध्यमानेषु सत्सु एवमर्थे कृत्प्रयोगः। उषःकाले

धनादेव नोधा ऋषिर्भवति। नवनं दधाति स यथा स्तुत्यान्कामानाविष्कुरुते एवमुषा रूपाण्याविष्कुरुते। अद्मसद्
यान्नं भवति स अद्मसादिनीति वा अद्मसानिनीति वा ससतो बोधयंती शश्वत्तमागात्पुनरेयुषीणामिति॥ ॥पंचमीमृ
चमाह॥ पूर्वे अर्धे रजसो अप्त्यस्य गवां जनित्र्यकृत प्र केतुं॥ व्यु प्रथते वितरं वरीय ओभा पृणंती पित्रोरुपस्था॥
पूर्वे अर्धे रजस इति॥ अप्त्यस्य स्थापनशीलस्य विस्तृतस्य रजसो रंजकस्यांतरिक्षलोकस्य रजःशब्दोंतरिक्षलोक
वाची लोका रजांस्युच्यंत इति यास्केनोक्तत्वात् तस्य पूर्वे अर्धे पूर्वस्मिन्भागे जनित्री उत्पादयित्री गवां रश्मीनां
प्रकेतुं प्रज्ञानं प्रकृत प्रकर्षेण करोति। यद्वा रंजको रंजकस्याह्नो रजः शब्दो हर्वाची अस्तगहवी रजसी उच्येते इति यास्के
नोक्तत्वात्। तस्य पूर्वे अर्धे पूर्वस्मिन्भागे उषःकाले गवां वाचं जनित्री जनयित्री उत्पादयित्री उषःकाले सर्वेषां प्राणिनां
वाचः स्फुरंतीति प्रसिद्धं। यद्वा अप्त्यस्य कर्मसु स्थितस्य जंतोः केतुं गमनागमनादिरूपकर्मकेतुरिति तन्नामसु पा
ठात्। प्रकृत प्रकर्षेण करोति। किंच पित्रोः पालयित्र्योः द्यावापृथिव्योः उपस्था उपस्थे उत्संगे अंतराल प्रदेशे स्थिता

उभा उभे द्यावापृथिव्योः पृणंती स्वतेजसा पूरयंती यद्वा उभा उभयोः पित्रोरपि संबंधः वितरं विशिष्टतरं वरीयः उरु
तरं अतिविस्तीर्णं यथा भवति तथा व्यु प्रथते। विशेषेणैव प्रख्याता भवति॥ प्रकाशित इत्यर्थः॥ उ शब्दोवधारणार्थः
पादपूरणो वा मिताक्षरेष्वनर्थकाः कमीमिद्विति इति यास्केनोक्तत्वात्॥ ॥इति द्वितीयस्य प्रथमे सप्तमो वर्गः॥ ॥षष्ठी
मृचमाह॥ एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिं॥ अरेपसा तन्वा३ शाशदाना नार्भादीषते न महो
विभाती॥ एवेदेषेति॥ एषोषा। एवेत् इत्थमेवेत्यर्थः। एवमेवेदानीं भासमान प्रकारेणैव पुरुतमा विपुलतमा
असंतविस्तृता सती अजामिं विजातीयं मनुष्यादिजातिं न परिवृणक्ति परितः सर्वतो न वर्जयति तथा
जामिं सजातीयं देवजातिं न परिवृणक्ति॥ मनुष्यादिकं च तदुपलक्षितं लोकद्वयं वा कार्त्स्न्येन प्रकाशयतीत्यर्थः॥ किमर्थ
मिति तदुच्यते। दृशे कं सुखेन सर्वेषां दर्शनाय सुखं यथा भवति तथा सर्वान्दर्शयितुं किंच अरेपसा अपापया निर्म
लया तन्वा शरीरेण शाशदाना शाशद्यमाना शाशदानः शाशद्यमान इति यास्कः। स्पष्टतां गच्छंतीत्यर्थः॥ विभा

तीर्विशेषेण प्रकाशयंती सा अर्भादल्पात् पुत्रिकादेः सकाशात् अपेषते न गच्छति॥ तमपि प्रकाशयति तथा महो महतो
मेर्वादेः सकाशात् नेषते न गच्छति। तमपि प्रकाशयति॥ पूर्वश्लोके द्वयं प्रकाशनमुक्तं॥ इदानीमस्मिँल्लोके परमाण्वादि
पर्वतपर्यंतं कृत्स्नं प्रकाशयतीत्यर्थः॥ ॥सप्तमीमृचमाह॥ अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानां॥ जा
येव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः॥ अभ्रातेवेति॥ अभ्रातेव भ्रातृरहितेव पुंसः पित्रादीन् प्रति
प्रतीची यथा स्वधनार्जनात् प्रतिनिवृत्तमुखी सती एति गच्छति यथा लोके भ्रातृरहिता योषित् स्वोचितवासोलंकारा
दिलाभाय पितॄन् एति सति भ्रातरि स एवोचितप्रदानादिना सम्यक् तोषयति तदभावात् पितरमेव प्राप्नोति। यद्वा अस
ति भ्रातरि स एव पितुः पिंडदानादिकं संतानकृत्यं करोति। तस्याभावात् स्वयमेव तत्कर्तुं पित्रादीन् गच्छति तद्वदियमु
षा अपि स्वोचितप्रकाशादिलाभाय स्वप्रकाशनदानाय वा पितृभूतं सूर्यमाभिमुख्येन गच्छति। अयमेको दृष्टांतः॥ तथा
धनानां सनये गर्तारुगिव गर्त्तारोहिणीवेत्यपरो दृष्टांतः। गर्त्त इति गृहनाम रूढ योगर्त्त इति तन्नामसु पाठात्॥ अने:दि

पक्षिविशेषः स यथा स्वकीयं वक्षः प्रकाशयन् दृश्यते। तद्वदित्यर्थः। किंच नोधा इव प्रियाणि आविरकृत नवनं स्तोत्रं धारयती
ति नोधाः। एतन्नामा महर्षिः देवतास्तुतिव्याजेन नानाविधैर्मंत्रैः प्रियाणि स्वमनीषितान्याविः कृतवान्॥ तथैषापि स्वकी
यानि सर्वलोकप्रियाणि तेजांस्याविः करोति। किंच अद्मसन् अप्सुमायां यो नकारः अद्म तदस्य प्रान्ते तस्य पाकस्य गृहे सीद
तीत्यद्मसत् पाचिका योषित् ससतो बोधयंती सा यथा स्वपतः पुत्रादीन् भोजनाय प्रबोधयति तद्वत् यद्वा अद्मेति गृ
हनाम वरूथं अद्मेति गृहनाम ~~क्कूथं~~सु पाठात्। तत्र सीदतीत्यद्मसत्। जननी सा यथा स्वपतः पुत्रादीन् उषःकाले प्र
बोधयति तथा भुवनाख्ये गृहे सीदतीति तत्रस्थान् प्राणिनः प्रबोधयंतीयमुषाः आईयुषीणां आगमनशीलानां स्त्री
णां मध्ये शश्वत्तमा पुनः पुनरागच्छति। प्रातर्नियतमागच्छंतीनां वारयोषितां मध्ये स्वयमेका सती नियतमागच्छती
त्यभिप्रायः॥ अत्र निरुक्तं॥ उपादर्शि शुंध्युवः शुंध्युरादित्यो भवति शोधनात् तस्येव वक्षो भासाध्यूढमिदमपीतर
द्वक्ष एतस्मादेवाध्यूढं काये शकुनिरपि शुंध्युरुच्यते। शोधनादेवोदकचरो भवति। आपोपि शुंध्युव उच्यंते। शो

ऋ·भा·

।।१२।।

अभ्रातृकेव पुंसः पितॄनेत्यभिमुखी संतानकर्मणे पिंडदानाय नपतिं गर्त्तारोहिणीव धनलाभाय दाक्षिणाजीगर्त्तः
सभास्थाणुर्गृणाते॥ सत्यसंगरो भवति तं तत्र यया पुत्राया पतिकूलसायो हति तां तत्राक्षैराघ्नंति सा रिक्थं लभत
इति। जायेव पत्ये कामयमाना सुवासाः ऋतुकाले हृष्टा हसनेव दंतान् विवृणुते इति च॥ ॥अष्टमीमृचमाह॥ ॥
स्वसा स्वस्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव॥ व्युच्छंती रश्मिभिः सूर्यस्यांज्यंक्ते समनगा इव व्राः॥ ॥
स्वसा स्वस्र इति॥ एवमस्माद्देवो नरिक्षादुत्पन्नत्वात् परस्परं स्वसृभावः। तथाप्यन्हः प्राथम्यात्तेजस्वित्वाच्च ज्याय
स्यै स्वयमेव सरती। निवा स्वसा रात्रिः स्वस्रे ज्यायस्यै उत्कृ.री स्या ज्यैष्ठायै योनिं उत्पत्तिस्थानं अपररात्ररूपं आ
रैक् अरेचत् प्रादात् प्ररेचयतीत्यर्थः॥ तथा च पूर्वत्राम्नातं। एवा रात्र्युषसे योनिमारैगिति दत्वा च अस्या उत्प
न्नाया उषसे प्रतिचक्ष्येव ज्ञापयित्वैव स्वयमपसृत्यैव गच्छति ज्यायस्या मामतायां तस्यै स्वस्थानं दत्वा तत्तैस्स
निधौ स्थातुं चिंतमिति विज्ञाप्येवापगच्छंतीति भावः॥ एवमुत्पन्नैषा सूर्यस्य रश्मिभिः व्युच्छंती तमो विव

श्री

।।१२।।

र्जयंती अंजि व्यंजकं तेजः यद्वा अंजि व्यक्तं जगत् अंक्ते अनक्ति प्रकाशयति॥ विमिव समनगा इव सम्यग्गा
मनहेतवः आपः समनाः ताः गच्छंतीति समनगाः विद्युतः व्राः विद्युत्संघा इव यद्वा सम्यग्गमनाय गच्छंतीति
समनगाः सूर्यस्य रश्मयः ते इव व्राः व्राताः संघीभूताः ते यथा अंजं तेज गस्व व्राग्र्यैंति तथेत्यर्थः॥ व्रात इ
त्यत्र तकारलोपश्छांदसः॥ ॥अथ नवमी॥ आसां पूर्वासामहस्सु स्वसॄणामपरा पूर्वामभ्येति पश्चात्॥ ताः
प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छंतु सुदिना उषासः॥ ॥आसां पूर्वासामिति॥ स्वसॄणां परस्परं स्वसृभाव
मापन्नानी स्वयं सरंतीनां वा पूर्वासां पुरातनानां आसामुषसां मध्ये अहःसु अहःसु प्रतिदिनं अपरा अन्या
अद्यतन्युषाः पूर्वां अतीतदिवससंबंधिनीमुषसं यत् अनुसृत्य अभ्येति॥ अभिमुखं गच्छति॥ अव्यवधाने
न गच्छतीत्यर्थः॥ सर्वेष्वहस्सु एवमेवाभ्येति। नव्यसीः नवीयस्यः नवतरा आगामिन्यः ता उषसः उषोषिनू
नं निश्चयं प्रत्नवत् पुरातन्य इव सुदिनाः शोभनकर्मानुष्ठानसाधनदिवसाः शोभनदिनमुखा वा सत्यः अस्मे

द्वि॰भा॰
॥२०॥

अस्माकं रेवत् बहुधनविशिष्टं यथा भवति तथा उच्छ तु । प्रकाशयैं तु पूर्वतन्यो यथौच्छन् तथा आगामिन्योपि
उच्छंत्वित्यर्थः ॥ ॥ अथ दशमी ॥ प्रबोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससंतु । रेवदुच्छ मघवद्भ्यो
मघोनि रेवत्स्तोत्रे सूनृते जारयंती ॥ १० ॥ प्रबोधयोष इति । हे मघोनि मघवति अस्मभ्यं दातव्यैर्बहुभिर्धनैस्तद्व
ति उषः हे उषो देवि पृणतः हविःप्रदानं स्यांन्यजमानान् प्रबोधय प्रज्ञापय प्रतिबुद्धान् कुरु । किंच पणयः व्यव
सहिष्णवो वणिजः पणिर्वणिग्भवतीति यास्कः । पणय इति लुब्धका यागादीन कुर्वाणा अदानशीलाः अस्मच्छ
त्रवः ससंतु स्वपंतु दीर्घनिद्रा भवंतु म्रियंतामित्यर्थः ॥ तथा च मंत्रांतरं । ससंतु त्या अरातयो बोधंतु शूर रात
य इति । किंच । हे मघोनि अस्मद्दत्तहविर्भिः तद्वति हे उषः मघवद्भ्यः हविर्लक्षणान्नवद्भ्यो यजमानेभ्यः तेषामर्थं
रेवत् । धनवत् समृद्धिमत् उच्छ विभाहि । किंच हे सूनृते सुष्टु मनुष्याणां नेत्रि देवि जारयंती सर्वप्राणिनः क्षपयं
ती त्वं स्तोत्रे स्तुतिकर्त्रे यजमानाय तदर्थं रेवत् धनवत् समृध्यर्थं उच्छेति शेषः ॥ ॥ इति द्वितीयस्य प्रथमे अष्ट

श्रीः
॥२०॥

येन राजपुरुषैर्न्यायितिनेतृभिश्चाधिष्ठितं स्थानमुनेच्यते तदारोहतीति गर्त्तारुक् । यथा लोके काचिद्दुर्त्तृका योषित् ध
नानां स्वकीयरिक्थानां सनये लाभाय गर्त्तमागच्छति । सा तु सभ्या विचार्य यदीये रिक्थं लभते । वदक्षैः प्रतां द्युतदी
यं धनं वितरंति तथेयमपि धनानां प्रकाशानां सनये लाभाय गर्त्तमाकाशं सूर्यनिवासस्थाने आरोहति देशविशे
षाचारमपेक्ष्यैवं दृष्टमिति । किंच पत्ये उशती कामयमाना सुवासा दुकूलादिशोभवसना स्वलंकृता पूर्वरजोदर्श
नसमये मलिनवस्त्रा सती स्नानानंतरं शोभनवस्त्राभरणशोभमाना विशेषेण पतिं भोगाय कांक्षतीति तेन स
हसंती इति तथेयमुषा अपि नैशेनांधकारेण हृतत्वात् मलिनवसनापि प्रभाते स्वतेजसावृतत्वात् सुवसनास
ती प्रतिस्थानीयेन सूर्येण साकं संगच्छमाना हसनेव अप्सः दं तत्स्थानीयानि रूपाणि नीलपीतादीनि यदा निरू
प्यमाणानि पदार्थजातानि निरंतरिणी ते गमयति प्रकाशयतीत्यर्थः ॥ यथा लोके काचिद्रमणीया योषित् स्मि
तव्याजेन दंतान् विवृणुते तथेयमपि सर्वाणि रूपाणि प्रकाशयतीत्यर्थः ॥ अयं मंत्रो निरुक्ते स्पष्टं व्याख्यातः ॥ अ

छ्यादिति पूर्वत्रान्वयः॥ तस्मिन्काले ऽग्निः आहवनीयादिरूपः गृहंगृहं सर्वयजमानगृहं अग्निहोत्राद्यर्थमुपति
ष्ठते उद्दीप्यत इत्यर्थः॥ ॥अथ द्वादशी॥ उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ॥ अमा सते वहसि
भूरि वाममुषो देवि दाशुषे मर्त्याय॥ ॥उत्ते वय इति॥ ते तव व्युष्टौ सत्यां वयश्चित् गमनवंतः पक्षिणोपि चिद्विशेषे
पि च इत्यर्थः॥ निपातानामनेकार्थत्वात्॥ उच्चावचेष्वर्थेषु निपतंतीति यास्केनोक्तत्वात्॥ वसतेर्निवासस्थानान्नीडादे
रुत् उर्ध्वं अपप्तन् उत्पतंति पूर्ववाक्ये गृहंगृहमुपतिष्ठते॥ अग्निरित्युक्तत्वात् चशब्दः। किंच नरश्च मनुष्याश्च पितुभाजः अ
न्नवंतः अन्नार्थिनः कृषिवाणिज्यादिवृत्तिरं स्वस्वव्यापारार्थं उत् उन्मुखाः अपप्तन् गच्छंति। तथा मंत्रांतरं पद्वदी
यत उत्सातयति पक्षिण इति एवं सत्यां हे देवि देवनशीले उषो देवते अमा गृहे देवयजनाख्ये संतिष्ठते यजमानायत
दर्थं आ मे ति गृहनाम इति तन्नामसु पठितत्वात्॥ यद्वा अमा सह यजमानेनाग्निना सह निवसते यजमानाय अ
मावसेत्यमिसादैसहार्थेप्रयोगात्॥ ॥त्रयोदशी॥ ॥अस्तोढ्वं स्तोम्या ब्रह्मणा मेवीवृधध्वमुशतीरुषासः॥

युष्माकं देवीरवसा सनेम सहस्रिणं च शतिनं च वाजं॥१३॥ अस्तोढ्वमिति॥ एवं सूक्तद्वयोक्तरीत्या बहुधा स्तुत्वा
तां च स्तुतिं अनया निवेदयित्वा स्वाभीष्टं प्रार्थयते॥ हे स्तोम्याः स्तोमान् अर्हंतीति स्तोम्याः स्तुत्याः हि उषसः य
तो यूयं तादृशीतादृश्यः अतो मे मम स्वभूतेन ब्रह्मणा सूक्तद्वयगतमन्त्ररूपेण स्तोत्रेण अस्तोढ्वं स्तुती भवंति।
किंच। हे उषासः उशतीः स्तोतृन् स्मान् अस्मत्स्तुतिं वा कामयमाना यूयं अवीवृधध्वं। अस्मान्प्रवर्धयत। किंच
हे देवीः देव्यो देवनशीलास्तु युष्माकं अवसा युष्मत्संबंधिना रक्षणेन वयं सहस्रिणं सहस्रसंख्याकं अभीष्टं ध
नं सनेम लभेमहि। तथा शतिनं च वाजं शतसंख्याकं अपरिमितं धनं सनेम युष्मत्कृतेन शतसहस्रपरिमितध
नादिरूपरक्षणेन वयमपि अर्थिभ्यः सहस्रपरिमितस्य धनस्य सनितारः भवेमेत्यर्थः॥ ॥इति द्वितीयस्य प्रथ
मे नवमो वर्गः॥ ॥प्रातारत्नमिति सप्तर्चं पंचमं सूक्तं कक्षीवतो दानस्तूयमानत्वात् दानदेवत्यं। या तेनोच्यते
सा देवतेति परिभाषितत्वात्। त्रैष्टुभं उपरस्या द्विके द्वे जगत्यौ। प्रातारत्नं सप्त स्वनयस्य दानस्तुतिरित्यनुक्रमणिका॥

द्वि·भा·
॥२२॥

अत्रेतिहासमाचक्षते॥ ॥दीर्घतमसं कक्षीवान्नाम ऋषिर्ब्रह्मचर्यं चरिष्यन् वेदाभ्यासाय गुरुकुले चिरकाल
मुषित्वा वेदान्सम्यगधीत्य व्रतानि चरित्वा। तेनानुज्ञातः पुनः स्वगृहं प्रति प्रयास्यन् मध्ये मार्गे रात्रौ विश्रांतः
पुनः स्वगृहं प्रति प्रयास्यन्मध्ये मार्गे विश्रांतः प्रभाते भावयव्यस्य पुत्रः स्वनयो नाम राजा सानुचरः संक्रीडमानः
अकस्मात्कक्षीवतोंतिकमाससाद। स च रभसा प्रतिबुद्धः। सहसोत्तस्थौ तं च राजा पाणिं गृहीत्वा स्वकीयमा
सनमुपवेश्यास्य सौंदर्यमवगत्य स्वकन्यां प्रदातुं यतमनाः स्वगृहं प्रापय्य पप्रच्छ भगवन् कस्य पुत्र किंनामा त्व
मिति स च पृष्टो मातरं पितरं च स्ववृत्तांतं आचचक्षे स च राजा संभाव्य इत्यवगम्य मुदितमनाः स्वगृहं प्रापय्यास्मै
मधुपर्कपुरःसरं गंधमाल्यादिभिः पूजयित्वा सरथ दश कन्याः शतं निष्कान् अश्वशतं पुंगवानां शतं गवां षष्ठ्यु
त्तरसहस्रं पुनरेकादशरथांश्च प्रादात्। सर्वमनुक्रमेण प्रतिगृह्य दीर्घतमसोंतिकमागत्य तस्मै प्रादर्शयत्॥
ननु कक्ष्या नामाश्वबंधनी रज्जुः तद्वान् कक्षीवान्येन अप्रबंधने चरास्तु एवोचितं। अतोस्य राजत्वात्प्रतिग्रहे

श्री
॥२२॥

मोवर्गः॥ अथैकादशी॥ अवेयमश्वैद्युवतिः पुरस्ताद्युङ्क्ते गवामरुणानामनीकं॥ विनूनमुछादसति प्रकेतुर्गृहंगृ
हमुपतिष्ठाते अग्निः॥ ॥अवेयमिति॥ इयमुषा युवतिः यौवनोपेता योषित्स्थानीया यद्वा सर्वेषु भावेषु मिश्रयि
त्री पूर्वस्मात्पूर्वस्यां दिशि अवाश्वैत्। अयमर्थमागच्छति वर्धते वा अत्रावशब्दो विनिग्रहार्थीयः न्यवेति विनिग्रहा
र्थीयो वेति यास्केनोक्तत्वात् तत्स्वार्थमवगम्यत इति तत्राह॥ इयं अरुणानां अरुणवर्णानां गवां प्रसिद्धानां एत
द्भामकानामश्वानां वा अनीकं समूहं योजयति। अरुणा गावः उषसां श्यावाः सवितुरिति यथा लोके वाहनसन्ना
हं दृष्ट्वा प्रयाणमनुमीयते तथा नूनं निश्चितं एषा व्युछान्तमो विवर्जयिष्यतीयत इयं गा युनक्ति अत एव कारणात्
यथा लोके स्वसन्नाहं दृष्ट्वा गतयोनुमीयते तथात्रापीत्यर्थः॥ तादृशी सा असति असत्काये निरूपे अंतरिक्षे अ
क तिरोधाय [illegible]स्याद्दर्शनेन तमसि वा केतुः प्रकर्षेण ज्ञापयित्री(सती नूनं व्युछादिति पूर्वत्रान्वयः)। विविधं भासत इ
तिशेषः। उपसर्गविशाद्योग्यक्रियाध्याहारः॥ यद्वा असति तमोंधे रूपे अंधकारे प्रकेतुः प्रकर्षेण ज्ञापयित्री सती नूनं व्यु

भाव्यनुशो वेति चोभयत्र स्तोष्येति दातुर्भावयव्यस्य श्रूयमाणत्वात् तत्प्राथम्यमुपजीव्यं पृथगुपात्तं। वसूक्तस्य
पितुर्नाम्ना पुत्रस्यापि व्यवहर्त्तव्यत्वात्॥ तथा आरुद्रास इत्यादौ बहुशः प्रयोगदर्शनात्॥ स्वनयेन दत्ता इति
तत्रैव सत्त्वेन स्वनयस्यापि श्रूयमाणत्वात्तस्योभयत्रापि दानप्रतिग्रहीत्रोरेकत्वेनैकमेव दानप्रशंसारूपमाख्यान
मिति प्रसिद्धं॥ ॥ प्रातारत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते॥ तेन प्रजां वर्धयमान आयू रायस्
पोषेण सचते सुवीरः॥ ॥ स कक्षीवानानीतं सर्वं पितुर्निवेदयन् परोक्षेण च दानप्रकारं प्रशंसति स्वनयो नाम
राजा प्रातरित्वा प्रातरेवागमनः सन् शमागमः सन् रत्नं रमणीयं निष्कादिकं प्रातः प्रभाते एव लेदधाति अस्मत्संनि
धौ स्थापयति संस्थापितं सर्वं चिकित्वान् चेतनावान् आतुष्टमि सवगतवान् प्रतिगृह्य स्वीकृत्य निधत्ते पितुः स
मीपे स्थापयति॥ अनंतरं तेन दत्तेन निष्कादिना प्रजां पुत्रभृत्यादिरूपेव वर्धयमानः पोषयन् आयुर्जीवितं च व
र्धयन् सुवीरः शोभनैर्वीरैः पुत्रभृत्यादिभिरुपेतः सन् रायस्पोषेण धनानां पुनः पुनर्वर्धनेन सचते ऽसौ स

ना संगच्छतमिति दातुराशिषं प्रार्थयते॥ ॥ अथ द्वितीया॥ सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इंद्रो दधा
ति। यस्त्वायंतं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति॥ ॥ सुगुरसदिति॥ अत्र कक्षीवतः पिता आनीतधने
न संतुष्टो राजानं बहुप्रकारेणाशास्ते॥ असौ स्वनयो राजा सुगुः सन् शोभनैः गोभिः तद्वान् भवतु। तथा सुहि
रण्यः सुष्टुभिर्हितरमणीयैर्धनैस्तद्वान् भवतु तथा स्वश्वः शोभनैरश्वैस्तद्वान् असत् अस्मै प्रदात्रे राज्ञे बृहत्
प्रभूतं वयः अन्नं इंद्रः परमेश्वरो धर्मदेवता दधातु ददातु। यतो यं राजाऽस्मै गोहिरण्याश्वान्नानि बहुसंख्या
कानि दत्तवान्॥ अतस्तेषामुचितैव कस्येयमाशीरिति सउच्यते। यः यो राजा प्रातरित्वः प्रातरागामित्वातिथेः
पुत्रः आयंतं गुरुकुलादागच्छंतं पदिं पथिकं यद्वा यागं तारं त्वात्वी वसुना अन्नसाधनेन गवादिधनेन उत्सिना
ति। गमनतः उत्कृष्टं बध्नाति। गतिं निरुणद्धीत्यर्थः॥ प्रतिबंधे दृष्टांत उच्यते। मुक्षीजयेव यदि मुच्यमाना सती
बंधनं जनयतीति मुक्षीजया मृगपक्ष्यादिबंधिनी रज्जुः तया पाशरज्वा यद्वा पदिंगतारं मृगपक्ष्यादिकं उत्सिनाति।

बध्नाति। तथा मया अननुज्ञातमपि लोगमनं प्रतिबध्यय थेष्टदानाद्यो राजा तोषयति स एवं भवति॥ गंतुरि
ति पदं व्याचक्षाणेन यास्केन तदुदाहरणतयायं मंत्रो व्याख्यातः॥ सुगुर्भवति सुहिरण्यः स्वश्वो बृहदस्मै
वय इंद्रो ददाति यस्त्वायंतमन्नेन प्रातरागमिन्यति थे मुक्षीजयेव पदिमुत्सिनाति॥ कुमारो मुक्षीजा मोचनाद्धू त्र
गयनाद्य जननाद्धेति॥ ॥अथ तृतीया॥ आयमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन॥ अंशोः सुतं
पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः॥ ॥आयमद्येति॥ प्रातः पूर्वेद्युः प्रभातकाले यदा धनं दत्तवान् तस्मि
न्नेव काले सुकृतं शोभनस्य कर्त्तारं त्वां इच्छन् प्राप्तुमिच्छन् कदा द्रक्ष्यामीति कामयमानो हं अद्यास्मिन्दिने इदानीं
आयं प्राप्नोमि। अत्र यद्यपि केवलं प्रातरित्येव श्रुतं न पूर्वेद्युरिति तथापि अद्यायमित्युक्तत्वात्॥ अर्थात्पूर्वेद्युः प्रात
रिति गम्यते॥ किं कृत्वा इष्टेः इष्टसाधनस्य यागस्य वा पुत्रं पुरुत्रातारं पुत्रः पुरुत्रायत इति यास्कः। कर्त्तारमित्यर्थः॥ केन
साधनेनेति॥ तदुच्यते। वसुमता रथेन समृद्धधनवता रथेन साधनेन यद्वा तेन सहित इति सहार्थे तृतीया॥ किं

नोपपद्यते ब्राह्मणस्य षट्कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापनेनैव विरुद्धाच्च प्रतिग्रह इत्युक्तत्वात्
ब्राह्मणस्यैवाधिकारो न तु क्षत्रियस्येति नैष दोषः॥ यद्यप्यसौ कलिंगस्य राज्ञः पुत्रः स्तथापि तेन कलिंगराजेन
स्वयं वृद्धत्वाद पत्योत्पादनाय सामर्थ्यमलभमाने तदुत्पादनाय याचितो दीर्घतमा ऋषिः उशिज्नामकां अपत्योत्पा
दनाय प्रेषितया राजमहिष्या अतिजरठेन महर्षिणा सह रंतुं लज्जमानया स्ववस्त्राभरणैरलंकृत्य स्वप्रतिनि
धित्वेन प्रेषितां उशिज्नामिकां योषितं दासीमित्यवगत्य स्वमंत्रपूतेन जलेनाभिषिच्य ऋषिपुत्रीं कृत्वा तया सह रेमे॥
तदुत्पन्नः कक्षीवान्नाम ऋषिः एतत्सर्वमस्माभिः पूर्वाध्याये नासत्याभ्यामित्यत्र सूक्ते विस्तरेण प्रतिपादितं॥ अतो
स्य क्षत्रियसंबंधात्कक्षीवान्निति नामोपपन्नं॥ दीर्घतमसः परमर्षेरुत्पन्नत्वेन ब्राह्मणत्वात्प्रतिग्रहो प्युपपन्न
एव॥ दशमादिसूक्तद्वयं स्वनयस्य राज्ञो दानप्रशंसाख्यानप्रतिपादकं॥ ॥नन्वनुक्रमण्यां स्वनयस्य दानस्तुतिरि
ति दानस्तुत्यो भावेति चोभयत्र स्तोतव्यं भिन्नमेवावगम्यत इत्युच्यते॥ उत्तरस्य सूक्तस्य प्रथमायामृचि अधिक्षियतो

द्वि॰भा॰

॥२५॥

गानामग्निष्टोमा सकलादग्निष्टोमस्य प्रकृतित्वात्तस्य ज्योतिष्टोमेन स्वर्गकामो यजेतेति स्वर्ग एव फलत्वेन श्रुतः
नाकादिकमिति वाच्यं स्वर्गविलक्षणत्वाद्दिकमनयापि सोमयागस्य कर्तुश्च स्यात् न केवलं सोममनुतिष्ठतामेव महत्फ
लं अपितु सुकृतसाधनानि कर्मांतराणि अधितिष्ठतामपि महत्फलमस्त्येवेति दर्शयति॥ पृणंतं पितॄन्प्रीणयंतं
पृपेरिं प्रीणनशीलं इष्टदानादि प्राणिनः सर्वदा प्रीणयंतं च पुरुषं अश्वस्येव अन्नमिच्छं यः अन्नसमृद्धिहेतवो घृ
तस्य धाराः यद्वा घृतकुल्या विस्रवतः सर्वतः उप उपयंति प्राप्नुवंति प्रीणयंतीत्यर्थः॥ ॥अथ पंचमी॥ नाकस्य
पृष्ठे अधितिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति। तस्मा आपो घृतमर्षंति सिंधवस्तस्मा इयं दक्षिणा पिन्व
ते सदा॥ ॥नाकस्य पृष्ठ इति। सोमयागप्रशंसाप्रसंगेन सामान्यतो दानमेतद्दक्षिभिस्त्रिभिः प्रशंसतीति यद्वा सो
मस्यैव प्रस्तुतत्वात् दक्षिणायुक्तस्य यागस्य एव प्रसिद्धत्वाच्च सर्वत्र परिसमाप्तेः॥ सोमयाग एव प्रस्तूयते। यो यो
मर्त्यः पृणाति हविरादिना दानेन देवादीन्प्रीणाति स नाकस्य कमिति सुखं नाम तद्विरुद्धमकं न विद्यते अकं दुःखं

श्री

॥२५॥

तत्साधनं पापं वेति नाको द्युलोकः। तथा च स्तूयते॥ न वा अमुं लोकं जग्मुषे किंचनाकमिति। तस्य पृष्ठे उन्नते उपरिदेशे
श्रितः सन् अधि अधिकं आकल्पांतं तिष्ठति यद्वा अधितिष्ठति अधिष्ठाय प्रमुखो भूत्वा तिष्ठति न केवलं स्वर्गाश्रय
णं किं तु। देवेषु मध्ये गच्छति वर्तते स्वयमेव देवो भवतीत्यर्थः॥ हेति प्रसिद्धौ किंच तस्मै प्रीणयित्रे पुरुषाय सिंधवः स्यं
दनशीला आपः घृतं तेजो वत्सारं अतिगच्छंति रसवत्यो भवंतीत्यर्थः॥ किंचेयं भूमिरपि दक्षिणा सस्यादिफलसंपादने
दक्षा सती सदा सर्वकालं पिन्वते सेचयति तोषयतीत्यर्थः॥ दातुः जीवसाधनान्नोदकानि हविरादीनि समृद्धानि भवंती
त्यर्थः॥ ॥अथ षष्ठी॥ दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः। दक्षिणावंतो अमृतं भजंते दक्षि
णावंतः प्रतिरंत आयुः॥ ॥दक्षिणावतामिति॥ दक्षिणावतां बहुविधगोहिरण्यादिरूपं दक्षिणा प्रदातॄणां इच्छब्द
एवकारार्थः तेषामेवार्थे। इमानि भूमौ दृश्यमानानि चित्राणि वर्णनीयानि स्रक्चंदनमणिमुक्तादिरूपाणि द्रव्याणि
समृद्धानि भवंतीति शेषः॥ किंच दक्षिणावतामेव दिवि द्युलोके सूर्यासः सूर्यसंबंधिनो लोकाः तदनुग्रहीताभोगवा

समृद्धा भवंतीति। किंच दक्षिणावंत एवामृतं जरामरणरहितं स्थानं भजंते। यद्वा दानेनापहतपाप्मान आत्मानं विदित्वा
अमृतमविनाशिनं मोक्षं भजंते प्राप्नुवंति विविदिषंति यज्ञेन दानेनेति श्रुतेः। किंच दक्षिणावंत एवायुः प्रतिरंते। अति
दीर्घमायुष्यं वर्धयंते लभंते प्रपूर्वस्तिरतिर्वर्धनार्थः॥ इति सर्वत्र संबध्यते॥ ॥अथ सप्तमी॥ मा पृणंतो दुरि
तमेन आरन्मा जारिषुः सूरयः सुव्रतासः॥ अन्यस्तेषां परिधिरस्तु कश्चिदपृणंतमभि सं यंतु शोकाः॥१०॥ ॥मा
पृणंत इति॥ अन्वयव्यतिरेकाभ्यां दानं प्रशंसितुमाह॥ पृणंतो देवादीनि हविरादिना प्रीणयंतो संतः दुरितं यथा भ
वति तथा माप्नेदुःखं एनः तत्साधनं पापं च मारन्मा प्रापुवन् नकेवलं दातार एव अपितु सूरयः देवानां स्तोतारोपि विद्वां
सो मा जारिषुः जरया न जीर्णा भवेयुः। तथा सुव्रतासः शोभनकर्मचांद्रायणादिनियमवंतोपि मा जारिषुः तर्हि नो
मा जनः कुइति स उच्यते। तेषां दातॄणां स्तोतॄणां च तेभ्योन्योयः कोपि पुरुषः परिधिः पापस्य परिधारकोस्तु। यद्वा अ
न्योयः कश्चन पापदेवः तेषां परिधिस्थानीयो पापवारकोस्तु। यथा अग्नेः परिधिः स्वयं रक्षःप्रभृतिभिर्बाध्यमा श्रीः
॥२६॥

च मदानीतेन धनेन अंशोः अंशुः मतः वल्लीरूपस्य मत्सरस्य मानसाधनस्य मत्सरः सोमो मंदतेस्तृप्तिकर्मण इति नि
रुक्तं तस्य सुतं अभिषुतं रसं पायय इष्टसाधनं सोमयागं कुर्वित्यर्थः॥ कृत्वा च क्षयद्वीरं क्षियंतो वसंतो वीराः पुत्र
भृत्यादयो यस्य तं। तादृशं त्वदिष्टसाधनवद्वधनप्रदातारं सूनृताभिः प्रियसत्याभिर्वाग्भिर्वर्धय समृद्धं कु
रु॥ पुत्रभृत्यादिवीरैर्यथा प्रवृद्धो भवति तथा कामयेयेत्यर्थः॥ ॥अथ चतुर्थी॥ ॥उप क्षरंति सिंधवो मयोभुव ईजा
नं च यक्ष्यमाणं च धेनवः॥ पृणंतं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यंति विश्वतः॥ ॥उपक्षरंतीति॥ पूर्वस्यामृ
चि आनीतेन धनेन सोमयागं कुर्वित्युक्तं॥ तमेव सोमयागं फलदर्शनेन स्तौति॥ सिंधवः स्यंदनशीलाः प्रस्रवणरूप
पाथराः सिंधुः स्यंदनादिति यास्कः॥ मयोभुवः सुखभावयित्र्यः मय इति सुखनाम मयः स्याम बूमिति तन्नामसु पाठा
त्। धेनवः प्रीणयित्र्यो गावः ईजानं सोमयागमनुतिष्ठंतं तथा यक्ष्यमाणं क्रतुं कुर्वंतं च मैवं च समीजानं अपितु यक्ष्य
इयवसितवंतमपि उपउपेयक्षरंति स्रवंति प्रीणयंतीत्यर्थः॥ नच पूर्वस्यामृचि सोमं पिबेत्युक्तत्वात्सर्वेषां सोमया

आमंदानिति कक्षीवान्दानं तुष्टाव पंचभिर्भावयव्यं तुष्टावांत्ये अनुष्टुभौ भावयव्यरोमशयोर्दंपत्योः संवाद इत्युक्तो वि
नियोगः ॥ ॥ तत्र प्रथमा ॥ अमंदान्स्तोमान्प्रभरे मनीषा सिंधावधि क्षियतो भाव्यस्य ॥ यो मे सहस्रममिमीत सवानतू
र्तो राजा श्रव इच्छमानः ॥ ॥ अमंदानिति ॥ सिंधौ सिंधुदेशे यद्वा लक्षणया सिंधुतीरे समुद्रतीरे अधिक्षियतः अधि
वसतो भाव्यस्य भावयव्यस्य तत्पुत्रस्य स्वनयस्येत्यर्थः ॥ तस्य मंदान् अनल्पान् स्तोमान् स्तोत्राणि तन्निष्ठबहुविध
दानकीर्तनानि मनीषा मनीषया प्रियातिशयबुध्या प्रभरे विशेषेण संपादयामि ॥ कुतस्तस्य विशेष इति तत्राह ॥ अतू
र्तः केनाप्यहिंसितो राजा मे मदर्थं सहस्रं तत्संख्याकान् सवान् सूयंते सोमा येष्विति सवाः सोमयागाः तान् अमि
मीत संपूर्णधनप्रदानेन निर्मितवान् किमिच्छन् श्रवः सर्वैः श्रूयमाणां कीर्तिमात्मन इच्छमानः कामयमानः यतोयं
आर्त्विज्याद्युपाधिना विना कीर्त्यर्थमेव बहुधनं प्रादात् अतस्तौ स्तौमीत्यर्थः ॥ ॥ अथ द्वितीया ॥ शतं राज्ञो ना
धमानस्य निष्कांछतमश्वान्प्रयतान्सद्य आदं ॥ शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवो जरमाततान ॥ ॥ शतं

राज्ञ इति ॥ नाधमानस्य स्वकीर्त्यर्थमित्युच्चैर्याचमानस्य असुरस्य धनानां निरसितुः दानशीलस्य राज्ञः स्वतेजसा दी
प्यमानस्य स्वनयस्य निष्कान् आभरणविशेषान् इयत्ताविशेषणविशिष्टानि निष्कान् सुवर्णानि शतसंख्याकानि शतं
सहस्रमित्यपरिमितवचनः अपरिमितान् सद्यः प्रार्थनानंतरमेव कक्षीवानहं आदं आदत्तवान् स्वीकृतवा
नस्मीत्यर्थः ॥ तथा प्रयतान् शुद्धान् लक्षणोपेतान् अश्वान् अध्वगमनसमर्थान् हयान् आदं आत्तवान् तथा गोनां
पुंगवानां बलीवर्दानामित्यर्थः ॥ उत्तरमंत्रे स्त्रीगवीनामभिधानात् तेषां शतं आदं ॥ एवं प्रदाता राजा दिवि द्युलोके
श्रवः कीर्तिं अजरं शाश्वतीं आततान विस्तारितवान् गवादिप्रतिग्रहेण स्वर्गे कीर्तिमकरवमित्यर्थः ॥ ॥ अथ तृतीया ॥
उप मा श्यावाः स्वनयेन दत्ता वधूमंतो दश रथासो अस्थुः ॥ षष्टिः सहस्रमनु गव्यमागात्सनत्कक्षीवाँ अभिपि
त्वे अह्नां ॥ ॥ उप मेति ॥ स्वनयेन दत्ताः श्यावाः तद्वर्णाश्वैर्युक्तत्वात् श्यावाः वधूमंतो आरूढाभिर्वधूभिस्तद्वंतः
दश एतत्संख्याकाः रथासो रथाः उपास्थुः उपस्थिताः गव्यशब्दो गोसमूहवाची षष्टिः सहस्रमनु गव्यं षष्टि

ऋ॰ भा॰ ॥२८॥

क्सहस्रं गवां समूहः अन्वगात् प्राप्नोत्। आत्मने परोक्षेण ब्रवीति तत् सर्वं प्रतिगृह्यायं कक्षीवान् अह्नां दिवसानां म
ध्ये अभिपित्वे संनिहिते ऽनिसन तस्मै कृतं रथवध्वादिकं स्वपित्रे समर्पयति स्वयं वा स्वीकरोति। अभिपित्वशब्दः
आसन्नकालवाची प्रपित्वशब्दवत्। स च प्रपित्वे अभीक इत्यासन्नस्येति यास्केनोक्तत्वात्॥ आसन्नवचनः उपस
र्गभेदेऽपीत्यर्थः॥ ॥अथ चतुर्थी॥ चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयंति॥ मदच्युतः कृशनाव
तो अत्यान् कक्षीवंत उदमृक्षंत पज्राः॥ ॥चत्वारिंशदिति। दशरथस्य दशसंख्याकरथवतः सहस्रस्य सहस्रसं
ख्यानुचरोपेतस्य कक्षीवतो गोयूथसहस्रस्य वाग्रे पुरस्तात् शोणाः शोणवर्णोपेताः अश्वाः चत्वारिंशत् एकैकस्य र
थस्य चतुष्ट्वये सति दशरथानां मिलित्वा चत्वारिंशत्संख्याका भवंति। ते च श्रेणिं पंक्तिं आश्रित्य नयंति रथानामभिमतदे
शं प्रापयंति। युक्तास्वनियुक्तास्त्। श्रेणिं श्रेणीभावं नयंतीति॥ एकैकस्मिन् रथे चत्वारश्चत्वारः पंक्त्याकारेण वहंतीत्यर्थः॥ अथ
तान् कक्षीवंतः कक्ष्या रथसंबंधिनी रज्जुः कक्ष्या रज्जुरश्वस्येति यास्केनोक्तत्वात्॥ ताभिस्तद्वंतः यद्वा अंगिरसः पु

श्रीः ॥२८॥

नः स्वां तर्हि तमग्निं रक्षंतीति तद्वत्। तथा च अन्योयः धर्मविशेषः तेषां परिधिः परिधानमस्तकवचस्थानीयोस्त। त
र्हि कं प्राप्नुयुरित्युच्यते। अपृणंतं देवादीन् अप्रीणयंतं अदातारं लोभवंतं। चित्तपीडः तस्य अधभूताः पाप्मानो वा अभि
अभिमुखे संयंतु सम्यक् प्राप्नुवंतु। वयं सुखिनो भवेमेत्यर्थः॥ अत्र यद्यपि सामान्येन दानमात्रं श्रूयते तथापि स्व
स्तुतस्य स्वनयनदानस्तुतिरूपत्वात् दुःखानि तमायंत्वित्यर्थः॥ ॥इति द्वितीयस्य प्रथमे द्वादशो वर्गः॥ ॥अमंदा
निति सप्तर्चं सूक्तं। सप्तेत्यनुवर्तते ना स पूर्वं आदितः पंचानां कक्षीवानृषिः षष्ठ्या भावयव्यः सप्तम्या रोमशा नाम ब्रह्म
वादिनी आदितः पंचानां भावयव्यस्य स्तुतिरूपत्वात् स एव देवता याते नोच्यत इति न्यायात् अंत्ययोः षष्ठीसप्तम्योस्तु
भावयव्यरोमशयोः संवादः षष्ठ्या भावयव्यः सप्तम्या रोमशा यद्यपि स्वनयनदत्ता इति श्रूयमाणत्वात् तस्यैव स्तुत्या
भाव्यैव तथापि पितृपुत्रयोरभेदात् [illegible] इतिवत् पितृनाम्नाव्यवहर्तुं शक्यत्वात् प्रथमायामृचि भावयव्यस्य स्तुतत्वा
च्च भावयव्यं तुष्टावेत्येतदविरुद्धमित्युक्तं पूर्वसूक्त एव॥ आदितः पंच त्रिष्टुभः। अतो अंत्ये अनुष्टुभौ॥ तथा चानुक्रांतं

द्वि॰भा॰
॥२७॥

नर्वधुभ्यो निवेदनासंभवात्तु वधूमतो दश रथासो अस्थुरिति ॥ दशानां रथानामुक्तत्वादत्र चत्रीन ष्टादिविशेषक्त दशानां
वक्ष्यमाणत्वात्तु वधूः शिष्टानामन्येभ्यो दातुमनुचितत्वाच्चान्यानीति युक्तानुक्तानामेवानुवदनपक्षे दशवधूयुक्ता रथाः
एको धनपूर्ण इति विवेकः ॥ उक्तानामेव रथादीनां पुनरभिधानं प्रहृष्टत्वापनार्थं सर्वे ब्राह्मणा आगताः सिष्वागतइ
तिवत् ॥ इदानीं परोक्षेणाह ॥ स्कबंधवः स्कोभनाविद्यायोनिसंबंधिनो येषां ते तथोक्ताः । यद्वा स्कोभनबंधवोपेताः पर
स्परमनुरागयुक्ता इत्यर्थः ॥ विव्राः प्रजाः तत्रभवा विव्र्यां स्त्रियेत इति व्राः व्राताः तकारलोपश्छांदसः ॥ विव्रांव्रातोयथा
परस्परमनुरागवंतः । तथा ते अपीत्यर्थः ॥ प्रजाः अन्नवंतः अंगिरसस्सेतान प्रभावये सेति स्कबंधवः अनस्वंतः त्र
कटवंतः हविर्धाननिरूढसोमवतोपलक्षितसोमयागवंतः । तथैते संतः श्रवः सर्वत्र श्रूयमाणकीर्तिः एषां त इच्छंतु व्रातद
र्थमादद इति शेषः ॥ ॥ अथ षष्ठी ॥ आगधिता परिगधिता या कशीकेव जंगहे ॥ ददाति मह्यं यादुरी याशूनां भोज्या
शता ॥ ॥ आगधितेति ॥ संभोगाय प्रार्थितो भावयव्यः स्वभार्यां रोमशा मप्रौढेति बुध्या परितो गृहीता आदराति

श्रीः
॥२९॥

शयार्थं पुनर्वचनं गंध्यं गृह्णाते रियास्वः ॥ यद्वा आगधिता आसमंतात्तमिश्रयंती ओतरं प्रजननेंद्रियं भुजादिभिरित्य
र्थः ॥ गध्यतिर्मिश्रीभावकर्मेति यास्कः ॥ पूर्वस्मिन्पक्षे पुरुषस्य प्राधान्यं उत्तरस्मिन्योषित इति भेदः ॥ कीदृशी सा जंग
हे अत्यर्थं गृह्णाति कदाचिदपि न विमुंचति ॥ अत्यागे दृष्टांतः ॥ कशीकेव कशीका नाम सकुलवत्सा नकुलस्य यथा पत्यास
ह चिरं क्रीडति । न कदाचिदपि विमुंचति । तथैषापि । किंच भोज्या एषा यादुरीया दुरिस्कंद कनाम रेतो लक्षणमुदकं प्र
सूतं ददातीति यादुरी वदूरेतो युक्तेत्यर्थः ॥ तादृशी सती या शतानां संभोगानीयशा इति प्रजनननाम तस्मिन् बंधीनिकुसिलि
याभूनि भोगार्थं शता शतानां संख्या तानि मह्यं ददाति । रोमशा नाम बृहस्पतेः पुत्री ब्रह्मवादिनी परिहसंतं स्वपतिं प्रत्या
ह ॥ ॥ अथ सप्तमी ॥ उपोपम इति ॥ भोः पते मे मां द्वितीयार्थे चतुर्थी उपोप द्वितीय उपशब्दः पादपूरणः उपेत्य परा
मृश स्पर्शं कुरु स्पर्शं भोगयोग्यमवगच्छेत्यर्थः ॥ यद्वा मे मम गोपनीयमंगं उपोप परामृश अत्यंतमांतरं स्पृश परामर्श
भावइत्यर्थं निवारयति । मे मदंगानि रोमाणि दभ्राणि मामन्यथाः । अल्पानि मा बुध्यस्व ॥ दभ्रमल्पकमित्यल्पस्येति नि

द्वि.भा.
॥३॥

र्थं तु ॥ दभ्रं दभ्नोतेरिति यास्कः ॥ अदभ्रत्वमेव विवृणोति ॥ अहं रोमशा बहुरोमयुक्तास्मि यतोहमीदृशी अतः
सर्वासंपूर्णावयवास्मि ॥ रोमशत्वे दृष्टांतः ॥ गंधारीणामिव अविकेव गंधारदेशोत्तेषां संबंधिन्यविजातिरिव तद्देश
स्थो अवयो वा मेषा यथा रोमशाः तथाहमस्मि ॥ यद्वा गंधारीणां गर्भधारिणीनां अविका अस्यर्थे तर्पयंती योनिर्
वतासौ आप्रसवे रोमवृक्षादि निवृत्तेनस्य तत्स्त्रो निषिध्यते द्यो निर्दिष्टा रोमशा भवति अतः सोपमीयते यतोह
मीदृशी अतो मा मम दभ्राणि मा मा बुध्यस्वेत्यर्थः ॥ इति द्वितीयस्य प्रथमे एकादशो वर्गः ॥ ॥ विंशोऽनुवाके सप्तसू
क्तानि तत्र अग्निं होतारं इति प्रथमं सूक्तं एकादशर्चं दिवोदासपुत्रस्य परुच्छेपस्यार्षं आग्नेयं आद्यष्टसहितार्धं द्वस
स्याष्टसप्तम्यक्षरातिधृति उत्कृत्यति कृतिसंकृति विकृत्या इति प्रकृति कृत्यतिधृति धृत्यत्यष्टिप्रचनुरुत्तरशतादक्षर
मारभ्य चतुर्णां परिहाणमेवैकमुक्तो छंदो जायते तथासत्यत्यष्टिः अतिधृती उक्तसंख्यायेते स्यातां एतत्सर्वं छंदो ग्रंथे च
तुःशतमुत्कृतिरित्यादिसूत्रैः प्रतिपादितं सूक्तस्य विशेषविनियोगो लैंगिकः ॥ दशरात्रस्य षष्ठेहनि प्रातःसवने प्रस्थि

श्री
॥३॥

त्राः सर्वे कक्षीवंतः अथवा कक्षीवदनुचराः सर्वेपि छत्रिन्यायेन कक्षीवंतः पज्राः अश्वान् अयंत संतो मदच्युतो मदस्राविण
उद्धतान् शत्रूणां मदस्य च्यावयितृत्वात् कृशनावतः सुवर्णमयनानाभरणयुक्तान् कृशनमिति हिरण्यनाम कृशनेके
हमिति तन्नामसु पाठात् सुवर्णाभरणोपेतान् अत्यान् सततगमनशीलान् अश्वान् उद मृक्षंत। अध्वश्रमजनितस्वे
दापनयाय उत्कृष्टं मार्जयंति ॥ ॥ पंचमीमृचमाह ॥ ॥ पूर्वामनु प्रयतिमाददे वस्त्रीन्युक्तां अष्टावरिधायसो गाः ॥
सुबंधवो ये विश्या इव व्रा अनस्वंतः श्रव ऐषंत पज्राः ॥ ॥ पूर्वामन्विति ॥ इदानीमानीतं धनं बंधुभ्यो निवेदयन्नाह ॥
हे सुबंधवः पूर्वां प्रयतिं पूर्वप्रदाने अनु तमनु सूत्य वक्ष्यमाणान् रथादीनि युष्मदर्थं आददे स्वीकृतवानस्मि ॥ यद्वा पू
र्वप्रतिं यं प्रदेयं रथादिकं अनुदानक्रमेणैव आददे प्रतिगृहीतवानस्मि ॥ युक्तानिति त्रीन् अष्टौ च युक्तान् चतुर्भिर
श्वैर्धनैर्वा रथान् युक्तानीति शेषः ॥ अत्र संख्या पृथक् निर्देशो न विवक्षितः ॥ तथा अरिधायसः अरिभिरीश्वरैर्धारणी
याः बहुमूल्या असंख्याता गाः श्च आददे अत्र वक्ष्यमाणानि पूर्वं प्रतिगृहीतानि दशधिकानीति युक्तं पूर्वमेव पित्रे निवेदितान्प्र

तं यथा बहु मन्यंते तथा त्वामपि स्तौमीत्यर्थः ॥ उक्तगुणविशिष्टो यो देवः स्वध्वरः शोभनयज्ञवान् यतते सम्यक् निर्वहन्
ऊर्ध्वया उन्नतया उत्कृष्टतया देवाच्या देवान् पूजयंत्या देवान् प्रत्यक्तया कृपा कृपया सामर्थ्यलक्षणया देवो देवान् प्रत्य
क्तया कृपयेति यास्कः ॥ तेभ्यो हविर्वहन वह्निः उक्तः स नु आ जुह्वानस्य आसमंतात् हूयमानस्य सर्पिषः सरणशीलस्य
घृतविलापनेन दीप्तस्याज्यस्य विभ्राष्टिं विशेषेण भ्राजमानं अनुष्वयमपि तदाज्यं शोचिषा ज्वालया वष्टि कामय
ते स्वीकरोतीत्यर्थः ॥ ॥अथ द्वितीया॥ यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमंगिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्म
भिः ॥ परिज्मानमिव द्यां होतारं चर्षणीनां ॥ शोचिष्केशं वृषणं यमिमा विशः प्रावंतु जूतये विशः ॥ ॥यजिष्ठं त्वेति॥
हे विप्र मेधाविन् शुक्र दीप्तज्वालाग्ने यजिष्ठं अतिशयेन यष्टृतमं त्वा त्वां यजमानाः वयं यष्टारः हुवेम। आह्वयाम॥
यतो वयं यजमानाः यतश्च त्वं यजिष्ठः अतो हुवेमेत्यभिप्रायः। कीदृशं त्वां अंगिरसां अंगिरोगोत्रोत्पन्नानां मध्ये
ज्येष्ठं ज्यायांसं यद्वा अंगिरसां अंगाराणां मध्ये ज्येष्ठं ज्वालायुक्तत्वात् । अंगिरसा अंगारा इति यास्कः ॥ अवाये

अंगारा आसंस्ते अंगिरसोऽभवन्निति श्रुतेः ॥ केन साधनेनेति तदुच्यते। मन्मभिः मननसाधनैर्विप्रेभिः विशेषेण प्री
णयितृभिः मन्मभिर्मंत्रैः यद्वा विप्रेभिः मेधाविभिः ऋत्विग्भिर्मन्मभिर्मंत्रैश्च संहिता वयमिति संबंधः ॥ तदाह्वाना
मानं तं परिज्मानं परितो गच्छंतं द्यामिव सूर्यमिव होतारं देवानामाह्वातारं कस्मै अर्थे चर्षणीनां मनुष्याणामेतदर्थं मनु
ष्याणां यजमानानामर्थे यद्वा चर्षणीनां पूर्वं मनुष्याणामेव सतां पश्चाद्यागादिसाधनत्वेन देवत्वमापन्नानां देवानां
आह्वातारं तथा शोचिष्केशं वृत्रवदसंतायत ज्वालोपेतं वृषणं वर्षितारं एवं रूपं यं विशः त्वमेव निविशमानाः इमा
विशः प्रजा यजमानरूपाः प्रजाः जूतये स्वर्गाद्यभिमतफलं प्राप्तुं तु प्रकर्षेण प्रीणयंतु तादृशं त्वां हुवेमेति संबंधः ॥ ॥
अथ तृतीया॥ ॥स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः ॥ वीळु चिद्यस्य समृतौ
श्रुवद्वनेव यत्स्थिरं॥ निःषहमाणो यमते नायते धन्वासहा नायते॥ ॥स हि पुरू चिदिति॥ स हि स एव पूर्वस्तुतत्वग्
निः विरुक्मता विशेषेण रोचनवता ओजसा ज्वालारूपेण बलेन पुरू चित् अत्यधिकमेव दीद्यानः दीप्यमानः द्रुहं

द्वि॰ भा॰

॥३२॥

हंतरः द्रोग्धॄणां छेदनाय प्रयुक्तः। परशुर्न परशुरिव स यथा अमोघं हि नास्ति तथाऽयमपि। किंच यस्याग्नेः संमृतौ
संगतौ संयोगे वीळु चित् दृढमपि पाषाणादिकं श्रुवत् गच्छेत्। द्रावयेत। तथा यदस्थिरं यच्च पर्वतादि स्थिरमपि चास्ति
तं तदपि श्रुवत् वीळ्विति दृढनाम वीळु च्योत्नमिति तन्नामसु पाठात्। तत्र दृष्टांतः वनेव उदकमिव उदकं यथाऽ
ग्निसंयोगे क्षरति तथेत्यर्थः। अस्यैतद्दृढं स्थिरमपि हि नास्ति अस्मद्द्रोग्धारं शत्रुं हि नास्तीति द्विमुवत्त्वं यमियस्याभि
प्रायः। किंचायमग्निः निःषहमाणः शत्रून्निःशेषेणाभिभवन्न पलायते। तत्र दृष्टांतः। धन्वसहा न। धनुषा शत्रून
भिभवतीति धन्वसहा धानुष्कः स हतेरसन्न छंदसा यपोलः। स यथा शत्रोरभिमुखं विध्यति न पलायते तद्वदि
त्यर्थः। यद्वा दृढहननकर्मा धन्वसहः। अस्मिन्पक्षे पचाद्यच् सुपां सुलुगिति साकारः दृढधन्वाप्यसन्नायते न चलति।
॥ ॥ अथ चतुर्थी॥ दृळ्हा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नये दाष्ट्यवसे॥ प्र यः पुरू
णि गाहते तक्षद्वनेव शोचिषा॥ स्थिरा चिदन्ना निरिणात्योजसा नि स्थिराणि चिदोजसा॥ ॥ दृळ्हा चिदिति॥ अ ॥श्रीः॥

॥३२

तयाज्यानां पुरस्ताद्द्वादश ऋचः प्राकृताभिश्च सह यष्टव्याः। तत्राग्नीध्रस्यैषा प्रथमा षष्ठस्य प्रातःसवन इति खंडे सूत्रितं।
अग्निं होतारं मन्ये दास्वंतं दध्यङ् ह मे जनुषं पूर्वो अंगिरा इति॥ ॥ सैषा प्रथमा॥ अग्निं होतारं मन्ये दास्वंतं वसुं सू
नुं सहसो जातवेदसं विप्रं न जातवेदसं॥ य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा॥ अग्निं होतारमिति॥ अग्निं सर्वा घृतस्य वि॰
सां देवसेनानीं अग्रगण्यं यज्ञेष्वग्रं नीयमानं गतं। होतारं अस्मद्यागं प्रति देवानामाह्वातारं यद्वा होमनिष्पादकं होता
रं जुहोतेर्होतेत्यौर्णवाभ इति यास्कः। अग्निमद्य होतारं वृणीते इति श्रुतेः॥ अग्निमग्न आवहेति च अग्नेराह्वातृत्वं
प्रसिद्धं। अग्निं होतारं मन्ये इति संबंधः। यद्वा यागनिष्पन्ने रेवरूपे क्षितत्वादेतदेव विधेयविशेषणं। इतराणि वक्ष्य
माणविशेषणानि श्रुतिपराणि दास्वंतं अतिशयेन दानवंतं वसुं सर्वेषां निवासहेतुं सहसः सूनुं बलस्य पुत्रं अग्नि
र्मथनकाले बलेन मथ्यमान उत्पद्यत इति पुत्रत्वमुपचर्यते। जातवेदसं जनानां वेदितारं जातप्रज्ञं जातधनं वा जात
वेदःशब्दो यास्केन बहुधा निरुक्तः। अग्नेर्जातवेदस्त्वे दृष्टांतः। विप्रं न जातवेदसं जातवेद्यं मेधाविनं ब्राह्मणमिव

द्वि॰भा॰
॥२३॥

ष्टं तः। वने वृक्षादिसमूहानि वनानि यथा प्रविश्य तक्ष्णति दहति तद्वेत्यर्थः। किंचायमग्निः स्थिराः स्थिराणि कठिणानि द्री
ह्यादीनि नु जसा तेजोरूपया ज्वालया यानि नितरां रिणाति गच्छति। पचतीत्यर्थः। री गतिरेषणयोः। क्र्यादिः। प्वादीनां
ह्रस्व इति ह्रस्वः। तथा नु जसा स्ववीर्येण तेजसा स्थिराणि अपरणीयानि पापानि अमित्राणि वा निरिणाति निःशेषेण ग
च्छति नाशयतीत्यर्थः॥ ॥अथ पंचमी॥ तमस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दिवातरादप्रायुषे दिवात
रात्॥ आदस्यायुर्ग्रभणवद्वीळु शर्म न सूनवे॥ भक्तमभक्तमवो व्यंतो अजरा अग्नयो व्यंतो अजराः॥१२॥ ॥तमस्ये
ति॥ अस्याग्नेः पृक्षं हविर्लक्षणमन्नं उपरासु उपरमंते तस्मिन् हवींषीति उपराः वेदिसमीपभूमयः तासु धीमहि स्था
पयामः। अस्येत्युक्तं कस्येत्याह॥ योग्निः नक्तं रात्रौ दिवातरात् अन्होपि सुदर्शतरः अत्यंतं सर्वैर्दर्शनीयो भवति।
यतोयं रात्रौ सर्वेषु भावेषु तमसावृतत्वाददृश्यमानेष्वपि स्वयमसर्थं प्रकाशते अतोस्मै धीमहि। पुनः कीदृशाय दि
वातरात् अन्हः सकाशात् दिव अप्रायुषे प्रगतमायुर्यस्यासौ प्रायुः न प्रायुः अप्रायुः तस्मै असौ योस्तमेति सर्वेषां भू ॥श्री॥ ॥२३॥

तानां प्राणानां योदोस्तमेतीति श्रुतेः॥ रात्रौ सर्वे भावा निद्रयावृतत्वात् प्रायुष इव भवंति। अयमग्निस्तु सर्वप्राणि प्राण
पहर्तुः सूर्यस्य रात्रौ स्वस्मिन्नेव प्रवेशात् प्रकृष्टायुर्भवति॥ अतोपि धीमहि। किंच आत् एवं कारणात् यतोयं सुदर्श
तरः यतश्चायमप्रायुः अतः कारणात् अस्य अस्मै तदर्थं आयुर्हविर्लक्षणमन्नं ग्रहणायुक्तमभूत्। ग्रहणे दृष्टां
तः॥ सूनवे पुत्राय पित्रा वीळु शर्म दृढं सुखसाधनं गृहं यथा ग्रहणवद्भवति तथेत्यर्थः॥ शर्मेति गृहनाम। शर्म वर्मे
ति तन्नामसु पाठात्। इदानीमाहवनीयादिरूपेणाग्नेर्बहुत्वमपेक्ष्याह। एते अग्नयः नक्तं सेवमानं अभक्तं असेवमा
नं च व्यंतः एते प्राणिनः अनुग्राह्या इति बुध्यमानाः अवः रक्षंति यद्यपि विशेषेण प्राणिनः दाहपाकादिद्वारा रक्षंति
तथाप्यत्र यजमानेष्विति शायदत्याह॥ व्यंतः तैः प्रत्तैर्हविरश्नंत अजरा भवंति स्वयं हविषा अजराः संतो यजमाना
नप्यजरान् कुर्वंतीत्यर्थः॥ ॥इति द्वितीयस्य प्रथमे द्वादशो वर्गः॥ ॥अथ षष्ठी॥ ॥स श्रेधीं न मारुतं तुविष्व
णिरप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः॥ आदद्धव्याददिर्यज्ञस्य केतुरर्हणा॥ अध स्मास्य हर्षतो हृषी

वतो विश्वे जुषंत पंथां नरः शुभे न पंथां ॥ ॥ सहि शर्ध इति ॥ सहि स खलु स्वकृत्यतया प्रसिद्ध एवाग्निः तुविष्वणिः तुवी
ति बहुनाम उरु तुवीति तन्नामसु पाठात् बहुस्वनिः प्रभूतध्वनियुक्तो वर्त्तते अयं तज्ज्वालिते ग्नौ वायुसंपर्कात् भुगुभु
गिति ध्वनिरुत्पद्यते ॥ प्रज्वलतीत्यर्थः ॥ ध्वननेतृस्तेनः मारुतं शर्धो न परिन्न संबंधि वलभिव मरुतां समूहो यथा ध्वनय
ति जयेत्यर्थः ॥ कुत्रेति तदुच्यते ॥ अप्नस्वतीषु खननप्रोक्षणादिकर्मोपेतासु अप्न इति कर्मनाम अप्नो दंस इति तन्नामसु
पाठात् ॥ उर्वरासु रुचरणयुक्तासु श्रेष्ठासु वेदिभूमिषु कृष्टभूमीयं इष्टनिः यष्टव्यः कुण्डिकोनिवृनु उग्रमश्व ॥ किंच आ
र्त्तनासु आर्त्तनं करोति आर्त्तयतीत्यार्त्तनाः पृतनाः तासु षष्पसु अथो युचू दृषादिलर दाद्युदात्तत्वं ॥ तासां जयाय इ
ष्टनिः एष्टव्यः यष्टव्यो वा ॥ किंच एवं खनयन्नग्निः हव्या आज्यपुरोडाशादीनि आ दर्न भेक्षे अत्ति यति ॥ छांदसो लङ्
यद्वा अङ् पूर्वादृश्वाते आडो दोनास्य हैं विणे इति यत्नयेनात्मनेपदाभावः ॥ गातिस्थेति सिचो लुक् छांदसो हृस्वः ॥ कृ
वःजादेव वा छांदस्य पिदृत्वयलङ् इत्यनजादेरिप्य उगमः ॥ तथा यज्ञस्य केतुः प्रज्ञापकः केतुस्थानीयो वा अर्हणाहृजं

स्मा अग्नये दृल्हा चित् दृल्हान्येव सारवंति तर्वीषि अनुक्रमेण प्रतिमंत्रं दुः ददाति ॥ ददातेर्लुङि गातिस्थेति सिचो लुक् आ
त इति सेर्जुस् ॥ यजमानाः दाने न दक्षं ता ॥ यथा विदे विदुषे परमार्थदर्शिने उत्कृष्टानि धनानि वितरंति दानशीलाः ॥ यद्वा
अस्या मग्निर्यथा विदे विंदते स्वातिरिक्तं हविर्देवेभ्यो दातुं लभते स्वीकरोति ॥ तथा दुरिरिति विंदतेश्छंदसः शपो लुक् ॥ लो
पस्त आत्मनेपदेष्विति तलोपः ॥ किंच सो ग्निस्तेजिष्ठाभिररणिभिः अन्यतैर्तेजोयुक्तैर्मार्गयित्रादिरूपैः दाष्टि पूजितः स
न् स्वर्गादिकं ददाति दाशृ दाने शपो लुक् ॥ किमर्थं अवसे रक्षणाय यद्वा तेजिष्ठाभिः अतिशयेन तेजोवद्भिः अरणिभि
र्गमनैः इतरदेवानुद्दिश्य यजमानेन दत्तं हविः अवसे तेषां स्वीकाराय दाष्टि अयमग्निर्दतिनयति ॥ किंच अग्नये इतर
देवताप्रदानसमये पि यजमानः अवसे अग्निप्रीतये दाष्टि प्रथमं ददाति ॥ किमर्थं अवसे रक्षणाय यद्वायमतद्वतः स्यात्
इतरेभ्यो दत्तमिति स्वयं स्वीकुर्यात् ॥ तस्मादग्नये प्रयाजादिरूपेण ददातीत्यर्थः ॥ किंच यो ग्निः पुरूणि बहूनि सामर्थ्यात्
यजमानदेयधनादीनि प्रगारहते ॥ प्रविशति प्रविश्य च कृत्याद्रिरूपया ज्वालया तक्षत् तनूकरोति नाशयतीत्यर्थः ॥ तत्र द

द्योतमानाः नमस्यंतः नमस्कारोपलक्षितत्वमुपस्थानं कुर्वंतो भृगुगोत्रोत्पन्ना महर्षयः उपब्रोचंत। उपेत्य ब्रुवंति॥ किं कु
र्वंतः दारुणदानेन निमित्तभूतेन हविर्दानार्थं मथ्नंतः अरणीभ्यामग्निं मंथनं कुर्वंतः तथा भगवः भ्रष्टारो हविषां
पावकानीवा किंचाग्निः शुचिर्दीप्तः धर्णिः धारणकुशलोयमग्निः एषां दीयमानानां वसूनां हविर्लक्षणानां ईशे ईष्टे स
मर्थो भवति लोपस्त आत्मनेपदेष्विति तलोपः॥ यद्वा एषां इज्यमानानामग्निमुक्तादीनां ईशे प्रदातुमितिशेषः
किंचायमग्निः मेधिरः मेधायुक्तः तद्वान् स्वयं यष्टृत्वेन प्रधानभूतः सन् प्रियान् स्वप्रीतिहेतून् आज्यादीन् अवि
धीन् पर्यग्निपर्यंतं दत्तान् वनिषीष्ट संभक्तवान् संभजतां वा। तथा मेधिरः मेधावान् असौ आवनिषीष्ट अन्यदे
वताकृष्वपि यज्ञेषु स्वयमाज्यभागप्रयाजादिरूपं हविः संभजते॥ ॥ अथाष्टमीमृचमाह॥ ॥ विश्वासां त्वा विशां
पतिं हवामहे सर्वासां समानं दंपतिं भुजे सत्यगिर्वाहसं भुजे॥ अतिथिं मानुषाणां पितुर्न यस्यासया। अमी च वि
श्वे अमृतास आ वयो हव्या देवेष्वा वयः॥ ॥ विश्वासां त्वेति॥ विश्वासां सर्वासां विशां प्रजानां समानमेकरूपं पतिं

हवामहे दहनपचनाद्युपकारस्य सर्वेषां समत्वात्। तथा दंपतिं दमपतिं गृहपतिं द्वितीयावत्। दम इति गृहनाम दमेकृ
तिरिति तन्नामसु पाठात्। अकारलोपश्छांदसः॥ किमर्थं भुजे यजमानैर्दत्तहविर्भक्षणाय स एव विशेष्यते। सत्यगि
र्वाहसं यथा संचोदितपूर्वगिरो वाहसायस्य स तं तादृशं हवामहे इतिशेषः॥ वहिहाधाञ्भ्यः इत्यसुन्णिदित्यनु
वृत्ते रूपधावृद्धिः। पुनः कीदृशं मानुषाणां मनुष्याणामतिथिं अतिथिवत्पूज्यं द्रष्ट्रातिथिमपेक्ष्य गंतारं वा। किंच यस्याग्नेः आ
सया समीपे आसे सीदंति आसनाम आसा अंबरमिति तन्नामसु पाठात्। तत्समीपे अमी विश्वे अमृतासः हविर्भोक्तृ
त्वेन प्रसिद्धाः सर्वे देवा अपि आगच्छंति उपसर्गवशाद्योग्यक्रियाध्याहारः॥ किमर्थं। वयः हविर्लक्षणमन्नमुद्दि
श्य अग्निमुखादेव तेरेभ्यो दीयमानत्वात्। तत्र दृष्टांतः। पितुर्न पितुरंतिके पुत्रादयो यथान्नाद्यर्थं सेवंते तद्वत्।
किंच वयः नेतारः ऋत्विजोपि देवेषु इतरेषु इज्यमानेषु मध्ये हव्या हवींषि आददः यज्ञये वेतेरौण्यादिको द्विविधा
गुणः॥ ॥ अथ नवमी॥ त्वमग्ने सहसा सहंतमः शुष्मिंतमो जायसे देवतातये रयिर्न देवतातये। शुष्मिंतमो हि ते

मदो द्युम्निंतम उत क्रतुः। अध स्मा ते परि चरंत्यजर श्रुष्टीवानो नाजर॥ ॥ त्वमग्न इति। हे अग्ने सहसा बलेन सहं-
तमः अतिशयेन शत्रूणामभिभविता तथा शुष्मिंतमः अतिशयेन तेजस्वी जायसे॥ सहेरौणादिकः कनिन् नाद्घ-
स्येति नुट्। किमर्थं देवतातये देवानां विस्तारयुक्ताय यागाय तदर्थं यज्ञनामैतत्॥ यद्वा उक्तगुणविशिष्टः सन् जाय-
से अरेरण्योरुसद्यसे यज्ञार्थं देवे दृष्टांतः। रयिर्न देवतातये धनं यथा यथाय यज्ञार्थं सुसद्यते तथा चोक्तं यज्ञार्थं द्र-
व्यमुत्पन्नमिति किंच ते तव मदः आज्यस्वीकारजनितो हर्षः शुष्मितमः अतिशयेन बलवान् हि शब्दः प्रसिद्धौ आ-
ज्येनाग्नेर्मदो भवतीति प्रसिद्धं अपि वा तव क्रतुः कर्मविशेषोपि द्युम्निंतमः यशोयुक्तः अन्नयुक्तो वा खलु द्युम्नं द्योतते-
र्यशो वान्नं वेति यास्कः॥ अध अतः कारणात् अजर हे जरारहिताग्ने ते त्वां परिचरंति यजमानाः तत्र दृष्टांतः श्रुष्टीवा-
नो न दूता इव ते यथा वार्ताविशेषप्रधानेन राजानं सेवंते। तद्वत् छंदसीवनिपाविति वनिप् छांदसं प्रत्ययाद्युदात्त-
त्वं। अजर भक्तानामजरयितुः अंतर्भावितण्यर्थात् यद्वा अजरः अस्तोतः जरा स्तुतिः असौ न कस्यापि

नीया। सुपां सुलुगिति शेराकारः। प्रत्ययाद्युदात्तत्वं छांदसं॥ किंच हर्षतः हविर्भक्षणाद्यंत हर्षयुक्तस्य यद्वा अभिमतफ-
लदानेन यजमानान् हर्षयतः हर्षवतः आज्यस्वीकारेण हर्षयुक्तस्याग्नेः पंथां पंथानं मार्गं विश्वे सर्वे मनुष्याः जुषं-
त असेवंत वा। किमर्थं शुभे शोभाय शोभनाय ऐहिकामुष्मिकस्य फलस्याग्नेरेव मार्गं सर्वे अनुगच्छंति अग्निमेव प्री-
णयित्वा साधयंति। मार्गाश्रयणे दृष्टांतः। यथा लोके नरो मनुष्यः शुभे युवशंताय स्पृष्टवालये पंथानं सर्वे गंतव्यं
निर्भयं प्रोदमार्गमिव॥ ॥ अथ सप्तमी॥ द्विता यदीं कीस्तासो अभिद्यवो नमस्यंत उपवोचंत भृगवो मथ्नंतो दा-
शा भृगवः॥ अग्निरीशे वसूनां शुचिर्यो धर्णिरेषां॥ प्रियाँ अपिधीँर्वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः॥ ॥
द्विता यदीमिति॥ यदिति द्विविधं यत्र यज्ञे विंध द्विविधं मापन्नः द्विः प्रकारं सब्बश्रौत स्मार्तभेदे द्वित्वमापन्ने यद्वा उपल-
क्षणमेतत्। आहवनीयादिरूपेण नानाविधां यद्वा द्विता द्विवप्रापधाय ऐहिकामुष्मिकमेव फलाय उभयाय विभक्ते
राजादेशः। ईं इममग्निं कीस्तासः कीर्तनं कुर्वंतः स्तोतारः पचाद्यच् छंदसं सत्वं स्वनवत्त्वं अभिद्यवः आभितो

स्तोति॥ तत्र दृष्टांतः॥ ऋभूणां महतां धनवतां अग्ने रेभो न वदीवत्ऋषीगतो कुण्णादिकु कुप्रत्ययः नामयतस्यामितिवामऊ
दात्तत्वं। यद्वा ऋभूणामित्येतद्धोतृविशेषणं ऋभूणां तानवतां मध्ये श्रेष्ठोयं होतेत्यर्थः॥ ॥ अथैकादशी॥ सनो
नेदिष्टं ददृशान आभराग्ने देवेभिः सचनाः सुचेतुना महोरायः सुचेतुना॥ महि शविष्ठ नस्कृधि संचक्षे भुजे अस्यै।
महि स्तोतृभ्यो मघवन्त्सुवीर्यं मथीरुग्रो न शवसा॥ १३॥ ॥ सनो नेदिष्ठमिति। हे अग्ने स त्वं नेदिष्टं अत्यंतसमीपे
ददृशानः वेद्यां ददृशानो दीप्तत्वेन दृश्यमानः देवेभिः सचनाः इतरैर्देवैः समानान्नः अग्निमुखेनैव हविः स्वीकुर्वा
त् समानान्नत्वं सुचेतुना शोभनेन चेतनेन चेतसा वा पुनस्ते देवा विशेष्यंते। सुचेतुना शोभनचेतोवता मया तृणादि
कृतः वकृत्वाहीनं सुभ्यामित्युत्तरपदांतोदात्तत्वं। युक्तेन त्वदीयोत्तमयानुग्रहयुक्तेनेत्यर्थः॥ तादृग्रायः महः पूजनी
यानि आभर अस्मान् आहर हे अग्ने शविष्ठतः अस्मभ्यं महि महत् अन्नं महतीं कीर्तिं वा कृधि कुरु संपादय शविष्ठे
ति संबोधितत्वात्तदेव प्रार्थ्यत इति गम्यते। किमर्थं संचक्षे सम्यग्दर्शनीयत्वाय अस्यै अस्याः पृथिव्याः संबंधिने भुजे

भोगाय यद्वा संचक्षे भुज इति समानाधिकरण्यं सम्यग्दर्शनीयाय भोगायेत्यर्थः॥ न केवलं यजमानेभ्यो अस्मभ्यमेव अपितु
स्तोतृभ्यः स्तोतृकृत्विग्भ्योपि हे मघवन् अन्नवन् अग्ने सुवीर्यं शोभनपुत्रभृत्याद्युपेतं धनं शोभनसमर्थं वा कृधि कुरु। किंच श
वसा बलेन युक्तः सन् मथीः अस्मद्विरोधिनो नाशय। लुङि ह्म्यंतक्षणेति वृद्धिप्रतिषेधः। कुरक्कपक्षे उणादिकः ईश्वरः आ
धृष्यः न्श्छांदसं। यद्वा मथीर्मथनवांस्त्वं अस्मदर्थं शवसा बलेन युक्तो भवेति शेषः। तत्र दृष्टांतः। उग्रो न शवसा यथा कश्चित्
क्रूरः शवसा बलेन मथीर्भवति तद्वत्॥ ॥ इति द्वितीयस्य प्रथमे त्रयोदशो वर्गः॥ ॥ अयं जातेति सप्तर्चं द्वितीयं सूक्तं अयं जा
यत इत्यनुक्रमणिका परुच्छेप ऋषिः सर्वमास्य इमित्युक्तत्वात् अत्यष्टिश्छंदः आग्नेयं हि तु शब्दस्योक्तत्वादिदमप्याग्नेयं। प्र
स्य स्यष्ठे हनि एतत् सूक्तमाज्यशस्त्रत्वेन वियुक्तत्वेन सूत्रितं च षष्ठस्येति खंडे अयं जायत मनुषो धरीमणि याज्यमिति॥ ॥
तत्र प्रथमा॥ ॥ अयं जायत मनुषो धरीमणि होता यजिष्ठ उशिजामनु व्रतं। विश्वश्रुष्टिः सखीयते
रयिरिव श्रवस्यते॥ अदब्धो होता निषदादिळस्पदे परिवीत इळस्पदे॥ ॥ अयं जायतेति॥ अयमग्निर्मनुषो मनुष्यस्य

अध्वर्योः सकाशात् जायते अरणीमंथनेनोत्पन्नः॥ वी। हन्नो यैहोता देवानामाह्वाता यजिष्टः अतिशयेन यष्टृतमः
किमर्थमुत्पन्न इति। उशिजां फलस्य कामयितॄणां यजमानानां व्रतं सोमयागादिरूपं कर्म अलक्षीकृत्येति पतेः नर
नतिषंतेति निपातना। विष्टा नत्वाभावः॥ नकेवलं परमार्थमेवापितु स्वार्थमपी साहमयमर्थः॥ स्वंव्रतं अनुस्व
कीयं हविः स्वीकाररूपं कर्मानुलक्ष्य पुनः सएव विशिष्यते विश्वश्रुष्टिः विश्वविषयकमेवान्नं कस्मै सखीयते। सखि
समात्मन इच्छते तथा श्रवस्यते अतिप्रसिद्धान्नमात्मन इच्छते यजमानाय रयिरिव धनस्यानीयो भवति। धनंस
यथा सख्यै अन्नसमाधिं च साधयति तद्वदयमग्निरपि तस्मै द्वयं साधयतीत्यर्थः॥ किंचायमग्निः इळस्पदे इळायाः
भूम्याः पदे अंत्यलोपः छांदसः। सारभूते स्थाने वेदिरूपे वेदिमाहुः॥ परमंतं पृथिव्या इतिश्रुतेः। एतावती वै पृथिवीया
वती वेदिरिति च॥ पुनस्तदेव विशिष्यते॥ इळस्पदे इळ देवतायाः मनोः पुत्र्याः गोरूपायाः इडोपह्वानमंत्रप्रतिपादिता
याः पदे पादन्यासप्रदेशे इडा वै मानवी यज्ञानुकाशिन्यासीदिडायाः पदे घृतवतिस्वाहेतिश्रुतेः निषदत् निषीद

स्तोता भवति। किंतु सर्वैः स्तूयंते तादृशोऽत्री परिचरतीत्यर्थः॥ ॥अथ दशमी॥ प्रवो महे सहसा सहस्वत उषर्बुधे
पशुषे नाग्नये स्तोमो बभूत्वग्नये॥ प्रतियदीं हविष्मान्विश्वासु क्षासु जोगुवे॥ अग्रे रेभो न जरत ऋषूणां जूर्णिर्होत
ऋषूणां॥ प्रवो महइति। हे ऋत्विगादयः स्तोतारः वो युष्माकं संबंधि स्तोमः स्तोत्रं अग्नये प्रभवतु प्रीणयितुं समर्थं
भवतु। छांदसः शपः श्लुः अत्वेचाभ्यासस्य भूसुवोस्तिङीति गुणाभावः॥ कीदृशायाग्नये महते पूज्याय सहसा पराभि
भवसामर्थ्येन तद्वत उषर्बुधे उषःकाले प्रबुध्यमानाय अहरादीनां पश्वादिषूपसंख्यानमिति रुत्वं॥ पशुषे पशुरूपफलप्रदा
नाय नशब्दोप्यपि शब्दार्थः॥ यद्वा पशुषे पशुप्रदात्रे भवेत्स्तुतिः क्रियते॥ तद्वत् किमर्थमिति तदुच्यते। ईं एनमग्निं प्रति
लक्षीकृत्य हविष्मान् धृतादिप्रबुद्ध हविर्युक्तो यजमानः विश्वासु क्षासु सर्वासु निवासभूतासु वेदिभूमिषु जोगुवे अ
सर्थं गच्छति। गुर्वतेर्यङ्लुगंताच्छांदसो व्यत्ययेनात्मनेपदं॥ अमंत्र इति पर्युदासादामतामः क्षेतिभूतामक्षाक्षामेति
तन्नामसु पाठात्। ऋषूणां आगंतॄण्यं देवानां मध्ये श्रेष्ठमग्निं जूर्णिः स्तुतिकुशलो होता अग्ने इतरदेवेभ्यः पूर्वं जरते

हूयाहोर्भरिति भत्वे रूपं सलुगिति सप्तम्या लुक्॥ तादौ च से निंतरस्य गतेः प्रकृतिस्वरत्वं अयाः कृपा अनया सामर्थ्य
लक्षणया कृत्स्नया हविः स्वीकरणरूपया न जूर्यति यज्ञसमाप्तिपर्यंतं न नश्यति अजरो वर्त्तत इत्यर्थः॥ स इद्सुतेंद्र
दूसा ह्यमग्निं देवेभ्यो तनगृशीलं मातरिश्वा अंतरिक्षसंचारी वायुः पूर्वं मनवे रर्थाय परावतः स्थापितवानित्यर्थः॥ त
दूतं परावतः दूरात् देवमग्निं अस्मद्देवयजनं प्रतिप्रस्थापयामित्यर्थः॥ अप्मासी तद्विज्येन भूमौ स्थापितवानित्यर्थः
॥ ॥ अथ तृतीया॥ ॥ एवेन सद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्दधद्रेतः कनिक्रदत्॥ शतं चक्षाणो
अक्षभिर्देवो वनेषु तुर्वणिः॥ सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु॥ ॥ एवेन सद्य इति॥ अयमग्निः एवे
न गमनसाधनेन वा सद्यः अस्मदाह्वानानंतरं पार्थिवं पृथिवीसंबंधि स्थानं वेदिलक्षणं परितः यद्वा अनर्थकः
आभिमुख्यार्थो वा पर्येति गच्छति॥ कीदृशोग्निः मुहुर्गीः सर्वदा गीयमानः रेतः उदकं वादिना रेतःशब्देन तत्कार्यं
हविरूपमन्नमुच्यते॥ तद्वान्मत्वर्थीयो लुप्यते। वृषभः कामानां वर्षिता कनिक्रदत् शब्दयन् पर्येति। पुनः स एव

वर्वि शेष्यते। रेतो दधत् आज्यानि स्वीकारेणात्मधिकं सामर्थ्यं दधानः कनिक्रदत् शब्दयन् पर्येतीति शेषः॥ पुनः स एव वि
शेष्यते॥ अयमग्निर्देवः वनेषु संभजनेषु निमित्तभूतेषु अक्षभिः अक्षस्थानीयाभिर्ज्वालाभिः शतं चक्षाणः सर्व
तः प्रकाशमानः यद्वा लोके लक्ष्यया यजमानेन कृतं शतगुणितं प्रसंख्यापयन् तथा तुर्वणिः शीघ्रगंता शत्रूणां हिंस
को वा तुर्वणि स्तूर्णवनिरिति यास्कः॥ किंच सानुषु समुच्छ्रितेषु सानु समुच्छ्रितं भवतीति यास्कः॥ तेषु उपरेषु उपरमंते
एष्वत्र इति उपरा धिष्ण्याः यजमानगृहा वा तेषु सदो दधानः स्थानं धारयमाणोग्निः सद्यः पर्येति इति पूर्वत्रान्वयं द्विमर्थं
परेषूत्कृष्टेषु सानुषु समुच्छ्रितेषु वर्मस्थ हविःषु वा निमित्तभूतेषु॥ ॥ अथ चतुर्थी॥ स सुक्रतुः पुरोहितो दमेदमेग्नि
र्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति॥ क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे॥ यतो घृतश्री रतिथिरजायत
वह्निर्वेधा अजायत॥ ॥ स सुक्रतुरिति॥ सोग्निः सुक्रतुः शोभनकर्मा पुरोहितः पुरो धार्यमाणः यद्वा पुरोहितवद
यागं निर्वाहकः सन् दमेदमे तत्तद्यजमानगृहे सर्वेषु देवयजनेषु वा अध्वरस्य नाशरहितस्य प्रवृद्धस्य यज्ञस्य तद

द्वि॰ भा॰ ॥५०॥ थं चेतति जानाति प्रबुध्यत इत्यर्थः॥ किंच। अयं यजमानोपि क्रत्वाग्नेः अनेन कर्मणा यत् अस्य चेतति कर्तव्यतामवजानाति। किं
चायमग्निरपि क्रत्वा प्रकृष्टेन कर्मणा वेधाः विविधानां फलानां कर्ता सन् इष्यते इष्यत इली षु इत्समागमने वा तदिष्ठे
ते यजमानार्थं विभुवजाया नि सर्वाणि संपादितानि हवींषि आदीनियस्या अन्यर्थं स्पृशति स्वीकरोति यतोयं घृतश्रीः घृ
तं सेवमानः अतिथिः अतिथिवत्पूज्यश्च अजायत उत्पन्नः यतः कारणात् घृतमस्य अर्थं सेवमानः प्रवृद्धो भवति यतः
पस्त्यत इत्यर्थः॥ एवमग्नौ प्रवृद्धे सति यजमानोपि वह्निर्हविषां वोढा वेधाः विविधस्य फलस्य कर्ता उत्पादयिता अ
जायत समर्थो भवत्॥ ॥अथ पंचमी॥ क्रत्वा यदस्य तविषीषु पृंचतेग्नेरवेण मरुतां न भोज्येषिराय न भोज्या॥ स हि
ष्मा दानमिन्वति वसूनां च मज्मना॥ स नस्त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः॥१५॥ ॥क्रत्वा यदिति॥
यद्यस्मात्कारणात् सर्वे यजमानाः क्रत्वा प्रकृष्टेन कर्मणा हविःप्रदानादिरूपेण अस्याग्नेः तविषीषु प्रबलासु ज्वालासु
अवेन तृप्तिनिमित्तेन भोज्या भक्ष्याणि पुरोडाशादीनि पृंचते मिश्रयंते। तविषीति बलनाम तविषी शुष्ममिति तन्नाम श्रीः ॥५०॥

ति कीदृशोयमग्निः अदब्धः केनाप्यहिंसितः। परिवीतः ऋत्विग्भिः परिधिभिर्वा परितो वेष्टितः एवंभूतः सन् निषदत्॥
॥अथ द्वितीया॥ तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देवताता हविष्मता॥ स न ऊर्जामुपाभृ
त्यया कृपा न जूर्यति॥ यं मातरिश्वा मनवे परावतो देवं भाः परावतः॥ ॥तं यज्ञसाधमिति॥ यज्ञसाधं यज्ञस्य साधं यज्ञस्य
साधयितारं साध्नोतेः क्विपि कृदुत्तरपदप्रकृतिस्वरत्वं। तमग्निं वेद्यां स्थापितं अपि वातयामसि अपि संभावनार्थः आपिरितो
पां सवामहे। वात गतिसुखसेवनेषु चौरादिकः इदंतो मसिः किं नोपायेनेति तदुच्यते। ऋतस्य पंथा यागस्य मार्गे
णायोगानुष्ठानेन यज्ञेन देवेभ्य इति श्रुतेः। यज्ञेन देवस्य महती प्रीतिर्भवति। यद्वा ऋतस्य पंथा मार्गस्तीर्थस्त्यः पूर्वेणोत्क
रमपरेण प्रणीता इत्यादि सूत्रोक्तेन मार्गेण गत्वा पुनश्च नः हविष्मता आज्यादिप्रदेयद्रव्यवता नमसा नमस्कारोपलक्षणे
न स्तोत्रेणोपस्थानेन वा तदुभयेनेत्यर्थः॥ कुत्रेति तदुच्यते हविष्मति आज्यपुरोडाशादिहविर्भिर्युक्ते देवानां विस्तार
युक्ते। किंच सोग्निः नोस्मत्संबंधिनां हविर्लक्षणानां उपाहृति उपाहरणं तत्स्वीकारविषये। उपकुन्यसृष्टदूरातानिर्

वारमृण्वत्यग्निर्द्वाराण्यृण्वति॥ ॥विश्वो विहाया इति॥ अयमग्निः दक्षिणे अभिमतं प्रदातुं उत्साहयुक्ते हस्ते वामेतरे वसु
यजमानाय दातव्यं धनं दधे धारयति। कीदृशोयं विश्वः सर्वैर्गंतव्यः यद्वा विश्वात्मकः विहायाः महान् विहायाः इति म
हन्नाम विहायाः यह्व इति तन्नामसु पाठात् अरतिः ईश्वरः अरममाणः वा अप्रीतिः अथवा हविस्यर्तिभ्यश्चेदिय
तिप्रत्ययः विद्वद्वृंतो दान्तः॥ दधे धृत्वा नाशिश्रथत्॥ धृतं हस्तं यजमानार्थं शिश्रथयति ददाति॥ श्लथयते र्लुङि
चङि चरूपं॥ तत्र दृष्टांतः। तरणिर्न तरणिरिव तारकः सूर्य इव सयथा स्वोपासकाय अभिमतं हस्ते धृत्वा वितरति त
द्वत्। यद्वा तरणिः सर्वस्य तारकः नाशिश्रथत् यजमानं न श्रथयति न मुंचतीति॥ किंच श्रवस्या नशिश्रथत् हविरूप
मन्नमिच्छयेव नाशिश्रथत्। न विमुंचति। अयमनुग्रहेणैव पाल्यते हविः स्वीकारः स्तुत्युपदेशमात्रमिति भावः॥ इदानीं प्रत्य
क्षकृतः॥ हे अग्ने देवत्रा देवेषु मध्ये अतिशयेन त्वं विश्वस्मै सर्वस्मै इषुध्यते हविरासनमिच्छते इंद्रादये इषुध्यति
कंड्वादिः। हव्यं तत्तद्देवतामुद्दिश्य प्रत्तं पुरोडाशादिकं उशिषे सर्वतो वहसि वहेर्लेटि यजादित्वात् संप्रसारणं। किंचाय

मग्निर्विश्वस्मै सुकृते शोभनयज्ञकर्त्रे यजमानाय वारं सर्वैर्वरणीयं स्कंदादिनिवारकं वृणवति गच्छति करोतीत्यर्थः।
किंचायमग्निर्द्वाराणि स्वर्गाद्यभिमतद्वाराणि ऋण्वति विवृणोति बंधकपापनयनद्वारा अभिमतानि धारयतीत्यर्थः॥
ऋण्व गतौ गतिकर्मायं द्वारितिर्गत्यर्थः॥ इदि सान्नु मच्छंदसि रेफस्य संप्रसारणं॥ ॥अथ सप्तमी॥ स मानुषे वृजने
शंतमो हितो अग्निर्यज्ञेषु जेन्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः॥ स हव्या मानुषाणामिळाकृतानि पत्यते॥ स
नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः॥ ॥स मानुष इति॥ सोग्निर्मानुषे मनुष्यस्य यजमानस्य संबंधिनि वृ
जने वर्जनीये पापे निमित्तभूते सति यज्ञेषु निमित्तेषु शंतमः। अयं तसुखतमः अरिष्टस्य निवारकत्वात्। अत ए
व हितः स्वर्गाद्यभिमतसाधकत्वात्। किंचायं विश्पतिः ऋत्विग्रूपाणां प्रजानां अतिशयेन पालकः पश्वैश्वर्यपूर्वप
दप्रकृतिस्वरत्वेप्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। अत एव प्रियश्च भवति। तत्र दृष्टांतः। जेन्यो
न विश्पतिः जयशीलो राजेव सयथा परासनाद्युपद्रवपरिहारेण सम्यक् परिपालनेन च प्रजानां प्रियो भवति॥

ऋ. भा.
॥४२॥

किंचायमग्निः मानुषाणां मनुष्याणां यजमानानां संबंधीनि हव्या हवींषि दृळ्हा दृढानि इळायां वेद्यां दृढानि संपादि-
तानि उद्दिश्य पतते। पतति। आगच्छति। किंच सोऽस्मान्यजमानान् वरुणस्य कारकस्य धूर्तेः हिंसकस्य भयात् त्रास-
ते त्रायते यद्वा धूर्तेरिति पंचमी वरुणस्य पापदेवस्य धूर्तेः हिंसकात्। किंच महो महतो देवस्य धूर्तेः हिंसात्रायते पाउ
यते स्वपक्षारमग्निर्हिनस्तीति द्रासिधी। यद्वा एवमेव वाक्ये धूर्तेः हिंसकस्य महतो वरुणदेवस्य वरुणाख्यायाः पाप-
देवतायाः धूर्तेः हिंसातोऽस्मान् सोऽग्निस्त्रायते॥ ॥अथाष्टमी॥ ॥अग्निं होतारमिति॥ असुमग्निं होतारमाहू-
तारं होमनिष्पादकं वा दूरूलते ऋत्विजः स्तुवंति। तथा च सा धितिं धनस्य धारयितारं वा अत एव प्रियं सर्वेषां प्रि-
यतमं चेतिष्ठं अतिशयेन यजमानानां चेतयितारं यद्वा प्रकृष्टवंतं चेतनं ज्ञातृतमं तनुश्छंदसीतीष्टन्। तुरिष्ठेमे-
यःस्विति तृलोपः। अरतिमीश्वरं तादृशं देवं मियेरेभिरिरे नितरां व्याप्ताः प्राप्तिरेव विशेष्यते हव्यवाहं न्यरिरे
निःशेषेण प्राप्ताः। इतरदेवेभ्यो हव्यं वोढुं यथा प्रभवति तथा नितरां प्राप्ताः ईर् प्रेरणे। ईर् गतौ ईरसन्यतमस्य

श्री
॥४२॥

रूपं। तत्र दृष्टांतः। मरुतां न भोज्या वायूनां संबंधीनि व्रीह्यादीनि अन्नानीव वा पुपुषे मेघं निर्भिद्य वृष्टिं जन-
यन् सस्यादिद्वारा व्रीह्यादिभ्यो ज्यानि यथा पचते तथेत्यर्थः। दाने दृष्टांतः॥ इषिरा यन भोज्या एषणयुक्ता यथा यज-
मानार्थिने तस्य एषणाय न भोज्या भोग्यानि भक्ष्यादीनि यथा दीयंते तद्वत्। इषिरा हो यास्केनैवं निरुक्तः एषणेनवे-
ति। अतः कारणात् स खलु यजमानः दानमिन्वति हविःप्रदानं तस्मै व्याप्नोति। यद्वा स्वयमेतद्दानमिन्वति। इन्व-
तिर्व्याप्तिकर्मा इन्वतिनक्षइति तत्कर्मसु पाठात्। वेन स सामर्थ्येनेति वसतौ च जन्मना वन दानमिन्वतीति शेषः। किं-
च सोऽग्निः अभिद्रुतः आभिमुख्येन पापैः क्रियमाणान्नोऽस्मान् दुरितात् पापात् तत्रासते त्रायते तथा शंसते अ-
तिप्रभूतत्वेन शंसनीयात्। यद्वा हिंसकान् अभिद्रुतः अभितो क्रियमाणान् अजान् दुःखान् तत्कारणान् पापात्
या अस्त्रासते त्रायते॥ ॥इति द्वितीयस्य प्रथमे चतुर्दशो वर्गः॥ ॥अथ षष्ठी॥ विश्वो विहाया अरतिर्वसुर्दधे हस्ते
दक्षिणे तरणिर्न शिश्रथत् छ्रवस्यया न शिश्रथत्। विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे॥ विश्वस्मा इत्सुकृते

द्वि॰भा॰
॥४३॥

नं प्रति रथं प्रणयसि प्रापयसि हविष्कर्मकर्त्रे यं वा इदं यजमानं अपाकां आपक्वं अनल्पप्रज्ञं यागांश्चिषूर एवैतं पाकः पक्वयो भवती
तियास्कः॥ अतएव सन्तं विद्यमानं सन्तं किंच हे अनघ अनिन्दित यं यजमानं धनविद्यादिना प्रणयसि प्रकर्षेण नयसि तं यज
मानं सद्यश्चित् तदानीमेव तदनुग्रहफल एव अभिष्टये आभिमुख्येन यागाय अभिमतप्राप्तये आभिमुख्येन यागाय
अभिमतआप्तये वा अभिपूर्वादिषेः क्तिन् शकन्ध्वादित्वात् पररूपत्वं गतिरनन्तर इति गतेः प्रकृतिस्वरत्वं करः समर्थं
करोषि लेटि व्यत्ययेन शप् एवं त्वं कृत्वा च वाजिनं हविर्लक्षणमन्नेन तद्वन्तं वा वशः कामयसे च वष्टेर्लेट्यडागमः तिङः पर
त्वान्निघातः यजमानेनाहूतः सन् शीघ्रमेवागच्छ स हविः स्वीकुरु यथा यागं साधु निर्वर्तयितं वा अभिमतफलेन संयोज्य
पुनः हविः स्वीकरोतीत्यर्थः॥ इन्द्र हे अनवद्य अनिन्दित सर्वैः स्तूयमान तूतुजान अस्मदनुग्रहीतुं त्वरमाण तुजेः
प्रेरणार्थाल्लिटः कानच् तुजादीनां दीर्घोऽभ्यासस्येति अभ्यासस्येति दीर्घत्वं सोचि लोपे इति संहितायां सोर्लोपः॥ वेधसां वि
विधफलकर्तॄणां मध्ये श्रेष्ठतया वेधसां मेधाविनो अस्माकं संबन्धि हविः स्वीकुर्वित्यर्थः॥ तत्र दृष्टान्तः॥ इमां वाचं न

श्री
॥४३॥

अस्मदीयां स्तुतिरूपां वाचमिव श्रुतिं यथा स्वीकरोषि तथा हविषीत्यर्थः॥ ॥अथ द्वितीया॥ स श्रुधि यः स्मा पृतनासु कासु
चिद्दक्षाय्य इन्द्र भरहूतये नृभिरसि प्रतूर्तये नृभिः॥ यः शूरैः स्व१ः सनिता यो विप्रैर्वाजं तरुता॥ तमीशानास इर
धन्त वाजिनं पृक्षमत्यन्न वाजिनं॥ ॥स श्रुधीति॥ हे इन्द्र स वक्ष्यमाणगुणविशिष्टः त्वं श्रुधि अस्मदाह्वानं स्तोत्रं वा शृणु
हेर्धिभावः। स यः खलु त्वं नृभिर्मनुष्यैरेव मरुद्भिः पश्चाद्देवत्वमापन्नैर्मरुद्भिः पुनस्त्वमेव विशिष्यते। नृभिः संग्रामन
यनशीलैः इन्द्रस्य मरुतां साहाय्यं इन्द्रो मरुद्भिर्मरुतो हैनं नाजहुरित्यादिषु प्रसिद्धं। तैः सहितः सन् कासुचित् पृ
तनासु सर्वासु श्रेष्ठेष्वपि संग्रामेषु भरहूतये भरणविशिष्टाह्वानयुक्ताय प्रतूर्तये प्रकृष्टहिंसायै यद्वा भरहूतये शू
राभवप्रहरो सह्यो घ मादि भरणयुक्ताह्वाय येनो प्रतूर्तये च शूराणां प्रकृष्टवधाय च दक्षाय्योऽसि प्रवर्धनशीलोऽसि। य
द्वा नृभिर्नेतृभिर्यजमानैः प्रार्थितः सन् प्रतूर्तये शत्रूणां पापानां वा प्रकृष्टहिंसायासि समर्थोऽसि॥ किंच यः स्वं शूरैः
शौर्योपेतैर्मरुद्भिरन्यैर्भटैर्वा सहितः सन् स्वः स्वयमेव सनिता संग्राममयस्य अन्यस्य वा मनीषितस्य सनिता सं

ऋ॰ भा॰

॥४४॥

भक्तोसि सख्यपितेषां साहाय्ये अन्यनिरपेक्षेण दित्सुतासीत्यर्थः॥ भरण्मसि तद्भूमि तस्मृतिग्रसितस्तुभितेसा दो
निपासतेयश्च त्वं विप्रेभिर्धाविभिर्ऋत्विग्भिः स्तुतः सन् वाजं तरुता तेभ्योन्नस्य दातासि विप्रेभिर्मरुद्भिः सहित इति से वे
धः। ततादृशं वाजिनं वं तं पृक्षे हविर्लक्षणान्नवंतं इंद्र दूळ्भानासः सम्यगभ्यर्थयितुं समर्था ऋत्विजः इरध्यंत संरा
धयंति। सेवंते दृष्टांतः। वाजिनं वेजनवंतं गमनवंतं पृक्षं घासाद्यन्नवंतं अश्वमिव यथा समर्थाः स्वादुघास
प्रदानादिना पोषयंति तद्वत्। अयमृगद्य सप्तक्रबनाम असौ हय इति तन्नामस्वपाठात्॥ ॥अथ तृतीया॥ दस्मो हि ष्मा वृ
षणं पिन्वसि त्वचं कं चिद्यावीररुं शूर मर्त्यं परिवृणक्षि मर्त्यं। इंद्रोत तुभ्यं तद्दिवे तद्रुद्राय स्वयशसे॥ मित्राय वोचं व
रुणाय सप्रथः सुमृळीकाय सप्रथः॥ ॥दस्मो हि ष्मेति॥ वृषणं स्वतो वर्षणशीलं त्वचं संवर्णवंतं पुरवं पुंमवलउ
दकं केष्टतवंतं कं चिज्जवं धारिणं घं पिन्वसि निर्भिद्य पेचयासि॥ किंच मर्त्यं मर्त्यवद्दूररुं अरणशीलं गमनस्वभावं
कं चिन्मेषं हे शूर विक्रांतयावीः मिश्रयासि पोतेभ्योंदसे तुद्र इति छंदसोभावः। अवर्षणं गच्छति बलान्निगृह्य वर्षयसी ॥श्रीः॥

॥४४॥

ल्लिदि रूपे। किंच देवासो देवनशीलाः ऋत्विजः रण्वं अति प्रबद्धा हूयेतं अवसे स्यरक्षणाय सूयवः वसूयवः वसकामाः संतः पु
नः वीदृशाः गीर्भिः स्तुतिभिः रण्वं रमणीयं तं रमणीयं वा वसूयवः वसु हविरूपमन्नं अग्नये प्रदातुमासनद्धंतः। न्योरि
रिप्रीताय यथा धनं प्रयच्छंति। तथा हविरादिना प्राप्ता इत्यर्थः॥ ॥इति द्वितीयस्य प्रथमे पंचदशो वर्गः॥ ॥यं त्वं रथमि
त्येकादशर्चं तृतीयं सूक्तं परुच्छेपं सर्वमत्यष्टं मित्युक्तत्वादत्यष्टिछंदस्कं अनुक्रांतत्वादैंद्रं प्रत्नवो अग्न इत्यादिके द्वे
अतिशक्वर्यौ इत्यक्षरोपेतत्वान्न पाहिन इत्यष्टी चतुः चत्वारिंशत्क्षरोपेतत्वात्सा तद्धोपेयमिति षष्ठी इंद्रदेवत्या तथा नु
क्रमणिकायां समेकादशैषष्ट्यैंद्री प्रत्नावोतिशक्वर्यौ वस्थांत्येति दशरात्रस्य षष्ठेहनि मरुत्वतीयशस्त्रे एतत्सूक्तं ष
ष्ठस्येति खंडे तिसूत्रितं। यं त्वं रथमिंद्र सवोधपेति॥ ॥तत्र प्रथमा॥ यं त्वं रथमिंद्र मेधसातयेऽपाका संतमिषिर प्र
णयसि प्रानवद्य नयसि। सद्यश्चित्तमभिष्टये करो वशश्च वाजिनं॥ सास्माकमनवद्य तूतुजान वेधसामिमां वाचं
न वेधसां॥ ॥यं त्वं रथमिति॥ हे इंद्र इषिर यत्नगमनशीलत्वं मेधसातये यज्ञस्य दानाय लाभाय वा ये यजमा

द्वि॰भा॰ ॥४५॥

दृष्टिप्रदातृत्वात्॥ ताभ्यामपि प्रथमं युक्तं। सकृत्हीकृत्य शोभनस्वाय्यियत्ते प्रजानामेतत्सर्वत्र संबध्यते उक्तेभ्यो देवेभ्यः
स प्रथः सर्वतः पृथु अतिविस्तीर्णं यथा भवति तथा तद्दूषणं कर्म ब्रवीमि॥ ॥ अथ चतुर्थी॥ ॥ अस्माकं व इंद्रमुश्मसी
ष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजं॥ अस्माकं ब्रह्मोतयेवा पृत्सुषु कासु चित्॥ नहि त्वा शत्रुः स्तरते स्तृ
णोषि यं विश्वं शत्रुं स्तृणोषि यं॥ ॥ अस्माकं व इति॥ हे ऋत्विजः अस्माकमस्मदर्थं च इष्टये यागाय अभिमतैषणाय
वा इंद्रमुश्मसि अभिमतं कामयामहे। वश कांतौ। अदादिकः। इदंतो मसिः ग्रहिज्येति संप्रसारणं॥ यद्वा अस्माकं स्वा
यमिति संबंधः॥ कीदृशमिंद्रं सखायं सखिवद्वर्तमानं हितकारिणं समानख्यानं वा विश्वायुं विश्वेषां यागानां गंतारं प्रा
सहेः क्विप् नहिवृतीत्यादिनोपसर्गस्य दीर्घः युजं सर्वदा युक्तं सहायभूतमित्यर्थः॥ पुनः स एव विशेष्यते वाजेषु सं
ग्रामेषु तदुत्सकेषु वा निमित्तभूतेषु प्रासहं यद्वा विघातिनः सहमानं युजं अभिमतफलैर्युक्तं मरुद्भिर्वा॥ किं
च हे इंद्र अस्माकं ऊतये ब्रह्म परिदृढं कर्म अव रक्ष। कुत्रत्व विशेष इति तत्राह॥ कासु चित् पृत्सु संग्रामेषु पृत्सु सं श्री ॥४६॥

मास्विति संग्रामनामसु पाठात् तत्र त्वां तेषु त्वां नहि स्तरते नहि नास्ति न विरोधमाचरति यं स्तृणोषि स कदाचित् श
त्रुर्नह्यस्ति न च महत्त्वेन सर्वे भीताः भवंति॥ शत्रुभावं कुर्वन् कोप्याचरति॥ अजातशत्रुत्वादित्यर्थः॥ अथ पंचमी॥ निषू
न माति मतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः॥ नेषि णो यथा पुरानेनाः शूर मन्यसे॥ विश्वा
नि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ॥ १६॥ ॥ निषू न मेति॥ हे इंद्र कस्य चित् दुष्टस्य यजमानस्य अतिमतिं अ
तिक्रांतमननं विरुद्धमनस्कं शत्रुं निषूनमाति तरां सुष्ठु नामय अस्मत्सम्पूर्णं कुरु अंतर्भावितण्यर्थोयं॥ हे उग्र उद्गूर्णब
ल ऊतिभिर्लक्षणैः प्रीतिभिर्वा युक्तः सन् तेजिष्ठाभिररणिभिर्नातिगमनेन तेजस्विभिर्युद्धादिरूपैर्मार्गैरिव तेजस्विश
ब्दादातिशायनिक इष्ठन्। विन्मतोर्लुक् टेरिति टिलोपः॥ अतिमतिं क्षत्रादिर्यथा नामितवान् तथास्मद्विरोधिनमपी
त्यर्थः॥ यद्वा उत्तरत्रान्वयः। तेजिष्ठाभिररणिभिस्तेजोयुगमनेन साधनैर्यज्ञादिमार्गैर्यस्मान्यो जितथा उग्राभिः प्रवृद्धा
भिः ऊतिभी रक्षणैर्यागफलभूतैर्नोस्मानन नेषि। नयसि। अभिमतस्वर्गादिफलं प्रापयसीत्यर्थः। नयतेश्छांदसः श

वो लुलुक्॥ तत्र दृष्टांतः पुरा पूर्वस्मिन्काले अस्मान् मित्रादीन्यथा उदभिनदुतं नासि। तथा नेषीत्यर्थः॥ हे इंद्र विश्वांतवं
अनेन या मन्यसे सर्वैरपापत्वेन अवबुध्य- स्वर्गाद्यभिमतसाधकत्वादिति भावः॥ यद्वा अनेना स्त्वं अस्मान नयनेन सो
मन्यसे। किं च हे इंद्र वह्निः वृष्ट्यादिप्रदानेन जगतां निर्वाहकः सन् पूरोर्मनुष्यस्य यजमानस्य पूरव इति मनुष्यनाम
पूरव जगत इति मनुष्यनाम पूरव जगत इति तन्नामस्कपाठात्॥ तस्य विश्वानि सर्वाण्येनांसि अपपर्षि अपनुदय पा
लयसि। पृणा तेभ्यः छंदसः पोलुक्। अतो अस्माकमपि आसामं तिके देवयजनदेशे अच्छ। अभिमुख्येनागय वह्नि
रभिमतो वोऽदासन् अप अनभिमतमपनुदय पर्षि अभिमतं पूर्तं पूरयसि॥ ॥इति द्वितीयस्य प्रथमे षोडशो वर्गः॥
अथ षष्ठी॥ प्रतद्वोचेयं भव्यायेंदवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति॥ स्वयं सो अस्मदा निदो वधै
रजेत दुर्मतिं॥ अव स्रवेदघशंसो अवतरमव क्षुद्रमिव स्रवेत्॥ ॥प्रतद्वोचेयमिति॥ भव्याय भवनशीलाय प्रति
दिनं कलाभिर्वृद्ध्या वर्धनशीलाय इंदवे अमृतेन सर्वस्य क्लेदयित्रे तदर्थं तद्वक्ष्यमाणं कर्म स्तोत्रं वा प्रवोचेयं मि

त्यर्थः॥ यथा इंद्रः कांश्चिद्धूलवेतं गच्छंतं वैरिणं निगृह्णाति तद्वदित्यर्थः॥ तथा मर्त्यं मरणशीलं क्षीयमाणस्वभा
वेन निरुद्धं निर्मेघं परिवृणक्षि सर्वतो वर्जयसि॥ उदासीन्यं करोषीत्यर्थः॥ हे इंद्र तत्तादृशं कर्म वर्षकरूपे स प्रथः पृथुय
था भवति तथा तुभ्यं वोचं ब्रवीमि॥ इंद्र एव विशेष्यते स्वयशसे स्वकीययशोयुक्ताय तथा दिवे उत तद्द्वाश्रयभूतायै द्युलो
कदेवतायाः अपि तत्तादृशं कर्म वोचं ब्रवीमि। उत शब्दोऽपि शब्दार्थः वर्षणकर्मणो द्युदेवतायाः आनुकूल्यात्॥ तस्या अ
पि वचनं युक्तं॥ तथा रुद्राय जगतां दुःखद्रावयित्रे रोदनशीलाय वाग्नये तद्वोचं। रुद्रो वै क्रूरो यदयमग्निरिति श्रुतेः॥ रु
द्रत्वं सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति श्रुतेः॥ रोदनस्य भावत्वं प्रसिद्धं॥ तस्य चाहुतिद्वारा वृष्ट्यनुकूलत्वात्॥
तस्यापि कथनं युक्तं। स्वयशसे इत्यस्य रुद्रायेत्यनेन वा संबंधः संनिहितत्वाद्योग्यत्वाच्च। स्वकीययशोयुक्तायाग्नय इत्यर्थः॥ त
था मित्राय अहरभिमानदेवतायै तद्वोचं वरुणाय रात्र्यभिमानदेवतायै तद्वोचं अहोरात्रे वै मित्रावरुणौ अहोरात्राभ्यां ख
लु वै पर्जन्यो वर्षतीति तथा मैत्रं वा अहर्वारुणी रात्रिरित्यादिश्रुतिभ्यो मित्रावरुणयोरहोरात्र्यभिमानिदेवत्वं अत एव श्रुतेः।

द्वि॰भा॰ सापपीत्यर्थः॥ ॥अथ सप्तमी॥ वनेम तद्धोत्रया चितंत्या वनेम रयिं रयिवः सुवीर्यं रण्वं संतं सुवीर्यं॥ दुर्मन्मानं
॥४७॥ सुमंतुभिरेमिषा पृचीमहि॥ आ सत्याभिरिंद्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः॥ ॥वनेम तदिति॥ हे इंद्र वयं
यजमानाः तत् त्वदीयं स्तुत्यं तव रूपं यद्वा तत्ते वयं। चितंत्या तव गुणान् विज्ञापयंत्या। चिती संज्ञाने। अस्माण्ण्यंताच्छत
प्रत्ययस्य येन सः। होत्रया होमसाधनभूतया स्तुतिरूपया वाचा सनेम संभजेम यद्वा त्वां हूयेम स्तुतिं कुर्वामे
त्यर्थः॥ होत्रेति वाङ्नाम होत्रा गीरिति तन्नामसु पाठात्॥ किंच। एवं स्तोतारो वयमपि हे रयिवः विशिष्टधनवन्निं
द्र रयिं धनं वनेम संभजेम। कीदृशं रयिं सुवीर्यं शोभनसामर्थ्योपेतं रमणीयं नंतव्यं वार्थिभिः संतं सर्वदा वर्तमा
नं यस्मादिदं दूराद्बहुशो दीयमानमपि प्रवर्धमानं पुनस्तदेव विशेष्यते सुवीर्यं शोभनपुत्रभृत्याद्युपेतं धनेन तेषां
संपादयितुं शक्यत्वात् वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं॥ किंच। हे इंद्र दुर्मन्मानं दुःखेन मंतुं शक्यं त्वां तव महि
म्नोऽतिमहत्त्वात् सुमंतुभिः शोभनैर्मननैः तत्साधनैः स्तोत्रैर्वा इषा हवीरूपेणान्नेन वा आ पृचीमहि सर्वतः संपृ श्री ॥४७॥

क्ताभूयास्म॥ यद्वा इषा अन्नेन निमित्तेन पूर्वं धनस्य प्रार्थितत्वादिदानीमन्नं प्रार्थ्यते॥ पृची संपर्के। रौधादिकः छांदसो वि
करणस्य लुक्॥ किंच यजत्रं यागनिष्पादकं इंद्रं सत्याभिः अविसंवादिनीभिः यथाभिलषितमुपजायमानफल
भिर्द्युम्नहूतिभिः हरिव आगच्छ मेधातिथेर्मेषेत्याह्वानैरित्यर्थः॥ पुनस्तदेव विशेष्यते। द्युम्नहूतिभिः हविर्ल
क्षणान्ननिमित्तैराह्वानैरा पृचीमहीति शेषः॥ द्युम्नं द्योतनं यशो वेति यास्कः॥ ॥अथाष्टमी॥ प्रप्रा वो अस्मे
स्वयशोभिरूती परिवर्ग इंद्रो दुर्मतीनां दरीमन् दुर्मतीनां॥ स्वयं सा रिषयध्यै या न उपेषे अत्रैः॥ हतेमसन्न वक्षति
क्षिप्ता जूर्णिर्न वक्षति॥ ॥प्रप्रा व इति॥ हे इंद्र ऋत्विजः वो युष्मदर्थं अस्मे अस्मदर्थं च अयमिंद्रः स्वयशोभिः
स्वकीययशोयुक्तैः ऊती ऊतिभी रक्षणैः दुर्मतीनां दुर्मनयुक्तानां विरोधिनां परिवर्जने निमित्तभूते सति प्रकृष्टं
प्रकृष्टो भवति समर्थो भवतीत्यर्थः॥ द्विर्भावः पादपूरणः। यद्वा हे ऋत्विजः वो युष्मदर्थं अस्मे अस्माकं संबंधिभिः स्व
यशोभिः स्वयमेवान्यनिरपेक्षेण स्तोतुं समर्थैः स्तोत्रैः स्तुत्यः सन् ऊती ऊतौ रक्षणे प्रप्रकृष्टो भवति। उपसर्गश्रुते

द्वि॰भा॰

॥४८॥

योग्यग्निः यथा ह्यारः कुत्रेतित दुच्यते। दुर्मतीनां दुष्टानां परिवर्गे परितो वर्जनवति संग्रामे यागे वा पुनः स एव विशेष्य
ते। दुर्मतीनां दुष्टबद्धमानवतां हतबुद्धीनां दरीमन् दरीमणि अतिशयेन दारयितरि एवं हे इंद्र सम्यक् पालयति सम
ति अत्र भक्ष्यहेर स्म द्विरोधिभिर्यज्वभिर्लिः। जवबुवती सेना जूर्णिर्जवते षा द्रवतेर्वा हूनोर्वे तिया स्कः। नोस्मान् प्रतिरिष
यध्यै हिंसितुं रिषेर्ण्यं तान्तुमर्थे कृत्यध्यै प्रत्ययः उपेषे उपगंतुं ईषगति हिंसादर्शनेषु अस्मान् घाल्तुडी ङगतौ तुमर्थे
वसे प्रत्ययः क्षिप्ता प्रेरिता सा सेना स्वयं हते मर्त्ये हिंसिते वा सी तन्न वक्षति अस्मान्नवहेतन्न प्राप्नोति। तथास्माद्विंस
कान् शत्रून् न पिपुनर्न वक्षति। नव हाति। वहेते ले घट्ट गमः सिब्बहुलं लेटीति सिप्। इंद्र सामर्थ्येन तत्रैव नष्टा भूदित्यर्थः
॥ ॥ अथ नवमी॥ त्वं न इंद्र राया परीणसा याहि पथां अनेहसा पुरो याह्यरक्षसा॥ स च स्वनः परा बृ आ स च वस्वा स्तमी
वृआ॥ पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः॥ ॥ त्वं न इंद्रेति॥ हे इंद्र त्वं नः पथा अस्मत्संबंधिना मार्गेण
याहि आगच्छ। अस्य टेर्लोपः उदात्तनिवृत्तिस्वरेण तृतीयाया उदात्तत्वं। कीदृशेन मार्गेण अनेहसा अपापेन यत्नग
मनमार्गेण श्रुतिचोदितत्वादनेहस्त्वं। यद्वा नोस्माननुद्दिश्य याहि। किं विशिष्टेन राया परीणसा परितो नद्धेन राया अ

श्रीः

॥४८॥

प्रकर्षेण वक्तुं शक्यो भूयासं स्फूर्तेरतिमहत्त्वादिति भावः॥ वचेर्लिङ्याशिषि अङ् वच उमुमागमः स्यतदिति। यः इंदुः इषवान् एष
णवान् मन्मननीयं स्तोत्रं कर्म वा अनुद्दिश्य रेजति। गच्छति। रेजतिर्गत्यर्थः। रेजतिदध्यतीति तन्नामसु पाठात्। आग
मने दृष्टांतः॥ हव्यो न होतव्य आह्वातव्यो वा हव्य इंद्र इव प्रायेणोंद्र आगच्छेत्यादिना इंद्र एवाहूयते इदं वा विशेष्य
ते रक्षोहा यज्ञविघातकानां रक्षसां हंता मन्म तेषामेव कर्म हननादिरूपं रेजति गच्छति। चालयति नाशयतीत्यर्थः॥
स एवं दुः स्वयं निदः लिदिकुत्सायां क्विप् सावेकाच इति विभक्तेरुदात्तता अस्मिन्निंद तुर्वैरियाः वधैः हननोपायैः
हनश्च वध इति भावे अप तत्संनियोगेन वधादेशः स चांतोदात्तः। दुर्मतिं दुर्बुद्धिं अस्मत् अस्मत्तः आजे
त॥ आक्षिपेत्॥ अवनयेत। किंच। अघशंसः अघानां पापानां हिंसादीनां शंसिता स्तेनः अवतरं अत्यंत निकृ
ष्टं अवस्वस्थानाद्वा दस्युरवोभृत्वा सर्वेन गच्छतु अधः पतत्वित्यर्थः॥ अघशंसः स्तेनः अघशंसः वृकः इति तन्ना
मसु पाठात्। अवस्त्र वणमेव प्रार्थ्यते क्षुद्रमिव क्षेप्तुः शम्यामुद्गकादिकमिव उदकं यथा तिष्ठति अवन्नत्ययति तथा

द्वि॰भा॰

॥४९॥

यप्रकारारोग्यादिरूपाय मित्रं न सर्वजनमित्रं सूर्यमिव तं यथा महत्त्वेन संयोजयेति तथेत्यर्थः। यद्वा मित्रं नाप्रियरहि
तरूपं सखायमिव तं यथा महते प्रीतये संभजंते तद्वत्। किंच हेडे जिहेडे जज्ञितम अतिशयेन बलवत्त्वात् रक्षितः
अस्मान् पालयति वा अमर्त्य मरणधर्मरहितेंद्र अवितः अस्मान् धनेन तर्पयिता त्वं। किंचिद्द्रुथं वेगवंतमारुह्य अस्म
द्देवयजनं प्रति प्रमार्ग छेति शेषः तथा हे अद्रिवः शत्रूणाम मतिशयेन भक्षकं दुः अस्मदन्यं शिरिंबिठं तं विद अल्पमहांतं
वा शत्रुमिति शेषः। शिशिषे बाधस्व तथा हे अद्रिवः तथा हे अद्रिवः अद्रेराहर्त्तः भक्षकवान् शत्रूणां अद्रिवन्नदः संदृष्णो
यनेनापि वक्त्रैः स्यादिति निरुक्तं। शिरिंबिठं तं विद अयं तत्रक्षितं हिंसंतमपि शत्रुं शिशिषे बाधस्व। शिषतिः सायां। छंद
सः शपां श्लुः पुनर्व्यत्ययेन शः शिरिंबिठं तं अस्मादेव सनिह लंतांत्वेति सनः। किलाकुणाभावः। विदिह्य पकुत्सितः। कुत्सा
षां श्चिदाहरेत्य पकुत्सित इति यास्केनोक्तत्वात्। यद्वा समुच्चयार्थः। किंचिदित्यनेन सहस्रमुच्चीयते॥ ॥अथैकादशी।
पाहि न [illegible]

श्री

॥४९॥

[illegible] ॥ ॥पाहि न इंद्रेति॥ हे इंद्र सुष्टुत शोभनं स्तुतस्त्वं स्रिधः स्रुखदुःखाद्
तदुःसादकात् पापाद्वा नोस्मान्पाहि रक्ष यतस्त्वं दुर्मतीनां दुर्मनस्कानां रक्षःप्रभृतीनां नामन्यतरस्यामिति नामउ
दात्तत्वं। सदमित्। सर्वदैव अवयाता आच्छिद्य प्रापयितासि अतः पाहि अत एव हे इंद्र देवास्मास्तुष्टाद्दुष्टः सन् दुर्म
नस्कानां यागविघातकानां अवयातासि तथा रक्षणनिमित्तभूतस्य रक्षो रक्षितव्यमस्मादिति यास्कः। तादृशस्य पाप
स्य पापिनो राक्षसादेर्हंतासि तथा मावतो मत्सदृशस्य विप्रस्य मेधाविनो यजमानस्य त्राता रक्षितासि। अध अतो हे
तोहे इंद्र वसो सर्वेषां निवासभूत त्वा त्वां जनिता सर्वस्य जनयिता आदिकर्त्ता परमेश्वरो जीजनत् अजनयत् उत्पा
दितवान्। तथा हे वसो वासयितः त्वा त्वां रक्षोहणं जीजनत् रक्षोहननाय उत्पादितवान्। जनयतेर्लुङि चङि चङ्युप
धायाह्रस्वः। यणादिविघातिनां रक्षःप्रभृतीनां विघातय हींद्रस्य विततमिंद्रो देवान्विसृज्यते यादिप्रसिद्धद्योतनार्थो हि
शब्दः॥ ॥इति द्वितीयस्य प्रथमे सप्तदशो वर्गः॥ ॥एंद्र याह्युप न इति दशर्चं चतुर्थं सूक्तं पारुच्छेपं ऐंद्रं अंत्यास

नो न वेभिरित्येषा त्रिष्टुप्शिष्टा अनुष्टुभः अत्र त्रिष्टुबंतं परिभाषा नाश्रीयते सर्वमानुष्टुभमिति विशेषेण प्रति
ज्ञातत्वात्। ऐंद्र्या हि दशर्चं सा त्रिष्टुबित्यनुक्रमणिका। पृष्ठस्य षडहस्य षष्ठेऽहनि निष्केवल्यमेतत्सूक्तं। षष्ठस्ये
ति खंडे सूत्रितं। ऐंद्र याह्युप नः प्रघान्वस्येति। महाव्रते माध्यंदिनसवने ब्राह्मणाच्छंसिनोनुरूपस्तृचे प्रथमा ऐंद्र
याहीत्येषा महाव्रतस्य पंचविंशतिमिति खंडे सूत्रितं। ऐंद्र याह्युप नः परावत इंद्र याहीति द्यौरस्रो अनम्र
तेति।। ।।सैषा सूक्ते प्रथमा।। ऐंद्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः।। हवा
महे त्वा वयं प्रयस्वंतः सुते सचा।। पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये।। ऐंद्र याहीति। हे इंद्र परावतः
दूरदेशाद्वा स्वर्गलक्षणात् नोस्मानुपयाहि समीपं प्राप्तागच्छ। तत्र दृष्टांतः।। अयं न पुरोवर्ती अग्निरभिषुतः
सोमो वा प्रस्तुतत्वान्निर्दिश्यते।। स एव यद्यपि पुरस्तादुपचारान्निषेधार्थीयो न दूरः सर्वत्र तथाप्यत्रोच्छिये
नोपमार्थीयो गृह्यते।। यद्वा परावतो न दूरदेशादिव यद्यपि यज्ञे सर्वदा संनिहितस्तथापि स्वर्गस्थ्या दूरदेशादिव

सहभ्यं दातव्येन बहुविधधनेन युक्तः सन्। हे इंद्र नोस्मान् परावतः अर्थात् दूरदेशात् स्वर्गदेशात् सचस्व समवेतो भव परावत्
इति दूरनाम परावतः परावत् इति तन्नामसु पाठात् स्वर्गादेः सकाशात् पाहि रक्ष आरात् सन्निहितादिहलोकात् पाहि पा
लय यद्वा दूरात् यागकाले स्वर्गलोकेऽवस्थितात् अस्मान्परिपालय आरात् यागकाले संनिहिते देवयजनदेशे पाहि। वृनेतित
दुच्यते। अभिष्टिभिः अभिमुखैर्यागैः तन्निर्वाहैः यद्वा अभ्यासगमनैः किं बहुना सर्वकालं यागकाले दूरे अंति
के च अभिष्टिभिः अभिजितैः एषणैः पाहि सम्यक्परिपालय।। ।।अथ दशमी।। त्वं न इंद्र राया तरूषसोग्रं चित्त्वा
महिमा सक्षदवसे महे मित्रं नावसे।। ओजिष्ठ त्रातरविता रथं कंचिदमर्त्य। अन्यमस्मद्रिरिषेः कंचिदद्रिवो रिरिक्षं
तं चिदद्रिवः।। ।।त्वं न इंद्रेति।। हे इंद्र त्वं नोस्मान् तरूषसा तरुणकुशलेन अस्मानापद्भ्यः उत्तरीतुं शक्तेन राया धने
न उपेतो भवेति शेषः।। हे इंद्र त्वां उग्रं चित् उद्गूर्णबलं संतं त्वामेवं महिमा महत्त्वं अस्मान्स्तोत्रजनितः कश्चिदति
शयः सक्षत्। सेवते संभजते। उत्कर्षयतीत्यर्थः।। किमर्थं अवसे तत्प्रीतये। तत्र दृष्टांतः महे महते अवसे रक्षणा

द्वि॰भा॰

॥५१॥

म्न तेति॥ ॥सैषा सूक्ते द्वितीया॥ पिबा सोममिंद्र सुवानमद्रिभिः कोशेन सिक्तमवतं न वंसगस्तातृषाणो न वंसगः।
मदाय हर्यताय ते तुविष्टमाय धायसे। आ त्वा यच्छंतु हरितो न सूर्यमहा विश्वेव सूर्यं॥ ॥पिबा सोममिति॥ हे इंद्र वं
स सगो वननीयगमनस्त्वं सोमं पिब द्व्यचोतस्तिङ इति दीर्घः। कीदृशं तं अद्रिभिरभिषवसाधनैर्ग्रावभिः सुवानं सूयमा
नं कर्मणि कर्तृप्रत्ययः। कोशेन इति लक्षणेनासिक्तं खोदितजलेन पूरितं अवतं नस्थ हेवलक्षणमवटमिव। तं यथा वंस
गो वननीयगमन तृषा शीघ्रगामी वृषभः पिबति तद्वत्। तत्तृषाणो न वंसगः यथा अत्यंतं तृषितो वंसगो वननीयग
मनः शीघ्रगामी पुरुषः अहोरात्रिविभाग अपिबति तद्वत्। किमर्थं पानमिति तत्राह॥ ते तव मदाय तृप्तये हर्यताय
स्थिरीकृति हेतवे कांतयर्थं वा। हर्य गतिकांत्योः धमुदशीसादिना तन्। तुविष्टमाय महत्तमाय प्रवृद्धत्वाय धायसे यद्वर्थं
मद उपजायते तदर्थाय। धायोवहि धाज्जारूदसु निणादिस नु वृत्तेरासो पुरायै इति युक्। यद्वा ते तव तुविष्टमाय
धायसे अतिप्रभूताय पानाय सा त्वां अयछंतु अभिमुख्येन गमयंतु अस्मा इति शेषः॥ तत्र दृष्टांतः। हरितो

श्री

॥५१॥

न सूर्यं हरितः तूर्णं वाजिनः एतन्नामकाः अश्वाः सूर्यमिव तं यथा अतित्वरया अभिमतदेशं अतिप्रेरितास्तद्वत्। विश्वे
अहा विश्वा सर्वाण्यहानि सूर्यमिव तं यथा तत एव प्रतिदिनं वहंति। तथा अस्मद्यागदिवसेषु प्रतिदिनमावहंतु॥ ॥अ
थ तृतीया॥ अविंदद्दिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतमश्मन्यनंते अंतरश्मनि। व्रजं वज्री गवामिव सिषा
सन्नंगिरस्तमः॥ अपावृणोदिष इंद्रः परीवृता द्वार इषः परीवृताः॥ ॥अविंददिति॥ अयमिंद्रः दिवो द्यु
लोकात् आनीतं सोमं अविंदत अलभत लब्धवान् द्युलोकाद् [illegible] गायत्र्या पक्षिरूपया पदृतं अभ्यमावानीतं स्वीकृतवानि
त्यर्थः। द्युलोकादानयनं तैत्तिरीये तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहरदित्यादिषु सिद्धं। सएव विशे
ष्यते गुहा निहितं अतिगोप्ये प्रदेशे पर्वतादौ स्थापितं अत एव निधिं निधिस्थानीयं अनाद्यमियर्थः॥ आनयने दृ
ष्टांतः॥ वेः पक्षिणो गर्भं न शिशुमिव यथा कपोतादि स्त्रीपक्षी स्वशिशुं व्याध्यादिभयात् वृक्षस्थितदुर्गमदेशे स्था
पयित्वा तस्यानमजानती परिभ्रम्याविंदते तद्वदित्यर्थः॥ पुनः कीदृशं अश्मनि अपरिमितपाषाणे पर्वतादौ परि

द्वि·भा
।।५२।।

वीतं लतावृंदवृक्षादिना परितो वेष्टितं तत्स्वपीतरवुदेवेषु वो स्यादित्याय इति तत्राह।। अयमिंद्रो वज्री वज्रेणानूगवां
व्रजमिव नो पणिनानापहृतं भूमौ रवानिखातपाषाणैर्नपिहितं द्वारं वोव्रजं यथा तमासूरं जित्वा द्वारमुद्धाट्य लब्ध
वान् तद्वत्सोमंशिषासन् संभक्तुमिच्छन् सनीवंतद्वेति विकल्पनादिड्भावे जनसनखनेत्यात्वं। अविंदत्। अय
मर्थः।। पणिनामक इत्यादिश्रुतिषु प्रसिद्धः।। तथायमिंद्रः परीवृताः परितो मेघेनावृताः नरुषः अन्नहेतुभूत
स्योदकस्य द्वारः द्वाराणि अपावृणोत्। अपवृतान्यकरोत्। उद्धाटितवानित्यर्थः।। लघ्वालूनस्य इषः इष्यमाणानि
व्रीह्याद्यन्नानि परीवृताः भूमौ परिव्याप्तान् अकरोत्। वज्रेण भमे द्यौ भित्वा जलवर्षणेन सस्यादि समृद्धिं कृत्वा
व्रीह्यादिकं भूमौ व्याप्तमकरोदित्यर्थः।। यतो यमेवं कृतवान् अतः सोमः स्वीकारेयुक्तः।। ।।अथ चतुर्थी।। दृ दृहा
णो वज्रमिंद्रो गभस्त्योः क्षद्मेव तिग्ममसनाय संश्यत्। अहिहत्याय सं श्यत्। संविव्यान ओजसा शवोभिरिंद्र मज्म
ना।। तष्टेव वृक्षं वनिनो निवृश्चसि परश्वेव निवृश्चसि।। ।।दृ दृहाण इति।। अयमिंद्रः गभस्त्योर्बाह्वोः वज्री

श्री
।।५२।।

अस्मिन् यज्ञे अयमिति विभक्तिव्यत्ययः। अमुं देवयजनदेशं अच्छ अभिप्राप्तुं मायाहीति शेषः। तत्र दृष्टांतः।। सत्सतिः
सतो सर्वदा वर्त्तमानानां भूतिजां पालकोयजमानइव पथावेंकुर्वय इति पूर्वपदस्वरत्वे। स यथा अक्षिदथानि वदनानि अनु
स्रियच्छानानि यद्वत् सतां विद्यमानानां फलानां पालकोग्निः स यथा हवींष्याददानि गृहाण्यागच्छति तद्वत् त्वमपि यज्ञगृहाण्यागच्छ
यद्वा सतां नक्षत्राणां पतिश्चंद्रमाः स यथा स्वं स्वं धामस्थानमागच्छति तद्वत्। किंच प्रयस्वंतो हविर्लक्षणान्नवंतो वयं य
जमानाः त्वां त्वां हवामहे आह्वयामः किमर्थं सुते अभिषुते सोमे निमित्तभूते सति। वृत्रहत्ये सचा ऋत्विग्भिः सहिताः
सचा सहेत्यर्थ इति यास्कः।। आह्वाने दृष्टांतः।। पुत्रासः पुत्राः पितरं न पालकं जनकं तमिव तं यथा वाजसातये अन्नस्य सं
भजनाय आह्वयंति तथा वयमपि तदर्थमाह्वयामः। किंच मंहिष्ठं मंहनीयं त्वां वाजसातये संग्रामप्राप्तये तज्जयाय हविः
स्वीकाराय वा आह्वयामः।। षष्ठे हनि माध्यंदिनसवने प्रस्थितयाज्यानां पुरस्तादन्याश्चः प्रक्षेपणीयाः तत्राद्विनः पुरस्ता
त् पिबा सोममिंद्रेत्येषा षष्ठस्य प्रातःसवन इति खंडे सूत्रितं।। पिबा सोममिंद्र सुवानमद्रिभिरिद्रोय हि द्यौरसुरो अन

हि॰भा॰

॥५३॥

निवृश्चसि॥ यथा कुष्ठिः स्वरसुना छिनत्ति वृक्षं तथा त्वमप्युक्तैस्त्रिविधैर्बलैर्नितरामस्मद्द्वेषिणं वृश्चसि॥ अथ
॥ अथ पंचमी॥ त्वं वृथा नद्य इंद्र सर्तवेऽच्छा समुद्रमसृजो रथाँ इव वाजयतो रथाँ इव॥ इत ऊतीरयुंजत समान
मर्थमक्षितं॥ धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः॥१८॥ ॥ त्वं वृथेति॥ हे इंद्र त्वं वृथा अप्र
यत्नेनैव नद्यः नदीः समुद्रमच्छ तमाभिमुख्येन सर्तवे प्राप्तुं असृजः मेघं निर्भिद्योत्सादितवानसि॥ तत्र दृ
ष्टांतः॥ रथामिव यथा त्वं रथान् स्वद्युगं प्रति अच्छ सर्तवे आभिमुख्येन प्राप्तुं असृजः सृष्टवानसि॥
तद्वत् किंच। वाजयतो रथाँ इव संग्राममन्विच्छंतो राजादयः रथानिव तेयथा संग्राम प्रमोषध्यादिकं ग
तद्वत् किंच। वाजयतो रथाँ इव संग्राममन्विच्छंतो राजादयः रथान् इति विभक्तेरुदात्तत्वं॥ किंच इतः अस्मत्सं निर्दिशे
तिसर्तुं रथान् सृजंति तद्वत् व्यजेना तस्मात् तुमर्थे तुमुन् इति विभक्तेरुदात्तत्वं॥ किंच इतः अस्मत्सं निर्दिशे
द्वितीयार्थे तसिल् अस्मान्प्रति ऊतीः ऊयः त्वसात्सादितिभावः॥ अर्थस्य वृत्तउदकं विशेषणं सन्नपुंसक
लिंगः॥ अक्षितमिक्षदकं नाम अक्षितं बर्हिरितितन्नामसु पाठात्॥ तत्र दृष्टांतः मनवे मनोरथाय धेनू श्री ॥५३॥
रिव धेनवो यथा विश्वदोहसः सर्वार्थं दोग्ध्र्यो भवंति यथा वाजनाय यस्य नसमर्थाय तदर्थं विश्वदोहसो भवंति।
सर्वक्षीरप्रदा भवंति॥ यद्वा जनाय सर्वजनार्थं हस्वादीनम्पि लक्ष्यनद्यः विश्वदोहसः संपूर्णदोग्ध्र्यो भवंति॥
सर्वत्र प्रवहंति॥ अत्र नद्यः प्रीणनात् दोहसद्दृश उपचर्यते॥ इंद्रगजगउपकारि दृष्टिप्रदत्तीद्रस्यैव वसुकिं॥
॥ ॥ इति द्वितीयस्य प्रथमेऽष्टादशो वर्गः॥ ॥ अथ षष्ठी॥ इमां ते वाचं वसूयंत आयवो रथं न धीरः स्वपा
अतक्षिषुः सुम्नाय त्वामतक्षिषुः॥ शुंभंतो जेन्यं यथा वाजेषु विप्र वाजिनं॥ अत्यमिव शवसे सातये धनावि
श्वा धनानि सातये॥ इमां ते वाचमिति॥ हे इंद्र ते त्वदर्थं वसूयंतो धनमात्मन इच्छंतः आयवः दातव्यहविष्
पान्नवंतः ऋत्विज आयव इति मनुष्यनाम॥ आयवः अनवः इति तन्नामसु पाठात्॥ इमां क्रियमाणां स्तुतिरू
पां वाचं अतक्षिषुः संपादितवंतः॥ स्वपाः शोभनकर्मवान् कुशलकारी बहुश्री हौ सोमनसीसूत्र रपदस्य दा
त्तत्वं॥ धीरः धीमान् रथं न रथमिव तं यथा प्रयत्नेन साधु करोति तद्वत् एवं कृत्वा त्वां सुम्नाय सुखाय अ

ऋ॰भा॰ ॥५४॥

तक्षिषुः अनुकूलमसु सादयंति सम्नमिति सुखनाम सम्नमिति तन्नामसु पाठात्। कृंच हे विप्रमेधाविन्निं-
द्र वाजेषु संग्रामेषु वाजिनं वेगवंतं त्वां शुंभंतः शुभेर्दीप्यर्थः अतक्षिषुः स्तुत्या प्रीणयंति। तत्र दृष्टांतः। अ-
त्यं यथा जयशीलं शूरं यथा भटाः स्तुवंति तद्वत्। यद्वा अत्यं जयशीलं वाजिनं वेगवंतं अश्वं वाजेषु संग्रामे-
षु यथोत्साहयंति। तद्वत्। कृंच शवसे बलाय धनाधनानां सातये लाभाय च स्तुम इति शेषः। ऊतियूतिसाती-
त्यादिना क्तिन् उदात्तत्वं। न केवलं धनमात्रं किंतु विशिष्टधनानि सातये रुक्षानि प्रीणनसाधनानि गवादिधनानि
षष्ठ्यर्थे द्वितीया। तेषां लाभाय। तत्र दृष्टांतः। धनाधने संग्रामे शवसे वीरजयसाधनाय सातये। तेषामेव ध-
नानां प्राप्तये च अत्यमिव सततगामिनमश्वमिव तं यथा स्तुवंति तद्वत्॥ ॥अथ सप्तमी॥ भिनत्पुरो नवति-
मिंद्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो। अतिथिग्वाय शंबरं गिरेरुग्रो अवाभरत्।
महो धनानि दयमान ओजसा विश्वा धनान्योजसा॥ ॥भिनत्पुर इति॥ हे इंद्र नृतो रणे नर्तनशील त्वं दा- श्री॰ ॥५४॥

दादृहाणः दृढं गृण्हन् दृह दृहि वृद्धौ। लिटः कानच्। गभस्ती इति बाहुनाम गभस्ती इति तन्नामसु पाठात्। ऋवि-
मर्थे आसनाय शत्रोरुपरि क्षेपणाय तिग्मं अर्यं तीक्ष्णं वज्रं संश्यन् सम्यक् तीक्ष्णीकरोति। श्यो तनूकरणे
नुतः श्यतेर्निष्ठायां आकारलोपः। छांदसः इकाराभावः। यद्वा श्यतेरिति श्यलोपः इतीकारलोपः। तत्र दृष्टांतः। क्षद्मेव उद-
कमिव उदकं यथा तृणानां निरसनाय अभिमंत्रणादिसंस्कारेण तीक्ष्णीक्रियते तद्वत्। क्षद्म इति उदकनाम क्षद्म-
न भ इति तन्नामसु पाठात्। पुनरपि तदेव विशेष्यते अहिहत्याय अहेर्वृत्रस्य मेघस्य वा हननाय हंतेर्नस्तत्वे-
तिस्य पूतवा रालादेशश्च। संस्यन् पूर्वमेक्ष्णं सन्नयति। ई हे इंद्र तुजसा बलेन पराभिभवनसामर्थ्येन शवोभि-
सेन लक्षणैर्बलैर्मज्मना शरीरेण बलेन संविथानः सम्यक् युक्तः सन् व्येति। लिटः कानच्। ग्रहिज्यावयिति सं-
प्रसारणं॥ तष्टा तक्षेव यथा वृश्चिन् तष्टा तक्षा वा तक्षकस्य साधु कर्म वनिनो वनसंबंधिनो वृक्षान् इति वृश्चति।
उपयोगाय नितरां छिनत्ति। तिन स्रुकेन तक्षरति तथा त्वमप्यस्माकं वज्रमावरंतं शत्रुं निवृश्चसि किं परश्वेव

स्वकीयेन बलेन दयमानः साधयन् अवाभरत्॥ ॥अथाष्टमी॥ इंद्रः समत्सु यजमानमार्यं प्रावद्विश्वे
षु शतमूतिराजिषु स्वर्मीह्ळेष्वाजिषु। मनवे शासदव्रतांस्त्वचं कृष्णामरंधयत्। दक्षन्न विश्वं ततृषाणमोष
ति न्यर्शसानमोषति॥ ॥इंद्रः समत्स्विति॥ अयमिंद्रः समत्सु समरणेषु प्रहारनिमित्तेषु यजमानं यष्टा
रं आर्यं अरणीयं सर्वैर्गंतव्यं प्रावत् रक्षति। समत्स्विति संग्रामनाम। समत्सु समरणा इति तन्नामसु पाठात्।
किंच शतमूतिः स्वरूपेण परिमितरक्षणः इंद्रः विश्वेषु लिंगव्यत्ययः आजिषु स्पर्धानिमित्तेषु संग्रामेषु
यजमानं प्रावत्। तथा स्वर्मीह्ळेषु स्वर्गदेषु सुखस्य सेवयितृषु वा आजिषु संग्रामेषु प्रावत्। स्वर्गप्रदानेन
रक्षति। असौ आभिमुख्येन हतानां वीराणां स्वर्गः पराशरेण स्मर्यते॥ द्वाविमौ पुरुषौ लोके सूर्यमंडल
भेदिनौ॥ परिव्राड्योगयुक्तश्च रणे योऽभिमुखो हत इति॥ ॥अत्रेतिहासमाचक्षते॥ अंशुमतीना
म नदी तस्यास्तीरे कृष्णो नामासुरो वर्णतश्च कृष्णो दशसहस्रैरनुचरैरुपेतस्तद्देशवासिनः पीडयन्नास् श्रीः ॥५५॥

स्त॥ तत्रेंद्रो बृहस्पतिना प्रेरितः सन् मरुद्भिः सहितः कृष्णं तदीयां त्वचमुत्कृत्य सानुचरमवधीदयमर्थः॥
अव द्रप्सो अंशुमतीमतिष्ठदित्यादिनोपरिष्टाद्द्रक्ष्यते॥ तादृशोच्यते॥ अयमिंद्रो मनवे मनुष्याय विभक्ति
व्ययः। मनुष्याणामर्थाय अव्रतान् व्रतमिति कर्मनाम तद्रहितान् यागविद्वेषिणः शासन् शिक्षितवान् हिं
सितवान् शासेर्लेट्यडागमः॥ तथा कृष्णां त्वचं कृष्णनाम्नोऽसुरस्य कृष्णवर्णां त्वचमुत्कृत्यारंधयत्। हिंसित
वान्। रधिहिंसायां रधिजभोरचि इति नुम्। केन प्रकारेणेति तदुच्यते। केन प्रकारेणेति तदुच्यते दक्षन्न भस्मी
करोति। लेट्यडागमः। सिब्बहुलमिति सिप्। तथा विश्वं ततृषाणमोषति सर्वमपि हिंसकं तदनुचरसंघं द
हति। यत्किंचिदवशिष्टमिति नेत्याह। अर्शसानं हिंसारूपं हिंसावशिष्टं सर्वमपि न्योषति निःशेषेण दहति।
॥ ॥अथ नवमी॥ सूरश्चक्रं प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषायति।
उशना यत्परावतोऽजगन्नूतये कवे। सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः॥ स नो नव्येभि र्

द्वि. भा.
॥५६॥

अथ नवमी॥ ॥ अत्रापीतिहासमाचक्षते। वृत्रेण नासुराः पूर्वमिंद्रवज्रेण बाधा माभूदिति ब्रह्मणो वरं लब्ध्वा
इंद्रमगणयित्वोद्धता आसन्। तान् हंतुमिंद्रः सूर्यरथस्य चक्रमादायावधीदिति। तदिदमुच्यते। अयमिंद्रः सू-
रः सूर्यस्य षष्ठ्यर्थे प्रथमा॥ चक्रं रथस्य चक्रमादाय ओजसा स्फुरेण बलेन जातः समृद्धः सन् प्रवृहत्। प्रक्षिप्त-
वान्। वृहउपमने तौदादिकः। किंच। अरुणः अरुणवर्णः असंततेजोयुक्तः सन् यद्वा गमनशीलः सन् प्रपित्वे
तेषां समीपे तत्समीपमागत्य वाचं वागुपलक्षितं प्राणमुषायति मुमोष मुष्णाति। यद्वा। प्रपित्व इत्यासन्ननाम। यु-
द्धे तेषां प्रहारध्वनिं मुषायति तेषु हतेषु ध्वनिः स्वयमेव विश्रांतो भवत्येवेत्यर्थः॥ अथवा इंद्र एव द्युस्थानः
सन् आदित्यात्मना स्तूयते सूरः सूर्यः जातः उदितः सन् ओजसा स्वकीयेन तेजसा युक्तः चक्रं प्र वृहत् तमोनि-
वारणार्थं अरिजयाय वा चक्रोपलक्षितं रथं प्रवर्षेणोद्यतं ततः करोति पूर्वं अरुणः तद्रथयंता प्रपित्वे मंदेहाख्या-
सुराणां समीपे वाचं तेषां जहि निंधीत्याद्युक्तिध्वनिं मुषायति मुष्णाति मुषेरुत्तरस्य श्न अहयिच्छंदसि शायजयौ

श्री.
॥५६॥

दाशुषे हविर्दत्तवते पूरवे अभिमतपूरकाय मनुष्याय मनुष्यनामैतत्॥ महि महते दिवोदासाय एवंनामकाय राज्ञे
दिवोदासे षष्ठ्या अलुगिष्यते लुक्। दिवोदासादीनां छंदसीति पूर्वपदाद्युदात्तत्वं। नवतिं एतत्संख्याकानि पुरः शत्रू-
णां पुराणि भिनत् अभिनत् भिन्नवान् असि। तथा हे नृतो गात्रविक्षेपेण कुत्सलहस्तपादादिप्रक्षेपेण शत्रून् हिंसन्
वज्रेण क्षेपणसमर्थेनायुधेन दाशुषे हविर्दत्तवते दिवोदासायान्यस्मै वाभिनत्। नवतिमपि शत्रूं भिन्नवानसि।
इदानीं परोक्षेणाह। अतिथिग्वाय पूजार्थमतिथीन् गच्छते दिवोदासाय तदर्थं गमेरौणादिको डवन्प्रत्ययः। उ-
ग्रः उद्गूर्णबलः इंद्रः पूर्वं पुराभेदनसमये विद्यमानमपि अम्रियमाणं गिरिमारूढं शंबरं एतन्नामानमसुरं गिरेः दुर्ग-
मात्पर्वतादेः सकाशात् अवाभरत् अवाङ्मुखमवहृष्यमाणं हतवान्। किं कुर्वन् महः महांति धनानि तदीयग-
वाश्वादीनि दयमानः दिवोदासाय राज्ञे साधयन्। दयतिर्दानगतिहिंसादानेषु। जयः पित्वादनुदात्तत्वे शानचो लसा-
र्वधातुकस्वरेण धातुस्वरः। न केवलमल्पं धनं किंतु विश्वा धनानि सर्वाण्यपि तेषां मणिमुक्तादीनि ओजसा

क्थैः पुरां दर्त्तः पायुभिः पाहि शग्मैः ॥ दिवोदासेभिरिंद्र स्तवानो वावृधीथा अहोभिरिव द्यौः ॥१०॥ ॥ स नो नव्येभि
रिति ॥ हे इंद्र वृषकर्मन् अभिमतवर्षणव्यापारवन् पुरां दर्त्तः असुरपुराणां दारयितः सर्वामंत्रितं इति षष्ठ्याः परांग
वद्भावात् षष्ठ्यामंत्रितसमुदायस्य पादादित्वात् आष्टमिकमाद्युदात्तत्वं । स तादृशो महानुभावस्त्वं नोऽस्मत्संबंधिभिः नव्ये
भिः नूतनैः हृद्यैः उक्थैः इदानीं प्रतिपादितप्रकारैः स्तुतः सन् नु पायुभिः पालनप्रकारैः शग्मैः सुखैः स्वस्थैर्हि कूसुभि
कुरूपैः पाहि पालय । किंच हे इंद्र दिवोदासेभिः दिवोदासगोत्रोत्पन्नैः अरआदित्वादचु अस्माभिः परुच्छेपैः यद्वा
पूजार्थं बहुवचनं स्तवानः स्तूयमानः कर्मणि कर्तृप्रत्ययः । यथा प्रवृद्धो भवति तथास्मत्स्तुत्या अयं तं प्रवृद्धो भवे
यर्थः ॥ ॥ इति द्वितीयस्य प्रथमे एकोनविंशो वर्गः ॥ ॥ इंद्राय हि द्यौरसुरो अनम्नतेंद्राय मही पृथिवी वरीमभि
र्द्युम्नसाता वरीमभिः ॥ इंद्रं विश्वे सजोषसो देवासो दधिरे पुरः ॥ इंद्राय विश्वा सवनानि मानुषा रातानि संतु मा
नुषा ॥ ॥ इंद्राय हीति सप्तर्चं पंचमं सूक्तं ॥ इंद्राय सप्तेत्यनुक्रमणिका पारुच्छेप ऋषिः अत्यष्टी छंदः । इंद्रो दे

वता पृष्ठ्यस्य षष्ठेहनि माध्यंदिनसवने होत्रकाः स्वस्वशस्त्रे एतत्सूक्तं तृचत्रयं कृत्वा आरंभणीयान्यतमदूर्ध्वमाव
पेयुः ॥ अत्रायं विभागः आद्यास्तिस्रो मैत्रावरुणस्य तृतीयाद्यास्तिस्रो ब्राह्मणाच्छंसिनः पंचम्याद्यास्तिस्रोऽच्छा
वाकस्य एतच्च चतुर्थेहनि खंडे सूत्रितं षष्ठे हनींद्राय हि द्यौरसुरो अनम्नतेत्येवमेतेन तृचेनैवाहनि तस्मिन्नेव स
वने प्रउगशस्त्रादीनां प्रस्थितयाज्यान्यः पुरस्तादादितः षड्ऋचः एकैकं प्रक्षेपणीयाः षष्ठस्येति खंडे सूत्रितं । इंद्रा
य हि द्यौरसुरो अनम्नतेति महाव्रते निष्केवल्ये इंद्राय हीति तृचो वैकल्पिकानुरूपो द्वितीयः । महाव्रतस्येति खंडे
सूत्रितं ॥ ऐंद्र्याह्युक्थपनः परावत इंद्राय हि द्यौरसुरो अनम्नतेति ॥ ॥ तत्रेयं प्रथमा ॥ इंद्राय हि द्यौरिति ॥ द्यौः द्यो
तनशीलो द्युलोकः तन्निवासी देवसंघो वा असावसुरो निरसनशीलः शत्रूणां पुण्यकृतामेव तन्निवासात् इंद्राय हि
इंद्रायैव अनम्नत स्वयमेव प्रह्वो भवति नमेः छांदसो लङि कर्मकर्तर्यात्मनेपदं न दुहस्नुनमामिति यगभावः छांदसः
शपः श्लुः हलादिशेषाभावश्च अनुनासिकलोपः हिश्च प्रसिद्धार्थो वा तथा इंद्रार्थं मही महती पृथिवी भूमिः

तत्रस्थः सर्वजनो वा अनम्नत उभयत्राश्रयवार्विरुद्धेनाश्रयी लक्ष्यते याम आगच्छत इतिवत् द्वेन साधनेन वेति
तदुच्यते वरीमभिः वरणीयैः स्तोत्रैर्हविर्भिर्वा किंच द्युम्नसाता द्युम्नसातौ अन्नस्य यशसो लाभनिमित्ते स
ति वरीमभिर्वरणीयैर्हविर्भिर्युक्ता यजमानाः प्रह्वीभवंतीति किंच इंद्रमेव विश्वे सर्वे देवासो देवाः सजोषसः स
मानप्रीतियुक्ताः एवमनन्यभाजो पूर्वं असुरवधार्थं पुरो दधिरे पुरतः स्थापितः इंद्रमुखेनैवासुराञ्जि
तवंत इत्यर्थः ॥ तथा मानुषा वसूनि संबंधीन्याभिषवयुक्तानि प्रातरादिसवनानि इंद्राय संतु इंद्रायैव भवंतु
तथा मानुषा मनुष्याणां ऋत्विजां संबंधीनि रातानि दत्तानि पुरोडाशादीनि इंद्राय हि इंद्रायैव संतु इंद्रं
प्रीणयितुं समर्था भवंत्वित्यर्थः ॥ ॥ अथ द्वितीया ॥ विश्वेषु हि त्वा सवनेषु तुंजते समानमेकं वृषमण्यवः पृ
थक् स्वः सनिष्यवः पृथक् ॥ तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ॥ इंद्रं न यज्ञैश्चितयंत आयवः स्तोमेभिरि
द्रमायवः ॥ ॥ विश्वेषु हीति ॥ हे इंद्र त्वा त्वां एकं एकमेव संतं विश्वेषु सर्वेषु सवनेषु तद्वत्त एकहाहीनसत्र

ति त्रायजादेशः ॥ तदनंतरं सूर्य इन्द्रानः सर्वाणि तमांस्यसुरान्वा निराकर्तुं समर्थः सन् आमुषायति समंता
न्मुष्णाति ॥ अथ प्रत्यक्षकृतः ॥ हे कवे क्रांतदर्शिन् यत् स त्वं उशना उशना उशनसः एतन्नाम्नो महर्षेरुत्तये रक्ष
णाय परावतो दूरात् स्वर्गस्थानात् अजगन् गतवानसि प्राप्तवानसि ॥ गमेः सिपि छंदसि ॥ रापः श्लुः इत्युत्या
दि लोपो मोनो धातोरिति नत्वं ॥ यद्वा उशना सायुक्तः सन् अजगन् आगच्छ आगत्य च विश्वा विश्वानि सुम्नानि सु
खसाधनानि धनान्याद्ययास्माकं तुर्वणिस्तूर्णवनिः क्षिप्रसंभक्ता भवेति शेषः ॥ तुर्वणिस्तूर्णवनिरिति निरुक्तं ॥
तत्र दृष्टांतः ॥ मनुषेव मनुष्येणेव यथा त्वोतेन परितृदयदेशांतरात् अभिमतं धनमानीयते तद्वत् यद्वा मनुषे मनु
ष्याणामिव इतरेषामृत्विजां विश्वानि सुम्नानि सर्वाणि धनान्यादय तुर्वणिर्भवसि तद्वदस्माकमपि न केवलमेकस्मिन्नेव
यागदिने किंतु अहा विश्वेव विश्वान्यपि अहानि सर्वेष्वपि अहःसु तुर्वणिर्भव ॥ यद्वा तुर्वणिस्त्वं अहा विश्वेव विश्वान्यह
न्यतिदीर्घमायुर्यथा ददासि तथासन्नान्यपि उभयमपि देहीत्यर्थः ॥ ॥ अथ दशमी ॥ सनो नव्येभिर्वृषकर्मन्नु

छांदसः प्रापोल्लुक्॥ ॥अथ तृतीया॥ वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निःसृजः सक्ष
न्त इंद्र निःसृजः॥ यद्गव्यंता द्वा जना स्व१र्यंता समूहसि। आविष्करिक्रद्वृषणं सचाभुवं वज्रमिंद्र सचाभुवं॥
विततत्वात ततस्र इति॥ हे इंद्र त्वा त्वामुद्दिश्य मिथुनाः पत्नीसहिता यजमानाः विततस्रे यज्ञं वितन्वंतीय द्वा
यज्ञे पयोव्रतादिनाऽऽत्मानमुपक्षयंति तनतस्र उपक्षये छांदसि लिटि इरयोरे इति रेभावः॥ किमर्थं गव्यस्य व्र
जस्य साता गोगवां संबंधिनः यूपस्य लाभे निमित्तभूते सति न च सर्वत्राग्निहोत्रादिनियवाक्येषु यस्या दपस्य
गृहा नियनैमित्तिकवाक्येषु पुरुषस्यैवार्थित्वादेः सद्भावात्तस्यैवाधिकारः स्त्रियास्तु सत्यप्यर्थित्वे ध्ययना
भावेन विद्वत्ताया अभावात् अत एव सामर्थ्याभावाद्यज्ञेनास्याधिकार इति प्राप्ते यद्यपि स्त्रियो नास्त्यधिकारः
पृथक्। तथापि पूर्वमीमांसायां षष्ठे अधिकाराध्याये तृतीयचतुर्थाभ्यामधिकरणाभ्यामस्त्येव स्त्रिया अ
धिकारः स च पत्या सहेति प्रपंचितत्वात् जायापती अग्निमादधीयातामित्याधानविधानात् स्मृतिषु पत्न्यै

वनास्ति स्त्रीणां पृथग्यज्ञो न व्रतमिति पृथगधिकारस्यैव निवारितत्वादस्त्येव स्त्रियाः पत्या सहाधिकारः अध्यय
नाभावेपि वेदं पत्न्यै प्रदाय वाचयेदिति सूत्रकारः किं हि वचनं न कुर्यान्नास्ति वचनस्यातिभार इति न्यायात् तस्मा
न्मिथुनात्वयज्ञं ततस्र इत्येनव्यक्तं। कीदृशास्ते अवस्यवः इंद्रात्मने तृप्तिमिच्छंतः निःसृजः निःशेषेण हवि
स्सृजंतः सक्षंतः सक्षतिर्गत्यर्थः त्वां संभजमानाः पुनस्त एव विशिष्यंते निःसृजः फलप्रतिबंधकं पापं निर्ग
मयंतः कस्त्ववविशेष इति तदुच्यते यत् यस्मात्कारणात् गव्यंता गामात्मन इच्छंतौ गोशब्दो लक्षप आत्मनः क्य
च् वांतोपीत्यवादेशः। स्वर्यंता स्वर्गं यंतौ गंतुमुद्युक्तौ द्वा जना द्वौ जायापतिरूपौ जनौ समूहसि। संयुक्तयोरेव
भिमतं स्वर्गादिकं प्रापयसि। यद्वा सम्यगनुष्ठितवंता विसूहसानिश्चिनोषि। अतः पत्नीसहिता यजमाना अ
नुतिष्ठंतीत्यर्थः॥ किं च हे इंद्र त्वं वृषणं वर्षितारं वर्षकं कामानां सचाभुवं सहैवोत्पन्नं त्वां तथाविनाभूतं तथा सचा
भुवं शत्रूंन वधादिव्यापारसामर्थ्येन सहैवोत्पन्नं आविष्करिक्रत् प्रकटयन् वर्तसे इति शेषः॥ ॥अथ च

तुथ्र्ये ॥ ॥ विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिंद्र शारदीरवातिरः सासहानो अवातिरः ॥ शासस्तमिंद्र
मर्त्यमयज्युं शवसस्पते ॥ महीममुष्णाः पृथिवीमिमा अपो मंदसान इमा अपः ॥ ॥ विदुष्ट इति ॥ हे इं
द्र ते वीर्यस्य तव संबंधिनः अस्य वीर्यस्य कर्मणि षष्ठी वक्ष्यमाणमेतद्वीर्यं विदुः पूरवो मनुष्याः यजमाना
स्तव महत्वं जानंतस्त्वामेव यजंति ॥ ते विदुः । यद्वा अस्य वीर्यस्य माहात्म्यमिति शेषः ॥ विदुष्ट इत्यत्र युष्म
त्तत्तक्षुष्विति विसर्जनीयस्य सत्वं ॥ वीर्यमेव विशेष्यते हे इंद्र यद्यस्मात्कारणाच्छारदीः संवत्सरसंबंधि
नीः वत्सरपर्यंतं प्राकारपरिखादिभिः दृढीकृताः पुरः शत्रूणां अवातिरः नाशयः अव पूर्वस्तिरतिर्नाशनार्थः
किं कुर्वन् सासहानः तत्रस्थानभिभवन् धनाद्युपहारेण पालयन् सहतेर्यङ्लुगंतात् तच्छीलिकश्चानश् अव
तिरः किंच हे इंद्र तं मर्त्यं मरणधर्माणमयज्युं अयष्टव्यीयज्ञविघातिनं राक्षसादिं शासः निगृहीतवानसि तनूकृ
तवानसि वा । हे शवसस्पते बलस्य पालक त्वं महतीं पृथिवीं इमा अपश्च समुद्रनद्यात्मकान्युदकानीव अमु

श्री ॥६८॥

येषु सर्वेषु सोमयागेषु यजमानाः तुंजते त्वरयंति हविरादीनि ददन् कीदृशं त्वां समानं सर्वेषामेव रूपं कीदृशाः य
जमानाः वृषमण्यवः अभिमतवर्षणाय त्वामेव मन्यमानाः पृथक् विविच्य स्वर्गमिच्छंतः स्वर्गसुखविशेषं वास
निष्यवः संभक्तुकामाः पृथक् तुंजते पृथगेव त्वरयंति तुंजतिर्दानार्थः शिक्षति तुंजते इति तन्नामसु पाठात् तं
तादृशं त्वां वृषभस्य बलस्य सेनारूपस्य धुरि वहनेन जयाय धीमहि स्थापयामः ॥ यद्वा वृषभस्य अस्मदीयस्य
शरीरबलस्य धुरि धीमहि । वृषभ इति बलनाम शूषं सह इति तन्नामसु पाठात् ॥ तत्र दृष्टांतः ॥ पर्षणिं नावं न
पारस्य संभक्त्रीं पूरयित्रीं वा पूलस्य नावमिव तां यथा भारवहनेन स्थापयंति पारतीरं कर्मसमाप्तौ छंदसि वनस
नरक्षिमथामिति सनेरिन्प्रत्ययः । पृषोदरादित्वात् पिपर्तेरौणादिकः सनिप्रत्ययो वा कीदृशा वयं आयवो मनुष्याय
जमाना यज्ञैः साधनैः इंद्रं न चिंतयंतः परमेश्वरमिव त्वां चेतयंतः परमेश्वरबुध्या त्वां ध्यायंत इत्यर्थः ॥ यद्वा न
शब्द एवकारार्थः इंद्रमेव त्वां जानंतः तथा स्तोमेभिः स्तोत्रैः इंद्रमेव आयवो गच्छंतो वयं धीमहि दधाते र्लिङि

द्वि॰ भा॰

॥६१॥

कुत्रेति तदुच्यते। पृतनासु संग्रामेषु वृद्धिमर्थं प्रतंतवे प्रकर्षेण वनितुं संभक्तुं युद्धाय। हे धीराः संभजंते। वनते स्तुम
र्थे तवेन् प्रत्ययः। तादौ चेति गतेः प्रकृतिस्वरत्वं। किंच ते तव संग्रामवासिनः त्वय्यन्यामन्यां अन्यां अन्यां श्रअ
न्यमन्यं प्रति कुर्मयति हारे सर्वनाम्नो द्विर्वचनेन द्यं नदं संतोषसमृद्धिं टुनदि समृद्धौ पूर्ववद्रूपित्वं वा घिताउप्यमा
छांदसो यणादेशः। सनिं धनं संभजंते। सनोतेर्लेटि सि बहुलमिति। सिप् इट् व्यत्ययेन पुनः आप्रत्ययः।
आत्मनेपदेष्वनतः इत्यादेशो अभ्यस्तयोरात इत्याकारलोपः छंदस उत्वाभावः। श्रवस्यतो अन्नमिच्छंतो ज
यात्तुव्यमन्नं कुर्वंतः सनिं धनं भजंते॥ ॥अथाष्टमी॥ उतो नो अस्या उषसो जुषेत ह्यर्कस्य बोधि हवि
षो हवीमभिः स्वर्षाता हवीमभिः॥ यदिंद्र हंतवे मृधो वृषा वज्रिन्चिकेतसि॥ आ मे अस्य वेधसो नवीयसो मन्म
श्रुधि नवीयसः॥ ॥उतो नो अस्या इति॥ अथ अयमिंद्रो नो अस्माकं संबंधिनी अस्या उषसः कर्मणि षष्ठी। ए
षा नः सुषसः स्तुतिः संबंधिन उषः काले उतो जुषेत अपि च वासे तु उपस्येवास्माकं अयमिंद्रो यतं गच्छेदित्यर्थः।

श्री

॥६१॥

हिः पूरणार्थः। गत्वा च अर्कस्य हविषः पूर्ववत्कर्मणि षष्ठी अर्चनसाधनं हविः हवीमभिर्हवनप्रकारैर्विशेषैः दत्ते हविः
उतो बोधि अपि नाम मनाक् च कर्मसत्स्वर्षाता स्वर्गस्य अस्य सकलविशेषस्य वा संभजनस्थाने यज्ञे हवीमभिमाहूयमे
रा हूतो भवति विशेषः। अस्माभिराहूतः सन् उषस्येवागत्य हविः स्वीकुरोषीत्यर्थः। कस्मादेवमुच्यते यद्यस्मात्कारणा
त् हे वज्रिन् वज्रयुक्तेंद्र मृधः हिंसकान् शत्रून् हंतवे हंतुं वृषा वर्षितापसन् कामानां चिकेतसि अवबुध्यसे कितज्ञा
स्ताना मादिकः लघूपधगुणः। ताभ्यस्तस्य चिपिती यत्र छंदसि बहुलमिति वचनात् लघूपधगुणाभावः। अभ्य
नः नवीयसो नवतरस्य दीक्षितसंस्कारैः संस्कृतत्वान्नवीयस्त्वं पुनर्विशेष्यते नवीयसः अतिशयेन नवं नवीयसः अ
साधारणस्तुतिमतः अत्र यजमानविशेषणे स्तुत्वं कृतं स्तोत्रमेव विशिष्टं भवति॥ ॥अथ सप्तमी॥ त्वं तमिंद्र वावृ
धानो अस्मयुरभित्रयंतं तुविजात मर्त्यं वज्रेण शूर मर्त्यं॥ जहि यो नो अघायति शृणुष्व सुश्रवस्तमः॥ रिष्टं न याम

न्नध भूतु दुर्मतिर्विष्वगपभूतु दुर्मतिः ॥२०॥ त्वं तमिंद्रेति ॥ हे इंद्र तुविजातेषु अस्मत्सकन्या बहुभावमायन्नजूररवि
क्रांत त्वं वर्धमानः वयसर्थं वर्धमानः अस्मयुः अस्मान्त्वदुक्तान्नुकामयमानस्त्वं अमित्रयंतं अस्मच्छत्रून्नूमाचरंतं म
र्त्यं मरणस्वभावं तं मर्त्यं वज्रेण हि हंते र्जे इति जादेशः तस्य असिद्धवदत्राभादिति असिद्धत्वात् हेर्लुक् । तमि सूक्तं भूमि
याह ॥ यो मर्त्यो नोस्मान् अघायति अघं पापं दुःखं वा इच्छति तं जहि ॥ अश्वाघस्यस्यादि सात्वे ॥ किंच हे स्र श्रवस्त
म अतिशयेन शोभनश्रवण शृणुवः श्रावय अस्मद्भाष्यं कीदृशं तदिति तदुच्यते ॥ हे इंद्र त्वत्प्रसादात् दुर्मतिः अस्म
ज्जिघांसया दुष्टबुद्धिः अपभूतु अपगता भवतु ॥ छंदसः उपो लुङ्भुवस्सर्वोऽस्तीति गुणप्रतिषेधः ॥ न केवलं हि
सा रूपा अपि तु विष्वक् सर्वापि क्रोधपरिवादादिरूपा अपभूतु ॥ तत्र दृष्टांतः ॥ यामन्नयामनि अध्वनि रिष्टं न अध्वनः
श्रमेण हिंसितं पारश्रांतं यथा दुर्मतिः चौरादिविषया बाधते तद्वदस्मान्बाधमाना दुर्मतिः अपगच्छतु ॥ यद्वा याम
नि मार्गे यज्ञादिरूपे पर्यिष्टं असकरकृतैः हिंसादिरूपं विघ्नं परिहरासि तद्वत् ॥ ॥ इति द्वितीयस्य प्रथमे विंशो वर्गः ॥

स्साः असुरा दुपहतवानसि असुरैरन्यैर्वा यत्तवि दूषितभिराक्रांता भूमिः तत्संबंधिनीः परश्च तेषां पुराणि नीत्वा
अपहृतवानसीत्यर्थः ॥ किं दुःखेनने त्याह ॥ मंदसानः हृष्यन्नेव इमा आपः इमानि अपवृत्याणि त्रीत्वा द्यन्नानि अ
मुष्टाः लब्धवानसि ॥ ॥ अथ पंचमी ॥ ॥ आदिन्न्वस्य वीर्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखीयतो
यदाविथ ॥ चकर्थ कारमेभ्यः पृतनासु प्रवंतवे ॥ ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यंतः सनिष्णत ॥ ॥ आदित्
इति ॥ हे इंद्र आत् अनंतर एव हेतोः ते वीर्यस्य तव संबंधिने वीर्याय तदभिवृद्धये चर्किरन् पुनःपुनः सोमं विकि
रंति ॥ किरतेर्यङ्लुगंतद्धो यये न्नः सर्वेषु सवनेषु किंचिरंति यजमानाः अत इत्युक्तं ॥ कुत इत्याह ॥ मदेषु वृषन्नुसो
मजनितमदेषु सत्सु हे कामानां वर्षितः उशिजः त्वां कामयमाना यजमानास्त्वयद्युतः कारणादाविथ रक्षसि ॥ किं
च सखीयतः तव सखित्वमात्मन इच्छतोस्मान्यद्यस्मादाविथ तर्पयसि ॥ अभिमतेन प्रीणयसि ॥ अतश्चार्किर
न्नादि ॥ किंच हे इंद्र एभ्यो यजमानेभ्यः कारं करः स्वंसिंहनादं लक्षणे कृथं करोतेः कर्मणि घञ् कर्षात् इत्यंतोदात्तत्वं ॥

वानां सम्यक् भरणे वा कृतं कर्त्तरि भर इति। संग्रामनाम भरते र्वा हरते र्वा इति यास्कः॥ ॥अथ द्वितीया॥ स्वर्जेषे भ
र आप्रस्य वक्मन्युषर्बुधः स्वस्मिन्नंजसि क्राणस्य स्वस्मिन्नंजसि॥ अहन्निंद्रो यथा विदे शीर्ष्णाशीर्ष्णोपवाच्यः॥
अस्मत्रा ते सध्र्यक्संतु रातयो भद्रा भद्रस्य रातयः॥ ॥स्वर्जेषे भर इति॥ अयमिंद्रः स्वर्जेषे स्वर्गगमनसाधने भ
रे संग्रामे युद्धे आभिमुख्येन हतस्य द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनावित्यादि स्मृतिषु प्रसिद्धः आप्रस्य आ
पनशीलस्य शत्रुवधाय इतस्ततो व्याप्तस्य औणादिको रः शूरस्य वक्मनि वर्त्मनि मार्गभूते स्वस्मिन्नु स्वभूते अंजसि
अभिव्याप्तिमति कूटादिरहिते पुनः स एव विशेष्यते स्वस्मिन्नंजसि स्वकीये अंजसि मुख्ये महति संग्रामे यद्वा स्व
स्मिन्नंजसि शत्रौ स्वयमेव अपुच्छन्नत्वेन आगते सति अहन्नु हि नस्ति कस्य संग्राम इति तदुच्यते आप्रस्य आप
नशीलस्य आसमंतादिंद्रस्य प्रीणयितु सर्वा उषर्बुधः उषःकाले अनुष्ठानाय प्रबुध्यमानस्य क्राणस्य योगं कुर्वाण
स्य कुरोतेः शानचि छांदसः। शपो लुक्। अमूर्त्य यजमानस्य शत्रून् अहन् हि नास्ति अतः कारणात् अयमिंद्रः शीर्ष्णा

शीर्ष्णोपवाच्यः स्तुत्यः शीर्षंछंदसि उदात्तनिवृत्तिस्वरेणोदात्तत्वे नित्यवीप्सायामिति द्विर्भावः॥ तत्र दृष्टांतः। यथा
विदे सर्वज्ञाय शिरसा प्रणामः विक्रियते भूयते च तथैवमित्यर्थः। यद्वा यथा विदे येन प्रकारेणाहं तथा शत्रुं जानासि
तथा त्वं प्रहंसि। वेत्तेर्व्यत्ययेनात्मनेपदं पुरुषव्यत्ययः। लोपस्त आत्मनेपदेष्विति तलोपः। अथ वा यथा विदे यं यं वि
दे लभसे शत्रुं तं तं मारयसि अतः कारणात् स्तुत्य इत्यर्थः अस्मिन्पक्षे छांदसो विकरणस्य लुक् पूर्ववत्तलोपः। कि
च हे इंद्र ते रातयः त्वत्संबंधीनि धनादिदानानि अस्मत्रा अस्मास्वेव सध्र्यक् सहयोगेन संतु संभवंतु सहपूर्वादंचे
तेः ऋत्विगित्यादिना क्विन् सहस्य सध्रिरिति सध्र्यादेशः सध्र्यो रंतोदात्तं निपातनेन कृतात्स्वरानिवृत्त्यर्थमिति सचौ
तोदात्तः उदात्तस्वरितयोर्यणः इति स्वरितः किंच भद्रस्य स्तुत्यस्य रातयः अस्मासु दत्तानि दानानि भद्रा अतिशयि
राणि संतु॥ ॥अथ तृतीया॥ तत्तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन्यज्ञे वारमकृण्वत क्षयमृतस्य वारसि क्षयं।
वि तद्वोचेरध द्वितांतः पश्यंति रश्मिभिः॥ स घा विदे अन्विंद्रो गवेषणो बंधुक्षिद्भ्यो गवेषणः॥ ॥तत्तु प्रय इति॥ हे

द्वि-भा ।
।।६४।।

इंद्रत्वं खलु प्रसिद्धं हविर्लक्षणमन्नं कृ कुरुष्व तं आज्यादिसंयोगेन मृष्टं दीप्तं कुरु चेदी दीप्तिकर्मण एतद्रूपं तेन तपस्वरूपं प्र
त्नथा ते तव स्वं भवति तथाऽद्यतनमपि सर्वदा त्वामवयत्न इति भावः । प्रत्नवत् पूर्वविद्भिवे यादिना इवार्थे थाल्प्रत्ययः लुडिति स्वरः । प्रद्य
ग्रं तदिति उच्यते । यज्ञे यागे यस्मिन् हविषि दातव्ये सति वारं वरणीयं क्षयं स्थानं वेदिलक्षणमकुर्वं कृण्वन् कुर्वन्ति ऋ
त्विजः कृत्स्नवपि ज्ञोष इति चेत् उच्यते ऋतस्य सत्यस्य फलस्य यज्ञस्य निवासस्थानं संभजतो सियद्दूः ऋतमियक्षद्दूत
मतस्य पक्षयं स्थानं प्राप्नोसि वृष्टिप्रदो सीत्यर्थः ।। अथवा ऋतस्यादित्यस्य पक्षयं स्थानं स्वर्गलोकं रव्यं वार सिय
जमानेन गमयिता सि तत्त्वा दृशं वक्ष्यमाणं कर्म विवोचेविवृधिसे अधः अतः कारणात् इदितादितोपेतः । योद्यावापृथि
व्योर्मध्ये अंतरिक्षे रश्मिभिरादित्यकिरणैः पश्यंति मेघं निर्भिद्य रश्मिद्वारा प्रवर्षणरूपं कर्म सर्वे जनाः प्रत्यक्षतः प
श्यंति अस्मदत्तं हविरादित्यं प्रापयित्वा तद्रश्मिद्वारा वृष्टिं जनयसीत्येतत् सर्वं दृश्यत इत्यर्थः ।। इदानीं परोक्षत
या स्तोति ।। स घ स खल्विंद्रः गवेषणः उर्ध्वस्यान्वेषणशीलः तथा बंधुक्षिद्भ्यः हविःप्रदानादिना बंधुभावं प्राप्त

श्री
।।६५।।

त्वया वयमिति षळृचं सूक्तं पारुच्छेपं आद्यामैंद्रं युवं तमित्यर्धर्चमैंद्रापर्वतं त्वया वयं षडृच मैंद्रापर्वतार्धर्च इत्यनु
क्रमणिका विनियोगो लैंगिकः ।। तत्र त्वया वयमित्येषा प्रथमा ।। ।। त्वया वयं मघवन्पूर्व्ये धन इंद्रत्वोताः सासह्याम
पृतन्यतो वनुयाम वनुष्यतः ।। नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते । अस्मिन्यज्ञे वि चयेमा भरे कृतं वाजयंतो
भरे कृतं ।। ।। त्वया वयमिति ।। हे मघवन् मघं सौख्येन इंद्र त्वया साधनेन युक्ता वयं त्वोता अति प्रवलेनेंद्रेण
रक्षिताः संतः प्र सयोत्तरपदयोश्चेति त्वयादेशः । छांदसमात्वं । पृतन्यतः पृतनां आत्मन इच्छंतः प्रवलसेनायु
क्तान् शत्रून् सासह्याम अभिभवेम तथा वनुष्यतः अस्मत्संहरायागच्छतः शत्रून् वनुयाम तेषामागमनात्पूर्वमे
व वयं संभजेम ।। किंच ।। नेदिष्ठे अत्यंत सन्निहिते अस्मिन्नहनि अभिषवयुक्ते अद्यतने हनि सुन्वते यजमानाय त
दर्थं अधिवोच तं हविः प्रदं यजमानं य इंद्रा अनुशिष्टं अधिकं ब्रूहि लोटि व्यत्ययेनाङ् वच उम् किंच हे इंद्र वयं यजमा
नाः भरे संग्रामे कृतं जयस्य कर्तारं त्वामुद्दिश्य तज्जयार्थं वाजयंतः हविर्लक्षणमन्नमुपाचरंतः विचयेम जयेमदे

पिजेषि धने संग्रामे वा जय तदर्थं योत्सि युध्यस्व च छांदसो विकरणस्य लुक् व्यत्ययेन परस्मैपदं। किंच त्वं सन्नद्धः
तदर्थमभिषवं कुर्वन्नेमे मह्यं कं चिदव्रतं सर्वमपि अयज्वानं यागविरोधिनं रंधया वा धया मदधीनं कुर्वित्यर्थः।
न केवलमयज्वानं किंतु ऋणायंतं किं। चिदव्रतं चिदिसप कुसिति। अस्मासु रोषं कुर्वंतं तमेवायष्टारं स्वयं रोषवंतं
वा यद्वा ऋणायंतं। चितरोषं कुर्वंतं अयज्वानं विदि अवकर्माणौ पुन हननसमर्थां कुर्वंतं रंधय। हृणीङ् रोषे कंड्वादि
व्यत्ययेनाकारः॥ ॥अथ पंचमी॥ ॥सं यज्जनान्क्रतुभिः शूर ईक्षयद्धने हिते तरुषंत श्रवस्यवः प्रयक्षंत श्रव
स्यवः॥ तस्मा आयुः प्रजावदिद्बाधे अर्चंत्योजसा॥ इंद्र ओक्यं दिधिषंत धीतयो देवाँ अच्छा न धीतयः॥ ॥
संयज्जनानिति॥ यद्यस्य इंद्रः शूरः विक्रांतः संजनान्सर्वान प्राणिनः क्रतुभिः प्रज्ञाभिः समीक्षयत्। स
म्यगीक्षयति तत्तद्विषयान् अंतर्यामिरूपेण सर्वेषां बुद्धिषु स्थित्वा तैर्विषयानुद्वेषयतीत्यर्थः॥ यद्वा क्रतुभिः
कर्मभिः सुकृतदुष्कृतरूपैर्निमित्तभूतैः तत्तत्फलैर्योजयत्येवं प्रेरयति सति श्रवस्यवान्नमिच्छंतो यज

मानाः धने गवादिरूपे हिते अभिमते सति यद्वा हिते धने अभिप्रेते सति तरुषंत हिंसंति शत्रून् तरुः अतिक्र
धिकर्मा छांदसे लुङि व्यत्ययेन चेरङ् तरते र्वा लिङ् उकारः। सिपकुपस्लायविकरणभवतीत्यर्थः। अतः श्र
रणा तु श्रवस्यवं त्वन्नं हविर्लक्षणं इंद्रायात्मने वा इच्छंतः संतः प्रयक्षंत प्रकर्षेण यजंते छांदसे लुङि व्यत्ययेन
वसः। किंच तस्मा इत्तस्मै प्रसिद्धायेंद्रायैव आयुर्हविर्लक्षणमन्नं प्रजावत् पुत्रादिसहितं भवति। तैः सहितं दी
यत इत्यर्थः॥ किंच यजमानाः ओजसा स्वीयेन बलेन युक्ताः बाधे शत्रूणां बाधने निमित्तभूते सति बाधितुं वा
कुसार्थे कवे कन्केन्यत्वनः इति केन प्रत्ययः अर्चंति पूजयंतीति यद्वा तस्मा इति यजमानायैव बाधे बलनिमित्तभू
ते सति बाध इति बलनाम बाधः तविषीति तन्नामसु पाठात् प्रजावत् पुत्राद्युपेतमायुः अन्नं लब्ध्वा ओजसा बले
न युक्ताः अर्चंति इंद्रं पूजयंति ऋत्विज इति शेषः। किंच धीतयः कर्मवंतो यजमानाः इंद्रे इंद्रसमीपे गंगायां
घोष इतिवत् तत्सामीप्यं लक्ष्यते इंद्र ओक इत्यर्थः॥ तत्र तु क्यं तु ओके निवासस्थानं स्वार्थे यत् दिधिषंत धारयंति।

इत्यस्य हेतुः अत्र धारणार्थः। जौहोत्यादिकः व्यत्ययेनांतादेशः। स एव पुनः विशेष्यते। धीतयः स्वर्गसाधनकर्मवंतः
संतो देवं। अच्छा न देवानाभिमुखेन प्राप्तुमिव नु क्षयं दिधिषंते इत्यन्वयः। अपिवाक्ये इति मानसग्रहभक्षणानं
तरं नक्षत्रेषु दृश्यमानेषु अध्वर्युप्रमुखाः सर्वे युवं तमित्येतां जपेयुर्गार्हपत्येनु होतीति खंडे सूत्रितं। युवं तमिं
द्रपर्वता पुरोयुधेति जपंतीति॥ ॥सैषा षष्ठी॥ युवं तमिंद्र पर्वता पुरोयुधा यो नः पृतन्यादप तं तमिद्धतं व
ज्रेण तं तमिद्धतं। दूरे चत्ताय छंत्सद्गहनं यदिनक्षत्। अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः॥
॥ युवं तमिति॥ हे इंद्र प्रसिद्ध पर्वतः पर्ववान्मेघः तदभिमानी देवः जौ युवां पुरोयुधा संग्रामम पुरतो योधारौ
नोस्माकं यः शत्रुः पृतन्यात् अस्मान् हंतुः पृतनामात्मन इच्छति तं तमित् सर्वमपि शत्रुं अपहतं नाशयतं। हं
तेर्लोट्यनुदात्तोपदेशेत्यनुनासिकलोपः केन साधनेनेति तदुच्यते तं तमित् सर्वमपि शत्रुं हंतुं वज्रेण साधने
न प्राप्नुतं। इंद्रस्य सामर्थ्यमस्तीति दर्शयितुमियत यो वज्रः। लिंगव्यत्ययः। दूरे चत्ताय असंत इरदेशगंतव्येव

वज्रो यजमानेभ्यः गवेषणः गवां प्रसिद्धानां एषणः कर्त्ता इषे वा कृत्त्वात् कर्त्तरि ल्युट्। यद्वा गवेषणो मार्गणो पूर्ववत्तस्य
इयजमानफलस्य मृगयितेत्यर्थः। अनु उक्तक्रमेण पोवेत्त्वं सिसन् विदेविंदते उदकप्राप्तिप्रकारं जानाति॥ ॥अ
थ चतुर्थी॥ नू इत्था ते पूर्वथा च प्रवाच्यं यदंगिरोभ्यो वृणोरप व्रजमिंद्र शिक्षन्नप व्रजं॥ ऐभ्यः समान्या दिशास्म
भ्यं जेषि योत्सि च॥ सुन्वद्भ्यो रंधया कं चिदव्रतं हृणायंतं चिदव्रतं॥ ॥नू इत्था त इति॥ हे इंद्र ते तव संबंधिकर्म इ
त्थेयत्र ईषा अक्षादित्वात् प्रकृतिभावः। वीदृशं तद्दिति तदुच्यते यस्त्वं अंगिरोभ्यः एतत्संज्ञेभ्यो महर्षिभ्यः ते
षामर्थाय व्रजं अंतरिक्षं गच्छंतं मेघं अपावृणोः अपवृतवानसि। मेघमुत्पाद्य वृष्टिमुत्पादितवानसि। व्रज इ
ति मेघनाम। व्रजः चरुः इति तन्नामसु पाठात्। किंच हे इंद्र व्रजं गवां समूहं अप अपवृत्यापहृत्य तेभ्य एवांगि
रोभ्यः शिक्षन् वितरन् रक्षितवानसि। यद्वा पणिभिरपहृतं बिले स्थितं गवां व्रजमपहर्तुं अपावृणोः अपवृत
द्वाराण्यकरोः किंच हे इंद्र एभ्यः उक्तेभ्यः समान्या दिशा समानया रीत्या तेभ्यो यथा ददासि। तद्वदस्मभ्यम

भे पुनामीति सूक्ते सप्तर्चस्य प्रवृत्तिर्निरुक्ता॥ ताजपत्न् प्रयतो नियमिष्टान् कामान् समश्नुते। ताजपत्न् हंति रक्षांसि
सपत्नांश्च निवर्तते॥ ॥तत्र प्रथमा॥ उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिंद्राः॥ अभिव्लग्य यत्र
हता अमित्रा वैलस्थानं परितृल्हा अशेरन्॥ अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनां॥ ॥उभे पुनामीति॥
हे इंद्र ऋतेन खदुद्दे श्येनयज्ञेन बलेनोभे रोदसी द्यावापृथिवी पुनामि शोधयामि हिंसकानां तव शत्रूणां मदाप
गमनेन पावयामि किंच द्रुहो द्रोग्धॄन् अनिंद्राः इंद्रविरहितान्नाश्रयभूता महीः सर्वाः अत एव द्रुहः द्रोहिका
माधारभूतत्वात् स्वयमपि द्रोग्ध्रीः संदहामि। सं भूयैव हेलया दहामि। पुनस्ता एव विशेष्यंते। यत्र यासु भूमि
षु अमित्राः शत्रवः अभिव्लग्य अभितो गत्वा हताः सर्वतः प्राप्ताः अस्माभिरिषीतितां वा तिवृर्मच्छांदसो धा
तुः ते सर्वे तृल्हाः हिंसिताः तृहू हिंसार्थः। उदित्वाघस्य विभाषेतीट्प्रतिषेधः हिंसिताः संतः अशेरन् श
यनं प्राप्ताः शीङ्तेर्व्यत्ययेन परस्मैपदं। शीङो रुट्। शीङः सार्वधातुके गुणः। वैलस्थाने बिलशब्दो गर्तस

मानार्थः स च गर्तः श्मशानवचनः अतो यमपि श्मशानवाची। अथवा बिलतत्संबंधिस्थानेन गोलकः त
त्र वा अशेरन्। यद्वा बिलक्षेपणलिधातुः यजर्थे कः स्वार्थे वृण्। तत्र शवाः क्षिप्यंते इति वैलस्थानं श्मशानं
तत्र तृल्हाः भूमिः श्मशानमद्यवकुला सर्वत्र शेरते तान् दहामीत्यर्थः॥ ॥अथ द्वितीया॥ अभिव्लग्या चि
दद्रिवः शीर्षा यातुमतीनां॥ छिंधि वटूरिणा पदा महावटूरिणा पदा॥ ॥अभिव्लग्या चिदिति॥ अद्रिवः वै
रिणां भक्षक यद्वा अद्रेर्मेघस्याद्दर्तरि द्रत्वं यातुमतीनां हिंसावतीनां सेनानां यद्वा यतना साधनान्यायुधा
नि यातूनि तद्वतीनां अथवा यातवो रक्षांसि तद्वतीनां सेनानां कर्मणि षष्ठी शत्रूणां सेनाः अभिव्लग्या चित्।
अभितः प्राप्य व्याप्य तच्छीर्षाणि छिंधि चूर्णय। यद्वा तासां संबंधीनि रथादीनि छिंधि। केन साधनेनेति तदु
च्यते। वटूरिणा पदा वेष्टनशीलेन सर्वव्याप्तेन त्वदीय पादेन अतिविस्तृतेनेत्यर्थः॥ यद्वा वटूरिणा पदा वे
ष्टनशीलेन हास्तिनः संबंधि पादेन ऐरावतपादेनेत्यर्थः॥ न केवलेनैव येन केन चित् पादेन साह। महावटूरिणा

पदा महावेष्टनवता स्वीयेनैरावतसंबंधिना वा पादेन छिंधि चूर्णय। वेष्टने स्वाजिपिंज्यादिभ्य ऊरजूरचाविति करच्प्रत्य
यः। अत इन्नूटनाविहीति॥ ॥अथ तृतीया॥ अवासां मघवं जहि शर्धो यातुमतीनां। वैलस्थानके अर्मके म
हावैलस्थे अर्मके॥ ॥अवासामिति। हे इंद्र मघवन् धनवन् आसां यातुमतीनां यातनासाधनान्यायुधानि
यातूनि तद्वतीनां यातुधानवतीनां च सेनानां शर्धो बलं अव जहि चूर्णय। तथा कृत्वा च अर्मके कुत्सिते त्वा वैरर
णीये वैलस्थाने कुत्सिते पूर्वोक्तलक्षणे श्मशाने क्षपयेति शेषः। यद्वा वैलस्थानके बिलसंबंधिकुत्सितेस्था
ने अंधकारावृते अधोलोकस्थापयेति शेषः। ननु यत्र क्वचित्क्षुद्रे नेत्याह महावैलस्थे सर्वैर्गंतव्ये महाश्म
शाने नागत्य कृत्वा पुनः वृद्धो अर्मके कुत्सिते गतासुभिरःरणीये॥ ॥अथ चतुर्थी॥ यासां तिस्रः पंचाशतो
भिव्लंगैरपावपः। तत्सु ते मनायति तकत्सु ते मनायति॥ ॥यासामिति। हे इंद्र यासां पूर्वोक्तमंत्रोक्तलक्ष
णानां सेनानां तिस्रः पंचाशतः त्रिगुणितपंचाशत्संख्याः सार्धशतं अभिव्लंगैः अभिगमनैः कुगति

नाय तेन शत्रुमर्मणः नष्टाये ति कर्मण इदं रूपं। किंच गहनं दुरवगाहनं दुरवगाहं स्थानं अतिकृपिण हृदयं शत्रुसमीपं
चरक्षत। व्याप्नोति न क्षगतो। छांदस इकारलोपजनः। इश्नक्षतिर्व्याप्तिकर्मेत्यंतरं॥ इदानीमिंद्र एवस्तूयते॥ हे शूर
शौर्योपेतेंद्र अस्मावकं विरोधिनः शत्रून् विश्वतो विश्वान् सार्वविभक्तिकस्तसिल्। परिपरितः विश्वतो विश्वैस्व
पायेदर्षीष्ट। दारयसि। किंच दर्मा शत्रूणां वारकः। दारयतेरन्येष्वपि दृश्यंत इति मनिन्। णिलोपे उदात्तनिवृत्ति
स्वरेण मनिन उदात्तत्वं तकच्छांदसः। यद्वा दमय घटादित्वान्मितां ह्रस्व इति ह्रस्वत्वं। तव पूर्वोक्तो वज्रः विश्वतः स
र्वान् शत्रून् सर्वैरुपैर्वा दर्षीष्ट दारयति। यद्वा दर्मा शत्रूणां दारकः इंद्रो दर्षीष्ट कार्त्स्न्येन दारयति शत्रून्॥ ॥इति
द्वितीयस्य प्रथमे एकविंशो वर्गः॥ ॥उभे पुनामीति सप्तर्चं सप्तमं सूक्तं पारुच्छेपमैंद्रं आद्या त्रिष्टुप् अभिव्ल
ग्येत्याद्या अस्तिस्रोनुष्टुभः विद्युंगभ इति षष्ठी गायत्री अवर्महइत्येषा धृतिरंसा विशेषानभिधानादिंद्रय्ष्टिः अ
त्रानुक्रमणिका। उभे सप्ताद्या त्रिष्टुप् तिस्रोनुष्टुभो गायत्री धृतिरिति॥ अस्य सूक्तस्य विनियोगमाह त्रौनक्तः। उ

भिरीयसे॥ अपूरुषघ्नो अप्रतीत शूर सत्वभिः॥ अवर्मह इंद्र द्द्रहपंनिंद्रेति॥ ॥सैषा षष्ठी॥ हे इंद्र महः महतो मे
घस्य कर्मणि षष्ठी महांतं जलधारिणं मेघं महांतं वृत्रं वा अवः अवस्तात् अवाङ्मुखं पूर्वाधरेत्यादिना असिप्र
त्ययो वादेशश्च॥ अम्नरूधरवरित्युभयथा छंदसीति रेफः दद्दहि विदारय वृत्रं च नः अस्मद्वाक्यं श्रुधि शृणु अद्रि
मेघः तद्धि निर्दूहि यस्मात्कारणात् द्यौः द्युलोकनामाश्रयभूतः सं शोच शुशोचति वृत्रस्य भावेन विराद्धभावादि
ति भावः॥ किंच क्षा न क्षेति भूनाम। क्षायंति निवसंत्यस्यामिति क्षाः। क्षि जे षि क्षये अधिकरणे ड्विप् क्षास्सर्वनिवासा
अयं भूमिरिव सा यथा भीषा वृत्रस्य भावात् सस्यादिरोषेभ्यो याशोचति तद्वत् लोकद्वयमपि वृत्रस्य भावेन शोचत
इत्यर्थः॥ अस्मत्पक्षे लोकद्वयमावृत्य प्रवर्धमानं यत्तुमहेसे मानेद्यावापृथिव्यो शोचत इत्यर्थः॥ तस्मात् श्रु
धीति पूर्वत्रान्वयः॥ भीतौ दृष्टांतः॥ हे इंद्र वा शत्रूणां भक्षक यद्वा अद्रिर्वज्रः तेन तद्वन् हे इंद्र घृणान् भीषा
नदीप्तान अग्नेर्मूर्तितरा तत्वष्टुभीष्या पूर्ववयथा द्यावापृथिव्यो शोच कद्वत्॥ अत्रेति हासमाकुः॥ पूर्वजग

ति महांधकारेणावृते सति देवादिरचिंत्याग्निं प्रार्थितवंतः स च त्वष्टृरूपेण द्यावापृथिवीभ्यां सवृत्रगर्भो युदस्य
मुदपद्यत तं दृष्ट्वा द्यावापृथिव्यो बिभ्यतुरिति स चोभे यत्र बिभ्यतुरित्यादिश्रुतितोवगंतव्यः। यद्वा घृणाव
वलोग्निस्तस्माद्यथा बिभीतस्तद्वत्॥ सवाभीति। राजंतौ रोदसी इत्यादिश्रुतितोवगंतव्यः। ता इत्यभीति
हाष्टिप्रदानेन परिहरेत्यर्थः॥ हे इंद्र त्वं शुष्मिभिर्बलैः शुष्मिंतमो हि अतिशयेन बलवान् खलु त्वं तः कारणात्
उग्रेभिः उद्गूर्णैः अतिक्रूरैर्वधैस्त्वदुपायैः सहितस्त्वं ईयसे शत्रून्मेघान्वा गच्छसि। ईङ् गतौ। देवादिकात्
श्यन् यद्वा शुष्मिभिर्वधैरिति संबंधः हे शूर विक्रांत शूर सत्वभिः प्रवीतअवसन्नैः रक्षःप्रभृतिभिः अप्रति
गत युद्धे शत्रुभिरनाक्रांत यद्वा सत्वभिः प्राणिभिरसंस्कृतमनवेक्षितैरनधिगत अपुरुषघ्नो पुरुषोपेता प
नो यजने समर्थान्महंतत्वीः सप्तेः त्रिभिः सप्ताभिर्वसिष्ठाभिरनुचरैरुपेतः सन्नीयसइत्यन्वयः। प्रातः
सवने ब्राह्मणाच्छंसिनः प्रस्थितयाज्यायाः पुरस्ताद्धनोतिहोत्रेषा प्रेषणीया॥ तत्रैवखंडे सूत्रितं। व

द्वि॰ भा॰ ॥७०॥ नोतिहि सुन्वत्क्षयं परीणसा सामोषुवो अस्मदभितानि पुंस्येति॥ ॥तामेतां सप्तमीमृचमाह॥ वनोति हि सुन्वन्क्ष
यं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः॥ सुन्वान इत्सिषासति सहस्रा वाज्यवृतः॥ सुन्वा
नायेंद्रो ददात्याभुवं रयिं ददात्याभुवं॥ २२॥ ॥ वनोति हीति॥ हे इंद्र सुन्वन् त्वामुद्दिश्याभिषवं कुर्वन् यजमानः
क्षयं सर्वैर्वस्तव्यं गंतव्यं वा गृहं वनोति हि तस्य प्रसादात्संभजति हि प्रसिद्धं॥ किंच सुन्वानो हि सोमयागं कुर्वा
णः परीणसः परितो ततान् द्विषो द्वेष्टॄन् अवयजति। नाशयति न केवलं यागद्वेषिणः देवानां द्विषोप्यवयज
ति किंच सुन्वानश्चेत् आभिषवकोपेतं लक्षितं यागं कुर्वाणः हे इंद्र त्वत्प्रसादात् वाजी वाजवान् अन्नवान् अवृ
तः परैरनाक्रांतः सन् सहस्रा सहस्राण्यपरिमितानि गवादिधनानि सिषासति साधयितुं संभक्तुं इच्छति
सनेः सनिसनीवंतर्द्धेति विकल्पनादिड्भावे जनसनखनेत्यात्वं। केनेटं लभ्यत इति तत्राह॥ सुन्वानाय
इंद्रमुद्दिश्य सोमयागं कुर्वाणस्य यजमानस्य वा अयमिंद्र आभुवं समंतात् भुवनशीलं तथा आभुवं पु श्रीः ॥७०॥

गतिकर्मेत्युक्तं अभिगम्य। अपावपः नाशितवान् असि हे इंद्र तत्तादृशं सेनावधादिरूपं कर्म सुम्नायति सुष्टु संभा
वयतीत्यर्थः॥ किंच हे इंद्र ते तव अध्यर्धकृत्वु सेनाजयेरूपं महदपि तत्कर्मेति सुम्नायति अत्यन्यमिति सुष्टु मन्य
ते॥ ॥अथ पंचमी॥ पिशंगभृष्टिमंभृणं पिशाचिमिंद्र संमृण॥ सर्वं रक्षो नि बर्हय॥ ॥पिशंगभृष्टिमिति॥
हे इंद्र पिशंगभृष्टिं ईषद्रक्तवर्णं अंभृणं अतिभयंकरं शब्दायमानं भ्रणशब्दे यद्वा गंतास्वच्छ्याधि छांदसो भक्ते
पश्च यद्वा महांतं अतिप्रवृद्धमित्यर्थः॥ अंभृण इति महन्नाम अंभृणः महिन इति तत्र पाठात् उक्तविधं पिशा
चविशेषजरातिमेवं संमृण सम्यक् हिंसय। न केवलं तमेवं किंतु सर्वं रक्षो राक्षसनिमित्तभूतं राक्षसादिकं नि
बर्हय निषूदय बृह हिंसायां चौरादिकेनामयवधकर्मेत्यतत्त्वे प्रयति निबर्हयतीति तत्रोक्तत्वात्॥ ॥दशरात्र
स्य षष्ठेहनि प्रउगशस्त्रे ऐंद्रं तृचस्यावर्मह इंद्रेत्यादिके प्रथमाद्वितीये षष्ठस्येति खंडे सूत्रितं॥ ॥अवर्मह इं
द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृणान्न भीषाँ अद्रिवः॥ शुष्मिंतमो हि शुष्मिभिर्वधैरुग्रे

द्वि॰ भा॰
॥७१॥

तव गुणान् विद्दोषेण अवगच्छंती सोमपानार्थं स्तु यर्थं च हे वायो मखस्य यज्ञस्य दावने दातव्याय हविषे तत्स्वीकू
राय पुनः किमर्थं दावने अस्मभ्यमभिमतदानाय उभयत्र ददातेः कर्मणि भावे च क्रमेणौणादिको वनिप् छांदसः उ
पधालोपः नियुत्वता रथेन नियुद्भिर्युक्तेन रथेन याहि आगच्छ॥ ॥अथ द्वितीया॥ मंदंतु त्वा मंदिनो वायवि
दवोस्मत्क्राणासः सुकृता अभिद्यवो गोभिः क्राणा अभिद्यवः॥ यद्ध क्राणा इरध्यै दक्षं सचंत ऊतयः॥ सध्रीचीना
नियुतो दावने धिय उप ब्रुवत ईं धियः॥ ॥मंदंतु त्वेति॥ हे वायो त्वा त्वां अस्मत् अस्माकं संबंधिनः इंदवः क्लेदयितारः
सोमाः मंदंतु मादयंतु। व्यत्ययेन परस्मैपदं। कीदृशाः सोमाः मंदिनो मादयितारः प्रक्राणासः कुर्वाणाः स्वकार्यं ह
र्षादिकं सुकृताः अभिषवदशापवित्रशोधनग्रहणादिभिः सुष्टुकृताः आभिद्यवः अभितो द्योतयंतो गोभिर्विकारैर्मि
श्ररूपाभिः क्राणाः क्रियमाणाः हूयमानाः यद्वा गोभिः गंतृभिः आहवनीयं प्रस्थानेतृभिः क्राणाः हूयमानाः कृ
णोतेः रूपं नञ्च छांदसः रूपोत्कुकु तथा अभिद्यवः अभिगंतारः हे वायो त्वा यद्यस्मात् कारणात् ह हशब्दः प्रसिद्धौ॥

श्री
॥७१॥

दक्षं अस्मद्यागदेशं प्रतिगंतुमुत्साहवंतं समर्धयितारं त्वां त्वां नियुतः एतत्संज्ञकाः तवाश्वाः दावने दानाय हविःस्वी
कारनिमित्तं धियः कर्माण्युद्दिश्य सचंते त्वां संगच्छंते यागदेशं वा किमर्थं इरध्यै प्रापयितुं परिचरितुं वा इ
रगतौ तुमर्थे कध्यै प्रत्ययः ह्रस्वः छांदसः इरध्यतिः परिचरणकर्मा इरध्यती विधेमेति तन्नामसु पठितत्वात्
कीदृश्यस्ताः क्राणाः स्वव्यापारं रथवाहनादिकं कुर्वाणाः क्राणाः कुर्वाणा इति यास्कः ऊतयः रक्षणवंतः प्रीतियु
क्ताः तथा सध्रीचीनाः त्वया सह गच्छंत्यः सहस्य सध्रिः विभाषा वेति स्वार्थे खः व्यत्ययेनांतोदात्तः। किंच धियः
कर्मवंतः बुद्धिमंतो वा ऋत्विजो यजमाना वा उपब्रुवते उपेत्य ब्रुवंति स्वाभिमतं विज्ञापयंति च॥ ॥अथ तृती
या॥ ॥वायुर्युंक्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोल्हवे वहिष्ठा धुरि वोल्हवे॥ प्रबोधया पुरंधिं
जार आ ससतीमिव॥ प्रचक्षय रोदसी वासयोषसः श्रवसे वासयोषसः॥ ॥वायुर्युंक्त इति॥ अयं वायुः रोहि
ता रोहितवर्णावश्वौ धुरि धारणप्रदेशे रथस्याग्रभागे। यद्वा भारवहने युंक्ते अजिरा अजिरयोजयति तथारुणे

तृ अरुणा अरुणवर्णौ धुरि युंक्ते तथा अजिरा अजिरौ गमनशीलौ वर्णविशेषयुक्तौ कदाचिद्युंक्ते यद्वैतदुभय
त्र संबध्यते॥ किमर्थं युंक्ते इति तदाह॥ वोळ्हवे धुरि वोढुं भारवहनाय। किंच वहिष्ठा वहिष्ठौ अतिशयेन वोढा
रौ वहिष्ठौ वोढृशब्दात् इष्ठनि तुरिष्ठेमेयःस्विति तृलोपः ढलोपादिकमसिद्धत्वान्निवर्तते द्विवचनस्याकारः। धुरि वो
ळ्हवे महद्भारं वोढुं महति भारे वोढव्ये सति पुनःपुनर्वायुग्रहणं अश्वयोजनवचनं च अतिशीघ्रं आगच्छतीति
ज्ञापनार्थं इदानीं प्रत्यक्षेणाह। हे वायो पुरंधिं बहुप्रज्ञं सामर्थ्याद्यजमानमिति गम्यते। पुरंधिर्बहुधीरि
ति यास्कः॥ तत्र बोध रथेन शीघ्रमागत्य प्रज्ञापय हविःस्वीकारायेति भावः॥ तत्र दृष्टांतः॥ जारः परदारि
कः आससंती उपपत्यागमनध्यानेन ईषत्स्वपंतीं पुरंधिमिव प्रकृष्टशरीरधारिणीं योषितमिव तां यथा
स्वसंकेतेन स प्रबोधयति तद्वत्। त्वमपि धूर्मस्यग्रेण ईषत्स्वपंतं यजमानं प्रबोधय। किंच तदर्थं रोदसी द्यावापृ
वी थिव्यौ प्रचक्षय प्रकर्षेण प्रख्यापय प्रकाशयेत्यर्थः॥ तस्य कृशार्थं उषसो वासय उषःकालानपि यथावत्स्था

नर्भवनशीलं अतिसमृद्धं रयिं गवादिरूपं धनं ददाति प्रयच्छति तस्मात्वानासिषासतीत्यर्थः॥ ॥ इति द्वितीयस्य
प्रथमे द्वाविंशो वर्गः॥ ॥ इति सायणाचार्यविरचितेनुवाके षट्सूक्तानि। आ त्वा जुव इति षळृचं प्रथमं सूक्तं पारुच्छे
पमात्यष्टं। त्वं नो वायवेषामिति यशिश्रिरिति विनियोगो लिंगिकः॥ ॥ तत्र प्रथमा॥ आ त्वा जुवो रारहाणा अभि प्रयो वा
यो वहंत्विह पूर्वपीतये सोमस्य पूर्वपीतये॥ ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती॥ नियुत्वता रथेना याहि
दावने वायो मखस्य दावने॥ ॥ आ त्वा जुव इति॥ ॥ हे वायो त्वां जुवः गमनशीलाः रारहाणाः शीघ्रगामिनः ब
लवंतो वा सामर्थ्यान्नियुत्संज्ञकाः अश्वाः रहिगतौ। लिटः कानच् छांदसो नुनासिकलोपः। इह अस्मिन्यज्ञे वोढुं तु
प्रापयंतु। किमर्थं पूर्वपीतये पूर्वपानाय पुमः किमर्थं पूर्वपीतये इतरदेवेभ्यः पुरा पानाय मरुद्धादिलक्षणं पूर्व
पदं दोत्यत्ते। किंच हे वायो ते तव संबंधिमनः सूनृता प्रियसत्यात्मिका श्रुतिरूपा अस्मदीया वाक् इति तिष्ठतु आश्रित्य
सर्वदा वर्ततां हर्षयित्वेत्यर्थः। सूनृतेति वाङ्नाम सूनृतेति च स्तोति तन्नामसु पाठात् ऊर्ध्वा उन्नता तथा जानती

यतो नावरूकद्गत्वं । रश्मिषु चित्राणि नानावर्णयुक्तानि आश्चर्यभूतानि तच्च ते उषःकाले रश्मीनां नानावर्णत्वा
दिति भावः ॥ अग्निज्वालेति पक्षे ज्वालानां काली कराली इत्यादिरूपेण नानावर्णत्वाच्चित्रत्वं किंच हे वायो तुभ्यं त्व
दर्थं त्वद्यागार्थमिव धेनुः घृतादिना प्रीणयित्री गौः जाता वेकवचनं सबर्दुघा सबरित्यमृतनाम तस्य दोग्ध्री दु
हः कुह्वेति रूपं सती विश्वा वसूनि सर्वाणि धनान्याज्यादिरूपाणि दोहात् स्वयमेव दुग्धे प्रीणयतीत्यर्थः ॥ द
र्मधून्यरित दुहस्तुनमामिति यकाभावश्छांदसः ऐपोतुम्भावः कस्त्वद्विशेष इति चेदुच्यते हे वायो दिवादो
त्पादं तरिक्षात् मरुतः एतन्नामकान् मेघं विदारयितॄन् द्युसादः कान् त्वदंशभूतान् देव अयजः जनयासि उत्पाद
यासि । किमर्थमिति तदुच्यते वक्षणाभ्यः प्रवहणशीलाभ्यो ऽद्भ्यः वृष्टिलक्षणाभ्यः नदीनामैतत् वक्षणाः
इत्युक्ता इति तन्नामसु पाठात् तासामर्थाय ॥ ॥ तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणंत भुर्वण्य
पामिषंत भुर्वणि ॥ त्वां त्सारी दसमानो भगमीट्टे तक्ववीये ॥ त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि

धर्मणा ॥ ॥ तुभ्यं शुक्रास इति ॥ हे वायो तुभ्यं त्वदर्थं शुक्रासो दीप्ताः शुचयः शुद्धाः सोमस्य पातारो यं तं शुद्धा
भवंतीत्यर्थः ॥ तत्किमुच्यते षां शुचयश्च ते तुरण्यवो त्वरणयुक्ताः त्वां प्राप्तुं उग्राः उद्गूर्णाः तेजसः सोमाः म
देषु तव मदेषु निमित्तभूतेषु भुर्वणि भरणवति यागे इषणंत आहवनीयं प्रतिगंतुमिच्छंति व्यत्ययेनात्मनेपदं
शप्श्नमौ द्वौ विकरणौ । किंच भुर्वणि मेघे इषंत उदकमिच्छंति प्रसादयितुं अग्नौ हूयमानस्याहुतेरादित्यद्वारा वृष्टयु
त्पादकत्वात् ॥ यद्वा यजमानास्त्वामुद्दिश्य जुह्वानाः अपां वर्षणमिषंत इच्छंति किंच हे वायो भगं भजनीयं त्वां त्सा
रीन् सरणवान् अयं तस्मीः कुत्सवनात् दसमान उपक्षीणो यजनविघातकैः पयोव्रतादिनियमैर्वा यजमानः त
क्ववीये तस्कराणां यत्र विघातिनां अन्यत्र गमनाय ईट्टे स्तौति ईट्टस्तौते अदादित्वाच्छपो लुक् यतस्त्वं विश्वस्मा
द्भुवनात् सर्वलोकजातत्वाद्वै त्रयसंबंधिनो भयात् धर्मणा अस्मदीयहविषां धारणेन पासि । पालयसि
किंच असुरपतिः असुरसंबंधिनो भयात् विशेषेण पासि धर्मणा अस्मद्धारणेन पोषणेन वा युक्तः सन् यतः

द्वि॰भा॰
॥७५॥

कुरोषि अतस्त्वोतीत्यर्थः॥ ॥अथ षष्ठी॥ त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिम
र्हसि॥ उतो विहुत्मतीनां विशां ववर्जुषीणां॥ विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरं॥२३॥ ॥त्वं
नो वायवेषामिति॥ ॥हे वायो त्वं अपूर्व्यः न विद्यते पूर्व्यं यस्मात्स्थानमपूर्व्यं तदर्हतीत्यपूर्व्यः तादृशः अत
एव प्रथमः इतरदेवेभ्यः पूर्वभूतः सन् सोमानां पीतिं पानं अर्हसि प्राप्नोषि॥ यत्राभिषवोस्ति तत्र सर्वत्र
नियमेन पिबसीत्यर्थः॥ पूर्वं प्राप्तस्याभिप्रायेण इदानीं तु सर्वत्र सोमवतियागे अस्य पानमस्तीति ज्ञाप
यितुं पृथगभिधानं न केवलं सोमपानमात्रं उतो अपि विहुत्मतीनां विशेषेण होमवतीनां आह्वानवतीनां वा ती
जुहोतेः संपदादिलक्षणो भावे क्विप् तुक्ततो मतुप् ङीपौ॥ ववर्जुषीणां अनभिमतपापं वर्जयंतीनां वर्जयतेर्लि
टः क्वसुः ङीपि संप्रसारणाभावश्छान्दसः॥ विशां ऋत्विग्यजमानरूपाणां प्रजानां संबंधि हविः स्वीकरोषीति शेषः॥
यद्वा तेषां यष्टॄणां विश्वा इत् धेनवः सर्वा अपि गावः ते त्वदर्थं आशिरं आश्रयणद्रव्यं क्षीरं दुह्रे दुहंतिस्व

पयः प्रभातं कुर्वंतीत्यर्थः॥ पुनस्तदेव प्रार्थ्यते श्रवद्रुस इन्द्रनाम तव हविरूपान्नस्वीकरणाय उषसो वासय॥ ॥अथ च
तुर्थी॥ तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु॥ तुभ्यं धेनुः सबर्दुघा
विश्वा वसूनि दोहते॥ अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः॥ ॥तुभ्यमुषास इति॥ हे वायो त्वदर्थं
उषासः उषसः पूर्वोक्ता रात्र्या त्वया प्रकाशिता शुचयः शुभ्रा दीप्ता वा परावति अत्यंतदूरदेशे अंतरिक्षे दंसु
हंसेषु कर्मवत्सु यद्वा गृहनामैतत् अंयत्रोपरिष्ठाद्दंसः गृहवदाच्छादकेषु रश्मिषु स्वकीयेषु तेषु भद्रा भंदनी
यानि कल्याणानि वस्त्रा आच्छादनयोग्यानि वस्त्राणि तन्वते विस्तारयंति यद्वा उषासः दंसु यागगृहेषु देव
यजनेषु रश्मिषु होमाय प्रदीप्ताग्निज्वालावत्सु आगताय तुभ्यं भद्रा वस्त्रा तन्वते अग्निज्वाला एव वस्त्राणि
विस्तारयंतीत्यर्थः॥ उषःकाले अग्नीनां प्रज्वाल्यमानत्वात् ता एव वस्त्राणीत्युपचर्यंते॥ न केवलं दंसु धा
रणं किंतु नवानि वस्त्राणि आह॥ नव्येषु नूतनेषु स्तूयमानेषु णु स्तुतौ। अचो यत् वांतो यि प्रत्यय इत्यवादेशः

श्री॰
॥७५॥

द्वि.भा. ॥७५॥

कत्वात्॥ तथा शतिनीभिः शतसंख्योपेताभिर्नियुद्भिरागच्छेति शेषः॥ यद्वा सहस्रेण नियुतां शतिनीभिश्च
नियुद्भिर्नियुत्वते तद्वते हविर्दीयत इति शेषः॥ यद्वा तुभ्यमित्यनेन संबंधः उक्तसंख्याकाभिः नियुद्भिस्तद्वते
देवाय द्योतमानाय तुभ्यं अपि वेयाद्युदात्तत्वं पूर्वं पूर्वमपीत इतरदेवेभ्यः पूर्वपानाय येमिरे यमितवंतः॥ यद्वा
स्तोतारः ऋत्विजः देवाय तुभ्यं येमिरे आहवनीयं प्रति सोमं नियमितवंतः॥ अग्रं पिबा मधूनां सुतं वायो
इत्यादि मंत्रांतरप्रसिद्धिं द्योतनार्थो हि शब्दः॥ किंचैते त्वदर्थं सुताः अभिषुताः मधुमंतो माधुर्योपेताः सो
माः मदाय त्वन्मादाय स्थिरन् तिष्ठंति। किंच कृत्वे कर्मणि तत्सिध्यर्थं अस्थिरन् ऋत्विग्भिर्धृतास्तिष्ठंति अ
तस्त्वं पिबेति शेषः॥ तिष्ठतेश्छांदसे लुङि व्यत्ययेन झस्य रन् स्थाघ्वोरिच्चेति सिचः किंच धातोरित्वं। ह्रस्वादं
गादिति सिचो लोपः॥ ॥अथ द्वितीया॥ तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शु
क्रा वसानो अर्षति॥ तवायं भाग आयुषु सोमो देवेषु हूयते॥ वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्म ॥श्री॥ ॥७५॥

युः॥ ॥ तुभ्यायं सोम इति॥ हे वायो तुभ्यं त्वदर्थं सुपांसुलुगिति चतुर्थ्या लुक् अयं सोमो हूयमानः कोशं कोशस्था
नीयं गृहं अर्षति गच्छति प्राप्नोति॥ कीदृशः सोमः अद्रिभिः परिपूतः अभिषवसाधनैः अपगतऋजीषत्वे
न शोधितः। यद्वा अद्रिभिरभिषुतः दशापवित्रशोधनेन ग्रहणेन वा शोधितः। तथा स्पार्हा स्पृहणीयानि ते
जांसि वसानः पिधानः किंच शुक्रा निर्मलानि दीप्तानि वा तेजांसि वसानः सोमः अर्षति गच्छति प्राप्नोति।
ऋषी गतौ व्यत्ययेन शप्। हे वायो आयुषु यष्टव्येन स्थितो भागो भजनीयः सोमः तदर्थं देवेषु मध्ये हूयते।
त्वत्पीतरदेवेषु यज्ञः सोमस्तव भागो अतः प्रथमं प्रहूयत इत्यर्थः॥ किंच हे वायो एवंवंतं सोमं अस्मयुः
अस्माभिस्तद्वानुमत्वर्थीयो युस्त्वं नियुतो वह नियुत्संज्ञान् स्वाश्वान् वहनाय प्रापय। ततः परं याहि दिवं प्रति गच्छ
तथा कुर्वन् अस्मयुः अस्माभिर्युक्तः सन् अस्माननुगृण्हन् अस्मान् कामयमानो वा क्यचि छांदसोऽसलोपे
क्याच्छांदसी सुः॥ जुषाणः प्रीयमाणो याहि आगच्छ॥ ॥अथ तृतीया॥ आ नो नियुद्भिः शतिनीभिरध्वरं

सहस्रिणीभिरुपयाहि वीतये वायो हव्यानि वीतये ॥ तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा ॥ अध्वर्युभिर्भरमा-
णा अयंसत वायो शुक्रा अयंसत ॥ ॥आ नो नियुद्भिरिति॥ हे वायो त्वं नो अध्वरं अस्मत्संबंधिनं यज्ञं शतिनीभिः
नियुद्भिः सहस्रिणीभिश्च त्वदीयैरश्वैर्नोस्माकं यज्ञमुपयाहि उपागच्छ ॥ किमर्थं वीतये त्वदभिमतकामाय तसू-
र्तये आगत्य वायो हव्यानि वीतये सोमादि हविर्भक्षणाय अध्वरं हव्यानि चोपलक्ष्य तेषामेव भक्षणाय शत-
सहस्रैरश्वैरतिशीघ्रमागच्छेत्यर्थः ॥ किंचायं तव भागः भजनीयः सोमः ऋत्वियः प्राप्तकालः प्रदानावसरं प्राप्तः
ऋतुशब्देन प्रदानकालोऽलक्ष्यते। छंदसि यस्। सितिचेति पदसंज्ञया का धातोर्गुणाभावे यण्॥ किंच सोमः सूर्य उ-
दिते सति तस्य रश्मिभिः सचा सह रश्मिभिर्भवति समानदीप्तिर्भवति॥ यद्वा तैः सहितो भवति। यतः सूर्ये उ-
दिते सति रश्मिर्भवति। अतः प्राप्तकालोऽयमित्यर्थः॥ किंच सोमो अध्वर्युभिः चमसाः अध्वर्युभिः तेषां दशा द्वित्वाद्ब-
हुवचनं तैर्भरमाणाः ध्रियमाणाः अयंसत नियता अभवन्॥ किंच हे वायो ते सोमाः शुक्राः अयंसत अयं-

यमेव कर्मणि दुहस्नुनमामिति यगभावः ॥ लोपस्त आत्मनेपदेष्विति तलोपः ॥ बहुलं छंदसीति रुट्॥ तथा आ-
शीरं घृतं उपस्तरणाभिघारणाद्याश्रयणाय योग्ये कूरणे द्रव्यं दुहते ॥ ॥इति द्वितीयस्य प्रथमे त्रयोविंशो वर्गः॥
स्तीर्णं बर्हिरिति नवर्चं सूक्तं पारुच्छेपं अत्यष्टं पूर्वत्र तु नव च चतुर्थ्याद्याः पंचैंद्राः शेषाः पाते अष्टमी इति उत्तरस्य वि-
नियोगो लैंगिकः ॥ दशरात्रस्य षष्ठेहनि प्रउगशस्त्रे आद्यौ तृचौ प्राकृतयोर्वायव्यैंद्रवायव्ययोः स्थाने
विनियुक्तौ षष्ठस्य प्रातःसवने इति खंडे सूत्रितं स्तीर्णं बर्हिरिति तृचाविति॥ ॥तत्र प्रथमा॥ स्तीर्णं बर्हिरु-
प नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते॥ तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे॥
प्र ते सुतासो मधुमंतो अस्थिरन्मदाय क्रत्वे अस्थिरन्॥ ॥स्तीर्णं बर्हिरिति॥ हे वायो नोस्माद्यज्ञार्थं स्तीर्णं
आस्तृतं बर्हिरभिलक्ष्य याहि उपयाहि आगच्छ॥ किमर्थं वीतये हविषां भक्षणाय केन साधनेनेति तदुच्यते।
सहस्रसंख्याकेन नियुता जातावेकवचनं नियुत इति वायोरश्वानां नामधेयं॥ नियुतो वायोरिति निरुक्तं उ-

धिषे पूर्वपेयं इत्यादिषु सर्वत्र प्रसिद्धं तथापींद्रस्येतरदेवेभ्यः पूर्वं वायुना सह पानं च इंद्रं तुरीयार्थवादेन ब्राह्मणे
देवा वै सोमस्य राज्ञोग्रपेयेन समपादयन्नित्यत्र प्रतिपादयन्नित्यत्र प्रतिपादितं किंच गमनसमये हे वायो त्वमिद्र
श्चंद्रेण अस्मदाह्लादकेन हिरण्येन राधसा गवादिरूपेण धनेन च सह आगतमागच्छतं॥ गमेर्लोटि छांदसः
शपो लुक्। अनुदात्तोपदेशेत्यनुनासिकलोपः। लुङि च मंत्रे घसेति च्लेर्लुक्॥ ॥अथ पंचमी॥ आ वां धियो
ववृत्युरध्वरां उपेममिंदुं मर्मृजंत वाजिनमाशुमत्यन्न वाजिनं। तेषां पिबतमस्मयू आ नो गंतमिहोत्या॥ इंद्र
वायू सुतानामद्रिभिर्युवं मदाय वाजदा युवं॥ २४॥ ॥आ वां धिय इति॥ हे इंद्रवायू युवां युष्मान् धियः कर्मा
णि स्तोत्रादिलक्षणानि अध्वरान् उप अस्मदीयान् यज्ञान् लक्षीकृत्य ववृत्युः अतिशयेन वर्त्तयंति प्रवर्त्तयंति
किंच युष्मदर्थं वाजिनं ग्रहणाय द्रोणकलशं प्रत्यतिगमनवंतं आमिक्षावंतं इमं इंदुं पुरतो वर्त्तमानं सो
मं मर्मृजंत अध्वर्यवो दशापवित्रेण संमार्जयंति। मार्जने दृष्टांतः॥ आशुं अतिशीघ्रगामिनं अत्यं सततं

गंतारं वाजिनं वेजनवंतं अश्वमिव यथा स्वेदाद्यपनयनेन संमार्जयंति तद्वत् किंच हे इंद्रवायू तेषां अध्वर्यूणां
संबंधिनः शोधितांश्च सोमान् पिबतं पानं कुरुतं तदानीमस्मान् यज्ञं प्रति इदानीं ऊत्या ऽस्मद्रक्षणेन सहागतं आ
गच्छतं। किंच हे इंद्रवायू युवं वां अद्रिभिर्ग्रावभिः सुतानामभिषुतानां पूर्ववत् कर्मणि षष्ठी। तान् पिबतमिति
शेषः॥ किमर्थं मदाय तत् तृप्तये मोदाय वा यतो युवं वां वाजदा वाजस्य दातारौ अतः पिबतमित्यर्थः॥ ॥इति द्विती
यस्य प्रथमे चतुर्विंशो वर्गः॥ ॥अथ षष्ठी॥ इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शु
क्रा अयंसत॥ एते वामभ्यसृक्षत तिरः पवित्रमाशवः॥ युवायवोति रोमाण्यव्यया सोमासो अत्यव्यया॥ ॥इमे
वामिति॥ हे वायो वां युवयोः तव चेंद्रस्य च स्वभूताः सोमाः अप्सु अस्मदीयेषु कर्मसु ऊडिदमित्यादिना विभक्तेरु
दात्तत्वं। इहास्मिन्नभिषवस्थाने सुताः अध्वर्युभिर्भरमाणास्तैर्ह्रियमाणा गृहीता होतुं वा हूयमाना कर्मणि
कप्रत्ययः। अयंसत आगच्छत युवयोर्नेता भवंति। किंच त एव सोमाः शुक्राः शुभ्राः दीप्ताः अयंसत नियता भवं

ति॥ किं च ते आशवः व्यापकाः सोमाः वायुं वां प्रीणयितुमिति शेषः॥ तिरः पवित्रं तिर्यग्भूतं सोमानां शोधयितृ वालैरूर्णा
मयं पवित्रं अभ्यसृक्षत अभिसृष्टा भवंतीत्यर्थः सृजेः कर्मणि लुङि। लिङ्सिचावात्मनेपदेष्विति सिचः कित्त्वा
द्गुणाभावः अमागमाभावश्च। किं च युवां वायवः युवां कामयमानाः सोमासः सोमाः अत्यया अत्यया इति छन्दोनि
रोमाणि पवित्रसंबंधीनि दशरोमाणि यद्वा अत्यया अव्यया अविमया निमकारो लुप्यते। तादृशानि रोमाणि अतिक्रम्य पा
त्रं गच्छंतीति शेषः पुनः तत्र व विशेष्यंते। अति अति इत्येक अव्ययरहिताः सोमासः संसृजंते इति शेषः॥ ॥
अथ सप्तमी॥ अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिंद्रश्च गच्छतं। विसूनृता ददृ
शे रीयते घृतमा पूर्णया नियुता याथो अध्वरं॥ अत्र हेत हे स्थ मध्व आहुतिं यमश्वत्थमुपतिष्ठंत जायवोऽस्मे
ते संतु जायवः॥ ॥ अति वायो इति। हे वायो त्वं ससतः आलस्यादिना निद्रां कुर्वतः शश्वतः बहून् यजमानान्
त्वा शश्वत् इति बहुनाम शश्वत् त्रिविष्टपमिति तन्नामसु पाठात् अतिक्रम्य उपेक्षयं अस्मदीयं याहि गच्छ इंद्रश्च

तदीयमुद्यतः अतस्तेषां प्रक्षणाय याहीत्यर्थः॥ ॥ अथ चतुर्थी॥ आ वां रथो नियुत्वान्वक्षदवसेऽभि प्रयांसि
सुधितानि वीतये वायो हव्यानि वीतये॥ पिबतं मध्वो अंधसः पूर्वपेयं हि वां हितं॥ वायवा चंद्रेण राधसा गत
मिंद्रश्च राधसा गतं॥ ॥ आ वां रथो इति॥ केवलं वायुं स्तुत्वा व्यासज्य तयेंद्रवायू स्तौति। हे वायो त्वं इंद्र च यु
ष्मान् रथः युवयोः संबंधी रथः नियुत्वान् नियुद्भिरश्वैर्युक्तः नैदूनसन् आवक्षत् देवयजनं प्रति युष्मान
वहतु वहेर्लेटि अडागमः सिब्बहुलमिति सिप्। यद्यपि नियुतो वायोरेव रथस्यो चिताः तथापि व्याससक्ताद्देवत
स हेवागमनादि द्वयर्थमपि वहत्विति। किमर्थं अवसे गमनाय रक्षणाय वा पुनश्च किमर्थं प्रयांसि अन्नानि सोमल
क्षणानि यष्टृगृहीतानि वीतये तेषां भक्षणाय तथा हव्यानि वीतये तु तरेषां सवनीयपुरोडाशादीनां खादनाय वे
तेः क्तिन्प्रत्ययः मंत्रे वृषेषसाधिना तस्योदात्तत्वं॥ किं च मध्वः मधुररसस्य अंधसोऽन्नस्य सोमरूपस्य कर्मणि ष
ष्ठी मधुरं सोमं पिबतं पूर्वं पूर्वपेयं अतः पूर्वे पिबतमित्यर्थः॥ यद्यपींद्रादपि वायोः पूर्वपानत्वं हि पूर्वपेयं सिद्धेवेद

च अस्मे अस्माकं संबंधिनो जायवः जेतारः कर्मनिर्वाहितारः ते ऋत्विजः संतु समर्था भवंतु। यज्ञं निर्वहंत्वित्यर्थः॥
यद्वा ते प्रसिद्धाः प्रयोगकुशलाः जायवो वो जेतारः ऋत्विजः अस्मे संतु नान्यत्र अत्रव हे यत्र इसकेवो त्रविशेषदृ
ति तत्राह॥ हे इंद्रवायू आस्मिन्यज्ञे गावः धेनवः साकं सहैव सूवते युष्मदर्थमेव क्षीरमुत्पादयेति दोग्ध्र्यो भवंती
त्यर्थः॥ यद्वा गावः साकं सहैव सूवते अपत्यमुत्पादयंति। सूते हननार्थे अदादिः। डित्वात्तस्यानुदात्तेदिति लसार्व
धातुकानुदात्तत्वे धातुस्वरः। किंतु यवः जातावेकवचनं उपलक्षणमेतत्। यवादिभिः पुरोडाशादिकं पच्य
त इत्यर्थः॥ किंच हे वायो इंद्रश्च यत्ते गाव एव सूवते अतस्ते त्वदर्था धेनवः नोपदस्यंति नोपक्षीणा भवंति॥ रोगा
दिना कृशा न भवंति। नकेवलमनुपक्षीणा धेनवः युष्मत्संबंधिन्यो गावो नोपदस्यंति चौराद्यपहारैरुपक्षी
णा नष्टा न भवंति॥ ॥अथ नवमी॥ इमे ये ते सु वायो बाह्वोजसोंतर्नदी ते पतयंत्युक्षणो महि व्राधंत उक्षणः॥
धन्वंश्चिद्ये अनाशवो जीराश्चिदगिरौकसः॥ सूर्यस्येव रश्मयो दुर्नियंतवो हस्तयोर्दुर्नियंतवः॥ २५॥ ॥इ

मे ये त इति॥ हे सुवायो शोभनफलप्रद वायुदेवते तव स्वभूता इमे पुरतो दृश्यमाना ये अश्वाः संति ते नदी द्यावा
पृथिव्यौ अंतः तयोरंतरालेंतरालेऽपतयंति पातयंति गमयंति। यद्वा ते तव संबंधिनो अश्वाः पतयंति यज्ञदेशं गच्छं
ति। पत गतौ। चौरादिरदंतः। वीद्वयास्तिबालोजसः बाहुषु प्रकृष्टबलवंतः उपलक्षणमेतत्। सर्वांगबल उ
इत्यर्थः॥ किंच उक्षणः सेक्तारः युवान इत्यर्थः महि महत् अतिप्रभूतव्राधंतः वर्धमानाः तथा उक्षणो उक्षाणः
नस्वदरा इत्यर्थः॥ राघ वृद्ध्यस्य निम इति दीर्घभावः॥ किंच धन्वचन् धन्व निरुदक निर्गमनपादानभूते अंतरिक्षेऽपि
निरालंबे अनाशवः नाशरहिताः अयासावा आकाशेऽपि लंबं कुर्वाणा इत्यर्थः॥ अतएव जीराश्चित् चिदःपू
जायां। अयं ते क्षिप्रगजयः यद्वा अनाशव इत्यनेन सह समुच्चयार्थः॥ चिच्छब्दः आकाशमार्गे अक्षीणाः शीघ्रग
तयश्चेत्यर्थः॥ किंच गिरौकसः गिरानुकः स्थानं नास्ति ते तादृशाः भर्त्सनादिना स्थितिमलभमाना इत्यर्थः॥ छां
दस स्तुतौ याप्यालुक्॥ तदेव स्पष्टयति सूर्यस्य रश्मय इव दुर्नियंतवः दुःखेन नियंतव्याः ते यथाक्षणेन दशा दि

ऋ॰भा॰
॥८०॥

ग्रो व्याप्नुवंतिब हवश्च तद्वदेतेपीत्यर्थः॥ पूर्वं गिर अनिर्ग्राह्यत्वमुक्तं इदानीं हस्तेनाप्यतिग्राह्यत्वमाह॥ हस्तयोर्दु
र्नियंतवः उभाभ्यामपि हस्ताभ्यां दुःखेन नियंतव्याः देवयजनगमनाय शीघ्रगामिन इत्यर्थः॥ ॥इति द्विती
यस्य प्रथमे पंचविंशो वर्गः॥ ॥प्र सू ज्येष्ठमिति सप्तर्चं तृतीयं सूक्तं नु ऋषिश्चान्यस्मादिति परिभाषया वृष्टी
वानृषिः अत्यष्टी छंदः उक्तौ देवानामित्यस्या त्रिष्टुबेत परिभाषा नाश्रीयते सर्वमास्य [illegible] मिति विशेषपरिभाषाबा
धित्वात् नु मित्रावरुणौ देवता अंत्ययोस्तु तन्मंत्रलिंगोक्तदेवता तथा चानुक्रांतं प्र सू सप्त मैत्रावरुणं त्वेयो लिंगोक्त
देवते अंत्या त्रिष्टुप् नु तु इत्यृद्ध प्रयोगादेदमादिदमादिर्वे द्वे सूक्ते मैत्रावरुणदेवत्ये कोविनियोगो लैंगिकः॥ ॥तत्र प्र
थमा॥ ॥प्र सू ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठं मृळयद्भ्यां। ता सम्राजा घृतासु
ती यज्ञेयज्ञ उपस्तुता॥ अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे॥ अदर्गा तु उरुरव्ये वरीयसी पंथा
ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः॥ ॥प्र सू ज्येष्ठमिति॥ हे ऋत्विजः मित्रावरुणाभ्यां ज्येष्ठं

श्रीः
॥८०॥

तथा करोतु वंदेऽहमिति तमाह यत्र ग्रावा वः यस्मिन्देशे अभिषवार्थः पाषाणध्वनिः श्रूयते तत्र गच्छतं देशं प्रयागच्छतं
पुनः स्थानमेव विशिष्यते। सूनृता प्रियतथ्यात्मिका स्तुतिरूपा वाक् यत्र विदद्भ्रे विशेषेण दृश्यत इत्यर्थः॥ तत्र ग
च्छतं यत्र च घृतं असेतं पूज्य होमार्थं गृहीतं रीयते गच्छति आहवनीयं प्रति नीयते शीघ्रश्रवणे। दिवादित्वात् स्यन् तत्र
गच्छंतं गमनप्रकार एव विशेष्यते। पूर्णया पूर्णपुष्टया नियुता जाता वेकवचनं नियुत्या सा अध्वरं अस्मदी अध्वरं
यं यज्ञं आयाथः अभिमुख्येन प्रयाते इत्यर्थः॥ ॥अथाष्टमी॥ अत्राह तद्वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठे
त जायवो स्मे ते संतु जायवः॥ साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यंति धेनवो नाप दस्यंति धेनवः॥ इमे
ये ते सु वायो बाह्वोजसोंतर्नदी ते पतयंत्युक्षणो महि व्राधंत उक्षणः॥ ॥अत्राह तद्विति॥ हे इंद्रवायू अत्राह अस्मि
न्नेव यज्ञे अहेति विनिग्रहार्थः इयः मध्वो मधुरस्य मधुसदृशस्य वा तत्तस्य आहुतिं प्रदेयद्रव्यं वहेथे धारयतं
यं सोमं अश्वत्थं पर्वताद्दिद्यात्रि प्रदेशे ग्निष्ठितं जायवो जेतारो यजमानाः उपतिष्ठंते उपेत्य तिष्ठंति। क्रियादार्थं विं

उपस्कृता सर्वैर्ऋत्विग्भिः स्तूयमानो गातिरनंतरं इति गतेः । प्रकृतिस्वरत्वं । अथापि च एनोः एनयोः संज्ञापूर्वकस्य विधेरनित्यत्वात् दीर्घसिचेतिगुणाभावे अतो गुण इति पररूपत्वं क्षत्रं बलं कुतश्चन अस्माद् अपि च एनयोः राक्षसादेः सकाशात् कस्माद् कस्मादप्युपायात् नाधृषे अधर्षितुं नाशक्यं न भवति कृत्यार्थे तवैकेनिति केन प्रत्ययः । किंच तयोर्देवत्वं नूचित् देवभागोऽपि धृष्ये आधर्षणयोग्यः । यद्वा पूर्वमिदानीमपि नूचिदिति निपातः पुराणतयोरिति यास्केनोक्तत्वात् ॥ आधृषे न केनाप्याधर्षणीयो भवतः एतयोर्बलं नाधृष्यं किमु देवत्वमिति भावः ॥ ॥

अदर्शि गातुरुरवे वरीयसी पंथा ऋतस्य समयंस्त रश्मिभिः । चक्षुर्भगस्य रश्मिभिः ॥ द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च ॥ अथा दधाते बृहदुक्थ्यं वय उपस्तुत्यं बृहद्वयः ॥ ॥ अदर्शि गातुरिति ॥ गातुर्गमनशीला वरीयसी उरुतरा उषाः उरवे विस्तीर्णाय यागाय गमनाद्व्याप्तये अदर्शि सर्वैर्दृष्टासीत् । तथा ऋतस्यागमनशीलस्यादित्यस्य पंथा मार्गः आकाशलक्षणो रश्मिभिः समयंस्त प्रकाशैः संगतोऽभूत् ॥ भगस्य सर्वैर्भजनीयस्य देवस्य एतन्नामकस्य देवस्य रश्मिभिश्चक्षुः सर्वप्राणिनां लोचनं समयंस्त । संगतोऽभूत् । सर्वैः स्वस्वदर्शनाय समर्था अभवन्नित्यर्थः ॥ तद्देवस्य दीप्तिः क्रियते मित्रस्य प्रकाशकारित्वात् सर्वजनमित्रस्य सदनं गृहं अंतरिक्षं द्युस्थानीनिवासस्थानं तत् रश्मिभिः समयंस्त संगतोऽभूत् ॥ तथार्यम्णः एतन्नामकस्य देवस्य उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । द्युक्षं सदनं रश्मिभिः रश्मिभिः समयंस्त ॥ किंच वरुणस्य तमोनिवारकस्यैतन्नामकस्य देवस्य सदनं तथाभूत् ॥ यद्यपि सूर्यस्यैकत्वेऽपि उपाधिभेदेन भेदात् पृथक्श्रुतिः ॥ तथा यद्यपि रश्मिभिः प्रकाशनमंतरिक्षमेकं तथापि प्रकाशकानां भेदात् त्रिधा श्रूयते ॥ उदयानंतरं कर्मानुष्ठानाय प्रकाशोऽभवदित्यर्थः ॥ अथानंतरं कारणादुदितत्वाद् देव उक्थं स्तुत्यं बृहत् प्रभूतं वयः हविर्लक्षणमन्नं दधाथे धारयथ । किंच उपस्तुत्यं उपेत्य स्तोतव्यं । एते स्तुतिशस्त्रादिना । किंच बृहत् स्तोभादिना महत् स्तोत्रं वयः हविर्लक्षणमन्नं वदधाथे ॥ ॥ अथ तृतीया ॥ ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमासचेते दिवेदिवे जागृवांसा दिवेदिवे ॥ ज्यो

द्वि·भा·
॥८२॥

तिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती ॥ मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः ॥ ॥ज्योतिष्मती
मिति ॥ अयं यजमानः ज्योतिष्मतीं आहवनीयाग्नेस्तेजोयुक्तां अदितिं अदीनां संपूर्णलक्षणां क्षितिं अर्यमा या
तयज्जनः । यातयतेति लोकं यातजनाः प्रेष्याः सतादृशः पात्यमाना नरके निपात्यमानाः जनाः प्राणिनः अयष्टारो
येन सतादृशः कर्मसाक्षित्वस्वकर्मानुरोधेन प्राणिनः स कुलेया तयतीत्यर्थः ॥ अर्यमा मित्रावरुणयोरप्ये
नोवर्त्तत इति शेषः ॥ ॥ अथ चतुर्थी ॥ अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वा
भगः ॥ तं देवासो जुषेरत विश्वे अद्य सजोषसः ॥ तथा राजाना करथो यदीमह ऋतावाना यदीमहे ॥ ॥ अयं
मित्रयेति ॥ अयमस्माभिर्दीयमानः सोमः मित्रावरुणाय शंतमः पीयमानः सन् सुखतमो भूत्वभवतु छंद
सः ऋपोलुक् ॥ भूस्वरोऽस्तिडीतिगुणाभावः ॥ अवपानेषु अवाङ्मुखं चमपानेषु विषयेषु सर्वतः भगो भजनीयः
ताभ्यां किंच देवः दीप्यमानः देवेषु मित्रावरुणानुचरेष्वितरदेवेषु तैरभ्यगः आभजनीयाय हृ देवेषु स्तोतृषु श्री
॥८२॥

राभ

प्रशंस्यं बृहत् । महत् अतिप्रवृद्धं नमः नमस्कारोपलक्षितं स्तोत्रं तदुपलक्षितं हविर्लक्षणमन्नं वा भरत संपादय
त ॥ नमइत्यन्ननाम नम आयुरिति तन्नामसु पाठात् ॥ किंच हव्यं हव्यां मतिं तत्प्रदानविषयां बुद्धिं भरत यद्वा म
तिं पूज्यं हव्यं हविर्भरत पूर्वं पुरोडाशप्रदानदनीयमन्नं इदानीं तु सोमाज्यादिरूपं निर्वपेर्य हविरिति विवेकः ॥ मृळयद्भ्या
भ्यां तासानिचिराभ्यां नितरां चिरकालाभ्यां नियाभ्यामित्यर्थः ॥ प्रकाहरूपेणेति भावः ॥ किंच मृळयद्भ्यां स्वादिष्ठं ह
विः स्वीकारेण स्वयं सुखितायजमानमपि सुखयद्भ्यां तस्य स्वादिष्ठं स्वादुतरं मृळयद्भ्यां श्रुसा हविः सुखैर्खयद्भ्यां भ
क्षयद्भ्यामित्यर्थः ॥ कुत्स्तयोर्विशेष इति तत्राहेता तौ मित्रावरुणौ सम्राजा सम्यग्राजमानौ राजतेः क्विप् मोराजि
समः क्वाविति समो मकारस्य घृतासुती घृतमाश्रूयते आदीयते याभ्यां तौ तादृशौ बहुघृतमुदकं वृष्टिलक्षणं प्र
सूयते सर्वत्रानुज्ञायते याभ्यां तौ एतयोरहोरात्राभिमानित्वादहोरात्रि द्वारा वृष्ट्युत्पादकत्वात् । अहोरात्रे वै मित्रा
वरुणा वहोरात्राभ्यां खलु वै पर्जन्यो वर्षतीति श्रुतेः ॥ वृष्ट्यनुज्ञाप्रदत्वं प्रसिद्धं । किंच तो यज्ञे यज्ञे सर्वेष्वपि यज्ञेषु स्तु

तात्पापात् न केवलं भवंतावेव अपितु अर्यमा सर्वेषां नियंता देवः ऋजूयंते देवेष्वार्जवमाचरंतं यजमानं व्रतमनु
तदीयं कर्मानुलक्ष्य अभिरक्षति। अभितो रक्षति। कीदृशस्य जनस्य विशेषण इति तत्राह। यो यजमानः उक्थैः शस्त्रैः व
नोः एनयोर्मित्रावरुणयोर्व्रतं कर्म परिभूषति परिगृह्णाति॥ तथा यजमानः युष्मदीयं व्रतं कर्म स्तोमैः स्तोत्रैः मा
त्रयुक्तमंत्रसाध्यैः आभूषति सर्वतः अलंकरोति भूष अलंकारे भौवादिकः। तमभिरक्षतीत्यन्वयः॥ ॥अथ
षष्ठी॥ नमो दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीळ्हुषे सुमृळीकाय मीळ्हुषे॥ इंद्रमग्निमुपस्तुहि
द्युक्षमर्यमणं भगं॥ ज्योग्जीवंतः प्रजया सचेमहि सोमस्योती सचेमहि॥ ॥नमो दिवइति दिवे द्योतमानाय सूर्याय
नमो वोचं नमस्कारोपलक्षितं स्तोत्रं वोचं ब्रवीमि स्तौमीत्यर्थः॥ कीदृशाय तस्मै बृहते महते बृहन्महतोरुपसं
ख्यानमिति विभक्तेरुदात्तत्वं स्तुत्याय तथा रोदसीभ्यां द्यावापृथिवीभ्यां तदभिमानिदेवताभ्यां नमो वोचं तथा मि
त्राय सर्वजनहिताय अहरभिमानिदेवाय नमो वोचं॥ तद्वरुणाय आवरकाय रात्र्यभिमानिदेवाय तथा मीळ्हुषे॥

अभिमतफलस्य सेक्त्रे रुद्राय कीदृशाय तस्मै सुमृळीकाय शोभनसुखयित्रे पुनः स एव विशिष्यते। मीळ्हुषे सु
मृळीकायेति द्वे प्रत्येकं विशेषणभूते इदानीं यजमानो ऋत्विजं स्वात्मानं वा प्रति ब्रवीति। हे होतः हे आत्मन् वा इंद्र
मग्निं द्युक्षं दीप्तिमंतमर्यमणं भगं च उपेत्य बुध्या प्राप्य स्तुहि कुरुस्व तदनुग्रहात्। ज्योक् चिरकालं जीवंतो जीवनो
पेता वयं प्रजया पुत्रप्रभृत्यादिना सचेमहि संगता भूयास्म। किंच सोमस्योती ऊत्या सचेमहि तमपि स्तुत्वा तत्कृ
तेन रक्षणेन सहिता भूयास्मेत्यर्थः॥ ॥अथ सप्तमी॥ ऊती देवानां वयमिंद्रवंतो मंसीमहि स्वयशसो मरुद्भिः
अग्निर्मित्रो वरुणः शर्म यंसन्तदश्याम मघवानो वयं च॥२६॥ ॥ऊती देवानामिति॥ इंद्रवंता प्रीतेनेंद्रेण तद्वंतो व
यं देवानां देवानां कर्माणि षष्ठी ऊती ऊत्या तर्पणेन हविरादिना मंसीमहि मन्येमहि॥ कीदृशा वयं स्वयशसः स्वायत्तकी
र्तयः मरुद्भिः स्तुत्या हर्षैर्मरुद्भिर्वैरनुगृहीताः यद्वा देवभूत्या रक्षणेन रक्षिताः मंसीमहि दातारो भवेम॥ सामर्थ्या
त्तेषामेव महत्त्वस्य। किंच अग्निर्मित्रावरुणा देवाः शर्म यच्छन् अस्माकं सुखं प्रायच्छन् तं तं वरं मघवानो वयं च तेदे

द्वि॰ भा॰ त्मान्नवंतः संतः तन्मुखं अन्नयाम। व्याप्नुयाम। अश्नोतेराशिषि लिङि। छंदस्युभयथेति सर्वधातुकत्वात्सलोपः॥

॥८४॥ :॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो देयात्

यजमानेषु मध्ये देवः दीप्यमानः तथा आभागः तैरेव सर्वतो भजनीयः किंच तं सोमं विश्वे देवासो देवाः अद्यास्मिन्न
हनि जुषेरत सेवंते छांदसो ह्रस्य रुन्नादेशाभावः। बहुलं छंदसीति रुडागमः॥ वीहूत्रास्त्रैस जोषसः समानप्रीति
युक्ताः तथा राजमाना मित्रावरुणो युवां कृतरथः कुरुते सेचथे इत्यर्थः॥ व्यत्ययेन रूपं॥ यद्वास्मात्कारणात्त्वयदीमहे
प्राप्नोमि॥ देवान्याचामहे। ईडगतौ। देवादिकः छांदसो विकरणस्य लुक्॥ तस्माज्जुषेरवत तथा ऋतावाना ऋतवंतौ
सत्यवंतौ यज्ञवंतौ वा मित्रावरुणौ ईमहे अभिमतफले तयोः पानं वा याचामहे॥ ॥अथ पंचमी॥ यो मित्राय
वरुणायाविधज्जनोनर्वाणं तं परिपातो अंहसो दाश्वांसं मर्तमंहसः॥ तमर्यमाभिरक्षत्यृजूयंतमनुव्रतं॥ उक्थै
र्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतं॥ ॥यो मित्रायेति॥ यो यजमानो मित्रावरुणाय च कर्मणः संप्रदा
नत्वस्य चतुर्थी। मित्रं वरुणं च अविधत् परिचरति तं जनं युष्मत्परिचारकं अनर्वाणं अद्वेषिणं भ्रातृव्यो वा अर्वे
ति श्रुतेः। अनत्यं वा अनन्यसेविनं परिपातः परितो रक्षतः। कस्मात् इति तदुच्यते। अंहसः न्यूनातिरेकजनि

अभिषुतः इदानीं विप्रुन्योप्यात मित्राय सर्वहिताय एतन्नामकाय अहरभिमानिदेवाय तथा वरुणाय आवरकाय रा
त्र्यभिमानिदेवाय च तदर्थं सोमः सुत इति शेषः। किंच ऋतायव ऋतायतदर्थं पीतये पानाय यज्ञसिध्यर्थं हि देवानां सो
मपानं यद्वा ऋतं तीरं। किंच पीतये पात्रे ऋत्विजादये ऋताय यज्ञाय तन्निर्वाहकाय चारुश्चरणीयो भक्षणीयः सोमः सु
तः अभिषुतः॥ ॥ अथ तृतीया॥ तां वां धेनुं न वासरीमंशुं दुहंत्यद्रिभिः सोमं दुहंत्यद्रिभिः॥ अस्मत्रा गंतमुपनो
र्वाचा सोमपीतये॥ अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः॥ ॥ वां युवयोः संबंधिनमंशुं वल्लीरू
पं सोमं दुहंति संपादयंति॥ अध्वर्यवः किमिव तां प्रसिद्धां अग्निहोत्राद्यर्थं वासरीं सर्वांगाच्छादितपयस्कां बहुक्षी
रामित्यर्थः॥ यद्वा पय आच्छादयित्रीं वस आच्छादने। औणादिको अरिप्रत्ययः। कृदिकारादक्तिन इति ङीष्॥ यद्वा
केवल दैवत्यादिको रिप्रत्ययः। स्वार्थिकोण्॥ धेनुं न प्रीणयित्रीं गामिव केन साधनेनेति तदाह॥ अद्रिभिरभिषवसा
धनैर्ग्रावभिः॥ किंच आपीतये संपूर्णपानाय सुतः अत आगच्छामीत्यर्थः॥ ॥ इति द्वितीयस्य द्वितीये प्रथमो

वर्गः॥ ॥ प्र प्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तंदते स्तोत्रमस्य न तंदते। अर्चामि सुम्नयन्नहं
मंत्यूतिं मयोभुवं। विश्वस्य यो मन आयुयुवे मखः॥ ॥ प्र प्र पूष्णस्तुविजातस्येत्येतच्चतुर्ऋचं पंचमं सूक्तं परुच्छे
पं आत्यष्टं पूषा देवताकं प्र प्र चतुष्कं पौष्णमित्यनुक्रांतं। विनियोगो लैंगिकः॥ प्र पूष्ण इति॥ तुविजातस्य बहुयजमा
नार्थमुत्पन्नस्यास्य पूष्णः पोषकस्यैतन्नामकस्य देवस्य तवसो महित्वं बलस्य महत्त्वं प्र प्र शस्यते प्रस्तूयते। सर्वै
वीप्सा पादपूरणेन तदंते न हिनस्ति कश्चिदपि तदपि। किंचास्य पूष्णः स्तोत्रं न हिनस्ति न विरमति सर्वो जनः एनं स्तौतीत्य
र्थः॥ जगतः पोषकत्वादिति भावः। अतः कारणादहं अहमपि यजमानः सुम्नयन् सुखमिच्छन् अर्चामि स्तौमि। कीदृशं
तं अंत्यूतिं आसन्नरक्षणं वा लं लोपो बहुलमिति इकलोपः॥ स्तुत्यनंतरमेव वरप्रदमित्यर्थः॥ मयोभुवं सुखस्योत्पा
दकं भावयितारं वा यः पूषा मखः यज्ञवान् मत्वर्थो लुप्यते। विश्वस्य सर्वस्य स्तोतुर्ऋत्विजो मनः आयुयुवे। समंता
न्मिश्रयति। युमिश्रणादिति भावः॥ किंच देवो दीप्यमान इति शेषः॥ मखः मखं यज्ञं आयुयुवे समंतान्मिश्र

यतिसामर्थ्याद्यजमानस्यमनइतिलभ्यते॥ यौतेः छांदसो लिट्॥ ॥अथद्वितीया॥ प्रहित्वापूषन्नजिरंनयामनि
स्तोमेभिः कृण्वऋणवोयथामृधउष्ट्रोनपीपरोमृधः॥ हुवेयत्वामयोभुवंदेवंसख्यायमर्त्यः॥ अस्माकमांगूषान्
द्युम्निनस्कृधिवाजेषुद्युम्निनस्कृधि॥ ॥ प्रहित्वापूषन्निति॥ हेपूषन् अजिरंयद्गंतुंप्रतिगमनवंतंत्वात्वांयाम
निगमननिमित्तभूतेसतिस्तोमेभिः स्तोत्रैः प्रकर्षेणकरोमि। तत्रदृष्टांतः॥ यामनिइतिप्रागमनेअजिरंनइतिप्राग
मिनमश्वमिवसयथाप्रस्तूयतेतद्वत् किंचयथामृधः संग्रामान्उद्दिश्यकृणवः गच्छेः तथाप्रक्षन्नेवयद्वायथा
कृणवः अस्मद्यज्ञंप्रतिगच्छेः। ऋणगतौ। तनोभ्यादिकः। लेघटुरागमः। तन्वादिकृण्वे। किंचमृधोहिंसकान्योद्धॄन्
संग्रामेपीपरः॥ परांतारयसि समापयसिपरेयतेर्लुङिरूपं। तत्रदृष्टांतः॥ उष्ट्रोनउष्ट्रः सयथाभारंवोढुंपारयति
तद्वत्मृधः संग्रामान्पीपरः पारंनयसि। अतः कारणात्त्वांमयोभुवं सुखस्यभावयितारंदेवं देवनशीलंपूष
णंमर्त्योमरणधर्माहंमनुष्योहंहुवे॥ आह्वयामि। किमर्थंसख्यायसमानख्यानायप्रियकरणायएवमाहूतः

अथद्वितीया॥ इमआयातमिंदवः सोमासोदध्याशिरः सुतासोदध्याशिरः॥ उतवामुषसोबुधिसाकंसूर्यस्यरश्मि
भिः॥ सुतोमित्रायवरुणायपीतयेचारुर्ऋतायपीतये॥ ॥ हेमित्रावरुणौ आयातंआगच्छतंयतोयुष्मदर्थंइंद
वः क्लेदनसमर्थाः सोमासः सोमाः दध्याशिरः दध्याश्रयणवंतस्संतः इमेपुरतोग्रहेणगृहीतावर्त्तंतेअतः आ
यातंचकिंचदध्याशिरः धीयमानाशिरः सोमासः सुतासः मंत्रेणग्रावभिरभिषुताः संपन्नाः अत्रआयातमि
तिशेषः॥ आदित्यग्रहेदध्यवनयसद्भावात्तदपेक्षयादध्याशिरइत्युक्तं॥ उतापिचवांयुवयोः प्रीतयेपालनायउ
षसोबोधिउषसः संबंधिनिबोधेसतिसंपदादिलक्षणोभावेक्विप्। सावेकस्यचइतिविभक्तेरुदात्तत्वं। प्रकाशेसंजातेस
तिनकेवलमुषएवबोधः। अपितुरश्मिभिः साकंसूर्यकिरणैः सहप्रकाशेहविःप्रदानायसंजातेसतिसुतःसोमो

सनूरथीर्भव ॥ अस्माभिर्गंतव्यो भव । सर्त्तेरौणादिकः रिप्रत्ययः । आघृदीप्त त्वं । किंच त्वं वाजे वाजे सर्वेष्वपि संग्रामेषु
रथीर्भव । गमनशीलो भव पुरतो गंता भवेत्यर्थः ॥ ॥ अथ चतुर्थी ॥ अस्या उ षु ण उप सातये भुवो हेळमानो रा
वां अजाश्वश्रवस्यतामजाश्व ॥ ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः ॥ नहि त्वा पूषन्नतिमन्य आघृणे न ते
सख्यमपह्नुवे ॥२॥ ॥ अस्या उ ष्विति ॥ पूषन्नजाश्वेति पूषणमाहेति यास्कः । पूषन् नोस्माकं अस्या अस्मै चतुर्थ्य
र्थे षष्ठी सातये लाभाय अहेळमानः अक्रुध्यन् अनादरमकुर्वन् रथिवान् दाता वसनस्य उत वा समीपस्थो भव । भव
तेः छांदसस्य लुङः पदसंज्ञायाः अभावेपि पविवांसेते । स्थिवांसं इत्यादौ छांदसो वग्रहो दृश्यते । उ इति पादपूरणः
किंच श्रवस्यतां अन्नमिच्छतां अस्माकं हे अजाश्व अजा एवाश्वस्थानीया यस्य तादृशं त्वं पूषनामेदं रथिवाश्वस
न उपभुवः अजाः तु इति निपातद्वयसमुदायात्मक एको निपातः । हे दस्म दर्शनीय उपक्षयितः त्वां सु ववृतीमहि । सर्व
त एव स्तनरां वर्त्तयेमहि । वृतेरंतर्भावितण्यर्थात् लिङि बहुलं छंदसीति शपः श्लुः । यत्तानेन रंगमना निवर्त्तयेमहि

इत्यर्थः ॥ केन साधनेनेति तदुच्यते ॥ साधुभिः स्तोमेभिः त्वां प्रीणयितुं समर्थैः स्तोत्रैः । किंच हे पूषन् आघृणे सर्वतो दी
प्तिः क्षारयितः यद्वा आघृणे षाम हेर्त्तः स्वीकर्त्तः स्वीकर्त्तः त्वां नहि त्वा अतिमन्ये अवमतिं नैव करोमि नह्येव त्वमनतिक्रममा
त्रं किंतु ते सख्यं तव सखित्वं हि न पूर्त्तत्वं न त्वापन्हुवे नैवापनयामि न युजामि सर्वतः प्रसपयामीत्यर्थः ॥ ॥ इति द्वि
तीयस्य द्वितीये द्वितीयो वर्गः ॥ ॥ अस्तुश्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं वृणीमह इंद्रवायू वृणी
महे । यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी ॥ अध प्र सू न उप यंतु धीतयो देवां अच्छा न धीतयः ॥ ॥ अस्तु
श्रौषडित्येकादशर्चं षष्ठं सूक्तं ॥ अत्रानुक्रमणिका ॥ अस्तुश्रौषडेकादश वैश्वदेवी मैत्रावरुण्याश्विन्यस्तिस्र ऐं
द्र्याग्नेयी मारुत्यैंद्राग्नी बार्हस्पत्या वैश्वदेव्यस्त्रिष्टुप् । पंचमी बृहती वैश्वदेवमेतदिति पारुच्छेप ऋषिः अंत्या त्रिष्टुप्
पंचमी बृहती । अंत्या अष्टयः । विनियोगाभावाल्लैंगिकः सूक्तं वैश्वदेवं तत्राद्याया विश्वे देवा देवता द्वितीयाया मित्रावरुणौ
अथ तिस्रोश्विदेवा देवताकाः । ऐंद्री षष्ठी सप्तमस्याग्नेयी अष्टमी मारुती नवमी ऐंद्राग्नी दशमी बार्हस्पत्या एकाद

द्वि.भा.
॥८८॥

त्री वैश्वदेवी सूक्तविनियोगो लैंगिकः॥ द्वितीयरात्रस्य षष्ठेहनि प्रउगशस्त्रे आद्या वैश्वदेवतृचे प्रथमा षष्ठस्येति खंडे सूत्रि-
तं॥ अस्तु श्रौषट् पुरो अग्निमिति॥ ॥सैषा सूक्ते प्रथमा॥ ॥अहं पुरतः उत्तरवेद्यां अग्निं आहवनीयाख्यं धिया प्रण-
यनादिकर्मणा दधे धारितवानस्मि न्त्वर्थः तादृशं बर्कुलं बर्कुलवंतं वाग्मिनं यद्वा तच्छर्धः तादृशं मरुतां स्वभूतं बलं दि-
व्यं दिवि भवं नु क्षिप्रं आवृणीमहे आभिमुख्येन संभजामहे। किंच इंद्रवायू वृणीमहे यद्यस्मात् ह क्राणात् विवस्व-
ति दीप्तिमति नाभा नाभौ भूम्या नाभिसंस्थाने देवयजने वेदिरूपे यद्वा नाभौ सर्वपूलस्य यज्ञे वैधवे यज्ञोऽय ज्ञमाहुर्भु-
वनस्य नाभिमिति श्रुतेः॥ क्राणा कुर्वाणा स्वार्थप्रापणं नव्यसी नवतरा श्रुतिरूपा वाक् संदायि छंदसः कर्मणि लुङ्॥
अस्माभिः प्रयुज्यत इत्यर्थः॥ अस्मान् स्तुतिः क्रियते। तस्मात् अस्तु श्रौषट् अस्याः स्तुतेः श्रवणं भवतु। श्रोता भ-
वतु। वामकृतो गणो भिर्वा। इंद्रवायु पक्षे प्रत्येकमपेक्षयैकवचनं। अथ अनंतरे नो धीतयः अस्मदीयानि कर्माणि स्तुत्यादि-
रूपाणि प्रस्तूपयंतु प्रकर्षेण स्तुयुषानुपगच्छंतु। किंच देवां अच्छान अस्मादि देवान् आभिमुख्येन प्राप्तुमिवध्यी । श्री ॥८८॥

सन्नस्माकं आंगूषान् स्तोमं आयोष इति यास्कः॥ द्युम्निनः स्तुत्यधियो तनवतः कुरु यद्वा स्तोमान् यज्ञोवतः अन्नवतो
वे वा कुधि। अस्मत्स्तुत्या प्रीतस्त्वं स्वमैंकुर्वित्यर्थः॥ ॥अथ तृतीया॥ यस्य ते पूषंत्सख्ये विपन्यवः क्रत्वा चित्संतोवसा
बुभुज्जिर इति क्रत्वा बुभुज्रिरे॥ तमनु त्वा नवीयसीं नियुतं राय ईमहे॥ अहेळमान उरुशंस सरी भव वाजेवाजे सरी भ-
व॥ ॥यस्य ते पूषन्निति॥ हे पूषन् देव यस्य ते रक्षकस्य तेन प्रसिद्धस्य तव सख्ये सख्ये साखित्वे हि तव करणे सति क्रत्वा
विव क्रतुना प्रकृष्टेन कर्मणा व जसादिषु छंदसिवावचनमिति भावः॥ संतः अवेतं प्रीणयितारः संतः विप-
न्यवः। विशेषेण स्तोतृशीलाः यद्वा मेधाविनामैतत्। विधायिनो यजमानाः अवसात्क्तै तेतेन रक्षणेन रक्षिताः संतः
बुभुजिरे। भुंजते भोगान् इति। एवमेव सर्वदा कृत्वा कर्मणा बुभुज्रिरे भुज्यंते सर्वैः पाल्यंते वा भुजेः छांदसः लिटि
बकुलं छंदसीति रुट्। तां तादृशीं नवीयसीं नवतरां स्तुत्वा रक्षां अनु अनुसृत्य रक्षाया अनंतरं त्वां नियुतं रय्यः एत-
संख्याकान् धनानि ईमहे याचामहे किंच हे महे उरुशंस बहुधा स्तुयत्वं अहेळमानः अक्रुध्यन् अस्माकं स्मनः

द्युपेक्षया बहुवचनं। पृष्ठस्य षष्ठेहनि प्रउगशस्त्रे युवांस्तोमेभिरित्याश्विनस्तृचः। पृष्ठस्येति खंडे सूत्रितं। युवांस्तो
मेभिर्देवयंतो अश्विनावर्म इदं इति॥ ॥सैषा सूक्ते तृतीया॥ ॥युवांस्तोमेभिर्देवयंतो अश्विनाश्रावयंत इव श्लो
कमायवो युवां हव्याभ्यायवः॥ युवोर्विश्वा अधि श्रियः पृक्षश्च विश्ववेदसा॥ प्रुषायंते वां पवयो हिरण्यये रथे दस्रा
हिरण्यये॥ ॥युवांस्तोमेभिरिति॥ हे अश्विना अश्विनौ युवां स्तोमेभिः स्तोत्रैर्देवयंतः युवामात्मन इच्छंतः आय
वः मनुष्यनामैतत्। यजमानाः श्लोकं युष्मदीयस्तुतिरूपां वाचं आश्रावयंत इव श्रावयंत इव सर्वतः श्रवणा प्रयो
कुर्वंत इव स्तुवंति। श्लोक इति वाङ्नाम। श्लोकः धारा इति तन्नामसु पाठात्॥ वीदृशास्ते युवां हव्या हविषा अन्नादि
ना अभ्यायवः आभिमुख्येन गंतारः प्रीणयितुमिति शेषः॥ हवींषि आभिमुख्येन प्रापयंतो वा॥ किंच हे विश्ववे
दसा सर्वधनौ युवोः संबंधिन्यो विश्वाः श्रियः सेवनीयाः सर्वा लक्ष्मीः धनकनकादिरूपाः अधि अधिकं भजंत इ
ति शेषः। किंच पृक्षश्च अन्नमपि युष्मत्संदत्तमपि अधि अधिकं लभंते॥ किंच हे दस्रा शत्रूणामुपक्षयितारौ वां

हिरण्यये रथे हिरण्यये मधुपूर्णे रथे पवयः प्रुषायंते। क्षरंति स्रवंति। प्रुष प्लुष स्नेहनसेचनपूरणेषु। छंदसि शा
यजपि सहावपि श्नः शायजादेशः॥ मधुपूर्णपात्रोपेतत्वात् तत्र शीघ्रगमनेन चक्रेषु मधु निस्रवंतीति भावः॥ पविरथ
नेमिर्भवति॥ पविः पुनाति भूमिमिति निरुक्तं॥ अश्विनो रथस्य मधुपूर्णत्वं त्रयः पवयो मधुवाहने रथ इत्यादि
षु प्रसिद्धं॥ किंच तादृशे हिरण्मये हृदयरमणे रथे मधुरं हविर्वहतामिति शेषः॥ ॥अथ चतुर्थी॥ अचेति दस्रा व्यु१
नाकमृण्वथो युंजते वां रथयुजो दिविष्टिष्वध्वस्मानो दिविष्टिषु॥ अधि वां स्थाम बंधुरे रथे दस्रा हिरण्यये॥ पथेव
यंतावनुशासता रजोंजसा शासता रजः॥ ॥अचेति दस्रेति॥ हे दस्रा दस्रौ अश्विनौ अचेति वक्ष्यमाणं युष्म
च्चेष्टितं ज्ञायते सर्वैः किं तदिति। उच्यते। नाकं स्वर्गं व्यृण्वथः विशेषेण गच्छथ एतदर्थं वां रथयुजः युष्मत्संबंधिनो
रथस्य योजितारः सारथयः दिविष्टिषु स्वर्गस्य एषणेषु द्योतमानात्मकस्य यज्ञस्यैषणेषु गमनेषु वा निमित्त
भूतेषु युंजते अश्वान् अश्वान् योजयंति। तथा युक्ते रथे वां युष्मान् तत्र विशिष्यते॥ दिविष्टिषु दिवो गमनेषु भं

रालंबाकाशगमनेषु अध्वस्मानः रथस्य तदाश्रितस्य वध्वंसमकुर्वाणाः। किंच हे अश्विनौ वां युवयोः बंधुरे बंधुर
त्रयसंयुक्ते युगबंधनाधारः काष्ठविशेषो बंधुरं। तादृशत्रययुक्तत्वं। रथो यो वां त्रिबंधुर इत्यादिषु प्रसिद्धं।। हि
रण्यये हिरण्मये रथे अधितादृशस्य रथस्योपरि स्थानेन स्थापयामास। छंदसो लङ्। बहुलं छंदसीत्युभ
तः। आद्युदात्तश्छंदसः। ईदृशौ युवां पथे वस्रूपथे वमार्गेण निरालंबने आकाशे रजः रंजनात्मकं स्वर्गं प्रतियं
तागच्छंतौ लोकाः रजांस्युच्यंते इत्युक्तत्वात् अनु शासता अनुकूलान् शत्रून् अनुशासतौ विधेयीकुर्वंतौ शासेः शत
रि जक्षित्यादय इत्यभ्यस्तत्वात् अभ्यस्तानामादिरित्याद्युदात्तत्वं। किंच अंजसा मुख्यत्वेन प्रकृष्टं रजः उदकं वृष्टि
लक्षणं शासता शासंतौ वशे विधेयीकुर्वंतौ।। ।।अथ पंचमी।। शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतं।। मा
वां रातिरुपदसत्कदाचनास्मद्रातिः कदाचन।।५।। ।।हे शचीवसू शचीति कर्मनाम अस्मदनुष्ठितज्योतिष्टोमा
दिकर्मधनौ शचीभिः अस्मदीयैः कर्मभिर्यागादिभिर्निमित्तभूतैः दिवा नक्तं अहनि रात्रौ च दशस्यतं। अस्मि

नयः अस्मदीयानि कर्माणि उपयंतु तेषां समीपं प्राप्नुवंति।। ।।अथ द्वितीया।। ।।यद्द्यान्मित्रावरुणा ऋतादध्याददाथे
अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना।। युवोरित्थाधि सद्मस्वपश्याम हिरण्ययं।। धीभिश्चन मनसा स्वेभिरक्षभिः सो
मस्य स्वेभिरक्षभिः।। ।।यद्यद्यान्मित्रावरुणा इति।। हे मित्रावरुणौ ऋतात् आदित्यात् तत् उदकं यद्यस्मात् कारणात् अधि
अधिकं आददाथे सर्वतो ददतः ईदृशं उदकं अनृतेन नश्वरं शोषणस्वभावं केवनसाधनेन स्वेन मन्युना स्वकीयेन तेज
सा अहोरात्राभिमानिदेवौ। मित्रावरुणौ खलु सृष्टिं मोचयतः। अहोरात्रे इत्यादिश्रुतिः पूर्वमेवोदाहृता। मन्युर्दीप्यते।
दक्षस्य समर्थस्य स्वेन मन्युना आत्मभूतेन मननीयेन सामर्थ्येन। किंच हे मित्रावरुणौ युवोः अंत्यलोपश्छांदसः। युव
योः संबंधिनि हिरण्मयं रूपं ऋत्व्यवास्त्व्येत्यादौ मयटो मकारलोपो निपात्यते। इत्था इत्थं वक्ष्यमाणेन प्रकारेण सद्मसु यज्ञ
सदनेषु अपश्याम पश्येम। केन साधनेनेति तदुच्यते। धीभिः खलु हृद्यैः कर्मभिः यज्ञादिरूपैः मनसा च नत्वदासचेतन
चेतसा च स्वेभिरक्षभिः आत्मीयैरन्यैश्चक्षुरादीन्द्रियैः। किंच सोमस्य सोमैः स्वेभिरक्षभिः अस्मदीयैरिंद्रियैः मनसा

द्वि॰भा॰

॥९१॥

मान आगहि सुमृळीको न आगहि॥ ॥वृषन्निंद्र वृषपाणास इंदव इति॥ हे इंद्र वृषन् वर्षितः कामानां इमे पुरतो
दृश्यमाना इंदवः सोमाः सुताः। त्वदर्थमभिषुताः कीदृशास्ते वृषपानासः अभिमतवर्षकेण त्वया पातव्याः अ
द्रिसुतासः अद्रिभिर्दृढैः पाषाणैः अभिषवसाधनैः सुताः उद्भिदः वर्षस्य तत एव पुनर्विशेष्यते॥ उद्भिदः वृ
त्रस्योद्भेदकाः उद्भिन्ना वा पवनादौ तादृशाः सोमाः तुभ्यं सुतासः त्वदर्थमेवाभिषुताः किंच ते तादृशाः सोमाः त्वा
त्वां मंदंतु। कुत्रेति तदुच्यते॥ दावने दाने दानवति यागे अभिमतदानाय वा तथा महे महते। चित्राय चायमानाय
विचित्राय नानाविधाय वा राधसे धनाय। किंच हे गिर्वाहः गिरां स्तुतीनां अस्मदीयानां वोढः वहितृप्यः इत्थं स्तू
स्तवमानः सन्। आगहि आगच्छ नोस्मान् सुमृळीकः सुष्टु मृडयिता सन् आगहि आगच्छ। इत्यादस्य षष्ठे ह
नि प्रातःसवने नेष्टुः प्रस्थितयाज्यायाः पुरस्तादोषूणो अग्न इत्येषा च पत्नीया एकीकृत्योभाभ्यां यागः षष्ठस्येति
खंडे सूत्रितं॥ ओषूणो अग्ने शृणुहि त्वमीळितो होतारमिति॥ तस्मिन्नेव प्रउगशस्त्रे द्वितीयाः सूत्रितं च

श्रीः

अस्त्रश्रौषष्ठोषूणो अग्न इति॥ ॥सैषा सप्तमी॥ ओषूणो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि यज्ञियेभ्यो रा
जभ्यो यज्ञियेभ्यः। यं ह त्यामंगिरोभ्यो धेनुं देवा अदत्तन॥ वि तां दुह्रे अर्यमा कर्तरी सचां एष तां वेद मे सचा॥ ॥
ओषूण इति॥ हे अग्ने त्वं नोस्मदीयमावाहनं स्तुतिर्वा ईळितः अस्माभिः स्तुतः सन् नु सु शृणुहि नु इति निपात
द्वयसमुदायात्मक एको निपातः। आभिमुख्येनैव सुष्टु शृणु उतश्च प्रत्ययाच्छंदसि वा वचनमिति हेर्लुग्भावः॥ श्रु
त्वा च देवेभ्यो देवनशीलेभ्यः यज्ञार्हेभ्यः हविर्भाग्भ्यः स्तुतिभाग्भ्यश्चेति। यतु त्विङ्ग्याभिस्यर्थः॥ तेभ्यः यज्ञिये
भ्यो यज्ञार्हेभ्यो यजमानेभ्यः संबंधिकर्म ब्रवसि ब्रूहि। ब्रवीते लेट्यडागमः। कीदृशेभ्यो राजभ्यो राजमानेभ्यः।
। इदानीं देवाः प्रत्यक्षेणोच्यंते। ॥अत्रेतिहासमाहुः॥ अंगिरसो नामक महर्षयः पूर्वं यज्ञार्थं देवान् स्तुत्वा प्री
णयित्वा गा अयाचंत। ते प्रीताः कामदुघां प्रादुः तं लब्ध्वा च तां धेनुं क्षीरं दुदोग्धुं अशक्नुवानाः अर्यमणं देवं
प्रार्थयंतः सच प्रार्थितोग्निहोत्राद्यर्थं क्षीरं दुदोहेति तदिदमत्रोच्यते॥ यत् त्यां ह त्यां तां प्रसिद्धां धेनुं क्षीरादिना

प्रीणयित्रीं गां हे देवा अंगिरोभ्यः तदर्थं अदत्तन। दत्तवंतः। स्थन पून स्तन थनाश्चेति तनादेशः। तां धेनुं अर्यमा स
र्वस्य नियंता देवः कर्त्तरी सर्वस्योत्पादकेन त्वष्ट्रा सह वा इतरदेवेभ्यः सार्धं वि दुहे विविधं दुग्धवान्। दुहेर्लिटि बहु
लं छंदसीति रुट्। छंदसि चेति वचनात् द्विर्वचनाभावः।। लङेर्ववा लोपस्त इति तलोपः।। एषः एष वार्यमा तां धे
नुं मे सचा मत्समवाये वेद जानाति अर्यमा अहमपि जानामीत्यर्थः।। ईदृशी धेनुस्तदर्थमेव दुह्यत इत्यग्नेः स्तु
तिः।। मो षु वो अस्मदिति प्रस्थितयाज्या सूत्रितेच। मो षु वो अस्मदभि तानि पौंस्यो शृणो अग्न इति। ।।सैषा षष्ठी।।
मो षु वो अस्मदभि तानि पौंस्या सना भूवन्द्युम्नानि मोत जारिषुरस्मत्पुरोत जारिषुः। यद्वश्चित्रं युगेयुगे नव्यं घोषाद
मर्त्यं।। अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरं।। ।।मो षु वो अस्मदभि तानि पौंस्या इति।। हे मरुतः वो यु
ष्मसंबंधीनि तानि प्रसिद्धानि पौंस्या पौंस्यानि बलानि सना सनातनानि नित्यानि द्युम्नानि प्रकाशयुक्तानि। यद्वा स
नासे भजनीयानि द्युम्नानि धनवंति यशोवंति वा मत्त मथउ यो लुप्यते मा इति निपातद्वयसमुदायः उ शब्दो वधार

तं ददेथां दाश्रृ दाने इत्यस्येदं छांदसं रूपं यद्वा ददःस्पातिर्दानार्थः वृं ज्वादिषु द्रष्टव्यः।। वायुवयोः रातिं दानं दाश्वनसर्व
दा यागकाले अयागकालेपि मोदसत। मो पक्षीणमभूत्। दसु उपक्षये। लुङि पुषादिद्युतादीति च्लेरङ्। न केवलं
युष्मदीयं अपि तु अस्माकमपि रातिर्दानं हविरादि प्रधानं सर्वविषयं दानं चार्थिभ्यः दाश्वन सर्वावस्था अपि मो
पवसत्।। मो पक्षीण मभूत्।। सर्वदा वर्द्धितां।। अहमपि सर्वदायुष्मानुद्दिश्य दद्यां युवामपि मदभिमतं सर्वदा
दत्तमित्यर्थः।। ।।इति द्वितीयस्य द्वितीये तृतीयो वर्गः।। ।।षष्ठस्य षष्ठेहनि प्रउगशस्त्रस्येंद्रत्रृचे तृतीया वृषन्निं
द्र वृषपाणास इंदवः सुतु मायाहमद्रिभिरिति। तत्रैव सवने प्रस्थितयाज्यानां पुरस्तादन्याः ऋचः प्रक्षिप्योपया
भिर्यष्टव्यं तत्र होतुः प्रस्थितयाज्यायाः पुरस्तात् एष प्रक्षेपणीया सूत्रितं च षष्ठस्य प्रातःसवने प्रस्थितयाज्या
नां पुरस्तादन्याः ऋचोभाभ्यामनवानं ततो यजतीति।। ।।सैषा सूक्ते षष्ठी।। ।।वृषन्निंद्र वृषपाणास इंदव
इमे सुता अद्रिसुतास उद्भिदस्तुभ्यं सुतास उद्भिदः।। तेत्वा मंदंतु दावने महे चित्राय राधसे।। गीर्भिर्गिर्वाहस्तव

न्न एतन्नामकमहर्षिः सच पूर्वः पूरकः सर्वस्य पुरतो नावा अंगिराः अंगारः तद्वत्तेजस्वी इत्यर्थः। यद्वा अंगारा एवांगि
रसोभवन्। येंगारा आसंस्तेंगिरसोभवन्निति श्रुतेः॥ अंगिरा अंगारा अंकना अंचना इति निरुक्तं॥ एतन्नामा महर्षि
श्च प्रियमेधः मेधाप्रियः प्रियमेधः प्रिया अस्य मेधा इति यास्कः॥ स च कण्वः मेधावी स च अत्रिः दुःखत्रयरहि
तः अत्रिर्नत्रय इति निरुक्तं। मनुर्मननवान्। एतन्नामा महर्षिः एते सर्वे महात्मानो महर्षयः मे जनुषं दिवोदासपुत्र
स्य परुच्छेपस्य जन्म विदुः जानंति। वेत्तेर्विदो लटो वा ति झेरुसादेशः। किं च ते पूर्वोक्ताः सर्वे सर्वकालीनाः मे अस्मत्पि
त्रादीन् जानंत इत्यर्थः॥ मनुः मनवः तानवंतः यतस्ते पूर्वमनवश्च अतो विदुरित्यर्थः। तिभावः॥ सुपां सुलुगि
ति सुपो लुक्। तेषां दध्यङादीनां देवेषु इतरेषु देवनशीलेषु महर्षिमध्ये आयतिः दीर्घकालसंबंधोस्ति अ
तो विदुरित्यर्थः॥ ततश्च किमित्यत आह॥ अस्माकं नाभयः जीवेन सह संबंधवंतः प्राणाः फलेन संबधाया
गावः तेषु तेष्वेव वर्त्तंते॥ विशिष्टजन्म अतो वयं योग्या इति ते वत्कयत्नेन तदधीनत्वं तेषां दध्यङादीनां पदेन

आस्पदेन महत्त्वेन निमित्तेन गिरा श्रुतिरूपया वाचा युक्तः सन् नतमे आभिमुख्येन नमे स्तौमि नमामि चेत्य
र्थः॥ नमेर्व्यत्ययेनात्मनेपदं। यद्वा कर्मकर्त्तरि नदुहः स्नुनमामिति यक् प्रतिषेधः स्वयमेव नतोस्मि॥ ॥अ
थ दशमी॥ ॥होता यक्षद्वनिनो वंत वार्यं बृहस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः॥ जगृभ्मा दू
रआदिशं श्लोकमद्रेरध त्मना॥ अधारयदररिंदानि सुक्रतुः पुरू सद्मानि सुक्रतुः॥ ॥होता यक्षदिति॥
अयं होता देव्योग्निर्मानुषो वा देवानस्माकं होता यक्षत्। याज्यो अयजतु॥ यजेर्लेट्यडागमः॥ सिब्बहुलं लेटीति
सिप्। वनिनो वननवंतः हविः कामयमाना वा देवा वयं वरणीयं सोममवंतं संभजतां वनतेः छांदसे लङि व्यत्यये
नात्मनेपदं। बहुलं छंदसीति शपो लुक्। छांदसो यं लोपः। तदर्थं बृहस्पतिः बृहतो मंत्रस्य हविषो वा
पालकः अध्युः देव्यो बृहस्पतिर्वा स्वयमेव यजति यागे करोति कीदृशः सवेनः केन साधनेनेति तदुच्यते
उक्षभिः सेचकैः सोमैः पुरुवारेभिः बहुभिर्वरणीयैः। तथा उक्षभिः सेचनसमर्थैः उदकैः तन्निमि

तभूतै रीर्यमाणै राङ्गिराभिरादित्यद्वारा दृष्णुसन्नैर्वयं यजमानाः दूरे आदित्यं दूरदेशे आदिगादेवनीयः तादृश
हस्तदंतास्मत्तम्या अलुक्। अद्रैजालावेद्वचनं। अभिषवसाधनस्य ग्राव्णः श्लोकं वा बंधनं जगृभ्मा गृण्ही
मः। ओताभ्यामीपूजार्थबहुवचनं॥ इदानीं परोक्षकृतः सक्रतुः शोभनकर्मा अयं यजमानः अध अथ या
गसंपूर्त्यनंतरं अरातिंदानि उदकानामेतत् अरातिं दानि ध्वस्मिस्मन्वादिति तन्नामसु पाठात्॥ वृश्चि लक्षणात्
दकानि त्मना आत्मना अधारयत। अरातिर्दाता नास्ति॥ अन्यो रातिरस्य पिपासोपशमनस्य तादृशी पिपासोपश
मनं ददातीत्यरातिंदानि। यद्वा अरातिरिति तच्छे तच्छगमनं औणादिको अरिप्रत्ययः। अतो नुपसर्गे कः पृषोदरत्वा
दभिमतरूपस्वरसिद्धिः॥ तद्ददातीत्यरातिंदान्युदकानि चेष्टप्रदानीत्यर्थः॥ आपोमयः प्राण इति श्रुतेः। यद्वा
रातिदानं न विद्यते तादृशानि तरभूते तदरातिं तद्ददतीत्यरातिंदानि अन्यैरदेयैर्लोकेपकारिभोगं ददतीत्यर्थः
तादृशान्युदकानि भोगेनो सादितवानित्यर्थः॥ किंच सक्रतुः शोभनकर्मायं पुरु पुरूणि बहूनि सद्मानि सद

णि अस्मदस्मान् मोषभिभुवन् सकृदुमेवाभिभवन्। यद्वा अस्मत्तो पगतानि माभूवन्॥ उत अपि चास्मत्पुरा पुराणि
लक्षणया तत्रस्थाः प्राणिनो मा जारिषुः जीर्णा नष्टा माभूवन्॥ किंच हे योयुष्मत्संबंधि चित्रं चापनीयं नानावि
धं नव्यं नूतनं स्तोतव्यं वा अमर्त्यं अमरणधर्मकं मर्त्येषु दुर्लभं वा यदस्ति घोषात् घोषाः व्यत्ययेन पंचमी इत्युपेता
गवादयः घोषोपलक्षिता ग्रामनगरादयो वा ये संति तत्सर्वं युगे युगे इत्युपलक्षिते तत्काले अस्मास्व अस्मास्वेव
भवत्विति शेषः॥ नान्यस्य॥ किंच हे मरुतः यच्च दुस्तरं दुःखेन तरणीयं संपादनीयं धनं दिधृत धारयत॥ तद
स्मासु। किंच दुस्तरं शत्रुभिरहिंसितं तत् सर्वमशेषेण स्मासु स्थापयत॥ एतस्य षष्ठेहनि अछावाकस्य प्रास्थि
तयाज्यायाः पुरस्तात् दध्यङ् हमे इत्येषा सूत्रितं च दध्यङ् हमे जनुषं पूर्वो अंगिरा एतमेव माध्यंदिन इति॥ ॥सैषान
वमी॥ ॥दध्यङ् हमे जनुषं पूर्वो अंगिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः॥ तेषां देवेष्वायति
रस्माकं तेषु नाभयः॥ तेषां पदेन मह्यानमे गिरेंद्राग्नी आ नमे गिरा॥ ॥दध्यङ् हम इति॥ दध्यङ् अथर्वणो स

स्तिस्त्र एव तथा। पि महिना महत्त्वेन स्वस्वविभूत्या त्रयस्त्रिंशत्संख्याका भवंति॥ तत्तत्स्थाना अन्यास्त्वद्विभूत
यः हस्वत्वात् महिना देवास इये ते सर्वत्र संबध्यते। हे देवासः मिलित्वोक्तसंख्याका देवाः इमम् अस्मदीयं यज्ञं जु
षध्वं। तत्त्वं बोधि हविर्भिः सेविताः प्रीणयध्वं एकं च दश च एकादश प्रागेकादशभ्य इति निपातनाद्दीर्घ संख्येति
पूर्वपदप्रकृतिस्वरत्वं॥ ॥इति द्वितीयस्य द्वितीये चतुर्थो वर्गः॥ ॥इत्याद्यमंडले विंशोनुवाकः॥ एकविंशोनु
वाके सप्त सूक्तानि तत्र वेदिषद इति प्रथमं सूक्तं त्रयोदशर्चं उचथ्यपुत्रस्य दीर्घतमस आर्षम् आग्नेयं अंत्ये त्रि
ष्टुभौ। शिष्टास्त्रिष्टुबंतं परिभाषया जगत्यः दशमी त्रिष्टुब् जगती वा। अत्र परिभाषा निवृत्ता॥ अत्रानुक्रम
णिका॥ वेदिषदे सप्तोना दीर्घतमा उचथ्यः आग्नेयं तु ह त्रिष्टुबंतं तु त्रिष्टुब् दशमी वेति प्रातरनुवाकस्याग्नेये
क्रतौ जागते छंदसि इदमादीनि तृतीयवर्जितानि षट्सूक्तानि विनियुक्तानि तथाश्विनशस्त्रे षण्णां तृतीय
वर्जितानां सूक्तानां विनियोगः सूत्रितं च। वेदिषद इति षण्णां तृतीयमुद्धरेदिति॥ ॥तत्रेयं प्रथमा॥ वेदि

षदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये। वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं
तमोहनं॥ अग्नि॥ हे अध्वर्यो वेदिषदे वेद्यां सीदते निषण्णाय प्रियधामाय प्रियधाम्ने प्रियस्थानाय उत्तरवेदिलक्ष
णप्रियाय सुद्युते शोभनद्योतनाय अग्नये अंगादिना गुणविशिष्टाय योनिं स्थानं वेद्याख्यं धासिमिव हविरू
प मन्नमिव प्र भर प्रहर प्रकर्षेण संपादयेत्यर्थः॥ तच्च स्थानं वस्त्रेणेव तेन यथा मार्दवाय स्तृणाति तद्वत्
मन्मना मननीयेन संभारेण बर्हिषा वा वेदिस्थानं वासय। आच्छादय। वीदरं तत्स्थानमिति तदुच्यते॥ शुचिं शु
एवन प्रोक्षणादिना अमेध्यासक्त्यादीनामपगतत्वाच्छुद्धं। ज्योतीरथं ज्योतिषः एव आज्यादेरग्नेर्वा रथस्थानीये
आधारभूतत्वात्। शुक्रवर्णं अग्नेरुपेतत्वाद्दीप्तवर्णं अत एव तमोहनं। तमसोंधकारस्य हंतारं। अज्ञानस्य वा अ
ग्निसाध्ययज्ञादिद्वारा ज्ञानविचारकृत्वादिति भावः॥ यद्वा तस्यायोनेः स्थाने वस्त्रेणेव यथा गोपनीयं वस्तु गोपय
ति तद्वत् तमग्निं वासय निवासे स्थापय मन्मना मननीयेन हृद्येन वस्तुसदृशेन मृदुकुशादिमात्राच्छादय वा॥

द्वि·भा
॥१२६॥

कीदृशं ज्योतीरथं दीप्तिरथोपेतं नुः षं पूर्ववत्॥ ॥अथ द्वितीया॥ अभिजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे
जग्धमी पुनः॥ अन्यस्यासा जिह्वया जेन्यो वृषा न्यान्येन वनिनो मृष्ट वारणः॥ ॥अभिजन्मा त्रिवृदन्नमिति॥
द्विजन्मा द्वाभ्यामरणीभ्यां जायमानः यद्वा मथनेनाधानसंस्कारेण चोत्पन्नत्वाद्द्विजन्मत्वं। अन्येभ्यो दृश्यत इति
मानिनं। अयमग्निस्त्रिवृदन्नं आज्यपुरोडाशसोमरूपेण त्रिःप्रकारमन्नं अदनीयं आभि ऋज्यते प्राप्नोति अ
भितः आ मुख्येन नयति भक्षयति ऋज गतिस्थानार्जनोपार्जनेषु व्यसयेनञ्चयन्। यद्वा ऋज्यते मृज्यते त्रस्नो पा
के पक्वं करोति वा। किंच इंद्र इंद्रं ऊमि त्रसां हितिति कोमलो पश्चांदसः जग्धं भक्षितं॥ संवत्सरे पूर्णे पुनर्वावृधे अ
ग्निं वर्धयति जीर्णस्य पुनर्वृद्ध्यभावात् यजमानं हविर्वृद्ध्या प्रतिसंवत्सरं यागसमर्थं करोतीत्यर्थः॥ यद्वा एकवारं
भक्षितं हविः पुनः संवत्सरे पूर्णे संवत्सरउदरस्थं वर्धयति भक्षयितारं। किंचायमग्निर्वृषा वर्षकः सन् अन्य
स्य हविः आसा आस्येन जिह्वया जेन्यः प्रभूतो भवतीति शेषः॥ यद्वा वर्षितासन् एकेन रूपेण अन्यस्य यज्ञे ते

श्रीः
॥१२६॥

नानि मुखनिवासयोग्यानि गृहाणि अधारयत्। यद्वा बृहस्पतिः ऋतुश्चायमध्वर्युः अरविंदानि युक्तलक्षणानि
अभिषवसाधनानि उदकानि अधारयन्। धारितवान्॥ तथा ऋतुः सोमनप्रत्तः पुरुस्पृहाणि सदनानि हविरा
सादनस्थानान्यधारयत्॥ दशरात्रे षष्ठेहनि प्रउगशस्त्रे वैश्वदेवतृचस्य द्वितीया ये देवास इत्येषा सूत्रितं च॥
ये देवासो दिव्येकादशस्थेयमदद्द्रुभसमिति॥ ॥सैषैकादशी॥ ॥ये देवासो दिव्येकादश स्थ पृथिव्यामध्येका
दश स्थ॥ अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वं॥४॥ ॥ये देवास इति॥ हे देवासो देवाः द्योत
नशीला यूयं दिवि द्युलोके एकादशस्थ एकं च दश च ये तत्संख्याका भवथ तथा पृथिव्यामधि उपरि एकादशस्थ
तत्संख्याका भवथ॥ किंच अप्सुक्षितः तद्धेतुत्वात्त्वाच्छन्दं। अप्स्वंतरिक्षे क्षियंति निवसंतीत्यप्सुक्षितः॥ क्षियतेः
क्विप्॥ तत्पुरुषे कृतीत्यलुक्॥ अंतरिक्षवासिनो देवाः एकादशस्थ एतत्संख्याका भवथ। यद्वा अंतरिक्षस्येयं सं
ज्ञा। आपः पृथिवी इयं अंतरिक्षनामसु पाठात्। यद्यपि तिस्र एव देवता इत्युक्तत्वात्स्याद्यभिमानिन्यो देवता

द्वि॰भा॰
॥९७॥

चूर्णादिना कृपयं गोपनीयं पितुः पालकस्य यजमानस्य वर्धनं वर्धयितारं उक्तप्रकारैर्लौ किकालौकिकसाधा
रणधर्मैरुपेतं। शिशुमग्निं मातरावुत्पादयत इत्यर्थः॥ ॥ अथ चतुर्थी॥ ॥ मुमुक्ष्वो३ मनवे मानवस्यते रघु
द्रुवः कृष्णसीतास ऊँ जुवः॥ असमना अजिरासो रघुष्यदो वातजूता उपयुज्यंत आशवः॥ ॥ मुमुक्ष्वो३ मन
वे मानवस्यत इति॥ मनव्यै वे मनव्यते मानवस्यते मनवान् ऋत्विजः कामार्थं इच्छते यजमानाय तदर्थं मध्वदीप्ति
भिरग्नेर्ज्वाला उपयुज्यते। यज्ञेषु रक्षस्याग्नेयत्वादौचित्याज्ज्वाला इति गम्यते॥ कीदृशास्ताः मुमुक्ष्वः आहुति
द्रव्याय यजमानं मोक्तुमिच्छंत्यः ब्रह्मलोकं प्रापयंत्यः जसादिषु छंदसि वा वचनमिति भावः॥ ज्वालानामाहुति द्रव्य
ब्रह्मलोकप्राप्तिसाधनत्वं कालीकरालीरूपकस्य श्रूयते एतेषु परीयभ्राजमानेषु यथाकालं चाहुतयो ह्याददा
यन् तन्नयंत्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोधिवास इति॥ रघुद्रुवः क्षिप्रंगच्छंत्यः कृष्णसीतासः कृष्ण
मार्गाः ऊकारः समुच्चयार्थः जुवः जवनशीलाः शीघ्रकारिण्यः व्यत्ययेनैवं वचनं॥ यद्वा असमानाः चित्रवर्णाः

श्रीः
॥९७॥

चित्रवर्णत्वं च तत्रैव श्रूयते॥ काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा स्फुलिंगिनी विश्वरुची च दे
वी लेलायमाना इति सप्त जिह्वा इति॥ अजिरासः गमनशीलाः रघुष्यदः शीघ्रस्यंदमानाः ~~[illegible]~~
वातजूता वातप्रेरिताः तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥ आशवः व्यापनशीलाः॥ ॥ अथ पंचमी॥ आ
दस्य ते ध्वसयंतो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः॥ यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्स्तनयन्नेति ना
नदत्॥५॥ ॥आदस्य ते ध्वसयंत इति॥ आदनंतरं अस्य स्तूयमानस्याग्नेः प्रेतासिद्धापि विस्फुलिंगाः वृथा
सहैवरेरते सर्वतो छेदति॥ कीदृशास्ते ध्वसयंतः। तथा कृष्णवर्णं अभ्वं महांतं अभिभवद्गमनमार्गं महिम हत्
वर्पः रूपं प्रकाशं करिक्रतः अत्यर्थं कुर्वंतः॥ कस्मिन्काल इति तदुच्यते॥ यद्यदा महीं महतीं अवनिं भूमिं सर्व
तो मर्मृशत्। पुनःपुनः परामृशत् मृशेर्यङ्लुगंतात् लङ्। अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ अभिश्वसन् सर्वतः
श्वसमानः स्तनयन् शब्दं कुर्वन् नानदत्॥ अत्यर्थं शब्दयत् पूर्ववत्प्रत्ययस्वरो॥ आभितप्रकर्षेणेति गच्छतियदा

इतस्ततो जिह्वाभिर्लेलिहानो भुगुभुगुध्वनिं कुर्वन् ज्वलति दैवं विस्फुलिंगा उद्भवं सर्थः ॥ ॥ इति द्वितीयस्य द्विती
ये पंचमो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ भूषंन योधिबभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ॥ ओजायमानस्तन्वश्च
शुंभते भीमो न शृंगा दविधाव दुर्गृभिः ॥ ॥ अथ षष्ठी ॥ भूषन्न यो अधि बभ्रूषु नम्नत इति ॥ यो अग्निर्बभ्रूषु बभ्रु
वर्णास्वोषधीषु भरणकुशलासु वा जगतो अधि अधिकं नम्नते नमति कृष्णानि प्रविशतीति नमतेर्लटि उय नुगमः
व्यत्ययेन श्ना ॥ यद्वा लटि छांदसः श्नप्रत्ययः व्यत्ययेन इकारादित्वेषाभावः ॥ भूषंन् भूतान्येव स्वतेजसा भूषयन्निव ॥ किं
चायं प्रविशन् वृषेव सेक्ता वृषभ इव पत्नीः तमेव पालयित्रीः समर्थयित्रीरोषधीः रोरुवत् ॥ रौतेर्यङ्लुगंतात् छ
तरि अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ अथ न्राद्धयन्नभ्येति ॥ आभितो गच्छति ॥ प्रथममोषधीः प्रविश्य पश्चात्सर्व
धः सन् ता एव दहतीत्यर्थः ॥ किंच एवं कृत्वा ओजायमानः ओज इति बलनाम स्वयं बलमिवाचरन् ॥ कर्तुः क्यङ्
सलोपो धूमादिभिर्विना केवलं तेजोरूप एव सन् ततश्च शुंभते व शरीरभूतां ज्वालां अपि दीपयति पोषयतीत्य

र्थः नादे जिह्वया तदुपलक्षितया शुत्वा जेन्यो प्रवृद्धो भवति तथा अन्येन दावाग्निरूपेण वारणः सर्वेषां वारकः सन् वनिनो व
न संबंधिनो वृषान् तिमृष्टेति मार्ष्टि दहतीत्यर्थः ॥ सृजेः छांदसे लिटि व्यत्ययेनात्मनेपदं ॥ ॥ अथ तृतीया ॥ कृ
ष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुं ॥ प्राचाजिह्वं ध्वसयंतं तृषुच्युतमा साच्यं कुपयं वर्धनं
पितुः ॥ ॥ कृष्णप्रुताविति ॥ अस्याग्नेः मातरावे मातरौ स्या उत्पादयित्र्यौ उभा उभे अरण्यारव्ये मातरौ वेविजे चल
तः ॥ ओविजी भयचलनयोः ॥ अस्माद्यङ्लुगंताद्व्यत्ययेनात्मनेपदमेकवचनं लोपस्त आत्मनेपदेष्विति तलोपः ॥ व
द्विलोपे विभाषेति निघाताभावः ॥ अथ तौ उपक्रमे कृष्णप्रुतौ अग्निसंपर्कात्कृष्णवर्णतां प्राप्नुवत्यो प्रापयंत्यो वा भूमिं ॥
तथा सक्षितौ समानकार्यमप्युत्पादनं गच्छंत्यौ एवंभूते मातरौ शिशुं शिशुवदुत्पत्तिसमये अल्पः अभितरेते
आभिमुख्येन प्राप्नुतश्च कीदृशं शिशुं प्राचाजिह्वं प्राग्देशस्थितजिह्वास्थानीयज्वालं ध्वसयंतं तृषुच्युतं अर
णिभ्यां क्षिप्रं निर्गच्छंतं अंकुशेन योनेः सकाशाच्छीघ्रमुत्पद्यमानं आ ईषत्साच्यं सम   वेतव्यं मृदुकाष्ठ

पियंति प्राप्नुवंति॥ अद्याप्यग्निज्वालयोरेकत्वं तथापि सहोक्तिरइतिवदौपचारिको गंतृगंतव्यभावः॥ किंच एवं प्रवृ
द्धा ज्वाला ओषधयो वा सवा अग्निना सह पित्रोः जगत्पालयित्र्योः ताभ्यां संभूय द्यावापृथिव्योरपूर्वमविद्यमा
नं तेजोमयं वर्यं रूपं कृण्वते। कुर्वंति। लोकद्वयं स्पृशंतीत्यर्थः॥ ॥अथाष्टमी॥ तमग्रुवः केशिनीः सं हि रेभिर
ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पुनः॥ तासां जरां प्रमुंचन्नेति नानददसुं परं जनयंजीवमस्तृतं॥ ॥तमग्रुवः के
शिनीः संहिरेभिर इति॥ तमग्निं अग्रुवः स्थिता यद्वा अंगुलिनामैतत्। अंगुलय इव कुटिलाः केशिनीः केश
स्थानीयोर्ध्वभाविकाष्ठोपेताः ज्वालाः संरेभिरे हि परिरंभं कुर्वंति खलु। आलिंगंति॥ किंचैवं कुर्वत्यः मम्रुषीः मृ
ताः अंगारभावमापन्नाः अपि म्रियतेः क्वसुप्रत्ययांतात् ङीपि रूपं। आयते आगते प्राय मन्त्रे पुनः पूर्ववदज
नेयः ऊर्ध्वाः प्रतस्थुः ऊर्ध्वमुखाः उन्नताः प्रतस्थिरे। मृतप्राया अपि प्रत्यवस्थानं कृतवंत्य इत्यर्थः॥ एवंभूत
वतीषु सतीषु समर्ताग्निः तासां ज्वालानां जरां वयोहानिं प्रमुंचन् प्रकर्षेण मोचयन् नानदत्। जरापरि

हारणाय मंत्रयन्निवात्यर्थं शब्दयन् केवलं जराहानिरेव। अपितु परं भिन्नति इयं असुं प्राणं अस्तृतं काष्ठोद अ
कादिप्रक्षेपणाय हिंसितं जीवं प्राणधारणे समर्थं जनयन्नुत्पादयन्नेति गच्छति॥ तासां ज्वालानां संनिधिं प्राप्नो
ति। यथा लोके कश्चन रमण्यो रमणेन सह निर्भरं क्रीडिताः पश्चात्प्रोषिते तस्मिन् विरहेण जीर्णा म्रियमाणाः
पश्चात्तस्मिन्नागते सति स्वदौर्बल्यमगणयित्वा संतोषेण परिष्वंगाय चेष्टंते स च तन्मंत्रोच्चारेण जरामपनी
योचितप्रदानेन प्रीणयन् रक्षतीत्ययं भावोत्रानुसंधेयः॥ ॥अथ नवमी॥ अधीवासं परिमात्रू रिहन्नह तु
विग्रेभिः सत्वभिर्याति विज्रयः॥ वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह॥ ॥अधीवासमिति॥
दावाग्निः स्तूयते॥ अयमग्निः मातुः भूतानां निर्मातुः भूमेः अधीवासं उपर्याच्छादनस्थानीयं तृणगुल्मौषध्या
दिकं परिपरितः रिहन् लिहन् अह इति प्रसिद्धौ। यद्वा मातुर्भूमेः अधीवासं तु परिधार्यमाणं वस्त्रं परिपरितः रि
हन् संपदेरितः रिहन् संपादयन् तुविग्रेभिः प्रभूतं शब्दयद्भिः प्रभूतगमनैर्वा सत्वभिः सहितः ज्रयः ज्रयसा ज

द्वि. भा.

॥१००॥

वेन वियातिर्विविधं गच्छति। किंच पद्वत् लेपादवले द्विपदे च तुष्पदे च वयो न्नं तत्तदुचितं तदश्वत्। किंच त्रयेनी नूयाभव
र्णा वर्त्तनिर्मार्गः विगतमनुक्रमेण सचते सेवते यत्र यत्राग्निर्गच्छति तत्र तत्र मार्गो विकृष्टो विभवति। अहेति
प्रसिद्धिः॥ ॥अथ दशमी॥ ॥अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः॥ अवास्या शिशुम
तीरदीदेर्वर्मेव युत्सु परिजर्भुराणः॥१०॥ ॥हे अग्ने अस्माकं मघवत्सु अस्मत्संबंधिषु धनवत्सु यागेषु गृहेषु वा दी
दिहि। दीप्यस्व। अध अथानंतरं श्वसीवान् ज्वालाभिः श्वसनवान् अस्मत्त्राणनवान्वा वृषभो वर्षिता। अभिमतानां
दमूनाः दांतमना वा सर्वत्र भवेतिशेषः। यत उक्तलक्षणस्त्वं संग्रामेषु वर्म कवचमिव परिजर्भुराणः अस्मद्वेष्टून् पु
नः परिहरन् यद्वा युत्सु संग्रामेषु वर्मेव परिजर्भुराणो भव। हरतेर्यङ्लुगंताच्छपि येन शानच् अभ्यस्तानामादिरित्याद्युदा
त्तत्वं। उक्तगुणकस्त्वं भव मघवत्सु यज्ञेषु दीप्यस्व॥ ॥इति द्वितीयस्य द्वितीये षष्ठो वर्गः॥ ॥अथैकादशी॥ ॥इदम
ग्ने सुधितं दुर्धितादधि प्रियादु चिन्मन्मनः प्रेयो अस्तु ते। यत्ते शुक्रं तन्वो रोचते शुचि तेनास्मभ्यं वनसे रत्नमा

श्री

॥१००॥

र्थः॥ किंच प्रवृद्धज्वालः दुर्ग्रभिः केनचिदपि गृहीतुमशक्यः सन् भीमो भयंकरो मृग इव स यथा दुर्ग्रहः सन् शृंगं
चालयति तद्वत्। अयमपि शृंगाणि शृंगवदुन्नता ज्वाला दविधाव अत्यर्थं चालयति। धुनोतेर्यङ्लुगंतात् लिटि रू
पं। अस्य च दाधर्त्यादावितिनिपातत्वेन संग्रहो द्रष्टव्यः॥ ॥अथ सप्तमी॥ स संस्तिरो विष्टिरः संगृभायति जानन्नेव जा
नतीर्नित्य आ शये। पुनर्वर्धते अपि यंति दैव्यमन्यद्वर्पः पित्रोः कृण्वते सचा॥ ॥स संस्तिरो विष्टिरः संगृभायती
ति। सोग्निः संस्तिरः अच्छन्नः संयूवा तृणातेर्मूलविभुजादित्वात्कप्रत्ययः परादिः छंदसि बहुलमिति उत्तरपदाद्यु
दात्तत्वं। तथा विष्टिरः वृद्धाभिर्विस्तीर्णः सन् संगृभायति। संगृण्हाति ओषधीः। किंच अयं जानन्नेव यजमानार्थं प्र
वृद्धेन भवितव्यं॥ अतो ज्वालाभिः संयोज्य इत्यधिगच्छन्नेव जानतीः यजमानार्थं प्रवृद्धाभिर्भवितव्यमित्यवगच्छं
तीर्ज्वालाः नित्यः अविच्छिन्नः सन् आ शये आशेते। आशेते इत्यर्थः। लोपस्त आत्मनेपदेष्विति लोपः एवंभूतं ज्वा
लाः पुनः पूर्वं प्रवृद्धा एव पुनरपि यागयोग्या यथा भवंति तथा वर्धते दैव्यं यागादिव्यवहारयोग्यं रूपं अग्निं अ

द्वि·भा·

॥१०१॥

स्वात्मकस्य पारं निरतिशयसुखास्पदं ब्रह्मलोकं प्रापयेत्॥ एष वः पुण्यः सुकृतो ब्रह्मलोक इति यागाद्यनुष्ठा
नवतां श्रूयमाणत्वादेवं प्राप्यत्वया नौः कर्मसु स्वं निरतिशयं ब्रह्म प्रापयेत्। परस्यां ते कृत्वास्मानः प्रविशंतिप
रंपदमिसुकृत्वात्। द्विरुध्रुसादनद्वारावाविदिषंति। यज्ञेन दानेनेति श्रुतेः॥ ॥अथ त्रयोदशी॥ अभीनो अ
ग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिंधवश्च स्वगूर्ताः। गव्यं यव्यं यंतो दीर्घाहेषं वरमरुण्यो वरंत॥७॥ ॥अभी
न इति। हे अग्ने नः उक्थैः शस्त्रैः अभिजुगुर्याः आभिमुख्येन स्तुहि प्रोत्साहय सम्यक् शस्त्रमियंगीकुरु। गु
र्याद्दे। गुरि उ। बहुलं छंदसीति विकरणस्य श्लुः। बहुलं छंदसीत्युत्वं तथा द्यौं यत्तो वै सुतरुर्मा नो दिस्यादिषु
श्रुतिषु नौरूपात्वेन स्तुतत्वात्। द्यावापृथिव्यौ नियतक्रत्वे यूपोदकाकर्षणकृष्यसाधनोपेतां पद्धतिं प्रस्तवनुद्या मि
ति मतुप उदात्तत्वं। द्रव्यदेवतामंत्रादिरूपपादोपेतां ईदृशीं यज्ञाख्यिकां नावं इमे ग्रोधपंडूयः पृष्टपत्रस्थाध
स्थिषु पंक्तिषु ज्ञातव्यं॥ द्यावाक्षामा द्यावापृथिव्यावपि यज्ञसाधनसंपादनेन प्रोत्साहयतां॥ तथा सिंधवः स्यंदन

श्रीः

॥१०१

शीला नद्यश्च स्वगूर्ताः स्वयमेव गामिन्यः गव्यं गोसंभवं क्षीरादिकं गवां तृणाद्युत्पादनद्वारा गव्यं उपलक्षणमेत
द्यवव्रीह्यादिजन्यं पुरोडाशादिकं यंतः प्रापयंतः प्रोत्साहयंतु तथा अरुण्यः अरुणगोवर्णगोयुक्ता। मत्वर्थउयोलु
प्यते। आरण्यसाधनभूताः उषसः तद्धेतुत्वाच्छस्त्वं। दीर्घाहा सर्वाण्यहानि सर्वकालं इषं इष्यमाणं अन्नरसादि
कं वरं वरणीयं श्रेष्ठं अन्यदपि यागसाधनं वरं तस्मा पयंतु॥ वृङ् संभक्तौ। अंतर्भावितण्यर्थश्छांदसो लङ्व्य
त्ययेन शप्॥ साधयंतु एतत्सर्वमग्नेः प्रसादादित्यग्नेरेवस्तुतित्वादाग्नेयत्वमविरुद्धं॥ ॥इति द्वितीयस्य द्विती
ये सप्तमो वर्गः॥ ॥बाळित्येति त्रयोदशर्चं तृतीयं सूक्तं दैर्घतमसं जागतं अंत्ये त्रिष्टुभौ अग्निर्देवता प्रातरनु
वाकाश्विनशस्त्रयोरुक्तो विनियोगः॥ तत्र प्रथमा॥ बाळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो
जनि॥ यदीमुपह्वरते साधते मतिर्ऋतस्य धेना अनयंत सस्रुतः॥ ॥बाळित्था। तद्वपुषे धायि दर्शतमि
ति॥ देवस्य द्योतमानस्यादित्यस्य दर्शतं सर्वैर्दर्शनीयं तत्प्रसिद्धं भर्गस्तेजः इत्था इत्थं सर्वैर्दृश्यमानप्रकारे

णावपुषे शरीरव्यवहाराय यद्दाद्यर्याय धायि धार्यते सर्वैः बळित्थे उभे अपि सत्यनामनी वट् अतसत्याद्रूपेति तन्ना
मसूपाठात्। जाठराग्निना भुक्तान्नं जरणेन शरीरधारणं प्रसिद्धं॥ लोकोपकृयदीं तेजः मतिर्मदीया बुद्धिमुप
ह्वरते॥ उपगच्छति॥ उपगम्य प्रवर्त्तते वा। धेनाः सर्वप्राणिनां वाचा सस्रुतः समानं गच्छंत्यः साहे प्रवर्त्तमानाः
स्रवतः कृत्तिरिच्छप्। अनतेयेनयति। अग्ने स्तोत्रं निर्वहंति। अग्नेस्तेजसा वा यत्तं निर्वहंति। तेजोमयी वागिति श्रु
तेः॥ अतः कारणान्मतिरूपव्हरत इत्यर्थः। धेनेति वाङ्नाम धेना ग्नाइति तन्नामसूपाठात्॥ ॥अथ द्वितीया॥
पृक्षो वपुः पितुमान्नित्य आशये द्वितीयमा सप्तशिवासु मातृषु। तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयं
त योषणः॥ ॥पृक्षो वपुः पितुमानिति॥ अयमग्निः पृक्षः अन्नसाधकः पाकादिना पुनः वपुष्मान् शरीराभिवृ
द्धिहेतुः पितुमान् हविर्लक्षणान्नयुक्तः नित्यः शाश्वतः ईदृशः सन् प्रथमं पृथिवीस्थानः सन् आशये आ
शेते दाहपाकादिलौकिकं कर्मयत्ताद्वैदिकं कर्म निवर्त्तयन् ध्रुवो भूमौ वर्त्तत इत्यर्थः॥ तथा सप्तशिवासु मातृषु स श्री
॥१०२॥

मात्वं॥ ॥इदमग्ने सुधितं दुर्धितादधिरिति॥ हे अग्ने इदमस्मदीयं सोमादिरूपं हविः कीदृशंनत्तु दुर्धितात् दुर्हस्यापि
तात् कुत्सितात्पुरोडाशादेरधि उपरि सुधितं सुहितं सुष्टुदत्तं मन्म मननीया प्रियात् प्रियादुचित् तव रूपादपि उपरि श्रेष्ठो वधा
रणेपि च्छ्रेष्ठोपि इत्यर्थः॥ तत्तव प्रेयः अतिप्रियतमम्भुते शुक्रमित्याह॥ हे अग्ने तेतव तन्वः शरीरस्य घृतेनोज्ज्वलिताया
ज्वालायाः शुचि निर्मलं शुक्रं दीप्तं यत्तेजो रोचते तेन सह रत्नं रमणीयं मणिमुक्तादिकं वित्तरत्नवनसे अस्मान् संभजस्व
वनतेर्व्यत्ययेनात्मनेपदं॥ ॥अथ द्वादशी॥ रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने। अस्माकं वीराँ उत नो म
घोनो जनांश्च या पारयाच्छर्म या च॥ ॥रथाय नावमिति॥ हे अग्ने उत अपि च रथाय रंहणाय गृहाय सर्वस्यायतनभूताय
नोऽस्माकं यजमानाय नावं संसारोत्तारिकां सोमयागादिकां नावं देवाः सिद्देहि संपादय रातिर्दानकर्मा रासतिरातीति त
न्नामसूपाठात्। सैव विशेष्यते॥ उत अपि च या नौः अस्माकं वीरान् अस्मत्संबंधिनः पुत्रादीन् मघोनः हविर्लक्षणा
न्नवतः करोति॥ जनांश्च यजमानान् अस्मान् अपि या नौः पारयात् पारयेत्। पारयतेर्लेट्याडागमः जननमरणादिबंधः

दात्॥ महतो यज्ञस्य मूलात् बुध्नात् आधानादारभ्य वर्पसः रूपनामैतत् रूपस्य त्रैरुपक्रमोपसंहारात्मकस्य सिद्धये
ईजानासः स्वकीयथापारसमर्थाः सूरयो मेधाविनः ऋत्विजः शवसा बलेन मंत्रादिरूपेण शारीशारीरेण वा निष्पन्नं तमेनि
षुवंति। साधयंति उत्पादयंति काष्ठात् यद्वा एनमग्निं बुध्नात् आदितः मथनादारभ्य महिषस्य वर्पसः महतो रूपस्य आ
कृतिस्वीकारसमर्थस्य सिद्ध्यै यो विष्णुवंति॥ करोते छंदसि लुङि। मंत्रे घसेति च्लेर्लुक्॥ व्यत्ययेनातादेशः॥ किंच यत्
ईं एनमेवाग्निं प्रादिवः पुराणात् अनादिकालमारभ्य न केवलमिदानीमित्यर्थः॥ पूर्ववदिदानीम ध्वो मधुनः मधुस
दृशस्य आथर्वे आथर्वणे प्रक्षेपनिमित्ते सति गुहासंतं गुहायां वेद्यां काष्ठेषु निगूढं संतं मातरिश्वा अंतरिक्षे वर्तमा
नो वायुः अनुक्रमेण मथायति वालयति उद्बोधयतीत्यर्थः॥ यद्वा मातरि फलस्य निर्मातरि योगे श्वसितिर्वेष्टत इति
मातरिश्वा यजमानो गुहासंतं आरण्ये निगूढं संतं प्रादुर्भावाय अनुक्रमेण मथायति माथ्नाति उत्पादयतीत्यर्थः॥
यस्मादेवं रूपस्तस्मात्तं स्तोतव्यमित्यर्थः॥ ॥अथ चतुर्थी॥ प्र यत्पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दं

क्षु रोहति॥ उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः॥ ॥प्र यत्पितुरिति॥ यद्यस्मात् पितुः अन्न
स्य पशुलक्षणस्य षष्ठीस्थाने प्रथमा॥ तस्य परमांत परमस्वाधेतोः उत्कृष्टत्वायेत्यर्थः॥ तदर्थं प्रपरिणीयते प्रकर्षे
ण परितो नीयते पर्यग्निक्रियते इत्यर्थः॥ यद्वा पितुः उत्पादकात् परमात् उत्कृष्टात् गार्हपत्यलक्षणस्याग्नेः सकाशादा
हवनीयं प्रति प्रपरिणीयते प्रकर्षेण नीयते पर्यनर्थकः॥ किंच पृक्षुधः पशुपुरोडाशादिषु दाहमध्ये धीयमानाः यद्वा अन्न
स्य संप्रसारणं क्षुध बुभुक्षायां क्विप् प्रक्षोधाः प्रकर्षेण बुभुक्षिताः भोक्तुमिष्यमाणा वीरुधः दंक्षु तेषु मध्ये आरोहति
आरोहंति प्रविशंतीत्यर्थः॥ दक्षियाप्तौ॥ दुदिश्वान्लुप्॥ आदित् अत एव कारणात् नूत्नेचिः शुक्लोयमग्निः घृणा यजमा
नेषु अनुग्रहेण। यद्वा घृणा घृणाः दीप्तिमान् मत्वर्थे लुप्यते॥ दीप्यवायविष्ठो युवतमो भवत संपन्नः स्वीकारसमर्थोऽभवदि
त्यर्थः॥ ॥अथ पंचमी॥ आदिन्मातृ राविशद्यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे॥ अनु यत्पूर्वा अरुहत्सना
जुवो निनव्यसी ष्ववरासु धावते॥ ८॥ ॥आदिन्मातृरिति॥ अयमग्निः आदित् पूर्वमातृः यविष्ठो भवदिक्षु तात॥

तदनंतरमेव मातृरूपाद्दायत्रीर्मातृस्थानीदशादिशः आ अविशत् सर्वतः प्रविशति॥ पूर्ववद्दशप्रमतिं जनयंत
पोषण इत्युक्तत्वात्तदिशांमातृत्वं दिक्षु प्रकाशेनव्याप्त इत्यर्थः॥ मातरोविशिष्यंते॥ यस्मात्मातृषु अस्यमानः परिपीड्य
मानः ऊर्वीयात ऊरु अतिप्रभूतं प्रवृद्धोभवत्॥ तास्वाविशत्। यथावृद्धिस्तेजस्वी जनन्याः स्तनपानपरिपीडयाप्रक्षी
रादिभिः सम्यक्पोषितो स महत्वं प्रकाश्य पुनरागत्य मातरमालिंगति तद्वदितिभावः॥ तस्मिन्काल इति। तत्राह। यत्तय
दासनाज्जुवः दीर्घकालंदिगिन्यः स्थापनकाल एवाक्षिप्ताः अतएवपूर्वाः प्रथमभाविनीरोषधीः अनुक्रमेणअरुहत्॥
आरोहति॥ रुहेश्छांदसो लुङ्। कृमृदृरुहिभ्यश्छंदसीति क्लेरङादेशः। उपरि प्रज्वलति तथानव्यसीषु नवतरासु अतए
व पूर्वापेक्षया निकृष्टासु पश्चाद्भाविनीष्वोषधीषु निधावति नितरांनीचैर्वागच्छति। अतः प्रविशतीत्यर्थः। यथाकाष्ठानां
अधस्तादुपरिष्टाच्च प्रविश्य ज्वलति तदा दिक्षु प्रकाशितो भवदित्यर्थः॥ ॥इति द्वितीयस्य द्वितीये ऽष्टमो वर्गः॥ ॥आ
दिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋंजते॥ देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्त्तंशंसं विश्वधा वेति धा

स्तोकृशिवंकरीषु मातृस्थानीयासु हितकरीषु वृष्टिषु द्वितीयमातृशब्दोक्ते मध्यस्थानो विद्युद्रूप आवर्त्तते॥ अस्य वृषभ
स्य वर्षितुरस्यैव विद्युतात्मनः सहायत्वेन संबंधिने दोहसे दोग्ध्रे आदित्योदकस्य वर्षयित्रे आदित्यरश्मये। दुहेः कर्त्तर्य
सुप्रत्ययः। तस्मै तृतीये तृतीयमातृशब्दोक्ते द्युस्थानो वर्त्तते। यद्वा अस्य वृषभस्य वर्षितुः प्रसिद्धस्यादित्यस्य संबंधिने दो
ग्ध्रे रश्मये तस्यार्थे आदित्यरश्मयो घर्मकाले भूमिस्थमुदकमाकृष्य सूर्यं प्रापयंति तत्र चिरकालं धृत्वा पुनरंतरि
क्षं प्राप्य मेघेषु स्थित्वा वर्षकाले प्रवर्षंतीति प्रसिद्धं॥ अतो रश्मिर्दोग्धृत्वं इदं तृतीयं त्रिस्थानमग्निं महाभागं योषिणः मिश्रशी
लाः सर्वा दिशः जनयंत उत्पादयंति। सर्वासु दिक्षु प्रसृत इत्यर्थः॥ दशसु दिक्षु प्रकृष्टमननवंतं पूज्यत्वाय यद्वा म
थनकाले दशभिरंगुलीभिरुत्पन्नं लोकत्रये दशदिक्षु व्याप्त इत्यर्थः॥ ॥अथ तृतीया॥ ॥निर्यदीं बुध्नान्महिषस्य
वर्पस ईशानासः शवसा क्रंत सूरयः॥ यदीमनु प्रदिवो मध्व आधवे गुहा संतं मातरिश्वा मथायति॥ ॥निर्यदीं बु
ध्नादिति॥ ईं एनमग्निं यद्यस्मात्कारणात् यमनमग्निं महिषस्य महन्नामैतत्। महिषा कं भुक्षा इति तन्नामसु पा

द्वि॰भा॰

॥१०५॥ सन् व्यवस्थात् विक्षिपते। सर्वतो व्याप्तो भवति॥ तत्र दृष्टांतः॥ अनाकृतः अनिवारितः अप्रतिहतप्रसरः वक्रो बहु
वरूथो वाजैरन्येभ्योऽपि दृश्यत इति वनिषु॥ दृशिग्रहणात् कुर्वन् ह्रासो न कुटिलरूपविट्पकादिरिव ह्वारः तेष्वयं तास्वचा
द्यचु स यथा जरणाः श्रुतीर्विक्षिपन्ते विविधं कुर्वन् वर्तते तद्दयमपयनाकृतः। अप्रतिबद्धप्रसरोऽव्यवस्थितः तदा तस्या
ग्नेः पत्मन् पतने मार्गेयं तद्रूपे रजो रंजनात्मकं लोकः आस्थात्। आतिष्ठति सर्वत आश्रयति। अग्नेर्बहुधा यजतीय
र्थः॥ कृष्णरूपस्य तस्य दक्षणः दहतः दहेर्लिटः क्वसुः कृष्णजंहसः कृष्णमार्गस्य पुनःपुनर्गम्यत इति जंहा मार्गः हंते
र्यङ् लुगंतात्कर्मण्यसुन्। कुत्वाभावश्छांदसः शुचिजन्मनः मंत्रसंहितारणोरुत्पन्नत्वात् व्यध्वनः विविधज्वालस्य
अतियतमायास्त्वीयैश्चक्रादिभिरंगैरीयते॥ ॥अथाष्टमी॥ आदस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथा
दीषते वयः॥ त्वया ह्यग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः। यत्सीमनु क्रतुना विश्वथा विभुररान्नेमिः
प्यातः स्थापितः सन् अरुषेभिर्गमनशीलैरंगैरभिर्ज्वालादिरूपैरवयवैर्द्यां अंतरिक्षं आज्येन हव्यं सन् ईयते गच्छतीत्यु ॥१०५॥
गतौ॥४

आदिति॥ आत् प्रवृधानंतरं अस्याग्नेः त्वे सूरयः सरणयो मार्गाः कृष्णासः कृष्णवर्णा भवंति। यत एवं भवंति तद
र्थं दक्षि दहति कृष्णान्। पुरुषव्यत्ययश्छांदसः लुपो लुक्॥ किंच ज्वालितस्याग्नेः त्वेषथात् दीप्तात्तेजसः सकाशात्
भीताः पलायमाना इव एव मंतरिक्षं स्पृशन् सर्वतो दहतीति तदा वाग्निरूपेणाभ्यूयते॥ ॥अथ नवमी॥ त्वया ह्यग्ने वरुणो
धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः॥ यत्सीमनु क्रतुना विश्वथा विभुररान्न नेमिः परिभूरजायथाः॥ ॥त्वया
ह्यग्न इति॥ हे अग्ने त्वया खलु वरुणो रात्र्यभिमानी देवो धृतव्रतः स्वीकृतवर्षणादिकर्मा भवति। तथा मित्रो ह
रभिमानी देवः शाशद्रे शातयति तमः। शद्लृ शातने। छांदसो लिट्। अजादित्वादभ्यासदीर्घः। तथार्यमा उभयोर्म
ध्यवर्ती देवः सुदानवः शोभनदानो भवति। व्यत्ययेन बहुवचनं। यद्वा एते वरुणादयः सुदानवः शोभनदानाः स्व
स्वकार्यकर्त्तारः अथापि शाशद्रे तीक्ष्णीक्रियेते। हिशब्दो मंत्रांतरप्रसिद्धिद्योतनार्थः। त्वमग्ने वरुणो जायसे यदिति
हि मंत्रांतरं। शाशदे इत्यमिति छांदसो लिट्। इरयोरे इति रेभावः। स्विवेति निघाताभावः। वरुणादीनामप्यादत्वेऽप

ऋ॰भा॰
॥१०६॥

पत्निमाह॥ यद्यस्मात्कारणात् हे अग्ने सीं सर्वतः परिभाविता सन् अनुक्रमेणाजायथाः जायसे प्रादुर्भव
सि॥ तत्र दृष्टांतः॥ अरान् रथस्य चक्रांकून् नेमिर्न बाह्यवलय इति स यथा व्याप्नोति। तद्वदयमग्निर्वरुणादीन्
व्याप्य तिष्ठति॥ ॥अथ दशमी॥ त्वमग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवतातिमिन्वसि॥ तं त्वानु नव्यं सहसो
युवन्वयं भगं न कारे महिरत्न धीमहि॥ ॥त्वमग्ने शशमानायेति॥ यजमानाय तद्यागार्थं रत्नं रमणीयं हवि
देवतातिं देवेषु तायमानं विस्तार्यमाणं इन्वसि व्याप्नोषि। अस्मत्सदत्तं हविः देवान्प्रापयसीत्यर्थः। इन्वतिर्व्या
प्तिकर्मा इन्वतीति ततनन्नक्ष इति तन्नामसूपागतः। हे सहसो युवन् युवशब्देनो सान्तिर्लक्ष्यते। मथनकालीने
त्पन्नबलस्याभिश्रयितव्या यद्वा सहसस्सुत युवन् नित्यतरुण महिरत्न अस्मत्सदेयमहद्रमणीयधन नव्यं
नवतरं स्तुत्यं वा तं तादृशं हविर्भुजं त्वां वयं यजमानाः कारे ब्राह्मे स्तोत्रलक्षणे नु क्षिप्रं धीमहि स्थापयामः ह
विःप्रदानसमये क्षिप्रमेव स्तुमः इत्यर्थः॥ तत्र दृष्टांतः॥ भगं न आदित्यमिव यद्वा महांतं राजानमिव तं यथा

श्रीः
॥१०६॥

यसे॥ ॥आदिद्धोतारमिति॥ होतारं होमनिष्पादकं आह्वातारं देवानां वार्यं इत्यग्निं दिविष्टिषु दिवसैषणेषु निमि
त्तभूतेषु वृणुते संभजते॥ तथा पपृचानासः हविषा स्तुत्या च पपृचाना यजमानाः पृचेः छांदसस्य लिटः कानच् ऋंज
ते प्रसाधयंति॥ विमिव रथमिव तं यथा जनाः प्रसाधयंति तद्वत्। यद्वा महांतं राजानमिव दीप्तसूर्यवत्सूर्वामित्यर्थः॥
ऋंजतिः प्रसाधनकर्मेति यास्कः। यत् यस्मादयमग्निः पुरुष्टुतः बहुभिर्बहुधा वा स्तूयमानः क्रत्वा क्रतुना कर्मणा या
गादिरूपेण मज्मना शरीरेण बलेन वा उक्तान् देवान् हव्यकर्तॄनृत्विजः यज्ञभुजो देवाः क्रत्वा मज्मना वयोऽभि
यितुं तथा मर्त्यं यजमानं शंसं स्तुत्यं वीतं विश्वधा विश्वनतः यद्वा विश्वरूपैर्वेति पूर्वोक्तान् कामयते। किमर्थं धायसे हवि
र्लक्षणान्नाय तस्माद्धोतारमग्निं वृणते ऋंजते च॥ ॥अथ सप्तमी॥ ॥वि यदस्थाद्यजतो वातचोदितो ह्वारो न
वक्वा जरणा अनाकृतः॥ तस्य पत्मन्दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः॥ ॥वि यदस्थादिति॥ य
त् यदायमग्निर्वनि चितः वायुना प्रेरितः तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। यजतः सर्वैर्यष्टव्यः यष्टुं योग्यः

देवेषु मध्ये प्रख्यापयेत्॥ शृणोतेर्लेट्यडागमः। कीदृशोयं स्वद्योमा स्वद्योतमानः। द्युत दीप्तौ। अन्येभ्योपि दृश्यत इ
ति मनिन्। जीराश्वः शीघ्रगमनाश्वः होता देवानामाह्वाता मंद्रः मदनशीलः चंद्ररथः। किंचायं अमूरः अमूढब
लः वस्यः कमनीयः सः प्रसिद्धोग्निर्नेषतमैः अत्यर्थं नेतृभिः कर्मभिः स्तोत्रैर्वा नोस्मान् उत नेषत्। अपि नाम नये
त्॥ यत्तस्य पारं प्राप्याय तत् नयतेर्लेट्यडागमः॥ सिब्बहुलमिति सिप्॥ किमर्थं वामं वननीयं सेवितं सुष्टु प्राप्यं सर्वैः
कांक्षणीयं स्वर्गं वा अच्छ आभिमुख्येन प्राप्तुं नेषत्॥ ॥ अथ त्रयोदशी॥ अस्ताव्यग्निः शिमीवद्भिरर्कैः साम्राज्या
य प्रतरं दधानः॥ अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः॥१९॥ ॥ अस्ताव्यग्निरिति॥ अयमग्निः
शिमीवद्भिः हविःप्रदानादिकर्मवद्भिरर्कैः अर्चनसाधनैर्मंत्रैः अस्तावि स्तुतोस्माभिर्यजमानैः शिमीति कर्मनाम
शिमी शक्मेति तन्नामसु पाठात्। कीदृशोयं कीदृशोयं साम्राज्याय साम्राज्यकर्मणि षष्ठ्यर्थे चतुर्थी सम्यग्रा
जमानत्वे प्रतरं प्रकृष्टतरं अत्यर्थं दधानः अमुंच छंदसि यमुप्रत्ययः॥ किंचेममग्निं अमी च पुरो वर्तमाना ऋ

त्विजः पुत्रादयो वा ये वयं च पूर्वं स्तोतृत्वे प्रसिद्धाः। वयमपि अति अत्यर्थं निष्टतन्युः। तन्वयतु निष्टवं स्तवो जिः त
त्कर्मा इतः परमप्यस्मत्पुत्रपौत्रादयो वयं चाग्निं स्तुमः इत्यर्थः॥ तत्र दृष्टांतः मिहं न सूरः मिहं मेहनशीलं मेघं यथा
सूरः सूर्यो हि स्वर्थं शश्वद्यति तद्वत्। लिङि छांदसो विकरणस्य श्लुः। अति निः श्रस्तं न तन्यतु सेतायामिति पत्वं॥ ॥
॥ इति द्वितीयस्य द्वितीये नवमो वर्गः॥ ॥ समिद्ध इति त्रयोदशर्चं तृतीयं सूक्तं अनुष्टुभं प्रथमयोः समिन्नामको
ग्निर्देवता समिद्धोग्निर्द्वितीयादीनां तनूनपान्नराशंस इळो बर्हिर्देवीर्द्वार उषासानक्ता दैव्या होतारौ प्रचेतसौ
तिस्रो देव्यः सरस्वती इळा भारत्यस्त्वष्टा वनस्पतिः स्वाहाकृतिरित्येताः क्रमेण देवताः अंत्याया इंद्रः तिस्रो देव्य इत्य
स्याविवरणे सरस्वती इळा भारत्य इति। अत्रानुक्रमणिका॥ समिद्ध अप्र्यो नुष्टुभमंत्येंद्रीति। अत्रेध्म तनूनपादादि
भिर्यज्ञावयवा विभिर्यक्त एवोच्यते॥ अतः सएवनेतिकृत्स्नवयस्यामतं अग्निरेव समिदादिभिरुच्यते। अतः सएव दे
वतेति शाकपूरणेर्मतं निरुक्तेकिं देवताः प्रयाजानूयाजा इति छंदो देवता ऋतु देवता इति पक्षांतरं बहुधा प्रदर्श्य

द्वि·भा·

॥१०८॥

तदर्थं ब्राह्मणानि चोदाह्रियंते। इतरे पक्षा अर्थवादाः आप्रेया वेति सिद्धांतितं। अथ कुंचदेवताः प्रयाजानूया
जाइत्यादिना पशुगणं गिरोगोत्रोसन्नानां एतदाप्रीसूक्तं॥ एवं दशप्रयाजा इति खंडे सूत्रितं। समिद्धो अद्येति
सर्वेषां यथऋषि वेत्सत्र यथऋषि विग्रहणेन आप्रीसूक्तानि च त्रिविधानि तत्र वासिष्ठ आत्रेय वाध्र्यश्वानि गार्त्स
मदानि चत्वारि नाराशंसवंति मेधातिथं दैर्घतमसं प्रैषिकाणि च नराशंसतनूनपादुभयं वेति इतराणि तनूनं
पात्वंतीति तत्रैव तत्सूक्तं दैर्घतमसत्वादुभयवत्॥ ॥तत्र प्रथमा॥ समिद्धो अग्न आवह देवाँ अद्य यतस्रुचे॥
तंतुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे॥ ॥समिद्धो अग्न इति॥ हे अग्ने समिद्धः सम्यक् दीपितः एतन्नामकस्त्वम
अद्यास्मिन् यागदिने देवान् हविषां भोक्तॄन् इंद्रादीन् आवह। अस्मद्यज्ञं प्रति प्रापयत। स्रुचेयागायोद्यतस्रुचे यज
मानाय तदर्थं आवाह्य च सुतसोमाय यागार्थमभिषुतसोमाय दाशुषे हविर्दत्तवते यद्वा पीदानीमेव हूयंते देवाः
तथा पूर्वानुष्ठानपेक्षया भाव्यपेक्षया वा दाशुष इत्युच्यते हविर्दात्रे वा यजमानाय तदर्थं पूर्व्यं पूर्वेभ्यो हितं पूर्वैर श्री: ॥१०८॥

स्तृतं वेति तत्तनु॥ ॥अथैकादशी॥ अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिं॥ रश्मीँरिव यो यमति जन्म
नी उभे देवानां शंसमृत आ च सुक्रतुः॥ ॥अस्मे रयिं न स्वर्थं दमूनसमिति॥ हे अग्ने त्वं अस्मे अस्मासु स्वर्थं सुष्ठु
रमणीयं दमूनसं दमनीयं उपार्ज्यं। दमेस्तन सिरित्यूनसि प्रत्ययः। रयिं न पपृचासि संपृणक्षि उभयमपि इदासी
यर्थः॥ पृची संपर्के लेट्याडागमः। बहुलं छंदसीति विकरणस्य श्लुः॥ इदानीं परोक्षेणाह॥ योग्निः रश्मीँरिव
स्वकीयान् रश्मीन् यथा यमति नियमति विस्तारयति॥ तद्वत्स उभे जन्मनी जननाधारभूतावुभौ लोकौ इहलोकं
यमिति। नियमति। तथा सुक्रतुः शोभनकर्माग्निः ऋते अस्मदीययज्ञे देवानां संबंधिनं शंसं स्तवं च आयमति। आयच्छ
ति। सर्वं ददाति। यद्वा पूर्वार्धे पपृचासीत्यपि परोक्षत्वाय प्रथमपुरुषतया योज्यं॥ ॥अथ द्वादशी॥ ॥उत नः सु
द्योत्मा जीराश्वो होता मंद्रः शृणवच्चंद्ररथः॥ स नो नेषंनेषतमैरमूरोग्निर्वामं सुवितं वस्यो अच्छ॥ ॥उत न इति॥
उत नः अपि च संभावनायां सोग्निः नोस्मदीयं आह्वानं उत श्रवणवत् अपि च मे शृणुयात्। यद्वा नोस्मान् श्रावयेत्।

ज्ञियः यज्ञसंपादनार्हः इदृत्वो नाराशंसः नरैः कामीत तृभिः ऋत्विग्भिः शंसनीयो ग्निः दिवो द्युलोकात् दागत्य मध्वा मधु
रेण रसेन यज्ञमस्मदीयं त्रिरामिमिक्षति त्रिवारं समंतात् संचति सस्वदयतीत्यर्थः॥ यद्वा मधुरेण पूलेन त्रिराभि
मिक्षति योजयतीत्यर्थः॥ नराशंसो यज्ञ इति वा च्छक्य पक्षे यज्ञाभिमानी देवो द्योतमानः द्युलोकात् दागत्यानुष्ठीयमा
नः यज्ञं त्रिराभिमेक्षति। अयं नराशंसो देवः। त्रिरा उपसर्ग वनुगद्योग्य क्रियाध्याहारः। त्रिवारमागच्छति। त्रिराहृत
तिवा ग्निष्टं पूर्ववन्नेयं॥ ॥अथ चतुर्थी॥ ॥ईळितो अग्न आ वहेंद्रं चित्रमिह प्रियं॥ इयं हि त्वा मतिर्मम अच्छा सुजिह्व
वच्यते॥ ईळितो अग्नेति॥ हे अग्ने ईळितः सर्वैः स्तूयः ईळानामकस्त्वं इन्द्राख्यिन पक्षे चित्रं चायनीयं प्रीणयितारमस्म
द्धविः स्वीकर्तुं वा प्रीतियुक्तमिंद्रं आवह आह्वयाय सुजिह्व घृतपानेन शोभनज्वाल इयं मम मतिर्मननसाधनस्तुति
रूपा कृत्वा त्वां अच्छ आभिमुख्येन प्राप्तुं वच्यतेउच्यते मातरेवास्मदीयोच्यते। वाचयेर्थे कि संप्रसारणाच्चेति पूर्वरूपस्य
वाच्छंदसीति विकल्पितत्वात् अभावे च यण्॥ अत्र पुरोडाशादि द्रव्याभिमानि यज्ञपरतया व्याख्येयं॥ एवमुत्तरत्रयज्ञांगे

यज्ञसंबंधिदेवताभिश्च यज्ञो देवो च्यत इति तत्परत्वेन व्याख्येयं॥ ॥ अथ पंचमी॥ ॥स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्व
ध्वरे। वृंजे देवव्यचस्तममिंद्राय शर्म सप्रथः॥ ॥स्तृणानास इति॥ स्वध्वरे शोभनप्रायणीयाद्यवांतरयागवति
यतेसोमयागे बर्हिर्दर्भान् स्तृणानासः आस्तरंतः यतस्रुचः नियमितजुह्वादिपात्राः ऋत्विजो देवव्यचस्तमं अति
शयेन देवगामिनं सप्रथः सर्वतो विस्तीर्णं शर्म सुखसाधनं गृहं इंद्राय वृंजे विवर्जयंतीत्यर्थः॥ ॥अथ षष्ठी॥ विश्र
यंतामृतावृधः प्रयै देवेभ्यो महीः॥ पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः॥ १०॥ ॥विश्रयंतामिति॥ द्वारो देवीयतस्य
द्वाराभिमानिन्यो देवताः विश्रयंतां विविधं श्रयंतु विवृता भवंतु॥ किमर्थं देवेभ्यः प्रयै प्रयातुं देवानां प्रापणाय प्रयै
सेहिषे इति निपातितः ऋतावृधः ऋता वृधः यज्ञस्य वर्धयित्र्यः महीः महत्यः पूज्याः पावकासः शोधयित्र्यः पुरुस्पृ
हः बहुस्पृहणीयाः असश्चतः असज्यमानाः परस्परं विप्रकृष्टा इत्यर्थः॥ ॥इति द्वितीयस्य द्वितीये द्वादशो वर्गः॥
अथ सप्तमी॥ आ भंदमाने उपाके नक्तोषासा सुपेशसा॥ यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत्॥ ॥आभंद

मानेति ॥ भंदमाने सर्वैः स्तूयमाने उपाके परस्परसंनिहिते सुपेशसा शोभनरूपेण पेश इति रूपनाम यह्वी म ह
त्यौ अपत्यरूपे वा प्रतिदिनं जायमानत्वात् यह्वम् इत्यपत्यनाम यह्वः सूनुः इति तन्नामसु पाठात् ॥ ऋ॰ तस्य मातरा यज्ञस्य
निर्मात्र्यौ तामागमनानुष्ठानस्य संपूर्त्यै निर्मातृत्वम् उपचर्यते ॥ यद्वा अतिरात्रादीनाम् अहोरात्रसाध्यत्वात् नक्तोषा
सा उक्तगुणविशिष्टे अहोरात्रदेवते यूयं स्वयमेव अस्माभिः प्रार्थिते इत्यर्थः ॥ यद्वा सुमहत् बर्हिरास्तृते दर्भे आस
मेतात् आसीदतां उपाविशतां ॥ यद्वा स्वमत्तस्येति कर्मणि षष्ठी ॥ यज्ञमासीदतां ॥ आसीदतां च बर्हिरास्तृते दर्भे आसमे
तात् स्वयमेव सीदतां ॥ ॥ अथाष्टमी ॥ मंद्रजिह्वा जुगुर्वणी होतारा दैव्या कवी ॥ यज्ञं नो यक्षतामिमं सिध्रमद्य
दिविस्पृशं ॥ ॥ मंद्रजिह्वा जुगुर्वणी इति ॥ मंद्रजिह्वा देवानां मादृतज्वालौ जुगुर्वणी भृशं भणतां स्तुतवती यजमानानां
संभक्तारौ ॥ यङ्लुगंतात् क्विपि छंदसीरूपसिद्धिः ॥ तस्मिन्नुपपदे वनतेः छंदसि वनसनरक्षिमथाम् इतीन्प्रत्ययः ॥
कवी मेधाविनौ क्रांतदर्शिनौ दैव्या होतारा देवसंबंधिनौ होतारौ अयं च मध्यमस्थानस्थो सुभौ सिध्रं पूर्वसाधनम्

षीनं तंतुं यज्ञं तनुष्व विस्तारय ॥ ॥ अथ द्वितीया ॥ घृतवंतमुप मासि मधुमंतं तनूनपात् ॥ यज्ञं विप्रस्य मावतः शशा
मानस्य दाशुषः ॥ ॥ घृतवंतमिति ॥ हे तनूनपात् तनूनपाद् इति कात्थक्यपक्षे तन्वो गावः भागानां तासु यजम
नत्वात् ताभ्य उत्पन्नं क्षीरं क्षीरात् सर्पिरिति आज्यस्य नप्तृत्वं तद्वान्यत्र तु अग्निपक्षे आपस्तंब उच्यते ॥ ताभ्य ओषधिव
नस्पतयस्तेभ्योऽग्निरिति नप्तृत्वं ॥ अरणीभ्यामिति भावः ॥ एतन्नामक हे अग्ने विप्रस्य मेधाविनः शशमानस्य दाशु
षो हविर्दत्तवतो मावतो मत्सदृशस्य यजमानस्य युष्मदस्मदोः छंदसि सादृश्य इति वतुप् आ सर्वनाम्न इत्यात्वं
घृतवंतं क्षीराद्याज्योपेतं माधुर्योपेतं सोमादिमधुरसद्रव्येण तद्वंतं यज्ञं उपउपेत्य मासि मिमीषे मितो भवासि वास
पूर्त्तिपर्यंतं तत्र तिष्ठसीत्यर्थः ॥ मा माने आदादिकः ॥ ॥ अथ तृतीया ॥ देवेषु मध्ये शुचिः पावको अद्भुतो मध्वा य
ज्ञं मिमिक्षति ॥ नराशंसस्त्रिरा दिवो देवो देवेषु यज्ञियः ॥ ॥ शुचिः पावक इति ॥ देवेषु मध्ये शुचिः शुद्धो दीप्तो वा पावकः
अन्यस्याः शुद्धस्य शोधयिता अद्भुतः अभूत इव आद्यमक्षणो भविता आश्चर्यभूत इत्यर्थः ॥ देवेषु द्योतनशीलः य

यद्वा पुरुवा बहु प्रभूतं च वा गृह्णत्वर्थे अरं अलं त्मना आत्मना पुरुवा डुं क्रिया विशेषणमेतत्॥ ईदृशमुदकं त्वष्टा दृष्ट्या
देः कर्ता त्वष्टा गृह्णातु यास्कः नैवं व्याख्यातः॥ त्वष्टा तूर्णमश्नुत इति त्विषेर्वा स्याद्दीप्तिकर्मणः त्वक्षतेर्वा स्यात्करोतिकर्मण इति ए
तन्नामको देवो घृतोऽग्निः अस्मयुः अस्मत्कामयमानः देवो नः पोषाया स्मसु पुष्ट्यै राये समृद्धाय यज्ञनाभानाभौ वृष्टे वेधके
मेघे मेघस्य नाभौ मध्यस्थाने वा स्थितं उक्तलक्षणमुदकं विष्यतु विविधं गमयतु॥ षोंतकर्मणि॥ नुतः श्यतीयोकारलोपः
उपसर्गात्सुनोतीति षत्वं॥ यद्वा नाभा अस्मत्संबंधियज्ञनाभौ उत्तरवेद्यां राये षष्ठ्यर्थे चतुर्थी रायो गवादिकस्य पो
षाय पुष्ट्यै स्पाति रूपसृष्टो विमोचनार्थः उक्तलक्षणं दृष्टिं मुंचतु॥ ॥अथैकादशी॥ ॥अवसृजन्नुप त्मना दे
वान्यक्षि वनस्पते॥ अग्निर्हव्या सूषूदति देवो देवेषु मेधिरः॥ ॥अवसृजन्निति॥ ॥हे वनस्पते वनानां पालक यू
पाभिमानि देव अग्ने अवसृजन् स्वैरं वर्तयन् ऋत्विजः स्वस्वकर्मसु व्यापारयन् त्मना आत्मना देवान् हविर्भुजः उप
यक्षि॥ उपेत्य यज॥ बहुलं छंदसीति शपो लुक्॥ मेधिरो मेधावान् अग्निराहवनीयः देवेषु तेषां मध्ये हव्या हवीं

षि सूषूदति॥ प्रेरयति स्वीकरोति॥ षूद क्षरणे॥ बहुलं छंदसीति शपः श्लुः॥ लेटोऽडाटाविति अडागमः॥ यद्वा यूपाग्निरेव
परोक्षेणोच्यते॥ सोऽग्निर्हवींषि सूषूदतु स्वीकरोतु॥ ॥अथ द्वादशी॥ ॥पूषण्वते मरुत्वते विश्वदेवाय वायवे॥ स्वाहा
गायत्रवेपसे हव्यमिंद्राय वर्त्तन॥ ॥पूषण्वतेति॥ अतोनुडिति नुट्॥ ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं॥ मरुत्वते म
रुद्भिस्तद्वते विश्वदेवाय सर्वदेवाय इंद्राय इंद्राय हविः प्रदातुं स्वाहाकारेण स्वाहाकारं कुरुत ऋत्विजः करोते लोटि तस्तन
प्तनथनाश्चेति नबादेशः॥ ॥अथ त्रयोदशी॥ स्वाहाकृतान्या गह्युप हव्यानि वीतये॥ इंद्रागहि श्रुधी हवं त्वां हवंते अ
ध्वरे॥ १॥ स्वाहाकृतानीति॥ हे इंद्र स्वाहाकृतानि स्वाहेत्येवं पूर्वा कृतिः करणमुच्चारणं यक्ष्यमाणदेवतानां ताः स्वाहा
कृतयः तद्वंति हव्यानि हवींषि अत्र प्रयाजेषु वषट्कार प्रदाना स्वाहाकृतं हविरित्यर्थः॥ तद्धविः उपेत्य वीतये भक्षणाय आग
हि आगच्छ॥ गमेः छंदसः शपो लुक्॥ अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः तथा हे इंद्र आगहि स्तोत्राण्यभिलक्ष्या
६५ संचाय वायवे गमनशीलाय वायुदेवाय तथा गायत्रवेपसे इति रूपनाम गायत्रसाम्ना इंद्रस्तस्मे मोपलक्षकः गायत्रं वेपः रूपं यस्यासा ५६

द्वि॰ भा॰
॥११२॥

गच्छ। आगसह हवं अस्मदीयमाह्वानं श्रुधि शृणु। यतः त्वामध्वरे अहिंसात्मके यागे हवंते आह्वयंति ऋत्विजः अतः श्रु
धि॥ श्रुयतेर्बहुलं छंदसीति संप्रसारणं॥ ॥इति द्वितीयस्य द्वितीये एकादशो वर्गः॥ ॥प्र तव्यसीमित्येकादशर्चं सूक्तं दैर्घत
मसं तथा चानुक्रांतं प्र तव्यसीमित्येकादशाग्नेयं तु त्रिष्टुबंतमिति तुरित्युक्तत्वादिदमादिसूक्तद्वयस्याग्निर्देवता। अं
त्या त्रिष्टुप्। शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥ अग्निष्टोमे आग्निमा
रुतशस्त्रे इदं सूक्तं जातवेदस्यनिविद्धानीयं। अथ यद्येतमिति खंडे सूत्रितं॥ प्र तव्यसीं नव्यसीमापो हि ष्ठेति ति
स्र इति। दशरात्रस्य प्रथमेऽहनि निविद्धानं आश्वमेधिके मध्यमेऽहनि निविद्धानं। तथा चाचार्योऽतिदेशाद्वाहीनान्युप
सृस्य तेषु निविदो दध्यादेवमेवाग्निमारुतमिति॥ ॥तत्र प्रथमा॥ ॥प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं स
हसः सूनवे भरे। अपां नपाद्यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीददृत्वियः॥ ॥प्र तव्यसीमिति॥ अहं अग्ने
नव्यसीं नवीयसीं अतिशयेन वर्धयित्रीं तवतिर्वृद्ध्यर्थः सौत्रो धातुः अस्मात्तृजंते तुश्छंदसीतीयसुन् तुरिष्ठेमेयस्स्विति

श्रीः
॥११२॥

तं। सिद्धे स्पार्हयितं वीयादिना रक्। दिविस्पृशं द्युलोकं वा स्पृशं देवान् स्पृशंतं तं हविषः स्वीक्रियमाणत्वादिति भावः। दू
द्रौ अस्मदीयमिमं यज्ञं यक्षतां पूजयेतां वा सम्यगग्निं वा हयतामित्यर्थः॥ अथ नवमी॥ ॥शुचिर्देवेष्वर्पिता होत्राम
रुत्सु भारती॥ इळा सरस्वती मही बर्हिः सीदंतु यज्ञियाः॥ ॥शुचिर्देवेष्विति॥ ॥शुचिः शुद्धा मरुत्सु विरुद्धलक्ष
णया अमरणेषु देवेषु द्योतनशीलेषु स्तोतृषु मरुत्सु ऋत्विक्षु अर्पिता नियता होत्रा होमनिष्पादका भारती भरत
स्यादित्यस्य संबंधिनी द्युस्थाना वाग् इळा पार्थिवी प्रैषादिरूपा मही महती सरस्वती सर इत्युदकनाम तद्वती स्तनि
तादिरूपा माध्यमिका वाक्। एतास्तिस्रः त्रिस्थानगवाभिमानिदेवताः यज्ञियाः यज्ञार्हाः सत्यः बर्हिस्तीर्णं सीदंतु॥ उप
विशंतु॥ तिस्र इत्यत्र तिसृभ्यो जस इति जस उदात्तत्वं॥ ॥अथ दशमी॥ तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना।
त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः॥ तन्नस्तुरीपमिति॥ नः अस्मदर्थं तत् तादृशं तुरीपं तूर्णव्यापि अद्भुतं
सद्य आविर्भवत्। अभूतमिव सत् यद्वा महन्नामैतत् सारतो महत् पुरुवारं बहूनां प्राणिनां अर्थयितव्यं अरं अलं समर्थं

द्वि॰ भा॰

॥११३॥

थवा मातरि फलस्य निर्मातरि यत्ते त्वस्तिति चेष्टत इति मातरिश्वा यजमानः तदर्थं किंच समिधानस्य इंधनैः सम्य
ग्वर्धमानस्याग्नेः मज्मना बलेन नामैतत् बलवता क्रत्वा क्रतुना कर्मणा ज्वालावालनादिव्यापारेण शोचिः द्यावापृ
थिवी द्युं च पृथिवीं च प्रारोचयत्॥ प्रकर्षेण दीपयत् मध्ये शोचिः शोचिर्वृद्धः छांदसः मज्मना क्रत्वा समिधानस्येति वायो
ज्यं। प्रबलेन समिंधनादिव्यापारेण समिंध्यमानस्येत्यर्थः॥ ॥अथ तृतीया॥ ॥अस्य त्वेषा अजरा अस्य भा
नवः सुसंदृशः सुप्रतीकस्य सुद्युतः॥ भात्वक्षसो अत्यक्तुर्न सिंधवोग्ने रेजंते अससंतो अजराः॥ ॥अस्य स्तू
यमानस्याग्नेः त्वेषा दीप्तयः अजराः जरारहिताः अजीर्णाः अविरता इत्यर्थः। नञो जरमरेत्यादिनोत्तरपदा
द्युदात्तत्वं। तथा सुप्रतीकस्य शोभनमुखस्याग्नेर्भानवो रश्मयः दीप्तिरूपत्वात् विस्फुलिंगाः अवगंतव्याः
ते च सुसंदृशः सुष्ठु सम्यक् द्रष्टारः सर्वतो व्याप्ता इत्यर्थः। सुद्युतः सुष्ठु सर्वतो द्योतमानाः तथा अस्याग्नेः
भात्वक्षसः त्वक्ष इति बलं। नाम त्वक्षः इत्यर्थ इति बलनामसु पाठात्। भासा समानबलाः। अक्तुरिति रात्रिना

श्रीः

॥११३॥

मैतत्॥ अक्तुः क्रूर्म्येति तन्नामसु पठितत्वात् तद्द्वितीयार्थे प्रथमा। अक्तुः जगदंधजनकं नैशं तमः अति अतिक्रम्य सिंधवः
स्यंदमानाः सर्वत्र व्याप्नुवंतो अससंतः स्वव्यापारेष्वस्वपंतः अत एव अजराः न रेजंते न कंपंते। तदा हापात्कादिषुन
च लेति। न चाल्यं ते चान्यैः। यद्वा नन्नु श्लो दृष्टांत वचनः भात्वक्षसः एना एव त्वक्षो बलं अस्य तादृशस्यादित्यस्य
सिंधवो नद्य इव रश्मयः इव ते यथा स्यंदनशीलाः व्याप्तिमंतः अक्तुरिति अंजकं तमः अतिक्रम्य मद्ध असंतो रेजं
ते तद्वदग्नेस्त्वेषो अग्नेरुक्तलक्षणा दीप्तयोपि सर्वत्र रेजंते कंपंते व्याप्नुवंतीत्यर्थः॥ ॥अथ चतुर्थी॥ येमे रिरे
भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना। अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति॥
॥ येमे रिरे भृगव इति। विश्ववेदसं सर्वधनं वेद इति धननाम वेदः वरिव इति तन्नामसु पाठात् तादृशं यमग्निं भृ
गवः भृगुगोत्रोत्पन्नाः पापस्य भर्जकाः पृथिव्या वेद्याः एकदेशे कृत्स्नशब्दः। यद्वा एतावती वेदिः पृथिव्या इति श्रुतेः
वेद्याः पृथिवीत्वं तस्या नाभौ उत्तरवेद्यां भुवनस्य भूतजातस्य मज्मना बलेन निमित्तेन आभिमुख्येन ईरिरे ईरित

वंतः स्थापितवंतः ईरितवंतो तमग्निं स्वे स्वकीये दमे गृहे उत्तरवेद्यां गीर्भिः स्तुतिभिः अहिनुहि प्रहिणुहि। हिगतौ वृ
द्धौ च। इतश्च प्रत्ययाच्छंदसि वा वचनमिति हेर्लुगभावः। यो ग्निः एकः मुख्यः सन् एक एव वा वस्वो वसून गवादि धनस्य
राजति ईश्वरो भवति प्रदातुमिति शेषः। राजतिरैश्वर्यकर्मा क्षिपतिराजतीति तन्नामसु पाठात्। तत्र दृष्टांतः वरु
णो न वराकः आदित्य इव स यथा सर्वस्येष्टे तद्वत्॥ ॥अथ पंचमी॥ ॥न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दि
व्या यथाशनिः। अग्निर्जंभैस्तिगितैरत्ति भर्वति योधो न शत्रून्त्स वना न्यृंजते॥ ॥न यो वराय मरुतामिव स्वनेति॥
यो ग्निर्वराय वरणाय निग्रहाय शक्तो न भवति॥ तत्रायमुच्यते मरुतां स्वन इव स यथा अवग्राह्यस्तद्वत्। ईदृक्सा
मर्थ्यमस्तीति दर्शयति। अयमग्निस्तिगितैर्निशितैस्तीक्ष्णीभूतैः अंत्यविकारश्छांदसः। जंभैः दंतैः तत्स्थानीया
भिर्ज्वालाभिः अस्मद्विरोधिनो भक्षयति तथा भर्वति हिनस्ति। भर्व हिंसायां। यास्काह। भर्वतिरत्तिकर्मा तृतीयद्वि
व्यतिर्भर्वसोरदनमेवार्थः। तथापि तद्वांतरभेदोवगंतव्यः। तत्र दृष्टांतः योधो न संप्रहर्ता शूर इव स यथा शत्रू

त्तलोपः छांदसः इकारलोपः। न्यसीनवतरां अपूर्व्यं धीतिं यागलक्षणां युक्तगुणकं कर्म प्रभरे प्रकर्षेण करोमि तथोक्तल
क्षणां वाचो मतिं श्रुतिरूपं कर्म भरे वीळ्हुहस्तायाग्नये सहसो बलस्य सूनवे पुत्राय। किंच यो ग्निरपां नपात् तासो नप्ता अद्भ्यः
ओषधयः ओषधीभ्यो ग्निरित्युत्पन्नत्वात्। अथवा अपां नपायिता वैद्युताग्निरूपेण प्रवर्षकृदिति भावः। तथा प्रियो यो
यजमानः प्रीणयिता प्रियतमो वा तस्य होता होमनिष्पादकः सो ग्निः ऋत्वियः प्राप्तकालः प्राप्तदानसमयः सन् पृथि
व्यां वेदिलक्षणायां वसुभिर्निवासयोग्यैर्गवादिसाधनैः सहितो न्यसीदत्। नितरामसीददिति॥ ॥अथ द्वितीया॥ स जा
यमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने। अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत्
॥ ॥स जायमान इति॥ स पूर्वोक्तो ग्निः जायमानः अरणीभ्यां मथ्यमानः काष्ठेषु भूत्वा प्रादुर्भूतः सन् तदानीमे
व परमे उत्कृष्टे व्योमनि विविधरक्षणवति देशे। वेदि मातरिश्वने अंतरिक्षसंचरणे वायवे प्रथममाविरभवत्
प्रत्यक्षीभूतः। तमग्ने प्रथमो मातरिश्वन आविर्भवेत्यादिश्रुत्यंतरप्रसिद्धः। वायुसंगात्प्रज्वलित इत्यर्थः। अ

त्रं न समिधान ऋंजते॥ इंधानो अक्रो विदथेषु दीद्यच्छुक्र मुदु नो यंसते धियं॥ ॥घृतप्रतीकं व इति॥ घृतप्रतीकं
घृतोपक्रमं प्रयाजादिष्वाज्यैर्हूयमानत्वात् यद्वा प्रतिपदमंगं प्राप्तज्वालमित्यर्थः। वः देवो युष्मत्संबंधिन ऋतस्य
यज्ञस्य धूर्षदं धूरिति निर्वहणे सीदंतं यज्ञनिर्वाहकमग्निं मित्रं न मित्रमिव समिधानः इद्धो दीप्यमानः ऋंजते प्र
साधयति। ऋंजतिः प्रसाधनकर्मा। एवं इंधानः सम्यक् दीप्यमानः सन् ~~अदब्धेभिरहिंसितैः~~ अक्रः ज्वालासमि
दादिभिराक्रांतः अन्यैरनाक्रांतो वा क्रमेः छांदसो डः। विदथेषु यज्ञेषु वेदयज्ञस्तोत्रेषु निमित्तभूतेषु दीद्यत् अ
यं दीप्यमानोऽस्मदीयां धियं प्रज्ञां यागादिविषयां शुक्रवर्णां शुभ्रवर्णां निर्मलां ज्योतिष्टोमादिकर्म वा उदु यंसते उ
द्योतयत्येव। यमेर्लेट्यडागमः सिप्। उशब्दोऽवधारणे। धीरिति कर्मनाम। धीः शमीति तन्नामसु पाठात्॥ ॥अथा
ष्टमी॥ अप्रयुछन्नप्रयुछद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः॥ अदब्धेभिरदृपितेभिरिष्टेनिमिषद्भिः
परिपाहि नो जाः॥१२॥ ॥अप्रयुछन्नप्रयुछद्भिरिति। अप्रयुछद्भिः अप्रमाद्यद्भिः अनवधानरहितैः शिवे

भिर्मंगलकृत्याणैः शग्मैः सुखकरैः पायुभिररहिंसितैः अदृपितेभिः केनचिदप्यपरिभूतैः इष्टपदं पूउच्छ्रेन्नेतो दृष्टिः
अनिमिषद्भिः अनिमेषरहितैः अनजस्रस्वभावैः ईदृशैर्लक्षणैर्नोऽस्मान् परितः पाहि पालय। उपयद्वा। उपर्यु
परि जायंते इति जाः अस्मत्संबंधिनीः पुत्रपौत्रादिरूपाः प्रजाः परिपाहि। परितो रक्ष। न केवलमस्मानेव किं तु अ
स्मत्पुत्रपौत्रादीनपि रक्ष॥ ॥इति द्वितीयस्य द्वितीये द्वादशो वर्गः॥ ॥ एति प्र होतेति सप्तर्चं पंचमं सूक्तं दैर्घत
मसं जागतं पूर्वत्राग्नेयं सूक्तत्वात् इदमप्याग्नेयं। तथा चानुक्रमणिका॥ एति प्र सप्त जागतं त्विति। प्रातरनुवाकाश्वि
नशस्त्रयोर्विनियोग उक्तः॥ ॥तत्र प्रथमा॥ एति प्र होता व्रतमस्य माययोर्ध्वां दधानः शुचिपेशसं धियं॥ अभि
स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते॥ ॥एति प्र होतेति॥ अयं होता होमनिष्पादकोऽध्वर्यु
रस्याग्नेर्व्रतं हविःप्रदानादिरूपं कर्म कर्तुं मायया कर्तव्यविशेषप्रज्ञया युक्तः सन् प्रैति प्रकर्षेण गच्छति होतुं माये
ति प्रज्ञानाम। मायावयुनमिति तन्नामसु पाठात्। कीदृशोऽयं ऊर्ध्वां उपर्यग्न्यूढां शुचिपेशसं शोभनरूपोपेतां पेश इति

रूपनामधेयं प्रत्तं दधानः आचतुर्थात्कर्मणोऽभिसमीक्ष्यैते हं वृरिषि द्रुत्यूक्तत्वात्। आगत्य च दक्षिणावृतः प्रादक्षि
ण्येन वर्तमानाः स्रुचः जुह्वादीः क्रमते गृह्णाति। कीदृश्यः स्रुचः याः प्रथमं पात्रासादनकाले अस्याग्नेर्धामस्थाने
निंसते चुंबते इति धातुः चुंबंति भजंत इत्यर्थः॥ प्रथममनु ष्वैः उपक्रमं बुध्या प्रैति पश्चात्स्रुचः प्रमन्त इत्यर्थः। हूत
इति प्रसिद्धौ॥ यद्वा होता देवानामाह्वाता यमग्निः अस्य यजमानस्य व्रतं कर्म ज्योतिष्टोमादि प्रज्ञाविशेषयुक्तः सन् एति य
त देवं प्रत्यागच्छति। कीदृशमिति ऊर्ध्वं ऊर्ध्ववर्तिरूपं चिपेशसं शोभनरूपोपेतं धियं ज्वालाख्यलनादिरूपं कर्म दधानो
धारयमाणः आगत्य च दक्षिणावृतः उक्तलक्षणाः स्रुचः घृतपूर्णाः जुहूपभृदादिकाः अभिक्रमते। आक्रमते। घृत
स्त्रीकर्तुं ज्वालाः प्रसर्पंतीत्यर्थः॥ याः स्रुचः प्रथमं पूर्वं हविरासादनकाले अस्याग्नेर्धामस्थानं वेदिलक्षणं निंसते
चुंबंति प्राप्ताः इत्यर्थः प्रसिद्धौ। णिसि चुंबने अदादित्वाच्छपो लुक्। इदित्वान्नुम्॥ ॥अथ द्वितीया॥ अभीमृतस्य
दोहना अनूषत योनौ देवस्य सदने परीवृताः। अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते॥

नु भर्वति भक्षयति नाशयति तद्वत् किंच सोऽग्निः वना वनानि वृक्षादिसमूहान् ऋंजते। नितरां प्रसाधयति दहतीत्य
र्थः ऋंजतिः प्रसाधनकर्मेति यास्कः॥ ॥अथ षष्ठी॥ कुविन्नो अग्निरुचथस्य वीरसद्वसुष्कुविद्वसुभिः काममावर
त्॥ चोदः कुवित्तुतुज्यात्सातये धियः शुचिप्रतीकं तमया धिया गृणे॥ ॥अयमग्निर्नोऽस्माकं उचथस्य उक्थस्य स्तो
त्रस्य कुवित् बहुवारं वीः कामयितव्या असत् भवत्। अस्तेर्लेट्याडागमः। यद्वा उचथस्य नः एतन्नामकस्य महर्षेः गो
त्रप्रभवस्य न इति संबंधः। वसुष्वसियिता सर्वेषां वसुस्थानीयो वा वसुभिर्वासयितृभिर्धनैः कामं अत्यर्थं अभिम
तं वा कुवित् अति प्रभूतं आवरत् आवृणोत्। अभिमतप्रदानेन कामं निवर्तयत्वित्यर्थः। वृणोतेर्लेट्यडागमः। छांद
सो विकरणस्य लुक्। अयमग्निः चोदः अस्माकं कर्मसु प्रेरकः सन् धियः कर्माणि सातये लाभाय बहु तुतुज्यात् त्वर
यतु करयत्वित्यर्थः। तुजिः प्रेरणार्थः शपः श्लुः। शुचिप्रतीकं शोभमानावयवं शोभनज्वालं तमग्निं अया धिया अ
नया स्तुतिरूपया प्रज्ञया गृणे उच्चारयामि स्तौमीत्यर्थः॥ ॥अथ सप्तमी॥ ॥घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मि

व्यापारः वषट्कारानंतरं होमोध्वर्योरिति विभागः। अत्रेदमनुसंधेयं। सवयसा समानवयस्कौ मिथः प्रत्येकं समानम
र्थं समानप्रयोजनं सुखप्राप्तिं वितरितृता। विप्रोषेण तरितुमिच्छंतौ। तरतेर्यङ्लुगंताच्छतरि दाधर्त्यादौ निपात्यते। द्विवच
नस्याकारः जायापती तद्वपुः तदेव परस्परं शरीरं युयूषतः मिश्रयितुमिच्छतः परस्परमालिंगतः तद्वदग्नेः सा
र्थं होत्रध्वर्यू युयुषेति आदौ अनंतरमवहव्यः आहवनीयोग्निः सारथिः सरणशीलः सारथिवद्यज्ञात्मकस्य र
थस्य निर्वाहको वा सन् अस्मत्रु अस्माकं संबंधिनो रश्मीन् रश्मिवद्दाय घृतधाराः आसर्वतः समयंस्त सम्यक्स्वी
कुरुते। तत्र दृष्टांतद्वयमुच्यते। भगोन सर्वैः सेवनीय आदित्यः स यथा सर्वतः प्रजाः मादत्ते। तद्वत्। सारथिः रथ
स्यं तावो दुर्वहकस्याश्वादेः रश्मीन् प्रग्रहान् नियमनाय यथा स्वीकरोति। तद्वदयमग्निरपि हवींषि समयंस्त॥ ॥अ
थ चतुर्थी। यमी द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा। दिवा नक्तं पलितो युवाजनि पुरू चरन्नज
रो मानुषा युगा॥ ॥यमीमिति। यं ईं एनमग्निं द्वौ सवयसा समानवयस्कौ समानसामर्थ्यौ वा समाने योना यो

नौ ईदृशौ होत्रध्वर्यू सपर्यतः पूजयतः स्तुत्या हविः प्रदानेन च प्रीणयतः वदेसह॥ दिवा नक्तं अहनि च नक्तं रात्रावपि
सर्वदेत्यर्थः॥ एवं पूज्यमानोग्निः पलितः पूर्वमंगारावस्थायां जीर्णोपि समिंधनानंतरं तरुणः युवा तेजसा सर्वस्य
मिश्रयिता वा अजनि जायते। एवं जातोयं मानुषा युगा मनुष्याः संबंधीनि युगानि जायापतिरूपाणि होत्रध्वर्यूरूपाणि
वा द्विरूपपुरु चरन् बहुलाज्यादिकं भक्षयन् अजरः अजीर्णः जरारहितो वर्तते॥ ॥अथ पंचमी॥ ॥तमीं हिन्वंति
धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे। धनोरधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित॥ ॥तमी
मिति। देवं द्योतमानं तमीं तमेनमग्निं दश धीतयः दशसंख्याका अंगुलयः व्रिशः विशः परस्परं विश्लिष्टाः हिन्वं
ति। प्रीणयंति। मथनकाले। तथा मर्तासो मनुष्या वयं यजमानाः ऊतये रक्षणाय हवामहे। आह्वयामः। कोस्यावि
शेष इति। उच्यते। अयमग्निर्धनोर्धनुषः सकाशात् प्रवतः आ प्रवर्षेण गच्छतो बाणानिव तान्यथा शत्रोरुपरि
मुंचति। आरक्षणार्थे। तद्वत् सोग्निर्धनुःस्थानीयात् निजशरीरसकाशात् प्रवतः प्रकृष्टवेगतो रश्मीन् ऋण्व

ऋ॰ भा॰
॥११८॥

तिगमयति। रिविर्गत्यर्थः। अत्रांतर्भावितण्यर्थोयं। इदित्वान्नुम्। छांदसं रेफस्य संप्रसारणं। अधिशब्दोनर्थकोन
र्थमात्रानुवादी। किंच एवं प्रवृद्धोग्निः अभिव्रजद्भिः अनुष्ठानार्थं अभितः संचरद्भिः ज्ञेयमर्थमधिगच्छद्भिर्वा तद
र्थं नवानवानि नूतनानि वयुना वयुनानि प्रज्ञानानि अनुष्ठानविषयाणि अधित धारयति ज्ञापयतीत्यर्थः। यद्वा अभि
व्रजद्भिः आभिमुख्येन गच्छद्भिः होत्रादिभिः क्रियमाणानि नवानवानि वयुनानि प्रज्ञाविशिष्टानि स्तोत्रादीनि अधि
त। धत्ते। धात्रश्छांदसे लुङि। स्थाघ्वोरिच्चेतीत्वं उत्तरस्य सिचः ह्रस्वादंगादिति सलोपः॥ ॥अथ षष्ठी॥ त्वमग्ने
दिव्यस्य राजसि त्वं पार्थिवस्य पशुपा इव त्मना। एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिराशाते॥ ॥त्वं
मग्ने दिव्यस्य राजसि त्वमिति। हे अग्ने दिव्यस्य राजसि त्वं। हे अग्ने त्वं दिव्यस्य दिवि भवस्य देवादेः विद्युदात्मना वृष्ट्यादेः
वीराजसि ईशिषे ऐश्वर्यनामैतत्। तथा पार्थिवस्य पृथिवीसंबंधिनः मनुष्यादेः राजसि ईश्वरो भवसि। किमन्यतं
त्वेनेत्याह। त्मना आत्मनैव स्वसामर्थ्येनैव तत्र दृष्टांतः पशुपा इव पशूनां पालकोयथा स्वसामर्थ्येनैव पशूनां निरो श्री
॥११८॥

अभीमृतस्येति। ऋतस्योदकस्य दोहनाः धाराः योनौ उत्पत्तिस्थाने देवस्य सदने द्योतमानस्यादित्यस्य स्थाने परी
वृताः तद्रश्मिभिः परितो व्याप्ताः सत्यः अभ्यनूषत। अभिनवा भवंति आभवत्येवस्तूयंते वा कृदेशत आर यत्तयद
अपामुपस्थे उदकानामुत्संगे अंतः विभृतः विशेषणातामभिधार्यमाणः सन् आसत् आक्रम्य निवसत्ययमग्निः
तदानीमित्यर्थः। अध अधुना स्वधाः अमृतोपमाः अधयत् पिबति सर्वैर्लोकैः नाविज्ञायंते। याभिः स ईयते।
अयमग्निः संगच्छते। गच्छतिर्वा मूर्तिं ता अधयत् विद्युदात्मना उदकानि जगत्पाययत इत्यग्नेः स्तुतिः॥ ॥अथ तृ
तीया॥ ॥युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरित्रता मिथः॥ आदीं भगो न हव्यः समस्मदा वोढुर्न रश्मी
न्समयंस्त सारथिः॥ ॥युयूषत इति। सवयसा समानवयस्कौ वयःशब्देन सामर्थ्यं लक्ष्यते समानसामर्थ्यौ त
दित्। तदानीमेव यदा प्रवृद्धो भवति तदानीमेव समानमर्थं समानप्रयोजनं निष्पादयितुं मिथः प्रत्येकं वितरित्रता भ्र
शांतरं तौ होत्रध्वर्यू वपुः अग्नेः शरीरं युयूषतः स्वस्वव्यापारेण मिश्रयितुमिच्छतः प्रैषानंतरं याज्यादिपाठो होतु

योनिवासवान्भवति।। तत्र दृष्टांतः। पितुमानिव अतिप्रभूतान्नस्वामी यथा सर्वैर्वस्त्रप्रयोगं तव्यश्च भवति तद्व
त्।। ।।इति द्वितीयस्य द्वितीये त्रयोदशो वर्गः।। ।।तं पृच्छतेति पंचर्चं पंचमं सूक्तं। अत्रानुक्रमणिका।। तं पृच्छ
त पंचोनांत्या त्रिष्टुबिति दीर्घतमा ऋषिः पूर्वत्राग्नेयं तु तदित्यादिदमप्याग्नेयं। अंत्या त्रिष्टुप् शिष्टास्त्रिष्टुबेतत्परिभाष
या जगत्यः। प्रातरनुवाकाश्विनशस्त्रयोरस्या विनियोग उक्तः।। ।।तत्र प्रथमा।। तं पृच्छता स जगामा स वेद स चि
कित्वां ईयते सा न्वीयते।। तस्मिन्संति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः।।
तं पृच्छता स जगामेति।। ।।हे यजमानाः तमग्निं पृच्छत तत्र स्वर्गादिविषये प्रष्टव्यमस्ति तस्यैव प्रष्टव्यत्वेति रायमा
ह।। स जगाम स सर्वत्र पृच्छति। अत एव स वेद स च प्रश्नं जानाति। किमितरसाधारण्येन नेत्याह।। स चिकित्वान्
सचेतनवान् विशेषज्ञ इत्यर्थः।। स एव ईयते हूयते तेयसङ्गं गच्छति। पुनर्गतिरेव विशेष्यते। सः सोऽग्निरेवनु
क्षिप्रं ईयते यजमानस्य जिगमिषितुमर्थं ज्ञातुं शीघ्रमेव गच्छतीत्यर्थः।। यद्वा ज्ञानार्थं निरीयते सेव्यते तथा शीघ्रं

अनुसेव्यते। अस्मादयमुक्तरूपः तस्मात्तमेव पृच्छतेत्यर्थः। तत्रापेक्षिताः कामाः संतीत्याह।। तस्मिन्नग्नौ प्रशिषः प्र
शासनानि प्रकृष्टमनसा मर्थ्यानि संति असाध्यमपि साधयितुं शक्ताः इत्यर्थः।। किंच तस्मिन्नेवाग्नौ इष्टयः यष्टव्याः
भोगाः सर्वफलप्रसाधकाः यागा वा संति। किंच सोऽग्निर्वाजस्य अन्नस्य शवसो बलस्य च पतिः पालयिता दाता। किंच
शुष्मिणो बलवतो राजादेरपि पतिः स्वामी यस्मादयं महानुभावः तस्मात्तमेवं पुरुषार्थं साधयति।। ।।अथ द्वि दृखा
तीया।। ।।तमित्पृच्छंति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत्।। न मृष्यते प्रथमं नापरं वचोऽस्य क्रत्वा
सचते अप्रदृपितः।। ।।तमित्पृच्छंतीति।। पूर्वमंत्रेऽग्निं पृच्छतेत्युक्तं। अत्र तु लोकानुनयेन प्रष्टव्य इत्याह।। तमित्तमे
वाग्निं पृच्छंति स तु नान्यं पृच्छति प्रश्नसमयेऽपि सिमः सर्वजनो न विपृच्छति विपरीतं न पृच्छति। पृष्टोऽपि धीरो धीमा
न् यं स्वेनेव मनसा इव ज्ञातुं एवार्थं स्वकीयमेवावबुध्याय यत्कार्यं अग्रभीत् अवदमीयात् तत्तदेव प्रतिब्रूते न
तु मत्कार्यानुकूलं स्वतंत्रेश्वर इत्युक्तं भवति। यद्वा न कृष्टा धीरो धीमान् स्वेन मनसा व्याख्यातुं विवार्यमिदग्रभीतय

ऋ॰भा
॥१२०॥

ह्वाव्यं वक्तव्यत्वेन स्वीकुर्यात्। तदेवाग्निं पृच्छति न तु भाषत इत्यर्थः॥ परवाक्यासंह्यसमाह॥ अयमग्निः प्रथमं वचः
स्ववाक्यात् पूर्वभावि वचनं मृष्यते॥ यस्मादेवंविधः तस्माद्दप्रदृपितः अप्रदृप्तः यद्वा तेन शिक्षितः अनंतरभावि
प्रतिवचनं न मृष्यतेऽनुदृप्तः सर्वो लोकः अस्य प्रशानुभावस्याग्नेः कृत्वाऽकृतुना रक्षणादिकर्मणा सह सचते संगच्छ
ते जीवयत्यर्थः॥ ॥अथ तृतीया॥ तमिद्गच्छंति जुह्व१स्तमर्वतीर्विश्वान्येकः शृणवद्वचांसि मे॥ पुरुप्रैषस्ततुरिर्यज्ञ
साधनोऽच्छिद्रोतिः शिशुरादत्त संरभः॥ ॥तमिद्गच्छंति जुह्व१स्तमर्वती इति॥ जुह्वः अस्मदीया जुहूपभृदादयः त
मित्तमेवोद्दिश्य आज्यपूर्णाः सत्यो गच्छंति प्रीणयितुं यद्वा ह्वयंते जैरिति जुह्वः आहुतयः सोमादिरूपाः अथवा जु
ह्वादिषु स्थितान्याज्यान्यपि। आश्रयाश्रयिणोरभेदेन जुह्व उच्यंते॥ मंचाः क्रोशंतीतिवत्। वा अपि तमेव गच्छंति। अ
स्य सर्वदेवात्मकत्वात्। अन्यैर्वेतरदेवतार्थमपि हूयमानत्वादिति भावः। किंच अर्वतीः प्राप्तिमत्यः स्तुतयः तमित्तमेवा
ग्निं गच्छंति। सर्वदेवात्मकत्वाद्देवस एव एकोऽयमग्निः मे मदीयानि वचांसि स्तोत्ररूपाणि शृणवत्। शृणोति। अग्नेः स

श्री
॥१२०॥

र्पनिर्गमनादिव्यापारेषु समर्थो भवति तद्वत्। एतद्दृष्टांतेन अयं तस्वातंत्र्यमुक्तं भवति॥ किंच यस्मादेवं तस्मात्ते नव बर्हि
र्यज्ञं एते प्रसिद्धे एनी एतवर्णे शुभ्रे द्यावापृथिव्यौ आरुणाते अश्नुवाते। व्याप्नुतः वर्णादनुदात्तादिति ङीप्। तकारस्य न
कारश्च। ईदृश्या वेते बृहती महत्यौ अतिविस्तृते अभिश्री प्राप्ते श्रियौ। अभितः सेव्ये वा हिरण्ययी हितरमणीये वपुरी
अतिकुशले शह्व्यंयो। वनेर्वनिपिवनोरचेति ङीपु। रेफश्छांदसः कुलं वक्यौ शिल्पं इत्यस्माद्धात्वांदसो नुमुभावः। ईदृ
श्यौ द्यावापृथिव्यौ बर्हिरश्नुवाते॥ ॥अथ सप्तमी॥ ॥अग्ने जुषस्व प्रति हर्य तद्वचो मंद्र स्वधाव ऋतजात सुक्रतो।
यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमाँ इव क्षयः॥ ॥हे अग्ने जुषस्व हविः प्रीतो भव स्तुत्या किंच तन्मद्द
त्तं प्रियकरं वचः याच्ञारूपं स्तोत्रं प्रति हर्य पुनः कामयस्व हे मंद्र मादनशील स्तुत्य वा हे स्वधावः हविर्लक्षणान्नवन् हे ऋ
तजात यज्ञार्थमुत्पन्न हे सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा यः ईदृशस्त्वं विश्वतः सर्वस्य स्थावरजंगमस्य जगतः
प्रत्यङ् असि अभिमत अनुकूलोऽसि। न पराङ्मुख इत्यर्थः। तथा दर्शतः दर्शनीयः सर्वैः। किंच संदृष्टौ सम्यक् सर्वो जनः दृ

ऋ॰भा॰

॥१२१॥

तेश्चातं श्रुगं तं वा यजमानं नाद्येन दनीये कर्मणि निमित्तभूते सति मुदे तस्य संतोषाय अभिमृशते। कदेति चेद
उच्यते यत् यदा अविशिष्टं तं व्याप वर्त्तमानं ईं एनमग्निं उशतीः कामयमानाः आज्यधाराः स्रुतयो वा गछंति प्रा
प्नुवंति तदाभिमृशते॥ ॥अथ पंचमी॥ ॥स ईं मृगो अप्यो वनर्गुरुप त्वच्युपमस्यां निधायि। व्यब्रवीद्वयुनाम
र्त्येभ्योऽग्निर्विद्वां ऋतचिद्धि सत्यः॥१४॥ ॥स ईं मृगोऽप्यो वनर्गुरिति॥ स ईं स एवाग्निः उपमस्यां उपमायां उपमा
स्पदायां त्वचि ओषध्यादिभिराछादितायां वेद्यां उपनिधायि। उपस्थाप्यते। उत्तरस्तोपभोगाय। कीदृशः समृगो
मार्जयिता अन्वेषणशीलो मृगो माष्टेर्गतिकर्मण इतियास्कः॥ अप्यः गंतव्यः अपः कर्म तत्र साधुर्वनर्गुः वन
गामी कर्षुते गमिश्चेदं रूपं यद्वा गमेरवउपपदस्य रूपागमश्छांदसः। एवं भूतोऽग्निर्मर्त्येभ्यो यजमानादिरूपेभ्यो
वयुनाव युनानि प्रज्ञानानि अनुष्ठेय ज्ञानानि व्यब्रवीत् ईदृक्सामर्थ्यमस्तीति। अयमग्निर्विद्वान् सर्वज्ञः ऋत
चित् यज्ञस्योदकस्य वा चेतयिता सत्यः क्रियमाणं कर्म तत्र साधुः सत्कर्मभवो वा सत्फलं तदर्हतीति वा सम्यक्फ

श्री॥

॥१२१॥

लप्रद इत्यर्थः॥ यस्मादयमुक्तसामर्थ्योपेतस्तस्मात्स्वज्ञोपदेष्टेत्युक्तः हि शब्दः प्रसिद्धौ॥ ॥इति द्वितीयस्य द्विती
ये चतुर्दशो वर्गः॥ ॥त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रोरुपस्थे। निषत्तमस्य चरतो ध्रुवस्य विश्वा दि
वो रोचनापप्रिवांसं॥ ॥त्रिमूर्धानमिति पंचर्चं षष्ठं सूक्तं दैर्घतमसं आग्नेयं पूर्वसूक्तान्येयं तु तदित्युक्तत्वात्। त्रिमू
र्धानमित्यनुक्रमणिका॥ आश्विनशस्त्रयोस्त्रिष्टुभे छंदसि इदमादिसूक्तत्रयस्य विनियोगः। अथैतस्या इति खंडे सू
त्रितं मूर्धानमिति तिस्रीणीति॥ ॥अनया अग्निर्यज्ञरूपेण स्तूयते॥ त्रिमूर्धानं सवनत्रयरूपमूर्धत्रयोपेतं द्विस्त्रिभ्यां पा
दं मूर्धस्य वक्तुक्रीहाविसर्जनरपदांतोदात्तत्वं। किंच सप्तरश्मिं नियामकछंदोयुक्तं अनूनं अविकलं संपूर्णबलमग्निं अ
ग्निसाध्यं अंगनादिगुणयुक्तं वा पित्रोरुपस्थे उत्संगे निषत्तं मध्ये वर्त्तमानमित्यर्थः॥ भूमिश्च द्रव्येण द्युलोकस्य देव
ताभिश्च साध्यत्वादिति यावत्। किंच ध्रुवस्य निश्चलस्य चरतः हविर्भक्षयतोऽग्नेः संबंधिनें यत्तं दिव द्युलोकादागता
नि विश्वानि रोचनानि दीप्तिमानानि आपप्रिवांसं सर्वतः पूरयितारं गृणीषे गृणी हि स्तुहि यद्वा अयमग्निरेवोच्य

द्वि·भा·

॥१२२॥

ते। त्रिमूर्धानं मूर्द्धवदुन्नतं क्षित्यंतरिक्षद्युलोकाख्यस्थानत्रयोपेतं। लोकत्रयव्याप्तमित्यर्थः॥ गार्हपत्यादिस्थानत्रयव
र्त्तिनं वा। सप्तरश्मिं सप्तज्वालं अनूनं अन्यूनं पित्रोर्द्यावापृथिव्योरुपस्थे निषत्तं। नसत्तनिषत्तेति निपातनात्। भिषु
न्त्वाभाव निषण्णं आपप्रिवांसं सर्वतः पूरयंतं। नामानामुक्तलक्षणविशिष्टमग्निं गृणीषे। गृणीहि। स्तुहि। किंच च
रतः सर्वत्र ज्वालाभिर्गच्छतः ध्रुवस्य ध्रुवत्वादविचालितस्य दिवो द्योतमानस्यास्याग्नेः विश्वा सर्वाणि रोचनानि तेजां
सि सर्वत्र व्याप्नुवंतीति शेषः॥ ईदृशमग्निं स्तुहीत्यंतरात्मनः प्रैषः॥ ॥अथ द्वितीया॥ ॥उक्षा महाँ अभि ववक्ष ए
ने अजरस्तस्थावितऊतिर्ऋष्वः॥ उर्व्याः पदो नि दधाति सानौ रिहंत्यूधो अरुषासो अस्य॥ ॥उक्षा महानिति। उक्षा
सेक्ता फलप्रदानस्येत्यर्थः। वहतोर्लेटि छांदसः शपः श्लुः लोपस्त आत्मनेपदेष्विति तलोपः। सिक्ष्वलुमिति मिश्रु
वृष्ट्यादिप्रदानेन हविर्वहनेन च लोकद्वयवासिनो देवान्मनुष्यांश्च रक्षतीत्यर्थः॥ किंचायं अजरः जरारहितः ऋ
ष्वः महान् पूज्यः महन्नामैतत् ऋष्वः उक्ष इति तन्नामसु पाठात्। तथा इतऊतिः प्राप्तरक्षणः सन् तस्थौ स्थितः

श्री·

॥१२२॥

र्वं देवास्त्वं वृणते तैत्तिरीया आहुः ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुरग्निः सर्वा देवता इति तथा तत्रैव पुरस्तादाम्नाप्या
ते त्वमग्ने वरुणो जायसे यत्त्वं मित्र इत्यादिकं स्पष्टविशेष इत्युच्यते। पुरुप्रैषः पुरुप्रैषभाक् यद्वा बहुप्रैषणः सर्वस्या
ज्ञापयितेत्यर्थः॥ तनुरिः तारयिता। तरतेरंतर्णीतण्यर्थात् हगमहनजनेतिकिन् प्रत्ययः बहुलं छंदसीत्युत्वं। यत्तसाध
नः यत्तसाधकः अग्न्यधीनत्वाद्यज्ञस्य। अग्निहोत्रीतिः अविच्छिन्नरक्षणः। शिशुः शिशुरिवस्त्रियकारीणोचयितावा
सूनृणां एवंभूतोऽग्निः संरभ्य कान् आदत्त आदत्ते हविरादिकं स्वीकरोति॥ ॥अथ चतुर्थी॥ उपस्थायं चरति
य यत्समायैत सद्योजातस्तत्सार युज्येभिः॥ अभि श्वांतं मृशते नांद्ये मुदे यदीं गच्छंत्युशतीरपिष्ठितं॥ ॥उपस्था
यं चरतीति। यत् यदा अध्वर्युरुपस्थायं चरति उपस्थायोपस्थाय अनुतिष्ठति। उत्सयनुकूलं व्यापारं करोति।
करोत्याह। यत् समारभत समगच्छत। मथनेनाविरभवत् समागमत् छीयत्रैरात्मनेपदं। सद्यस्तदानीमेव जातः उत्प
न्नः सन् युज्येभिर्योक्तुं बद्धुं समर्थैः पूलैर्मिश्रयितुं संचारस्तसर छद्मगतौ। लिटि णलि रूपं। एवं प्रदृश्योऽयं द्वा

योनयंतिनानाहृदारक्षमाणाअजुर्यं॥ सिषासंतः पर्यपश्यंत सिंधुमाविरेभ्योअभवत्सूर्योनॄन्॥ ॥ धीरासः प
दमिति॥ धीरासो धीराः धीमंतः प्रयोगज्ञाः अध्वर्य्वादयः अजुर्यं अजर्यं अजीर्णमेनमग्निं पदं स्थानं वेदिलक्षणं
नयंति। आधानदेशाद्गार्हपत्याद्वा अथवा वक्ष्यमाणलक्षणा यजमानादयः पदं आस्पदं सर्वकामानामास्पदं मतं ग
मयंति। कीदृशाः कवयः क्रांतदर्शिनो मेधाविनः। अनूचानस्त्वे कवय इति श्रुतेः। किंच नानाहृदा बहुप्रकारया बुध्या
रक्षमाणाः धारयमाणाः। किंचैवंरूपास्ते। सिंधुं स्यंदमानं यत्तद्वारं पुरोलिखितमग्निं। सिषासंतः संभक्तुमिच्छं
तः सनितेः सनितेः सनिसनीवंतर्द्धेतिविकल्पनादिडभावः। जनसनखनामित्यात्वं। पर्यपश्यंत परितः पश्यंति
सम्भूषंत इत्यर्थः॥ किंच सूर्यः सर्वस्य प्रसविता यमग्निः एभ्यः एवं कुर्वद्भ्यो नॄन्नॄभ्यः आविरभवत् तेषामनु
ग्राहेण प्रत्यक्षोभवत्॥ नॄ इति सुप्व्यवचनव्यत्ययः। नॄन् प्राणिनोनुगृहीतुमितिवायोज्यं॥ ॥ अथ पंचमी॥ दिदृ
क्षेण्यः परिकाष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे॥ पुरुत्रा यदभवत्सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः

दिदृक्षेण्य इति॥ अयमग्निः काष्ठासु परस्परं क्रांत्वा वर्तमानासु दशसु दिक्षु दिदृक्षेण्यः अनुग्रहयुक्तात्दर्शनियु
क्तो भवति। यद्वा दृष्टुमिच्छुभ्यः दर्शनीयः अभिषवभूतः दृशेः सनंतात् तत्त्वयर्थे तवेकेन्केन्य-- अत एव जेन्यः
सर्वत्र प्रादुर्भावेन जयशीलो भवति॥ जयशीलो वा किंच प्रदानसमये जेन्यः स्तुत्यो भवति॥ किमर्थमेवं महो महतो
देवादेः अर्भाय अर्भकस्याल्पस्य यजमानादेः जीवसे जीवनाय हविर्वहनेन धनप्रदानेन निर्विवेकः। तत्रोपपत्ति
माह॥ यदह यस्मात् खलु पुरुत्रा यबहुषु दशेषु। देवमनुष्यस्थानादिना त्रप्रत्ययः। मघवा हविर्लक्षणधनवान् वि
श्वदर्शतः सर्वविषयदृश्यवान् अयमग्निः एभ्यो गर्भेभ्यः षष्ठ्यर्थे चतुर्थी एषामृत्विजां गर्भदृधिवदस्यंत रक्षणी
यानां सूरः भवत प्रसविता। उत्पादयिता भवत भवति। तस्मान्नोन हृदि रक्षमाणाः कवयः पदं नयंती त्ति पूर्वत्र
संबंधः॥ ॥ इति द्वितीयस्य द्वितीये पंचदशो वर्गः॥ ॥ कथा ते अग्ने शुचयंत आयोरिति पंचर्चं सूक्तं सोत्तमं दैर्घ
तमसमाग्नेयं त्रिष्टुभं कथेत्यनुक्रमणिका। प्रातरनुवाकस्याश्विन शस्त्रयोरस्य सूक्तस्य विनियोगः॥ त्रिमूर्धान

मितित्रीणीयनेनोक्तः॥ तत्र प्रथमा॥ कथा ते अग्ने शुचयंत आयोर्ददाशुर्वाजेभिराशुषाणाः। उभे यत्तोके तन
ये दधाना ऋतस्य सामन्नणयंत देवाः॥ ॥ कथा ते अग्ने शुचयंत आयोरिति। हे अग्ने तव संबंधिनो रश्मयः शुच
यंतः दीप्तिं सर्वत्र चाक्षुष्णाः प्रकटयंतः आशुषाणाः आशु शीघ्रं संभक्तारः अशूनं संभक्तारो वा वाय्वादेरविशी
घ्रं संभक्तार इत्यर्थः॥ यद्वा समंताच्छोषयितारः यद्वा सर्वे व्याप्नुवंतः अश्नोतेर्लिटः कानच् व्यत्ययेन प्रत्ययः॥ लि
ट्येलिटि द्विर्विकरणता। आङ्पूर्वादंतर्भावितण्यर्थात् शुषेः शानच् छांदसः शपो लुक् आशुशुक्षणो सनोतेः कर्मण्य
ण्। ईदृग्गुणा रश्मयो वाजेभिरन्नैः सहितं आयोः आयुः आयुष्यं कर्मेति विवक्षा कथा केनोपायेन ददाशुः ददति। दा
शृ दाने छांदसो लिट्। तमुपायमनुगृह्णात्यर्थः। रश्मीनां वरप्रदानं कुत्र दृष्टमिति चेदुच्यते। यद्वा अस्मा उक्के आ
युषि तोके पुत्रे तनये अनवच्छेदेन कुलस्य विस्तारके। यद्वा तोके पुत्रे तनये तत्सुतादौ च दधानाः धारयंतो देवाः व्य
वहारोपेतमाना ऋतस्य यज्ञस्य संबंधिनि सामन्नि सारथिर्यथा दौ रणयंत रमते रमयंति शाहृदयं येव वा। यस्माद

वर्त्तेते नर्दनेन रश्म्योः विस्तृतयोः भूम्याः स्थाने समुच्छ्रिते प्रदेशे वेदिलक्षणे पदः निदधाति पदानि स्थापयति करोति। किंचा
स्याग्नेः अरुषासः आरोचनाः ब्रह्मवर्चसेन यजमानाः रोहंति अभिमतस्वर्गादीन् निरोहंति॥ ॥ अथ तृतीया॥ समानं व
त्समभि संचरंती विष्वग्धेनू विचरतः सुमेके॥ अनपवृज्याँ अध्वनो मिमाने विश्वान्केताँ अधि महो दधाने॥ ॥स
मानं वत्समभि संचरंतीति। समानं एकमेव वत्सं वत्सस्थानीयं पुत्रं वर्षहेतुमग्निं अभिमुखं संचरंती संचरंत्यौ द्वे धेनू अ
ग्निहितकरणेन प्रीणयित्र्यौ यत्र यजमानलक्षणौ धेनू विष्वग्विचरतः स्तनपानादिसहगोधनप्रक्षेपसंमार्जनादिनास
म्यक् वर्धयत इत्यर्थः॥ कीदृश्यौ ते सुमेके शोभनकर्माणौ शोभनमदनपरिचरणकुशल इत्यर्थः॥ किंच अनपवृज्यान् आ
पवर्जनीयरहितान् नञ्समस्याभियुक्तरपदांतोदात्तत्वं। अध्वनः मार्गान् अग्नेः प्रातः प्रदेशान् कूशाधमध्यरहितान्
मिमाने संपादयित्र्यौ। किंच विश्वान् केतान् सर्वाणि प्रज्ञानानि प्रवर्धनविषयाणि महो महांति अधि अधिकं दधाने धा
रयंत्यौ। ईदृशः अध्वर्युः यजमानरूपे जायापतिरूपया धेनू विष्वग्विचरतः॥ ॥ अथ चतुर्थी॥ धीरासः पदं कव

स्पतिनामानौ द्वावृषी आस्तां तत्रोचथ्यस्य ममता नाम भार्या सा च गर्भिणी तां बृहस्पतिर्गृहीत्वा अरमयत् । तत्कुक्षि
र्गमनावसरे प्राप्ते गर्भस्थो रेतः प्रावादीत् । हे मुने रेतो मा स्राक्षीः पूर्वमहं वसामि । रेतः संकरं मा कार्षीरित्येवमुक्तो
बृहस्पतिर्बलात्प्रतिरुध्य रेतस्कः सन्नुग्रं शापं । हे गर्भ त्वं मदंतरे रेतोनिरोधमकरोः । अतस्त्वं दीर्घतमः प्राप्नुहि ॥ जा
त्यंधो भवेति । एवं शप्तो ममतायां दीर्घतमा अजायत स चोत्पन्नः तमोव्यपगमाय अग्निमस्तौषीत् ॥ स च स्तुत्या
प्रीत आंध्यं पर्यहरदिति तदिदमत्रोच्यते ॥ ॥ हे अग्ने तव संबंधिनो ये पायवः प्रसिद्धाः पालयितारो रश्मयः
मामतेयं ममतायाः पुत्रं दीर्घतमसं अंधं पश्यंतः अंधोयं अतोस्मद्रक्षणीय इत्येवं गच्छंतः संतः दुरितात् दुष्ट
त्प्राप्नात् दुःखात् अरक्षन् तान् रश्मीन् सुकृतान् सुखकर्तॄन् विश्ववेदाः विश्वप्रज्ञः ररक्ष रक्षति अस्मत्पालना
येति भावः ॥ तेनास्मानपि रक्षिष्यतीत्यर्थः ॥ एवं रक्षितानस्मान् रिप्संतो दंभितुमिच्छंतो रिपवः कुमाद्द्यो नेह
दिभुः ॥ अह इति विनिग्रहार्थीयः न खलु दंभितुं शक्नुवंति ॥ दंभु दंभे ॥ श्रथिग्रंथिदंभिस्वंजीनामिति वक्तव्यम्

श्रीः
॥१२५॥

ति लिटः कित्वादनिदितामिति नलोपः । तस्यासिद्धत्वादेत्वाभ्यासलोपयोरप्राप्तौ दंभेश्चेति वक्तव्यमिति तौ विधी
येते ॥ तद्द्रष्टा दीर्घतमाः स्वयमेवात्मानं परोक्षमया ब्रवीति ॥ ॥ अथ चतुर्थी ॥ ॥ यो नो अग्ने अररिवाँ अ
घायुररातीवा मर्चयति द्वयेन ॥ मंत्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ॥ ॥ यो नो अग्ने अररिवाँ
अघायुरिति ॥ हे अग्ने नोस्मान् युष्मद्रक्षितान् यः आघायुः मारणादिरूपपापेच्छावान् छंदसि वनिपमिच्छंतीति
मत्वर्थीयो वनिप् । शत्रुत्वमाचरन् यः शत्रुर्द्वयेन मानसवाचिकभेदेन द्विविधेन मंत्रेण ददामीति मानसो मंत्रः ॥
निंदाघोरेण तेन निवारणं वाचिको मंत्रः । यद्वा मायाहेतुकेन विरुद्धरूपेण द्विविधेन मंत्रेण यो विरुद्धमाचरति
तत्र संकीर्तयति । यद्यपि प्रियं ब्रूते तत्र करोति । अन्यत्करोति अन्यद्वदतीत्येवं मंत्रस्वरूपद्वैविध्यं पूर्वमानसवा
चिकभेदेन ॥ इदानीं वाचिककार्यभेदेनेति विवेकः । ईदृशेन मंत्रेण नया शत्रुर्वंचयति भर्त्सयति विषयी करो
ति वास्मान् स मंत्रैकदेशो मानसरूपः अस्मै पुनर्गुरुरस्तु ॥ षष्ठ्यर्थे चतुर्थी ॥ प्रयोक्तुरेव पुनर्गरितास्तु भक्षको

द्वि॰भा॰

॥१२६॥ क्तैः दुर्वाक्यैर्निंदारूपैः वाचिकैः तन्वं स्वकीयां तनुं अनुमृक्षीष्ट। अनुमार्ष्टु। अनुक्रमेण लुंपतु। यद्वा समिधिविवि
धो मंत्रः अस्मै प्रयोक्तुरेव गुरुर्गरितास्तु॥ अन्यान्यप्स्मान्। न्यक्कारय प्रयुक्तो निनिष्ठुरभाषणानि संति तैर्दुरुक्तैः
सो रातिः स्वामेव तनुमवलुंपतु स्वात्मनो मवाद्दृश्यः दहंत्वित्यर्थः॥ ॥अथ पंचमी॥ उत वा यः सहस्य प्रविद्वान्मर्तो
मर्त्तं मर्चयति द्वयेन॥ अतः पाहि स्तवमान स्तुवंतमग्ने माकिर्नो दुरिताय धायीः॥ ॥५॥ ॥उत वा यः सहस्य प्रवि
द्वानिति॥ पूर्वमंत्रेः विविधकुटिलमंत्रेण कुर्वात नमंत्रेण प्राप्नोतु मस्मानिस्युक्तं॥ अत्र तु तन्मंत्रेणोद्दहत्यानि: प्र
र्थ्यते॥ उत वा हे सहस्य सहइति बलनाम तत्र भवाग्ने यो मर्त्यो मरणधर्मा मनुष्यः प्रसिद्धेन मायामंत्रेण प्रकर्षे
ण जानन् द्वयेन पूर्वद्वयेन पूर्वोक्तरीत्या द्विविधमंत्रेणेन मर्त्यं मनुष्यं मर्चयति विषयी करोति भर्त्सयति वा अतस्ता
दृशाद्भर्त्सनात् तत्कर्तुः सकाशात् हे स्तवमान स्तूयमानाग्ने स्तुवंतं स्तुतिं कुर्वंतं मां पाहि रक्ष किंच नोस्मान् कं दु
रिताय तत्कृताय दुर्मंत्रप्रयुक्ताय दुःखाय समर्थं माकिर्धायीः मास्थापय। दुरितभाजनं माकार्षीरित्यर्थः॥ द्विध श्री ॥१२६॥

आयुः पुत्रादिसहिताः सोमेनेश्वायस्मान्निरमंते तस्माद्दृश्मयो ददतीत्यवगम्यत इत्यर्थः। तादृशान् त्वदीयान् रश्मी
न् मम मा पानुग्राहीणेत्यर्थः॥ ॥अथ द्वितीया॥ ॥बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः॥ पीय
ति त्वो अनु त्वो गृणाति वंदारुस्ते तन्वं वंदे अग्ने॥ ॥बोधा मे अस्य वचसो यविष्ठ इति॥ हे यविष्ठ युवतम हे स्वधावः
हविर्लक्षणेनान्नेन तद्वान् अग्ने मे मदीयस्य मंहिष्ठस्य अतिशयेन पूजनीयस्य प्रभृतस्य प्रकर्षेण संपादितस्यास्ये
दानीं क्रियमाणस्य वचसः स्तुतिरूपस्य वचनस्य कर्मणि षष्ठी उक्तलक्षणं वचः बोध बुध्यस्व स्तुतो भवेत्यर्थः॥
हे अग्ने त्वो केवलः। अत्र यास्कः। त्वो नेम इत्यर्द्धस्येति। तदेवोदाजहार। एकोजनः पीयति वधकर्मैतत् हिनस्ति यस्ता
दिनानपूजयतीत्यर्थः॥ त्वः एकः अनुगृणाति अनुकूलमुच्चारयति। तयोर्मध्ये हे अग्ने वंदनशीलोहं तव ते त्वं तनुं त
व मूर्त्तिं वंदे स्तोमि॥ ॥अथ तृतीया॥ ॥ये पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरितादरक्षन्। ररक्ष तान्सुकृ
तो विश्ववेदा दिप्संत इद्रिपवो नाह देभुः॥ ॥ये पायवो मामतेयं ते अग्नेति। तत्रेतिहासमाचक्षते। उचथ्य बृह

द्वि·भा·
॥१२७॥

स्वरणं अस्करणं वा आदित्यमिव चित्रं चायनीयं विभावं विविध प्रकाशवंतं। यथा प्रकाशनादि साधनाय धारयंति
तद्वत्। स्वः नृचक्षायाः एवं निरुक्तं च। स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान् स्वृतो भासं ज्योतिषां स्वृ
तो भासेवेति। इंद्राग्नी यं दधुः तं मथीदिति पूर्वत्रान्वयः॥ ॥अथ द्वितीया॥ दूळभं नमिन्नभे दद्भंत मन्माग्नि
वरूथं ममतस्य चाकन्॥ जुषंत विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः॥ ॥मन्म मननीयं स्तोत्रं हविरादि
कं पविदानमिव अग्नायाकु वर्णामवमां इति तारो वैरिणो न दद्भंत। दंभितुं हिंसितुं न प्रभवंति। दंभेर्बहुलं छंदसी
ति विकरणस्य श्लुः व्यत्ययेनात्मनेपदं नश्च मकारो तिरूपयद्रस्वायते। तस्य ताद्विशस्य प्रदातुं ममवरूथं वरणीयं स्तोत्रा
दिकं अयमग्निश्चाकन् अत्यर्थं कामयते कन् दीप्तिः कांतिकर्मा अस्माद्यङ्लुगंतात् लुङि छांदसो भावः। बहुलं छंदसि
छांदसत्वात् लोट् दीर्घः। यस्मादेवं तस्मान्न दभ्नुवंतीत्यर्थः। न केवलमग्निरेव कामयते किंतु सर्वेपि देवाः
कामयंत इत्याह। उपस्तुतिं तदेव मुपेत्य भरमाणस्य कुर्वाणस्य कारोः स्तोतुः अस्य यजमानस्य मम विश्वानि

श्री
॥१२७॥

सर्वाणि हविः प्रदानादिरूपाणि जुषंत सर्वे देवाः अतो न दद्भंते इत्यर्थः॥ अथ तृतीया॥ ॥नित्ये चिन्नु यं सद
ने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः॥ प्र सू नयंत गृभयंत इष्टावश्वासो न रथ्यो रारहाणाः॥ ॥नित्ये चिन्नु यं
सदनेति॥ ॥यज्ञियासो यज्ञियोग्याः यजमाना ऋत्विजो वा यं मथनेनोत्पन्नमग्निं नित्ये चित् सदने नित्य एव गार्ह
पत्यलक्षणे अग्न्यायतने स्थाने नु क्षिप्रं जगृभ्रे गृण्हंति गृहेर्लिटि इरयोरे इति भावः। हृग्रहोर्भश्छंदसीति भत्वं नित्यं गत
श्रियो ध्रियते नित्यं गार्हपत्य मिति सूत्रात् गार्हपत्यो नित्यः तदाश्रयत्वात् सदनमपि नित्यमुच्यते। गृहीत्वा च प्रशस्ति
भिः प्रशंसाभिः स्तुतिभिः दधिरे धारयंति आहवनीयार्थं धृत्वा च इष्टौ एषणसाधने यज्ञे निमित्तभूते सति गृभ
यंतः ऋत्विजः प्रसूनयंत। सुष्टु प्रणयंति। तत्र दृष्टांतः रारहाणाः रंहसा गच्छंतः रहिर्गतौ छांदसस्य लिटः का
नच्। अनित्यमागमशासनमिति नुमभावः रथ्यो रथवंतः तत्र नियुक्ताः छंदसीवनिपाविति रथशब्दान्मत्वर्थी
यः ईकारः। अश्वासो न अश्वा इव ते यथा द्रुतत्वात् रथस्वामिनमाभिमतदेशं नयंति तद्वत्॥ ॥अथ चतुर्थी॥

पुरूणि दस्मो नि रिणाति जंभैराद्रोचते वन आ विभावा ॥ आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु द्यू
न् ॥ ॥ पुरूणि दस्मो निरिणाति जंभैरिति ॥ ॥ अत्र दावाग्निरूपेणायं स्तूयते ॥ दस्मः उपक्षयिता यमग्निः पुरूणि ब
हूनि वृक्षादीनि निरिणाति नितरां हिनस्ति । रीङ् गतिरेषणयोः । घादित्वान्न ह्रस्वः । वूनसाधनेनेति तदुच्यते ॥ जं
भैः दंतस्थानीयज्वालाभिः । आत् आदाहानंतरं वने वृक्षादिसमूहात्मके विभावा विविधप्रभायुक्तः सन् रोच
ते दीप्तो भवति ॥ आत् अनंतरं अस्य शोचिः ज्वाला अनु अनुकूलं यातः अग्नेः सखिभूतो वायुः अनु द्यून् अ
न्वितिविप्सार्थे प्रतिदिनं अनुकूलं वाति ज्वाला आदाय गच्छति । तत्र दृष्टांतः । अस्तुः क्षेप्तुः सकाशात् असनां गच्छंती
शर्यां न शरोनाम हिंसासाधनं लोहमयं धियं इषुमुखं तत्प्रचुरां । यद्वा शरो नाम वंशावीतरजातीयः तृणविशेषः त
द्विकारो इषुमिव शर्या इषवः शरमय्य इति यास्कः ॥ यद्वा शारणी अथा शरो हिंसां तत्करोतीति शर्या इषवो यथा
वायुना देवजन्यो वेगो वा अनुकूलं वा प्रेरयतं तद्वत् ॥ ॥ अथ पंचमी ॥ ॥ न यं रिपवो न रिषण्यवो गर्भे संतं रेषणा रेषयं

रत्नो व्यस्य येन दुसाचि वृष्टिः न मादृशो गद्यस्य उभावः ॥ ॥ इति द्वितीयस्य द्वितीये षोडशो वर्गः ॥ ॥ मथीद्यदीं विष्टो
मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यं ॥ नि यं दधुर्मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावं ॥ ॥ मथीद्यदीमि
ति पंचर्चमष्टमं सूक्तं दैर्घतमसं त्रैष्टुभमाग्नेयं । मथीद्यदीमित्यनुक्रमणिका ॥ सूक्तत्रयमध्ये स्याः तृतीयत्वे
न विनियोग उक्तः ॥ तत्र प्रथमा ॥ मथीद्यदीमिति ॥ होतारं देवानामाह्वातारं विश्वाप्सुं आप्सितिरूपनाम
नानारूपं पार्थिववैद्युतजाठरादिभेद आहवनीयादिभेदेन वा । यद्वा कालीकराल्यादिरूपेण ज्वालानां वैरू
प्याद्विश्वरूपत्वं । विश्वदेव्यं सर्वदैवयोग्यक्रियासाधुं यमेनमग्निं मातरिश्वा वृष्ट्यादिनिर्मातांतरिक्षश्वसनो
वायुः विष्टः काष्ठेषुंतः प्रविष्टः सन् मथीत् । अमथ्नात् प्रावर्धयदित्यर्थः । मथ विलोडने । ह्म्यंतक्षणेति वृद्धिप्र
तिषेधः । पुनः स एव विशिष्यते ॥ यमग्निं मनुष्यासु मननवतीषु विक्षु प्रजासु प्राणिषु वपुषे रूपाय यो
गादिस्वरूपप्रकाशाय शरीरधारणाय वा जाठराग्निरूपेण निदधुः स्थापितवंतः । तत्र दृष्टांतः स्वर्ण

इति पंचर्चं नवमं सूक्तं दैर्घतमसं वैराजमाग्नेयं दशाक्षरस्त्रयोऽविराट्त्वे कृटद्वाक्षरावेसूक्तलक्षणसद्भावात् तथा चानु
क्रांतं महः स वैराजमिति विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ महः स राय एषते पतिर्दन्निन इनस्य वसुनः पद आ।
उप ध्रजंतमद्रयो विधन्नित्॥ ॥महः स राय इति॥ महः महतः पूज्यस्य रायो गवादिरूपस्य धनस्य पतिः पाल
कः स्वामी सोऽग्निः दन् ददत् अभिमतं प्रयच्छन् दातेः शतरि छांदसः शपो लुक्॥ तस्य छंदस्युभयथेत्यार्ध
धातुकत्वाद्दातो लोप इति चेत्याकारलोपः। आ आभिमुख्येन अस्मद्देवयजनं प्रति एषते गच्छति। किंच इनस्य स्वामि
नोऽपि इनः स्वामी सर्वस्य पतिरित्यर्थः। ईदृशोऽयं वसुनो धनस्य पदे आस्पदभूते वेदिस्थाने आ आश्रयति।
उपसर्गवशाद्योग्यक्रियाध्याहारः यद्वा वसुनो निवासयोग्यस्य धनस्यापि इन इति संबंधः। यद्वा वसुप्राप्तिः प्र
सिद्धं॥ किंच उपध्रजंतं उपगच्छंतं अभिषवार्थं ग्रावाणः यजमानाः विधन्नित् परिचरंत्येव॥ विध विधाने। तौ
दादिकः लुङि बहुलं छंदसीयगभावः। निघाताभावश्छांदसः यद्वा पूर्ववत्तत्पुरुषे तेः। अत्र यच्छब्दाध्याहारे

णास्य संबंधान्निघातः। यद्वा अद्रयोऽभिषवग्रावाणः स्वशब्दैः उपोपेत्य विधन्निति पूयंत्येव आह्लादं जनयंती
त्यर्थः॥ ॥अथ द्वितीया॥ स यो वृषा नरां न रोदस्योः श्रवोभिरस्ति जीवपीतसर्गः॥ प्र यः सस्राणः शिश्रीत यो
नौ॥ ॥स यो वृषेति॥ ॥स तादृशोऽग्निः नरां न मनुष्याणामिव रोदस्योः द्यावापृथिव्योरपि वृषा सेक्ता उत्सा
दकृदित्यर्थः॥ एवं सर्वेस्योदकः श्रवोभिः सर्वत्र श्रूयमाणयशोयुक्तः सन्नस्ति वर्त्तते॥ सर्वेसादकृदस्क्तं तत्रो
पपत्तिमाह॥ यतोऽयं जीवपीतसर्गः जीवैर्नानाविधैः पीतः आस्वादितः सर्गः सृष्टिक्रमो यस्य सः तथोक्तः
तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरः॥ पुनर्बहुव्रीहौ स एव स्वरः॥ अत्रायं सृष्टिक्रमः। अयमग्निः स्वदत्तह
विरादित्यं प्रापय्य तद्रश्मिभिः सह वैद्युतरूपमेघद्वारेण दत्तेन वर्षेण सर्वान् प्राणिनः पाययतीत्यतो वृष्ट्युत्साद
नद्वारोत्सादयिता॥ इदानीं साक्षादुत्सादकत्वमाह॥ योऽग्निर्योनौ गर्भोदयः सस्राणः प्रविष्टः सन् शिश्रीत
निषिक्तं रेतः पाचयति नृपश्वादिदेहाकारेण परिणययतीत्यर्थः॥ यद्वा अग्निर्न पाचतयूपोद्वनो सघातस्मा

दयं साक्षाद्देवो भूत्वा दकुः सततं दृश्योऽग्निर्यज्ञस्वी वर्त्तत इत्यर्थः। यद्वा योऽग्निर्नरां नृकर्मसूत्साहयुक्तानां यजमा
नानामिव नराः मनुष्याः नृसंति कर्मस्थितियास्तु॥ तेषां यथा स्वर्गाद्यभिमत वर्षकः तद्वद्देदस्यो एष आश्रय
वान्विशां ह्येनाश्रेयिणो लक्ष्यंते। भूर्लोकवर्त्तिनां वृष्टिप्रदानेन द्युलोकवर्त्तिनां हविः प्रापयति भावः। सततं दृश्यो
विशेषेण सर्वैर्वा आस्वादित स्वभावः सन् अस्ति प्रवयक्षो वर्त्तते। अमुमग्निं हविर्भिः प्रीणयित्वा स्वाभिमता
न्भोगान्भुंजत इत्यर्थः। किंच योऽग्निः यो नौ स्वकीय स्थाने वेदिलक्षणे सत्त्राणः प्रविष्टः सन् ग्निशीत स्वस्मि
न्प्राप्तं पुरोडाशादिकं पचति सोयमग्निरस्ति महानुभावो वर्त्तते॥ ॥अथ तृतीया॥ अयः पुरं नार्मिणीमदी
देदत्यः कविर्नभन्यो ३ नार्वा॥ सूरो न रुरुक्वांछतात्मा॥ ॥अयः पुरमिति॥ यागेनार्मिणीं नर्मवतीं यजमानानां
संबंधिनी उत्तरवेदिं यद्वा नृणां मनसि स्थितां नौ यजमानानां यज्ञाद्यर्थं यां भूमिं प्रत्यस्मागमन नीषा विद्यते तां
पुरं तत्स्थां अदीदेत्। पीपयति। कीदृशोयं अत्यः अपेक्षित देशं प्रसततनशीः कविः क्रांतदर्शी। तत्र दृश्यतः त

ति॥ अंधा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन्॥ ॥ न यं रिपवो न रिषण्यव इति॥ अयमग्निः गा
र्भे गर्भवद्वृक्षके अरणिमध्ये संतं वर्त्तमानं रिपवो न रान रेषयंति॥ न दुःखयंति तथा रिषण्यवोन्ये हिंसकाः दुवस्यु
द्रविणस्युर्वृषण्यति रिषण्यतीति क्यचि निपात्यते। क्याच्छंदसीति। न हिंसंति कीदृशास्ते रेषणाः हिंसनस्वभावाः
यद्वा तैः क्रियमाणा हिंसन प्रवृत्ता न हिंसंति। किंच स्यो मुख्या अभितः ख्यातिमाहात्म्यं अंधाः तान ज्ञानरहिताः अ
विद्वांसः अत एव अपश्याः अद्रष्टारः यद्वा विद्वांसोप्य भावयितारः अनुपासका इत्यर्थः। ईदृशा भवेति न दभंन्
न दभ्नुवंति। न हिंसंति। लौकिककारेषणा निप्रयोजकत्वादिति भावः॥ तर्हि स्य पारमार्थिकं रूपं के जानंतीति चेत्
स उच्यते। नित्यासो नित्याः अविचलित तत्कृत्यः अग्निहोत्रादिनियकर्मरता वा अस्यानुग्रहात्स्वयमपि नित्यसंभ
विष्यंतीति भाविनित्यत्वमाश्रित्य नित्यासउपचर्यते॥ तादृशाः यजमानाः प्रेतारः यत्नादिना तमेव तर्पयितारः सैंतः
ईं एनमरक्षन् रक्षंति यज्ञादिरूपेण भजंत इत्यर्थः॥ ॥इति द्वितीयस्य द्वितीये सप्तदशो वर्गः॥ ॥ महः स राय

द्वि॰भा॰
॥१३१॥

मनिष्पादकः अरणीभ्यामुत्पन्नस्यैव गार्हपत्यद्वारा आहवनीयत्वात्॥ आह्वाताव देवानां सोयं विश्वानि वीर्याणि वर
णीयानि धनानि। ईडिवंदक्ष्त्रांस्तु हाण्यतरस्यामाद्युदात्तत्वं। श्रवस्या श्रवस्यया श्रवो हविर्लक्षणं तदिच्छया श्रवः शब्दान्त्य
जेतदे प्रत्ययाविति भावे अप्रत्ययः। दधे धारयति। अस्मै उक्तस्वरूपाय यान्नयेयो मर्त्यः ददाशद्ददाति। स तु वः सूनुर्भन पुत्रो
भवति॥ ॥ इति द्वितीयस्य द्वितीये एकादशो वर्गः॥ ॥ पुरु त्वा दाश्वान्वोचेरिरग्ने तव स्विदा॥ तोदस्येव शरण आ म
हस्य॥ ॥पुरु त्वेति तृचात्मकं दशमं सूक्तं दैर्घतमसमाग्नेयमौष्णिहं पुरु त्वेत्यनुक्रमणिका॥ प्रातरनुवा
कस्याश्विनशस्त्रयोरौष्णिहे छंदस्य विनियोगः॥ अथाश्विनखंडे सूत्रितं पुरु त्वा दाशिवामग्न इति॥ ॥हे अग्ने त्वा त्वां
पुरु बहु वोचेयद्वा बहु प्रदाश्वानिति संबंधः पुरुत्वं देहि विलंदेहि इत्यासकृन्निब्रवीमीत्यर्थः॥ किं तूष्णीनेत्याह॥ यतो दा
श्वान् अभिमतं हविर्दत्तवानस्मि। अतो वोचे इतरसाधारण्येन ब्रुवतः कथं दातव्यमिति न मंतव्यं। यतोहं हे अ
ग्ने तव स्वित् तवैव आभिमुख्येन अरिः अर्त्ता हविरादिप्राप — न स्तवकोहं तत्र दृष्टांतः॥ महस्य महतः तोदस्येव श्री ॥१३१॥

शिक्षकस्येव स्वामिनः शरणे गृहे यथा गर्भदासादिरासमंतान्नियतो वर्त्तते तद्वदहमपि यस्मादेवं तस्मादभिमतं बहु
वो वेत्वमपि तत्सर्वं देहीत्यर्थः॥ अत्र निरुक्तं॥ बहु दाश्वांस्त्वामेवाभिह्वयाम्यरिरमित्र ऋच्छतेरीश्वरोप्यरिरेतस्मादेव यद
न्या देवस्यावस्ता वा बाहुतयो हूयेत इयेत दृष्ट्वैव मवक्ष्यत्॥ तोदस्येव शरण आ महस्य। तुदस्येव शरणेधिमहतदिति॥ ॥
अथ द्वितीया॥ व्यनिनस्य धनिनः प्रहोषे चिदररुषः॥ कदा चन प्रजिगतो अदेवयोः॥ ॥ पूर्वत्र मंत्रे स्वाभीष्टं बहु विज्ञा
पयामीत्युक्तं। अत्र तु स्वविलक्षणेभ्यो दानादिरहितेभ्यो दानं न दातव्यमिति प्रार्थयते॥ हे अग्ने त्वां विशेषेण ब्रवीमि उप
सर्गश्रुतेर्योग्यक्रियाध्याहारः॥ अथवा संनिहितत्वाद्वोचेत्यनुषज्यते॥ अस्मदर्थं यद्वा प्रजिजपंत तद्विरुद्धं वोचे वक्ष्य
माणस्य रूपस्य न दातव्यमिति ब्रवीमीत्यर्थः॥ तेषां स्वरूपमाह॥ व्यनिनस्य अस्वामिनः स्वां स्वामिनं अकुर्वाणस्य तथा
धनिनः समग्रधनवतः पूर्वमेव धनवतो दानस्य निषेधः। यद्वा प्रहोषे अनिनस्येति संबंधः॥ प्रकर्षेण होतुमसमर्थस्ये
त्यर्थः॥ अत्र इनशब्देन तत्सामर्थ्यं लक्ष्यते॥ चिच्छब्दः समुच्चयार्थे। किंच अररुषः अहिंसकस्य परद्रोहमकुर्वतः

किंच कदाचन प्रजिगतः कदाचिदपि प्रकर्षेण देवान् स्तुवतः अन्हवेतेति निपातद्वयसमुदायः तत्र चशब्दः समुच्चयेन
शब्दो निषेधः किंच अदेवयोः देवानात्मानमनिच्छतः एतेषां न दातव्यमिति विवोच इत्यर्थः ।। निंदितानां स्वरूपनिरू
पणेन स्वरूपात्स्तोदत्वात् बहुत्वाच्च इत्येतत्तयुक्तं भवति यदा चने। तिविध छत्रपर्यायः उक्तप्रकारेण दुष्टस्याप्य कृ
दा प्रजिगतः यदा कदाचित्स्तुवतः विवोचे तादृशस्य दातव्यमिति विशेषेण ब्रवीमि किमु वक्तव्यमस्मदर्थमिति भा
वः ।। ।।अथ तृतीया ।। स चंद्रो विप्र मर्त्यो महो व्राधंतमो दिवि ।। प्रप्रेत्ते अग्ने वनुषः स्याम ।।१।। ।।अग्ने विप्र मेधा
विन् यो मर्त्यः त्वां यजते। स मर्त्यो यजमानो दिवि द्युलोके चंद्रः सर्वेषामाल्हादकः चंद्रसदृशो भवतीत्यर्थः चंद्र एव भव
ति यजमानानां चंद्रस्य प्राप्तिं छंदोगा आमनंति। पितृलोकमाकाशमाकाशाच्चंद्रमसमेष सोमो राजेति सोमलो
कविभूतिं अनुभूयेति च। तथा मुंडके पि द्युलोकप्राप्तिराम्नायते एह्येहीति तमाहुतयः सुवर्चसः सूर्यरश्मिभिर्यज
मानं वहंति तेन यं येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवास इति एषवः पुण्यः सुकृतो ब्रह्मलोक इति च उ

त्वद्यजमानगृहापेक्षया आहवनीयगार्हपत्यादिषु त्रिषु प्रसिद्धं अग्नेरेव इंद्राद्यात्मकमाहुरिति द्वितीयमंत्रस्यार्थः ।।
तादृशोयं स्तोन सूर्य इव रुरुक्वान् दीप्यमानः रुचु दीप्तौ छांदसस्य लिटि क्वसुः अतः स तादृशोग्निरन्योस्ति
उत्कृष्टं वर्त्तत इति पूर्वत्रान्वयः ।। ।।अथ चतुर्थी ।। अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात् ।। हो
ता यजिष्ठो अपां सधस्थे ।। ।।अभि द्विजन्मेति ।। अयमग्निर्द्विजन्मा द्वाभ्यामरणीभ्यां जायमानः यद्वा मथनात्प्रथमं
जन्म तस्यानंतरं पवमानेष्ट्या द्विसंस्काररूपं द्वितीयं जन्म एवं द्विजन्मात्वं अथवा द्यावापृथिवीभ्यामुत्पन्नत्वात् तादृ
शोग्निः त्री रोचनानि स्थानानि गार्हपत्यादीनि वा अभि शुशुचानः अभितः प्रकाशयन् केवलं त्रीण्येव किं तु विश्वा र
जांसि सर्वाणि परंजनात्मकानि क्षित्यादिलोकान् उरुरुचानः दीपयन् होता देवानामाह्वाता यजिष्ठो यष्टतमः सन् अ
पां प्रोक्षण्यादिउदकानां सधस्थे सहस्थाने यागप्रदेशे अस्थात् तिष्ठति ।। ।।अथ पंचमी ।। अयं स होता यो द्विजन्मा
विश्वा दधे वार्याणि श्रवस्या ।। मर्त्तो यो अस्मै सुतुको ददाश ।। ।।१८।। ।।अयमिति ।। यद्वा द्विजन्मा स एव होता हो

ध्यातारः फलस्योत्पादयितारः शोभनध्याना वा विदथे यागे अप्सु जाता अप्सु अग्ने सधिष्टव इत्यादिमंत्रांतरेषु प्रसिद्धं
प्रियं सर्वेषां प्रियतमं प्रीणयितारं वा यजतं यष्टव्यं अग्निं जन्मवतां प्राणिनां अवः प्रतिरक्षणं निमित्तीकृत्य शिम्या कर्म-
णा हविष्कर्मणा जीजनन् जनयंति यजमानाः यद्वा अप्सु निमित्तभूतासु जीजनन् सर्वप्राणिनामुपकाराय वृष्ट्यर्थं चेत्य-
र्थः ॥ एवमुत्पन्नस्याग्नेः पाजसा बलेन गिरा भयंकरेण शब्देन च रोदसी द्यावापृथिव्यौ च अरेजेतां ॥ अकंपेतां ॥ अग्नेः स-
काशात् कंपनमरेजेतां रोदसी होतृवुर्य इत्यादिश्रुतिषु प्रसिद्धं यच्च सर्वरक्षणार्थमुत्पादितोग्निर्लोकद्वयस्य भीति-
मजनयत् ॥ कुमेतदिति वाच्यं ॥ निंदास्तुतित्वात् यथा लोके विप्रीतः तथा प्रवृत्तो भवदिति स्तुतौ पर्यवसानात् यद्य-
प्यत्राग्निरेव प्रतिपाद्यते मित्रसूक्तपरं न स्यादिति तत एवं तथापि द्युस्थानस्याग्नेरेव मित्रत्वान्मंत्रस्य मैत्रत्वमविरुद्धं ॥
यद्वा मित्रं न सखायमिव स्थितं मित्रनामकं देवं यजतं रक्षे च ऋत्विजः प्रादुर्भावयंतीति शिष्टमेतद्विशेषेण तथैव
योजनीयं ॥ ॥ अथ द्वितीया ॥ यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः ॥ अध क्रतुं विदतं

गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः ॥ ॥ हे मित्रावरुणौ यद्यस्मात्कारणात् वां युवां पुरुमीळ्हस्य बहुवामीढसे-
वनस्य सोमिनः स्वानुभवः सोमवतः स्वाभावनशीलस्य कर्मविशेषस्येत्यत उक्तलक्षणं कर्मत्र मित्रासो न मित्राणीव
मित्रभूता ऋत्विजः प्र दधिरे प्रकर्षेण धारयंति ॥ हेति पूरणः ॥ अथ अतः कारणात् गातुं युष्मद्गमनं अर्चतेष्यर्थे च-
तुर्थी अर्चतः पूजयतो यजमानस्य क्रतुं धर्मं विदतं जानीतं विदेर्लोटि व्यत्ययेन शः उत अपि च हे वृषणा कामा-
नां वर्षितारौ युवां पस्त्यावतः पस्त्यमिति गृहनाम पस्त्या दुरोण इति तन्नामसु पठितत्वात् सदः प्राचीनवंशादि गृहवतो
यजमानस्य आह्वानं स्तोत्रं वा श्रुतं शृणुतं छांदसो विकरणस्य लुक् ॥ यद्वा यस्मात्सोमिनः सोमवतः पुरुमीळ्ह-
स्य एतन्नामकस्य राज्ञो मित्रासो न मित्राणीव स्थिताः स्वाभुवः स्वाभवनशीलाः स्वस्वव्यापारसमर्थाः दधिरे अ-
ध अतः कारणात् तस्य अर्चते अर्चतः क्रतुं विदितमित्यादि पूर्ववत् ॥ ॥ अथ तृतीया ॥ आ वां भूषन् क्षितयो जन्म
रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ॥ यदीमृताय भरथो यदर्वते प्र होत्रया शिम्या वीथो अध्वरं ॥ ॥ हे वृषणा

द्वि॰ भा॰ ॥१३४॥

कामानां वर्षितारौ हे मित्रावरुणौ वां युवयोः संबंधि जन्म जननं उत सन्ति रोदस्योर्द्यावापृथिव्योः सकाशात् द्यावापृ
थिवीभ्यामेव सर्वेषामुत्पत्तेः यद्वा मित्र इति सर्वोपकार्यग्निरुच्यते तमोनिवारक आदित्यः उभयोः पृथिवीद्युस्था
नत्वात् ततः पूर्वमंत्रदृष्टांतत्वेनाग्निः स्तुतः। अत इदमधिगम्यते अग्निरेव मित्र इति। तथा अन्यत्रापि। अग्निं मि
त्रं न क्षितिषु प्रशंस्यं। मित्रं न यं सुधितं भृगवो दधुरिति च प्रवाच्यं स्तुत्यं ता इत्था युवयोर्जन्म महे महते दक्षसे सर्वविषय
बलाय क्षितयो मनुष्या यजमानाः आ भूषन् सर्वतोऽवलंकुर्वंति श्लाघंत इत्यर्थः॥ जन्मनः प्रवाच्यत्वमाह॥ यदीय
स्मादेवकारणात् अवीत युष्मान्स्माप्नुवते यजमानाय च भरथ इत्यर्थः। तथा च होत्रया स्तुतिरूपया वाचा शिम्या हविः
प्रदानादिकर्मणा च प्रवीथः प्रकर्षेण प्राप्नुथः तस्मात् प्रवाच्यं जन्म भूषयंतीत्यर्थः॥ होत्रेति वाङ्नाम होत्रा गीरिति त
न्नामसु पाठात्॥ ॥ अथ चतुर्थी॥ प्र सा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत्॥ युवं दिवो बृह
तो दक्षमाभुवं गां न धुर्युप युंजाथे अपः॥ ॥ हे असुरा असुरौ बलवंतौ मित्रावरुणौ युवयोर्या क्षितिर्देवयजन श्री ॥१३४॥

नः स एव विशिष्यते। महो महतापि श्रवाय्यं तम प्रवृद्धतमः इतर देवानामपि श्रेष्ठ इत्यर्थः॥ अतो हे अग्ने ते तव प्रप्रेठ
प्रकर्षेणैव वनुषः संभक्तारः स्याम यद्वा प्रीणयित्वा प्रप्रेतुः स्याम प्रति स्था एव भवेम॥ ॥ इति द्वितीयस्य द्वितीये ए
कोनविंशो वर्गः॥ ॥ मित्रं न यं शिम्या गोषु गव्यव इति नवर्चं मेकादशं सूक्तं दैर्घतमसं जागतं मैत्रावरुणं आद्या
मित्रस्य वा। अत्रानुक्रमणिका। मित्रं न नव मैत्रावरुणं हि जागतं मैत्राद्येति विनियोगो लैंगिकः॥ तत्र प्रथमा॥ मित्रं
न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन्। अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामवः॥
॥ ॥ यमग्निं शिम्या कर्मनामैतत्॥ शमी शक्तिरिति तन्नामसु पाठात्॥ प्रकाशा इष्टयो सादनादिकर्मणा मित्रं न मित्र
मिव स्थितं यद्वा शिम्यैस्तत्क्रियया सह संबध्यते। गोषु बह्वीषु निमित्तभूतासु गव्यवः गा आत्मन इच्छंतः अ
त्र यद्यपि गव्यव इत्येतावलं न गोषिति। तथापि गव्यव इत्यत्र गोस्वामित्वं प्रतिपाद्यते। तच्च क्रियाद्वित्वादिशास्यात्
अतः स्पृहणीयस्य इत्यवगमयितुं गोषिति पदं। यथा गवामसि गोपतिः गणानां त्वा गणपतिं स्वाध्यः सुष्टु अ

पृथिव्यां महिना महित्वा महत्त्वेन अरेणवः अनवद्याः तस्करादिपहारेणानष्टा वा तुजः क्षीरादीनां प्रदातारः तुजे
र्दानकर्मणः ... निगोष्ठे आ आश्रिताः आगच्छंति वा उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ताः एवंरूपा धेनवः उप
रतानि उपरजातौ सप्तम्या लुक् ॥ मेघानां विस्तारवशे अंतरिक्षे मेघच्छन्ने सति सूर्यं सर्वस्य प्रसवितारं सवीर्यं नृणोऽभ
नसामर्थ्यं वा सवीर्यमयेयथा गायत इति तत्सूर्यं स्वमिति श्रुतेः तस्तात् आदित्यमभिलक्ष्य स्वरंति गच्छंति यं तिस्रव
संचाराय सूतं ष्टोपतापयोः भौवादिकः पुष्पिन्काले इति तदुच्यते ॥ निम्रुंच उषसः सर्वेष्वपि सायंकाले पूर्षः कालेषु
च । तत्र दृष्टांतः तद्वद्धीरिव । तदसातनः तस्य वेतागंता मनुष्यः स यथा क्रोशति तद्वत् । एवं निरुध्यानां गवां सूरश्वचा
रो युष्मदायन इति तयोः स्तुतिः ॥ ॥ इति द्वितीयस्य द्वितीये विंशो वर्गः ॥ ॥ षष्ठीमृचमाह ॥ आ वामृताय केशिनी
रनूषत मित्र यत्र वरुण गातुमर्चथः ॥ अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः ॥ ॥ हे मि
त्रावरुणौ केशिनी केशवत्यो गिरो ज्वालाः वां युवां ऋताय यज्ञार्थं आनूषत हविः समर्पणेनाभिपूजयंतीत्यर्थः ॥

कुत्रेति तदुच्यते । हे मित्र हे वरुण युवां युवां यत्र यागे गातुं गमनं । देवयजनदेशं वा गातुरिति भूनाम गातुः पृथिवी
त्कृतात् । अर्चथः पूजयथः स्वीकुरुथ इत्यर्थः आगच्छतं त्मना आत्मनैव अवसृजतं वृष्टिं मेघात् उदकं वा विसृजतं त
थात्वा धियः अस्मदीयानि कर्माणि पिन्वतं सेचयतं वर्धयतमित्यर्थः ॥ एवं विप्रस्य मेधाविनः यजमानस्य मन्म
नां मननीयानां स्तुतीनां युवं युवां इरज्यथः । ईश्वरौ स्वामिनौ भवथः इरज्यतिरैश्वर्यकर्मा इरज्यति पत्यत इति
तन्नामसु पठितत्वात् ॥ ॥ अथ सप्तमी ॥ यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः ॥ उप अह तं ग
च्छथो वीथो अध्वरमच्छा गिरः सुमतिं गंतमस्मयू ॥ ॥ यो हयः खलु यजमानो वां युवामुद्दिश्य युवाभ्यां यज्ञैः या
गैर्निमित्तभूतैः शशमानः शशमानो ह दाशति हविरादिकं स्वं स्ववते युवयोः परिचरणं करोतीय एव कविः अ
नूचानः ते वृणते इति श्रुतेः । अथवा कविर्मेधावी होता सम्यक् होमनिष्पादकः यजमानो मन्मसाधनः मननीयस्तव
दक्षिणादिसाधनोपेतः सन् यजति सोमयागादिकं करोति । तं तमेव यजमानं सुमतिं शोभनप्रज्ञं उपउप लक्ष्य

गच्छथः प्राप्नुथः खलु। अध्वरं तदीयं यज्ञं वीथः कामयेथे। किंच अस्मयू अस्मान्कामयमानौ युवां गिरः स्तुतीः अच्छ अभिलक्ष्य गतं गच्छतं तादृशं मां प्राप्य श्रुतीः स्वीकुरुतमित्यर्थः॥ अत्र यद्यपि सामान्यनिर्देशः प्रतिभाति तथापि अस्मयू इत्युक्तत्वात्। दीर्घतमाः स्वात्मानमेव परोक्षं। यथोक्तवानिति गम्यते यद्वा योदाशति यश्च यजते तमुपेत्य तदीयं यज्ञं कामयेथे अतोऽस्मयू युवां सम्मतिं मां महीया गिरः स्तुतीः अच्छ अभिलक्ष्य गच्छतं॥ ॥अथाष्टमी॥ युवां यज्ञैः प्रथमा गोभिरंजत ऋतावाना मनसो न प्रयुक्तिषु॥ भरंति वां मन्मना संयता गिरो दृप्यता मनसा रेवदाशाथे॥ ॥ हे ऋतावाना यज्ञवंतौ हे सत्यवंतौ वा मित्रावरुणौ युवां प्रथमा प्रथमौ यज्ञैर्यजमानसाधनैर्गोभिः गोविकारैः पय आदिभिः अंजते व्यंजयंति यजमानाः। देवभागं यागेषु क्षीरादिभिर्यजंत इत्यर्थः॥ यद्वा गोभिः स्तुतिवाग्भिः यजंते स्तुवंति॥ तत्र दृष्टांतः। प्रयुक्तिषु यागेषु मनसो न कर्मणि षष्ठी मन इव तद्यथा प्रथमं व्यंजयंती मुख्यं कुर्वंति तत् सर्वं कृत्वा सर्वव्यवहारस्य। किंच युवां मन्मना मननवता संयता युवामेव सम्यग्गच्छंतावेवा गिरः स्तुतीः भरंति सं

रूपा महिमहत्वं अस्पृधिके प्रिया प्रियतरा प्रीणयित्री वा सा क्षितिः प्रकर्षेण संपादिता। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। तामासीदतमिति शेषः। यागभूमिर्देवानां प्रियेति प्रसिद्धं। आ सद्य च हे ऋतावानौ सत्यवंतौ युवां बृहत् प्रसिद्ध ऋतं अस्मदीयं यज्ञं आ घोषथः। अवैकुल्येन संपादितमित्युक्तमित्यर्थः। यतो युवं युवां बृहतो महतो दिवो द्युलोकस्य धुरि दक्षं तर्पण हवने समर्थं अथवा बृहतो दिवः महतो द्युलोकस्थ देवान् दक्षं प्रीणयितुमिति शेषः। यद्वा कर्मणि षष्ठी। दिवो द्योतनात्मकं बृहतः प्रभूतं दक्षं अभिमतसाधनसमर्थं आभुवं सर्वतो भवनशीलं अपः कर्म सोमयागरूपं उपयुंजाथे सेवेथे तत्र हविः स्वीकुरुतमित्यर्थः॥ उपयोगे दृष्टांतः। धुरि उपरि रथस्य निर्वहति तदर्थं गोनं धेनुमिव तां यथा उपयुंजते तद्वत्। यद्वा विकारे प्रकृतिशब्दः क्षीरादिकमिव तस्मात् आ घोषथः॥ ॥अथ पंचमी॥ मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन् धेनवः॥ स्वरंति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव॥ ॥हे मित्रावरुणौ युवां महयाः सप्तम्येकवचने पूर्वसवर्णदीर्घः। ईदूतौ च सप्तम्यर्थे इति प्रगृह्यता। अत्रास्यां

कृत्रये युवयोः पराभविता रोनक्रेपि संतीयर्थः॥ इति द्वितीयस्य द्वितीये एकविंशो वर्गः॥ ॥युवं वस्त्राणीति सप्त
र्चं द्वादशं सूक्तं दैर्घतमसं अनादेशपरिभाषया त्रैष्टुभं मैत्रावरुणं पूर्वत्र मैत्रावरुणमिति उक्तत्वात् तस्य सूक्तस्य विनियोगो लैं
गिकः॥ मैत्रावरुणे पशौ वपाया याज्या। प्रदानानामिति खंडे सूत्रितं॥ युवं वस्त्राणि पीवसा वसाथे प्र बाहवा सिसृतं जा
वसेन इति सैव समावर्तनेन वस्त्रधारणे विनियुक्ता सूत्रितं च युवं वस्त्राणि पीवसा वसाथे इत्यहते वाससी आच्छादयेदिति।
सैषा प्रथमा॥ ॥युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मंतवो ह सर्गाः। अवातिरतमनृतानि विश्व ऋतेन मित्रा
वरुणा सचेथे॥ ॥हे मित्रावरुणौ पीवसा पीनौ युवं युवां यद्वा पीवसा पीवनान्यच्छिन्नानि वस्त्राण्याच्छादनयोग्यानि
वासांसि वसाथे आच्छादयथः। यद्वा पीवसा स्थूलेन प्रभूतेन तेजसा वस्त्राणि दधाथे अवच्छिन्नानि वस्त्रस्था
नीयानि तेजांसि धारयथ इत्यर्थः। किंच युवयोः सर्गाः अच्छिद्राः अच्छिन्नाः मंतवो ह मननीयाश्च दृश्यो युवां
विश्वा विश्वानि सर्वाणि अनृतानि असत्यानि अप्रियाणि पापान्यवातिरतं नाशयतं। विश्वे यत्र संहितायां ऋत श्रीः

वइति प्रकृतिभावो ह्रस्वत्वं च। ऋतेन पूतेन तत्साधनेन यज्ञेन वा सचेथे संगच्छेथे अस्मभ्यं योजयथ इत्यर्थः॥ ॥अ
थ द्वितीया॥ एतच्चन त्वो वि चिकेतदेषां सत्यो मंत्रः कविशस्त ऋघावान्॥ त्रिरश्रिं हंति चतुरश्रिरुग्रो देवनिदो ह प्र
थमा अजूर्यन्॥ ॥एषां तयोर्मध्ये बहुवचनं पूजार्थं। यद्वा तदनुचरापेक्षया बहुवचनं एतयोर्मध्ये च न एकएव
न त्वः वक्ष्यमाणं सामर्थ्यरूपं कर्म विचिकेत न विशेषेण चेतयति अनुतिष्ठतीत्यर्थः॥ सर्वविशेषयते स एकः सत्यः अ
बाध्यः सत्सु भवो वा मंत्रो मननवान् कविभिर्मेधाविभिः शंसनीयः ऋघावान् हिंसावान् अनेन वक्ष्यमाणस्य साम
र्थ्यस्य संभावितता प्रतिपादिता भवति॥ तादृक् कर्म किं तदित्याशंक्याह। त्रिभिरश्रिभिः उपेतमायुधं त्रिरश्रि तद्वत
म सर्थो लुप्यते। उपलक्षणमेतत् सर्वायुधसंपन्नमित्यर्थः॥ एतन्नामानं वा चतुरश्रिः ततोप्यधिकायुधवान् न के
वलमायुधसामर्थ्यं किंतु उग्रः स्वयमुद्गूर्णबलः हंति हिनस्ति अतिबलं शत्रुं किंच युवयोरेकस्यैव सामर्थ्येन
देवनिदो ह देवनिंदकाः प्रथमाः समर्थाः संतोपि अजूर्यन् स्वयमेव जीर्णा भवंति। जीर्यतेः व्यत्ययेन बहुलं छं

दसीत्कृतं । युवयोर्मध्ये एकोऽपि महाबलः मिलितयोस्तु सामर्थ्यं किमु वक्तव्यमिति भावः ॥ अथवा एषां युवयोरेतत्
उत्तरत्र वक्ष्यमाणं सामर्थ्यं एकः सप्तादिलक्षणो विचिकेत । विशेषेण जानाति शेषं पूर्ववत् ॥ ॥ अथ तृतीया ॥
अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत ॥ गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥ ॥
हे मित्रावरुणौ पद्वतीनां मनुष्यादीनां प्रजानां प्रथमा प्रथमभाविनी सती अपात् पादरहितोषाः प्रतिदिनं सूर्य
चन्द्रादिवत् स्वस्याः परिभ्रमणाभावात् सूर्यगमनेनेव स्वगमनात् पादितिचोपचर्यते । तत्तादृशं वां युवयोः प्रसि
द्धं कर्म कः आचिकेत कः आभिमुख्येन जानाति । कितज्ञाने । अतिस्फातिरित्यर्थः । मित्रावरुणयोरहोरात्रदेवतात्वाद
अहोरात्रयोरन्तरालकालस्यैवोषसो देवता कर्मत्वे । किं वास्य लोकस्य भारं निर्वाहं गर्भो युवयोः स्थानीयः त्रिशूलादि
यः अहोरात्रयोर्मध्यवर्ती उच्यते तस्मान्यमेव मित्रावरुणत्वात् । अहोरात्रे वै मित्रावरुणाविति श्रुतेः ॥ आहरति वि
समन्तान्निर्वहत्येव हरतीति वास्य भारं जाड्यं चिदिदमवधारणे तत्कथमिति तदुच्यते । ऋतं सत्यं जगतः प्रकृष्टगमना

पादयं । तियस्मादेवं तस्मात् अदृप्यता अनभिभवता मनसा प्रकृष्टेन चेतसा युक्तौ सन्तौ रेवद्रयिवत् धनवत् कस्मै मंदी
यमाशाथे अश्नुवाथे दत्त इत्यर्थः ॥ अश्नोतेर्लिटि अनियमागमानुशासनमिति वचनाड्डिभावः ॥ ॥ अथ नवमी ॥
रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनं ॥ न वां द्यावो हभिर्नोत सिंधवो न देवत्वं पणयो नानशुर्मघं ॥ ॥
हे मित्रावरुणौ युवां रेवत् रयिवत् धनवत् वयोऽन्नं दधाथे उभयं च धारयथः यस्मादेवं तस्मात् रेवत् सह इष्टत्वात्त्व
यदितिगम्यते ॥ धनविशिष्टमन्नं हे नरा नेतारौ युवां आशाथे अश्नुवाथे अस्मभ्यं दधाथे इत्यर्थः ॥ कीदृशौ मायाभिः युव
योः प्रज्ञाभिः इतऊति इतोऽस्मदभिमुखगमनवत् इतो रक्षणवद्वा माहिनं महत्त्वामैतत् । अतिमहत ईदृशो युवयोरेता
दृशं सामर्थ्यं कुत इत्यत आह युवां युवयोर्देवत्वं अहभिरहोभिः रात्रिभिः अत्राहः शब्देन रात्रिरभिधीयते ॥ द्योशब्दे
नाहः पृथगभिधानात् ताभिः सहिता द्यावो दिवसा नानशुः ॥ न व्याप्नुवन्ति । हस्वरात्रिश्चोभे न तरत इत्यर्थः । उत अपि
च सिंधवः स्पंदनशीला नद्यो न वै नानशुः ॥ तथा युवयोर्देवत्वं पणयो रसुरा अपि नानशुः । मेघं धनं च नानशिरे लो

सएवादित्यः अनश्वः यद्यपि शीघ्रगाम्यश्वरहितः तथापि अनभीशूः आलंबनाधानप्रग्रहस्थानीयरश्मिरहित
याप्यवर्जितः शीघ्रगमनवान् संपन्नः तथाविधोयमादित्यः कनिक्रदत् । अत्यर्थं क्रंदयन् लुगंतात् छतरिदाधर्त्या
दौ निपात्यते ऊर्ध्वसानुः उपर्युपरिसमुच्छ्रयणः सन् पतयत् गच्छति । अचित्तं विज्ञानाविषयं ब्रह्म परिदृढं उक्तरू
पं कर्म मित्रे वरुणे च उभयोर्धाम तेजःस्थानं युवानः मिश्रयंत तयोरूर्ध्वं धस्त आरोपयंतः तथा प्रगृणंतः युवयोः
तेजः प्रभवं प्रकर्षेण स्तुवंतः जुजुषुः सेवंते मनुष्याः सूर्यस्य निरालंबांतरिक्षसंचारात्मकं कर्म मित्रावरुणयोर
धीनमिति स्तुवंतीत्यर्थः ॥ ५ ॥ आ धेनवो मामतेयमवंतीर्ब्रह्मप्रियं पीपयन्सस्मिन्नूधन् । पिबो भिक्षेत वयु
नानि विद्वानासाविवासन्नदितिमुरुष्येत् ॥ ॥ मामतेयं ममतायाः पुत्रं दीर्घतमसं मां ब्रह्मप्रियं पीपयं सस्मि
न्नूधन् इति दृढस्य कर्मणः प्रियतमं परिदृढस्याग्नेः प्रीणयितारं अवंतीः अवंत्यः प्रीणयंत्यः धेनवो गावः सस्मि
न् स्वकीये ऊधन् । ऊधसि आपीपयन् सर्वतः आप्याययंतु प्यायतेर्णिचि छंदसः पीभावः ईषोगतेनसारेण

युवाभ्यां प्रदेयेन नोस्मान्रक्षंतीत्यर्थः ॥ मित्रावरुणाभ्यां पयस्येति श्रुतेः । एवं प्रदत्तं हविः वयुनानि अनुष्ठानज्ञानानि वि
द्वान् जानन् हुतशेषभक्षणीयं युवयोः गच्छन् दीर्घतमाः पित्वः पित्वो कृतशिष्टस्य तादृगन्नं आसा आस्येन भक्ष
यितुं भिक्षेत तथा चेत् युष्मान् किंच वासन् युवां परिचरन् अदितिं अखंडितं अनूनमेव तत्कर्म उरुष्येत् रक्षेत् ।
यथाग्निं अयं भिक्षेत यथा स कर्म सपानं रक्षेत् तत्तथा पीपयन्नित्यर्थः ॥ मैत्रावरुणपशोर्वपाया एषानुवाक्या सूत्रि
तं च आ वां मित्रावरुणा हव्यजुष्टिं मा यो ते मित्रावरुणेति ॥ ॥ सैषा सप्तमी ॥ ॥ आ वां मित्रावरुणा हव्यजुष्टिं नमसा
देवाववसा ववृत्यां ॥ अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥ ७ ॥ ॥ हे देवौ देवनशीलौ मित्रावरु
णौ युवां हव्यजुष्टिं हविःसेवां नमसा नमस्कारोपलक्षितेन स्तोत्रेण अवसा रक्षणेन निमित्तभूतेन आ ववृत्यां आवर्त
येयं यद्वा नमस्कारेण अवसा अन्नेन च आ ववृत्यां किंच हे मित्रावरुणौ अस्माकं संबंधि ब्रह्म इदानीं क्रियमाणं परिदृ
ढं कर्म पृतनासु संग्रामेषु सह्याः सह्या नशत्रून् अभिभूयात् ॥ अनेन कर्मणा शत्रून् अभिभवेयमित्यर्थः ॥ किंच अ

द्वि॰भा॰

॥१४०॥

स्माकं दिव्यादिविभवा वृष्टिः सुपारा सुष्टु पारयित्री भवत्विति शेषः॥ वृष्टेः सस्यं तद्वारा कर्मसमाप्तिरिति भावः॥
॥ ॥ इति द्वितीयस्य द्वितीये द्वाविंशो वर्गः॥ ॥ यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः॥ घृतैर्घृत
स्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरंति॥ ॥ यजामहे वामिति चतुर्ऋचं सूक्तं मैत्रावरुणं यजामहे त्रिष्टुभि
त्यनुक्रमणिका विनियोगो लैंगिकः॥ ॥ हे घृतस्नू घृतस्य पावयितारौ मित्रावरुणौ महो महांतौ वां यजामहे पूजयामः
यजमाना वयं ऋत्विजश्च कीदृशाः सजोषाः समानप्रीतियुक्ताः केन साधनेनेति तदुच्यते। हव्येभिः पुरोडाशादिभिः
नमोभिर्नमस्कारैरुपलक्षितैः अध अपि च यद्यस्मात्कारणात् वां युवां अस्मदीया अध्वर्यवो न अध्वर्यवोपि अत्र न
शब्दोप्यर्थे धीतिभिः स्वकीयैर्भरंति पोषयंति तस्माद्यजामहे॥ अथ द्वितीया॥ प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि
मित्रावरुणा सुवृक्तिः। अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन्॥ ॥ हे मित्रावरुणौ वां युवयोः
संबंधिनो यागस्य प्रस्तुतिः प्रस्तवेनं करोमीति संकल्प एव न प्रयुक्तिः कृत्स्नप्रयोगो न संपन्नः तथैव युवयोर्धामतेज

श्री

॥१४०॥

दिरूपं विपर्णि पूरति अनृतं उक्तविलक्षणं अंधकारगमनादिनिरोधं च नितारीत् नितरामिति निमज्जयति नाशयतीत्य
र्थः॥ त्रिशोर्जगद्धारकं बहुनरूपं कर्म युष्मत्सामर्थ्यादिति॥ ॥अथ चतुर्थी॥ प्रयंतमित्परि जारं कनीनां पश्यामसि
नोपनिपद्यमानं॥ अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धाम॥ ॥कनीनां कमनीयानां दीप्तानां कन्यका
स्थानीयानां उषसां कनतेः कनी दीप्तिकर्मण इनः सार्वधातुकस्य इतीन् कृदिकारादक्तिन इति ङीप्। अपि वा कन्याशब्दस्य
वा छांदसं संप्रसारणं। तासां जारं मार्दयितारं प्रयंतमित् गच्छंतमेव वां परि पश्यामसि वयं परिपश्यामः॥ उपनिपद्य
मानं क्षणमात्रमपि निषीदंतं पश्याम॥ एतदपि तयोः सामर्थ्यं पुनस्तदेव विशेष्यते॥ अनवपृग्णा अनवपृक्तानि
अत एव विततानि तेजांसि वसानं आच्छादयंतं प्रियं सर्वेषां प्रियभूतं मित्रस्य वरुणस्य च धाम तेजस्थानभूतं य
द्वा प्रियं धामेति संबंध्यते तयोः प्रथमस्थानं रविरूपमादित्यं युष्मदनुदयात् संचरंतं न पश्यामसि॥ ॥अथ पंचमी॥
अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः। अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणंतः।

द्वि॰भा॰

॥१४१॥

श्च व्रीह्यादिप्रवर्धकान्युदकानि मद्यासु युष्मा॰भिर्मदनीयासु विक्षु प्रजासु यजमानलक्षणासु तासामभिवृद्ध्यर्थं पी
पयंत आप्याययतु उतो अपि च नोस्मत्संबंधिनोस्य यजमानस्य पूर्व्यः पूर्वकालीनः पतिः पालकोग्निः दन् दाता भवत्वि
ति शेषः। अग्नौ हूयमानत्वात्सर्वेषामपि हविषां यस्मादेवं तस्मात् हे मित्रावरुणौ भक्षयतं पुरोडाशादिकं तथा
उस्रियायाः क्षीरदुघाया गव्याः गावः पयसः यद्वा घनीभूतपयस्या वीतं स्वदतं पातं॥ ॥इति द्वितीयस्य द्वितीये
त्रयोविंशो वर्गः॥ ॥विष्णोर्नु कमिति षळृचं पंचदशं सूक्तं दैर्घतमसं त्रैष्टुभं वैष्णवं। अत्रानुक्रमणिका। विष्णोः
षड्वैष्णवं हीति। आभिप्लवषडहे तृतीयसवने स्तोमवृद्धावच्छावाकस्य इति तथा तृतीयसवने सोमातिरेके इति खंडे सू
त्रितं। महांइंद्रो नृवदिति विष्णोर्नु कमिति आग्निमारुतशस्त्रे आद्या विनियुक्ता अथ यथेतमिति खंडे सूत्रितं। विष्णोर्नु
कं वीर्याणि प्रवोचं तंतुं तन्वन्नजस्रो भानुमन्विहीति॥ ॥सैषा प्रथमा॥ विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विम
मे रजांसि। यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः॥ ॥हे नराः विष्णोः व्यापनशीलस्य वीर्या श्री ॥१४१॥

णि वीरकर्माणि नु कं अतिशीघ्रं प्रवोचं। प्रब्रवीमि। अत्र यद्यपि नु कमिति पदद्वयं तथापि यास्केन नवो नराणि नीस्
र्कत्वात् शास्त्रांतरे एकत्वेन पाठाच्च नु इत्येतस्मिन्नेवार्थे नु कमिति पदद्वयं। कानि तानीति तत्राह। यो विष्णुः पार्थि
वानि पृथिवीसंबंधीनि रजांसि रंजनात्मकानि क्षित्यादिलोकत्रयाभिमानीनि अग्निवाय्वादित्यात्मकानि तेजांसि वि
ममे। विशेषेण निर्ममे। अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः। तथा च मंत्रांतरं। यदिंद्राग्नी अवमस्यां पृथिव्यां
मध्यमस्यां परमस्यामुत स्थ इति। तैत्तिरीये पि योस्यां पृथिव्यामस्यायुषेत्युपक्रम्य यो द्वितीयस्यां तृतीयस्यां पृथि
व्यामिति। तस्माल्लोकत्रयस्य पृथिवीशब्दवाच्यत्वं। किंच यश्च विष्णुः उत्तरं उद्गततरं अतिविस्तीर्णं सधस्थं सह
स्थानं लोकत्रयाश्रयभूतं अंतरिक्षं अस्कभायत् तेषामाधारत्वेन स्कंभितवान् निर्मितवानित्यर्थः। अनेनांतरिक्षा
श्रितं लोकत्रयमपि सृष्टवानित्युक्तं भवति। यद्वा विष्णुः पार्थिवानि पृथिवीसंबंधीनि रजांसि पृथिव्या अधस्तनसप्तलोका
न् विममे विविधं निर्मितवान्। रजःशब्दो लोकवाची लोका रजांस्युच्यंत इति यास्केनोक्तत्वात्। किंच य उत्तरं उद्गततरं

उत्तरभाविनं सधस्थं सहस्थानं पुण्यकृतां सह निवासयोग्यं भूरादिलोकसप्तकं अस्कभायत् । स्कंभितवान् सृष्टवा
नित्यर्थः ॥ स्कंभेः स्तभुस्तंभ्विति हि तस्य च । छांदसि श्नाय जयीति यस्य ये नजुगायजादेशः ॥ अथवा पार्थिवानि पृथिवी
निमित्तकानि रजांसि लोकान् । दिमलं भूरादिलोकत्रयमित्यर्थः । भूम्यामुपार्जितकर्मभोग्यायत्तत्वादितरलोकानां तत्का
रणत्वं ॥ किंच यश्चोत्तरं उत्कृष्टतरं सर्वेषां लोकानामुपरिभूतं पुनरावृत्तेरभावादुत्कृष्टत्वं सधस्थं उपासकानां सहस्था
नं सत्यलोकं अस्कभायत् स्तंभितवान् । ध्रुवं स्थापितवानित्यर्थः ॥ किं कुर्वन् त्रेधा विचक्रमाणः त्रिः प्रकारं स्वसृष्टा
न् लोकान् विविधं क्रमः क्रमणं कुर्वन् विक्रमं विचक्रम इत्यादि विष्णोस्त्रेधा श्रुतिषु प्रसिद्धं । अत एव उरुगायः उरुभिर्मह
द्भिर्गीयमानः अतिप्रभूतं गीयमानो वा य एवं कृतवान् तं दृक्स्य विष्णोर्वीर्याणि प्रवोचं । तृतीयसवने सोमातिरेके यू
वं शस्त्रमुपजनतिति तत्र यं तत्र प्रतद्विष्णुरनुरूपस्तृचः सोमातिरेके इति खंडे सूत्रितं । प्रतद्विष्णुः स्तवते इति । स्तोत्रियस्तो
त्रियानुरूपाविति वाजपेयेनाधिपत्यकाम इति खंडे सूत्रितं । प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान् ॥

स्यानमयाभिप्राप्नोमि । स्कृ वृक्तिः युवयोः शोभवर्णवृक्तश्च युष्मत्सरियहादस्मियत् । यदा तु विदथेषु वां अनक्ति व्यंज
यति । तदा सूरिर्युष्मन्महात्म्यवित् इयक्षन् यागं कर्तुमिच्छन् होता वृषणौ कामानां वर्षितारौ वां युवयोः स्तोत्रं युष्मत्सं
बंधि स्तवं देवत्व लक्षणं अयामीति योषः ॥ ॥ अथ तृतीया ॥ पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हवि
र्दे । हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता ॥ ॥ हे मित्रावरुणौ ऋताय युष्मत्संबंधियज्ञाय हविर्दे
हविषो दात्रे आतो मनिन्निति विच्चि आतो धातोरित्याकारलोपः ॥ जनाय यजमानाय च धेनुः प्रीणयित्री गौः अदितिः
अदीना बहुक्षीरा सती पीपाय क्षीरेण पुनः पुनः आप्यायतां प्यायतेः छांदसः प्रार्थनायां लिट् । उरश्वेतियीभावः प
स्वादिहविःषु यज्ञं पयो घृतादिषु यजमाने तु ष्यात्वित्यर्थः ॥ कस्मिन्काल इति चेत्तत्राह ॥ यत् यदा सः प्रसिद्धो रातह
व्यः एतन्नामा एजा सपर्यन् तस्तः वा पूजयन् मानुषो होता न मनुष्यस्य यजमानस्य संबंधी होता एतन्नामकऋत्विग् वि
विदथे यज्ञे वा हिनोति हविरादिना प्रीणयति तदा पीपायाहं ॥ ॥ अथ चतुर्थी ॥ उत वां विक्षु मद्यास्वंधो गाव आप

किंच यस्य विष्णोरुरुषु यस्य विस्तीर्णेषु त्रिषु त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजात
नि आश्रित्य निवसंति स विष्णुः स्तूयते ॥ ॥ अथ तृतीया ॥ प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ॥ य इ
दं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥ ॥ विष्णवे सर्वव्यापकाय शूषं अस्मत्कृत्यादिजन्यं बलं महत्त्वं
मत्समननं स्तोजनीयं बलं वा विष्णुमेतु प्राप्नोतु कर्मणः संप्रदानत्वाच्चतुर्थी ॥ कीदृशाय गिरिक्षिते वाचि गिरिवदुन्न
तप्रदेशे वा तिष्ठते । उरुगायाय बहुभिर्गीयमानाय वृष्णे वर्षित्रे कामानां एवं महानुभावं शूषं प्राप्नोतु ॥ कोस्य विशे
ष इत्युच्यते ॥ यो विष्णुरिदं प्रसिद्धं दृश्यमानं दीर्घं अतिविस्तृतं प्रयतं नियतं सधस्थानं लोकत्रयं एक इत् एक ए
व अद्वितीयः सन् त्रिभिरित्पदेभिः पादैर्विममे विशेषेण निर्मितवान् ॥ ॥ अथ चतुर्थी ॥ यस्य त्री पूर्णा मधुना प
दान्यक्षीयमाणाः स्वधया मदंति ॥ य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥ ॥ य उ त्रिधातु
यस्य विष्णोः मधुना मधुरेण दिव्येनामृतेन पूर्णा पूर्णानि त्रीणि पदानि पादप्रक्षेपणानि अक्षीयमाणा अक्षी

णानि स्वधया अन्नेन मदंति मादयंति तदाश्रितजनान् । य उ य एव पृथिवीं प्रख्यातां भूसंघामुद्योतनात्मकमं
तरिक्षं च विश्वा भुवनानि सर्वाणि चतुर्दश लोकान् अथ यद्वा पृथ्वीशब्देन अधोवर्त्तीनि अतलवितलादि सप्तभुवना
न्युपलक्षितानि द्युशब्देन तदवांतररूपाणि भुवआदि सप्तभुवनानि । एवं सप्तलोकान् विश्वा भुवनानि सर्वाण्य
पि तत्रत्यानि भूतजातानि त्रिधातु त्रयाणां धातूनां समाहारः त्रिधातु पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं य
था भवति तथा दधार धृतवान् । तुजादित्वादभ्यासस्य दीर्घत्वं । उसाहितवानित्यर्थः ॥ छांदोग्यारण्यके ॥ तत्ते
जो सृजत तदन्नमसृजत ता आप ऐक्षंतेति ॥ भूतत्रयसृष्टिमुक्त्वा हंताहमिमास्तिस्रो देवतास्तासां त्रिवृतं त्रिवृत
मेकैकां करवाणीत्यत्र त्रिवृत्करणस्य श्रुत्युपपादितत्वाद्वा त्रिधातु लोकत्रयं गुणत्रयं वा दाधारेत्यन्वयः ॥ आतिथ्या
यां तदस्येत्येषा याज्या यथातिथ्येति खंडे सूत्रितं ॥ इदं विष्णुर्विचक्रमे तदस्य प्रियमभि पाथो अश्यामिति ॥ ॥
सैषा पंचमी ॥ ॥ तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदंति ॥ उरुक्रमस्य स हि बंधुरित्था विष्णोः प

दे परमे मध्व उत्सः ॥ ॥ यस्य महतो विष्णोः प्रियं प्रियभूतं तत् सर्वैः सेव्यत्वेन प्रसिद्धं पाथः अंतरिक्षं नामैतत् ॥ पा
थोऽन्तरिक्षं यथा व्याख्यात इति यास्केनोक्तत्वात् ॥ अविनश्वरं ब्रह्मलोकमित्यर्थः ॥ अश्यां व्याप्नुयां तदेव विशेष्यते ।
यत्र स्थाने देवयवः । देवं द्योतमानं स्वभावं विष्णुं आत्मन इच्छंतः यज्ञदानादिभिः आप्तुमिच्छंतो नरा मदंति तृ
प्तिमनुभवंति तदस्थानमित्यन्वयः ॥ पुनरपि तदेव विशेष्यते ॥ उरुक्रमस्य अत्यधिकं सर्वं जगदाक्रमणस्य तत्
दात्मना अत एव व्यापकस्य परमेश्वरस्य परमे उत्कृष्टे निरतिशये केवलसुखात्मके पदे स्थाने मध्वः मधुरस्य
उत्सः निष्यंदो वर्त्तते ॥ तस्यां अत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति संकल्पमात्रेण घृतकुल्यादिभो
गाः प्राप्यंते तत्सदमित्यर्थः ॥ अतोऽधिकं नास्तीत्याह ॥ इत्था इत्थं उक्तप्रकारेण स हि बंधुः स खलु सर्वेषां सुकृतीनां
बंधुभूतः हितकरो वा तस्य पदं प्राप्तानां न पुनरावृत्तेः न च पुनरावर्त्तत इति श्रुतेः ॥ तस्य बंधुत्वं हि शब्दः सर्वश्रु
तिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः ॥ ॥ अथ षष्ठी ॥ तावां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयाः

तेन त्वा गृणामितवसमतव्यान्क्षयंतमस्य रजसः पराके ॥ ॥ तत्र प्रथमा सूक्ते द्वितीयेषा ॥ प्र तद्विष्णुः स्तवते वीर्येण मृगो
न भीमः कुचरो गिरिष्ठाः ॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा ॥ ॥ तद्विष्णुः यस्येति वक्ष्यमाण
त्वात्स इत्यवगम्यते । स महानुभावो वीर्येण स्वकीयेन वीरकर्मणा पूर्वमंत्रोक्तरूपेण स्तवते स्तूयते सर्वैः कर्मणि व्यत्य
येन शप् । वीर्येण स्तूयमानत्वे दृष्टांतः मृगो न सिंहादिरिव यथा स्वविरोधिनो मृगयिता सिंहो भीमो भीतिजननः
कुचरः कुत्सितः सिंहादिकर्त्ता दुर्गमप्रदेशगंता वा गिरिष्ठाः स्तवते प्रदेशस्थायी सर्वैः स्तूयते । अस्मिन्नर्थे निरुक्तं
मृगो न भीमः कुचरो गिरिष्ठाः मृग इव भीमः भीमः कुचरो गिरिष्ठाः मृगो मार्ष्टेः गिरिष्ठा इति कर्मणो भीमो बिभ्यत्यस्मा
द्भीष्मोऽप्येतस्मादेव कुचर इति चरतिकर्म कुत्सितं क्वायं न चरतीति वा गिरिस्थायी गिरिः पर्वतः पर्ववान् पर्वयुतः पृणातेर्वा
इति तद्द्वयमपि मृगः अन्वेष्टा शत्रुवधादिकुत्सितकर्मकर्त्ता कुषु सर्वासु भूमिषु लोकत्रयेषु संचारी वा तथा गिरिष्ठाः
गिरिष्ठः गिरिवदुच्छ्रितद्युलोकस्थानी । यद्वा गिरिर्मंत्रादिरूपवाची सा सर्वदा वर्त्तमानः ईदृशोऽयं स्वमहिमा स्तूयते ॥

तेरिति॥ ॥इति द्वितीयस्य द्वितीये चतुर्विंशो वर्गः॥ ॥प्र वः पांतमंधसो धियायत इति षळृचं षोडशं सूक्तं दैर्घतमसं
जागतं पूर्वत्र वैष्णवं हि सूक्तत्वाद्वैष्णवं आद्यस्तृचः इंद्रदेवताकश्च प्र वो जागतं वैष्णवं द्व्याद्यास्तृच इत्यनुक्रमणिका॥ अ
भिप्लवे के पृक्थ्येषु स्तोमातिशंसनं उक्तो विनियोगः॥ ॥तत्र प्रथमा॥ प्र वः पांतमंधसो धियायते महे शूराय विष्णवे चा
र्चत॥ या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना॥ ॥हे अध्वर्य्वादयः वो युष्माकं संबंधिनां पांतं पाल
नस्वभावं पातव्यं वा अंधसः सोमरूपमन्नं प्रार्चत प्रकर्षेण संपादयत। कस्मै धियायते स्तुतीरिच्छते महे महते
शूराय विक्रांताय इंद्राय विष्णवे व्यापकाय एतन्नामकाय देवाय। कस्तयोरतिशय इत्युच्यते। या यौ इंद्राविष्णू पर्वतानां
प्रीणनवतां पूरणवतां वा पर्वतशब्दो यास्केनैवं निरुक्तः पर्वतः पर्ववान् पर्व पुनः पृणातेः प्रीणातेर्वेति। उक्तलक्ष
णानां लोकानां सानुनि समुच्छ्रितप्रदेशे सर्वलोकस्योपरीत्यर्थः॥ अथवा मेघानां समुच्छ्रितप्रदेशे पर्वतशब्दो मेघनामप
र्वतो गिरिरिति तन्नामसु पठितत्वात्। तत्र तस्थतुः तिष्ठतः कीदृशौ तौ अदाभ्या अदंभनीयौ परैरनभिभाव्यौ अ

त एव महः महांतौ यद्वा महो महसस्तेजसः सानुनीत्यनेन संबंधः तत्र दृष्टांतः साधुना अभिमतदेशप्रापणस
मर्थेन अर्वता वेगवता अश्वेनेव यथा अश्वः उच्छ्रितं प्रदेशमारोहति तद्वदाद्यं पदमारूढौ तस्मात्ताभ्यामर्चत सोमा
तिरेके तृतीयसवने एषा वैकल्पिकी याज्या तथा च सूत्रितं त्वेषमित्था समरणं शिमीवतोरिति वा याज्येति॥ सैषा
द्वितीया॥ त्वेषमित्था समरणं शिमीवतोरिंद्राविष्णू सुतपा वामुरुष्यति। या मर्त्याय प्रतिधीयमानमित्कृशानो
रस्तुरसनामुरुष्यथः॥ ॥हे इंद्राविष्णू शिमीवतोः हविष्प्रदानादिकर्मवतोः वां युवयोः इत्था इत्थं त्वेषं दीप्तं समर
णं सम्यक्कृयागदेशगमनं सुतपाः कलशस्थ पीत यजमानः उरुष्यति रक्षति यागेन पूजयति। यद्वा शिमीवतोः प्र
हरणादिकर्मवतोः युवां वयो त्वेषं दीप्तं शौर्योपेतं समरणं सम्यक् परस्परगमनोपेतं हविष्प्रदानाय मेघविदारणरू
पं यजमान उरुष्यति रक्षति स्तौतीत्यर्थः॥ कस्तयोरतिशय इत्युच्यते॥ या विंद्राविष्णू मर्त्याय मनुष्याय हविर्दात्रे
यजमानाय प्रतिधीयमानमितः प्रतिधातव्यं फलरूपं असनो असनं च लन शीलं प्रदानशीलं मस्त्वादिकमस्त्र।

द्वि·भा·

॥१५६॥

अभिमतेक्षेप्तुः निरसितुर्वा कृशानूनां तादृशात्कृशानोरग्नेः सकाशाल्लब्धरूपाथः अग्नौ हुतं हविः स्वीकृत्य तनुमुखा
देवपूज्यमपि दास्यथ इत्यर्थः॥ ॥अथ तृतीया॥ ता ईं वर्धंति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे। दधाति
पुत्रोवरं परं पितुर्नाम तृतीयमधि रोचने दिवः॥ ॥ ताः सोमरूपाः प्रसिद्धा आहुतयो यजमानेन हुताः ईं तदस्ये
न्द्रस्य महि महत् पौंस्यं पुंस्त्वं कर्म वक्ष्यमाणं रूपं बलं वर्धयंति॥ ईमित्यनर्थको वा स चेन्द्रः सोमपानजनितसामर्थ्यो
मातरा द्यावापृथिव्यौ निनयति। नितरां प्रापयति॥ किमर्थं रेतसे प्रजननं पुत्राद्युत्पादनसामर्थ्याय भुजे तेषां भो
गाय संरक्षणाय वा कुत्रेति तदुच्यते दिवो द्योतमानस्यादित्यस्य अधि अधिकं रोचने रोचमाने मंडले नाम नमृतं द्या
वापृथिव्योः स्थापितं सामर्थ्यं पुत्रः सर्वो जनः पितुः पालकस्य विष्णोरनुग्रहात्। यद्वा पितुः स्वोत्पादकस्य स्वयमु
त्पन्नं स तदवरं निकृष्टं नाम पौत्रसंज्ञं परं तत्प्रकृष्टं पुत्र इति नाम तदुभयापेक्षया तृतीयं पितेति नाम दधाति
धारयति त्रीणि वा रेतांसि पिता पुत्रः पौत्र इति श्रुतेः॥ अस्यायमर्थः॥ अग्नौ हुताः सोमाहुतयः आदित्यमंडले

श्री

॥१५६॥

सः॥ अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि॥ २४॥ हे दंपती पत्नीयजमानौ वां युष्मदर्थं ता तानि गं
तव्यत्वेन प्रसिद्धानि वास्तूनि सुखनिवासयोग्यानि स्थानानि गमध्यै युवयोर्गमनाय उश्मसि कामयामहे।
तदर्थं विष्णुं प्रार्थयामह इत्यर्थः। तानि वास्तूनि कानीत्याह यत्र येषु वास्तुषु गावो रश्मयो भूरिशृंगाः अत्यंतोन्नतशृंगोपे
ताः बहुभिराश्रयणीया वा अयासः अयनगंतारः अतिविस्तृताः यद्वा अयाः गंतारः अतादृशोऽत्यंतप्रकाशयुक्त
इत्यर्थः॥ अत्राह अत्र खलु वास्त्वाधारभूतेषु लोकेषु उरुगायस्य बहुभिर्महात्मभिर्गीतस्य वृष्णः कामानां वर्षितुः
विष्णोः तत्तादृशं सर्वत्र पुराणादिषु गीतं गंतव्यत्वेन प्रसिद्धं परमं निरतिशयं पदं स्थानं भूरि अतिप्रभूतं अव भाति स्व
महिम्ना स्फुरति। अयं मंत्रो यास्केन गोशब्दो रश्मिवाचक इत्यस्यार्थस्य संक्षेपेणोदाहृतः। तानि वां वास्तूनि कामयामहे गम
नाय यत्र गावो बहुशृंगा भूरि बहु इति नामधेयं प्रभवतीति सतः शृंगं श्रयतेः शृणातेर्वा शम्नातेर्वा शरणायोद्गतमि
ति वा शिरसो निर्गतमिति वा अयासोऽयनाः तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थमव भाति भूरि पादः पद्य

द्वि॰ भा॰
॥१४७॥

र्गस्य सर्वस्य वा द्रष्टुर्विष्णोः हेतुः तत्क्रमणे हेतुः एव पदे मर्त्यो मनुष्यः अभिख्याय सर्वभूतसाक्षी इत्यादिना प्रख्याताय भुरण्यति
गच्छति भजते। भुरण्यति कंड्वादिर्गतिकर्मा भुरण्यतिरिति वर्तते इति तत्कर्मसु पाठात्। प्रसिद्धत्वाद्दूर्लोके वा दृष्ट्वा दिग
मनादेतरि क्षे चेत् क्रमेत् क्रमेण जानाति। अस्य विसोऽस्तृतीयं क्रमणं द्युलोके कस्यचित् कोऽपि मर्त्यो न कः नैवादधर्षेति। बु
ध्यानाभिभवति। ज्ञातुं न शक्नोतीत्यर्थः। न केवलं मनुष्य एव अपितु वयश्चन वेञ्जारो मरुतो पि कीदृक् नास्ति। पतयंतः
सर्वत्र गमनसमर्थाः। तथा पतत्रिणः पतनशीला गरुडादयो वा न कुतः धर्षति। नैव नः कुर्वंति। धृषेर्लेंघ उगा
मः। स सत्यो कस्यासंतविप्रकृष्टत्वेन सर्वेषामविषयत्वादिति भावः॥ ॥अथ षष्ठी॥ ॥चतुर्भिः साकं नवतिं च ना
मभिश्चक्रं न वृत्तं व्यतीरवीविपत्॥ बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवं॥ ॥अयमात्मा विष्णुः च
तुर्भिः साकं सहितां नवतिं च सचतुरां नवतिमित्यर्थः। एतत्संख्याकान् कालावयवान् नामभिः स्वकीयमानप्रकारैः प्र
रणविशेषैः वृत्तं यथा भवति तथा व्यतीन् विविधान् स्वभावान् वृत्तं चक्रं न वैरोपे तं चक्रमिव तं यथा दृत्तो वह परिप्रक्षि
द्वा

श्री॰
॥१४७॥

पेण भ्रामयति तदुक्तं संख्याकान् कालावयवान् अवीविपत्। कंपयति भ्रामयति। द्वे वैष्टकं पनेण्येतान्युक्तिश्च रू
पं। पुनस्तदुच्यते। संवत्सर एकः अयने द्वे पंचर्तवः द्वादश मासाः चतुर्विंशत्यर्धमासाः त्रिंशदहोरात्राः अष्टौ या
माः एकस्मिन्दिने पर्यावर्तमानानि मेषादीनि द्वादश लग्नानि मिलित्वा चतुरधिक नवतिसंख्याकान् अवीविपत्।
अनु आदित्यः अयमादित्यस्य रिभ्रमति। कथमेतान् भ्रामयतीत्युच्यते। नैष दोषः एतेषां भ्रामकस्य ध्रुवस्य
विष्णोर्मत्यंतरत्वात्। अथवा स्वभ्रमणाधीनत्वादितरेषां परिभ्रमणस्य अतः स्वयं भ्रामयतीत्युच्यते। एवं कालस्व
रूपो विष्णुः बृहच्छरीरः विराडात्मना सर्वदेवमनुष्यादिशरीराणां स्वशरीरत्वात्। बृहच्छरीरमेवोपपादयति। वि
मिमानः वि विधमात्मानं मिमानः देवतिर्यगात्मना विभज्य स्थापयन् यद्वा ऋक्वभिः स्तोतृभिर्मंत्रवद्भिर्वा वि
मिमानः विविधं मीयमानः यद्यपि विभुः तथापि भक्ताधीनत्वात्तत्तत्त्वा मीयते युवा सर्वत्र मिश्रणशीलः नित्य
तरुणो वा अत एव कुमारः अनल्पः एवंभूतो महाविष्णुराहवमाह्वानं प्रति एति गच्छति यज्ञदेशं॥ ॥इति द्विती

यस्यां द्वितीये पंचविंशो वर्गः ॥ ॥भवा मित्रो न शेव्यो घृतासुतिरिति पंचर्चं सप्तदशं सूक्तं दैर्घतमसं जागतं वैष्णवं सूक्तं त-
द्विदमपि जागतं वैष्णवं हीत्युक्तत्वात् तु हि शब्दं भव पंचेत्यनुक्रांतं उक्थे तृतीयसवने अच्छावाकशस्त्रे एतत्सूक्तं विनियु-
क्तं ॥ उक्थे तु होत्रकाणामिति खंडे सूत्रितं भुवा मित्रः संवार्मणेति सोमस्य च रोरुभयत्वात् इत्येन यस्यं तत्रोपरितने घृत-
यागे उरु विष्णो विक्रमस्वेति याज्या सूक्तान्ते भवा मित्र इति ॥ ॥सैषा सूक्ते प्रथमा ॥ भवा मित्रो न शेव्यो घृतासुतिर्वि-
भूतद्युम्न एवया उ सप्रथाः ॥ अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता ॥ ॥ हे विष्णो मित्रो न मि-
त्रवत् उ आ तासखा आदित्यो वा मित्रः प्रमीतेस्त्राता इति निरुक्तं तद्वत् शेव्यः साधुः सुखकर्ता घृतासुतिः घृतमुद-
कं मासूयते आभिमुख्येन नीयते येन स तादृशः यद्वा घृतमाज्यमाभिमुख्येन नीयते यस्मै स तादृशः विभूतद्युम्नः
प्रभूतयशाः प्रभूतान्नो वा एवयाः रक्षणस्य मिश्रयिता सप्रथाः सर्वतः पृथुः प्रतिविशेषेणानो भवेति संबंधः उ इ-
वो तन्निः उ इति दीर्घः ॥ उ इति पादपूरणः हे विष्णो त्वं यस्मादीशो भवासि अधास्मात् ते तव स्तोमः स्तोत्रविशे-

प्राप्य द्वादशात्मनः सवितुर्भर्गस्तत्राविंशद्वा विष्णुरिति ॥ ॥अथ चतुर्थी ॥ तंतदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृक-
स्य मीढ्हुषः ॥ यः पार्थिवानि त्रिभिरिद्विगामभिरुरुक्रमिष्टोरुगायाय जीवसे ॥ ॥अस्य महानुभावस्य तत्तत्पौंस्यं
पुंस्त्वं पराक्रमातिशयं गृणीमसः स्तुमः ॥ वीदृशस्यास्य इनस्य सर्वस्य स्वामिनः त्रातुः पालकस्य अवृकस्य वृको हिं-
सकः स्वादिः तद्रहितस्य मीढ्हुषः सेक्तुः नित्यतरुणस्य सत्त्वे तेषु पराक्रमेषु मध्यमेकमुदाहरंति यो विष्णुः पार्थि-
वानि पृथिव्यादीनि प्रथयंतीति वा सामर्थ्यात् रजांसीति गम्यते लोकत्रयस्यापि पृथिवीशब्दवाच्यत्वं पूर्वमुदाहृतं ॥ ता-
नि त्रितानि त्रिभिरिद्विगामभिः त्रिभिरेव विधगमनैः उरुविस्तीर्णं यथा भवति तथा विक्रमिष्ट क्रांतवान् विचक्र-
मे इत्यर्थः ॥ उरुगायाय उरुगायेन स्तुत्याय जीवसे लोकत्रयरक्षणाय यद्वा उरुगायाय षष्ठ्यर्थे चतुर्थी उरुगायस्य
विष्णोरीदृशं पराक्रमं गृणीमसि ॥ किमर्थं जीवसे जीवनाय रक्षणाय ॥ अथ पंचमी ॥ ॥ द्वे इदस्य क्रमणे स्वर्दृ-
शोभिख्याय मर्त्यो भुरण्यति ॥ तृतीयमस्य नकिरादधर्षति वयश्च न पतयंतः पतत्रिणः ॥ ॥अस्य स्वर्दृशः स्व-

उत्पत्तिं हिरण्यगर्भादिरूपं जन्म ब्रवत् ब्रूयात्। ब्रवीतेर्लेटि घडागमः। संकीर्त्तयेत्। स्तोता। सेदु। उ शब्दोऽपि एवशब्दार्थः। सोऽ
दाता स्तोता च श्रवोभिरन्नैः कीर्तिभिर्वा युक्तः सन् युज्यं चित् सर्वैर्गन्तव्यमेव तत्पदं अभि आभिमुख्येन आसनत्
गच्छति प्राप्नोति॥ ॥अथ तृतीया॥ तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन॥ आस्य जानन्तो
नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे॥ ॥हे स्तोतारः तमु तमेव विष्णुं पूर्व्यं पूर्वं हि अनादिसंसिद्धं ऋ
तस्य गर्भं यज्ञस्य गर्भभूतं यज्ञात्मना उत्पन्नमित्यर्थः॥ यज्ञो वै विष्णुरिति श्रुतेः॥ यद्वा ऋतस्योदकस्य गर्भं ग
र्भवद्वारकं उदकोत्पादकमित्यर्थः॥ अप एव ससर्जादाविति स्मृतेः। एवंभूतं विष्णुं यथा विद जानीथ तथा वदेत्यर्थः।
विद। लेटि मध्यमबहुवचनं। विद ऋतस्येत्यत्र संहितायामृत्यक इति प्रकृतिभावः। किंच अस्य महानुभावस्य विष्णो
र्नाम चित् सर्वैर्नमनीयं अभिधानं सर्वस्य प्रतिपादकं विष्णुरेव सर्वेषां स्वर्गापवर्गसाधनाय इष्टाद्यात्मना द्र
व्यदेवात्मना वा परिणाममाजानन्तो यूयं विविक्तन ब्रूत स्तुत। वचेर्लोटि छान्दसः शपः श्लुः बहुलं छन्दसीत्यभ्यास श्री

स्येत्वं पूर्ववत्तनादेशः। इदानीं साक्षात्कृत्याह॥ हे विष्णो सर्वात्मक देव महो महतस्ते तव सुमतिं शोभनां मतिं अनुग्रहबुद्धिं वा
भजामहे वयं यजमानाः। अग्नीषोमप्रणयने तमस्य राजेत्येषा प्रयोक्तव्या। अग्नीषोमौ प्रणेष्यन्निति खण्डे सूत्रितं॥
तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः॥ दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपो
र्णुते॥ ॥सैषा चतुर्थी॥ तमस्येति॥ मारुतस्य मरुतां ऋत्विजां संघातो मारुतः। तद्धितः मत्वर्थे लुप्यते। मरुतां देवा
नां संबंधिनो वा वेधसः मेधाविनोऽस्य यजमानस्य तं प्रसिद्धं क्रतुं यागं यज्ञात्मकं विष्णुं यज्ञो वै विष्णुरिति श्रुतेः। राज
राजसमानो वरुणः सचेत सेवते तमेव क्रतुं यागं अश्विना अश्विनौ सचेते अन्येऽपि देवाः सचन्ते सेवन्ते। किंच विष्णुः
सवनत्रयात्मना व्यापनात् विष्णुः सखिवान् यजमानादिसखिभिर्युक्तः सन् उत्तमं उत्कृष्टतमं अहर्विदं अहर्वेत्ता
रं स्वर्गोत्पादकमित्यर्थः॥ दक्षं बलं बलप्रदानसामर्थ्यरूपं दाधार धृतवान्। किंच व्रजं च मेघं च व्रज इति मेघनाम व्र
जः चरुरिति तन्नामसु पाठात् तत् वृष्ट्युदकाय अपोर्णुते अपगतावरणं करोति। आर्णुति द्वारयत्तस्यैव वृष्ट्युदकला

तू॥ यद्वा मारुतस्य मरुत्संघातस्य देवगणस्य वेधसः विधातुः स्रष्टुर्विष्णोः क्रतुं कर्म पालनादिरूपं वरुणादयः से
वंते तदधीनत्वात्पालनस्य स च सखिवान् इंद्रमरुदादिभि सहायोपेतः सन्नुक्तलक्षणं दक्षं बलं सुकृत्साधना
दिसामर्थ्यरूपं दाधार तथा व्रजं चापोर्णुते॥ ॥अथ पंचमी॥ आ यो विवाय सचथाय दैव्य इंद्राय विष्णुः सु
कृते सुकृत्तरः॥ वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत्॥२६॥ ॥यो विष्णुः दैव्यः दिवि
भवः सुकृत्तरः शोभनफलप्रदानां मध्ये श्रेष्ठः आ विवाय आगच्छति । वेतेर्लिटि रूपं । किमर्थं सचथाय सेव
नाय यागसाहाय्यकरणाय कस्मै इंद्राय इंद्रं हविर्लक्षणान्नं द्रावयतीतींद्रो यजमानः इंद्रेरां दृणातीति इदंक
रणादित्याग्रायण इति च यास्केनोक्तनिर्वचनस्यात्रापि सद्भावात् । तस्मा उक्तरूपाय यजमानाय सुकृते शो
भनस्तुतिकर्त्रे आगच्छच्च वेधाः अभिमतफलविधाता त्रिषधस्थः त्रिसंख्योपेतेष्वहस्स्थानकान् सवनत्रय
स्थानं क्षित्यादित्रैयौस्थानं वा विष्णुः आर्यम् आगच्छत् तदर्थं यितव्यं यजमानं अजिन्वत् प्रीणयति । जिविः प्री

षः विदुषा त्वन्महात्म्यं वेदित्रा यजमानेन अर्ध्यः पुनः पुनः प्रवर्धनार्हः एकवारकरणेन संपूर्यत इत्यर्थः । तथा ते
यज्ञश्च हविष्मता यजमानेन राध्यः समाराधनीयः यद्वा विदुषा स्तोत्रा स्तोमो राध्यः हविष्मता यज्ञश्च राध्यः॥
अथ द्वितीया॥ यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति । यो जातमस्य महतो महि ब्रवत्सेदु श्रवो
भिर्युज्यं चिदभ्यसत्॥ ॥यो मर्त्यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति । यो जातमस्य महतो म
हि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत्॥ पूर्व्याय पूर्वकालीनाय नित्यायेत्यर्थः । वेधसे विविधजगत्कर्त्रे नवीयसे नि
सन्नूतनाय अत्यंतरमणीयायेत्यर्थः । सुमज्जानये स्वयमेवोत्पन्नाय । जनेरौणादिक इण् । सुमत्स्व
यमित्यर्थः । इति यास्कः । यद्वा सुमत्संमादयतीति सुमत् तादृशी जाया यस्य सः तथोक्तः तस्मै सर्वजन्मादन श्रीक
श्रीपतय इत्यर्थः । बहुव्रीहौ जायाया निङ् । इति निङादेशः समासांतः वलिलोपः उक्तगुणकाय विष्णवे व्याप
काय देवाय ददाशति हविरादिकं ददातीति । किंच अस्य विष्णोर्महतो महानुभावस्य महि महत् पूज्यं जातं जन्म

ऋ॰भा॰ नीमह्नावः तमांसि विवासयति वासेर्लुङि छांदसः श्लो लुकू छांदसत्वादिड्‌ य त इति आडागमः उदिति यतश्च सूर्यः

॥१५९॥ यतश्चायमग्निः प्रवृद्धो भवति अतः कारणात् हे अश्विनौ स्वसंबंधिनं रथं यातवे देवयजनगमनाय रासभाभ्यां आयुक्षातां अभिमुख्येन युंजाते । तथा सविता सर्वकर्मणोऽनुज्ञाता देवो जगत् जंगमं प्राणिजातं पृथक् स्वस्वकर्मानुरोधेन प्रासावीत् प्रसौतु अनुजानातु ॥ ॥अथ द्वितीया॥ यद्युंजाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतं ॥ अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ ॥हे अश्विना अश्विनौ यद्‌ यदा वृषणं वृष्ट्यादिवर्षकं रथं युंजाथे योजयथः तदानीं नः क्षत्रं अस्मदीयं बलं क्षत्रियजातिं वा घृतेनोदकेन मधुना मधुरेणामृतेन युष्मद्रथस्थेन मधुना अस्मदीयं बलं प्रवर्धयतमित्यर्थः ॥ अश्विनोरथस्य मधुपूर्णत्वं मधुवाहनो रथ इत्यादिषु प्रसिद्धं । किंच अस्माकं पृतनासु अस्मदीयासु पुत्रभृत्यादिमनुष्यरूपासु प्रजासु ब्रह्म ब्राह्मं तेजो जिन्वतं । पृतना इति नौ मनुष्यनाम विवस्वतः पृतना इति तन्नामसूक्तत्वात् यद्वा पृतनासु परकीयासु ब्रह्म तासां परिदृढं मंत्रं अ श्री ॥१५९॥

स्माकं जिन्वतं प्रीणयतं ब्रह्म यन्नाम ब्रह्मवर्च इति तन्नामसूक्तत्वात् वयं च शूरसाता शूरसातौ शूराणां प्रहारादिना युक्ते संग्रामे धना तदीयानि धनानि बहुविधानि भजेमहि । लभेमहि ॥ ॥अथ तृतीया॥ अर्वाङ्‌ त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः ॥ त्रिवंधुरो मघवा विश्वसौभगः शं न आ वक्षद्‌ द्विपदे चतुष्पदे ॥ अश्विनो रथः अर्वाङ्‌ अस्मदभिमुखो यातु गच्छतु कीदृशः त्रिचक्रः चक्रत्रययुक्तः मधुवाहनः जीराश्वः क्षिप्रगाम्यश्वोपेतः सुष्टुतः अतएवास्माभिः स्तूयमानः त्रिवंधुरः निम्नोन्नतकाष्ठत्रयोपेतः सारथ्याश्रयस्थानं बंधुरं मघवा धनवान् अतएव विश्वसौभगः सर्वसौभाग्योपेतः ईदृशः अश्विनोरथः नोऽस्माकं द्विपदे पुत्रादिप्रजायै चतुष्पदे पशवे शं सुखं आवक्षत आवहतु वहेर्लेट्यडागमः सिप्‌ ॥ ॥अथ चतुर्थी॥ आ न ऊर्जं वहतमश्विना युवं मधुमत्या नः कशया मिमिक्षतं ॥ प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥ ॥हे अश्विना अश्विनौ युवां नोऽस्माकं ऊर्जं बलं बलप्रापणसमर्थं तत्र आवहतं प्रापयतं । किंच नोऽस्मान् मधुमत्या माधुर्योपेतया कशया

द्वि॰भा॰ अश्वप्रतोदन्या नोस्मान्मिमिक्षतं मधिसूदक नाम मधुपुरीषमिति तन्नामसूक्तत्वात्। कशया अश्वताडनेन प्रोक्ष
॥१५२॥ माग सवृष्टिरूपं फलं दास्यत इति कशया मधुमत्या। किं च आयुरायुष्यं प्रतारिष्टं प्रवर्धयतं प्रपूर्वस्तिरतिर्वर्धनार्थः
तथा रपांसि मृक्षतं पापानि निःशेषेण शोधयतं। रपो रिप्रमिति पापनामनी भवत इति यास्कः॥ किं च द्वेषः द्वेषम
त्रादिकं सेधतं नाशयतं इदं च भाव्यं सचाभुवा सहभुवौ अस्मत्कार्येषु सह भवनवंतौ भवतं। एकमत्यं भजतमित्यर्थः।
वाक्यभेदाददनिघातः॥ ॥अथ पंचमी॥ युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वंतः। युवमग्निं च वृषणावपश्च
वनस्पतींरश्विनावैरयेथां॥ ॥हे अश्विनौ युवं ह युवां खलु जगतीष्वंतः गमनशीलासु गोषु मध्ये गर्भं धत्थः धार
यथः न केवलं गोष्वेव अपि तु युवं युवां विश्वेषु सर्वेषु भवनेषु भूतजाते अंतर्मध्ये गर्भं धत्थः वृष्टिद्वारा भेषजरूपत्वेन
गर्भस्य रेतसः पोषकत्वात्। किं च हे वृषणौ कामानां वर्षितारौ युवं युवां अग्निं च अपश्च वनस्पतींश्च ऐरयेथां प्रवर्तये
थां॥ आहुतिभोगयाग्निं स्वीकृत्य च दृष्टकदकानि उदकैरोषधिवनस्पत्यादिकं एतान्यस्मदर्थं प्रेरयेथां॥ ॥अथ श्री
॥१५२॥

णनार्थः इति ब्रूमः। तदर्थं यः कश्चित् तस्य यत्तस्य भागे हुतशेषरूपं ते यजमानं आभजत्। भजति समीरयतीत्यर्थः। य
द्वा कः तस्य यत्तस्य भागे फलं यजमानं आभजत्। स्वामित्वेन स्थापयति॥ ॥इति द्वितीयस्य द्वितीये षड्विंशो वर्गः॥
॥ ॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋग्दाशतयाः प्रथमे मंडले एकविंशोऽनुवाकः॥ ॥द्वाविंशे
नुवाकेऽष्टौ सूक्तानि तत्राबोध्यग्निर्ज्मेति प्रथमं सूक्तं षडृचं दैर्घतमसं आश्विनं पूर्ववत् जागतं। अंत्ये तु उक्तत्वादिद
मपि जागतं अंत्ये द्वे त्रिष्टुभौ अबोधि षळाश्विनं त्वंत्ये द्वे त्रिष्टुभौ इत्यनुक्रमणिका। आश्विनशस्त्रे जागते छंदस्य
विनियोगः। अथाश्विन इति खंडे सूत्रितं। अबोध्यग्निर्ज्म एषस्य भानुरिति॥ ॥तत्र प्रथमा॥ अबोध्यग्निर्ज्म उ
देति सूर्यो व्यु१षाश्चंद्रा मह्यावो अर्चिषा॥ आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक्॥ अयं
मग्निर्विहितः सन् ज्मः ज्मया पृथिव्या वेदिलक्षणयाः संबंधी सन् अबोधि प्रबोधितः। ज्मेति पृथिवीनाम ग्मा ज्मे
ति तन्नामसु पाठात्। किं च सूर्य उदेति मही महती उषाः अर्चिषा प्रकृष्टेन तेजसा चंद्रा प्राणिनामाह्लादिनी स

द्वि॰ भा॰
॥१५३॥

र्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥ इति श्रीमहाराजाधिराजपरमेश्वर
वैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधुरेण मायेन विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
द्वितीयाष्टके द्वितीयोऽध्यायः॥२॥ ॥छ॥ ॥श्रीकृष्णार्पणमस्तु॥छ॥ ॥यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जग
त्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥अथ तृतीयाध्याय आरभ्यते॥ तत्र वसू रुद्रेत्येतदनुवाकापेक्ष
या द्वितीयं सूक्तं षडृचं दैर्घतमसं पूर्ववदाश्विनं त्रिष्टुभं अंत्यादिदमप्याश्विनं। अनादेशपरिभाषया त्रैष्टुभं दीर्घत
मा मामतेय इति। अंत्यानुष्टुप्। तथा चानुक्रांतं वसू षळंत्यानुष्टुबिति। अस्य विशेषविनियोगो लैंगिकः॥ ॥तत्र प्रथ
मा॥ वसू रुद्रा पुरुमंतू वृधंता दशस्यतं नो वृषणावभिष्टौ॥ दस्रा ह यद्रेक्ण औचथ्यो वां प्र यत्सस्राथे अकवाभि
रूती॥ ॥हे वृषणौ कामानां वर्षितारौ दस्रा अस्मद्वैरोध्यापक्षयितारौ हे अश्विनौ युवां नो अस्मभ्यं दशस्यतं
दत्तं दिशित्तं पूर्वं। वीरश्रो युवां वसू वासयितारौ स्वस्य प्रजानां वसुना धनेन तद्वंतौ वा मत्वर्थो लुप्यते। रुद्रा रुद्रौ

श्री
॥१५३॥

रुद्दुःखं तद्धेतुभूतं पापं वा तस्य द्रावयितारौ संग्रामे भयंकरं शब्दं कुर्वंतौ रुद्रौ रोतीति सत इति यास्कः। पुरुमंतू बहूनां त
तारौ मननीयौ वा दिवूक्तस्य प्रत्ययः॥ वृधंता वर्धमानौ एप्लोत्राद्दिनः अभिष्टौ आभिमुख्येन पूजितौ अभीष्टसाध
कौ वा इष्टगतौ ह लक्षणप्रसिद्धिद्योतनार्थः॥ किमर्थं दीयत इति चेत्। अहास्मात् औचथ्यः उचथ्यस्य पुत्रो दीर्घ
तमाः वां युवां रेक्णः धनस्कं तिव्याजे न प्रार्थयते यदर्थं अयं जनो यस्माद्रेक्णो हविर्लक्षणमन्नं वां युवां दास्यति।
ददातीति शेषः॥ यस्माद्वा अकवाभिः अकुत्सितैः ऊतिभी रक्षणैः सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदी
र्घः॥ प्रसस्राथे प्रसारयथाः प्रकर्षेण स्थः तस्माद्युवामस्य तं यस्मादभिमतप्रदानमस्माद्वायं प्रार्थयते ददातिवा
हविः तस्माद्युवामस्य तमित्यर्थः॥ ॥अथ द्वितीया॥ ॥को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे नमसा पदे गोः॥
जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरंता॥ ॥हे वसू वासयितारावश्विनौ वां युवयोः संबंधिन्यै
अस्यै वक्ष्यमाणरूपायै सुमतये चित् शोभनबुध्यै चेत् पूजायामप्यर्थे वा स्वल्पेनैव हविषा महतः फलप्रदानरूपा

द्वि॰भा॰

॥१५४॥

यै ईदृश्यै अपि बुद्ध्यैः प्रीणनाय को दाशत्। दानं कुर्यात्। युवयोः प्रभावस्यातिमहत्वादिति भावः। दाशतेर्लेट्यडागमः।
कथं स्तुमतेः सौष्ठवमिति तदुच्यते यद्यस्मात्कारणात् गोः पदे भूम्याः सर्वैर्गंतव्यायाः स्तुत्यायाः वेदिरूपायाः स्था
ने एतावती वै पृथिवी यावती वेदिरिति श्रुतेः। गौरिति भूनाम। तथा च निरुक्तं। गौरिति पृथिव्या नामधेयं यद्दूरंगता भ
वति। यच्चास्यां भूतानि गच्छंति गातेर्वौकारो नामकरण इति तादृगस्य नौ अस्माभिः प्रार्थितौ संतौ नमसा हविर्ल
क्षणेन यवमात्रप्रमाणेनान्नेन धेथे धारयथः वस्तुप्रदानविषयां बुद्धिं दधातेर्लेटि बहुलं छंदसीति विकरणस्य
लुक्। धातोर्भस्वत्वं। आतो ङित इतियादेशः। यस्मादेवं तस्मात् अस्मे अस्मभ्यं रेवतीः क्षीरादिधनवतीः पुरंधीः श
रीरवृत्त्यभिवृद्धिहेतूर्गाः जिगृतं उद्गिरतं ददतमित्यर्थः॥ कामपूरकेणेव मनसा सह चरंता चरंतौ यजमानस्य
कामाः पूरणीया इति कृतसंकल्पाविवेत्यर्थः। प्रा पूरणे। कामं प्रीणातीति कामप्राः आतोऽनुपसर्गे कः॥ ॥अथ तृतीया॥
युक्तो ह यद्वां तौग्र्याय पेरुर्वि मध्ये अर्णसो धायि पज्रः॥ उप वामवः शरणं गमेयं शूरो नाज्म पतयद्भिरेवैः॥ ॥स

श्री

॥१५४॥

षष्ठी॥ युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या राथ्येभिः॥ अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मन
सा ददाश॥ ॥हे अश्विनौ युवं युवां खलु भेषजेभिः भेषजैरौषधैर्भेषजौ भिषज भेषज्यान्यगदो जायुरगदं तन्त्रमौ
षधमिति वाभिधानात् तैर्भिषजा भिषजौ स्थः अत्र हशब्दः अश्विनौ हि देवानां भिषजावित्यादिप्रसिद्धिद्योतनार्थः
अथो अपि च राथ्येभिः रथवोढृभिः अश्वैः रथ्या रथवंतौ स्थः सर्वत्र रथो यो वां रथ अश्विनेत्यादिप्रसिद्धिद्योतना
र्थो हशब्दः अनयोर्विशेषसंबंधः युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवंतमिष्यतीत्यादिमंत्रांतरेषु प्रसि
द्धः। अथापि च युवयोः क्षत्रं बलं अधिकं खलु हशब्दः प्रसिद्धौ। यस्मादेवं तस्मात् हे उग्रावुद्गूर्णसामर्थ्यावश्विनौ वां
युवाभ्यां यो हविष्मान् आज्यपुरोडाशादिहविर्युक्तो यजमानः मनसा युष्मद्विषयेण यत्नेन चेतसा ददाश ददाति। हविरादि
कं तं धत्थः धारयथः अत्यधिकमनुग्रहीथ इत्यर्थः॥ प्रभूतबलौ युवां रथमारुह्य अस्मद्देवयजनमागत्य हविः प्रदं मे
धृत्वा अस्मद्यज्ञं अस्माल्लिति चिकित्सतमिति तात्पर्यार्थः॥ ॥इति द्वितीयस्य द्वितीये सप्तविंशो वर्गः॥ ॥छ॥ ॥वेदा

द्वि·भा·
॥१५५॥

दसितुमशक्नुवानाः स्वगर्भदासाः अग्नौ प्रदह्य हाय प्राचिक्षिपुः॥ तत्रक्षिप्तोऽश्विनावस्तावीत्। तौ च नमस्कृतौ॥ ततोऽप
क्रियमाणमुदकेषु प्रपातयन्। तत्र निमग्नः पुनरश्विनौ तुष्टाव तुष्टौ संतौ जलादुत्तार्य एवमवध्यं तं त्रैतनो नामक-
कश्चिद्दासो स्याशिरो वक्षश्चाविध्यत् ततोऽपपलायित इति तदिदं कर्म हृदयाभ्यामुच्यते। हे अश्विनौ उपस्तुतिं बु
ध्योपेयात् क्रियमाणस्तुतिरौचथ्यं उचथस्य पुत्रं दैर्घतमसं मां उरुष्येत् रक्षेत्। दाहादुपद्रवात् उरुष्यती रक्षा क-
र्मेति यास्कः। एवं सामान्येनोक्त्वा विशेषेण प्रत्युपद्रवरहितेन प्रार्थयते। इमे प्रसिद्धे पतत्रिणी पतनशीले पुनराव
र्त्तनशीले अहोरात्रे मा मां विदुग्धां विशेषेण दोहं गतसारं मा कार्ष्टां प्राणनिर्गमानुकूल्यं मा कुरुतामित्यर्थः॥
किंच मां दशतयो दशवारः। चितः राचितः सम्यक् संपादितः एधः प्रज्वालितेंधनसंचयो मा धाक्षीत्॥ मा धाक्षीत्
दुह तेर्लुङि सिचि हलंतलक्षणा वृद्धिः। बहुलं छंदसीति इडभाव हलूदुपधादि संयोगांत लोपो दुःसह दुःखप्राप्ति
र्दयति। इतेयद्यस्मात्त्वां युवयोः संबंधी अयं जनो बद्धः पाशोर्गादि वेष्टितः सन् त्मनि आत्मना क्षां भूमिं खादय

श्री
॥११५॥

ति॥ जंतुमशक्तः सन् भूमौ परिलुठंतीत्यर्थः॥ अस्मादुपस्तुति रौच्यथ्यमुरुष्येदिति। अस्याः पंचम्यादि नियोगमा
हक्षैंसौ न वा॥ आततायिनमायांतं दृष्ट्वा व्याघ्रमथो वृकं। नमागरमितिजपंस्तेभ्य एव प्रमुच्यते॥ त्रिरात्रो पो
षितो रात्रौ जपेद्यासूर्य दर्शनात्॥ आ पुत्र प्रयतः सूर्यमुपतिष्ठेद्दिवाकरं॥ पश्यंति तस्करानेनं तथान्ये पापबु
द्धयः॥ एकरात्रातीतेन तस्करेभ्यश्च रन्यथेति॥ ॥ अथ पंचमी॥ नमगरन्नद्योमातृतमा दासा यदीं सुसमु
ब्धमवाधुः॥ शिरो यदस्य त्रैतनो वितक्षत्स्वयं दास उरो अंसावपि ग्ध॥ ॥ न द्योनदन्नशीला मातृतमा मातृवज्ज
नतां हितकारिण्यः आपः मा मां दीर्घतमसं नगरन् नगरेयुः निमग्नं मा कुर्युः॥ गृ निगरणे लेटि व्यत्ययेन शपू गिर
ण प्राप्तिं दर्शयति॥ यद्यस्मात् दासाः अस्मदुपक्षयितारः मदीयगर्भदासाः एनं दीर्घतमसं मा सुसमुब्धं सम्यक् सुसंबु
द्धिभिस्त बंधि स्वती पूजायामिति प्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वं च अवाधुः अवाङ्मुखमयते यत् किं च
अस्य मम शिरः सत्रैतनः एतन्नामको दासः अयं तनिर्वृत्तः सन् यद्यस्माद् वितक्षत् विविधं तष्टवान् तस्मात्स

द्दासः स्वयं स्वकीयमेव शिरः तक्षतु। न केवलं शिर एवापि तु तदीयमुरः वक्षःस्थलं अंसौ च ग्रधः हतवान् विदारित
वानित्यर्थः॥ ॥अथ षष्ठी॥ दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे। अपामर्थं यतीनां ब्रह्मा भवति सारथिः॥
दीर्घतमाः एतन्नामा महर्षिः स च मामतेयः ममतायाः पुत्रः दशमे युगे दशयुगपर्यंतं स महानुभावः योनः प्रभा
वात्। पूर्वोक्तात् दुःखात् विमुक्तः अयं तस्करवीस्वपुत्रभार्यादिभिः सहितो जीवितवान् दशमे युगे ऽतीते सति जुजु
र्वान् जीर्णो वलीपलितगात्रो बभूव। एवंभूतः सन् अर्थं पुरुषैरर्थ्यमानं कर्मफलं स्वर्गादिकं यतीनां प्राप्नुवंतीनां अपां
कर्मणां प्रजानां यथा अपां अपसां कर्मणां अर्थं प्रयोजनं यतीनां तासां प्रजानां ब्रह्मा ब्रह्मसदृशः परिवृढो भवति।
किंच सारथिः तद्धुनिर्वाहको भवति देवो भवतीत्यर्थः। एवमस्य दृष्टांतं मंत्रो वदति। स्वयं वा स्वात्मानं परोक्षेण अ
श्विनोर्महानुभावत्वं प्रकटयितुं ब्रवीमि॥ ॥इति द्वितीयस्य तृतीये प्रथमो वर्गः॥ प्र द्यावेति पंचर्चं तृतीयं सूक्तं दैर्घ
तमसं जागतं द्यावापृथिव्यनुक्रांतं तथा नु प्र द्यावा प्रे पंच द्यावापृथिव्यं तु जागतं त्विति। अग्निष्टोमे प्रउगस्य षष्ठेहनि

त्रेतिहासमाहुः॥ तौग्र्य नाम कंचिद्राजानं युद्धे शत्रवः पराभूय पाशैर्दृढं बध्वा समुद्रमध्ये प्रचिक्षिपुः। स चोत्तरीतुम
शक्तः सन् अश्विनौ तुष्टाव तौ च तुष्टौ शीघ्रमेव रथमश्वैर्योजयित्वा समुद्रमागत्य तमुत्तार्य अपालयतामिति
अयमर्थः। अजोहवीदश्विना तौग्र्यो वां इत्यादिमंत्रांतरैः प्रसिद्धः सोत्रोच्यते। हे अश्विनौ वां युवयोः पेरुः पारण
कुशलो रथः युक्तो अश्विभिर्युक्तः खलु हनूघ्नो मंत्रांतरे प्रसिद्धिद्योतनार्थः। स चोदाहृतः कस्मै तौग्र्याय एतन्ना
म्नेशाते तद्बंधमोचनार्थं कुत्रेति तदुच्यते। अर्णः अंभसां मध्ये स च पज्रः पयसा बलेन जीर्णः सन् धायि धारितः
स्थापितः। यः समुद्रस्य मध्ये वां युवयोः अवः रक्षणं शरणं अनुगमेयं संप्राप्नुयां। अहितकुर्वाद्विमुक्तो युष्मत्
स्थानं भजेयं गतौ दृष्टांतः पतयाद्दुर्गमयाद्विरेवैरश्वैः शूरसेन इत्सरद्वत्सयथा अजमं जित्वा निर्भयं स्वगृहं प्राप्नो
ति तद्वत्॥ ॥अथ चतुर्थी॥ उपस्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धां॥ मा मामेधो दशतयश्चितो
धाक्प्र यद्वां बद्धस्त्मनि खादति क्षां॥ ॥अत्राख्यानमाहुः॥ जराजर्जरीकृतगात्रं जात्यंधं दीर्घतमसं मामतेयं परि

स्वीकुरुतः ॥ अथ द्वितीया ॥ उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्धवीमभिः ॥ सुरेतसा पितरा भूम चक्र
तुरुरु प्रजाया अमृतं वरीमभिः ॥ उत अपि च पितुः पितृस्थानीयस्य द्योः अद्रुहः अद्रोग्धुः न हि कदाचित्पि
ता स्वपुत्राय द्रुह्यति । तादृश्याः पृथिव्याः स्वतवः स्वायत्तबलं स्वयमेव बलात्स्वानुग्रहाय त्वरमाणं अ॰ तदेव महि महत्त
तादृशं अनुग्रहयुक्तं मनः चित्तं हवीमभिः हवनैः आह्वानैः मन्ये जानामि प्रसादयामीत्यर्थः । यथा तत्तादृशमुत्त
लक्षणं हवीमभिः हवनैः महि मन्ये । तथा मातुः सर्वस्योत्पादयितुरंतरिक्षस्य द्युलोकस्य मातांतरिक्षं निमित्तेभ्य
नुभूतानीति निरुक्तं यद्वा पितुर्द्युलोकस्य मातुर्भूम्याः द्यौर्वः पिता पृथिवी मातेति श्रुतेः । तत्तादृशलक्षणं मनो मन्ये
द्यावापृथिव्योः मनः स्मदाह्वानैः प्रणयामीत्यर्थः । किं च पितरा मातरा माता च पिता च पितरौ द्यावापृथिव्यौ सुरेतसा
शोभनसामर्थ्येन प्रजायाः यजमानादिरूपायाः वरीमभिः वरिष्ठैः रक्षणैः भूम बहुतरं उरु विस्तीर्णं
अमृतं अमरणभूतं अभिलषितं चक्रुः कुरुतः ॥ अथ तृतीया ॥ ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा

पूर्वचित्तये ॥ स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥ ते प्रसिद्धाः सूनवः युवाभ्यामुत्पन्नाः
पुत्रस्थानीयाः प्रजाः स्वपसः शोभनकर्माणः सुदंससः शोभनदर्शनाः युवां मही महत्यौ मातरौ इति कृत्स्नस्ये
जज्ञुर्जानन्ति महानुभावतामेव गच्छंतीति किमर्थं पूर्वचित्तये प्रथमं बुद्धाय अनुग्रहरूपाय । किं च ते द्यावापृथिव्यौ
स्थातुः स्थावरस्य जगतो जंगमस्य पुत्रस्य पुत्रस्थानीयस्य उभयविधस्य जगतः अद्वयाविनः न विद्यते द्वयं य
स्य तादृशस्य जीवनाय युष्मद्व्यतिरिक्तं अजानत इत्यर्थः । तादृशस्य कर्मणि धारणे रक्षणे निमित्तभूते सति
पदं स्थानं सत्यं अबाध्यं पाथः रक्षथः तत्र इत्यर्थः ॥ यद्वा ते प्रसिद्धाः सूनवः उत्पाद्यमानाः स्वपसः शोभनप्रक
राः कर्माणः सुदंससः शोभनदर्शनाः सुदृष्टपक्षे तेषां आत्मा स्वव्यापारस्य ईदृशाः रश्मयः मही महत्यौ द्यावापृ
थिव्यौ पूर्वचित्तये प्राणिनां पूर्वज्ञानाय जज्ञुः जानन्ति द्यावापृथिव्योरंतरालं व्याप्नुवन्तीत्यर्थः ॥ किं च स्थातुश्च जग
तश्च धर्मणि धारणे तदर्थं अद्वयाविनः मार्गद्वयरहितस्य बहुलं छंदसीति द्वंद्वाद्धा मत्वर्थीयो विनिः अ

द्वि·भा·
॥१५८॥

न्येषामविद्वत्यत इति दीर्घः पुत्रस्य युष्मत्पुत्रस्थानीयस्यादित्यस्य पदं मार्जसं पाथः अवश्यं रक्षथः॥ ॥अ
थ चतुर्थी। ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा॥ नव्यंनव्यं तन्तुमा तन्वते दिवि समु
द्रे अंतः कवयः सुदीतयः॥ ॥ते प्रसिद्धे द्यावापृथिव्यौ मायिनो मायाप्रज्ञा स्वविषयप्रज्ञानवंतः प्रज्ञोपलक्षित
कर्मवंतो वा सुप्रचेतसः सुष्ठु प्रकर्षेण चेतितुं ज्ञातारः रश्मयः ममिरे अभिमते। प्रमाणेन परिच्छिंदंति कीदृश्यौ ते जामी
परस्परं भगिनीस्थानीये तत्कुत इति चेदुच्यते। सयोनी समानोत्पत्तिस्थाने मिथुना प्राण्युत्पत्तये मिथुनीभूते
परस्परमवियुक्ते इत्यर्थः॥ समोकसा समाने। ओकः द्यावापृथिव्योरेकस्मिन्नेवावकाशरूपे आधारभूते स्थाने तत्समी
चीने स्थाने वा समोकसौ कवयः मेधाविनः स्वव्यापारविषयज्ञानवंतः सुदीतयः सुद्योतमानाः रश्मयो दिवि द्यो
तमाने समुद्रे अंतरिक्षे अंतरमध्ये समुद्रशब्दोंऽतरिक्षनामसु पाठात् तद्वचनः सचेवं व्याख्येयं निरुक्तः समुद्रः कस्मात्स
मुद्द्रवंत्यस्मादापः समभिद्रवंते तमापः संमोदंतेस्मिन् भूतानि समुनत्तीति वेति। नव्यंनव्यं तंतुं नित्यं विस्तार

श्री
॥१५८॥

च द्यावापृथिव्यनिधानमेतत्सूक्तं तथा चानुक्रांतं॥ प्रद्यावेति दैर्घतमसमिति। आद्या द्यावापृथिव्यवपाहविषो याज्या।
तथा च सूत्रितं॥ प्रद्यावा यज्ञैः पृथिवी ऋतावृधा मही लानो रुद्रो तनो मयस्कृधीति द्वे इति॥ सैषा सूक्ते प्रथमा॥ ॥प्रद्या
वा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा॥ देवेभिर्ये देवपुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः॥ ॥द्या
वापृथिवी द्यावापृथिव्यौ दिवो द्यावेति द्यावादेशः॥ आद्युदात्तं पृथिवी इत्यंतोदात्तं उभयं ततो दात्तः॥ देवताद्वंद्वे चेत्युभयपदप्र
कृतिस्वरत्वं। समाससमध्ये पदांतरपाठश्छांदसः अहं यजमानः तत्र निमित्तभूते हविः प्रदानार्थं प्रस्तुषे प्रकर्षेण स्तौ
मि पुरुषव्यत्ययः कीदृश्यौ ते ऋतावृधाय तस्य वर्धयित्र्यौ मही महत्यौ विदथेषु यागेषु प्रचेतसा प्रकर्षेण अस्मान् चेतयि
त्र्यौ अस्मान्निश्चेतयित्र्ये ता इत्यो प्रस्तुषे। अनयोः कोविषय इत्युच्यते। द्यावापृथिव्यौ देवेभिर्यजमानैः देवपुत्रे देवाः
यजमानाः पुत्रस्थानीयाः शुश्रूषकत्वं यो स्ते ते तादृश्यो यद्वा देवाः दिवि दिवि स्वदंससा दंस इति कर्मनाम शोभनकर्मो
पेत इत्था सेस इति सत्यनामसत्रा इत्थेति तन्नामसु पाठात् सत्यं धिया कर्मणानिमित्तेन कर्मसमाप्रभूषतः प्रकर्षेण

मितिसूत्रितत्वात् उक्थ्याभिप्लवषडहयोः द्वितीयेहनि वैश्वदेवे द्यावापृथिव्यं निविद्धानीयं चतुर्विंशेह्नि तृतीयसव
नमिप्लवाभिप्लविके। द्वितीयेहन्येतदिति दिष्टत्वात् आभिप्लविके द्वितीयादन्हः इहस्य द्वितीयेहनि एतत्सूक्तमतिदेश
तः प्राप्तं इत्यस्याभिप्लवे नोक्ते अहनी आ द्यौ आ द्याभ्यामिति सूत्रितत्वात् प्रथम। आश्विनशस्त्रे विनियुक्तं संख्य
तेष्टाविनो बत्रसूत्रितं। ते हि द्यावापृथिवी विश्वशंभुवा विश्वस्य देवीमृचयस्येति॥ ॥ सेषा सूक्ते प्रथमा॥ ॥ ते
हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी। सुजन्मनी धिषणे अंतरीयते देवो देवी धर्मणा सूर्यः
शुचिः॥ ॥ ते हि ते खलु प्रसिद्धे द्यावापृथिवी अंतरयोरंतराले शुचिः शुद्धः विश्वस्य शोचयिता वा देवो दीप्य
मानः सूर्यो धर्मणात्मनः प्रकाशोदकदानादि धारणेन युक्तः सन् ईयते सर्वदा गच्छति। ईङ् गतौ दैवादिकः।
तादृशं कर्म युवयोरनुग्रहादिति स्तुतिः। कीदृश्यौ ते। विश्वशंभुवा विश्वस्य सर्वस्य भावयित्र्यौ। यद्वा ते विश्वशंभु
वा विश्वस्य सुखयित्र्यावित्यर्थः। ऋतावरी ऋतवत्यौ ऋतमुदकं छंदसीवनिपाविति वनिप्। वनो र चेति ङी

प्॥ रजसः उदकस्य उदकं रजसी उदकं रज उच्यत इति निरुक्तं। धारयत्कवी अक्षयत्वेन धारकौ कवी ययो
स्तौ तादृशौ उदकस्य सादनायां प्रयत्नमंतावित्यर्थः। यद्वा धारयत् कविर्मनीषी आदित्यो ययोस्ते तादृशौ इत्यु
दकधारित्वि सूर्यायेनेत्यर्थः॥ सुजन्मनी शोभनजनन्यौ धिषणे धर्षणोपेते स्वव्यापारेषु प्रगल्भे इत्य
र्थः॥ देवि धिषणो तमाने। अत्र यद्यपि धिषणे इत्येतद् धिषणे रोदसी इति नामसूक्तत्वात् द्यावापृथिवी इत्य
स्य विद्यमानत्वा द्यौगिकं द्रष्टव्यं॥ ॥ अथ द्वितीया॥ ॥ उरुव्यचसा महिनी असश्चता पिता माता च भुव
नानि रक्षतः॥ सुधृष्टमे वपुष्ये न रोदसी पिता यत्सीमभि रूपैरवासयत्॥ ॥ उरुव्यचसा प्रभूतव्यंचन
वत्यौ अतिविस्तीर्णे महिनी महत्यौ असश्चता असज्यमाने परस्परं युक्ते इत्यर्थः। पिता पालयित्री द्यौः माता नि
र्मात्री पृथिवी चेत्युभे भुवनानि भूतजातानि रक्षतः पालयतः द्यौः पितः पृथिवी मातरित्यादिश्रुतेर्मातापितृरूप
त्वं। किंच सुधृष्टमे अतिशयेन धृष्टे छांदसस्तमप्रत्ययः प्रगल्भौ रोदसी द्यावापृथिव्यौ वपुष्ये न वपुष्येति तेन

द्वि॰भा॰
॥१६०॥

प्राणिनां पितराविश्वशरीररक्षके इत्यर्थः॥ तदेवोपपादयति। यद्यस्मात्सीं सर्वतः पिता पितृस्थानीया द्यौरूपैः
निरूपणसाधनैः प्रशस्तैः प्रकृष्टैः निरूप्यमानैः वृष्ट्यादिभिर्द्यौ अभ्यवासयत्। अभिवासयति। अधितिष्ठ
ति। तस्मात्पिता माता च भुवनानि रक्षतः॥ ॥अथ तृतीया॥ स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुव
नानि मायया॥ धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत॥ ॥पित्रोर्मातापित्रोः द्यावापृथि
व्योः पितामात्रेति पिता पुत्रिषु ते उदात्तयण इति पितुर्विभक्तिरुदात्तः पुत्रः पुरुत्राता तयोः पुत्रस्थानीय आदित्यः
पवित्रवान्। पावनरश्मियुक्तः धीरः धीमान् स वह्निः पूलस्य वोढा धारकः सन्मायया प्रज्ञया स्वकीयया भुवनानि
भूतजातानि पुनाति पावयति प्रकाशयतीत्यर्थः॥ किंच पुनः पृश्निं शुक्लवर्णं धेनुं प्रीणयित्रीं भूमिं सुरेतसं शोभन
सामर्थ्यं शोभनोदकं वा वृषभं सेक्तारं द्युलोकं च मायया पुनाति प्रकाशयतीत्यर्थः। कुदा विश्वाहा सर्वाण्यहानि सा
र्वकालमित्यर्थः॥ किंच अस्य द्युलोकस्य यद्वा कर्मणि षष्ठी। इमं द्युलोकं शुक्रं दीप्तं पयः सदृशमुखैर्दवं धुक्षत।

श्री
॥१६०॥

णीयं जगत्सेव्वचनं रश्मिना तन्वते समन्तात् विस्तारयन्तीति॥ ॥अथ पंचमी॥ तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य
प्रसवे मनामहे। अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमंतं शतग्विनं॥ ॥वयं यजमानाः सवितुः सर्वस्य
प्रसवितुः देवस्यादित्यस्य प्रसवे मनामहे। अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमंतो अंतर्यामिरूपि
णः प्रसवे अनुज्ञायां सत्यां तत्तादृशं वरेण्यं वरणीयं राधः पुरुषार्थसाधनसमर्थं गवादिधनं मनामहे याचाम
हे। मन्यतिर्याञ्चाकर्मा छांदसः लुङ्। यद्वा पुनः पुनरभ्यासस्थाः लप्सीमहि इति यावत्। लाभ्यासे व्यत्ययेनात्मने
पदं॥ लपि पाघ्रादिना मनादेशः॥ किंच अस्मभ्यं द्यावापृथिवी द्यावापृथिव्यौ सुचेतुना शोभनचेतनेन अस्मदनु
ग्रहबुध्या रयिं धनं धत्तं कीदृशं वसुमंतं निवासयोग्यगृहादिविशिष्टं शतग्विनं शतसंख्याकगवादिविशिष्टं॥ ॥
इति द्वितीयस्य तृतीये द्वितीयो वर्गः॥ ते हीति पंचर्चं चतुर्थसूक्तं दैर्घतमसं जागतं द्यावापृथिवीयं ते हीत्यनुक्रांतं
चतुर्वेशो हनि वैश्वदेवशस्त्रे द्यावापृथिव्यनिविद्धानमेतत्सूक्तं ते हि द्यावापृथिवीयं स्य वो रथ्यमिति वैश्वदेव

ऋ॰भा॰
॥१६१॥

सभ्यासस्य नुट्। यस्मादेवं तस्मादयमेव देवः अयमेवापस्तम इति। एवं महानुभावेन परमेश्वरेणोत्पन्ने इति श्रुतिः॥ ॥अथ पंचमी॥ ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावा पृथिवी धासतो बृहत्। येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतं॥ ॥ते प्रसिद्धे द्यावापृथिवी द्यावापृथिव्यौ गृणाने अस्माभिः स्तूयमाने सत्यौ कर्मणि कर्तृप्रत्ययः। महि महत् अतिप्रभूतं श्रवः सर्वत्र प्रसिद्धमन्नं सर्वत्र श्रूयमाणकीर्तिर्वा नोऽस्मभ्यं धासथः धत्तं दधातेर्लेट्यडागमः सिब्बहुलं लेटीति सिप्। तथा बृहत् महत् अतिप्रभूतं क्षत्रं बलं धासथः। तदेव विशेष्यते। येन बलेन विश्वहा सर्वदा वयं कृष्टीः पुत्रादिरूपाः प्रजाः अभिततनाम अभितो विस्तारयाम॥ तनोतेर्लोटि छांदसो विकरणस्य श्लुः। आडुत्तमस्य पिच्चेत्याडागमः तस्य छंदस्युभयथेत्यार्धधातुकत्वात्। तदभ्यस्तादाद्युदात्तत्वं भावे धातुस्वरः। कृष्टय इति मनुष्यनाम कृष्टयः चर्षणय इति तन्नामसु पाठात्। किंच पनाय्यं स्तुत्यं तुजः ओजिष्ठं बलं अस्मे अस्मासु समिन्वतं। व्याप्नुतं प्रवर्तयतमित्यर्थः। इति व्याप्तिवचनः इन्वतिर्नन्तकर्मा इति तन्नाम

श्रीः
॥१६१॥

सुपाठात्॥ इति द्वितीयस्य तृतीये तृतीयो वर्गः॥ किमु श्रेष्ठ इति चतुर्दशर्चं पंचमं सूक्तं दैर्घतमसं आर्भवं अंत्या त्रिष्टुप् शिष्टा जगत्यः त्रिष्टुबंतपरिभाषया जगत्यः। अनुक्रांतं च। किमु श्रेष्ठः षलुनार्भवं त्रिष्टुबंतमिति। व्यूहे दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्रे आर्भवनिविद्धानं। हि प्रतीकं तत्र किमु श्रेष्ठ इत्येतदंतवर्जं प्रतीकं व्यूहे श्वेति खंडे सूत्रितं। किमु श्रेष्ठ उपनोगा जा इति त्रयोदशार्भवं च तस्य श्वेति॥ ॥तत्र प्रथमा॥ किमु श्रेष्ठः किं यविष्ठो न आजगन् किमीयते दूत्यं१ कद्यदूचिम। न निंदिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम॥ ॥ऋभवो नाम सुधन्वनस्त्रयः पुत्राः ऋभुर्विभ्वा वाज इति ते च मनुष्याः संतः कर्मणा देवत्वं प्राप्य कदाचित्कर्मकाले सोमपानाय प्रवृत्ताः तान्प्रति देवैः प्रेरितोऽग्निः परस्परं समानरूपान् दृष्ट्वा स्वयमपि तदाकारं धृत्वा तेषु मध्ये स्वयं चतुर्थः सन् पातुं प्रवृत्तः ते च ऋभवः आगतं समानरूपं अवलोक्य विवेक्तुमसमर्थाः परस्परमेव संदिहते। अयं किमु श्रेष्ठः किं नु खलु अस्माकं योऽयं प्रशस्यतमः वयसोऽस्मत्तो जगत् आगमन् प्राप्तः। गमेर्लङि छांदसः शपः श्लुः। हल्ङ्या

द्वि॰भा॰

॥१६२॥

दिलोपेन मोनो धातोरिति नत्वं ॥ अजगन्निति कर्म । अगन्नजगन्निति तन्नामसु पाठात् । किंयविष्ठः किंवो युष्मा
कं युवतमः अस्मत्सः दूनीयान् आजगन् प्राप्तः । किंवा इदं इत कर्म देवसंबंधि रीयते गच्छति देवैः प्रेरितोस्मानाग
तो वा इतस्य भाव कर्मणी इति यत् । यदूचिम यदेतद्रूमः न त्वाकृत कूथं । कूथं निश्चेतव्यमित्यर्थः । वयं तावत् अत
एव इदानीं चत्वारः समानरूपा वर्त्तामहे तस्मात् इयं मध्ये कः किमुश्रेष्ठ इति विचिकित्सा । एवं संदिग्धं कूथं चि
त्रत्वतोन्यं निश्चिय तं प्रत्य परोक्षेण ब्रुवते हे अग्ने भ्रातः भ्रातृवत् द्रुणार्हः भ्रातः यथा बलात् स्वकीयभागं स्वी
करोति तद्वत् समानरूपमाश्रित्य बलाच्चमसपानाय प्रवृत्त इति भ्रातरित्युक्तं ॥ हे लाइ द्राग्ने चमसं निंदिम अन
धिकः समागत इति पानमत्तत्वाच्चमसं न दूषयामः किंतु स्तुमः । छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः । अ
दूष्यत्वे कारणमाह ॥ यश्चमसो महाकुलः महाकुलोत्पन्नः त्वष्ट्रा निर्मितत्वात् वक्ष्यति च त्वष्टाग्नास्वं तत्पनजं
इति अतः कारणात् द्रुणविकारे प्रकृतिशब्दः ततश्च तस्येत्यच्छब्दः दारुविकारस्य मस्य भूमिप्राप्तिमदिम ब्रूमः । वि

श्रीः

॥१६२

दोग्धि । दुहेश्छांदसे लुङि । शल इगुपधादनिटः क्स इति क्से । क्सादेशः । ईदृशो महानुभाव आदित्यस्तयोः पुत्र इति
द्यावापृथिव्योः स्तुतिः ॥ ॥अथ चतुर्थी ॥ अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशंभुवा ॥ वियो ममे
रजसी सुक्रतूययाजरेभिः स्कंभनेभिः समानृचे ॥ ॥सूर्यपुत्र महात्म्येनैव प्रशंसेदानीं स्वोत्पादकस्य प्रशं
सति । अयं देवानां मध्ये देवतमः अपसां अप इति कर्मनाम तेन तद्वां लक्ष्यते । कर्मवतां मध्ये प्रकृष्टकर्मा अयमिक
कं कर्त्तमाह । यो देवो विश्वशंभुवा सर्वप्रकारेण भूतानां सुखस्य भावयित्र्यौ रोदसी द्यावापृथिव्यौ नमिर जसी स
दसी इति तन्नामसु पाठात् उक्तरूपे विममे विशेषेण परिच्छिन्नवान् । किं तत्स्वोपभोगाय नेत्याह सुक्रतूययेत्यभि
कर्मेच्छया येन कर्मणा प्राणिनां सुखं भवति तादृक्कर्मेच्छया अथवैतदुत्तरत्र संबध्यते । सुक्रतूययोक्तेन निमि
त्तेन ते द्यावापृथिव्यावजरेभिः अजीर्णैः ईदृतरैः स्कंभनेभिः गतिप्रबंधसाधनैः शंकुभिः समानृचे सम्यक्
सर्वतः पूजितवान् स्थापितवानित्यर्थः ॥ ऋच स्तुतौ लिटि रेफसामान्यात् द्विहलत्वमस्ति । तितस्मान्नुट् द्विहल इ

एकस्मादश्वात् अश्वतरं कर्तव्यमित्यर्थः॥ अश्वादश्वमतक्षतेति वक्ष्यमाणत्वात् तुमर्थे तवैकेनिजित्वत्
प्रत्ययः। उत अपि च रथः कर्त्वः कर्तव्यः धेनुः कर्त्वाचि कृमरिति ता मृतागौः नित्यदोग्ध्री पुनर्नूतना कार्या। तदुक्तमत्र
निश्चर्मणो गामरिणीत धीतिभिरिति वक्ष्यमाणत्वात्। तथा द्वौ पितरौ जीर्णौ संतौ पुनर्युवत्वायुवानौ प्रकृत्ये
वनोपेतौ कर्त्वौ कर्तव्यौ हे भ्रातरग्ने युष्माकं देवानां निरूप्य निर्माणि कृत्वा अनुपश्चात् कृत्वा कर्मणा एमसि ए
मः आभिमुख्येन प्राप्नुमः इति गतो। इदंतो मसिः यद्वा ऋषेरिदं वाक्यं हे ऋभवो यूयं आगत अग्निदूतं प्राप्ते
यदब्रवीत नय तत्कार्यं वक्ष्यमाणरूपं कर्तव्यत्वेन वदथ अंगीकुरुथ तानि सर्वाणि संपाद्य हे भ्रातरग्ने कृत्वा कर्म
णा एमसीति ब्रूथेति ऋषिराह॥ ॥अथ चतुर्थी॥ चकृवांस ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजग
न्॥ यदावाख्यच्चमसांश्चतुरः कृतानादित्त्वष्टा ग्नास्वंतर्न्यानजे॥ ॥हे ऋभवः तत्तत्कार्यं यथा चकृवांसः कृ
तवंतो यूयं अपृच्छत प्रश्नं कुरुत। कुरोतेर्लिटः क्वसुः अत्र यद्यपि ऋभुरिति त्रयाणां मध्ये एकस्य नामत ॥१६३॥

थापि तस्य प्राथम्यात् छत्रिणो गच्छंतीतिवत्सर्वे ऋभव उच्यंते॥ किमिति यः स्य दूतः क्वेदभूत् कुत्र गतः इयत्तं कु
रु याहु। यश्चो दूतो नो अस्मान् आजगन् आगमत् प्राप्तः एवंभूते सति यदा ये त्वष्टा चतुरः कृतान् चमसा
न् अवाख्यत्। अभिपश्यति ख्याते लुङि अस्यति वक्ति ख्यातीति च्लेरङ् ख्यादेशः आत् अनंतरमे
व त्वष्टा यमात्मानं मन्यते इत्यर्थः अंजेर्लिटि तस्मान्नुड् द्विहल इति नुट् छांदसो नुनासिक लोपः॥ ॥अथ पं
हनामैनां इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिंदिषुः॥ अन्या नामानि कृण्वते सुते सचा अन्यैरेनान्
न्यारु नामभिः स्परत्॥ ॥एनान् वक्ष्यमाणान् हनामेति यद्यदा अब्रवीत् त्वष्टा पूजार्थं बहुवचनं एतच्छ
ब्दस्य प्रकृतपरामर्शकत्वात् ऋभूणां प्रकृतचमसं मनुष्या ऋभवः स्वीकृत्य चतुर्धा व्यभजन् तानेनानि
ति यदाब्रवीदित्यर्थः। तदा प्रभृति मनुष्याः सुते अभिषुते सोमपानाय प्रस्तुते सति सचा सह परस्परं
अन्यानामानि अन्यानि होत्रध्वर्य्वादीनि कृण्वते कुर्वंति पूर्वनाम प्रच्छाद्योपहवकाले अध्वर्युर्यो पहृयस्व

होतृरूपस्य त्वेर्येवमन्यैरेवनामभिः आत्मानं त्वष्टृवधमीत्याप्रापयंतीत्यर्थः ॥ स्पृ प्रीतिचलनयोः लेट्यडागमः ॥
॥ इति द्वितीयस्य तृतीये चतुर्थो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ इंद्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामु
पाजत ॥ ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥ ॥ पूर्वस्तृचानां क्रमेण त्रिनियोगमाह ॥ इंद्रो
हरी युयुजे एतन्नामानावश्वौ रथे योजितवान् ॥ तथा अश्विना अश्विनौ रथं योजितवंतौ । तथा बृहस्पतिः । बृ
हस्पतिर्मंत्रस्य पालयिता एतन्नामको देवो विश्वरूपां नानारूपोपेतां गां उपाजत । उपागमत । स्वीकृतवानित्यर्थः ।
यद्यप्यत्र गोरिति विशेष्यो न श्रुतः । तथापि पूर्वत्र धेनुः कर्त्वेति उक्तत्वात् पुरस्तात्त्रये धेनुं विश्वजुवं विश्वरूपामि
ति वक्ष्यमाणत्वाच्च विश्वरूपा गौरित्येवाध्यवसीयते । अत एव विश्वरूपामित्यस्याः स्वरूपं त्रिरिति वचनया वक्ष्य
ते तदस्मदासुष्मत्संपादितानि अश्वरथादीनि इंद्रादयः स्वभागत्वेनाकल्पयन् । तस्मात् ऋभुर्विभ्वा वाज
श्च यूयं देवादीनिंद्रादीनागच्छत गत्वा हे स्वपसः शोभनाश्वरथादिकर्मवंतो यूयं यज्ञियार्हं यज्ञसंबंधिनं

देः छांदसे लिटि वाचि स्वपीति संप्रसारणं कृदिति नियमादिट् ॥ ॥ अथ द्वितीया ॥ एकं चमसं चतुरः कृणोतन तद्वो
देवा अब्रुवन् तद्व आगमं ॥ सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ ॥ ॥ एवं पृष्टोऽग्निः तान्प्र
त्युवाच । हे सौधन्वनाः सुधन्वनः पुत्राः यूयं एकं चमसं त्वष्ट्रा संपादितं पूर्वमेकमेव संतं चमसं चतुरः कृणोत
न ॥ चतुःसंख्याकान्कुरुत । चतुरः कृसीयंतोद्गित्वं पूर्ववत्तनप् ॥ यथा उपरितने ज्येष्ठ आह ॥ चमसाद्वौ
करोतीत्युपक्रम्य ज्येष्ठ आह ॥ चतुरः करेतीति च तुष्टनिरूपं कर्म देवा इंद्रादयः अब्रुवन् हे अग्ने प्राप्नुयाम तत्ता
दृशं कर्म वक्तुं अहं आगमं प्राप्तोऽस्मि । यस्मादेवं तस्मात् यूयं यद्येवा करिष्यथ यद्येवमुक्तप्रकारेण कर्म कुरुथ ।
तथा चेत् देवैः साकं सह यज्ञियासो भविष्यथ इति तैरुक्तमित्यर्थः ॥ ॥ अथ तृतीया ॥ अग्निं दूतं प्रति यदब्रवीत
नाश्वः कर्त्वो रथ उतेह कर्त्वः ॥ धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि ॥ हे आगत देव अग्निं अंगन
रिसुणग्विज्ञिष्टं दूतं कर्म प्राप्तवंतं त्वां प्रति यद्यत्कार्यं अब्रवीत नयस्य येन मध्यमः पूर्ववत्तनप् गिरिमिति अश्वः कर्त्वः

द्वि॰भा॰

॥१६५॥

त्वनः पुत्रा यूयमिदमुदकं सोमलक्षणं पिबत इत्यब्रवीतन इद्ऋभवंतः ब्रवीतेर्लोटि मध्यमबहुवचनस्य तनबादेशो
पित्वात् ब्रुव ईट्। एतस्मात् सवनिकाभिप्रायं वा। अथवा इदं मुंजनेजनं मुंजवान्नाम पर्वतः सोमो यत्र स्थाने त
तआहृतः तस्मात्तेन मुंजकृणेन शोधितं अपगततृणमित्यर्थः। इदं सोमरसरूपमुदकं पिबतेत्यब्रवीतन एतन्माध्यं
दिनसवनाभिप्रायं। हे ऋभवः यूयं तत् उभयसवनसंबंधि सोमपानं पूर्वं नैव हर्यथ नैवाकामयथ। हर्यतिः कांति
कर्मा। हर्यति उशदिति तन्नामसु पाठात्। तृतीयसवने तु मादयध्वै। अस्यर्थं तृप्ता भवथ। ऋभवो देवाः सोमस्य भक्ष
न्तीति तृतीयसवने तेषां सोमसद्भावात्। एवं यूयमृभून् ब्रुवंतः अथवा ऋभून्प्रति तस्येदं वाक्यं हे सौधन्वना यू
यं देवत्वं प्राप्य देवयजनं प्रति सोमपानाय रथेनागमिष्यथ। तावत् प्रातःसवन इदमुदकं सोमलक्षणं पिबतेत्यब्र
वीतन तत्र यद्दिने च्छथ इदं वा मुंजनेजनं मुंजेन वा तृषितं वा जिनं पिबतेत्यब्रवीतन पश्चात् द्वितीयदिने वर्यथ हे ऋ
भवः यूयं तृतीयेसवने मादयध्वै। तत्रापि वाजिनप्रचारात्। ॥अथ नवमी॥ आपो भूयिष्ठा इति चमसवदुध

श्री

॥१६५॥

तद्धिरणक्राले वृक्षिमिति सस्संवदंते योभ्यभजन्निति तदाह। एवं त्रयाणां मन्यते॥ आपो भूयिष्ठा इत्येको अब्रवीदग्नि
ग्निर्भूयिष्ठ इत्यन्यो अब्रवीत्। वधर्यंतीं बहुभ्यः प्रैको अब्रवीदृता वदंतश्चमसाँ अपिंशत॥ ॥ अंतरं बाह्यं दका
त प्रशस्तप्रकारं तत्तंतरमस्ति। आपो भूयिष्ठा इत्येतमवादीत्। अपामेव श्रेष्ठत्वं अप एव ससर्जादाविसादिश्रु
त्वात्। तथान्योग्निर्भूयिष्ठ इत्यन्यः तथान्यः वधर्यंतीं वधयितिरेकं तोपि वज्रनामवधः अर्द इति तन्नामसु पाठात्।
तद्दिछति रेकदकूयेति वधर्यं मिघं पंक्तिरुच्यते। यद्यपीयं स्वव धर्यं वज्रं स्वयमेव नापेक्षते। तथापि दृष्टार्थमेवेंद्र
वज्रेण हन्यमानत्वात् जदिष्टती रूपवीयते। यद्वा बहुभ्यस्तेषामर्थाय वधर्यंतीं वधमात्मनः इच्छंतीं भूमिं इच्छंदसो रेको
पजनः तमेव केः बहुभ्यः संवादिभ्यः श्रेष्ठतमामब्रवीत्। उदकस्यापि मेघकारणत्वात्। एवमृता ऋत्विन उरू
पाणि यथार्थानि वाक्यानि वदंतः परस्परं वदंतः परस्परं ब्रुवंतः चमसान् अपिंशत। अवयववितो कुरुत। चतुर्धा
व्यभजंतेत्यर्थः। पिशिः अवयवे ईगमुचादीनामिति नुम्। इदमेव ऋतवदनमपेक्ष्य ऋभुशब्दव्याचक्षाणो यास्कः ऋभव

द्वि·भा· उरुभांतीति वर्त्तनेन भांतीति वर्त्तनेन भवंतीति वेती सूक्तं लाह ॥ ॥ अथ दशमी ॥ श्रोणामेक उदकं गामवाजति मांसमे
॥१६६॥ कः पिंशति सूनयाभृतं ॥ आ निम्रुचः शकृदेको अपाभरत् । किं स्वित्पुत्रेभ्यः पितरा उपावतुः ॥ अत्र ऋभव एव ऋत्वि
ग्रूपेण स्थित्वा सर्वत्र यज्ञं निर्वहंतीत्याह । श्रोणां श्रोणं वा छंदसीति पररूपाभावः । श्रोणवर्णमुदकं रुधिरं एकः
ऋभुषु मध्ये ऋत्विक् गामवाजति ब्रह्मा भूमिं प्रतिगमयति । रक्षोभागत्वेन स्थापयति । तथा एको मांसं सूनया छे
दनसाधनेन स्वधितिना तत्तदवयवशा नुविभजतीत्यर्थः । अथैको निम्रुचः निःशेषेण स्थितान् मांसान् संकृत कुक्षि
स्थजरत्तृणं उवध्यनामकं अपाभरत् । अपाहरत् । निरसनाय एवमृत्विग्रूपेण स्थितेभ्यः पुत्रेभ्यः पुत्रस्थानी
येभ्यः ऋभुभ्यः सवनेष्वनुष्ठितेषु पितरा यजमानस्य पालयितारौ जायापती किं स्विदुपावतुः । किं नु खलु प्राप्नुतः । अवातः
प्राप्त्यर्थात् छांदसो लिट् सर्वैस्तैरेवानुष्ठितमिति तयोर्न किंचित्कृत्यमस्तीत्यर्थः । अथवायमर्थः एवंकृत्स्नेषामन्यत
मः श्रोणां पशुकुंगां उदकं प्रत्यपगमयति । अपरः सूनया मांसविकृत्य पिण्याभृतं संपादितं मांसं पिंशति पिंशतेः अप श्री: ॥१६६॥

भागं सोमरूपं देवत्वं प्राप्तैः सेवनीयं एतेन प्राप्तेन कर्मसामर्थ्येन हविर्भुजो भवंतीत्यर्थः इत्येवमृषिराह ॥ ॥ अथ
सप्तमी ॥ निश्चर्मणो गामरिणीत धीतिभिर्या जरंता युवशा ताकृणोतन ॥ सौधन्वना अश्वादश्वमतक्षत यु
क्त्वा रथमुप देवाँ अयातन ॥ हे सौधन्वाः यूयं निश्चर्मणः मृताया गोः सकाशात्कृताच्चर्मणः गां नूतनां निररिणी
त निरगमयत । उत्पादितवंतः तेन चर्मणा संवीतां तस्य दर्शीमन्यां धेनुं कृतवंत इत्यर्थः । यद्यपि पूर्वमेवाश्वा
दीनां विनियोग उक्तः तथापि तेषामत्यंत दुःखसंपादत्वं ज्ञापयितुं पुनराह । न केवलं गोकरणमेव या जरंता यौ जी
र्णौ पितरौ युवशा युवानौ कृणोतन अकुरुत । किंच अश्वादश्वं एकेन विद्यमानेन अश्वेन अश्वांतरमतक्षत । प्रयत्नेन संपा
दितवंतः । यस्मादेवं कृतवंतस्तस्माद्रथं युष्मदीयं युक्त्वा अश्वैर्योजयित्वा देवानिंद्रादीनुपयात देवसमीपं प्राप्नुतं ॥ ॥
अथाष्टमी ॥ इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुंजनेजनं ॥ सौधन्वना यदि तन्नेव हर्यथ तृतीये घा स
वने मादयाध्वै ॥ ॥ इदानीमृषिर्देवैरुक्तमर्थं तान्संबोध्य भूयः सवनमुक्तवंतः इत्यनुवाचयति हे सौधन्वनाः ऋभ

प्रदेशेषु अस्मा एव अपउदकान्यकृणोतन॥ किं स्विभोगोर्थं नेसाह॥ स्वपस्यया शोभनकर्मेच्छया शोभनं कर्मेभिः कृ
तमिति यजमानाः स्तुवंति॥ तदिच्छयेत्यर्थः। किंच यूयं अगोह्यस्य अग्राह्यस्यादित्यस्य गृहे मंडले यत्तया वत्कालं अ
स्तन स्वपवंतः। स्वरात्रौ निर्याण रास्तिष्ठथ। षस् स्वप्ने। अस्माल्लुङि पूर्व वन्तस्यनत्वादेशः अदादित्वाच्छपो लुक्। तत्ता
वंतं कालं अद्याह। निरुद्दं इदानीं नानुगच्छथ अनुसृत्य न गच्छथ। यावंतं पूर्णं रात्रौ सूर्यो निगूढा वर्तध्वे तावंतं कालमेव
अहन्यपि नानुपगच्छथेत्यर्थः॥ यद्वा गोपनीयस्य तस्य गृहे अंतरिक्षे यत्तया वंतं कालं असस्तन तृष्टिमदत्वास्वपम
कुरुतात्तावत्कालं अद्येदानीं वर्षसमये सस्याभिवृद्धये वृष्टिप्रवाहरूपं कर्म नानुपगच्छथ अनुसृत्य न प्राप्नुथ या
वंतं कालं विवर्षथ तावंतमेव कालं प्रवर्षथेत्यर्थः॥ ॥अथ द्वादशी॥ ॥संमील्य यद्भुवना पर्यसर्पत क्वस्वित्तात्या पित
रा व आसतुः। अशपत यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन॥ ॥हे ऋभवो रश्मयो यूयं यत्स्यदा भु
वनाभूतजातानि संमील्य संमीलनं कृत्वा जलधरपटलैराच्छाद्य पर्यसर्पत। परितः सर्पणं कुरुथ। तात्यातातौ

तापमाने वृष्टुदकेय ह्वातात्या तात्स्ववर्षास्क छांदसत्वात्स्य प्रत्ययेपोकारस्यात्वं च अथवा पितृविशेषणं तात्या तावत्काली
नौ पितरौ जगतः पालकौ सूर्याचंद्रमसौ वा क्वस्विदासतुः कुत्र खलु तिष्ठतः॥ किंच ईदृशान् वो युष्मान् यः कोपि वृष्टिप्र
तिबंधकारी राक्षसादिः करस्नं बाहुं नामैतत् करस्नौ बाहू इति तन्नामसु पाठात् अत्राकारांतं युष्मदीयं हस्तं आददे गृण्हाति प्र
तिरोधं करोति तमशपत। नाशयथ। यश्च प्राब्रवीत्। प्रकर्षेण वचांसि निरुंधे तस्मै प्रोच्चैरब्रवीत प्रकर्षेण भर्त्सनादिक
कुरुथ यद्वा यो न स्तौति तं प्रकर्षेण स्तुतेत्यर्थः॥ ॥अथ त्रयोदशी॥ सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं
नो अबूबुधत्। श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत॥ ॥हे ऋभवो रश्म्यात्मका यूयं सुषुप्वांसः
आदित्यमंडले स्वपतो वर्षणाय स्वपेर्लिटः क्वसुः तत् तमादित्यं तद्वाक्यमपृच्छथ। प्रश्नं कुरुथ किं तदित्युच्यते। हे अगो
ह्य केनचिदगोपनादित्य स्वामिन् वो युष्मदीयमिदं कर्म वर्षणरूपं को अबूबुधत्। बोधयति। प्रेरयति। साहाय्यं करोति।
बुध्येर्ण्यंतस्य लुङि चरूपं बस्तः सर्वस्य वासयिता आदित्यः वसेरौणादिकः स्तप्रत्ययः वबयोरभेदात्। बस्तं बोधयितारं

श्वानमब्रवीत् । अंतरिक्षे स्वसंतं वायुं प्रावादीत् । असौ युष्मान् प्रेरयतीति । अथ वायुसहायेन वर्षंते यूयं संवत्सरे पूर्णे
अद्येदानीं जगत् व्यख्यत विविधं प्रकाशितवंतः पूर्वं सूर्याचंद्रमसौ यथा दृश्येते तथा च तदानीं वर्षाकालेऽतीते विश्वं ज
गद्योतं कुरुतेत्यर्थः । ख्यातेर्लुङि अस्यतिवक्तिख्यातिभ्योऽङ् ॥ ॥ अथ चतुर्थीमाह ॥ दिवा यांति मरुतो भूम्याग्निरयं वातो अंतरि
क्षेण याति ॥ अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छंतः शवसो नपातः ॥ ॥ हे शवसो वृष्टिकार्यस्य बलस्य न पातो न पातयि
तारः ऋभवः युष्मानिच्छंतः वृष्ट्यनुकूलां चिकीर्षया युष्मानेवेच्छंतः सर्वे देवा आयांति । कस्मादिति तदुच्यते । मरुतः वृष्ट्य
नुकूला देवाः दिवा द्युलोकादंतरिक्षाद्यांति गच्छंति । अंतरिक्षादायाति । तथा वरुणः आवरको जलाभिमानी देवः समुद्रैः स
मुंदनस्वभावैरद्भिः ताभ्य आयाति । यद्वा पूर्वं वृष्टिसाहाय्यगता एते देवाः कृतकार्याः संतः पुनर्युष्मान् कामयमानाः
स्वस्वदेशं प्रयांतीत्यर्थः ॥ ॥ इति द्वितीयस्य तृतीये षष्ठो वर्गः ॥ ॥ मा नो मित्र इति द्वाविंशत्यृचं पंचमं सूक्तं दीर्घतमस
स्तृतीयाषष्ठ्यौ जगत्यौ शिष्टास्त्रिष्टुभः अश्वस्य स्तूयमानत्वाद्यत्तेनोच्यते । सा देवतेति अश्वो देवता । अत्रानुक्रमणिका मा

रः आ निम्रुचः अस्तमयादर्वाक् कृत्स्नं भुरीं विहरति । एवमृभुभिरनुष्ठिते सति किंचित् एतस्मात् परिचरणात् पुत्रेभ्यः
सकाशात् दुष्पावतुः उपगच्छेतामिति ॥ ॥ इति द्वितीयस्य तृतीये पंचमो वर्गः ॥ ॥ अथैकादशीमाह ॥ उद्वत्स्वस्मा अकृणोत
ना तृणं निवत्स्वपः स्वपस्यया नरः ॥ अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानुगच्छथ ॥ पुराणप्रसिद्ध्या सुध
न्वनः पुत्रान् कर्मणा देवत्वं प्राप्तवतो ऋभून् स्तुत्वा वेदप्रसिद्ध्या सूर्यरश्मिरूपान् ऋभून् बहुधा निरुच्यते । उदाहर
णत्वेन विष्ठीशामीयेतामु– यादित्यरश्मयो ऋभव उच्यंतरस्कन्नत्वात् तस्मिन्नर्थे एतामृचमुदजहार ॥ हे ऋभवः उरु
प्रभूतं भासमाना ऋतेन आदित्येन भासमाना वा ऋतेनोदकेन उदकार्थं मुत्सत्वा वा रश्मीनामुरुभासमानत्वं प्रसिद्धं । तथा
आदित्याद्रश्मिरपां उदकार्थं भवनमपि रश्म्यधीनं धर्मकाले भूमिगतं सारमादाय पुनर्वर्षाकाले प्रवर्षतीति प्रसिद्धं । आ
दित्याज्जायते वृष्टिरिति श्रुतत्वात् । तथा नरः प्रकाशवृक्षकदकादेर्नेतारो यूयं उद्वत्सु उन्नतेषु प्रदेशेषु मेघादिषु तृणं व्री
ह्यादिरूपं अस्मै प्राणिजाताय यदुपकारार्थं अकृणोत । अकृतवंतः । उपसर्गाच्छंदसि धात्वर्थ इति तथा निवत्सु प्रव

द्वि॰भा॰
॥१६९॥

अश्वस्य वीर्याणि वीरकर्माणि सामर्थ्यानि विदथे विदथे वेदनसाधने यज्ञे प्रवक्ष्यामः प्रकर्षेण ब्रूमः अतो मा परि ख्यन् न प्र
कृता गृह्णंत्वित्यर्थः॥ ॥अथ द्वितीया॥ यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयंति॥ सुप्राङजो मे
म्यद्विश्वरूप इंद्रापूष्णोः प्रियमप्येति पाथः॥ ॥निर्णिजा निर्णिगिति रूपनाम रेक्णसा रेक्ण इति धननाम निर्णिक्
वन्निर्णिजि रेक्णाः। रिक्थमिति तन्नाम संस्कृतात्। उभयत्र मत्वर्थो लुप्यते। रूपवता हिरण्यवता आभरणेन प्रावृत
स्य सर्वतो वेष्टितस्याश्वस्य मुखतः पुरस्तात् गृभीतां गृहीतां रातिं दातव्यां दातव्यत्वेन गृहीतामजां नयंति ऋत्विजः
सुतरां प्रांचनोजः सुप्राङ् सुष्ठु प्रकर्षेण गम्यमानः मेम्यत् मन्यमानः मीङ् हिंसायां। अस्माद्धातोः उत्सुगंता स्वकर्मणि यस्य ये
न शतृ। यद्वा तस्य शब्दानुकरणं ममेति शब्दं कुर्वन् विश्वरूपः वर्णपितः कृष्णग्रीवेत्युक्तत्वात् कृष्णलक्षणमावान्नैकव
र्ण इत्यर्थः। एवंरूपोयं इंद्रापूष्णोः इंद्रः प्रसिद्धः पूषा पोषको देवोग्निः तयोः प्रियं आग्नेयः कृष्णग्रीव इत्युक्तत्वात्।
अग्नेः प्रियत्वं सर्वेपींद्रस्येति इंद्रप्रियत्वं एवंरूपं पाथोन्नमप्येतु एतु प्राप्नोतु॥ ॥अथ तृतीया॥ एष छागः पुरो

श्री
॥१६९॥

अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः॥ अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति॥ ॥एष छा
गः शृंगरहितोजः अश्वेन वाजिना वेगवता पक्वेनाश्वेन सह पुरः पोषकस्याग्नेर्भागो भजनीयः विश्वदेव्यः सर्वदेवार्हः अ
ग्नेः सर्वदेवात्मकत्वात् तदर्हत्वेन सर्वदेवप्रियत्वं एवंविधोजः पुरस्तात् नीयते प्राप्यते। यद्यस्मात् एवं क्रियते तस्मादभि
यं प्रीणयितारं पुरोडाशं पुरस्तात् दातव्यमेनमजं त्वष्टा सर्वस्योत्पादको देवः त्वष्टा रूपाणि विकरोतीति श्रुतेः। पूर्णव्य
पक्वोग्निर्वा उभे त्वष्टुर्बिभ्यतुरित्युक्तत्वात् अरणिसंबंधोग्नेरेवेति गम्यते। अर्वता अरणवताश्वेन सह सौश्रवसाय देवानां
शोभनान्नं निमित्ते अभि जिन्वति प्रीतिहेतुं करोति॥ ॥अथ चतुर्थी॥ यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्य
श्वं नयंति। अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः॥ ॥हविष्यं हविर्योग्यं देवयानं देवानां प्रापणीय
ऋत्वि मश्वं यत् यदा मानुषाः मनुष्याः ऋतुशः ऋतौ ऋतौ काले त्रिः परिणयंति पर्यग्निं कुर्वंतीत्यर्थः। अत्रास्मिन्समये ऋत्वि
जः तु तु घेति दीर्घः पूष्णः पोषकस्याग्नेर्भागोजः प्रथमः एति पुरोगामी सन् गच्छति किं कुर्वन् यज्ञं देवेभ्यः प्रतिवेदयन् प्रख्या

पयन्॥ ॥अथ पंचमी॥ ॥होताध्वर्युरावया अग्निमिंधो ग्रावग्राभ उत शंस्ता सुविप्रः॥ तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्ष
णा आपृणध्वं॥ ॥होता देवानामाह्वाता एतन्नाम ऋत्विक् अध्वर्युरध्वरयुः अध्वरस्य नेता सोपि आवयाः आभिमु
ख्येन गमयिता अध्वर्योर्विशेषणमेतत्। आङ् पूर्वाद्वेतेः कृन्पूर्वपदप्रकृतिस्वरत्वं च यद्वा आभिमुख्येन हवींषि गम
यिता अवयरूप्रतिप्रस्थातोच्यते अवेयज इति ण्विन् अवापोरुपसर्गयोरित्यल्लोपः अग्निमिंधोग्नीत् दाध्वाद्याप्योरिं
धदूतिमुक्। ग्रावग्राभः ग्राहः स्तुत्या गृण्हातीति ग्रावस्तुत् बूर्मण्यण्। उत अपि च शंस्ता प्रशास्ता सुविप्र इति मेधाविनाम
शोभनमेधोपेतो ब्रह्मोच्यते। ब्रह्मा तो वदति जातविद्यामित्यत्र ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविद्या सर्ववेदि
तुमर्हतीस्मृतत्वात्। ब्रह्मैव सुविप्रशब्देनाभिधेयः स चावयाप्रयुता ऋत्विगुपलक्षणः एते सर्वे तेन प्रसिद्धेन स्वरंकृतेन
सुष्टु अरणीयेंकृतेन स्वलंकृतेन वा उच्चारसौष्टवादिना संपादितेन। स्विष्टेन सुष्टु इष्टेन यज्ञेन वक्षणाः अभितो
घृतकुल्यादीन्प्रहरणतस्वभावाः प्रसिद्धा नदीर्वा आपृणध्वं पूरयेत यज्ञं सम्यग्वृष्टिर्वर्षपूलं साधयतेत्यर्थः॥ ॥इति द्विती ॥श्रीः

॥१७०॥

मानो द्वाविंशत्यृचोश्वस्तुतिः तत्र तृतीया षष्ठी जगत्यावितिः। अश्वमेधस्य प्रथमेहन्यध्रिगुप्रैषे अध्रिगो शमीध्वमिति प्रैषा अ
स्मात्पुरस्तात्षड्विंशतिरस्य च ऋच इति वा मानो मित्र इत्यावपेतेति॥ ॥तत्र प्रथमा॥ ॥मानो मित्रो वरुणो अर्यमायुरिं
द्र ऋभुक्षा मरुतः परिख्यन्। यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि॥ ॥नोस्मान् अश्वं स्तोतुं प्रवृत्तान् मि
त्रादयो देवा मा परिख्यन्। परिख्यानं मा कुर्वंतु परिख्यानं नाम निंदा महानुभावं देवजातिं मर्त्यं तुष्टा नराः स्तुवंतीति तां मा
कुर्वंतु। ख्यातेर्माङि लुङि अस्यतिवक्तिख्यातिभ्योङ् इति च्लेरङ्। अहरभिमानी देवो मित्रः रात्र्यभिमानी वरुणः अर्यमा तयोरंत
रालाभिमानी आदित्यः आयुः सततगाभावायुर्वहेर्दुक्पृक्तो पावा इंद्रः प्रसिद्धः ऋभुक्षा देवानां निवासभूतः प्रजापतिः
यद्वेतन्महन्नामेंद्रविशेषणं ऋभुक्षा इति। तन्नाम स्कपाठात्। निंदायाः प्रसंगो दूरयति। यत् यस्मात् वाजिनो वेजनवतो
बाबलवेगवतो वा देवजातस्य बहुदेवतास्वरूपेणोत्पन्नस्य उषादीनामस्य शिर आद्यवयवत्वाभावः। उषा वा अश्वस्य मे
ध्यस्य शिर इत्यादिश्रुतेः। यद्वा देवेभ्यो जातस्य गंधर्वकुलउत्पन्नत्वात् सप्तेः सर्पणशीलस्य अश्वनामैतत् एवंविधस्या

ष्टो वा अस्यं तदृत्तम् इत्यर्थः॥ तादृशोयं देवानामन्नाः पूरयितुं उपगच्छतु यागार्थम् एते सुबंधुं शोभनमश्वं देवानामश्वास्य
मानानां पृष्टेपोषणे च सुकृमकुर्मः। तेन विप्रा मेधाविन ऋत्विजः ऋषयो तींद्रियद्रष्टारः अन्ये वा ऋषयश्चानुमदंति॥
अनुमोदंतां सम्यक्कृतमिति परितुष्यंतु॥ ॥अथाष्टमी॥ यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य।
यद्वा घास्य प्रभृतमास्ये तृणं सर्वा ता ते अपि देवेष्वस्तु॥ ॥वाजिनो गमनवतोऽश्वस्य यद्दाम ग्रीवाबध्या रज्जुः यच्च सं
दानं सम्यगवछेदकं पादबंधनं दामास्ति या चास्य शीर्षण्या शिरसि बध्या रशना खलीनरज्जुरस्ति शिरः शब्दाद्
वे छंदसीति यत्प्राये च तद्धित इति शीर्षन्भावः तिस्वरितं यद्वा अश्वस्यास्ये मुखे प्रभृतं प्रहृतं प्रक्षिप्तं तृणमस्ति घासशब्दो
दार्थे स च प्रसिद्ध इत्यर्थः। सर्वा सर्वाणि वा तानि सर्वाण्यपि हे अश्व ते तव संबंधानि देवेषु संतु तेषामर्थाय संतु॥ ॥अथ नव
मी॥ यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति॥ यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्व
स्तु॥ ॥

अथ दशमी॥ यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गंधो अस्ति॥ सुकृता तच्छमितारः कृण्वंतूत मेधं शृतपा
कं पचंतु॥ ॥उदरस्य संबंधि यदूवध्यं ईषज्जीर्णतृणं पुरीषमपवाति। अपगच्छति। यश्चामस्यापक्वस्य क्रविषो
गंधो अस्ति पाकस्य समापयत्वेपि ऊवध्यं अपक्वस्य लेशोऽस्ति आमगंधोऽस्ति। तत्सर्वं शमितारः विशसनकर्ता
रः सुकृता सुकृण्वंतु सुकृतं उक्तदोषरहितं कुर्वंतु। उत अपि च मेधं मेध्यं यज्ञार्हं पश्चवयवं शृतपाकं देवयोग्यपा
कोपेतं यथा भवति तथा पचंतु। पितृमनुष्यादियोग्यमपि पक्वमीषत्पक्वं च मा कुर्वंत्वित्यर्थः॥ ॥इति द्वितीयस्य तृ
तीयेऽष्टमो वर्गः॥ ॥अथैकादशी॥ ॥यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति॥ मा तद्भूम्या

द्वि·भा·

॥१७२॥

मा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ ॥ हे अश्व ते तवाग्निना पच्यमानात्तु गात्रात्तव यद्रूपं रसरूपं रसो वा यत्किं-
चिदवधावति। तथा निहतस्य निःशेषेण हतस्य ते तव यदंगं रसरूपं शूलमभिलक्ष्यावधावति निर्गच्छति। तत्त-
दंगं भूम्यां मा श्रिषत्। आश्लिष्टं माभूत्। श्लिषेः पुषादित्वादङ्। पाकसमये तथा मा तृणेषु तथा विशसनवि-
शसनसमये दर्भेषु मा श्रिषत् मा पतत्। तर्हि तत्पतितं कुत्र गच्छतीति चेदुच्यते। तत्तादृग्रूपं उशद्भ्यः उशन्ति
हविः कामयमानेभ्यो देवेभ्यो रातं दत्तमस्तु ॥ ॥ अथ द्वादशी ॥ ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्नि-
र्हरेति ॥ ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥ ॥ पक्वं वाजिनमश्वं अश्वावयवं परिपश्यं-
ति। परितः पचनं बुध्येक्षन्ते। यद्वा ये वैनं सुरभिः शोभनगंधो अतो निर्हर किंचित्तस्माद्भ्यं देहीत्याहुः। यद्वा निः-
शेषेण देवेभ्यो हरेत्याहुः। यतः सुरभिः अतो देवयोग्यमिति। किंच ये चार्वतो मांसभिक्षामुपासते ये नराः अश्वा-
र्वतो अश्वस्य कुतश्चिन्निष्टमांसयाचनां उपासते कुर्वते उतो अपि च तेषामुक्तविधानमभिगूर्तिः अभितः उद्यमनं मे श्रीः ॥१७२॥

यस्य तृतीये सप्तमो वर्गः ॥ ॥ अथ षष्ठी ॥ यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति। ये चार्वते पचनं सं-
भरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥ ॥ यूपव्रस्काः यूपार्हवृक्षस्य व्रश्चनकर्तारः छेत्तारः उत ये यूपवाहाः छिन्नस्य वो-
ढारः ये च षालं यूपस्योपरि स्थाप्यं यूपाग्रभागं चषालमाहुः ॥ ये अश्वयूपाय तक्षतीति वचनव्यत्ययः। साधु संपा-
दयन्ति। ये चार्वते अश्वाय पचने पाकसाधनं काष्ठभांडादि संभरन्ति। उतो अपि च नोऽस्मत्संबंधिनां तेषामृत्वि-
जां अभिगूर्तिः संकल्पः सर्वथा पूरणीय इति। बुद्धिरस्माननुप्राप्नोतु इन्वतिर्व्याप्तिवचनः इन्वति नक्षति इति तद्वच-
नेषु पाठात्। यद्वा तेषामभिगूर्तिर्नोऽस्मानिन्वतु। यागं साधु पारं प्रापय्य बलेन योजयत्वित्यर्थः ॥ ॥ अथ सप्तमी ॥ उ-
प प्रागात् सुमन्मे धायि मन्म देवानामाशा उप वीतपृष्ठः। अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबंधुं ॥ ॥
मन्म मननीयं पूर्वं सुमत् उपप्रागात् उपप्रैतु सुमत् स्वयमित्यर्थः ॥ इति यास्कः। यद्वा स्वयमेव मा दधिते तत्र मयि अधा-
यि धीयते पूर्वभूतो स्वः स आगतः सत्वमर्थं धृतः इत्यर्थः। किमर्थं वीतपृष्ठः साधु पोषणेन प्राप्तपार्श्वभागः कांतिपृ-

क्रमणं नितरां क्रमते यत्र तन्निष्क्रमणं स्थानं नितरां सीदत्यत्रेति निषदनं निवर्त्तनं विविधवर्त्तनं इतस्ततो लुठनं य
त्र तत्सर्वत्राधिकरणे ल्युट्। यच्चार्वतोऽश्वस्य पड्बीशं पादबंधनं यद्वा बंधने पट्टलबद्धं तं प्रदेशं अत्र सर्वत्र देवार्थस्या
श्वस्य रोमादीनामपि निरर्थकत्वात् यत्स्थानमपि स्वीक्रियते यद्वा क्रियापरा वा वगं तथा आलभसमये निग्रहेणायानि
ष्क्रमणादयश्चेष्टाः संति तादृश्यर्थः। यच्च पपौ यदुदकमपिबत् यच्च घासिं अदनीयं तृणादिकं जघास अभक्षयत् हे
अश्व ते तव तानि सर्वाणि निःक्रमणादीनि देवेष्वस्तु संतु देवेषु प्राप्नोति तान्यपि निरर्थकानि मा भूवन्नित्यर्थः।। ।।अ
थ पंचदशी।। ।।मा त्वाग्निर्ध्वनयीद्धूमगंधिर्मोखा भ्राजंत्यभि विक्त जघ्रिः।। इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः
प्रतिगृभ्णंत्यश्वं।। ।।हे अश्व त्वा त्वां धूमगंधिः धूमेन व्याप्तोऽग्निः मा ध्वनयीत मा ध्वनयतु धूमं दृष्ट्वा शब्दं मा
करोत्वित्यर्थः।। अश्वस्य शृतत्वे प्रायश्चित्तविधानात्। यद्वा हे पच्यमाना ख्वा वय - सा त्वां धूमगंधिरग्निर्मा ध्वनदीत
ध्वने सति भांडभंगः स्यात्। नो नयतीत्यादिना वदू प्रतिषेधः त्वं तक्षणोति दृध्यभावः। किंच भ्राजंती अत्यं ताम्रै

संयोगेन दीप्यमाना उखा स्थाली माभि विक्त। अभितो मा वीवलत्। तापातिशयेन मा नीनशदित्यर्थः। भुविजी
भयचलनयोः छांदसो विकरणस्य लुक्। लुङि वा रुलो रुली तिसलोपः स्थाली विशेष्यतो जघ्रिः। जिघ्रती तावे
त घ्रा गंधोपादाने। आदृगमहनजन इति किन् प्रत्ययः तेनाद्गमखेदृष्टं होतुमिष्टं वीतं होमायानीतं अभिगूर्तं
आभिमुख्येन प्रवायोद्यतं। यद्वा इष्टं प्रयाजैराप्रीतं वीतं पर्यग्निकृतं अभिगूर्तं ये३ यजामह इत्याग्नेर्युक्तं वषट्
कृतं वषट्कारेण देवसात्कृतं एवंभूतं देवासो देवाः प्रतिगृह्णंति।। ।।इति द्वितीयतृतीये नवमो वर्गः।। ।।अथ षो
डशी।। ।।यदश्वाय वास उपस्तृणंत्यधीवासं या हिरण्यान्यस्मै।। संदानमर्वंतं पड्बीशं प्रिया देवेष्वायामयंति
अश्वाय अश्वं संज्ञप्यमानाय अधीवासं उपर्याच्छादनयोग्यं वासः उपस्तृणंति सर्वत आच्छादयंति स्तृञ आच्छा
दने क्रैयादिकः। तस्मात् या यानि सौवर्णराजतरूपाणि स्यानि कल्पयति। तथा अर्वंतं षष्ठ्यर्थे द्वितीया अर्वतोऽश्वस्य
संदानं शिरोबंधनं पड्बीशं पादेषु प्रसिक्तं पादबंधनं एतानि प्रिया देवानां प्रियतराणि वा तानि ते बध्यास्थापितानि

देवेष्वायामयंति॥ ॥अथसप्तदशी॥ ॥यत्तेसादेमहसाशूकृतस्यपार्ष्ण्यावाकशयावातुतोद॥स्रुचेवताहविषोअ
ध्वरेषुसर्वातातेब्रह्मणासूदयामि॥ ॥महसाबलेनशूकृतस्यशूइत्यनुकरणमेतत्शूत्कारंकुर्वतस्तेसादेपार्ष्ण्या
पासार्यकशयावातुतोदव्यथयतितातानिसर्वासर्वाणिअध्वरेषुयागेषुहविषःहविराज्यादिकंस्रुचेवस्रुचायथा
सूदयतितद्वत्॥ ॥अथाष्टादशी॥ ॥चतुस्त्रिंशद्वाजिनोदेवबंधोर्वंक्रीरश्वस्यस्वधितिःसमेति॥अच्छिद्रागा
त्रावयुनाकृणोतपरुष्परुरनुघुष्याविशस्त॥ ॥वाजिनोश्वस्यदेवबंधोःदेवानांप्रियस्यचतुस्त्रिंशद्वंक्रीःएत
त्संख्यान्युभयपार्श्वास्थीनिस्वधितिःछेदनसाधनोसिःसमेतिसम्यग्गच्छतिछेदनायइतरेषामंगानांदीना
षड्विंशतिरसस्यवेत्रयइतिप्रेषात्॥हेविशस्तारस्यऋत्विजःअस्याश्वस्यगात्राणिशरीरावयवान्अच्छिद्राअच्छिद्राणि
यथाभवंतितथावयुनावयुनानिप्रज्ञानानिवयुनमितिप्रज्ञानामवयुनंअभिख्यातितन्नामसंकेतंकृत्वाकृणोतकु
रुत।तत्रपरुःपरुःनत्रनाश्वेतितनवादेशः।हृदयाजिह्वावक्षःप्रभृतीनिप्रज्ञायमध्येछिन्नानिमाकुरुतेत्यर्थः।तदर्थं

मांसानिचतुर्थ्याश्नोतु।यथाभिरवउपालब्धेस्तहयंतितथायज्ञानिर्वर्हयितेत्यर्थः॥यद्वायंमात्रादेवपरोख्यो
यःयेदेवाःवाजिनंपक्वंपरिपश्यंति।ऊदाहोषतीति॥विलंबेदृष्ट्वायेचसुरभिरिमेनंनिर्हरनिःशेषेणास्मभ्यंदेही
सादुः॥येचार्वतोश्वस्यमांसभिक्षामुपासतेतेषामभिगूर्त्तिर्नैरिन्त्वित्वेतितेषामुदयःसर्वलोभक्षिवेत्यर्थः॥ ॥
अथत्रयोदशी॥यन्नीक्षणंमांस्पचन्याउखायायापात्राणियूष्णआसेचनानि॥ऊष्मण्यापिधानाचरूणामंकाः
सूनाःपरिभूषंत्यश्वं॥ ॥मांस्पचन्याःमांसपचन्याःपचतेअधिकरणेल्युट्॥मांसल्युट्धातोरितिअंतलोपः
उखायाःस्थाल्याःनीक्षणंपाकपरीक्षासाधनंकाष्ठंतथाचयानिपात्राणितथाचरूणांपात्राणांमांसपूर्णानांअ
पिधानानितत्साधनानितथाअंकाःहृदयाद्यवयवांकसाधनाःवेतसूनाःबंधनसाधनाःस्वधित्यादयःए
नमश्वंअश्वावयवंपरिभूषंति।स्वस्वव्यापारेणसाधयंतीत्यर्थः॥भूषअलंकारेभौवादिकः॥ अथचतुर्दशी॥
निष्क्रमणंनिषदनंविवर्त्तनंयच्चपड्वीशमर्वतः॥यच्चपपौयच्चघासिंजघाससर्वाताते अपिदेवेष्वस्तु॥ ॥यन्नि

यतस्ते देहो मा तपत् तत्तं मा कृषत्॥ सो मजनितव्यथा माभूदित्यर्थः॥ स्वधितिः शस्त्रं ते तव तन्वः तनूः अंगानि
मा तिष्ठिपत् तत्र चिरमास्थितानि मा कार्षीत्। स्थापयतेर्लुङि तिष्ठतेरिदितीत्वं तथा ते तव गात्राणि गृध्नुः केव
लमांसग्रहणे अविशस्ता विशसने अकुशलमिता अतिहाय न्यूनातिरेकभावेन तत्तदंगमतिक्रम्य मध्ये मिथु
मिथ्या व्यर्थं असिना छिद्रा छिद्राणि तिर्यक् मा कः मा कार्षीत् करोतेर्लुङि मंत्रे घसेति च्लेर्लुक् गुणः हल्ङ्या
ब्भ्य इति लोपः॥ ॥अथैकविंशी॥ ॥न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः॥ हरी ते युंजा पृ
षती अभूतामुपास्थाद्वाजी धुरि रासभस्य॥ ॥न वा उ नैव खलु एतन्म्रियसे यथार्थं हिंसाया अभावात्। ननु प्र
युक्ष्यतो म्रियमाणश्च दृश्यते कथमेवमुच्यत इति। उच्यते सुगेभिः शोभनगमनसाधनैर्मार्गैः देवयानलक्ष
णैर्देवान् इदेषि देवानेव प्राप्नोषि॥ अतो युक्तैषोक्तिः। कैः साधनैरिति तत्राह॥ ते त्वां वोढुं हरी ते एतन्नामकौ विंद्र
स्याश्वौ ते तव रथे युंजा अभूतां युक्तौ भविष्यतः पृषती मरुतामिति निरुक्तं युंजा औ त्वेगित्यादिना। क्विप् युजे
१५ रथे युक्त्वा वभूतां भविष्यतः अश्वस्य संसाररूपत्वाभावात् तथा निर्देशः हरी इंद्रस्येति निरुक्तं। तथा पृषत्यौ मरुतां वाहनभूतौ युंजा१७१

रुसमासरंति नुम्। सुपां सुलुगित्याकारः तथा रासभस्य एतन्नामकस्याश्वस्य धुरि स्थाने वर्तमानः कश्चिद्वाजी
उपास्थात्। उपास्यति वहेतेत्यर्थः॥ यद्वा रासभस्य भानो धुरि वर्तने युक्तो वाजी अश्वः उपास्थात्। देवत्वं गछ
तस्तव गमनाय इंद्रादयः स्वस्ववाहनानि प्रेषयंतीत्यर्थः॥ यद्वा तत्तद्देवमापन्नं त्वां तानि तानि वाहनानि वहंती
त्युपकरणकाले अवघ्राणोपावर्तनेयद्यजो न कुर्यात् तदेषा नैमित्तिकी यजमानवाचनार्था भवति। तथा च सूत्रं
सुगव्यं नो वाजी स्वश्व्यमिति यजमानं वाचयेदिति सैषा सूक्ते द्वाविंशी॥ ॥सुगव्यं नो वाजी स्वश्व्यं पुंसः पु
त्रौं उत विश्वापुषं रयिं॥ अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान्॥ ॥वाजी अश्वः आ
लभ्यमानो नोस्माकं सुगव्यं शोभनगोसमूहेन युक्तं रयिं धनयुक्तं विश्वापुषं रयिं विश्वस्य पोषकं धनं कृणो
तु करोतु। खलु गोरथादिसमूहार्थे यत्। छंदसीति सूत्रं न रपदाद्युदात्तत्वं। तथा स्वश्व्यं शोभनाश्वसमूहयु
क्तं तथा पुंसः पुत्रान् पुत्र अपत्य साधारणः अतः पुमपत्यमित्यर्थः॥ यद्वा पुरो बंधादीन् पुत्रान् पुरुरक्ष

क्रान्तात्मजान् स्त्रीपशून्पुमपत्यानि चेत्यर्थः। उत अपि च विश्वपुषं रयिं विश्वपोषणसमर्थं रयिं धनं किं च नो
स्मान् अदितिः अदीनोऽश्वः अनागास्त्वं नः कृणोतु सर्वतो निष्पापत्वं करोतु। उक्तानां पुत्रादीनां न्यूनातिरेकज
नितपापक्षयाभावे असंभवादेष पक्षः प्रार्थ्यते॥ किं च हविष्मान् हविर्भिस्तादृग्यवोपेतोऽश्वो नोऽस्माकं क्षत्रं बलं
क्षात्रं तेजो वा वनतां भजतां कुरुतां॥ ॥ इति द्वितीयस्य तृतीये दशमो वर्गः॥ ॥यदक्रन्दः प्रथमं जायमान इति
त्रयोदशर्चं सप्तमं सूक्तं दैर्घतमसं त्रैष्टुभं अश्वस्य स्तूयमानत्वात् तद्देवत्यं यदक्रन्दः सप्तोनेत्यनुक्रमणिका। आ
श्वमेधिकस्य मध्यमेऽहनि उपाकरणार्थं स्थितमश्वमेधातिरेकदेशाभिस्तौत्य प्रणवान्निति॥ ॥प्रथमा॥ य
दक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात्॥ श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अ
र्वन्॥ ॥हे अर्वन् अरणकुशलाश्व ते तव जातं जन्म जननं उपस्तुत्यं उपेत्य सर्वैः स्तोतव्यं स्तौतेरेतिस्तुशा
स्वृदृजुषः क्यपिति क्यप् तनु कथं स्तूयत इत्युच्यते। यद्यस्मात्समुद्रात् अंतरिक्षनामैतत् उदकसमुद

परुः परुः प्रतिपर्व प्रतिहृदयाद्यवयवं रुद्रमवद्यमिति सन्त्वाश्यैव विशस्ता विशसने करोत। स स्विहिंसायां छांदसः श
पो लुक्। गात्रे गात्रमस्या लूनं कृणुतादिति प्रैषात्॥ ॥अथैकोनविंशी॥ ॥ एकस्त्वष्टुरश्वस्या विशस्तायंता द्व
रा भवतस्तथर्तुः॥ या ते गात्राणामृतुथा कृणोमि ता ता पिंडानां प्र जुहोम्यग्नौ॥ ॥त्वष्टुरश्वस्य दीप्तस्यावि
स्य विशस्ता विशसनकर्ता एकः एक एव वाश्यहस्तकः ऋतुः एतदुपलक्षितकालात्मनोऽप्येव सर्वेषामपि पर्ययवस्तेष
स्तात्। यद्वा ऋतुः। नियंसनाय गंतारश्मिता तथा द्वौ यंतारा नियमयितारौ अहोरात्रौ वैवद्यावापृथिव्यौ वा ऋत्विजौ
भवतः। तथा ऋतुरित्यत्र ऋत्यकद्विति प्रकृतिभावोऽह स्वत्वं वा हे अश्व तव गात्राणां मध्ये या यानि हृदयाद्यवयवा
नि ऋतुथा काले काले कृणोमि छिनद्मि संपदेयामि पिंडानां मध्ये ता तानि प्रदातान्नुरोधेनाग्नौ प्र जुहोमि प्रकर्षेण हु
तं करोमि॥ ॥अथ विंशी॥ ॥मा त्वा तपत्प्रिय आत्मापियंतं मा स्वधितिस्तन्व आ तिष्ठिपत्ते॥ मा ते गृध्नुरवि
शस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः॥ हे अश्व त्वा त्वां अपियंतं देवान्प्रतियंतं गच्छंतं प्रियं आत्मा तव प्रि

सोमेन समया विपृक्त इति वक्ष्यमाणत्वात् स चास्याश्वस्य रशनां नियमनरज्जुमगृभ्णात् अग्रहीत् ईदृशोऽश्वः कु
तः समुत्पन्न इति चेत् उच्यते॥ हे वसवः रश्मयो यूयं सूरात् आदित्यात् अश्वं महानुभावं निरतष्ट निःशेषेण साधु संपा
दितवंतः। यद्वा वसव इति रूढेनोक्ताः एवमादित्यः परामृष्टं ते हे वसवः स्वकीयव्यापारेण सर्वस्याछादयितारो यूयं सूरादा
दित्यादश्वमेनं निरतष्ट अतक्षत निःशेषं संपादितवंतः तक्षतिः करोतिकर्मा सर्वक्रियासामान्यवचनः अ
त्रोत्पत्तिधात्वर्थे वर्त्तते सम्यगुत्पादितवंत इत्यर्थः। तक्षतेर्लङि छांदसः शपो लुक् स्कोः संयोगाद्योरिति सलोपः॥ ॥अ
थ तृतीया॥ ॥असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन॥ असि सोमेन समया विपृक्त आहुस्ते
त्रीणि दिवि बंधनानि॥ ॥हे अर्वन् त्वं यमोऽसि नियमिताग्निरसि तेन दत्तत्वात् तच्छब्दव्यपदेशः तथा आदित्यो
ऽसि सूर्यान्निरतष्टत्वात्। तथा गुह्येन व्रतेन गोपनीयेन दुर्दर्शनरूपेण व्रतेनेत्यर्थः॥ तेन त्रितः त्रिषु स्थानेषु ता
यमानो वायुरसि त्रितएनमायुनगिति श्रुतत्वात्॥ तद्रूपत्वे तथा गुह्येन व्रतेन गोपनीयेन कर्मणा यागादिसा

धनरूपेण त्रितः एतन्नामकऋषिरसि किंच हे अर्वन् त्वं सोमेन समया सह विपृक्तः वीर्येण समीकृतः तस्मिन्नर्थे संपृ
क्तः तेन गृहीतत्वात् हे अर्वन् एवंरूपत्वेन तव दिवि द्युलोके आदित्ये वर्त्तमानस्य त्रीणि बंधनान्युत्पत्तिकारणान्या
हुः॥ पुरा देवाः वसवः आदित्यो द्युस्थाने चेति त्रीणि॥ ॥अथ चतुर्थी॥ त्रीणि त आहुर्दिवि बंधनानि त्रीण्यप्सु
त्रीण्यंतः समुद्रे॥ उतेव मे वरुणश्छंत्स्यर्वन्यत्रा त आहुः परमं जनित्रं॥ ॥पूर्वं दिवि त्रीणि बंधनानीत्युक्तं इदा
नीं स्थानत्रयेऽपि त्रीणि बंधनानीत्याह। हे अर्वन् ते तव दिवि बंधनानि त्रीण्याहुः॥ तानि पूर्वमुक्तानि अप्सु अ
पां च जीवितत्वात्। भूलोकोऽप्युपलक्ष्यते नाभिधीयते पृथिव्यां त्रीणि बंधनान्याहुः॥ अन्नं स्थानं बीजमिति त्रीणि
तथा समुद्रे अंतः समुद्रमध्ये समुद्रवणे देवादीनां वसत्समुद्रमंतरिक्षं तस्मिन् त्रीणि वृष्ट्युत्पत्तिनिमित्तानि मे
घो विद्युत्स्तनितमिति। उतेव इव शब्दश्चार्थे अपि च हे अश्व वरुणः पापस्य रेवतः पूजयस्याजीयितायात्वं मेम
ह्यं छंत्सि कथयसि छंत्सि कथयसीति चेदुच्यते तेति तव परमं जनित्रं निरतिशयं जन्म जाते तेणादिकअन्प्रत्ययः।

अत्रोपपूर्वात्स्थानश्चात्रः कथयंतीय द्वयस्मिन्नादित्ये परमं जनित्रमाहुः सूरादश्वं वसवो निरतष्टेत्युक्तत्वा
तादृशत्वं प्रशस्यं जन्म यज्ञसाधनभावेन वृथयसीत्यर्थः॥ ॥अथ पंचमी॥ इमा ते वाजिन्नवमार्जनानीमा शफा
नां सनितुर्निधाना॥ अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षंति गोपाः॥ ॥हे वाजिन् अश्व ते तव संबं
धीन्यवमार्जनानि त्यागस्य शोधकानि स्थानानि इमा इमानि उक्तानि द्युलोकादीनि। किंच सनितुर्यागस्य संभक्तु
स्तव इमानि निधनानि निधानानि स्थानानि संचारप्रदेशा इत्यर्थः॥ किंचात्रैव ते तव भद्राः भंदनीयाः कल्याणरश
नाः ग्रीवादिषु युक्ताः रज्जुरत्रा अपश्यं रशना विशेष्यते। या या गोपाथियो रशनाः ऋतस्य सत्यभूतस्य यज्ञ
साधनस्य वा अश्वस्य कर्मणि षष्ठी ऋतमभिरक्षंति। अभितः पालयंति ता अपश्यं दृष्टवानस्मीत्यर्थः॥ यद्वा इमा ते त
वमार्जनानि अंगप्रक्षालनसाधनान्युदकानि इमानि सनितुस्तव शफानां धनानि निधानानि देवयजनभूमयः
संचारप्रदेशा वा अत्रास्मिन् देवयजनस्थाने या रशनाः गोपास्तव पालयितारो राजपुत्ररूपाः ऋत्विजो वा

नाः पादनाद्यक्षगंधर्वादिभिः संमोदनाधिकरणादंतरिक्षात् प्रथमं पूर्वं जायमानः उत्पन्नः यद्वा समुद्रात् आदि
त्यसमुंदनाद्वा स्थानात् समाद्वा जायमानः। सूरादश्वं वसवो निरतष्टेति वक्ष्यमाणत्वात्। उत वा अथवा पुरीषात् स
र्वेषां मानो पूरकादुदकात् प्रथमं जायमानः तादृशस्त्वं यद्यस्मात् अक्रंदः महान्तं शब्दमकरोः यजमानमनुग्रही
तुं। किंच पक्षापतनसाधनौ पक्षौ श्येनस्य पक्षाविवातो यथा शीघ्रं पतनसाधनौ तादृशावित्यर्थः। तथा ह
रिणस्य बाहू इव तौ यथा वेगवंतौ तादृशावित्यर्थः॥ यस्मादेवं तस्मात् ते जन्म स्तुत्यमित्यर्थः॥ तव बाहू हरि
णस्य बाहू इव यथा वेगवंतौ तादृशावित्यर्थः॥ ॥अथ द्वितीया॥ यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो
अध्यतिष्ठत्॥ गंधर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट॥ ॥यमेन नियामकेनाग्निना दत्तं द
त्तमेनमश्वं त्रितः पृथिव्यादिषु स्थानेषु वर्तमानस्त्रीर्णतमो वा वायुः युनक् रथे योजितवान्। किं त्वेनमश्वं
त्रितः इंद्रः प्रथमः प्रकृष्टतमः प्रथम इति मुख्यनाम अध्यतिष्ठत् अधिष्ठितवान्॥ अस्य गंधर्वः सोमः

अत एव पतंगं पतनशीलं अधःपतनादिविषयसदृशं वा एवं तव शरीरो भावयामीत्यर्थः॥ शिरश्चैव पश्यन्नुरुकू
पेर्देवयजनमार्गैर्जेहमानं प्रयत्नं देशं यान्मुवन् पतत्रि शीघ्रगामि शिरः पश्यामि यद्यपि आसन्नत्वेन सशिरस्कं
शरीरमुक्तं तथापि देहस्थूलं वै शिरसो दृश्यमानत्वात् पृथगभिधीयते॥ ॥अथ सप्तमी॥ अत्रा ते रूपमुत्तम
मपश्यं जिगीषमाणमिष आ पदे गोः॥ यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः॥ ॥
एवं गमनानंतरं हे अश्व ते तवोत्तमं उत्कृष्टरूपेणोत्कृष्टतमं रूपं अत्रास्मिन् यागदेशे अपश्यं पश्यामि कीदृशं गोः भूम्याः
पादस्थाने देवयजनप्रदेशे आजिधावनस्थाने वा इषः धूर्मणि षष्ठी॥ इषं इष्यमाणमन्नं अन्नानि वा आ सर्वतो
जिगीषमाणं गंतुमिच्छंतं हे अश्व ते तव मर्तो मनुष्यो भोगं भोक्तव्यमन्नं आनट् नशतिर्गतिकर्मा अनुक्रमेण स
मीपं गमयति। आदित् अनंतरं इदानीमेव तदनुग्रहानंतरं विलंबमकृत्वा ग्रसिष्ठः महात्मसायेव ग्रासितन्मोक्षा
तमः सन् ओषधीरन्नान्यजीगः गिरसि भक्ष्यसि महानुभावोपि लोकिकाश्ववत् तुच्छेन पुरुषेण दीयमानं स्वल्पं

भक्ष्यं अनुग्रहात् स्वीकरोषीत्यर्थः॥ ॥अथाष्टमी॥ अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम्॥ अनु
व्राताः सस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते॥ इदानीं कृत्स्नस्य लोकस्याप्यश्वमुख्य इति प्रतिपादयति। हे अर्वन् गम
नशील त्वा त्वामनु रथो गच्छति लक्षः पुरतोऽश्वस्य गमनात्। तथा मर्यो मर्त्यः त्वां अनु जात्येकवचनं अनु गावः
गावोपि त्वामनुगच्छंति तथा कनीनां कन्यकानां स्त्रीणां भगो भोग्यं सौंदर्यवद्वर्ततु॥ तथा अनु व्राताः सो व्राताः संघात्म
काः अन्ये अश्वसमूहाः वस्वादिदेवगणा वा त्वामनुसृत्य तव सख्यमीयुः॥ सख्यभावं गच्छंति देवाः ऋत्विजः द्योतमा
ना देवा मनुष्या वा वीर्यं वीरकर्म ममिरे स्तुत्याभिमते अतः सर्वो त्वामनुसरतु त्वं तु सर्वस्य श्रेष्ठ इत्यर्थः॥ ॥अथ
नवमी॥ ॥हिरण्यशृंगो यो अस्य पादा मनोजवा अवर इंद्र आसीत्॥ देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथ
मो अध्यतिष्ठत्॥ ॥अयमश्वो हिरण्यशृंगः हिरण्मणीयशृंगो वा उन्नतशिरस्को वा हृदयरमणं शृंगस्थानी
यं शिरो रुहो वा अस्य पादाः अयः अयोमयाः अयःपिंडस्य दृढा इत्यर्थः॥ तथा मनोजवाः मनोवेगाः अथवैतदिंद्रव

शोषणं ईदृशस्याश्वस्य सामर्थ्यं प्रतिमनोवेगं इंद्रोप्यवरो निकृष्ट आसीत् किंचास्याश्वस्य हविरद्यं हविषः अदनं
भक्षणं स्वार्थिभूयेयत् अदनयोग्यं हविर्वा अपेक्ष्य देवाः सर्वे देवा आयन् प्राप्ताः यः इंद्रः अर्वंतं प्रथमः प्रथमारीसन्
अध्यतिष्ठत् अधिष्ठितवान् स्वहविष्टेन स्वकीयात्वनवाश्रितवानित्यर्थः॥ इंद्रेण प्रथमो अध्यतिष्ठदितिह्युक्तं॥
॥ ॥अथ दशमी॥ ॥ईर्मांतासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः॥ हंसा इव श्रेणिशो
यतंते यदाक्षिषुर्दिव्यमज्ममश्वाः॥ ॥अत्राश्वसमूहस्तुतिरूपेण स्तूयते। ईर्मांतासः ईरिताः अंता येषां ते
तथोक्ताः मध्ये तथोक्ता निविडा इत्यर्थः॥ अथवा शरीरस्यैते विशेषेण ईर्मा ईरिताः पुरतः उन्नता इत्यर्थः तरदृशाः
पृथुरंतो जघनप्रदेशो येषां ते तादृशाः तथा सिलिकमध्यमासः संसृतः संगतः संलग्नो मध्यभागो येषां ते तादृशाः
पृष्ठत्वात् प्रौढपृष्ठा संलग्नमध्या इत्यर्थः। जघनपुरोभागावपेक्ष्य सहसंकुलं समित्ययमुपसर्गो यतेतरत्रस्याते
न संबध्यितव्यः शूरणासः विक्रमशीला दिव्यासो दिविभवाः अत्याः अतनशीला यद्यप्ययमश्व नाते मथाप्य

श्री
॥१८०॥

क्त तस्य तत्संबंधिन्यो अभिरक्षंति ता अपश्यं॥ ॥इति द्वितीयस्य तृतीये एकादशो वर्गः॥ ॥अथ षष्ठी॥ ॥आ
त्मानं ते मनसाराद् अजानाम् अवो दिवा पतयंतं पतंगं॥ शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पत
त्रि॥ ॥हे अश्व ते तव आत्मानं शरीरं मनसा अस्मदीयेन प्रकृष्टगमनवता चेतसा आरात् अतिदूरे स्थितं
अजानां जानामि अतिव्याप्तं भावयामीत्यर्थः॥ कथं अवः अवस्तात् तत्सामर्थ्याद्भूमेः भूमिमारभ्य दिवा अंतरि
क्षेण मार्गेण पतंगमादित्यं आवः व्याप्नो विव्याप्तं जनामि। किंच शिरो अपश्यं तव शिरः एवं पश्यामि कीदृशं सुगेभिः सु
ष्ठु गमनसाधनैः अरेणुभिः अपापैः पथिभिर्मार्गैः आदित्यमेरलादुपविभतैः स्वर्गलोकमार्गैरित्यर्थः।
तत्र प्रतिबंधाभावान्मार्गाणामुक्तरूपत्वं तथाविधैस्तैः जेहमानं उपर्युपरि व्याप्नुवत् पतत्रि पतनवत् शिरो
अपश्यं भावयामि एवं लोकत्रयव्याप्तं भावयामीत्यर्थः॥ यद्वा ते आत्मानमेवं भावयामि मनसा दिवा द्योत
नात्मकेनांतरिक्षमार्गेण दिवः सकाशात् अवः अवस्तात्। अथवा द्युस्थं पतयंतं पतंगं यागदेशं प्रतिव्याप्नुवं

पतयिष्णु पतनशीलं व्याप्तमित्यर्थः॥ तव च तव शृंगाणि शिरसो निर्गताः शृंगस्थानीया याः केशाः पुरुत्रा पुरुषु प्रदेशेषु
विष्ठिता विष्ठितानि विविधं स्थिताः ते एवारण्याः तेषु जर्भुराणा मनोहराणि पूर्यमाणानि वा एवंभूताः चरंति
॥ यद्वा अश्वस्य शृंगाभावात् तद्वदुन्नतानि तेजांसि परिगृह्यन्ते॥ अश्वमेधे मध्यमेऽहनि अध्रिगुप्रैषे मानो
मित्र इति सूक्तानंतरमुप प्रागाच्छसनमिति द्वे ऋचौ शंसनीये सूत्रितं च। उप प्रागादुप प्रैति किं कुर्वन् देवद्रीचा मन
सा देवानुगच्छता मनसा दीध्यानो ध्यायन्। कदा देवानस्मद्वयवेनाप्स्यामि देवलोकं प्राप्नोमीति वा मनसा ध्यायन् किं चा
स्य पुरः पुरस्तात् नाभिर्हननं बंधुभूत इत्यर्थः॥ यद्वा अस्य बंधनस्थानीयः अविमुक्तता एवंभूतोऽजः पुरो नीयते पुर
तः प्राप्यते अनु अस्य पश्चात् अनंतरं अत्र यद्वा उभयोः पर्यवसिते अर्थ एक एव तथा पश्चाद्भयानंतर्यत्र प्रवृत्तेरनी
यपदद्वय। यद्वा अस्तीति क्रियया संबध्यते कवयः अनूचानाः रेभाः स्तोतारः ऋत्विजो यंति गच्छंति ये वा अनूचानास्ते
कवय इति श्रुतेः॥ यद्वा कवय इति मेधाविनाम कविर्मनीषीति तन्नामसु पाठात्। रेभ इति स्तोतृनाम रेभः जरि

दृश्यं
अत्र त्रुटितमिति दृश्यते उपरितनपुरे तृतीयपंक्तौ तत्र

ता इति तन्नामसु पाठात्॥ ॥अथ त्रयोदशी॥ उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः॥ अजः पुरो नीयते ना
भिरस्यानु पश्चात्कवयो यंति रेभाः॥ ॥ अर्वा अरणकुशलोऽयमश्वः उप प्रागात् उपगच्छति॥ ॥ अथानंतरं यजमा
न आशास्ते कृत्स्नेदा उरूषेह विर्दत्तवते कृत्स्ने वारणीयानि धनानि यद्वा अरुषस्य जपयः आशास्ते प्रार्थ
ये यजमानार्थं॥ ॥ इति द्वितीयस्य तृतीये त्रयोदशो वर्गः॥ ॥ अस्य वामस्येति द्विपंचाशदृचं अष्टमं सूक्तं दैर्घतमसं।
आत्रेयमनुक्रमणिका॥ अस्य द्विपंचाशदस्यस्त्वव मे तत्संक्रियो थापन प्रश्नप्रतिवाक्यान्यत्र प्रायेण ज्ञानमोक्षाक्षर
साच्य पंचपादं सा कजानो यत्र त्रैयं सप्तकेन सप्तार्धगर्भा गोरीरिति जगत्य एतदंतं तु वैश्वदेवं तस्याः समुद्रा इति वाचः
समुद्रा आपोऽक्षरं सा प्रस्तारपंक्तिः शकमयमिति क्रव धूममुक्षाणं पृश्निमिति सोमस्त्रयः केशिन इत्यग्निः सूर्यो वायु
श्च केशिन श्चत्वारि वाग्वाच इंद्रं मित्रं सौर्यौ द्वादशेति संवत्सरस्य कालचक्र वर्णनं यज्ञेन यज्ञमसाध्येभ्यः प
रा तु सौरी पर्जन्याग्निदेवता वो या सारस्वते सूर्याय वेति। अत्र सूक्ते यानि बहुत्वेन स्तौति भागस्यात् दीयस्या

दिदं सूक्तं अल्पस्तवं न सूक्तांतरवद्बहुस्तवं। इदमेव वैलक्षण्यं तुशब्देन द्योतयतः अस्मिन् सूक्ते प्रायेण संशयोत्था
पनाद्यो ब्रह्मवोर्थः प्रतिपाद्यते। आन्वीक्षिकीं विद्यां तु षट्प्रश्नया संशय उत्थाप्यते॥ पृच्छामि त्वेत्यत्र प्रश्नः प्रती
यते॥ इयं वेदिरिति प्रतिवचनं। य ईं चकारेत्यादिना ज्ञानप्रशंसा प्रतिपाद्यते। अपश्यं गोपामित्यादिना ब्रह्मसाक्षा
त्कारस्वरूपस्य प्रशंसा ऋचो अक्षरे इत्यक्षरे ब्रह्म द्वा सुपर्णेत्यादिना तस्य प्रशंसा पंचपादं पितरं सावृज्ञानं स प्रथमं य इत्ययं
अधि अयं सप्तर्चमिति सप्तार्धगर्भा गौरीर्मिमाय इति षड्गायः। समानमेतदित्यनुष्टुप् तस्याः समुद्र इति प्रस्तारपंक्तिः
तल्लक्षणं छंदोग्रंथे सूत्रितं। प्रस्तारपंक्तिः पुर इति पुरतः पूर्वार्धे द्वादशाक्षरौ जगतौ पादौ ततो द्वावष्टाक्षरौ गायत्रौ
सा प्रस्तारपंक्तिरिति सूत्रार्थः अनुक्रमण्यामुक्तं। आद्यौ चेत्प्रस्तारपंक्तिरिति शिष्टा अनादेशपरिभाषया त्रिष्टुभः
गौरीर्मिमायेत्यत्र दं तानो विश्वे देवा देवताः तस्याः समुद्र इत्यस्याः पूर्वार्धस्य वाग्देवता उत्तरार्ध आपः शकमयमित्य
स्याः पूर्वार्धस्य शकधूमः उक्षाणं पृश्निमित्युत्तरार्धे सोमो देवता त्रयः केशिन इत्यस्याः संवत्सरकालो देवता

तत्र गृहस्य वक्ष्यमाणत्वाद्दयं योजितो गंतव्यः ईदृशा अश्वाः श्रेणिशः एकस्याः पश्चाद्बहूनां समवेताः श्रेणिरुच्यते।
एकप्रधाना यश्रेणिशः पंक्तीभूय संयतं। ते संयतं। ते सम्यक् धुन्वं कुर्वंति॥ तत्र दृष्टांतः। हंसा इव ते यथा श्रेणीभूता
ईर्मांतासः इत्याद्युक्तरूपाः संतः अंतरिक्षे गमनाय यतंते तद्वत् वृत्त उच्यते। यद्यदा अश्वाः दिव्ये अज्मं गमनं गंतव्यं
वा मार्गं अक्षिषुः व्याप्नुवंति। तदा अयं मंत्रो यास्केनैवं व्याख्यातः ईर्मांताः समीरितांताः पृथ्वंता वा सिलिकमध्यमाः
संसृतमध्यमाः शीर्षमध्यमा वा पि वा शिर आदित्यो भवति। यदनुशेते सर्वाणि भूतानि मध्ये वैषां तिष्ठतीदमपीतरच्छि
र एतस्मादेव समाश्रिता ये तानींद्रियाणि भवंति संशूरणासो दिव्यासो अत्याः शूराः शवतेर्गतिकर्मणो दिव्या दिवि
जा अतनाः हंसा इव श्रेणिकृयतंते हंसाहंतेर्घ्नंत्यध्वानं श्रेणिशः इति श्रेणिः श्रयते समाश्रिता भवंति। यदाक्षिषुर्य
दापन्दिव्यमज्ममजिनमाजिमश्वा इति॥ ॥इति द्वितीयस्य तृतीये द्वादशो वर्गः॥ अथैकादशी॥ ॥तव शरीरं पत
यिष्ण्वर्वन् तव चित्तं वात इव ध्रजीमान्॥ तव शृंगाणि विष्ठिता पुरुत्रा अरण्येषु जर्भुराणा चरंति॥ ॥हे अर्वन् तव शरीरं

वायुरुच्यते। आदित्याग्न्यपेक्षास्य मध्यमत्वं। स वायुः अश्नः सर्वत्र व्याप्तः। न हि वायुरहितः कश्चित्प्रदेशोऽस्ति। ना
द्यास्य भ्राता। अस्ति भ्राता तस्यान्नीयो भवति। यथा लोके भ्राता पितृधनस्य भागं हरति। तद्वत् मध्यस्थानमन्तरिक्षलोकं
हरतीति वा। हृतस्यार्थे रश्मिभिराहृतानां भौमानां रसानां हरणाद्वा भ्रातेत्युच्यते। पित्र्येण धनेन स्वार्जितेन वा भर्त्तव्यो
भवतीति भ्राता॥ मध्यमो वायुरपि हृतस्यार्थे रसैर्भर्त्तव्यो भवति। किंच घृतपृष्ठः घृतमाहुतिलक्षणं पृष्ठे यस्य तादृ
शो भ्राता तस्य तृतीयोऽस्ति भवति। त्रयाणां पूरणस्तृतीयः उक्तोभयापेक्षया तृतीयत्वं प्रतिपादितप्रकारेणात्रापि द्रष्ट
व्यं। रात्रौ सवितुस्तेजोभागस्य हरणात् दिवा स्वकीयतेजसो भागस्य तदर्थमेव भर्त्तव्यत्वाद्वा भ्राता तत्वं अत्र एषु भ्रातृषु
मध्ये पुरोदेशे वा विश्पतिं विशां प्रजानां पालयितारं सप्तपुत्रं सर्पणस्वभावरश्मिपुत्रोपेतं ऐतिहासिकपक्षे आदितिः
पुत्रकामेति प्रस्तुतेति मित्रावरुणादिष्वदितिपुत्रेष्वस्यादित्यस्य सप्तमपुत्रत्वं ईदृशं महानुभावमादित्यमपश्यमद्राक्षं
भावनीयात्मत्वेन साक्षात्करोमीत्यर्थः॥ तद्योऽहं सोऽसौ योऽसौ सोऽहमिति श्रुतेः॥ एवं वा अस्य वामस्य विश्वस्योद्गरितुः

स्रष्टुरित्यर्थः। पलितस्य पालयितुः स्वसृष्टजगत्पालनशीलस्य होतुरादातुः स्वस्मिन् संहर्त्तुरित्यर्थः। परमेश्वरस्य स
त्त्वादिकर्त्तृत्वं श्रुतिस्मृतिपुराणादिषु प्रसिद्धं। तस्य तादृशस्य परमेश्वरस्य भ्राता तदङ्गहारी तदंशभूतस्तत्रात्मा
मध्यमः सर्वस्य मध्ये वर्त्तमानोऽस्ति जगद्व्यापकत्वेन वर्त्तते॥ स चाश्नः व्यापनशीलः वायुना वै गौतम सूत्रेणायं लो
कः सर्वाणि भूतानि संदृब्धानीति श्रुतेः। वक्ष्यमाणविराडपेक्षया वास्य मध्यमत्वं। किंचास्य परमेश्वरस्य तृतीयः घृत
पृष्ठः घृतमित्युदकनाम तेन तत्कार्यं शरीरमुच्यते। तदेव पृष्ठं स्पर्शनीयं सर्वस्य स्पर्शनीकं कायस्य स तादृशः स्पृ
ष्टस्पृश्यत इति निरुक्तं। यद्वा प्रदीप्तपृष्ठः दृष्टः शुद्धः स्वस्तिशरीरोपलक्षकः प्रकाशितशरीर इत्यर्थः। स्थूलशरी
राभिमानीत्यर्थः। न त्वयं सूक्ष्मशरीराभिमानी सूत्रात्मवत् तस्य दर्शस्याविषयो भवति अत्र एषु मध्ये विश्पतिं विशां
प्रजानां पतिं उपलक्षणमेतत् सर्वस्य पतिमित्यर्थः। सर्वस्य पतिः सर्वस्येशान इति श्रुतेः। सप्तपुत्रं सप्तलोकाः पु
त्रा यस्य तादृशं स्वमायया सृष्टसर्वलोकमित्यर्थः। अपश्यं पश्येयं साक्षात्करोमीत्यर्थः। अयमर्थः स्वाधीनमा

यो जगत्कारणभूतः परमेश्वर एकः तत उत्पन्नौ स्थूलसूक्ष्मशरीराभिमानौ द्वौ विराट्सूत्रात्मानौ तेषु मध्ये द्वयोः साक्षा
त्कारेण मोक्षज्ञानानुत्पत्त्यादिद्वारेण परमेश्वरं ज्ञेयत्वेन प्रसिद्धं श्रवणमननादिसाधनेन साक्षात्कारो मोक्ष इत्यर्थः ॥ ए
एवमुत्तरत्राप्यध्यात्मपरतया योजयितुं शक्यं तथापि ग्रंथविस्तरभयान्न लिख्यते यत्र द्वा सुपर्णेत्यादौ स्फुटमध्यात्मि
कोऽप्यर्थः ॥ प्रतीयते तत्र तत्र प्रतिपादयामः अयं मंत्रो यास्केन व्याख्यातः ॥ अस्य वामस्य पलितस्य पालयितुरित्या
दिना तत्र व्याख्यानमत्रानुसंधेयं ॥ ॥ अथ द्वितीया ॥ सप्त युंजंति रथमेकचक्रमेको अश्वो वहति सप्तनामा ॥ त्रि
नाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनानि तस्थुः ॥ ॥ एकचक्रं रथांगोपेतं यद्यपि त्रीणि चक्राणि तथापि तेषामे
करूपत्वात् एकचक्रमित्युच्यते । रथं रंहणस्वभावं सूर्यस्य संबंधिनं सप्त एतत्संख्याका अश्वा युंजंति । अनुबध्नंति
वहंत्येते रात्रनिर्वहणाय किं च स्तुतः सप्तनेत्याह एको अश्वः सप्तनामा एक एव सप्ताभिधानः सप्तनाम सप्तनमन
प्रकारो वा एवं वायुः सप्तरूपं धृत्वा वर्तत इत्यर्थः । वाय्वधीनत्वादंतरिक्षसंचारस्य एकचक्रमित्युक्तं श्री दृष्टांतदियत

श्रीः
॥१८५॥

यस्त्वेस्तनस्तस्याः सरस्वति देवता यत्नेनैतस्याः साध्यदेवता समानमेतदियस्याः सूर्यः पर्जन्यो अग्नयो वा देवता दिव्यं सु
पर्णमित्यस्याः सरस्वान् सूर्यो देवता वा कृत्स्नसूक्तस्य विनियोगं शौनक आह ॥ ॥ स्तुत्येयं कृत्वा द्विजो मोहात्त्रिरात्रोपोषितः
शुचिः ॥ सकृज्जप्त्वास्यवामीयं क्षिप्रं मुच्येत किल्बिषादिति ॥ स्मृतिरपि ॥ सकृज्जप्त्वास्य वामीयं शिवसंकल्पमेव च ॥
सर्वकर्मप्रहत्यापि जगद्भवति निर्मलमिति ॥ ॥ महाव्रते वैश्वदेवशस्त्रे वैश्वदेवं निविधानं द्विप्रतीकं तत्रास्य वामस्येत्या
दिकमेकचत्वारिंशदृचं प्रथमं प्रतीकं पंचमारण्यके सूत्रितं ॥ अस्य वामस्य पलितस्य होतुरिति सलिलस्य दीर्घतमस एक
चत्वारिंशत्तमेति ॥ तत्र प्रथमा ॥ ॥ अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ॥ तृतीयो भ्राता घृतपृष्ठो
अस्यात्रापश्यं विश्पतिं सप्तपुत्रं ॥ ॥ अत्र द्वितीयपादेन छत्रं श्रूयते ॥ प्रथमपादे प्रतिविशेषणं योग्यक्रियार्थसंबंधोय
छत्रोध्याहर्तव्यः ॥ योयं दिविद्योतते तस्यास्य वामस्य वननीयस्य संभजनीयस्य पलितस्य पालयितुः प्रकृतस्य रश्म्यादि
प्रदानेन पालकस्य तथा योयं दिविद्योतते तस्यास्य होतुः होतव्यस्य आह्वानार्हस्यादित्यस्य मध्यमो मध्यस्थाने मध्ये भवो

द्वि. भा.

।।१८५।।

धनः काल इति स्मृतेः। अनर्वं अप्रतिहतं ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतं अयमादित्यः पुनरावर्त्तय
ति संवत्सरादर्वाचीनानां तत्रैवांतर्भावात्। ततोधिकानां युगादीनां तदावृत्तिसाध्यत्वात् संवत्सरस्य चक्रत्वेन निरूपणं पु
नः कीदृशं तत्तस्मिन् चक्रे इमा विश्वा भुवनानि इमानि सर्वाणि भूतान्यधितस्थुः। आश्रित्य तिष्ठंति कालाधीनत्वा
त्सर्वस्य स्थितेः। ईदृशस्य कालस्य कारणभूतः परमेश्वरपरिज्ञानेन मोक्षसद्भावात् ज्ञानमोक्षाक्षरप्रशंसा चेय
तुक्रमव्यामुक्तं।। अयमपि मंत्रो यास्केन सप्त युंजंति रथमेकचक्रमेकचारिणमित्यादिना व्याख्यातः।। तच्चात्रापनु
संधेयं।। ।।अथ तृतीया।। ।।इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहंत्यश्वाः।। सप्त स्वसारो अभि सं न
वंते यत्र गवां निहिता सप्त नाम।। ।।इममुक्तस्वरूपमादित्यमंडलाख्यं संवत्सराख्यं वा रथं ये सप्त रश्मयो अ
धितस्थुरधिष्ठिताः संवत्सरपक्षे अयनऋतुमासपक्षदिवसरात्रिमुहूर्ताख्याः सप्तावयवा अधितिष्ठंति।
कीदृशं रथं सप्तचक्रं चक्रनातस्वरणात् क्रमणाद्वा चक्राणि रश्मयः ते सप्त यस्य रथस्य तादृशमुभयविधं रथं पूर्वो

क्ता अधिष्ठिताः अश्वा व्यापनशीलाः सप्त वहंति निर्वहंति च तादृशं रथं स्वरादित्यस्तेनसारिणः परस्परं स्वसृ
भूताः वा सप्त सप्तसंख्याकाः रश्मयः स्वयं तरणाः ऋतवश्च अभिसंनवंते आभिमुख्येन संगच्छंते। असाधार
णाः परस्परविलक्षणकार्याः षड् ऋतवः सर्वसाधारण एक इति सप्तत्वं यद्वा इति रूपाणां सप्त सप्तविधानि नामन
मनानि सप्त स्वसाररूपाणि निहितानि सप्त स्वसारोपेतैः सामभिः स्तूयंते रथमित्यर्थः।। यद्वा गवां मुदकानां सप्त स
र्पणस्वभावानि नामनमनानि यत्र यास्क स्वसृषु निहितं सप्त स्वसारः परस्परं स्वसृभूता देवनद्यः अभिसंनव निहताः
ते।। ।। अथ चतुर्थी।। को ददर्श प्रथमं जायमानमस्थन्वंतं यदनस्था बिभर्त्ति।। भूम्या असुरसृगात्मा क्व स्वित्को
विद्वांसमुपगात्प्रष्टुमेतत्।। ।।एवं प्रपंचस्य कालापन्नतां प्रतिपाद्य तस्य कारणभूतस्य परमेश्वरस्याविषयत्व
माह।। ।।को ददर्शेति।। को द्रष्टुं शक्नुयात्।। कदा प्रथमं सृष्टेः पूर्वं अव्याकृतावस्थायामित्यर्थः। किं जायमानं प्रथ
मं भावविकारमापन्नं उत्पद्यमानं प्रपंचमित्यर्थः।। दुर्ज्ञेयत्वे हेतुमाह।। यद्यस्मात् अस्थन्वंतं अस्थिमंतं अनस्था

श्री:

।।१८५।।

रं उपलक्षणमेतत्कार्यभावमापन्नमित्यर्थः॥ अनस्थः अशरीरः सांख्यप्रसिद्धा प्रकृतिः वेदांतप्रसिद्धा वा ई-
श्वरस्य या माया विभर्ति गर्भवदंतर्धारयंती॥ अव्याकृतावस्थायां अनस्थः अशरीरः परमेश्वरो बिभर्ति॥
यदा केवलः परमेश्वरो मायानुबलितः सन् इदं जगन्निर्मितवान्॥ तस्मिन् समये देहादिसहितस्य कस्यचिदभावा-
त् को ददर्श तदानीं मनोनिसं आत्मा च निशयः तत्संयोगात् कश्चिदात्मा जानातीति चेत् सोपि न संभवतीत्यत आह॥
भूम्यां संबंधि पार्थिवं स्थूलशरीरं असुः प्राणः तदुपलक्षितं सूक्ष्मशरीरं असृक् शोणितं एतत्सप्तधातूपल-
क्षितं यद्यपि शरीरं पंचभूतात्मकं तथापि भूतद्वयस्य प्रत्यक्षत्वात्तदपेक्षयोक्तं॥ आत्मा तेः संबंधः चेतनः क्वचि-
त् कुत्रास्ते न कश्चिदस्तीत्यर्थः॥ नान्यत्किंचन मिषदिति श्रुतेः॥ विष्णुः सजगत्कारणविषयत्तानेवं तं अन्यं गुर्वादिकं एतत्का-
रणं प्रष्टुं कः शिष्यः अल्पमतिरुपगात् उपगच्छति। तादृशो देहेंद्रियसंघातरूपः आत्मा तस्मिन् समये कुत्रास्ति
प्रष्टा प्रोक्ता वक्ता वोभावपि नास्तीत्यर्थः॥ साक्षात्कारो विजायमानस्य त्वं तं मनुष्ये अनास्थिकः परमेश्वरः सशरी- श्री ॥१८६

आह॥ त्रिनाभिवलयत्रयमध्यस्थितनाभिस्थानीयषट्ऋतुद्वयोपेतं अजरं अमरणधर्मकं अनर्वं अशिथिलं पुनस्त-
देव विशेषते। यत्र यस्मिन् चक्रे इमा विश्वा भुवनानि इमानि प्रसिद्धानि सर्वाणि भूतजातानि अधि आश्रित्य तस्थुः
तिष्ठंति। यद्वा एकं चक्रं एकचारिणं असहायेन संचरंतं आदित्यमंडलं सप्त युंजंति सर्पणस्वभावाः सप्तसंख्या-
का रश्मयः ऋतवो वा सप्तप्रकारकार्याः असाधारणाः परस्परविलक्षणाः षट् ऋतवः एकः साधारण इत्येवं अ-
थवा मासद्वयात्मकाः षट् अपरोधिमासात्मकः इत्येवं सप्त ऋतवो युंजंति एतस्य कार्यं निर्वहंतीत्यर्थः। स चैकः अ-
सहायः अक्षो व्यापनशीलः आदित्यः सप्तनामा सप्त रसानां सन्नमयिता रोरनुमयो यस्य तादृशः सप्तर्षिभिः स्तू-
यमानो वा आदित्यो वहति धारयति भ्रामयतीत्यर्थः॥ किं त्रिनाभिचक्रं तिस्रो नाभिस्थानीयाः संबंधा वा त्रयो ऋत-
वो यस्य तत्तादृशं कते ग्रीष्मवर्षाहेमंताख्याः यद्वा भूतभविष्यद्वर्तमानाख्यास्त्रयः कालाः त्रिनाभयः तद्विशिष्टं
चक्रं चंक्रमणं पुनः पुनः परिभ्रममाणं संवत्सराख्यं चक्रं अजरं मरणरहितं न हि कदाचिदपि कालो म्रियते अनादिनि

नृयज्ञनिर्माणायेत्यर्थः॥ यज्ञानां स्थितेः सूर्याधीनत्वादिति भावः॥ ईदृशं इदं तत्त्वं पृच्छामीत्यर्थः॥ ॥इति द्विती
यस्य तृतीये चतुर्दशो वर्गः॥ ॥अचिकित्वांश्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान्॥ वि यस्तस्तम्भ षळिमा
रजांस्यजस्य रूपे किमपि स्विदेकं॥ ॥अचिकित्वान् देवतात्त्वमजानन्नहं चिकितुषः विशेषेण तत्त्वं जानंतः कवी
न्क्रांतदर्शिनः अधिगतपरमार्थान् अत्रास्मिन् तत्त्वविषये पृच्छामि किमर्थं विद्मने वेदनाय परमार्थज्ञाना
य किं जानन्नेवं परिभवार्थं नेत्याह॥ विद्वान् पृच्छामि अवित् अज्ञानये च यः परमेश्वरः तस्तंभ स्तंभितवान्
नियमितवान् अथय आत्मा स सेतुर्विधृतिरेषां भूतानामसंभेदायेति श्रुतेः॥ किं इमानि षट् लोकान् रंजना
त्मकान् लोकान् रजांसि उच्यंत इति निरुक्तेः॥ यद्यपि लोकाः सप्त लोकस्य धर्मिणो सर्वेषां साधारणत्वाभावात् इ
कस्मिन् तु षट् देवोक्तः सप्तमः किमिति न निर्दिष्ट इत्युच्यते॥ अजस्य जन्मादिरहितस्य चतुर्मुखस्य ब्रह्मणः
रूपे स्वरूपे एकं सत्यलोकस्थं ब्रह्मस्थं पुनरावृत्तिरहितं तस्यानं किमपि किंस्वित् तत् यत्किंचिद्वाङ्मनसोगम्यं तत्त्वम

स्ति तत् पृच्छामि॥ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इति श्रुतिप्रतिपादितं तत्त्वमित्यर्थः॥ अथवा षळिमा
नि रजांसि त्रिविधात् भूलोकं स्वीयस्तंभ तिस्रो भूमीर्धारयन्त्री रुत द्यूनिति निगमः॥ तस्याजस्य परब्रह्मणः रू
पेन नानाविधाकाररूपा जिजगति किमपि स्विदेकमेवात्मकमस्तीति प्रश्नः अविशेषमस्ति नाम्ना मेव रूपमस्तीत्युत्त
र विवक्षया प्रश्नः अस्तीत्येवोपलब्धव्यमिति श्रुतेः॥ ॥अथ सप्तमी॥ इह ब्रवीतु य ईमंग वेदास्य वामस्य निहितं
पदं वेः॥ शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः॥ ॥इहेदानीं तु दृश्यमानं तत्त्वं अंग क्षिप्रं अवि
चारेण ब्रवीतु कः यो वेद वेत्ति तत्त्वं तद् अस्य पुरतो दृश्यमानस्य वननीयस्य वेर्गंतुरादित्यस्य पदं सर्वे गतिव्यं स्वरूपं नि
हितं गूढं वर्तते किं चास्यादित्यस्य शीर्ष्णः शिरोवदुन्नतस्य सर्वेषां उत्कृष्टस्य गावः केचन वर्षाकालीना रश्मयः क्षी
रमुदकं दुदुह्रते क्षरंति वव्रिं रूपनामैतत् रूपं वसाना आच्छादयंतः अतित्वरेण तेजसा तपंतः केचन गावो रश्म
यः उदकं स्वस्वस्थेनैव मार्गेण आपुः पिबंति भूमिं निरुदकां कुर्वंतीत्यर्थः॥ तस्य स्वरूपं ब्रवीतीत्यन्वयः॥ ॥अथाष्टमी॥

मातापितरमृतआबभाजधीत्यग्रेमनसासंहिजग्मे।। साबीभत्सुर्गर्भरसानिविद्धानमस्वंतइदुपवाकमीयुः।।
मातासर्वस्यनिर्मात्रीपृथिवीपितरंपालकंद्युलोकंतत्स्थंवाद्युलोकस्यआदित्यमित्यर्थः।आबभाजते।किमर्थं
ऋतेयज्ञेवानिमित्तभूतेसतिकेनद्वारेणधीतीधीत्याकर्मणायागादिरूपेणस्वकीयेनाज्यसोमादिहविषातर्प
यतीत्यर्थः।।अग्रेततःपूर्वंपिताचमनसात्मनस्याम।भिप्रायवताचेतसासंजग्मेहिसंश्लिष्टोवर्त्ततेखलुवृष्टि
मकरोदित्यर्थः।।अनंतरंसामातावीभत्सुःगर्भवंधानच्छावतीगर्भरसेनगर्भोत्पत्तिनिमित्तेनरसेननिविद्धानि
तरांविद्धासीत्।यद्वागर्भरसः।ओषध्याद्युत्पादनसमर्थमुदकंयस्याःसातादृशीउदकेनार्द्रीकृतंक्लिन्नानिविद्धाकृ
षीवलैर्हलमुखेननितरांविदारिताभवतिबीजावापार्थं।अत्रायंसमाधिर्यद्वाचनयोषितअपत्यार्थंस्वपतिंयुव
त्यौतिसचतस्याअनुरागयुक्तःसंगतोभवतिसाचांतर्वत्नीसतीपुत्रानजनयतीतितद्वदत्रापि।अनंतरंन
मस्वंतस्तत्भाविन्नीहिप्रियंगाद्यनंततएवउपवाकंउपेयभवति।सावांतर्वत्नीपरस्परंसम्यग।भिवृद्धानि

रंअकुर्वीरः।यद्वस्माद्विबाभर्त्सि।।दृष्टरवितत्कार्यत्वादितिभावः।।शिष्टंसमानं।। ।।अथपंचमी।।पाकःपृच्छामि
मनसाविजानन्देवानामेनानिहितापदानि।वत्सेबष्कयेधिसप्ततंतून्वितत्निरेकवयओतवाउ।। ।।पाकःपक्त
व्यःअपक्वमतिरहंमनसासंस्कृतेनअविजानन्अतिगहनंतत्त्वंविशेषेणज्ञातुमशक्नुवन्पृच्छामिप्रश्नंकरो
मि।।अज्ञानेकारणमाह।।एनाएनानिपदानिसंदेहास्पदानितत्त्वानिदेवानांनिहितानिदेवानामपिगूढानीत्य
र्थः।।यद्वादेवानांपदानिधिवच्छोधयित्वास्थापितानितत्त्वज्ञानोपयोगायेतिशेषः।।तानिकानीत्युच्यते।वत्से
सर्वस्यनिवासभूतेबष्कयेबष्कतिसत्यनामतत्करोतीतिबष्कआदित्यः।यद्वाबष्कयोनामैकहायनोवत्सःपुनरपि
वत्सशब्दस्यपृथगुनिर्देशात्।बष्कयशब्देनतत्कालमात्रंलक्ष्यते।तस्मिन्नादित्येअधिअधिकंसप्ततंतून्नि
यमानान्सप्तसोमसंस्थान्कवयोमेधाविनोयजमानाःओतवैजगद्रूपंतिर्यक्कृतंतन्तुंवेतुंवितस्थिरेतन्
न्वंति।यद्वासप्ततंतवःसप्तछंदांसितानिवितन्वंति।।किमर्थंकृतनतवैसप्तसोमसंस्थारूपंतिर्यक्कृतंतुसंता

ओ

मविश्वमिन्वां॥ ॥एकः प्रधानभूतः असहायो वा पुत्रस्थानीय आदित्यः संवत्सराख्यः कालो वा तिस्रो मातॄः तस्य
ष्टस्याद्युस्वादयित्रीः क्षित्यादिलोकत्रयाणीत्यर्थः। तथा त्रीन् पितॄन् जगतां पालयितॄन् लोकत्रयाभिमानिनो ऽग्निवायुसू
र्याख्यान् ऊर्ध्वस्तस्थौ उन्नतः अयं तदीयांस्त्रीनतिभूतभविष्यद्वाद्यात्मना सूर्यपक्षे सर्वेभ्यः उन्नतः ईं एनमनेना
वग्लापयंति ग्लानिं नैव कुर्वंति नहि मूल आदित्यो वान्येन पराभूयते दिवः पृष्ठे द्युलोकस्योपरि मंत्रयंते युक्तं परस्प
रं भाषंते देवाः विश्वविदं विश्ववेदनसमर्थां विश्वैर्वेदनीयां वा अविश्वमिन्वां असर्वव्यापिनीं वाचं गर्जितलक्षणां
अमुष्य आदित्यसंबंधिनीं मंत्रयंत इत्यर्थः॥ ॥इति द्वितीयस्य तृतीये पंचदशो वर्गः॥ ॥अथैकादशी॥ ॥ द्वाद
शारं नहि तज्जराय वर्वर्त्ति चक्रं परि द्यामृतस्य॥ आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः॥ ॥
ऋतस्योदकस्य सत्यात्मकस्य वा आदित्यस्य चक्रं पुनःपुनः क्रमणशीलं मंडलाख्यं रथचक्रं वा वर्त्तयति पुनः पुन
र्वर्त्तते संचरति कुत्र द्यां परि द्युलोकस्यांतरिक्षस्य लोकस्य परितः। कीदृशं तत् द्वादशारं द्वादशसंख्याकामे

षादिराश्यात्मकैर्वा अरैः रथांगावयवैर्युक्तं। किंच तत् चक्रं न हि यं राजा नैव खलु जयाने व खलु जरायैव भवति
हे अग्ने सर्वदा गमनयुक्तादित्यद्र अग्निरेवस्थानत्रये तत्तदात्मना वर्त्तमानत्वादसावप्यग्निरुच्यते अत्रास्मि
न्नादीये चक्रे मिथुनासः स्त्रीपुंसरूपेण परस्परं मिथुनभूताः सप्तशतानि विंशतिश्च विंशत्युत्तरसप्तशत
संख्याकाः पुत्रवदुत्पद्यमानाः प्राणिनां दुःखा अलोरात्रा वा अहोरात्ररूपाः तस्थुः तिष्ठंति निषद्यंते षष्ट्यधिकशत
त्रयसंख्याकाहानि तावंत्येव रात्रय इत्येवं तद्विभागः सप्तवै शतानि विंशतिश्च संवत्सरस्याहोरात्राः इत्यैतरेयो हः स
मान इत्यारण्यकं॥ ॥अथ द्वादशी॥ पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणं॥ अथेमे
अन्य उ परे विचक्षणं सप्तचक्रे षळर आहुरर्पितं॥ ॥ पंचपादं पंचसंख्याकर्तवात्मकपादोपेतं एतद्धेमंत
शिशिरयोरेकत्वाभिप्रायं पितरं सर्वस्य पालयितारं सर्वस्य प्रीणयितारं द्वादशाकृतिं द्वादशमासा एवाकृतयो य
स्य तादृशं पुरीषिणं पुरीषमित्युदकनाम उदकलक्षणं संवत्सरचक्रे दिवो द्युलोकस्य परे अर्धे तत्स्थानान्नपृथक्प

द्वि॰भा॰
॥१९०॥

रस्मिन्नर्धेऽतरिक्षलक्षणेऽवस्थितमादित्यमित्यर्थः॥ तस्मिन्नर्पितमाहुः एतदुत्तरत्रस्थितमत्राप्यनुषज्यते॥
यद्वार्पितं तदधीनं अतः संवत्सरं सूर्यायत्तमाहुरित्यर्थः॥ अथ अपि अन्ये केचन वेदवादिनः एवमाहुः किमि-
ति उपरे उपरमंतेऽस्मिन्नुपरताः प्राणिनो नेति वोपरः संवत्सरः तस्मिन्नूर्ध्वदृशे सप्तचक्रे सप्तादयरश्मयः तद्रू-
पेण चक्रस्थानीया यस्य स तथोक्तः॥ यद्वा अयनर्तुमासपक्षाहोरात्रमुहूर्ता निसप्तसप्तचक्राणि पुनः पुनः क्रम-
माणानि यस्य तादृशे षडरे ऋतवएव आराः नाभौ दृढतः संबद्धा यस्य तथोक्तलक्षणे संवत्सरे रथे विचक्षणं वि-
विदर्शनवन्तमादित्यं अर्पितमाहुः अधीनमाहुः एवमुक्तं भवति अमुमादित्यं दक्षिणोत्तररूपाभिमतस्ली प्रमंद-
दिभावस्य चक्रान्तरधीनत्वात्तदधीनमाहुः॥ अन्ये संवत्सराद्याः सर्वस्य कालस्य सूर्यगमनागमनसाध्यत्वात्तदाय-
त्तत्वमाहुरिति॥ ॥अथ त्रयोदशी॥ पंचारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा॥ तस्य नाक्षस्तप्यते भू-
रिभारः सनादेव न शीर्यते सनाभिः॥ ॥पंचारे पंचर्तुरूपैररैर्युक्ते चक्रे संवत्सरात्मके परिवर्तमाने संवत्सरपरिव- श्रीः
॥१९०॥

सस्यानीति वचनमीयुः प्राप्नुवंति यद्वा हविर्लक्षणान्नवंतः उपेयवचनं प्रेषादिरूपमीयुः दृष्टौ सस्यं सस्यादिद्वारा याग-
मनुतिष्ठेयुरित्यर्थः॥ ॥अथ नवमी॥ युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वंतः॥ अमीमेद्वत्सो अ-
नु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु॥ ॥माता मि मीयंतेऽस्मिन्भूतानीति माता द्यौः दक्षिणायाः अभिमतपूरण-
समर्थायाः पृथिव्याः धुरि निर्वहणे युक्तासीत् वर्षणाय समर्थाभूदित्यर्थः॥ कथमिति तदुच्यते गर्भो गर्भस्थानी-
य उदकसंघो वृजनीषु उदकमत्सु मेघपंक्तिषु तन्मध्ये अतिष्ठत् अनंतरं वत्सः पुत्रस्थानीयः उदकसंचयः त्रि-
षु योजनेषु मेघराशिं वायुषु संयुक्तेषु सत्सु अमीमेत् वर्षणसमये शब्दयति अनंतरं विश्वरूप्यं विश्वरूपमनु-
गाम पश्येम। अनुक्रमेण मार्गं पश्यंति वर्षतीत्यर्थः॥ यद्वा त्रिषु योजनेषु वत्सत्सु समेघो वर्षणाय गां भूमिं प्रसमि-
मेत्। अनंतरं सर्वजनोऽनुक्रमेण विश्वरूप्यं सस्यादिभिर्नानारूपवतीं भूमिं पश्यदुपनयति॥ ॥अथ दशमी॥
तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयंति॥ मंत्रयंते दिवो अमुष्य पृष्ठे विश्वविदं वाच-

नीयं वा मंडलं । चक्षुः ख्यातेर्वा चष्टेर्वा इति निरुक्तं । रजसा वृष्ट्युदकेन आवृतं व्याप्तं एति गच्छति । उदकं रज उच्यते
इति यास्कः ॥ तस्मिन्नादित्यमंडले विश्वा भुवनानि सर्वाणि भूतजातानि अर्पिता अर्पितानि तदधीनत्वात्तेषां ॥ ॥ ताः दीर्घश्छंदसः
अथ पंचदशी ॥ ॥ साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति ॥ तेषामिष्टानि विहितानि धामशः
स्थात्रे रेजंते विकृतानि रूपशः ॥ ॥ साकंजानां एकस्मादादित्यात्सहोत्पन्नानां सप्तानामृतूनां मध्ये सप्तथं सप्तममृ
तुं थट्छंदसी । तिथट् । एकजं एकेनोत्पन्नमाहुः । कालतत्त्वविदः चैत्रादीनां द्वादशानां मासानां द्वयद्वयमेलनेन वसं
ताद्याः षडृतवो भवंति ॥ अधिकमासेनैकेनोत्पद्यते सप्तमर्तुः न च तादृशो मास एव नास्तीति मंतव्यं ॥ अस्मिन्
योदशो मासस्त्वाहुरिति श्रुतेः । तदेवोच्यते षळिद्यमा इच्छब्द एवकारार्थः । षळेव ऋतवो मासद्वयरूपाः ऋषयो
गंतारः । ते च देवजाः देवादादित्याज्जाताः इत्येवमाहुः । सप्ताधारस्य त्रयोदशस्य मासस्य देवभावः । निः सूर्ये । धिमा
सं मंडलं तपते परिविरित्यादिस्मृतेः । तस्मात्तेषां षळेव देवजाः । अदेवजः एकः । तेषामृतूनां स्वरूपाणि इष्टानि सर्वे

लोकाभिमतानि धामशः ऋतुस्थाने विहितानि पृथक् पृथक् स्थापितानि तानि च रूपशः रूपभेदेन विकृतानि
विधाकृतानि युक्तानि स्वरूपभेदस्तैत्तिरीयैराम्नातः सरसमधु वसंताय प्रायच्छद्यवं ग्रीष्मायेत्यादि । स्थात्रे अधिष्ठा
त्रे अधिष्ठात्रे तदर्थाय रेजंते चलंति जगद्व्यवहाराय पुनः पुनरावर्तंत इत्यर्थः ॥ अथाध्यात्मं वक्ष्यते ॥ ॥ सहोत्पन्ना
नां शीर्षण्यानां प्राणानां सप्तमं मास्यमकारेण जायमानमाहुः । षडितरे प्राणा ऋषयः विषयदर्शिनो यमः चक्षुषी
नासिके श्रोत्रे चेते द्वंद्वभूता देववद्वृष्णो जायमाना इत्याहुः । एतस्माज्जायते प्राण इत्यादिश्रुतेः । तेषां प्राणानां धामशः
स्थाने इष्टानि विषयारूपादीनि निहितानि स्थात्रे स्थिरायात्मने व्याप्रियंते स्वरूपेणेति ॥ ॥ इति द्वितीयस्य तृतीये षो
डशो वर्गः ॥ ॥ अथ षोडशी ॥ स्त्रियः सतीस्तां उ मे पुंस आहुः पश्यदक्षण्वान्न विचेतदंधः ॥ कविर्यः पुत्रः स ईमा चिकेत
यस्ता विजानात्स पितुष्पितासत् ॥ ॥ मे मदीयाः याः दीधितयः स्त्रियः संसनवयोषितः सत्यः योषिदुदकरूपगर्भधा
रणस्त्रीत्वं एषां रश्मीनां आदिष्टलिंगत्वात् स्त्रीलिंगता । तानु तान् रश्मीनेव पुंसः आहुः ॥ प्रभूतवृष्ट्युदकदैसेकृ

पुरुषानाकुः॥ प्रतिनिर्देशापेक्षया पुल्लिंगता। अमुमर्थमयं तन्निगूढं अक्षण्वान् ज्ञानदृष्ट्युपेतः कश्चित् महानुभ
व एव जानाति। अंधः अतथारूपः स्थूलदृष्टिः न विचेतत् न विचेतति न जानाति। किंच यः कविः क्रांतदर्शी पुत्रः स्त्रीपु
रुषरूपाणां रश्मीनां पुत्रस्थानीयः पुरुषः जगतां त्राता दृष्टृदक्षलक्षणोस्ति सः स ईं स एव पुत्रः। यद्वा ईं एनमर्थं स्त्री
णां सतीनां पश्चात्पुरुषभावं आचिकेत। सर्वतो जानाति। चिकेतः स्थितं पुत्र एव जानाति। नान्यः। यः कश्चित्ता ता नि
विजानात् स्त्रीपुरुषपुत्ररूपाणि जानीयात् पितुः पिता सत् पिता दृष्टा जगत्पालको रश्मिसमूहः तस्यापि पिता
आदित्यः स भवति आदित्य एव भवतीत्यर्थः॥ यद्वा लोके विकृतिरियं यस्ता निजा जानीते स एव भवति। स्वयं पितुः पुत्रः स
न्नपि स्वपुत्रापेक्षया पिता च भवति पुत्रपौत्रादिसहितः चिरकालजीवी भवति॥ इत्यधिदैवतं॥ अथाध्यात्मं॥ या
यदानीं स्त्रियः सतीः स्त्रीत्वं प्राप्ताः आहुः केचित्कथं ता उ ता नेवमेमह्यं पुंसः पुरुषानाकुः प्रतिपादयंति तत्कथं कु
थमन्यस्यान्यथाभावः उच्यते एकस्यैव निरस्तसमस्तोपाधिकस्यात्मनस्तत्तद्देहावस्थानमात्रेण। तत्तद्व्यपदे

त्स्त्रादिरूपेण पुनः पुनरावर्त्तमाने सति तस्मिन्कालचक्रे विश्वा भुवनानि सर्वाणि भूतजातानि आसमंतात्तस्थुः व
र्त्तंत इत्यर्थः॥ किंच तस्य चक्रस्य मध्ये वर्त्तमानः अक्षो धुरि भारः सकलभुवनवाहनेन प्रभूतभारोपि न तप्यते न
शीर्यते। किंच सनादेव सनातन एव सनाभिः समाननाभिकः सर्वदैकरूपनाभिरसौ न शीर्यते न भिद्यते यथा लो
के शकटस्याक्षो भारेण भग्नो भवति अक्षघातेन च नाभिर्विदीर्णा भवति। तद्वदत्रापि नास्तीत्यर्थः॥ ॥अथ चतुर्द
शी॥ ॥सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहंति। सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवना
नि विश्वा॥ ॥सनेमि समाननेमि एकप्रकारबहिर्वलयं अक्षीणनेमि चक्रं संवत्सराख्यं अजरं सनातनमपि जरा
रहितं विवृते पुनः पुनर्विशेषेण वर्त्तते उत्तानायां ऊर्ध्वतानत्यां दृषायां उपरि विस्तृतायां भूम्यां वा दश इन्द्रादयः पंच
लोकपालाः निषादपंचमाश्चत्वारो ब्राह्मणादयो वर्णाः मिलित्वा दशसंख्याका युक्ताः स्वस्वव्यापारेषु युक्ता वहंति ति
ष्ठंते जगन्निर्वहंतीत्यर्थः॥ तन्निर्वाहार्थत्वात्कालस्य। किंच सूर्यस्यादित्यस्य चक्षुः स्थानस्वभावं सर्वस्य चक्षुः स्था

द्वि॰ भा॰
॥१९३॥

धोदेशे परेण पदा पादद्वयेन स्वावयवेनाकृष्य बिभ्रती धारयंती तथा परः परस्तात् उपरिदेशे एना अनेनाव
रेण च पदा पादद्वयेनाकृष्य तमेव वत्सं बिभ्रती उदस्थात् सूर्यं प्रसूत इति। अग्नौ प्रास्ताहुतिः सम्यगादि
त्यमुपतिष्ठत इति स्मृतेः। अथैवं कृतवती सा आहुतिः कद्रीची क्व गता तस्य निश्चयगमना आदित्यं प्राप्नुवती सूर्यं
कं स्वित् कं पूजभाजं पुरुषं प्रति अर्धमागत्य यद्वा अर्धमर्धं परागात् गच्छति। आगत्य च क्व स्वित् सूते कुत्र प्रदेशे
फलमुत्पादयति नहि तत् गोवदियं यूथे अंतः सजातीयगोमध्ये सूते साधारण्येन यत्र क्वचिन्न सूते अपितु क
स्मिंश्चिदनुष्ठातरि। अंतः सम्महान् कोनु खल्विति। यद्वा आदित्यरश्मिसमूह एव गोरूपेण स्तूयते गौः उत्क्र
क्षणा रश्मिरूपा गौर्वत्सं वत्सवद्रक्षणीयं यजमानं उत्क्रमेण बिभ्रती उदस्थात्। अथ तथा कृत्वा सा कद्रीची
अदृश्यगमना सती किं स्विदर्धमर्धं अर्धस्थानभाजं वा कं स्वित् पुरुषमादित्यं परागात्। प्रागात् अप्रतिनिवृत्त्या
गात्। तत्र यं सेताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवास इति श्रुतेः॥ तथा कृत्वा च क्व स्वित् सूते कस्मिन्निंद्राद्रि

श्री
॥१९३॥

लोके न जयति न सर्वत्राग्निष्टं समाने॥ ॥अथाष्टादशी॥ अवः परेण पितरं यो अस्यानुवेद पर एना वरेण॥ कवी
यमानः क इह प्रवोचद्देवं मनः कुतो अधि प्रजातं॥ ॥अवः अवस्तात् स्थितं अस्य पितरं एतल्लोकपालकमग्निं परे
णादित्येन सह यो नुवेद अनुक्रमेण जानाति। तथा परः परस्तात् स्थितमादित्यमस्य पितरं पालकं सोपीममेव
लोकं वृष्ट्यादिना पालयतीति तादृशं आदित्यं एना अनेनावरेणाग्निना सह यो नुवेद अग्न्यादित्योर्व्यतिहारेणोपास्ते।
यद्वा अभिभूतरजस्तमस्कोद्बुद्धसत्त्वो अत एव स्वाधीनमायोच एतावेकत्वेन योधिगच्छति स तादृशः पुरुषः
कवीयमानः कविवदाचरन् क्रांतदर्शी सन् आत्मनः ख्यापयन् क इहास्मिन् लोके प्रवोचत् प्रब्रवीति किंच देवं द्यो
तमानं देवविषयं मनो वा मनः कुतः कस्माद्दृष्टविशेषादधि आधिक्येन प्रजातं उत्पन्नं उभयमपि दुर्लभ
मित्यर्थः॥ ॥अथैकोनविंशी॥ ये अर्वाञ्चस्तां उ पराच आहुर्ये पराञ्चस्तां उ अर्वाच आहुः॥ इंद्रश्च याचक्रथुः
सोम तानि धुरा न युक्ता रजसो वहंति॥ ॥ये सूर्यसोमयोश्चक्रे वर्तमाना रश्मयो ग्रहादयस्ते तत्परिभ्रमणवशेन

अर्वांचः अर्वागंचना अधोमुखाः संति तानेव परांच आहुः॥ पराङ्मुखांचना नूर्ध्वानिरुक्तः कालविदः तथा प्रथमं
ये परांचः अपागंचनास्तानु उ तानेव अर्वाच आहुः हे सोम त्वं इंद्रः परमेश्वरः इं गां भूमिं इष्ट्या धारयतीति इंद्रः अ
दिसः यद्वा द्वादशादित्यानां मध्ये इंद्रोपेक्षः विवस्व इंद्र इंद्र युता इत्युक्तत्वादयमपि इंद्रः स च युवां यायानि मे उत उपरि भ्र
मणानि चक्रथुः कृतवंतौ स्थाता तानि रजसो रंजनात्मलोकस्य धर्मणि धृष्टी। लोकं वहंति आ निर्वहंति तत्र दृष्टांतः
धुरा इव हृता धुरि युक्ताः सर्वे धा अश्वादयो यथा धुरं वहंति। तद्वत्। यद्वै तसू वर्धि वृष्टंति ल धुरा युक्ताः धुरि स्थि
त चक्रमपि धुरश्शक्तेनोच्यते॥ तत्र युक्ताः समर्पिताः पुरुषाः तत्स्विभ्रमणवंतो नार्वांचस्ते परांचो भवंति। तद्वत्।
॥ ॥अथ विंशी॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अ
भिचाकशीति॥ ॥तत्र लौकिकपक्षि हृदय दृष्टांतेन जीवपरमात्मानौ द्वैस्तूयेते॥ ॥यथा लोके द्वौ सुपर्णौ सुपतनौ
शोभनगमनौ सयुजा समानयोगौ सखाया समानख्यातौ समानं वृक्षं परिषस्वजाते एवमेव वृक्षं परिषस्वजा

शोपपत्तेः। श्रूयते हि त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारि इत्यादि स्त्रीत्वं पुंस्त्वं चोभयमपि वस्तुतो नास्तीत्युक्तं भवति
श्रुतिरपि तदभावं बोधयति नैव स्त्री न पुमानेव नैव चायं नपुंसकः॥ यद्यच्छरीरमादत्ते तेन तेन स चोद्यत इति॥ ॥द्वि
तीयः पादः पूर्ववत्॥ कविः यः पुत्रो वयसाल्पोपि यः कविः क्रांत प्रज्ञो ज्ञानी स्यात्। इममर्थं साविकेतजानाति। एवमुक्तल
क्षणस्य परमात्मनः तानि स्त्रीत्वपुंस्त्वादीनि विजानात्। औपाधिकानि जानीयात्। स पितुः स्पोसादकस्यापि तान
रहितस्यापि पिता सत्। पितृवत्पूज्यो भवति उक्तमर्थमभिप्रेयत्तां उ कुब्राह्मणोसि शिशुर्वा आंगिरसो मंत्रकृतां मंत्र
कृदासीत्स पितृन् पुत्रका इत्या मंत्रयते। इत्युपक्रम्य ते देवान पृच्छंत ते देवा अब्रुवन्। एष वोपि तायो मंत्रकृदिति
मंत्रद्रष्टुरेव किल तत्ववित्। पितुः पिता सदिति किमाश्चर्यमित्यभिप्रायः॥ ॥अथ सप्तदशी॥ अवः परेण पर एना
वरेण पदा वत्सं बिभ्रती गौरुदस्थात्॥ सा कद्रीची कंस्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अंतः॥ ॥अग्निर्हूय
मानरूकृतिर्गोरूपेणस्तूयते॥ गौः गोरूपागमनशीलैषा आहुतिः वत्संस्थेन पोष्यं वत्सस्थानीयमग्निं अवः अ

परिषस्वजाते इत्यत्र यथाश्रयांतराभावात् उभयोरेकाश्रयत्वमभ्युपगतं तद्वत्सयुजासखायाविस्रंभयत्राप्येकयोग
स्याते आश्रयणीये वृक्षस्य तत् इति वृक्षो देहः स चोभयोः समान एव एव जीवस्य योगार्थत्वात् परमात्मनास्यैश्वर्ये महाभूते
रारब्धत्वात्तस्योपलब्धिस्थानत्वाच्चोभयोरविसमानं तादृशं समानं वृक्षं परिषस्वजाते परिष्वजतः आश्रयतः न
च जीवस्य वस्तुतः ईश्वरत्वे कथं जीवबुध्या संसारित्वमिति वाच्यं तयोर्महदन्तरत्वात्। तथा चार्थवर्णिका अमुं मं
त्रमाम्नायास्य संदेहनिवर्त्तकमुत्तरमंत्रमेवमामनंति समाने वृक्षे पुरुषो निमग्नो नीशया शोचति मुह्यमानः। जु
ष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति।। ।।अस्यायमर्थः। एक एव शरीरे पूर्णपुरुषः निमग्नो नि
रूढः सन् स्वयमीश्वरोऽप्यनीश इत्वबुध्या मुह्यमानो मूढः सन् शोचति।। संसारेऽहं कर्त्ता सुखी दुःखी इति जननम
रणे अनुभवति यदा तु जुष्टं नियतं त्वं अन्यं संसारित्वाद्भिन्नं ईशं परमेश्वरं पश्यति स्वानन्यतया साक्षात्करो
ति तदा वीतशोकः देहव्यतिरिक्तः स्वस्वरूपसाक्षात्कारेणापगततापत्रयः सन् अस्य महिमानमिति निरस्तसम

मस्तोपाधिकस्य परमेश्वरस्य महिमानं सर्वात्म्य सर्वज्ञत्वादिमहिमानमेतीति। प्राप्नोति। न च तद्भिन्नात्मनो तन्महिमा
प्राप्यते अतस्तद्रूपो भवतीत्यर्थः।। तस्मात् इत्थं एक एव भेदस्तु मोहकृत इति सिद्धं।। अनुभवदृशायां लौकिकबुध्या
भेदमभ्युपगम्योच्यते। तयोरन्यो जीवात्मा पिप्पलं कर्मफलं स्वादु भूतमत्ति भुंक्ते यस्य यदुपार्जितं तत्तस्य स्वादु भवति अ
न्यः परमात्मा अनश्नन् आप्तकामत्वेनाभुंजानः स्पृहाया अभावात् आप्तकामस्य कास्पृहेति श्रुतेः। तस्मादवास्त
वं भेदमुपजीव्य तयोरन्य इत्युक्तं वस्तुतस्त्वनीशया शोचति मुह्यमान इत्युक्त्वा दृश्यभेद एव। तादृशः परमात्मा स्वात्म
न्यध्यस्तं जगत्साक्षित्वेनेक्षते।। अत्र द्वौ सुपर्णौ सुकृतौ धर्मकर्त्तारा विद्यादिनिरुक्तगतं अस्य मंत्रस्य व्याख्यानमनु
तुसंधेयं।। ।।इति द्वितीयस्य तृतीये सप्तदशो वर्गः।। ।।अथैकविंशी।। यत्रा सुपर्णा अमृतस्य भागमनिमेषं वि
दथाभिस्वरंति।। इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश।। ।।यत्रादित्यमंडले सुपतनाः शोभ
नगमना रश्मयः अमृतस्योदकस्य भागं भजनीयमंशं आदाय अनिमेषं अनवरतं विदथा वेदनेन ज्ञानेन

स्याभिरेवं कर्त्तव्यमिति बुध्या अभिस्वरंति अभिप्रापयंति यश्च विश्वस्य भुवनस्य भूतजातस्य इनः स्वामी तथा
तस्य गोपाः गोपयिता रक्षिता यः आदिशः स परमेश्वरः धीरो धीमान् प्राण्यनुग्रहबुद्धियुक्तः सन् मा मां पाकं
पक्तव्यं अविपक्वप्रज्ञं अत्रास्मिन् स्वकीये मंडले आविवेश प्रवेशयति अत्रास्मिन्मदीये देहे वा नियामकतया
प्रविष्ट इत्यधिदैवतपक्षे । अथाध्यात्मपक्षे यत्र यस्मिन्नात्मनि सुपर्णाः शोभनपतना निजस्वस्वविषयग्रहणाय
गमनकुशला ज्ञानेंद्रियाणि चक्षुरादीनि अमृतस्य भागं अत्र विषयावच्छिन्नचैतन्यममृतमित्युच्यते ॥ तस्य भा
गं भजनीयं स्वांशं अनिमेषं मेषरहितं अनवरतं विदथा वेदनेन वृत्यवच्छिन्नचैतन्येनावरुद्धानि अभिस्वरंति अ
भिप्रापयंति आवरणापगमनेन तत्स्फोरयंति किंच यस्मिन्नः स्वाम्यस्य देहस्य विश्वस्य च भुवनस्य गोपाः गोपयि
ता रक्षिता यद्वा विश्वस्य भुवनस्य भूतजातस्य स्वामी अस्य देहस्य गोपाः अनेन तत्त्वंपदार्थयोरेकत्वं प्रतिपादि
तं भवति स परमेश्वरो धीरः समाधिनिष्ठवत्सर्वदा अविक्रियः मा मां पाकं परिपक्वमनस्कं यागदानादिना अप

ते आश्रयतः । तयोरन्यः एकः पिप्पलं पक्वं फलं स्वादुतरमत्ति अपरः अनश्नन् अभिचाकशीति अभिपश्यति त
द्वत् द्वौ सुपर्णौ सुपर्णस्थानीयौ क्षेत्रज्ञपरमात्मानौ सयुजा समानयोगौ योगो नाम संबंधः स च तादात्म्यलक्षणः
स एवात्मा जीवात्मनः स्वरूपं यस्य परमात्मनः स च तदात्म्यौ एवमन्यस्यापि स एवात्मा परमात्मनः स्वरूपं यस्य जी
वात्मनः एवमेकस्वरूपावित्यर्थः ॥ अनेन भास्करमतानुसारिणो अतिरेकिनाम्नो जीवात्मा परः आत्मनोनान्यः
स च परमात्मा जीवादन्यो नानाजीवाश्रयणादिति ते निरस्ता भवंति ॥ ननु संबंधो दृष्टः स च पक्षिणोरेव भेदमपेक्ष्य
ते । अतः कथमैकात्म्यमिति नऔपाधिकभेदं वा वास्तवाभेदं वापेक्ष्य प्रवृत्तः अत एव सखायौ समानख्यानौ नन्वे
कस्य यादृक् संख्यानं तत्समानख्यानं यस्येति व्युत्पत्त्या भेदः स्फुटं प्रतिभाति । कथं तादात्म्यमुच्यत इति न वक्तव्यं न त्वप
रस्परं दृष्टांतदार्ष्टांतिकभावः अपितु यस्य यादृक् संख्यानं स्फुरणं परमात्मनः तदेव स्फुरणमितरस्यापि जीवात्मन
इति सखायावित्युच्यते एकरूपौ प्रकाशावित्यर्थः ॥ अत उपपन्नमेकात्म्यं अनेन वास्तवभेदोपि निरस्तः ॥ समानं वृक्षं

प्रातःसवने अधितपरिगायत्रं अष्टाक्षरात्मकं आहावप्रतिरूपं गायत्रं पदमाहितं तद्यथा होता श्रोंसावोमिति त्र्य
क्षरेण तद्यथा शंसामोदैवमिति पंचाक्षरेणाध्वर्युः प्रतिगृणाति तन्मीलितत्वाद् अष्टाक्षरं संपद्यते तच्चाष्टाक्षरं
संपद्यते तच्चाक्षरं गायत्रीसदृशं तस्या अपि पादस्याष्टाक्षरत्वात्। इदमेवं प्रातःसवनरूपे गायत्रप्रतिष्ठापनं।
तथा सवनांतेपि शंसनांतरमुक्थं वाचीति चतुरक्षरमाह उक्थशा इति चतुरमध्वर्युः प्रतिगृणाति तदष्टाक्षरं
संपाद्यते। एतदेवं पदं गायत्रेण गायत्रस्थापनं तथा त्रैष्टुभं तु माध्यंदिनेन सवनात् त्रैष्टुभं आहावप्रतिग
रणरूपं पदं निरतक्षत ऋत्विजः तद्यथा माध्यंदिनसवने होताध्वर्यो श्रोंसावो इत्याह्वयते षडक्षरेण अध्व
र्युश्च शंसामोदैवोमिति पंचाक्षरेण प्रतिगृणाति। तन्मिलितत्वे एकादशाक्षरं संपद्यते। इदमेवं माध्यंदिवसवनाद्
त्रैष्टुभे त्रिष्टुभाधानं तथा सवनांतेपि शंसनानंतरं उक्थं वाचीन्द्राय इति सप्ताक्षरमाह अध्वर्युश्च उक्थशा इति चतु
रक्षरेण प्रतिगृणाति। तन्मिलितत्वे एकादशाक्षरं संपद्यते। इदमपरं त्रैष्टुभे त्रैष्टुभस्थापनं अथ तृतीयसवने हो

ताध्वर्यो श्रोंसावोमिति सप्ताक्षरेणाह्वयते शंसामोदैवोमिति पंचाक्षरेणाध्वर्युः प्रतिगृणाति द्वादशाक्षरं भव
ति तदिदं प्रथमं जागते जगसंपादनं तथा उक्थादपि शंसमानंतरमाह उक्थं वाचीन्द्राय देवेभ्य इति एकादशाक्षरं भ
वति अध्वर्युश्चोमित्येकादशाक्षरेण प्रतिगृणाति तदुभय मिलितत्वाद् द्वादशाक्षरं भवति। तदिदमपरं जागते जाग
तपदस्थापनं एवं त्रिष्टुप्छंदः सु गायत्र्या उभयं मिलितत्वा द्वादशाक्षरं भवति॥ तदिदमपरं जागतपदस्थापनं ए
वं त्रिष्टुप्छंदः सु गायत्र्यादिसवनेषु गायत्र्यादिछंदस्त्रयपदप्रकृतिस्थापनमेतत्सर्वमेव रेयब्राह्मणे देवविद्यः कृ
त्य इत्यत्रास्या ऋचः इति खंडे विस्पष्टमाम्नातं तत्तादृशं छंदसि छंदस्थापनं यजमाने द्विषुः य एवं जानंति त एवामृतत्व
मानशुः प्रभुत्वं यनुष्ठानेन ह्यरा एवं जानंतो नुष्ठाने नापि फलं न प्राप्नुवंतीत्यर्थः॥ तस्य सा वक्तव्या भावादिति भाव
॥ अथ चतुर्विंशी॥ ॥गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकं। वाकेन वाकं द्विपदा चतुष्पदाक्षरे
ण मिमते सप्त वाणीः॥ ॥गायत्रेण गायत्र छंदसा अर्कं अर्चनसाधनं मंत्रं प्रतिमिमीते प्रत्येकं छिनत्ति। अ

हि॰भा॰
॥१९८॥

र्कौ मंत्रो भवति ॥ यदनेनार्चंतीति निरुक्तं । प्रतिमंत्रं गायत्रेण छंदसोपनिबध्नंतीत्युपलक्षणमेतदन्येषां छं
दसां । यद्वैतरेषां छंदसामस्यैव चतुः चतुरक्षराधिक्येन तत्तच्छंदोभिः प्रतिमिमीत इत्यर्थः । यद्वा प्रतिशब्दः स
मित्येतस्मिन्नर्थे छंदोभिर्मंत्रानुसंमितान्करोतीत्यर्थः । अर्केण साम्नाउक्तलक्षणेन मंत्रेण साम गायत्ररथंतरा
संज्ञकं साम प्रतिमिमीते । नत्वेकं साम तृचे । क्रियत इति सर्वेषु साम्नि विहितं अतो वैः समेति कुर्वंत्यैकं पृथगुच्य
तेऽर्केणेति न वक्तव्यं नैकं सामैकस्यामेकस्यामृच्यध्यूल्हं अप्यूढं पश्चाद्द्वितीयोन्यासु तदुत्तरयो गीयते । प्रतिदेवतः प्र
तंत्रिस्तुगानं अतएव वचनमविरुद्धं त्रैष्टुभेन द्विवा त्रिवावृतेन द्विचतुश्चरूपं वाकं वक्तव्यं एवं छंदः प्रति
मिमीते । अथवा कं स्वकं एतावद्द्विस्त्रिष्टुब्वद्विरूपनिबद्धमिदं सूक्तमिति नादशोनवाकेन वाकं वर्गं अनुवाकं वा
मिमीते । वीदशोनवाकेनेति सावित्रीष्यते । द्विपदा चतुष्पदा पादद्वयबद्धविराडादिछंदो निबद्धमंत्ररूपेण च
तुष्पदा पादचतुष्टयोपेतेन अनुष्टुबादिमंत्ररूपेणेति इयतो भिर्द्विपदाभिर्वर्गः इयतो भिश्चतुष्पदाभिः रूपै

श्रीः
॥१९८॥

गतरजस्तमस्कत्वेन दर्पणवदतिनिर्मलसत्वो द्विजमनस्कं मां आविवेश उक्तरूपे चित्ते आदर्शवत्तादृशं वस्तु स्फु
रतीत्यर्थः ॥ यद्वा परिपरिपक्वनोहं पूर्वमज्ञानदशायां मदन्य ईश्वरोस्तीत्यविद्वान् ततः परमस्ति कश्चित्सर्वज्ञः सर्वे
श्वरः स सज्ञानादिलक्षण इति निश्चित्य पश्चाद्गुरुशास्त्राभ्यां स एवाहमस्मीति मत्वा एवं पारंपर्येण वगया
संभावनाविपरीतभावनोच्युदस्य भावनया साक्षात्कृत्यपरिपूर्णः परमात्मभूत इत्यर्थः । अयमेव समाधीरः पर
कुमत्राविवेशेयनेनोच्यते । नन्वनवच्छिन्नस्य परमात्मनः सर्वस्य व्याप्तत्वात् प्राप्तिरेव नोपपद्यते सत्यमत्र प्राप्ति
र्द्विविधा । प्राप्तप्राप्तिरप्राप्तप्राप्तिश्चेति प्राप्तस्यापि कंठचामीकरन्यायेनावरणज्ञानहानद्वारेण प्राप्तिरुपपद्य
ते । अस्य मंत्रस्यायं निरुक्तः यत्र सुपर्णाः सुपतना आदित्यरश्मय इत्यादिकं द्रष्टव्यं ॥ ॥यस्मिन्वृक्षे॰ ॥१०॥ यद्गाय
त्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत । यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः ॥ ॥
तत्र छंदःशब्देनोच्यते । गायत्रं प्रातःसवनं त्रैष्टुभं माध्यंदिनं सवनं जागतं तृतीयसवनमिति श्रुतेः ॥ तादृशे

स्तोविष्टुतीराहुः पादत्रयमाहुरित्यर्थः॥ अथवा तिस्र ऋचः आहुः॥ ततो होता मह्ना बलेन महित्वा महत्त्वेन प्ररि
रिचे प्ररिच्यते अन्यानि सामानि पृथक् निर्मितवान्। यद्वा गायत्रशब्दः छंदोवाची तस्य तिस्रो मूर्तीराहुः क्रमेण
षडक्षरैकादशाक्षरद्वादशाक्षरैर्गायत्री त्रिष्टुब्जगत्य इत्येवं। यस्मादेवं ततस्तस्माद्गायत्री छंदसा वा निश्वास
ती मह्ना बलेन महत्त्वेन प्ररिरिचे सर्वाणि छंदांस्यतिक्रामति येनैव बलेन समभाद्दत्तवती तादृशेनैव बलेनैव
भवति॥ ॥ इति द्वितीयस्य तृतीये ऽष्टादशो वर्गः॥ ॥ प्रवर्ग्ये घर्मधुगाह्वनकाले उपह्वय इत्यादि द्वे ऋचौ
उपह्वये सुदुघां धेनुमेतामिति द्वे त्रिष्टुभावंत्या जगती॥ सैषा षड्विंशी॥ ॥ उपह्वये सुदुघां धेनुमेतां सुहस्तो गो
धुगुत दोहदेनां॥ श्रेष्ठं सवं सविता साविषन्नो ऽभीद्धो घर्मस्तदु षु प्र वोचं॥ ॥ अहं होता उपह्वये उपेत्याह्वयामि।
किं एतां धेनुं आगच्छंतीं क्षीरेण प्रीणयित्रीं गां प्रवर्ग्यार्थं॥ पुनः कीदृशीं। सुदुघां सुष्ठु दोग्ध्रीं। उत अपिच
एतां उक्तलक्षणां गां सुहस्तः शोभनहस्तः दोहनकुशलः गोधुक् गोदोग्धा अध्वर्युः दोहत् दोग्धि यस्मा

श्री
॥१९९॥

देवं तस्मादुपह्वय इत्यर्थः॥ तदर्थं सविता सवनस्यानुज्ञाता परमेश्वरो नोऽस्मदीयं श्रेष्ठं प्रशस्यं सवं सोमयागं क्षी
रं वा साविषत अनुजानातु कथमेतं तच्छृणुतेर्यच्छब्दाध्याहारः यत् यस्मात् घर्मः प्रवर्ग्यः यद्वा घर्मस्य घर्मत्व
मिति तैत्तिरीयकं। तस्माद्धर्मो ऽभीद्धः आभिदीप्तः तदु उशब्द एवकारार्थः॥ तस्मादेव कारणात् सु प्रवोचं सुष्ठु ब्रवीमि।
उपह्वय इति। यद्वा एतां पुरोदृश्यमानां धेनुं दृष्ट्या प्रीणयित्रीं मेघलक्षणां धेनुं उपह्वये आह्वयामि वर्षदोहा
र्थं। कैनां धेनुं सुहस्तः शोभनदोहनकुशलहस्तोपेतो गोधुक् गोदोग्धा आदित्यो वा वायुर्वा दोहत् दोग्धि त
दधीनत्वाद्वर्षणस्य किंच तदर्थं सविता प्रेरकः परमेश्वरः अस्मदर्थं अस्मदुपभोगार्थं इष्टमपेक्ष्यं साविषत् अ
नुजानातु प्रतिबंधेमा कार्षीदित्यर्थः॥ किमितीदमुच्यत इत्युच्यते। घर्मः ग्रीष्मः अवर्षणजनितः संतापः अ
भीद्धः अबुधः तदु षु प्र वोचं तस्मादेव कारणात् ब्रवीमि लुङि वच्यादेशो अस्यतिवक्तीत्यादिना च्लेरङ्। छांदसो
भावः॥ ॥ सप्तविंशी॥ हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छंती मनसाभ्यागात्। दुहामश्विभ्यां पयो अ

द्वि॰ भा॰
॥२००॥

अघ्न्येयं सा वर्धतां महते सौभगाय ॥ ॥ यथा ऽ ऽहुता गौः हिंकृण्वती वत्सं प्रति हिंकारं कुर्वती वसूनां वसुपत्नी
क्षीरदधिआज्यादिवसुधनानां सर्वदा पालयित्री ह्यश्विभ्यां वसुनः पालयितृत्वं तस्यै वाप्यौ स्यं च प्रतिपाद्यते पु
नः वीद् तू मनसा वत्समिछंती ईदृशी सा अभ्यागमत् इयं आगता अघ्न्या गोनामैतत् । अहननीया गौः अश्वि
भ्यां ताभ्यां अर्थाय पयः क्षीरं दुहां दुग्धां सा तादृशी महते सौभगाय प्रवृद्धाय सौभाग्याय वर्धतां प्रवृद्धा भवतु ॥
यद्वा ऽस्मै सौभाग्याय क्षीरं वर्धयितां अत्रापि हुताहिपरत्वेन यथायोगं योज्यं । हिंकृण्वती वर्षणाय नादयंती वसूनां गोर
सादिधनानां वसूनां वसुपत्नी तेषामेव पालयित्री वत्सं लोके वत्सवत्पोषणीयं मनसा इछंती प्रीणयितुं अभ्यागात् । अ
भिगच्छति । मेघरूपा सा वा अघ्न्या अहंतव्या प्रकृतस्तंभेत्यर्थः । पयउदकं अश्विभ्यां द्यावापृथिवीभ्यां स्थावरजंगमाभ्यां
अर्थाय यद्वा अश्विनौ वाय्वादित्यौ ताभ्यां सकाशात् दुहां दुग्ध्यां तौ हि वृष्टेर्मोचयितारौ ॥ घर्मविधुक्टे प्रवर्ग्ये अभीष्टवे
दोहनसमये वत्सं मातुः सकाशात् दूरापनीयमाने गौ रमीमेत् । हिं ऐषामृत्रितं च गौ रमीमेदनुवत्सं मिषंतं नमसेदुपसीद

श्री
॥२००॥

तैर्वर्गः इयं द्विपदरूपैर्वा केवलैः अपरिमितो नुवाक इति सूक्तपक्ष एतावद्भिः सूक्तैरनुवाक इति किं चाक्षरेणैव सप्तवा
णीः वागधिष्ठानिः सप्तछंदांसि मिमते निर्माणं कुर्वंति अष्टाक्षरा गायत्री एकादशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगती
ति अक्षरैः पादाः परिमीयंते परिमितैः पादैः छंदांसि ततः पादतां छंदसां अक्षरं मूलमिति तथा ऋग्वर्गसूक्ता
नुवाकादीनां चाक्षरं मूलमित्यक्षरप्रशंसा ॥ ॥ अथ षड्विंशी ॥ जगता सिंधुं दिव्यस्तभायद्रथंतरे सूर्यं पर्यप
श्यपत् ॥ गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ॥ ॥ जगतीछंदस्कायामृच्युत्पन्नं साम ज
जगत् तेन ब्रह्मा सृष्टिकाले सिंधुं स्यंदनशीलं उदकं वा दिवि द्युलोके अस्तभायत् स्तंभितवान् जागतो वा अयमेष
लोक इति श्रुतिः । रथंतरे एतन्नामके स्तंभितं सूर्यं पर्यपश्यत् । परि दृष्टवान् । प्रजापतिः तदाधारभूतायामृचि दृष्ट्वा स्तो
त्रिमीः सूर्यप्रतिपादकत्वात् हृदर्शनात् असौ वा अस्य रथंतरमिति हि श्रुतिः । अतएव तत्र सूर्यदर्शनं विधीयते रथंतरे स्तूयमा
ने संमीलयेत् । स्वर्दृशं प्रतिवीक्षेतेति । सामब्राह्मणेन गायत्रस्य गायत्र्यामृच्युत्पन्नस्य साम्नः समिधः सामिधेनीः स्ति

१०

॥अथैकोनत्रिंशी॥ ॥अयं स शिंक्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता। सा चित्तिभिर्नि हि चकार मर्त्यं
विद्युद्भवन्ती प्रति वव्रिमौहत॥ ॥सोयं वत्सः शिंक्ते अव्यक्तं ध्वनिं करोति। येन वत्सेन गौर्माता अभीवृता आग
त्याभितो वेष्टिता भवति। किंच सा गौर्मायुं शब्दं मिमाति निर्मिमीते पुनः स्थिता ताता ध्वसनावधिश्रिता ध्वंसनस्याने
गतानि वासाश्रयाधिष्ठितासा तादृशी। चित्तिभिः ज्ञानैः तत्पूर्वकैः कर्मभिर्वा मर्त्यं निचकार हि नीचैः करोतीति
तां विद्विन्नष्टि। मनुष्या यथा बालकस्योपज्ञानं स्तनपानादिस्नेहं कुर्वन्ति ततोप्यतिशयान्तियं करोतीत्यर्थः॥ किंच वि
द्युद्भवन्ती बहुलक्षीरं तया विद्योतमाना वव्रिं स्वकीयं रूपं वव्रिरिति रूपनाम रूपं प्रत्यौहत प्रत्यूहति प्रकटयति। यद्वा वत्सस्ने
हातिशयस्वरूपं विद्युद्भवन्ती विद्युदिव शीघ्रदर्शना प्रत्यूहत। अयमेवार्थः॥ अर्थान्तरं च शब्दपूरणिर्निमित्तनिरु
क्ताचार्यः। किल मंत्रदेवताज्ञानामीक्षभिमानितवानुद्दुर्दयस्य तत्तस्य स्वरूपमसौ जानाति किलेनं यामोहया
मीति मनसि कृत्वा संदिग्धो भयलिंगं प्रादुरासीत्। अथ तस्य पुरतः स च तां बुबुधे बुभुत्सया वतो स्वरू

पेप्रच्छत्तान्नामितवरूपे प्रदर्श्ययेति स चार्यं शिंक्ते इत्येषा मृद्देवता तत्र प्रतीयमानं स यस्वरूपमित्युपदिदेश। कु
थमत्रोभयलिंगत्वं वस्तुतः उभयलिंगत्वे कथं देवतैक्यमित्युच्यते। अत्रोभयलिंगत्वमुभयं यथा संभवति स्त्री
पुंलिंगद्वयेन मध्यमोत्तमलिंगद्वयेन चातत्कथमयं स योनेति पुंलिंगवाचिना शब्दत्रयेण मेघाः प्रतीयन्ते अधि
श्रितानेत्यादिना स्त्रीलिंगवाचकेन माध्यमिकावाक् उभयलिंगत्वं तथा विद्युद्भवन्ती तां तं मध्यमलिंगं तत्र मेघस्त
नितनयो मर्माध्यमिकयोः प्रतीतेः तथा सति वव्रिमौहतेत्यत्र वे वर्षेण पृथिवीं प्रच्छाद्य तस्या रसं प्रत्यादत्त इत्ययम
र्थो विवक्षितः। स चादित्यव्यापार इत्युत्तमलिंगत्वं तर्हि वस्तुतः उभयलिंगत्वप्रतीतेः उभये अपि देवते यल्लिंगं
स्यादेवते तिन्यायात्॥ अतः कथमेकदेवतासिद्धिरिति अयं स येनेत्येतेषां व्यत्ययाश्रयेण न सर्वदेवतानामधिष्ठा
नसिद्ध्याः एकत्वाश्रयणेन वा सर्वपूर्वत्वमिन एकत्वाश्रयणेन वा देवतैक्योपपत्तेः। अनेन मध्यमोत्तमभेदेनोभय
लिंगत्वपक्षेपि देवतैक्यमुक्तं भवति। नतएकैकवा महास्यादेवते फलं तादृक्तो देवतैक्यं अधिष्ठानभेदस्थानि

रुध्यते। अयं स शिंक्ते इयं सा माध्यमिका या वा चोदयित्री देवता। शिंक्ते अव्यक्तं ध्वनिं करोति। येन गोरभिवृता गौः शिंक्ति
वा तां माध्यमिकां वाचं कुरुते। नैव माध्यमिकां वाचं निर्दिश्यते। अपि तु मेघात स्यां वा विशिंजानायां स एव शिंक्ते इत्यु
पचर्यते। अयं चाः क्रोशंतीतिवत्। अयं समेघः शब्दं करोति। अथ वायं तु सोपमाभिमिनोति स्वतेजः सर्वत्र प्रक्षिपतीति म
धुरादि ध्वजे दिवाति दीप्तं शब्दं करोतीत्यर्थः॥ अथवा सामर्थ्यादात्मनमादिसमर्हं तं निर्मिमीत कुत्रास्थिता ध्वस
नावधिश्रिता ध्वंसनो मेघोश्रिता सा ईदृशी चित्तिभिः कर्मनामैतत् स्वकर्मभिर्दीप्तिरूपैर्मर्त्यमरणधर्माणां स्थावर
जंगमरूपं कृत्स्नं ध्वनिं हि अवकारं नावैः करोति मनुष्यान् प्रणेतानुकरोति औषध्यादिकं पक्वेनावनतं करोमि। अथवा चि
त्तिभिर्द्योतलक्षणैः कर्मभिः विद्युत् भिद्योतमानायाभी। यास वैशिरां सिन भानि कुर्वंति कथं भूतानि वै करोतीत्युच्यते।
विद्युत् कुर्वंति। विद्रूपतामापद्यमाना प्रतिवृद्धिमोहत वद्धिरिति रूपनामसुहृतिरत्र सामर्थ्यादुपसंहारः। वाचा प्रत्यु
पसंहरति उदकलक्षणं पुनराहृते रश्मिद्वाराहृतं उदकं पुनर्घर्मकाले आदित्ये एकस्यै ज्योतिषस्त्रेधाकरणादि

तेति॥ ॥सैषा स्वाध्विं त्री॥ गौरमीमेदनु वत्सं मिषंतं मूर्धानं हिङ्ङकृणोन्मातवा उ॥ सृक्वाणं घर्ममभि वावशाना मिमाति
मायुं पयते पयोभिः॥ ॥गौर्धेनुः मिषंतं निमीलिताक्षं वत्समनुलक्ष्य अमिमेत् शब्दं करोति मीमयतिः शब्दकर्मा
यह्वा उत्कं वत्सं आत्मानं प्रतिक्षिपति। किं च तस्य वत्सस्य मूर्धानं माता वै गौर्वत्सं तु लेहनेनाप्यायितुं इउ शब्दं वधार
णे हिङ्कुः कृणोत्। हिङ्कारमकरोत् करोति॥ किं च सृक्वाणं वत्सस्य सारासृक्वं वदनं प्रांतं प्रेनस्य सत्र क्षारं धर्मं क्षीरस्य क्षी
रणशीलं वत्सं अभि अभिलक्ष्य वावशाना भृशं कामयमाना शब्दं मिमाति निर्माति करोति तादृशी सती पयोभिः
प्रभूतैः क्षीरैः पयते प्यायते आप्यायनं करोति वत्सं च अत्रापि मेघपरतया योजनीयं एवं वा अन्तमेघरूपा गौर्धे
नुः मिषंतं दृष्टिरूपक्षीरभावेन निमीलिताक्षं लोकाख्यं पुत्रमनुलक्ष्य अमिमेत् गर्जनशब्दं वर्षणविहररूपं करोति। मूर्धस्था
नीयां भूमिं मातवा उ निर्मातुमेव संख्यादियुक्तं कर्तुं हिङ्कृणोत्। प्रतिपादनभेदाद पुनरुक्तः। किं च सृक्वाणं पूल्ल
स्त्रक्षारं घर्मदीप्तं पुत्रमभि वावशाना अभिमुख्येन कामयमाना पयोभिरुदकैः पयते प्यायते आप्यायनं करोति।

पद्यमानमा च परा च पथिभिश्चरंतं॥ स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वंतः॥ ॥अहं गोपां सर्व
स्य लोकस्य वृष्टिप्रकाशादिना गोपयितारं अनिपद्यमानं कदाचिदप्यविषण्णं। तथा पथिभिर्विचित्रैर्मार्गैरंतरि
क्षरूपैरा च रंतं परा च रंतं च उदयप्रभृत्या मध्याह्नमागच्छंतं मध्याह्नप्रभृत्या सायं पराङ्मुखं गच्छंतं एवंम
हानुभावमादित्यं अपश्यं यथास्येन पश्येयं किंच स आदित्यः सस्रीचीः सहांचतीः विषूचीर्विषुर्गवतीः रा
त्रावपि चं दृश्यमादिशानां प्रकाशयित्रीस्त्विषो वसानः आच्छादयन् भुवनेषु भुवनैकदेशेषु लोकादिप्रदेशेषु
अंतर्मध्ये आवरीवर्ति उदयास्तमयौ कुर्वन् पुनः पुनः आवर्तते तमपश्यामीत्यर्थः॥ एष वै गोपा एष हीदं
सर्वं गोपायतीत्यादि ब्राह्मणं। अपश्यं गोपामित्याह। असौ वा आदित्यो गोपाः। स हीमाः प्रजा गोपायती
त्यादि तैत्तिरीयकं द्रष्टव्यं॥ ॥अथ द्वात्रिंशी॥ य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात्।
स मातुर्योना परिवीतो अंतर्बहुप्रजा निर्ऋतिमा विवेश॥ ॥अथ गर्भवासक्लेशपूर्वकजननप्रतिपा

दनेन तत्परिहाराय आत्मज्ञानं कर्तव्यमित्यर्थोऽत्र प्रतिपाद्यते। यः पुमान् पुत्रार्थः ईं एनं गर्भं चकार करोति निक्षिप
ति च तत्कारणभूतस्य विक्षेपकारेण न स पुमानस्य तत्त्वं वेद कर्मणि षष्ठी वा एनं गर्भं न जानाति कथं भूतः
कथं वा केन प्रयोजनेनेति सर्वमिमं न जानातीत्यर्थः॥ पश्चान्मातुरुदरस्य उदरस्थमुदरस्थं यं दृष्ट्वा तथा मुपश्य
मनुमानेन वा दर्श्यति स तस्मात् द्रष्टुः सकाशात् स हिरुगित् नु हिरुगित्यंतर्हितनाम इत् एवकारार्थः नु
निश्चये। अत्यंतमंतर्हित एव खलु। यद्वा यः संसारावस्था वा ईं एनं कृषिवाणिज्यवेदाध्ययनादिकं चकार
सोऽस्य एतज्जन्मवेलोकांतरजन्मांतरे वा तथा य ईं एनं ददर्श गिरिनदीसमुद्रवंदिकं ददर्श जीवन्समये तस्मा
द्दृष्टात् हिरुगिन्नु पृथगेव अत्र अनुभूतं सर्वत्र जन्मांतरे लोकांतपवाऽनभवतीत्यर्थः स तादृशो मातुर्जनन्याः यो
नायोनौ अंतः परिवीतः उल्बजरायुभ्यां कपरिलोवेष्टितः सन् बहुजन्मभाक् अथवा उत्सन्नः सन् स्वयमप
प्यपसो स्यादेन बहुप्रजाः एवं गर्भदुःखमनुभवन् निर्ऋत्यभिधानं पुनर्दुःखमनुभवतीत्यावत्स्वरूपभूत

द्वि·भा· त्मज्ञानं अतस्तत्परिहारायात्मा ज्ञातव्य इत्युक्तं भवति। एवमात्मविदामभिप्रेतोऽर्थः। नैरुक्तं तु य ईं चकार मध्यस्था
॥२०४॥ नो वायुर्वा मेघो वा य एतद्दृष्टिफलं करोतीति सोस्मादपि हिरुक् अंतर्हितः प्राणिकर्मवशेन काले वर्षिता परमेश्वर आ
दित्यः आत्मा निगूढ इत्यर्थः॥ य ईं हिरुक् अंतरिक्षमेतं ददर्श पश्यतीति से दृष्टे लक्ष्मणः पुत्रो मातुर्भिमातुरंतरि
क्षस्य योनौ योनिवत् सर्वस्याधारभूतेंतरिक्षे उभयोरंतरिक्षनामत्वात् तु समीं सविशेषाभावो द्रष्टव्यः। अंतरिक्षे
वृष्टेर्लोगोन्यामंतर्मध्ये बहुप्रजाः बहुप्रजानानः बहुप्राण्युपकारि। अथवा जनित्रीं तरणिस्तण्यर्थः। बहूनां धाय
णां सस्यानिष्पादनद्वारेण प्राणिनां वा प्रजनयिता सन् निर्ऋतिं निरमणसाधनं भूमिमाविवेश प्रविशतीति प्राप्नो
तीत्यर्थः॥ ॥अथ त्रयस्त्रिंशी॥ द्यौर्मे पिता जनिता नाभिरत्र बंधुर्मे माता पृथिवी महीयं। उत्तानयोश्चम्वो३
र्योनिरंतरत्रा पिता दुहितुर्गर्भमाधात्॥ ॥दीर्घतमा ब्रवीति मेऽद्य द्यौर्द्युलोकः पिता पालकः न केवलं पालक
मात्रं पितुर्जनिता जनयिता उत्पादयिता तत्रोपपत्तिमाह नाभिरत्र नाभिभूतो भौमो रसस्तत्रातिष्ठतीति श्रीः
॥२०५॥

द्युतः सूर्यरश्मिभ्या दुपपद्यते। तमू अकृण्वन् त्रेधा भुवे कमिति वक्ष्यमाणत्वात्। स्तनितस्य विद्युद्वा वा मेघविद्युतस्त
नितानामभेदाभिप्रायेण इदं शरीरं जीवावस्थायां अनेन देहस्यासारता देहस्यानित्यत्वं च प्रतिपाद्यते॥ वा नवत्
तुरगातु स्वव्यापारस्य तूर्णगमनं सत् एजत् तत् शयोऽशीववर्त्तते पश्चात्प्राणापगमनानंतरं उक्तलक्षणं सत् ध्रुव
मचलितं सत् पस्त्यानां गृहाणां मध्य आ शेते स्थातु चति छति आकारः पू ॥ अथ त्रिंशी॥ अनच्छये तुरगातु जीव
मेजद्ध्रुवं मध्य आ पस्त्यानां॥ जीवो मृतस्य चरति स्वधाभिर मर्त्येनासयोनिः॥ ॥अनत् प्राणनं कुर्वन् जीवनं जीव र
णो वा अथ जीवस्यैव लक्षणमाह। मृतस्य शरीरस्य संबंधी जीवः मर्त्येन मरणधर्मकेन शरीरेण सयोनिः पूर्वसमानो
त्पत्तिस्थानः यद्यपि जीवस्य न जन्मास्ति तथापि वपुषस्तत्संबद्धत्वात् तत्संबंधेनोपचर्यते तदेवाह। अमर्त्यो अमरणस्व
भावः जीवापेतं वाव किलेदं म्रियत इति श्रुतेः॥ उक्तस्वभावो जीवः स्वधाभिश्चरति पुत्रकृतैः स्वधाकारपूर्वकप्रद
त्तैः रसैश्चरति विचरतीत्यर्थः॥ ॥इति द्वितीयस्य तृतीये एकोनत्रिंशो वर्गः॥ ॥प्रवर्ग्ये अभिष्टवे अपश्यं गोपामनि

थिवी समाप्यते तत्पृच्छामि तथा त्वामन्यत्पृच्छामि किं तदित्युच्यते यत्र भुवनस्य भूतजातस्य नाभिः संनाहो
बंधनं यत्र सर्वं संनद्धं भवति तमित्यर्थः ॥ किंच त्वा त्वां वृष्णो वर्षकस्याश्वस्य व्याप्तस्य आदित्यस्या सो वा आदित्यो वृष
एव इति तैत्तिरीयकं तस्य रेतः रेतोवत्कारणं तत्किमिति पृच्छामि तथा वाचः सर्वस्या वाग्जातस्य परमं निरतिशयम
स्थानं सर्वस्य वाचः संकरणं एतत्प्रश्नचतुष्टयं पृच्छामि ॥ ॥ अथैवं पृष्टो यजमान इयं वेदिरित्यनया प्रत्युच्यते ॥ इयं वेदिः
परो अंतः पृथिव्या इति प्रत्याहेति सूत्रितत्वात् ॥ ॥ सैषा पंचत्रिंशी ॥ इयं वेदिः परो अंतः पृथिव्या अयं यज्ञो भु
वनस्य नाभिः ॥ अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ॥ पृथिव्याः प्रथनवत्याः भूम्याः परो
अंतः परमंतं पर्यवसानमियं वेदिः नहि वेद्या इति रिक्ता भूमिरस्ति एतावती वै पृथिवी यावती वेदिरिति श्रुतेः ॥
तथा अयं यज्ञो भुवनस्य भूतजातस्य नाभिः संहननं तत्रैव वृष्ट्यादि सर्वफलोत्पत्तेः ॥ सर्वप्राणिनो बंधकत्वाद
अथ वृष्णोः वर्षकस्यादित्यस्य रेतो यं सोमो रसात्मकः अग्नौ हुतः सोमरसः आदित्यं प्राप्य वृष्ट्यादि फलं जन श्री ॥२०५॥

नयति अयं ब्रह्मा प्रजापतिरेव वाचो मंत्रादिरूपायाः व्योम उत्कृष्टं रक्षकं स्थानं तत्रैवोत्पन्नेस्तत्रैव पर्यवसानाच्च ॥ ॥
इति द्वितीयस्य तृतीये विंशो वर्गः ॥ ॥ अथ षट्त्रिंशी ॥ ॥ सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठंति प्रदिशा विध
र्मणि ॥ ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवंति विश्वतः ॥ ॥ सप्त सर्पणस्वभावाः सप्तसंख्याका वा
रश्मयः अर्धगर्भाः संवत्सरस्यार्धे गर्भस्थानीयमुदकं धारयमाणाः यद्वा ब्रह्मांडस्यार्धमध्ये अंतरिक्षे गर्भव
द्वर्तमानाः भुवनस्य लोकस्य रेतः सारं वृष्टिप्रदं तेन रेतो भूतास्ताः इमा रश्मयो विष्णोर्व्यापकस्यादित्यस्य विध
र्मणि जगद्धारणव्यापारे प्रदेशेनातिष्ठंति वर्तंते ॥ किंच ते धीतिभिः प्रज्ञाभिः मनसा जगदुपकारः कर्तव्य इति बुध्या
च विश्वतः सर्वतः द्वितीयार्थे तासिः विश्वं परिभवंति परितो भावयंति कृत्स्नं जगद्व्याप्नुवंतीत्यर्थः ॥ यस्मादेवं तस्मा
त्ते त एव विपश्चितो बुद्धियुक्ताः परिभुवः सर्वव्यापकाश्च यद्वा सप्तार्धगर्भाः सप्त महदहंकार पंचतन्मात्राणीति
मिलित्वा सप्तसंख्याकानि अर्धगर्भाः अविकृतिरूपाः विकृत्याश्रयायाः मूलप्रकृतेः प्रकृतिविकृतेरुदासीन

द्वि॰भा
॥२०६॥

स्वात्मन्यध्यारोपितात् मलादूर्ध्वांशेन प्रपंचाकारेण परिणामाद्गर्भाः पुरुषाख्यस्याविर्भूतत्वादिसमिप्रायः। अत एव तेषां
प्रकृतिविकृतत्वं यस्मादेवं तस्माद्भुवनस्य रेतः कारणं कारणभूतानि तान्येव विष्णोर्व्याप्तस्य पुरुषस्य विधर्मणि
विशिष्टप्रदेशेन तिष्ठंति इत्यर्थः समोने॥ ॥अथ सप्तत्रिंशी॥ न विजानामि यदिवेदमस्मि निण्यः संनद्धो मन
सा चरामि। यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः॥ ॥अहं दिवेदं यदिदं विश्वं अस्मि
तदहं कृत्स्नप्रपंचोऽपि अहमेवास्मि भमेत्वं ... परमार्थं यत्सत्सर्वत्रानुगतोऽस्ति भाति स्वयमिति यो ये यश्चेदानीं रूप
णकारोऽस्ति सोऽहमस्मीति न विजानामि विविच्य नाज्ञानावृतः परं ज्ञानमस्त्रैजनितमिदमहमस्मीति ज्ञानं जातमपि स्वस्व
रूपमेव भवति। इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वं स ईक्षत बहु स्यां प्रजायेयेत्यादिश्रुतिभ्यः एकविज्ञानेन सर्ववि
ज्ञानप्रतिज्ञानात् तदनन्यत्वमारंभणशब्दादिभ्य इत्यादियुपपत्तिभिश्च प्रपंचस्य ब्रह्मानन्यत्वं सिद्धं॥ यद्वा इव शब्द
इव उपमार्थः यदिवा यदा प ... क्षज्ञानैः सर्वैः काम्यरूपमात्तु भवितुं सर्वात्मा यदस्मि तन्न विजानामि न प्रबो

श्रीः
॥२०६॥

षः रेतश्चान्नं जायते अन्नाद्रेतः रेतसो मनुष्य इत्येवं पारंपर्येण जननसंबंधिनो हेतोर्वृ रसस्यात्र सद्भावात् अन्ने
नैवाभिप्रायेण जनितेत्युच्यते॥ अत एव बंधुः संबंधिबात् तथेयं महती पृथिवी मे माता मातृस्थानीया स्वोद्भूतौ
षध्यादिनिर्मात्री इत्यर्थः। किंच उत्तानयोः ऊर्ध्वतानयोः चस्वोः सर्वस्या अन्योन्यभोगसाधनयोर्द्यावापृथिव्योरंतर्म
ध्ये योनिः सर्वभूतनिर्माणाश्रयमंतरिक्षं वर्तत इति शेषः॥ अत्रास्मिन्नंतरिक्षे पिता द्युलोकोऽधिष्ठात्र नधिष्ठा
नयोरभेदनादित्यो द्यौरुच्यते स्वस्वरश्मिभिः अथवा इंद्रः पर्जन्यो वा दुहितुः दूरे हितयोः भूम्याः गर्भं सर्वोत्पाद
न समर्थं वृष्ट्युदकलक्षणं आधात् आधानं सर्वतः करोति आ स्वामधिके मध्यमे हनि ब्रह्मोद्यहोत्रादयः पृच्छा
मित्येतेन याय जमानं पृच्छेयुः। तथा च सूत्रितं एकैकशोयजमानं पृच्छति पृच्छामि त्वा परमंतं पृथिव्या इति॥ ॥से
षा चतुस्त्रिंशी॥ ॥पृच्छामि त्वा परमंतं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः॥ पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृ
च्छामि वाचः परमं व्योम॥ ॥हे यजमान त्वा त्वां पृच्छामि प्रश्नं करोमि। पृथिव्याः परमंतं उत्कृष्टं काष्ठां यत्र सर्वपृ

रूपचर्यते॥ एवंभूतः सन् स्वधर्माचरणेनोपलक्षित तत्तद्योगेन गृहीतः। यश्चैतद्देहेनान्नमयं शरीरं लक्ष्यते। तेन
गृहीतः सन् प्राङ्क्ति अशुभं कर्म कृत्वाधो गच्छति प्राङ्क्ति ऊर्ध्वस्वर्गादिलोकं प्राप्नोति परमात्मैव सूक्ष्मशरीरोपाधि
कः सन् नानाविधं कर्म कृत्वा तद्योगाय जीवसंज्ञां लब्ध्वा शरीरत्रयेण संबंधो लोकांतरेषु संचरति। स्थूलसूक्ष्मो
भयशरीरपरिग्रहेण लोके गुणत्रयान्वितः सन् परिभ्रमति तथा च श्रूयते गुणान्वयो यः फलकर्मकर्ता कृतस्य
तस्यैव स चोपभोक्ता स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिरिति॥ इदानीमुभयप्रा
धान्येनाह। तातौ भूतलांसकर्त्तास्थितौ शाश्वतौ अविभागेन सर्वदा वर्त्तमानौ सर्वदा सूक्ष्मशरीरपक्षे सर्वदा सहव
र्त्ते उपपद्यते स्थूलशरीरपक्षेपि सकृत्विजातेः तत्कारणानां भूतसूक्ष्माणां सद्भावात्तच्छरीरस्य संबंधः उपपद्य
ते। विभूनां इह लोके सर्वत्रगमनो वियंतौ अतस्तत्सलोपभोगाय सर्वत्र लोकांतरेषु गच्छतौ वर्त्तेते॥ तत्रैतयोः
अन्यं भूतात्मानं निश्चित विमुक्तः नितरां विशेषेण पश्यंति जानंति अन्यमपरं देहेंद्रियातिरिक्तं न चिविमुक्तः न जानंति। श्रीः २०७

केचन परमात्मानं देहव्यतिरिक्तं न जानंति अतो दुर्लभमात्मज्ञानमित्यर्थः॥ ॥अथैकोनचत्वारिंशः॥ ऋचो अक्षरे पर
मे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥ ॥पूर्वमंत्रे देह
स जीवात्मानावुक्तौ तयोरन्यस्य जीवात्मनः पारमार्थिकं रूपमस्तीति तदत्रोच्यते। ऋचो अक्षरे अत्र ऋक्शब्देन
ऋक्प्रधानभूताः संतः अपरविद्यात्मकाश्चत्वारो वेदा उच्यंते। ऋगादीनामपरविद्यात्वं मुंडके श्रूयते। द्वे वि
द्ये वेदितव्ये इति प्रतिज्ञाय तत्रापरा ऋग्वेदो यजुर्वेदः सामवेद इत्यादिना तस्याः संबंधिन्यक्षरे अक्षरस्य
प्रकृतं सति गार्गि यया तदक्षरमधिगम्यते येनाक्षरं पुरुषं वेद सत्यमित्यादिश्रुतिषु प्रसिद्धो ऋगक्षरयोः प्रति
पाद्यप्रतिपादकभावः संबंधः सर्वैर्वेदैः खलु ब्रह्माधिगम्यते॥ तत्त्वौपनिषदं पुरुषं पृच्छामि इत्यादिश्रुतेः। न
नूपनिषद्भागानां तथात्वं इतरेषां तु कथं ब्रह्मविषयत्वमित्युच्यते॥ यद्यपीतरभागानां यागादिविषयत्वं त
थापि बुद्धिशुद्ध्युत्पत्त्या सत्त्वेन द्वारा वेदनसाधनत्वेन ब्रह्मविषया भविष्यंति। वेदानुवचनेन ब्राह्मणा विविदिष

तीयादिश्रुतेः तदेव विशेष्यते परमे उत्कृष्टे निरतिशये व्योमनि व्योमसदृशे अलेपत्व निरूपत्व व्यापित्वादि
साम्येन व्योमेत्युक्तं यद्वा विशेषेण सर्वस्य रक्षके निरवधि ष्ठानः भ्रमः कस्याचिदस्ति साध्यस्तस्य सर्वस्याधि
ष्ठानत्वेनाक्षरत्वात् । तादृशे तत्त्वे सर्वमध्यस्तमित्यर्थः ॥ पुनस्तदेव विशेष्यते ॥ यस्मिन् परमात्मनि विश्वेस
र्वे देवा अधिनिषेदुः निषीदंति आश्रित्य तिष्ठंति तस्मिन्नद्वयोक्तलक्षणे वस्तुनि श्रुतिऋगुपलक्षिताः सर्वे सांगाः
वेदाः पर्यवसाना इत्यर्थः ॥ यः यो मर्त्यः तत्तादृशं देवादीनां स्वरूपलाभस्येदं तत्सर्वेदैस्तात्पर्ये प्रतिपाद्यं वस्तु
न वेद जानाति स मर्त्यः ऋचा पूर्वोक्तेन ऋगादिना यज्ञजालेन किं करिष्यति वेदनसाधनेन ॥ अथ वा यो अक्षरमविदित्वा
कर्मणां कर्ता भवति यागादीननुतिष्ठति तेन किंचिदपि कर्मफलं न भवतीत्यर्थः । य इत्तद्विदुस्त एव तत्त्वं विदुर्जानंति
त इमे समासते त एवेमे ज्ञातारः समासते सम्यक् तिष्ठंति । इदं ब्रह्मैवावधारणे । त इमे त एव समासते । गवाम
यनादि सहस्रसंवत्सरसत्रपर्यंतानि सहोपयंति सहार्थे समुदाहृतः । सत्रादधिकानां यागानामभावात् तेषाम

स्यपि गाम्यजनितसर्वात्म्य अजानततत्त्वानुभाविकमित्यर्थः ॥ तत्र कारणमाह ॥ ततो हं निण्यः अंतर्हितकामैतत् । अंत
र्हितगूढचित्तः । चित्तप्रसन्नाभावेन परिच्छिन्न इत्यर्थः । तत्रोपपत्तिमाह ॥ अविद्याकामकर्मभिः सम्यग्बद्धो
वेष्टितः अत एव मनसा युक्तः भावनासहितेन ना बहिर्मुखेन विक्षिप्तेन चेतसा युक्तः संचरामि संसारे । अथ मन
सा संबद्धः चरामि इदं दृश्ये परवश एव सन् संसारदुःखमनुभवामि न सार्वात्म्यं जानामीति परिदेवयते याह्वोपीनं परिदेव
नर्थत्वेनोदाजहार । अथापि परिदेवताकस्मात्किं दृश्यवान् यथाग्निक्रीसरात् उपतन् पाषाणो विलंबेन पतति तद्वत् राचि
लं प्रसङ्गसुखस्यास्य दुःखत्वमपि तत्रैव श्रूयते कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमभिच्छितिः
॥ ॥ अथ ऋग्विंशी ॥ ॥ अपाङ् प्राङेति स्वधया गृभीतो मर्त्यो मर्त्येना सयोनिः ॥ ता शश्वंता विषूचीना वियंता न्य
न्यं चिक्युर्न नि चिक्युरन्यं ॥ ॥ अमर्त्यः मरणधर्मायमात्मा मर्त्येन मरणधर्मणा भूतात्मना देहेन सयोनिः समानस्था
नया परिच्छेदको देहोऽस्ति तत्र सर्वत्र सो विहरतीत्यर्थः । यद्वा समानो सक्तिः उत्पत्तिवत् सहवासेन वास्मिन्नप्युपपत्ति

द्वि·भा·

॥२०९॥

नोः प्रणवस्य चस्या न प्रातिनिधिभावः संबंधः ऋचोधीते इत्याद्युपक्रम्य यः प्रणवमधीते स सर्वमधीते ॐमिति
प्रतिपद्यते। एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरमित्यादिश्रुतेः। यस्मिन्निव सर्वे देवा अधिनिषे
दुः प्रणवस्य सर्वमंत्रात्मकत्वात् मंत्रेषु सर्वदेवतानां निवासात् सर्वदेवतानिवासत्वं ब्रह्माधिष्ठानत्वाद्वा ब्रह्मादि
सर्वदेवानां निवासात् इत्थमभिप्रेतं। अयं मंत्रो निरुक्ते व्याख्यातः। अपरे त्वन्यथा वर्णयंति। ऋचः ऋगच्छन्भोयो
जीवः तस्य संबंधिनी अक्षरे अविनश्वरे व्याप्ते वा परमात्मनि जीवपरमयोरौपाधिकस्यावच्छिन्नावच्छिन्नत्वाभा
सविवादिभावः तस्य संबंधः सोपाधिकस्य जीवस्य संबंधिनि परमात्मनीत्यर्थः। अत एव जीवापेक्षया परमेउत्कृ
ष्टे निरुपाधिके व्योमन् विशेषेण सर्वाधिष्ठानत्वेन रक्षके व्योमन् सदृशे वा यस्मिन् परमात्मनि देवा गमनवंतो व्यव
हरंतो वा इंद्रियसंज्ञिका विश्वे सर्वेपि अधिनिषेदुः निषीदंति आश्रित्य वर्तंते। यस्तं न वेद न विजानाति उपाध्यंश
परित्यागेन तद्देवस्वरूपमिति न पश्यंति। स स्थूलो जनः किमृचा करिष्यति केवलेन जीवेन जीवभावेनाहंकृतं प्राप्य

श्री

॥२०९॥

तिजननमरणादिकृत्स्नस्य त्यागादि इति भावः। ये तत्तद्विदुस्तत्तं इत्यादि सिद्धं। अपि हेत्रार्था धेनुर्यदि कुत्सितं
तृणं कुर्यात्। तद्धि दानीं सूयवसादित्यनया यवसादिकं प्रयच्छेत्। तथा च सूत्रितं वाश्यमानायै यवसं प्रयच्छेत्। सू
यवसाद्भगवती हि भूया इति प्रवर्ग्येऽपि एव एषैव परिधानीयासूत्रितं॥ सूयवसाद्भगवती हि भूया इति परिदधा
ति॥ ॥सैषा चत्वारिंशी॥ सूयवसाद्भगवती हि भूया अथो वयं भगवंतः स्याम॥ अद्धि तृणमघ्न्ये विश्वदानीं पि
ब शुद्धमुदकमाचरंती॥ ॥हे अघ्न्ये गोनामैतत्। अहननीये हे गौः त्वं सूयवसात्। शोभनं यवसस्य तृणादिक
स्यात्री सती भगवती भग इति धननाम सर्वैर्भजनीय प्रभूतक्षीरादिधनवती इति भूयाः भव। हि प्रसिद्धौ एव
ञ्च यवसादिलक्षणेन क्षीरादिसमृद्धिः प्रसिद्धा। अथो अनंतरमेव वयं यजमाना अपि भगवंतः प्रभूतेन
धनेन तद्वंतः स्याम। अथैकवारं सर्वमुक्तं। इदानीं सर्वदा कर्तव्यमिति प्रार्थयते। विश्वदानीं। विश्वकाले सर्वदा
तृणमद्धि भक्षय। आचरंती सर्वतो निर्गच्छंती शुद्धं निर्मलमुदकं पिब। अयं मंत्रो यास्केनैवं व्याख्यातः

सूयवसादिना भगवती हि भवाथेदानीं वयं भगवंतः स्यामाघ्निते तृणमघ्न्ये सर्वदा पिब च शुद्धमुदकमाचरंतीति
॥ इति द्वितीयस्य तृतीये एकविंशो वर्गः ॥ ॥ अथैकचत्वारिंशी ॥ ॥ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी
सा चतुष्पदी ॥ अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ ॥ गौरीः गरणशीला माध्यमिका वाक्
सलोपश्छांदसः । मिमाय शब्दयति । किं कुर्वती सलिलानि वृष्ट्युदकानि तक्षती सम्यक् संपादयित्री एकप
दी एकपादेर्विता एकाधिष्ठाना मेघे वर्त्तमाना गमनेन साधनेन वायुना एकपदी वा द्विपदी मेघांतरिक्षाख्य द्व्यधि
ष्ठाना आदित्यो वा द्वितीयः तथा सा चतुष्पदी पादचतुष्टयोपेता दिक्चतुष्टयाधिष्ठाना । अथाष्टपदी विदिग
पेक्षया अष्टपादोपेता अष्टाधिष्ठाना नवपदी उपरिगोपक्षया सूर्येण वा नवदिगधिष्ठाना बभूवुषी एवंभूता भव
ते श्छांदसः क्वसुः ततो ङीपि वसोः संप्रसारणं किमनया परिगणनया सहस्राक्षरा अपरिमितवचनोयं अपरिमित
यास्ति युक्ता बहुभाषणशीलेव द्रववतीत्यर्थः । कुत्रेति तदुच्यते परमे व्योमन् उदकृष्टयत्ले नोत्कृष्टे अंतरिक्षे

विपुलं महज्ज्ञानेनैव प्राप्तं भवतीत्यर्थः । कर्तृणां बहुत्वाद्बहुवचननिर्देशः । अन्ये त्वन्यथा वर्णयंति ऋचः ऋगर्चनी
यमादित्यमंडलं ऋगादिमयं वा । ऋग्भिः पूर्वाह्णे दिवि देव ईयते । आदित्यो वा एष एतन्मंडलं तपति तत्र ता ऋचे
सा इत्यादिश्रुतेः । तस्य संबंधिनि अक्षरे परमे व्योम्नि उक्तलक्षणे ब्रह्मणि । य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्या
दिश्रुतेः । तस्य स्वरूपे यस्मिन् सर्वे देवा द्योतमाना रश्मयो निषेदुः वर्त्तंते य एतत् तन्न वेद स केवलं ऋचा किं करिष्यति
ये जानंति त एव विद्वांसः समासते भूम्यां सुखेन रागादिरहिताः भोगिनः संतश्चिरकालं जीवंति अपरे प्रकारांत
रेण प्रतिपादयंति ऋचो अक्षरे ऋगुपलक्षितसर्ववेदसंबंधिन्यक्षरे प्रणवरूपे ओंकारे अविनाशिनि सर्ववेदेषु व्या
प्ते वा प्रणवस्य सर्ववेदसारत्वं ब्राह्मणे श्रूयते । तान् वेदान् अभ्यतपत्तेभ्योभितप्तेभ्यस्त्रयो वर्णा अजायंत अकार उकार
मकार इति तानेकधा समभरत् तदेतदोमिति परमे निरतिशये न हि प्रणवादधिकं किंचिन्मंत्रजातमस्ति
त्रिकालातीतस्य ब्रह्मणः प्रतिपादकत्वात् । यच्चान्यत् त्रिकालातीतं तदप्योंकार एव ओं इति ब्रह्मेत्यादिश्रुतेः । वेद

ऋ॰भा॰
॥२११॥

करणभूता मेघाः अधि अधिकं प्रभूतमुदकं विक्षरंति तेनोदकेन प्रदिशश्चतस्रः प्रदिशो द्वीपा इत्यर्थे विदिशश्च
अथवा प्रकृष्टा दिशो मुख्याश्चतस्रः तत्स्थेषु तेषु तस्याः पुरुषा जीवंति ततः पश्चात् अक्षरमुदकं क्षरति सस्या
दिकमुत्पादयतीत्यर्थः॥ स तस्मात्सस्यादिकं विश्वं जगदुपजीवति। अयमपि यास्केन व्याख्यातः। तस्याः समुद्रा अ
धि विक्षरंति वर्षंति मेघास्तेन जीवंति दिगाश्रयाणि भूतानि ततः क्षरत्यक्षरमुदकं तत्सर्वाणि भूतान्युपजी
वंतीति॥ ॥अथ त्रिचत्वारिंशी॥ शकमयं धूममारादपश्यं विषूवता पर एनावरेण॥ उक्षाणं पृश्निमपचंत
वीरास्तानि धर्माणि प्रथमान्यासन्॥ ॥ शकमयं शकृन्मयं शुष्कगोमयसंभूतं धूमं आरात् नातिदूरे अपश्यं
दृष्टवानस्मि दिवा धूमस्य दूरे दृश्यमानत्वात् स एव दर्शनत्वात् स एव दर्शनं तयोः विषूवता व्याप्तिमता एना
अनेन अवरेण निकृष्टेन धूमेन परः परस्तात् तत्कारणभूतमिममग्निमपश्यं अहं यजमान इत्यर्थः॥ किंचोक्ष
णं फलस्य सेक्तारं पृश्निं शुक्लवर्णं प्राभुतेऽनेन फलमिति स्वयं प्राभुत इति वा पृश्निर्वल्लिरूपः सोमः तं वीराः

श्रीः
॥२११॥

विविधरणकुशला ऋत्विजः अपचंत। अधात्वर्थानादरेण लङ् प्रत्ययः। करोत्यर्थः स च रूपासामान्यवचन
अग्नौ विशसनादिभिः वर्णं संपादितवंत इत्यर्थः॥ तानि तत्साधनान्यनुष्ठानानि प्रथमा प्रथमानि प्रकृष्टानि फलानि
फलपर्यवसानी यानि आसन् संपादितान्यभवन्॥ यद्वा उक्षा अभवत् पूर्वे ते देवाः शकृता अपच्यत यस्मा
र्थं तद्वो धूमो मेघमासीत् उच्यते न स्वरत्वेन वा मे न्त्रो व्याख्येयो यैः विचक्षणैः॥ ॥अथ चतुश्चत्वारिंशी॥ ॥त्र
यः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषां॥ विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपं॥
॥ त्रयः केशस्थानीयप्रकृष्टरश्मियुक्ता अग्न्यादित्यवायवः ते च ऋतुथा काले विचक्षते विविधलक्षणं
भूमिं पश्यंति तेषां पृथक्पृथक्कार्यमाह॥ एषां मध्ये एको अग्निः संवत्सरे तातेसंति संवत्सरं वपते दाहेन केश
स्थानीयौषधिवनस्पत्यादिकं छेदनेनापि तत्कार्यं करोति॥ एकः अन्यत्र आदित्यो विश्वं सर्वं जगत् शची
भिः स्ववीर्यैः प्रकाशनवृष्ट्यादिकर्मभिः चष्टे। सर्वतः पश्यति। एकस्य वायोः ध्राजिर्गतिर्दृश्यते सर्वैः न रूपं प्र

द्वि॰ भा॰

॥२१२॥

यक्षत्वात् स्वर्गत्वाद्धृत्यादिरूपलिंगगम्यत्वादितिहि न्यायविदो वदंति। अयमेव मंत्रो यास्केनैवं व्याख्यातः। त्रयः केशि
न ऋतुथा विचक्षते कालेकाले अभिविपश्यति संवत्सरे वपत एषामेको अग्निः पृथिवीं दहति सर्वमेकोऽभिविपश्यति
कर्मभिरादित्यो गतिरेकस्य दृश्यते न रूपमिति। वाग्देवते पद्ये चत्वारि वागिति हविषोऽनुवाक्या चत्वारि वाक्परिमि
ता पदानि यत्नेन वाचः पदवीयमाय न्निति सूत्रितत्वात्॥ ॥सैषा पंचचत्वारिंशी॥ ॥चत्वारि वाक्परिमिता पदा
नि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति॥ ॥वाक् वाचः कॢप्ता
या पदानि चत्वारि परिमितानि लोके या वागस्ति सा च तुर्विधा विभक्तेत्यर्थः। तानि पदानि ब्राह्मणाः वेदविदः म
नीषिणो मनस ईशितारो मेधाविनो विदुर्जानंति तेषां मध्ये त्रीणि गुहानि यानि निहितानि तानि निहितस्यापि तानि नें
गयंति न चेष्टयंतो न प्रकाशंत इत्यर्थः। वाचस्तुरीयं पदं मनुष्या अंतास्तत्राश्च वदंती। व्यक्तमुच्चारयंति व्यव
हरंति कानि तानि चत्वारीति। अत्र बहवः स्वस्वमतानुरोधेन बहुधा वर्णयंति सर्ववैदिकवाग्जालस्य संग्रहस्य

श्रीः
॥२१२॥

केचिदाहुः। गौरीः गरणशीलाः शब्दब्रह्मात्मिका वाग् गतिप्रतिष्ठार्थे धातुः प्रतिष्ठितानि घटादिद्रव्याणि तक्षती
तद्वाचकत्वेन निष्पादयंती एकपदी अव्याकृतत्वेनैकप्रतिष्ठाना एकरूपा वा प्रणवात्मना द्विपदी सुप्तिङ्भेदे
न पादद्वयवती चतुष्पदी नामाख्यातोपसर्गनिपातभेदेन अष्टापदी आमंत्रितसहिताष्टाभेदेनाष्टपदा नवप
दी बभूवुषी साव्ययैरुक्तैरष्टभिर्नवपदी अथवा सनाभिके उरःकंठादिषु नवस्थानपदेषु भवंती पश्चाद् बुद्धिधाभि
व्यक्तिमुपेयुषा परमे व्योमन् उत्कृष्टे हृदयाकाशे मूलाधारे सहस्राक्षरा अनेकाकारेण व्याप्ता अनेकधा निष्प्रका
शा भवतीत्यर्थः॥ अयं मंत्र आचार्येणैवं व्याख्यातः। गौरीर्मिमाय सलिलानि तक्षती कुर्वत्येकपदी मध्यमेन द्विप
दी मध्यमेन चादित्येन वा चतुष्पदी दिग्भिश्चावांतरदिग्भिश्च नवपदी दिग्भिश्चावांतरदिग्भिश्चादित्येन च सहस्रा
क्षरा बहूदका परमे व्यवने इति॥ ॥अथ द्विचत्वारिंशी॥ तस्याः समुद्रा अधि विक्षरंति तेन जीवंति प्रदिशश्च
तस्रः॥ ततः क्षरत्यक्षरं तद्विश्वमुपजीवति॥ तस्या उक्तायाः गोः सकाशात् समुद्राः द्रप्सादकस मुदंनाधि

त्रियाज्ञिकाः ऋग्यजुःसामानि चतुर्थी व्यावहारिकीति नैरुक्ताः सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य च तुर्थी व्या
वहारिकीत्यैतिहासिकाः पशुषु तूणवेषु मृगेष्वात्मनि चेत्यात्मवादिनः अपरे मांत्रिकाः प्रकारांतरेण प्रतिपाद
यंति। परा पश्यंती मध्यमा वैखरीति चत्वारीति। एकैव नादात्मिका वाक् मूलाधारादुदिता सा परेत्युच्यते। नाद
स्य च सूक्ष्मत्वेन दुर्निरूपत्वात्। सैव हृदयगामिनी पश्यंतीत्युच्यते योगिभिर्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता
विवक्षां प्राप्य मध्यमेत्युच्यते। मध्ये हृदयाख्येन नीयमानत्वात् मध्यमा अथ यदा सैव वक्त्रे स्थिता ताल्वो
ष्ठादिव्यापारेण बहिर्निर्गच्छंती तदा वैखरीत्युच्यते॥ एवं च चत्वारि वाचः पदानि परिमितानि मनीषिणो मनस्स्वा
मिनः स्वाधीनमनस्काः ब्राह्मणाः वेदाख्यस्य शब्दब्रह्मणः अधिगंतारो योगिनः परादि चत्वारि पदानि विदु
र्जानंति तेषु मध्ये त्रीणि परादीनि गुहानि गुहाहितानि हृदये हृदयांतर्वर्तित्वात् तुरीयं पदं वैखरीसंज्ञकं
मनुष्याः सर्वे वदंति व्याकरणप्रसिद्धा नामाख्यातादिपक्षे मनीषिणो ब्राह्मणाः प्रकृतिप्रत्ययादिविभाग

ज्ञाः ये विदुस्तानि पदानि जानंति अवाग्योगविदः पामराः वयेवाङ्मयस्य तुरीयं चतुर्थं वाचं वदंति व्यवहरंति अ
र्थप्रकाशनाय प्रयुंजते। अयं मंत्रो निरुक्ते व्याख्यातः। सोत्रानुसंधेयः अथापि ब्राह्मणं भवति सा वै वाक् सृष्टा
चतुर्धा व्यभजे देष्वेव लोकेषु त्रीणि तुरीयाणि पशुषु तत्तीयागयस्यारिच्यत तां ब्राह्मणेन्यदधुस्तस्माद्ब्राह्म
णा उभयीं वाचं वदंति या च देवानां या च मनुष्याणामिति॥ ॥अथ षट्चत्वारिंशी॥ ॥ इंद्रं मित्रं वरुणमग्निमाहुर
थो दिव्यः स सुपर्णो गरुत्मान्॥ एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुः॥ ॥अमुमादित्यमेवैश्व
र्यविशिष्टमिंद्रमाहुः तथा मित्रं प्रमीतेर्मरणात्त्रातारमहरभिमानिनमेतन्नामकं देवमाहुः वरुणं पापस्य नि
वारकं रात्र्यभिमानिनं देवमाहुः॥ तथा अग्निं अंगनादिगुणविशिष्टमेतन्नामकमाहुः॥ अथो अपि च यमेवा
दित्यो दिव्यो दिविभवः सुपर्णः सुपतनो गरुत्मान् गरणवान् पक्षवान् चैतन्नामको यः पक्ष्यस्ति सोप्ययमेव य
मेकस्य नानात्वमित्युच्यते अमुमेवादित्यमेकमेव वस्तुतः संतं विप्रा मेधाविनः देवतत्त्वविदो बहुधा वदंति

तत्र सूर्यं केचनेन्द्राग्न्यात्मानं वदंति एक एव महानात्मा देवता स सूर्यस्य ब्रह्मणो न्यत्वे सर्वात्म्य मुक्तं भवति अत्र
ये केचिदग्निः सर्वा देवता इति श्रुतितः अयमेवाग्निरुत्तरे अपि ज्योतिषी इति मत्वाग्नेरेव सर्वत्र प्रतिपादकोयं मं
त्र इति। अपरे वदंति तस्य पक्षे प्रथमोऽग्निर्ग्राह्यः उद्देश्य तममग्निमुद्दिश्यैव द्वाभ्यां स्वरूपकथनं। अयं मंत्रो नि
रुक्त एवं व्याख्यातः इममेवाग्निं महांतमात्मानमेकमात्मानं बहुधा मेधाविनो वदंति इंद्रं मित्रं वरुणमग्निं दि
व्यं च गरुत्मंतं दिव्यो दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति वेति॥ ॥इति द्वितीयस्य तृतीये द्वाविंशो व
र्गः॥ ॥वर्षगमे ष्यांतिस्रः पिंगहो तव्याः तत्र कृष्णं नियानमिति। तृतीयस्यानुवाकस्य कृष्णं नियानं हरयः सु
पर्णा नियुत्त्वं तोयाम जितो पथा नर इति॥ ॥सैषाम सप्तचत्वारिंशी॥ कृष्णं नियानं हरयः सुपर्णा अपो वसाना दि
वमुत्पतंति॥ त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते॥ ॥कृष्णं निकृष्टवर्णं नियानं नियमेन गच्छं
तं मेघं हरयः उदकस्य हर्तारः सुपर्णाः शोभनपतनाः रश्मयः अपो वसानाः उदकानि वासयंतः मेघे सु अ

पा भूरादयस्तिस्रो व्याहृतयः प्रणव एक इति वेदत्रयत्वात्तत्साख्याहृतीनामेव सारसंग्रहभूतत्वादक्षराद्यात्म
कस्य प्रणवस्य इति स प्रणवाख्य व्याहृतिषु सर्वा वाक्परिमितेति केचन वेदवादिनो वदंति। अपरे व्याकरणम
तानुसारिणो नामाख्यातोपसर्गनिपातभेदेन क्रियाप्रधानमाख्यातं। द्रव्यप्रधानं नाम प्रागुपसृजंतेऽख्या
तपदस्येत्युपसर्गाः प्रादिः उच्चावचेष्वर्थेषु निपतनान्निपातः अपि तु चेत्यादिः एतेष्वेव सर्वा वाक्परिमितेति।
अथ जायाः कृत्स्नायाः वाचः चतुर्धा व्याहृतत्वात्तं वाग्वै पराव्याकृतावदत्ते देवा इंद्रमब्रुवन्निमां नो वाचं व्याकुर्वि
ति सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैंद्रवायवः सह गृह्यते। तामिंद्रो मध्यतोऽवक्रम्य व्या
करोत्तस्मादियं व्याकृता वागुद्यत इति श्रुतेः। अन्ये तु याज्ञिका मंत्रः कल्पो ब्राह्मणं चतुर्थी लौकिकेति याज्ञिकाः स
माख्यातानुष्ठेयार्थप्रकाशका ऋगादिर्मंत्रः विधानप्रतिपादको वेदविभाग इति मंत्राः कल्पोत ऊर्ध्वमियादिनोक्तः मंत्रत
दर्थप्रकाशकेदंश भागो ब्राह्मणं भाषा विषया गामानयेत्यादिरूपा व्यावहारिकी एष्वेव सर्वा वाक्परिमितेति

द्विं॰भा॰
॥२१५॥

स्वत्कं वेतज्जानाति तस्मिन्चक्रे साकं सह त्रिशता शंकवो न रथचक्रस्य शंकव इव अत्र पुरस्तादुपचारोपि न द्रष्टः सामर्
थ्यादयमर्थः । यस्मिन्नपि संवत्सरचक्रे त्रिशताः एतत्संख्याकाः षष्टिर्न न शंकवश्चार्थे षष्टीर्न न शंकवश्चार्थे षष्टि
श्चारोः अरस्थानीयान्यहानि अर्पिताः अर्पितानि दृढानि तानि चलाचलासः एकैकस्य शंकोः द्विर्भावं प्राप्ताः
चलाः चलनस्वभावान्यहानीत्यर्थः । चरिचलिपतिवदीनामच्यभ्यासस्येति द्विर्वचनमागमश्च ततः लुगूष
ष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहानीति ब्राह्मणं । द्वादश प्रधयश्चक्रमेकमिति मासानां मास्यमानाद्रीनि
रुक्तं ॥ ॥सैषैकोन पंचाशी ॥ ॥यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि । यो रत्नधा वसुविद्यः
सुदत्रः सरस्वति तमिह धातवे कः ॥ ॥हे सरस्वति तव संबंधीयः स्तनः स्तनवच्छिद्रस्थानीयस्तनौ प्राणिना
माप्यायनकारी लौ । वि॰ वै॰ दिक्षु शह्रूरूप स्तनः शशयः शशयानः तव देहे वर्त्तमानः यश्च स्तनो मयोभूः
रसास्वादिनां सुखस्य भावयिता येन स्तनेन विश्वा सर्वाणि वार्याणि वरणीयानि अभिमतरूपाणि धना

श्रीः
॥२१५॥

नि पुष्यसि भोक्तॄन् यश्च स्तनो रत्नधा वसुविद्धरणीयरसानां धारयिता यश्च वसुविदः वसूनां वासयितृ
णां धनानां वेत्ता लब्धा वेदयिता वा । किंच यः स्तनः सुदत्रः शोभनदानः सुदत्रः कल्याणदान इति निरुक्तं ॥
अत्रासंतद्यछंदश्रवणं स्तनस्यातिप्रशस्तत्वज्ञापनार्थं हे देवि तं तादृशं सर्वप्राण्युपकारकं सुखमयं स्तनं इह
अस्मिन्कर्मणि इदानीं वा धातवे अस्माभिर्धातुं पानाय कः कुरु ॥ ॥अग्निमंथनेन यज्ञेन यज्ञमिति का परिधानीया
यज्ञेन यज्ञमयजंत देवा इति परिदध्यादिति सूत्रितत्वात् ॥ ॥सैषा पंचाशी ॥ ॥यज्ञेन यज्ञमयजंत देवास्तानि ध
र्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥ ॥देवा व्यवहर्तारो यजमाना
यज्ञेनाग्निर्मथ्यमानेनायज्ञं होमसाधनमाहवनीयं अयजंत पूजितवंतः अनुष्ठानाय संयोजितवंत इत्यर्थः ।
यदग्नावग्निं मथित्वा प्रहरंति तेनैवाग्नय आतिथ्यं क्रियत इति हि तैत्तिरीयकं ॥ तानि धर्माणि अग्निसाधनानि
कर्माणि प्रथमानि प्रथम इति नौ मुख्य नाम प्रकृता नि प्रकृष्टतमान्यासन् फलप्रसवसमर्थान्यभवन्नित्यर्थः ॥

द्वि॰ भा॰

॥२१६॥

तेह वयं यजमानाः नाकं नास्मिन्नकमस्तीति नाकः स्वर्गः तं महिमानः माहात्म्ययुक्ताः सचंत संगताः। कीदृशं ना
कं यत्र यस्मिन्नाके पूर्वे पूर्वतनाः साध्याः साधनाः यज्ञादिसाधनवंतः कर्मदेवा इत्यर्थः तेसचंत निवसंति तं स
चंत तस्मादिदानीमपि मनुष्यैरेवं कर्तव्यमित्यर्थः॥ यद्वा देवा रुद्रादयो देवभावमापन्नाः पूर्वं यज्ञेन अग्निना पशुरूप
भूतेन यज्ञं यष्टव्यमग्निं अयजंत पूजितवंतः॥ अग्नेरेव मूर्तिभेदेन देवत्वं च पशुत्वं च द्रष्टव्यं॥ अग्निः पशुरा
सीत्तमालभंत तेनायजंतेति श्रुतेः। शिष्टं पूर्ववत्॥ यत्र यस्मिन् स्वर्गे निमित्तभूते सति पूर्वे पूर्वतनाः साध्याः दे
वाः साधनक्षंदाभिमानिनः। आदित्या अंगिरसश्च तेग्निनाग्निमयजंत ते स्वर्गं लोकमायन्निति ब्राह्मणं॥ एते देवाः
स्वर्गे लोके भवंति स्वर्गप्राप्ता इत्यर्थः॥ यद्वा यज्ञेन ज्ञानादियज्ञेन यज्ञं विष्णुं अयजंत पूजयंति। ते नाकं विष्णुलो
कं महानुभावाः सचंत संगच्छंते। यत्र पूर्वे साध्यादयो देवाः संति तत्स्थानं अग्निनाग्निमयजंत तं देवा इत्यादि
निरुक्तमनुसंधेयं॥ ॥अथैकपंचाशी॥ समानमेतदुदकमुच्चैत्यव चाहभिः॥ भूमिं पर्जन्या जिन्वंति दिवं जि

श्री॰

॥२१६॥

न्वि मेघाः पूरयंत इत्यर्थः अंतर्भावितण्यर्थो हि कर्म कर्तव्यं यद्वा कृत्संनियाने नियमने रात्रिः देवानां हि रात्रिर्दक्षि
णायनं तस्मिन् तस्मिन्नवर्षकाल इत्यर्थः। एवं कुर्वतो दिवं द्युलोकं तदाग्निरसमादित्यं चोर्ध्वायो सततं तिर्यगूर्ध्वं गच्छं
ति ते रश्मयः कन्तस्य सदनात् उदकस्य स्थानादादित्यमंडलादाववृत्रन् आवर्तंते अर्वाचि आगच्छंति आदित्य
अनंतरमेव यदा वागच्छंति तदानीमेव घृतेनोदकेन पृथिवी व्युद्यते विविधं क्लिद्यते। कृत्संनियमनं रात्रिरादि
त्यस्य हरयः सुपर्णा आदित्यरश्मयः इत्यादि निरुक्तं द्रष्टव्यं॥ ॥अथाष्टाचत्वारिंशी॥ ॥द्वादश प्रधयश्चक्र
मेकं त्रीणि नभ्यानि क उ तच्चिकेत॥ तस्मिन्त्साकं त्रिशता न शंकवोर्पिताः षष्टिर्न चलाचलासः॥ ॥द्वादश एत
त्संख्याकाः प्रधयः प्रहिता वर्तंते तत्स्थानीयाः द्वादश मासाः एवं अद्वितीयं चक्रमणस्वभावं संवत्सराख्यं चक्रं त्रीणि
तथा त्रीणि त्रिसंख्याकानि नभ्यानि नभ्याश्रयाणि पूलकानि संवत्सरनीयानि ग्रीष्मवर्षाहेमंताख्यानि आश्रितानि
यस्यास्य रथचक्रस्य द्वादशपरिधयो नाभ्यरहिताः त्रीणि पूलकानि संति तद्दृत्वकालचक्रस्य क उ कोपि महानुत

दकं ओषधीनां ओषधीः दर्शतं दर्शनीयं दर्शयंतमित्यर्थः॥ यद्वा ओषधीनां गर्भं दर्शतमिति पृथग्विशेषणं
ष्टिं च अभीपतः अनुकूल्येन वृष्टिभिस्तर्पयंतं जगत्प्रीणयंतं यद्वा अभीपतः अभिगमनवतः सलिलाधारान्
तडागादीन् तर्पयंतं अथवा अभिगंतारं सरस्वंतं उदकवंतं सरस इत्युदकनाम वृष्टिदेवं सूर्यं वा अवसे रक्षणाय
जोहवीमि पुनः पुनराह्वयामि॥ ॥इति द्वितीयस्य तृतीये त्रयोविंशो वर्गः॥ ॥इति प्रथमे मंडले द्वाविंशोनुवाकः॥
त्रयोविंशेनुवाके पंचदश सूक्तानि तत्र कया शुभेति पंचदशर्चं प्रथमं सूक्तं त्रैष्टुभं। अत्रानुक्रमणिका। कया
गस्त्येंद्रमरुतां
पंचोना संवादं स्तु तृतीयाद्या ऋचो मरुतां वाक्यं अंत्यस्तृचोगस्त्यस्य च त्रिष्टुबिंद्रस्यैकादशी च मरुत्वानिंद्रो देवतेति
अत्रेंद्रागस्त्यमरुतां संवादः प्रतिपाद्यते॥ तत्र तृतीया पंचमी सप्तमी नवमीनां मरुद्वाक्यरूपत्वात्। त एव ऋष
यः॥ यस्य वाक्यं स एव ऋषिरिति न्यायात्। अंत्यस्तृचस्यागस्त्यवाक्यत्वान्न्यायवादेन तस्य मरुद्गणो वा इंद्रो दे
वतासंसवश्च तुर्विंशकयो मरुत्वतीयशस्त्रे विविधानात्सर्वं एतत्सूक्तं याद्दिपर्यायान्मरुत्वतीय इति खंडे सूत्रितं
युजो

कया शुभेति च मरुत्वतीये पुरस्तात्सूक्तस्य शंसेदिति अभिप्लविके पंचमेहनि मरुत्वतीय एतदेव सूक्तं पंचम
स्य कया शुभ यस्तिग्मशृंग इति मध्यंदिन इति सूत्रितत्वात्। महाव्रतेति मरुत्वतीये एतदेव निविद्धानीयं सू
क्तमेषं कया शुभेति च मरुत्वतीयमिति सूत्रितत्वात्॥ ॥अस्य विनियोगं शौनक आह। ज्ञातिपुत्रसुहृन्मि
त्रैश्वर्यं राज्यं चिकीर्षति॥ नियंसनियतीभूत्वा सूक्तं तु मनसा जपेत्॥ कया शुभेति पैशून्यं कृत्वाचार्यं नृपादि
जैः॥ श्रुत्वा परस्परं हस्यं च गुणोरण्याह शौनक इति॥ ॥तत्र प्रथमा॥ कया शुभा सवयसः सनीळाः समान्या मरु
तः संमिमिक्षुः॥ कया मती कुत एतास एते र्चंति शुष्मं वृषणो वसूया॥ ॥इंद्रवाक्यं॥ मरुतः सवयसः समान
वयस्काः समानस्थानाः एतेन मरुतः कया शुभा केनापि दुर्विनयया शोभनया सामान्या सर्वे कामेवरूपया
महत्या युक्ताः यद्वा शुभेत्युदकनाम उदकरूपया शुभा उदकेन संमिमिक्षुः तदर्थं एते मरुतः कया अनिश्चय
या मतिमत्या कुतो देशात् एतासः आगंतारः आगत्य च ते वृषणो वर्षितारो युवान इत्यर्थः। वसूया वसु

ऋ॰भा॰

॥२१९॥

यया सुपां सुलुगिति पूर्वसवर्णदीर्घः ॥ धनेच्छया । यद्वा वसवो वासयितारो वा नैव सोयजादेन्नः शुभं बलं वृष्टि
प्रदानजनितं लोके अर्चंति पूजयंति जगति कुर्वंतीयद्वा मम बलं वर्धयंतीत्यर्थः ॥ मरुतो हेनं नाजकुरिति श्रुतेः
अत्रेदं मरुत्संवादरूपे सर्वत्र प्राणजीवात्मपरतया वियोजनीयं ॥ ॥ अत्रापींद्र उच्यते ॥ अथ द्वितीया ॥ कस्य ब्र
ह्माणि जुजुषुर्युवानः को अध्वरे मरुत आ ववर्त ॥ श्येनां इव ध्रजतो अंतरिक्षे केन महा मनसा रीरमाम ॥ ॥
युवानो नित्यतरुणाः महानुभावाः मरुतः कस्य महाभागस्य ब्रह्माणि परिवृढानि हवींषि जुजुषुः सेवंते कूरवाम
अ हे । नैध्वरे स्वकीये यागे मरुत एतानो ववर्त्त योगांतरेभ्यो निवर्तयंति । दुर्निग्रहत्वे दृष्टांतमाह ॥ अंतरिक्षे ध्र
जतो गच्छतः श्येनानिव शंसनीयगमनानेतन्नामकान् पक्षिण इव केन प्रीतिसाधनेन महता महता मनसा मननव
तास्तोत्रेण रीरमाम रमेमहि ॥ अथ मरुतः इंद्रेणोक्ताः तृतीययाऽनया प्रतिब्रुवते ॥ ॥ अथ तृतीया ॥ कुत
स्त्वमिंद्र माहिनः सन्नेको यासि सत्पते किं त इत्था ॥ संपृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥ श्री ॥२१९॥

न्वसमयः ॥ ॥ एतत्समिधमुदकं समानं सत्कुरूपमित्यर्थः ॥ अहभिः कैश्चिद्दहोभिः ग्रीष्मकालीनैर्दाघैः उर्ध्वं ग
च्छति तथाऽहभिः वर्षाकालीनैरेव तं उदकं अववैति अवाङ्मुखं च गच्छति । चवायोगे प्रथमेति प्रथमाविभक्ते
र्न निहन्यते । ऽग्निमनाज्यैरेव भूमिं प्राप्नोति तदेवोच्यते । पर्जन्याः प्रीणयितारो मेघा भूमिं जिन्वंति । उदकस्य सस्यादे
नसस्याधुत्पादनद्वारेण भूमिं प्रीणयंति । तथा अग्नय आहवनीयाद्याः स्विकृते आहुत्या दिवं द्युलोकस्थानं जिन्वं
ति प्रीणयंति । सरस्वद्देवता अग्नय आहवनीयाद्याः स्वकृतेः आहुत्या दिवं द्युलोकस्थानं जिन्वंति प्रीणयंति ॥ स
रस्वद्देवतरूपत्वात् दिव्यं सुपर्णमिति विपाया याज्या ॥ दिव्यं सुपर्णं वायसं बृहंतं सवावृधेन योविबणा स्वितिसूत्रितत्वा
त् । अन्वारंभणीयायां सरस्वद्भागे एषैव याज्या सूत्रिते च । दिव्यं सुपर्णं वयसं बृहंतमासवं सवितुर्यथेति ॥ ॥ सै
षा द्विपंचाशी ॥ ॥ दिव्यं सुपर्णं वायसं बृहंतमपां गर्भं दर्शतमोषधीनां ॥ अभीपतो वृष्टिभिस्तर्पयंतं सरस्वंत
मवसे जोहवीमि ॥ ॥ दिव्यं दिवि भवं सुपर्णं शोभनगमनं ग्रीलं बृहंतं महांतं अपां गर्भं दृष्टमुदकानां गर्भवदुत्प

द्वि॰ भा॰ ॥२१९॥ मेव अपि तु यजमाना आशासीत् ते मामेव वर्धयंते किंचोक्थानि शस्त्राणि मा प्रति हर्यंति कामयंते मामेव शंसंती
त्यर्थः ॥ किंच नोस्मदीया विमा हरी इमावश्वौ तते । नियंतव्यानि हविरादीनि अछ अभिप्राप्तुं मा वहतः अभिम
तदेशं प्रापयतः अत एव शीघ्रं गच्छामि युष्माभिः परित्रातुं गंतव्यमित्यर्थः । अतो सहाय इति मंतव्यमिति
भावः ॥ ॥ अथ पंचमी ॥ अतो वयमंतमेभिर्युजानाः स्वक्षत्रेभिस्तन्वाः शुंभमानाः ॥ महोभिरेतांउप
युज्महे न्विंद्र स्वधामनु हि नो बभूथ ॥ ॥ एवमुक्ते मरुतस्तमेवं ब्रुवते । हे इंद्र त्वं यस्मादेवं करोषि अतः
कारणात् कालाद्वयमपि अंतमेभिः अंतिकतमैरश्वैर्युजानाः युक्ताः संतः कीदृशाः स्वक्षत्रेभिः स्वायत्तबलैः
किंच महोभिस्तेजोभिः तन्वः आत्मीयानि शरीराणि शुंभमानाः दीपयंतः हर्षं प्राप्नुवाना इत्यर्थः । यद्वा महोभिः स्व
महत्त्वेन युक्ता वयं एतान् गंतॄन् क्षिप्रमुपयुज्महे तव साकं हविरादि स्वीकुर्म इत्यर्थः ॥ हे इंद्र त्वमपि नोस्मत्सं
बंधि स्वधां उदकं बलं वा अनु बभूथ । यस्मात्तस्मात्प्रोदकजन्यं हविरनुभवसि खलु हि शब्दः परस्परोपकार श्री ॥२१९॥

भावप्रसिद्धिद्योतनार्थः ॥ ॥ इति द्वितीयस्य तृतीये चतुर्विंशो वर्गः ॥ ॥ अथ षष्ठी ॥ क्व१ स्या वो मरुतः स्वधासी
द्यन्मामेकं समधत्ताहिहत्ये ॥ अहं ह्यू१ग्रस्तविषस्तुविष्मान्विश्वस्य शत्रोरनमं वधस्नैः ॥ ॥ स्या वो स्वधा धा
तदुदकं तद्बलं वा युष्माकं संबंधि क्वासीत् कुत्रासीत् नैवासीदित्यर्थः ॥ अस्माकमुदकं त्वमनुभवसीति ब्रूथ य
दीस्मात्स्वधा एकमसहायस्य कर्मो अहिहत्ये वृत्रस्यार्थे मेघहनने कर्मणि वृत्रवधे मा समधत्त सहितमकृत तास्समा
सीदिति संबंधः । असहायस्य कथमिति मतां सत्यतामाह । अहं हि खलु उग्रः उद्गूर्ण उद्गूर्णबलः तविषो बल
वान् तुविष्मान् महद्रूपोपेतः अस्मि यो अस्मादतिबलो हं तस्माद्विश्वस्य कृत्स्नस्य शत्रोर्मेघस्य शत्रोर्मेरिवर्यं कर्मणि
षष्ठी सर्वं शत्रुसंघं वधस्नैः वधरूपैः शोधनैः बाधकैः शरैरित्यर्थः । यद्वा वध इति वज्रनाम वज्रस्य स्नेनैः क्षे
पणप्रकारैरनमं अनमयं अंतर्भावितण्यर्थोयं वशीकरोमीत्यर्थः ॥ ॥ अथ सप्तमी ॥ भूरि चकर्थ युज्येभिरस्मे
समानेभिर्वृषभ पौंस्येभिः ॥ भूरीणि हि कृणवामा शविष्ठेंद्र क्रत्वा मरुतो यद्वशाम ॥ ॥ अथैवं भूतमिंद्रं पु

नराह ॥ हे इंद्र त्वं वृषभ वर्षितस्त्वं भूरि च कर्तुं प्रभुः तं कर्तुं वानसि स्वयमेव तथापि अस्मे अस्माकं समानेभिः समानैः
युज्येभिः अस्माभिर्युक्तैः पौंस्येभिः पुंस्कर्मभिः सामर्थ्यैरेव च कृतं न त्वेक एवेत्यर्थः ॥ हे शविष्ठ शव इति बल
नाम हे बलवत्तम वयं भूरीणि बहूनि प्रभूतानि कर्माणि कृण्वाम कृतवंतः स्म हे इंद्र क्रत्वा क्रतुना कर्मणास्मदीय
ये इच्छयादिकं च कर्म कामयामहे। तानि त्वत्तोऽप्यधिकानीत्यर्थः ॥ यतो वयं मरुतः छांदसमनुदात्तत्वं। एतेन स्वम
हत्वं ख्यापितं भवति। स्वरोऽयस्त ॥ अथवा इंद्रस्येदं वाक्यं हे मरुतो यद्यसौ वै तर्हि हे च यूयं च स्थ हे वक्त्वा कर्माणि य
द्वृत्तमयद्वृष्टिकर्म वृत्रमयामाह। तस्मादुदकं समानमेवेत्यर्थः ॥ एवं मरुत इति निधानस्वरस्यैव व्याख्यातं ॥ ॥ अ
थाष्टमी ॥ वधीं वृत्रं मरुत इंद्रियेण स्वेन भामेन तविषो बभूवान् ॥ अहमेता मनवे विश्वचंद्राः सुगा अपश्चक
र वज्रबाहुः ॥ समानरूपोपेतन विषा बलवान् बभूव एवंभूतः संपन्नः कस्मै किमिति तदुच्यते। मनवे मनोरर्था
यक्षा विश्वचंद्राः सर्वाह्लादकाः सुगाः सुगमनाः सर्वत्र सस्यादिषु गमनशीलाः अपो वृष्ट्युदकानि चकर चकार श्रीः ॥२२०॥

हे इंद्र सत्यं ते सत्तं पालक त्वं महिनो महनीयः अनुत्तरैरनुगंतव्य इत्यर्थः ॥ तथा सन्नपि एको सहायः सन् कुतोया
सि कुतः कारणायासि यद्वा कुत्र यासि ते तव इत्था इत्थं किं त एवमेव किं न कोप्यनुवक्तोऽस्ति किं च त्वं समराणः अस्मा
भिः संगच्छमानः संपृच्छसे समीचीनं पृच्छसि। हे हरिवः हरिभ्यां तद्वन्निंद्र ते तव अस्मे अस्माकं यद्युष्मदिष्ट
तममस्ति तन्नोऽस्मभ्यं वचनाभानैः शोभमानैर्वचनैर्वोचेः ब्रूहि ॥ ॥ अथ चतुर्थी ॥ ब्रह्माणि मे मतयः शं सुतासः
शुष्म इयर्ति प्रभृतो मे अद्रिः ॥ आशासते प्रति हर्यंत्युक्थेमा हरी वहतस्ता नो अच्छ ॥ ॥ अथवा तैः पृष्टः अनया
चतुर्थ्येंद्रः प्रत्याह हे मरुतः ब्रह्माणि सर्वाणि कर्माणि हवींषि वा मे मम स्वभूतानि तथा मतयश्च मम मननयुक्तयु
गतश्चा मम मंत्रां श्रुष्कृयां यद्वा मे मतयो बुद्धयः तेष्वेव वर्तंत इति शेषः। तथा सुतासोऽभिषुताः सोमा मे मदी
याय मदर्थ एव अतोऽयज्ञं प्रति गंतव्यमित्यर्थः ॥ किं च मध्ये राक्षसादिपरिहरणे शुष्मः बलनामैतत् बलवान् मे
मदीयोऽद्रिः शत्रूणां भक्षको वज्रः प्रभृतः संनियंत्रितः गच्छेयेव लक्ष्यं प्रति न च निवर्त्तते न केवलं हविरादीनामस्य

न्। नियानि च्यौत्नानि असवं गच्छामि एवामहमेव स्वं दृढ इत ईश्वर एव सन् इन्द्रो ईश्वरो भवामि। अथवा विदानो हंया-
नि च्यवंयान्युद्दिश्य गच्छेयं एषामीशानो यतो हमिंद्रः अतः इत्युक्त इत्यर्थः॥ ॥इति द्वितीयस्य तृतीये पंचविंशो व-
र्गः॥ ॥अथैकादशी॥ ॥अमंदन्मा मरुतः स्तोमो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र॥ इंद्राय वृष्णे सुमखाय मह्यं
सख्ये सखायस्तन्वे तनूभिः॥ इदमपी इंद्रवाक्यं॥ हे मरुतः मामां अत्रास्मिन्नुद्देशे सादविषये स्तोमः स्तोत्रं
अमंदत् मदयति मोदयते वा हे नरः सखायो यूयं यः श्रुत्यं सर्वैः श्रोतव्यं ब्रह्मपरिवृढं मे घधाघिरणादिरूपेण
कृतवतः स्व प्रभूतं स्तोत्रं वा अनुतमन्त इत्यादिकं इंद्राय परमैश्वर्यगुणकाय वृष्णे अभिमतवर्षित्रे सुमखा-
य शोभनयागाय सख्ये युष्माभिः समानख्यानाय तन्नूभिरनेकशरीरे रूपे तन्वे मह्यं ममतत्वे मदीयशरीर-
पोषाय भवतु। यद्वा तनूभिः अस्मच्छरीरभूतैर्युष्माभिः कृतं मह्यमेवास्त्वित्यर्थः॥ ॥अथ द्वादशी॥ एवेदे-
ते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः॥ संचक्ष्या मरुतश्चंद्रवर्णा अच्छांत मे छदयाथा च नूनं॥

हे मरुतः एवेत् एवमेव एते यूयं मामां प्रति रोचमानाः आरुरुतिकर्थे। यद्वा अनेद्य इति प्रशस्यनाम प्रशस्ययशो-
स्मतो दधानाः स्वकृतैः कर्मभिर्मामेव स्तुवतेत्यर्थः॥ ॥अथ त्रयोदशी॥ को न्वत्र मरुतो मामहे वः प्रयातन
सखीँरच्छा सखायः॥ मन्मानि चित्रा अपिवातयंत एषां भूत नवेदा म ऋतानां॥ ॥हे मरुतो युष्मान् अत्र लोके
को नु खलु मर्त्यः ममहे पूजयति हि सखायः सर्वस्य सखिवत् प्रियकारिणः संतः सखीन् हविःप्रदानेन सखि-
भूतान् यजमानान् प्रतियात नगच्छत हे चित्राः चायनीयाः यूयं मन्मानि मननीयानि धनानि अपिवातयंत
संपूर्णं प्रापयंतो भूत भवत। किंच मे मदीयानां एषां ऋतानां अवितथानां नवेदाः भूत ज्ञातारो भवत॥ ॥अथ
चतुर्दशी॥ आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा॥ ओ षु वर्त्त मरुतो विप्रमच्छेमा ब्रह्माणि जरि-
ता वो अर्चत्॥ ॥आ यद्दुवस्यादिति॥ ये मरुतो दुवस्यात् युष्मान् परिचरणं इति स्तोत्रं तेन स्तोत्रेण दु-
वसे परिचरणाय यथा कारुः कृत्रिः स्तुतिकुशला मान्यस्य माननीयस्य विदुषो मेधा बुद्धिः अस्मानिति॥

द्वि॰भा॰

॥२२२॥

संप्रसर्थं इदानीं तनानूचक्रे आभिमुख्येन करोति प्राप्नोतीत्यर्थः॥ यद्वा षष्ठी बहुवचनस्थाने इदं रूपं दुवस्यानां
परिचरणार्हाणां दुवसे परिचरणायेत्यर्थः॥ अतो हे मरुतो यूयं विप्रं मेधाविनं यजमानं मामस्मान् अच्छ आ
भिमुख्येन प्राप्तुं सु सु ओ षु वर्त्त। ओ इति निपातद्वयसमुदायरूप एको निपातः। आ इत्याभिमुख्ये न उ इत्य
वधारणे। आवर्त्तध्वमित्यर्थं। किमर्थमेवमित्युच्यते इमा ब्रह्माणि इमानि परिवृढानि कर्माणि व्युदिश्य जरिता स्तोता वो
युष्मान् अर्चत् अर्चति। यस्मादेवं तस्मादावर्त्तध्वमित्यर्थः॥ ॥अथ पंचदश्यास्सूक्तोपक्रममारभ्य कृतां स्तुतिं
मरुद्भ्यो निवेद्याभिमतमाशास्ते॥ ॥एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः। एषा यासीष्ट तन्वे व
यां विद्यामेषं वृजनं जीरदानुं॥ ॥एष व इति॥ हे मरुतः एष स्तोमः इदानीं क्रियमाणं प्रकृतं स्तोत्रं वो युष्मदर्थं
युष्मत्प्रीणनाय भवत्वित्यर्थः॥ तथेयं गीः स्तुतिरूपा वागपि वो युष्मदर्था यस्मादेवं तस्मात् मांदार्यस्य स्तु
तिविशेषैः मंदयितुः स्तुतिभिर्मदस्य प्रेरयितुर्वा मनस्य वरप्रदानादिना माननीयस्य कारोः स्तोतुः इषांछ इ

श्रीः

॥२२२॥

कृतवानस्मि यतो हं वज्रबाहुः अनेन सहायेनैरपेक्ष्यमुक्तं भवति॥ ॥अथ नवमी॥ ॥अनुत्तमा ते मघवन्न
किर्नु न त्वावाँ अस्ति देवता विदानः॥ न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध॥ इदानीं ते मरुतो ह
र्षेण प्रसत्तुः॥ आ इति स्मरणोस्मृतवंतो वयमिदानीं हे मघवन्नूतत्त्वया अनुत्तं प्रेरितं न किर्नु नैवास्ति। नुने
श्चये त्वया यदुक्तं तत्सर्वमित्यर्थः॥ हे देव त्वावान् त्वत्सदृशो विदानः विद्वान्यस्य येन ज्ञानेन च। जजयोपादिना देव
ता देवो नास्ति किंच हे प्रवृद्ध अतिबल जायमानो जातो वा कश्चिद्देवो मर्त्यो वा त्वं यानि वृत्रवधादीनि करिष्याः कर्तव्या
नि कृणुहि कृणुहि करुषे नानि न नशते न व्याप्नोति नशतिर्व्याप्तिकर्मा नान्यस्त्वत्तो हता नुकरोतैवेत्यर्थः॥ ॥अथ
दशमी॥ एकस्य चिन्मे विभ्वस्त्वोजो या नु दधृष्वान्कृणवै मनीषा॥ अहं ह्यु१ग्रो मरुतो विदानो यानि च्यवमिंद्र इ
दीश एषां॥ इदानीमिंद्र आह॥ मे ममैकस्य चित् उच्यते याया निकर्मा ति मनीषा मननीषया मनसईषया प्रवृ
द्धधृष्वान् धर्षितवानहं नु क्षिप्रं कृणवै करोमि। ईशे चक्र यानि हे मरुतः अहं खलु उग्रः उद्गूर्णबलः विदानः वेदनवा

वसतीवरीकुंभे रेतोपतत्ततोगस्त्यवसिष्ठावजायेतामिति सूक्तसंख्यानुवर्त्तते। अन्यस्याः सूक्तसंख्याया द्वि
परिभाषितत्वात्। पंचदशर्चं तत्सूक्तं लक्षणेनागस्त्येन दृष्टत्वात्तस्यार्षं॥ मारुतं हि सूक्तत्वात् तु ह्यादि परिभाषये
दमादि सूक्तत्रयं मरुद्देवताकं। अंत्ये द्वित्रिष्टुभौ। त्रिष्टप्त्विष्टुबंतपरिभाषया जगत्यः। विनियोगो लैंगिकः॥ ॥तत्र
प्रथमा॥ तन्नु वोचाम रभसाय जन्मने पूर्वं महित्वं वृषभस्य केतवे॥ ऐधेव यामन्मरुतस्तुविष्वणो युधेव शक्रा
स्तविषाणि कर्त्तन॥ ॥तन्न्विति। हे मरुतो यूयं युष्मदीयं तत्लोके दृष्टं प्रसिद्धं पूर्वं पूरकं पूर्वतनं वा महित्वं महत्त्व
माहात्म्यं नु क्षिप्रं वोचाम ब्रूमः। किमर्थं रभसाय राभस्ययुक्ताय जन्मने वेद्यां प्रादुर्भावाय वेद्यां सन्निधानायेत्यर्थः।
तदपि किमर्थमित्यत आह॥ वृषभस्य फलस्य वर्षितुर्यत्तस्य केतवे प्रज्ञानाय तात्सिध्यर्थमित्यर्थः॥ अथवा वृष
भस्य वृष्टिफलादकस्य वर्षितुर्मेघस्य केतवे प्रज्ञानाय तथा वायुप्रेरणेन मेघागमनं प्रसिद्धं हे तुविस्वनः गमनस
रंभेण प्रभूतध्वनियुक्ताः हे शक्राः सर्वमपि विकर्त्तुं शक्ताः यूयं यामनि यामे गमने प्रस्तुते सति ऐधेवस्वर्ध

व ऐधानि एधः संबंधीनि तेजांसीव माहत्त्वेन तविषाणि बलानि सामर्थ्यानि कर्त्तन। कुरुथ तद्वत्॥ ॥अथ द्वि
तीया॥ ॥नित्यं न सूनुं मधु बिभ्रत उप क्रीळंति क्रीळा विदथेषु घृष्वयः॥ नक्षंति रुद्रा अवसा नमस्विनं न मर्धंति स्व
तवसो हविष्कृतं॥ ॥नित्यं न सूनुं औरसं प्रियं पुत्रमिव मधु मधुरं हविर्बिभ्रतो धारयंतो मरुतः विदथेषु यागे
षु घृष्वयः रक्षःप्रभृतीनां घर्षकाः संतः क्रीळाः क्रीडनशीलाः उपउपेत्य क्रीळंति विहरंति। किंच रुद्राः रुद्रपु
त्रा मरुतोपि रुद्रा उच्यंते॥ जन्यजनकयोरभेदोपचारेण रुद्रपुत्रत्वं पुराणेषु तपसा तुष्टौ पार्वतीपरमेश्वरौ मरुतः
पुत्रत्वेन स्वीचक्रुरिति प्रसिद्धं। नमस्विनं नमस्कारोपलक्षितस्तोत्रोपेतं हविष्कृतं हविषां कर्त्तारं प्रदातारं यजमानं
अवसा रक्षणेन तर्पणेन नक्षंति। किंभूतेन नक्षंति व्याप्नुवंति। किंच स्वतवसः स्वायत्तबलाः मरुतः यजमानं न मर्धं
ति। न संग्राममयंति न बूत्रायंतीत्यर्थः॥ ॥अथ तृतीया॥ यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा द
दाशुषे॥ उक्षंत्यस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः॥ ॥यस्मै यजमानाय हविषा ददाशुषे सोमा

।दिहविर्दत्तवंते हविषा प्रीताः उमासः अवितारः अमृताः अमरणधर्माणो मरुतो रायस्पोषं धनस्य पुष्टिं च
चक्रुः द्यावापृथिव्यादिषु पुष्टिं अरासत प्रयच्छेत् रासतिर्दानार्थः। अस्मै यजमानाय हिता इव हिताचरणसखाय इ
व संतो मयोभुवः सुखस्य भावयितारो मरुतो रजांसि लोकान् पुरुप्रभूतं यथा भवति तथा पयसा उदकेन सम्य
गुक्षंति सिंचंतीति॥ ॥अथ चतुर्थी॥ आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयतासो अध्रजन्।
भयंते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु॥ ॥आ ये रजांसीति॥ ॥हे मरुतो युष्मत्संबंधिन ए
वासः एवा राजविशेषाः तविषीभिः स्वकीयैर्बलैः वृष्टिप्रदानादिरूपैः रजांसि लोकान् आ अव्यत सर्वतः आ
वृण्वंति तेषां वो युष्माकं एवासोऽश्वाः स्वयतासः स्वयमेव सारथिना विनैव युक्ताः प्र अध्रजन् प्रकर्षेण गच्छंति
या नुवंति। किंच युष्मदागमनात् विश्वा भुवनानि सर्वाणि भूतजातानि विश्वा हर्म्या सर्वाणि हर्म्याणि च भयंते बि
भ्यति। पतना तु यस्मादेवं तस्माद्वो यामः चित्रः श्लाघनीयः आश्चर्यभूत जातः इत्यर्थः। भीतेः कारणमाह। ऋष्टिषु

आयासीष्ट आगच्छत किमर्थं तन्वे शरीराय तत्पोषायेत्यर्थः। हविर्लक्षणेन हि शरीरं वर्धते वयं वयमपि इषमन्नं
वृजनं बलं जीरदानुं जयशीलं दानं जीवनं वा एतत्सर्वं विद्याम युष्मास्वागतेषु यज्ञसंपूर्तेः इत्यादिद्वारा लभेमहि
॥ ॥ ॥इति द्वितीयस्य तृतीये षड्विंशो वर्गः॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमार्थांश्चतुरो देया
द्विद्यातीर्थमहेश्वरः॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्रा
ज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके तृतीयोऽध्यायः
॥३॥ ॐ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥इत्थं द्वि
तीयाष्टकस्तृतीयाध्याय आदरात्। व्याख्यातः सायणार्येण पुरुषार्थप्रदर्शकः॥ ॥अथ चतुर्थोऽध्यायो व्या
ख्यातुमारभ्यते॥ ॥कया शुभेत्येतस्मिंस्त्रयोविंशोऽनुवाके पंचदश सूक्तानि तत्र तान्वियेतत् द्वितीयसूक्तं पं
चदशर्चं। अत्रानुक्रमणिका। तन्वगस्त्यो मारुतं हि द्वित्रिष्टुबंतं मित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा

सुधितेव बर्हणा ॥ ॥ यूयं न इति ॥ हे उग्रा उद्गूर्णबलाः मरुतो यूयं सुचेतुना शोभनचेतसा अरिष्टग्रामाः अहिंसि
तसंघाः संतो नोस्माकं सुमतिं शोभनबुद्धिं पिपर्तन पूरयत। कस्मिन्काल इति तदुच्यते। यत्र यस्मिन्काले वो युष्मा
कं संबंधिनी क्रिविर्दती विक्षेपणशीलदंती दिद्युत् हेतिः रदति विलिखति मेघसंघातं पश्वः पशूंश्च रिणाति रे
षति। हिनस्ति वायौ वाति सति पशवः क्षीयंतीति प्रसिद्धं हिंसायां दृष्टांतः। सुधि सुधिता सुष्टु प्रेरिता बर्हणा इ
ति [illegible]स्तत्साधना हेतिर्वा यथा रिणाति तद्वत् ॥ ॥ अथ सप्तमी ॥ प्रस्कंभदेष्णा अनवभ्रराधसो लातृणासो
विदथेषु सुष्टुताः ॥ अर्चंत्यर्कं मदिरस्य पीतये विदुर्वीरस्य प्रथमानि पौंस्या ॥ ॥ प्रस्कंभदेष्णाः प्रकर्षेण स्तंभि
तदानाः अविरतदाना इत्यर्थः ॥ अनवभ्रराधसः अभ्रष्टहविरादिधनाः राध इति धननाम। अलातृण
सः नकारस्य स्थाने लकारः। अनातृणासः अतर्दनरहिताः अथवा अलं पर्याप्तं अतर्दनाः शत्रूणां यद्वा अ
लमत्यर्थं दातारः फलानां एवंरूपा मरुतः विदथेषु यागेषु अर्कं अर्चनीयमिंद्रं स्वसखिभूतं अर्चंति पूजयं

तीत्यत आह ॥ ते मरुतः वीरस्य विविधं शत्रूणां वीरयितुरिंद्रस्य प्रथमानि मुख्यानि पौंस्या पुंस्त्वानि वृत्रवधादिरूप
णि विदुर्जानंति ॥ ॥ अथाष्टमी ॥ शतभुजिभिस्तमभिह्रुतेरघात्पूर्भी रक्षता मरुतो यमावत ॥ जनं यमुग्रास्त
वसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ॥ ॥ हे मरुतो यूयं शतमित्यपरिमितनाम। असंख्यातभोग
वद्भिः पूर्भिः पालनैः जेतव्यैः शत्रूणां नगरैर्वा आवत रक्षत पालयत तमित्युक्तं कमित्यह। यं जनं अभिह्रुतेः अ
भिमवक्रकरणात्कुटिलस्य स्वभावादघात्पापात् अवत रक्षत। किंच हे उग्राः उद्गूर्णतेजसः हे तवसः बलवंतो
वेगवंतो वा हे विरप्शिनः महन्नामैतत् महांतरमणीयाः शब्दाः रपाः येषां ते विरप्शिनः विविधा रप्शिनः स्तोता
रो येषां ते तथोक्ताः हे तादृशाः यूयं पाथना पथेन पाथ रक्षथ। कस्मान्निमित्तादिति। उच्यते। तनयस्य उपल
क्षणमेतत्। पुत्रादीनां पुष्टिषु पोषेषु निमित्तभूतेषु शंसादभिशंसनात् यमेवं कुरुथ तरते तिग्रोषः पापक्षयर
द्यानिष्टपरिहारेण पुत्रादिपोषरूपेष्टप्राप्त्या वत रक्षथेत्यर्थः ॥ ॥ अथ नवमी ॥ विश्वानि भद्रा मरुतो रथेषु

वो मिथस्पृध्येव तविषाण्याहिता ॥ अंसेष्वा वः प्रपथेषु खादयो ऽक्षो वश्चक्रा समया वि वावृत इति ॥ ॥ हे मरुतो वो रथे
षु युष्मत्संबंधिरथेषु रंहणसाधनेषु विश्वानि भद्रा सर्वाणि कल्याणानि भोगयोग्यानि द्रव्याणि अस्मभ्यं प्रदेया
नि पूर्णानि वा आहितानि तथा वः अंसेषु आ तदुपलक्षितभुजेष्वपि आ कुरे यर्थः । मिथस्पृध्येव बलाधिक्याद् परस्प
रस्पर्द्धाविषयाणि तविषाणि बलानि अंसेषु शक्षणान्यायुधानि वा हितानि । किं च वः प्रपथेषु प्रगामाः पंथानो ये
षु विश्रामस्थानेषु तादृशेषु खादयः खाद्यानि भक्ष्याणि आहितानि यद्वा प्रागतः पंथा येस्तेषु पादाग्रेषु खादयः श्लि
ष्टाः आभरणविशेषाः आहिताः । किं च वो अक्षः वो युष्मत्संबंधी रथ्योऽक्षः चक्रः तत्रोपनिबद्धानि चक्राणि समया
समानं तेषां परिसारः विवावृते विशेषेण वर्त्तते ॥ न कुत्रापि दृष्टचक्रेषु संलग्नो भवतीत्यर्थः ॥ यस्मादेवं देवयजन
गमनसाधनानि संति तस्माच्छीघ्रमागच्छथेत्यभिप्रायः ॥ ॥ अथ दशमी ॥ ॥ भूरीणि भद्रा नर्येषु बाहु
षु वक्षःसु रुक्मा रभसासो अंजयः ॥ अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे ॥ ॥ ये मरुतः

युष्मद् अस्मासु हेतिषु प्रयतमासु प्रकर्षेणोद्यतासु सतीषु अथवाधीतो दृष्टांतः वृष्टिषु प्रयतासु सतीषु तुल्योपमेयं आ
युधेषूद्यतेषु यथा जना बिभ्यंति तद्वद्युष्मदागमनाद्बिभ्यंतीत्यर्थः ॥ ॥ अथ पंचमी ॥ यत्त्वेषयामा नदयंत पर्वता
न्दिवो वा पृष्ठं नर्या अचुच्यवुः ॥ विश्वो वो अज्मन्भयते वनस्पती रथीयंतीव प्र जिहीत ओषधिः ॥ ॥ यत्त्वेषयामा इति
मरुतस्त्वेषयामाः दीप्तगमनाः यत् यदा पर्वतान् पर्वतो गिरेर्गह्वराणि पूरकान् मेघान् वा नादयंत नादयंति । शब्द
यंति वा अथवा यदा दिवो तनान्तरिक्षस्य पृष्ठं उपरिभागं नर्या नरेभ्यो हिताः अचुच्यवुः गच्छंति तदा वो यु
ष्माकं अज्मन् गमने निमित्तभूते विश्वो वनस्पतिः वनस्य पालयिता वृक्षसमूहो भयते बिभ्यति तथा ओषधिः
प्रियंगुव्रीह्यादिः प्र जिहीते प्रकर्षेण गच्छति स्वसंस्थाने तु तस्मान्न स्खलतीत्यर्थः । तत्र दृष्टांतः । रथीयंतीव रथमात्मन इ
च्छंती स्त्री रथारूढेत्यर्थः । तादृशी स्त्री वसा यथा चलति तद्वत् ॥ ॥ इति द्वितीयस्य च तुर्थे प्रथमो वर्गः ॥ ॥ अथ
षष्ठी ॥ ॥ यूयं न उग्रा मरुतः सुचेतुना रिष्टग्रामाः सुमतिं पिपर्तन ॥ यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः

जः पुंजैर्नक्षत्रैर्यथा दूरे दृश्यमाना भवंति तद्वत् ॥ किंच मंद्राः मादताः सुजिह्वाः शोभनजिह्वाः आसभिरास्यैः स्वरि
तारः शब्दयितारः प्रियवचना इत्यर्थः ॥ अत एव सुजिह्वा इत्युक्तं ॥ किंच इंद्रे संमिश्लाः सम्यक् मिश्रयितारः इंद्रस
हायिन इत्यर्थः ॥ मरुत इंद्रं नाजहुरिति श्रुतेः ॥ तथा परिष्टुभः परिस्तोभयुक्ताः स्तोतृभिर्युक्ताः एवं महाभागाः ये म
रुतः संति ते स्म छर्मगच्छंतीति शेषः ॥ ॥ अथ द्वादशी ॥ तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव
व्रतं ॥ इंद्रश्चन त्यजसा वि ह्रुणाति तज्जनाय यस्मै सुकृते अराध्वमिति ॥ ॥ हे सुजाताः शोभनजननाः हे मरु
तो वो युष्मदीयं महित्वनं महत्त्वं तत् तादृक् खलु तदित्युक्तं किमित्याह ॥ वो युष्माकं दात्रं दानं वृष्ट्यादिरूपं दीर्घं
आयायतं अविच्छिन्नं प्रकृष्टोपकारीत्यर्थः ॥ दीर्घत्वे तत्र दृष्टांतः अदितेर्व्रतमिव अदीनाया देवमातुर्भूम्या
श्च व्रतमिति व्रतमिति कर्मनाम तद्यथा दीर्घं अतिविस्तृतं तद्वत् ॥ अदितिर्द्यौरदितिरंतरिक्षमित्यादिमंत्र
वर्णितं ॥ किंच हे मरुतो यूयं यस्मै सुकृते शोभनयागादिकृते यजमानाय यदभिमतं धनमराध्वं ददध्वं तद्

इंद्रश्चं द्वेपि त्यजसा त्यागेन न विह्रुणाति न विह्वरति कौटिल्यं न करोति चनेत्ययं यद्यपि निपातद्वयसमुदायरूप
एकोपि निपातितः ॥ तथाप्यवयवविभागेन च शब्दः समुच्चयनिषेधे पिगंतव्यः ॥ युष्मद्दानादि त्यागमिंद्र इत्या
गोपनातिक्रामतीत्यर्थः ॥ ॥ अथ त्रयोदशी ॥ ॥ तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत ॥
अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे इति ॥ ॥ हे मरुतो वो जामित्वं बंधुत्वं अस्मद्विषया
प्रमाधिक्यं तत्खलु प्रसिद्धमित्यर्थः ॥ किं यत्सर्वतमिति तदुच्यते ॥ परे युगे युगशब्दः कालोपलक्षकः उत्कृष्टे
महति काले तीतेपि वर्तत इति शेषः ॥ तत्कथमधिशेषः तत्कथमधिगतमित्यत आह ॥ अमृतासो मरणध
र्मिणो हे मरुतो यूयं यच्छंसमस्माभिः क्रियमाणां स्तुतिं पुरु प्रभूतं यथा भवति तथा आवत रक्षथ ते स्म
द्युष्मत्कृतं जामित्वमवितासीत्यर्थः ॥ किंच यूयं अया धिया अनया अनुग्रहात्मिकया बुद्ध्या मनवे मनुष्याय स्तो
त्रे यष्ट्रे वा अस्मदादयः श्रुष्टिमाव्यं क्षिप्रं सुखं तिवारासिता साकं संभूय नरः नेतारः संतो दंसनैः कर्मभिः इत्थंभूताः

द्वि·भा·
॥२२८॥

संचिक्रिरेसर्वतोजानीथ॥ ॥अथचतुर्दशी॥ येनदीर्घंमरुतःशूशवामयुष्माकेनपरीणसातुरासः॥आय
त्ततनन्वृजनेजनासएभिर्यज्ञेभिस्तदभीष्टिमश्यामिति॥ ॥तुरासोवेगवंतोमरुतोयुष्माकेनयुष्मत्संबंधिनायेनप
रीणसायद्यप्येतद्बहुनामसुपठितंतथापियद्बहुत्वंमहद्भवतियत्रमहदादिरर्थोगृह्यते। महतायुष्मद
भिगमनेनवेषणेनवादीर्घमायतंसत्रादिरूपंशूशवामप्रवृद्धयामः। क्रियतुयेनवाभिगमनेनैषतेनवां
जनासोजनाः अस्मदीयाः वृजनेसंग्रामेआततनन्सर्वतोविस्तारयंतिस्वसामर्थ्यैः संग्रामेजनयंतीत्यर्थः।
तदभिष्टिमेषणंगमनंएभिर्यज्ञेभिः इदानींक्रियमाणैस्तोत्रादिरूपैःवृजनैः अभिअभिमुख्येनअश्यांव्या
प्नुयां॥ ॥अथपंचदशी॥ एषवस्तोमोमरुतइयंगीर्मांदार्यस्यमान्यस्यकारोः॥ एषायासीष्टतन्वेवयांविद्या
मेषंवृजनंजीरदानुमिति॥ अयंमंत्रःतृतीयाध्यायांतेव्याख्यातः सूक्तोपक्रमप्रभृतिक्रियमाणांस्तुतिंमरु
द्भिःसमर्थःस्वाभीष्टमाशास्ते॥ ॥हेमरुतःएषस्तोमःइदानींकृतंस्तोत्रंवोयुष्माकं युष्मदर्थमित्यर्थः॥

श्रीः
॥२२८॥

नर्येषुनरेभ्योहितेषुबाहुषुभुजेषुभूरीणिप्रभूतानिभद्राभद्राणिकल्याणानिधनानिस्तोतृभ्योदातुंधिरेदधि
रेधारयंतितथावक्षःसुवक्षःस्थलेषुरुक्माःसुवर्णरत्नादिनिर्मितान्याभरणानिधारयंतिवृष्टिदानानिरभसा
सः रभस्ययुक्तानिचलंतीतथाअंजयः व्यक्तानिकुंतिमंतीतिवाअंसेषुएताःशुक्लवर्णाःमालाःपविषुवज्रस
दृशेष्वायुधेषुक्षुराःधाराःअधिसप्तम्यर्थानुवादःएवमेतेमरुतःसर्वांगेषुश्रियःलक्ष्मीःअनुअनुक्रमेणविभ्रि
रेदधिरेविविधंधारयंतितत्रदृष्टांतःवयोनपक्षान्पक्षिणःपक्षानिव॥ ॥इतिद्वितीयस्यचतुर्थेद्वितीयोवर्गः॥
अथैकादशी॥ महांतोमह्नाविभ्वोविभूतयोदूरेदृशोयेदिव्याइवस्तृभिः॥मंद्राःसुजिह्वाःस्वरितारआसभिःसं
मिश्लाइंद्रेमरुतःपरिष्टुभइति॥ ॥येमरुतोमहांतःमहात्म्योपेताःजूनमह्नामहत्वेनप्रभावातिशयेनतथाविभ्वः
विभवःव्याप्ताःतथाविभूतयःविविधैश्वर्यवंतःदूरेदृशःदूरेदृश्यमानाःदूरदर्शिनोदृष्टांतःदिव्याःस्तृभिःस्त
रिवस्तृइतिनक्षत्रनामनक्षत्राणिस्तृभिरितिनक्षत्राणामितिनिरुक्तत्वात्।दिविभवाःदेवाःस्तृभिःस्वपुष्पवृभूतैस्ते

हस्ते बहुराय: अपरिमितानि धनानि मणिमुक्तादीनि मादयध्यै अस्मान्मादयितुं संति तान्यस्मानुपयंतु त
था सहस्रिणो वाजा: गमनवंतश्च तुष्या इष: पन्नावोपि नोस्मानुपयंतु समीपं प्राप्नुवंतु॥ ॥अथ द्वितीया॥ आ
नो वोभिर्मरुतो यांत्वच्छा ज्येष्ठेभिर्वा बृहद्दिवै: सुमाया:॥ अध यदेषां नियुत: परमा: समुद्रस्य चिद्धनयंत पा
रइति॥ एते मरुत: अवोभी रक्षणै: सहिता: नोस्मान् अच्छ अभिमुखेन यांतु आगच्छंतु सुमाया: मायेति प्रज्ञा
नाम शोभनप्रज्ञा एव मरुतो ज्येष्ठेभि: वृद्धै: बृहद्दिवै: प्रशस्यतमै: मणिमुक्तादिधनैश्च सहिता आयांतु वा शब्द:
समुच्चये आगमने कथमेषां सामर्थ्यमित्यत आह॥ आ येषां मरुतां यद्यस्मान्नियुत: एतन्नामका: परमा उ
त्कृष्टा अश्वा: समुद्रस्य चित् चिच्छब्दोप्यर्थे। समुद्रस्यापि पारे परस्मिन्तीरे धनयंत धनं धारणं वहनं कुर्वंति त
स्माद्रक्षणे धनैश्वर्यं लित्यर्थ:॥ ॥अथ तृतीया॥ मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा न ऋष्टि:॥
गुहा चरंती मनुषो न योषा सभावती विदथ्येव सं वाजिति॥ ॥सुधिता सुष्ठु निहिता वाराले ऽकस्य घृताची घृतक्ष

रणशीलं उदकं अवंती हिरण्यनिर्णिक् हितरमणीयरूपा निर्णिगिति रूपनाम। एवं रूपनाम एवंरूपा न ऋष्टि: वि
द्युदाख्या युधविशेषो वा उपरा न मेघमालेव येषु मरुत्सु सम्मिम्यक्ष इति गतिकर्मा संगताभूत मेघपंक्ति विद्युतवा
म अपि संगते इत्यर्थ:॥ मेघपंक्ति विद्युच्चोभे दृष्ट्वा तेन विशेष्येते। गुहा निगूढा गुहायां वांत रिक्षे चरंति। अत्र दृ
ष्टांत: मनुषो न योषा मनुष्यस्य परिवृढादेर्महिषीव सा यथास्वेषांत:पुर एव मध्ये चरति तद्वत्। सर्वदेवमि
ति नेया हा: सभावती सभाजनसंघस्तद्वती वर्षाकाले आविर्भवंतीत्यर्थ:। तत्र दृष्टांत: विदथ्या वागिव विद
थो यज्ञ: तदर्हतीति विदथ्या प्रैषास्तोत्रादिवाग्रूपा वाक् सा यथा यज्ञसभां प्राप्याविर्भवति। यद्वा विदथ्या वेद
नार्हा विवदमानानां वा वाक् सा यथा सभावती तद्वत्। ये वंरूपा येषु मिम्यक्ष ते मरुतो देवयजनमागछंत्वित्यर्थ:॥
अथ चतुर्थी॥ पराशुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षु:॥ न रोदसी अपनुदंत घोरा जुषंत वृधं
सख्याय देवा इति॥ शुभ्रा: शोभनालंकारादिना दीप्ता: अयास: यजमानानभिगंतारो मरुत: यव्या भिश्चन

ष्टी। उग्रा। विष्ठूताः परा मिमिक्षुः प्रवर्षेण सिंचंति। उदकं संस्त्यायं साधारण्येव यथा लोके साधारण्याः स्त्रियाः सं
गतायुवानो रेतो मुंचंति तद्वत्। एवं कुर्वतो घोराः अतिवृष्टिप्रदानेन भयंकराः ते रोदसी द्यावापृथिव्यौ नापनु
दंत अपां नोदनं वर्षणरूपं तिरस्कारं न कुर्वंति। द्यावापृथिवीवचनो रोदसीशब्दः सर्वत्राद्युदात्तः अत्र तु व्यत्ययेना
तोदात्तत्वमिति द्रष्टव्यं यद्वा रोदसशब्देन रोदनस्वभावो रुद्रः तस्य स्त्री रोदसी। सिद्वा। चिदादिः। अपरे तु मरुतां
स्त्रियो रोदसीति नामधेयमित्याहुः। अयमेव पक्षो युक्तः उत्तरत्रैवं व्यवहारात् तत्पक्षे रोदस्यां उप्लुंता तु सप्त
म्याः ईकारो लुग्वा। ईदूतौ च सप्तम्यर्थ इति प्रगृह्यसंज्ञा तस्यां प्रियं न मुंचंति किंतु देवाः मोदयितारो मादयित
रो वा मरुतः सख्याय सखित्वाय वृधं वृष्टिं जुषंत सेवंते। द्यावापृथिवीपक्षे सख्याय जगतो सखिभावाय त
यो वृष्टिं कुर्वतीत्यर्थः॥ ॥ अथ पंचमी॥ जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः। आसूर्ये
व विधतो रथं गात्त्वेषप्रतीका नभसो नेत्येति॥ ॥ रोदसी मरुत्पत्नी विद्युद्वा एतन्नामकेयमपि ईमेनं मरुत्सं

तथेयं गीः स्तुतिरूपा वाग् आगविवो युष्माकं कस्य संबंधादिदमिति तदुच्यते। मांदार्यस्य महते शरीरपते तस्य मंदार्य
स्तुतिं प्रेरयतः मान्यस्य माननार्हस्य कारोः स्तोत्रनामैतत् स्तोतुः संबंधियद्वैतत् सदत्रयमुत्तरत्र संबध्यते उ
त्कलक्षणस्य स्तोतुः इषा इच्छया कामनया तन्वे युष्मच्छरीरवृध्यै स्तुः या हि शरीरं वर्धयंते आयसीष्ट आभिगच्छ
तु स्तुतिः वयां वयं चेषमन्नं वृजनं बलं जीरदानुं चिरकालजीवनं विद्याम लभेमहि॥ ॥इति द्वितीयस्य चतुर्थे तृ
तीयो वर्गः॥ ॥सहस्रं त इंद्रेत्येकादशर्चं तृतीयं सूक्तं आगस्त्यं त्रैष्टुभं आद्यैंद्री शिष्टा मरुद्देवताकाः पूर्वत्रेहि
त्युक्ता। सहस्रमेकादशाद्यैंद्रीत्यनुक्रमणिका विशेषविनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ सहस्रं त इंद्रोत
योनः सहस्रमिषो हरिवो गूर्ततमाः॥ सहस्रं रायो मादयध्यै सहस्रिण उप नो यंतु वाजाः इति॥ ॥हे इंद्र ते तव
तयो रक्षाप्रकाराः सहस्रमपरिमिता इत्यर्थः। नो अस्मभ्यं उपयंत्विति सर्वत्र योज्यं। तथा हे हरिव हरी इंद्रस्या
श्वौ ताभ्यां तद्वान् इंद्र गूर्ततमाः अयंतगूर्णानि इषः एषणीयाः अन्नानि सहस्रं बहूनि त्वदीयानि तथा स

पर्यंति देवतात्वेन रथेन धारयंति। ईदृशीं तां निमिश्लां नियमेन मिश्लयंतीं पज्रां पज्रो बलं तद्वतीं शुभे
शोभने दीप्यत इति शुभ्युदकं तद्युक्ते कार्थे शुभे रथ इति वा योज्यं॥ किं निमित्तं विदथेषु यागेषु निमित्तभूते
षु कुर्वंत्येतदा हे मरुतो वो युष्मान् अर्कः मत्वर्थो लुप्यते। अर्चनसाधनमंत्रोपेतः स्तोता वा हविष्मान् प्रदेया
ज्यादि हविर्युक्तः सुतसोमः होमयोग्यो भिषुतः सोमो यं यजमानो दुवस्यन् परिचरन् गाथं गातव्यं स्तोत्रं
गायन् गायत् गायति तदेत्यर्थः॥ ॥अथ सप्तमी॥ प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो
अस्ति॥ सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागा इति॥ एषां मरुतां यो हि महिमा म
हत्त्वातिशयः धूः याः सर्वैः स्तुत्यः सत्यः अबाध्यः अमोघोस्ति तं प्रविवक्मि वर्णयामि कुत्र मे षां महिमा
प्राप्त इत्युच्यते। यद्यस्माद् ईं एतेषां संबंधिनी रोदसी देवी वृषमणा वृष्ट्यादिवर्षणमनस्काः अहंयुः अहं
कारवती जगदुपकारवत्त्वेन कृदाचिदस्तीयहंकारः स्थिराचित्। चिदिति पूजायां असंतमविनश्वरा

ईदृशी देवी सुभागाः शोभनभाग्योपेताः जनीः जननशीलाः प्रजाः वृष्ट्युत्पत्त्या वहति॥ सर्वथा धारयति
वृष्ट्या सह्यां सर्वप्राणिन उत्पद्यंते। यस्मा देवं तस्मान्महिमास्ति तं महिमानं स्तौमीत्यर्थः॥ अथाष्टमी॥ ॥
पांति मित्रावरुणाववद्याच्चयत ईमर्यमो अप्रशस्तान्। उत च्यवंते अच्युता ध्रुवाणि वावृध ईं मरुतो दा
तिवार इति॥ ॥हे मरुतो युष्मत्संबंधिनो देवाः मित्रावरुणौ अहोरात्राभिमानिदेवौ अर्यमो अर्यमा उ इति
निपातसमुदायात्मकमेकं पदं तु शब्दो पि शब्दार्थे अर्यमापि एते त्रयोपि ईं अमुं स्तोतारं यतं वा अवद्यात् गर्ह्या
त् अयथानुष्ठानात् जगत्प्रपरोक्षेत्यवहृत्य प्रतिबंधरूपात् पांति रक्षंति तथा एतेषां अप्रशस्तान् दक्षि
णानापि पदार्थानित्युच्यते चयंति नाशयंति उ अपि च एतैः प्रेरितानि अच्युतानि अस्रावीणि एत एव ध्रुवाणि
अविचलानि मेघस्थोदकानि च्यवंते च्यावयंति वा एते अहोरात्रे च॥ मित्रावरुण वरुणाव होरात्राभ्यां खलु
वे पर्जन्यो वर्षतीति श्रुतेः। यद्वा अच्युतानि ध्रुवाणि धनानि च्यवंते। कृदेत्युच्यते। हे मरुतो युष्मदीयं ईम

यंकालो दातिवारः प्रादेयजलः स्वंउ तमेघो वा यद्वा वर्धते तदमित्रादयो देवा युष्मदनुकूलव्यापारेण तद्रक्षन्ती
त्यर्थः॥ ॥यद्वा दातिवारो दानवरः पायिह विर्लक्षणधनो यजमानाः हे मरुतः इमेनान्नयुष्मान् वहृधेव वर्धयति
यदा तदेत्यर्थः॥ ॥अथ नवमी॥ ॥नहीनुवोमरुतोअंत्यस्मे आरात्ताच्चिच्छवसोअंतमापुः॥ ते धृष्णुनाशवसा
शूशुवांसोऽर्णोनद्वेषोधृषतापरिष्टुः॥ ॥हे मरुतो वः शवसो युष्माकं संबंधिनो बलस्य अंतमवसानं अं
ति अंतिके आरात् दूरात् दपिय द्वा चिदिति धुत्तायां अस्ये नदूरात् अस्मे अस्मासु मध्ये एके पि नु क्षिप्रं नह्यापुः॥
नैव खलु प्राप्नुवंति संनिधाव संनिधौ च न प्राप्नुवंतीत्यर्थः॥ अथ परोक्षप्राप्तबलत्वमाह॥ ते खलु मरुतो धृष्णु
ना धर्षकेण शवसा बलेन शूशुवांसो वर्धमानाः अत एव धृतपराभिभावकेन सामर्थ्येन द्विषो द्वेष्टॄन् परिष्टुः
परिभवंति वशीकुर्वंति। तत्र दृष्टांतः अर्णोन उदकमिव यथा उदकं स्वविरोधि रज आदिकमभिभवति तद्व
द्दत् यस्मादेवं तस्मात् शवसां तं नापुः वयमद्येत्येतां दशमीं अस्तमित आदित्ये जपेत्। तथा च सूत्रे। वयम

बंधं जोषत् सेवते जुषेर्लेटि अडागमः। बिभर्थं सचध्यै संगमनार्थं यूर्या तृतीया अजुर्या अजराः क्षेप्तारो मरुतः तेषां
स्वभूता विषितः स्तुका विशिष्टकेशसंघा विप्रकीर्णकेशसंघा वा संभोगवशेन तथा नृमणाः नृषु नेतृषु मरुत्सु
मननवतीषु मनुष्येषु वा दृष्टिप्रदानमात्रेणोनोरूपमनोयुक्ता लेषप्रतीकादी ह्मावयया वा ईदृशी देवी विधतः प
रिचरतो मेघसंघस्य रथमार्गात् आगच्छतीत्यर्थो ।तिया गदेवांगं तु रथमारुह्य वा यज्ञमागच्छति केव विधत
सूर्यस्य रथं लेषप्रतीका सूर्यपत्नी वा यद्वा सूर्यस्य दुहिता अश्विनोरथमिव सा यथा रोहति तद्वत् आगमने दृ
ष्टांतः नभसः इयन् अंतरिक्षादियथयोः साधारणो यं नभः शब्दः नभ इति षट्साधारणनामसु पाठात्। अत्रादि
सवचनः तस्य गतिः सा यथा शीघ्रा तद्वत्॥ ॥द्वितीयस्य चतुर्थे चतुर्थो वर्गः॥ ॥अथ षष्ठी॥ आस्थापयंत
युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम्॥ अर्को यद्वो मरुतो हविष्मान् गायद्गाथं सुतसोमो दुवस्यन्॥
युवानो मिश्रयंतो नित्यतरुणा वा मरुतो युवतिं नित्यतरुणीं वा विद्युद्रूपां रोदस्यां स्त्रियं आस्थापयंत आस्थ

मा॥ यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे॥ आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सु-
वृक्तिभिरिति॥ ॥हे मरुतो वः समना समीकृति न्यूनाधिकभावलक्षणाय यज्ञायज्ञे यज्ञे सर्वेष्वपि यज्ञेषु तुतुर्व-
णिः तूर्णवनिः त्वरमाणसंभजमाना भवति तुर्वणिस्तूर्णवनिरिति यास्कः तेकृद्यागानुसरे अगात्य हविः स्वीकृ-
वैकल्यपरिहारेण समं कुरुध्व इत्यर्थः॥ किंच वो यूयं धियंधियं युष्मत्संबंधि वृष्टिप्रदानादिरूपं सर्वं कर्म देवया देवानुप्र-
पयितार एव संतः उ दधिध्वे धारयथ धारयत्वं वा देवार्थं देवहविरादिप्रसादनाय वृष्टिं कुरुध्व इत्यर्थः॥ यस्मादेवं
कुरुथ तस्माद्धो युष्मान् अर्वाचोऽस्मदभिमुखान् आववृत्यां आवर्तयामि किमर्थं रोदस्योर्द्यावापृथिव्योर्महे महते अव-
से रक्षणाय प्रीणनाय वा तदपि किमर्थमिति सुविताय सुष्ठु व्याप्ताय यज्ञाय साधनैः सुवृक्तिभिः शोभनावर्जनैः
स्तोत्रैः॥ ॥अथ द्वितीया॥ वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायंत धूतयः॥ सहस्रियासो अपां नोर्मय आ-
सा गावो वंद्यासो नोक्षण इति॥ ॥ये मरुतो वव्रासो न वव्रिरिति रूपनाम रूपवंत इव ते तथा प्रकृष्टालक्ष्यं ते न दृ-

यद्वा अरूपा अपि सरूपा इव स्वजाः स्वयमेव स्वस्माद्धो जयमाना अनन्यहेतुका इत्यर्थः॥ धूतयः कंपनशीलाः
संति ते इषं अन्नं हविर्लक्षणं अन्नसाधनं सस्यादिकं वा स्वः स्वर्गं वाभियाजं तं अभिलक्ष्य प्रादुर्भवंति ते दृष्टांतमु-
खेन स्तूयंते अपां नोर्मयः उदकानामूर्मय इव सहस्रियासः सहस्रसंमिताः तथा वंद्यासः बहुक्षीरादिप्रदत्वेन
स्तुत्या गावो न गाव इव आसा समीप एव उक्षणः वृष्ट्युदकस्य सेक्तारः तादृशा मरुतः प्रादुर्भवंतीत्यर्थः॥ ॥अ-
थ तृतीया॥ सोमासो न ये सुतास्तृप्तांशव इव हृत्सु पीतासो दुवसो नासते॥ ऐषामंसेषु रंभिणी [illegible]
भिनी योषिदिवा रारभे आश्लिषाते। अचलंतो सामर्थ्यादिशक्त्या आयुधविशेषो भुजलक्ष्मीर्वा किंच हस्तेषु खा-
दिः हस्तत्राणं कृतिश्च कृतिः कर्तनी च सहस्तादिः संसंदधे संधीते सम्यक् धृता भवति परस्परे समुच्चयार्थे चका-
र। ये मरुत उक्तरूपास्ते आविर्भवंतीत्यर्थः॥ ॥अथ चतुर्थी॥ अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कश-
या चोदत त्मना॥ अरेणवस्तुविजाता अचुच्यवुर्दृह्लानि चिन्मरुतो भ्राजदृष्टय इति॥ ॥एते मरुतः स्वयु-

द्वि॰ भा॰
॥२३४॥

क्ताः स्वेन धनेन वायुक्ताः संतो दिवो द्युलोकाद्धूयथा अनायासेन ययुः अथाऽऽमुखमागच्छंति। अमर्त्यामरुतो
वूर्यं त्मना आत्मना स्वयमेव वूकृण्यरवाद्रूमैतत् वाकुस्कातिरूपया चोदत प्रेरयत स्थातुमितिशेषः॥ ते च म
रुतः अरेणवः अपरपाः समुद्रनेनापां विरोधिनो वातु विजाताः बद्रुप्रादुर्भावाः भ्राजदृष्टयः दीप्तायुधाः
एवंभूताः संतः दृह्लानि चिद्दृढान्यपि पर्वतान्यच्युच्यवुः च्यावयंति चालयंति॥ ॥अथपंचमी॥ यद्वो
त मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया॥ धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो३ नैतशः॥ इति।
हे मरुतः हे ऋष्टिविद्युतः मेघभेदनायुधविशेषेण विद्योतमानाः युष्मान् मंतः युष्माकं मध्ये स्थितो वः पु
मान् रेजति चालयति प्रेरयति तर्हि वः मुखं चालनमित्युच्यते। त्मना आत्मनैव चलने दृष्टांतः जिह्वया। हन्वे
व हन्विव चलनस्याकारः हनू इव तौ यथा रसनया चाल्येते तद्वत्। यद्यप्येवं तथापि रिषमन्नं तत्साधनानां संस्थानां
यामानि प्राप्तौ समद्ध्यर्थं धन्वच्युतो धन्वशब्दोंतरिक्षवचनः तेन तच्छमुदकं लक्ष्यते। उदकं स्राविणो मेघा ॥श्रीः॥
॥२३४॥

द्येंद्रस्य प्रेष्ठा इत्यस्या मयादित्यस्य इति पाठस्य॥ ॥अथदशमी॥ वयमद्येंद्रस्य प्रेष्ठा वयं श्वः इंद्रस्य वयं पुरा महि
च नो अनु द्यून् तन्न ऋभुक्षा नरामनुष्यादिति॥ ॥अद्यास्मिन्दिने वयं श्वः इंद्रस्य देवस्य प्रियतमा भवेम। यद्वा प्रि
यतमा वयमिंद्रस्य महत्त्वं वोचेमहि स्तोतुं समर्था भूयास्म। किंच वयं श्वः परस्मिन्नपि दिने समर्ये सहसमर्यैर्मिश्रा
र्भिर्जायास्मिन् स समर्यैर्यतः तस्मिन्संग्रामे वा इंद्रस्य महत्त्वं वोचेमहि। किंच वयं पुरा पूर्वस्मिन्नतीते दिवस
ले महि महद्बलेनोऽस्मदर्थं वोचमहि तत्संघातृन्द्यिवसान् अनु प्रतिदिवसमित्यर्थः। अतीते अहनि च दिवसे
सर्वदा वोचेमहि तस्मात् ऋभुक्षाः महत्नामैतत् ऋभुक्षा उक्षा इति तन्नामसु पाठात्। महान् इंद्रो नरां मनुष्याणां
मध्ये नोऽस्मान् अनुष्यात् अनुभवतु अनुकूलमभिमतप्रदो भवतु॥ ॥एषद्वयेकादशी व्याख्याता॥ ॥इति
द्वितीयस्य चतुर्थे पंचमो वर्गः॥ ॥यज्ञायज्ञा व इति दशर्चं चतुर्थं सूक्तमगस्त्यमारुतं अंत्यास्तिस्रस्त्रिष्टुभः शि
ष्टाः सप्त त्रिष्टुबंत परिभाषया जगत्यः यज्ञायज्ञा दशत्रिष्टुबंतमित्यनुक्रांतत्वविशेषविनियोगो लैंगिकः। तत्रप्रथ

द्वि॰ भा॰ ॥२३५॥

बंधिनी सा तैर्न संभक्तिः दिव्युष्मान् संभजनं यथा प्रकृष्टगुणं तद्वद्वो रातिः वृष्ट्यादिविषया अमवती अगाध्यवती
दुंद्राद्वि सहायवती। यथा राजे वा निर्से लूणग्रद्धानं सुवचनः। तद्वत्। यद्वावः सा रातिः सैविभक्तिर्न भवति अरोगवती
न भवति। किंतु स्वर्वती सुखवती लेपादौ प्रा विपाकूपरिपक्वा पूर्णानि पिविष्वती पोषणवती कृषीवलेः कृषणव
ती दृष्टे ससस्यां कृषंतीति प्रसिद्धं। स्वाविरोधिपेषणवती वा भद्रंभंदनीया स्तुत्या। किंच पृष्टणतो दातुर्धनिकस्य दक्षि
णानदक्षिणेव तद्वत्। उरूस्पृधिवूरी पृथुजयशीला प्रगामिनी किंच सूर्ये अस्तरस्य स्वभूता जंजती शक्तिरिव साय
थान्येभ्यो पहूसान्यस्मै दातुं समर्था तद्वदियमपि मेघ उदकमपहृत्य जगतो दातुं शक्त इत्यर्थः। इद्दृशी राति
रस्मभ्यं अस्त्विति भावः॥ ॥ अथाष्टमी॥ प्रति ष्टोभंति सिंधवः पविभ्यो यदभ्रियां वाचमुदीरयंति॥ अव
स्मयंत विद्युतः पृथिव्यां यदी घृतं मरुतः प्रुष्णुवंतीति॥ ॥ पविभ्यो मरुत्संबंधियतेभ्यः। सिंधवः स्यंदन
शीला आपः प्रतिष्टोभंति। प्रतिचलंतित्वु दयत यदा अभ्रियां अभ्रवां वाचं शब्दं स्तनितलक्षणेरुदीरयंस श्री ॥२३५॥

स्वारयंति पज्याणां किंच विद्युतः द्योतमाना स्तडितः पृथिव्यां अंतरिक्षे पृथिव्येतनाम पृथिवी भूरिति तन्नामसूक्ष
त्वात्। तत्राव स्मयंत स्मयंते अवाङ्मुखं प्रकूष्यंत। पृथिव्यामिसेत द्रुत्तरत्र वाक्योजप्य। यदि यदा पृथिव्यां भूम्यां घृतं
क्षरदुदकं मरुतः प्रुष्णुवंति। प्रुषेः क्रियादिकस्य व्यत्ययेन श्नुः। बदैवंतदेत्यर्थः॥ ॥ अथ नवमी॥ असूत पृश्निर्मह
ते रणाय त्वेषमयासां मरुतामनीकं॥ ते सप्सरासोजनयंताभ्वमादित्स्वधामिषिरां पर्यपश्यन्निति॥ ॥ पृश्नि
र्मरुतां माता नानावर्णो पृश्निर्ये वै पयसो मरुतो जाताः॥ पृश्नेः पुत्रा उपमासइ त्यादिश्रुतेः॥ तामेवांतरिक्षदे
वतां कूविंदाद्भुः। सा देवी त्वेषं दीप्तं अयासां गंतृणां मरुतां अनीकं समूहं एकेन पंचाशत्संख्याकं असूत उत्पा
दितवती। किमर्थं महते रणाय संग्रामाय। मेघजयायेत्यर्थः। ते च मरुतः सप्सरासः समानरूपाः हिंसका वा मे
घानां अभ्वं मेघं जनयंत। उत्पादितवंतः आदित अनंतरमेव इषिरां सर्वैरेष्टव्यां स्वधां अन्नं सस्यादि समृद्धि
लक्षणं पर्यपश्यन् परिपश्यंति सर्वे जनाः॥ एवं व इति दशमी व्याख्याता॥ ॥ इति द्वितीयस्य चतुर्थे सप्तमो

वर्गः॥ ॥महश्चित्त्वमिंद्रेत्यष्टर्चं पंचमं सूक्तं ऐंद्रमागस्त्यं त्रैष्टुभं द्वितीया चतुष्पदा विराट् अथ चतुष्पदा वि
राड्दृग्द्वे रिक्तत्वात् विराजौ दश इति पिंगलनागेन सूत्रितत्वाच्च महो हो द्वितीया विराट्॥ लिंगमुक्तमपि वा॥
समूल्हे दशरात्रे द्वितीये छंदोमे मरुत्वतीये इदं विश्वजितोग्निनर इति खंडे सूत्रितं॥ द्वितीयस्यं त्र्सा महांम
हाश्चित्त्वमिंद्रेति॥ ॥तत्र प्रथमा॥ ॥महश्चित्त्वमिंद्र यत एतान्महश्चिदसि त्यजसो वरूता॥ स नो वेधो म
रुतां चिकित्वान्सुम्ना वनुष्व तव हि प्रेष्ठेति॥ ॥हे इंद्र त्वं यतः कारणात् एतान्मरुतो महतश्चित् महतोपि सामर्थ्या
तिशयवतः। स्वं निरपेक्षेणादिश्नि हास्यजसीति शेषः। अतः कारणात् महश्चिदसि चिदिति पादपूरणः
महतोपि त्यजसः त्यागात् यद्वै तत्क्रोधनाम यत्क्रोधाद्धि वरूता वारिता रक्षिता असि भवसि यद्वा महतोपि त्यागात्
दृष्यादिविषयात् त्यरयिता। अपि यस्मादेवं तस्मात् हे मरुतां विधातः स त्वं दत्त्वा स्तं चिकित्वान् चेतनावान् अ
स्मदनुग्रहविषयज्ञानोपेतः सन् नोस्मभ्यं सुम्ना सुम्नानि मरुद्दीयमानानि दृष्यादिरूपाणि वनुष्व देहि तानि

इव तथा आकांक्षंते तथा युष्मानादिप्राप्तये पुरुप्रैषाः बहुविधफलमिच्छन्तु यजमानाः स्तोत्रैः बहुप्रवूरमेव वूरो
तीत्यर्थः तत्र दृष्टांतः॥ अहन्यः अन्हि भवः एतसो न अश्व इव स यथा प्रक्षिप्तेन नाना प्रवूरं प्राप्यते तद्वत्॥ ॥इ
ति द्वितीयस्य चतुर्थे षष्ठो वर्गः॥ ॥अथ षष्ठी॥ क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय। यच्च्या
वयत विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवमिति॥ ॥हे मरुतो यूयं यस्मिन्नुदके निमित्तभूते सति आयय
आगच्छत। अस्य रजसो दृष्टुदकस्य लोकस्य वा महो महतः परं पारं अंतं क्वस्वित् कुत्रास्तीति नास्तीत्यर्थः। त
था अवरं अर्वाक् अर्वाग्भाग अरं क्व क्वस्वित् कुत्रास्ति आद्यंतं न कोपि जानातीत्यर्थः। यद्यदा यूयं विथुरेव विथु
राणि शिथिलानि तृणानीव संहितं एकभूतं उदकं च्यावयथ। स्वस्थानाच्चालयथ। तदा अद्रिणा वज्रेण त्वेषं दीप्तं
अर्णवं उदकवंतं मेघं विपाश्रितथ विशीर्णापातयथ॥ ॥अथ सप्तमी॥ सातिर्न वो अमवती स्वर्वती त्वेषा विपा
का मरुतः पिपिष्वती॥ भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जंजती॥ हे मरुतो वो युष्माकं सा

ग्निश्चिद्धि ष्मातसे शुशुक्वाना पोन द्वीपं दधाति प्रयांसीति ॥ ॥ हे इंद्र ते तव सा प्रसिधा ऋष्टिः वज्राख्यायुधवि
शेषोस्मेस्मदर्थं सम्यक् प्राप्नोति ॥ मेघसमीपे । एवं च सति मरुतोपि सनेमीति पुराणनाम । पुराणं चिरका
लं गृहीतं अभ्वं उदकं जुनंति । क्षिपंति वर्षंतीत्यर्थः । वृष्ट्या सस्यादिसमृद्धौ सत्यां अग्निश्चिद्धिस्मा हिस्मेति
पूरणेः अग्निरपि अतसे सतत लेकर्मणि निमित्तभूते सति शुशुक्वान् दीप्यमानो वर्तते पश्चात् प्रयांसि च
पुरोडाशादि हवींषि दधाति धारयंति ददतीति वा यजमानाः । द्वीपमिव आपो नद्यो द्वीपं द्विपार्श्वस्थोदकवान् पर्वता
दिः द्वीपः तं यथा आपो धारयंति तद्वत् यद्वा आयुधमेवोच्यते । वज्राख्य आयुधविशेषः अतसे वृक्षस
मूहे शुशुक्वान् दीप्यन् अग्निश्चिद् चिदित्युपमार्थे दाधिचिदित्युपमार्थे इति यास्केनोपमार्थस्योक्तत्वा
त् ॥ प्रज्वलन्नग्निरिव तद्वद्दीप्तो वर्तते । एतावदेवद्दीप्तमपेक्ष्य सेस्कन्दं । एवं सत्यापो द्वीपमिव बहुक्षुद्रका
नि प्रयांसि सस्याद्यन्नानि दधति धारयंति । एतत्सर्वं महानुभावस्य इंद्रस्य स्रष्टेः सामर्थ्यमितींद्रस्य स्तु

तिः ॥ ॥ अथ चतुर्थी ॥ त्वं तू न इंद्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिं । स्तुतश्च यास्ते चकनंत वायोः स्तनं न
मध्वः पीपयंत वाजैरिति ॥ ॥ हे इंद्र त्वं तु तुरवधारणे । त्वमेव तं रयिं त्वद्दानयोग्यं गवादिधनं दाः देहि यस्मादित
रेभ्योपि त्वमेव बहुप्रदः । अतोतिमहत्त्वेन देहीत्यर्थः । वयं तु ओजिष्ठया ओजस्वितमया परिक्रमणार्हया दक्षि
णया सस्यसिद्धिसाधनया वादिलक्षणया रातिं जमि वरातिं दातारं त्वां प्रीणयाम इति शेषः ॥ यद्वा दक्षिणाशब्दो
देयद्रव्यसामान्यवचनः रातिशब्दो बंधुवचनः हिरण्यादिसारद्रव्यप्रदानेन बंधुर्यथा वशीकुर्वंति तद्वत्त्वां
वशीकुर्म इत्यर्थः ॥ किंच वायोः छांदसं विषयस्य वायोः प्रवरप्रदस्य ते कर्मणि षष्ठी ॥ वायुर्वा स्तुतः ये स्मदीयाः स्तो
तारः चकनंत कामयंते । स्तवनमयाः स्तुतयः त्वामेव कामयंत इति वाक्ययोजना । कं न ते पर्यंता छुड़ि चडि ह
र्षे । चडन्यतरस्यामिति चङ् पूर्वमक्षरमुदात्तं । त्वां होत्रादयो वाजैर्हविर्लक्षणैरन्नैः पीपयंत । आप्याययंत
वयं त्वां बहुरूत्तप्रदातायस्तुतः सा हविषा प्यायय त्वं तु दातव्येन प्रासिद्धं धनं सर्वदा देहीत्यर्थः ॥ ॥ अथ

पंचमी॥ त्वे राय इंद्र तोशतमाः प्रणेतारः कस्य चिदृतायोः॥ ते षु णो मरुतो मृळयंतु ये स्मा पुरा गातूयंतीव देवाः
ति॥ ॥हे इंद्र ते तव राये धनानि विश्वेषाः तोशतमाः अतिशयेन प्रीणयितारः तुष्यंते स्तोपश्छंदसं शत्वं यद्वा
तोशायो शतयो बंधवः बंधुभूताः सखिभूताः मरुतः तोशतमाः तोशतिर्वधकर्मा नितोशयति यत्तनामा वृस्याधि
यते छोः यजमानस्य प्रणेतारः प्रकर्षेण निर्वोढारः ते मरुतोस्मान् सु सुष्ठु मृळयंतु ये स्मा ये खलु देवाः द्योत
नशीला मरुतः पुरा पूर्वं गातुयंतीव यज्ञगमनमिच्छंतीव ते आगत्य मृळयंतु॥ ॥इति द्वितीयस्य चतुर्थे षष्ठो
वर्गः॥ ॥अथ षष्ठी॥ प्रति प्र याहींद्र मीळ्हुषो नॄन्महः पार्थिवे सदने यतस्व। अध यदेषां पृथुबुध्नास एतास्
तीर्थे नार्यः पौंस्यानि तस्थुरिति॥ ॥हे इंद्र त्वं मीळ्हुषः उदकस्य सेक्तॄन् नॄन् नराकृशान् वा महतो मेघान् प्रति प्रया
हि अभिगच्छ मेघानां वृत्ररूपेणाभिधानान्नराकृतत्वमुक्तं। महः महार्थे पृथिव्यंतरिक्षनाम अंतरिक्षसं
बंधिस्थाने यतस्व यत्नं कुरु तैः सह युध्यस्वेत्यर्थः॥ यद्वा हविःप्रदातृत्वकर्मनिर्वाहकान् महतः यजमाना

श्री
॥२३८॥

न्सम्मानितवद्दिप्रेष्ठा तत्त्वे खलु प्रियतमानिति हृदेयमिंद्रो मरुत्सखेत्यादिश्रुतिषु प्रसिद्धार्थः॥ ॥अथ द्वितीया॥
अयुज्रंत इंद्र विश्वकृष्टीर्विदानासो निःषिधो मर्त्यत्रा॥ मरुतां पृत्सुतिर्हासमानाः स्वर्मीळ्हस्य प्रधनस्य साता
विति॥ पूर्वमंत्रे मरुतामिंद्रसाहाय्यमुक्तं। अत्रेंद्रस्य मरुत्साहाय्यमुच्यते। हे इंद्र ते मरुतो अयुज्रन् युज्यंते त्व
या युक्ता भवंतीत्यर्थः॥ कीदृशास्ते विश्वकृष्टीः विश्वकृष्टयः राज्यत्वेन सर्वजनवंतः किंच मर्त्यत्रा मर्त्येषु मर्त्य
र्थं। निःषिधो निःशेषेणोदकस्य सेक्तॄन्मेघान् विदानासः जानानाः किंच येषां मरुतां पृत्सुतिः सेनाः स्वर्मीळ्ह
स्य प्रधनस्य शुषसेतुः प्रकृष्टधनसेतुः प्रकृष्टवधहेतोर्वृत्राद्विसंग्रामस्य साता संभजनाय किंनाये निमित्त
भूते सति समानाहा समानाहासं कुर्वती हर्षयुक्ता भवति। यद्वा सुखेन मिह्यते जलं यस्मिन्नंतरिक्षे तादृशस्य प्रधन
स्य प्रकृष्टोदकस्याधनसाधनस्य संग्रामस्य साता मेघभेदनायेति यावत्। येषामीदृशा सेना अस्ति ते मरु
तो युज्रन्निति संबंधः॥ ॥अथ तृतीया॥ अम्यक्सा त इंद्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनंति॥ अ

मेघध्वनिः श्रूयत इत्यर्थः। पातने दृष्टांतः। सर्गैः रणावानं न छंदसीव नियाविति वनिपरणावंतं अधम वैरिणमि
व तं यथा पीडयित्वा तदीयं धनमपहरंति तद्वत् एवं महानुभावा मरुतः तवानुगा इतींद्रस्य स्तुतिः॥ ॥अथाष्ट
मी॥ त्वं मानेभ्य इंद्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः। स्तवानेभिः स्तवसे देव देवैर्विद्यामेषं वृजनं जी
रदानुम्॥ इति॥ हे इंद्र त्वं मानेभ्यो मानार्थं विज्ञेनेत्यर्थः तादर्थ्ये चतुर्थी। विश्वजन्याः विश्वजन्यः सोराकारः विश्वे प्रा
णिन उत्पादनीया यस्मात् तादृशस्त्वं सर्वजनहितत्वाद्वा मरुद्भिः सह शुरुधः शोधकस्याराधयित्रीः शोषिकाः
गोअग्राः आर्जितमुदकं वा आग्रपुरतो यासां ताः मेघपंक्तीः रदः विलिखः विदारय देहि वा द्योतमान त्वं स्तवा
नेभिः स्तूयमानैर्देवैरन्यैर्मरुदादिभिर्नितिज्ञैर्वा सत्स्तूयसे उभयत्र कर्मणि कर्तृप्रत्ययः॥ विद्यामेषमित्यादि व्याख्या
तः॥ इति द्वितीयस्य चतुर्थे नवमो वर्गः॥ ॥न नूनमिति पंचर्चं षष्ठं सूक्तं आगस्त्यमैंद्रं। अत्रानुक्रमणि
का। न नूनं पंचागस्त्येनैंद्रं हविषि मरुतामुद्यतं इंद्रागस्त्ययोः संवाद ऐंद्रस्त्वाद्या तृतीया वेंद्रवाक्यं चतुर्थी

चादौ बृहत्यौ तिस्रोऽनुष्टुभ इति सूक्तस्येंद्रागस्त्यसंवादरूपत्वादाद्या तृतीया चतुर्थ्यश्चैंद्रवाक्यं अंत्या विशेषास्त्रि
ष्टुप् विनियोगो लैंगिकः। अत्र सूक्ते यास्कः अगस्त्य इंद्राय हविर्निरूप्य मरुद्भ्यः संप्रदित्सांचकार स इंद्र ए
त्य परिदेवयांचक्र इति॥ ॥तत्र प्रथमा॥ न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतं। अन्यस्य चित्तमभि संचरेण्यमु
ताधीतं वि नश्यति॥ ॥यदि देवन प्रकारः प्रतिपाद्यते॥ इंद्र आह। अद्यतनं यदस्ति तन्नूनमद्यतन्नास्ति
नूनमत्र विचिकित्सार्थो। अत्राद्येति यद्यपि नास्ति तथापुत्तरवाक्ये श्व इति दर्शनादत्राद्येति गम्यते। तथा श्वो
पि नूनं नो न उ वा वधारणे श्वस्तनमपि नैवास्ति अद्य यथास्मदर्थं निरूप्तमस्माभ्यं नास्ति किंतु श्वः कुतस्त्य
त इति भावः। यदद्भुतं अन्यस्मै दत्तमिति यदस्ति वैपरीत्येन तत्को वेद य इंद्राय यदद्भुतं अभूतं भावि कार्यं यदस्ति तत्को
वेद अनेन श्वो लक्ष्यत इति अर्थानंतर्येण ज्ञातं भवति। तदेवाह। अभि संचरेण्यं सर्वतः संचारि अन्यस्य
चित्तं मानसं वेको जानाती विशेषः॥ उत अपि च आधीतं अध्यातं चिंतितमपि नश्यति। किमु सकृत्स्मृते नव्य

तीति॥ ॥अथ द्वितीया॥ किं न इंद्र जिघांससि भ्रातरो मरुतस्तव॥ तेभिः कल्पस्व साधुया मा नः समरणे व
धीरिति॥ ॥इदमगस्त्यवाक्यं॥ हे इंद्र नोस्माननोपरोधिनः किं जिघांससि हंतुमिच्छसि। कथमवध्यत्वमिति। तत
आह। मरुतस्तव भ्रातरः त्वया भोगप्रदानेन भरणीया इत्यर्थः। अतो वयमवध्या इति संभवति। मरुतामिंद्रभ्रातृ
त्वमेकस्मिन्नदितिगर्भे उत्पन्नत्वात्। सर्वोत्पत्तिः पुराणेषु प्रसिद्धा। संतु भ्रातरः ततः किमिति तत्राह। तेभिस्तैर्म
रुद्भिः सह साधुया साधु सम्यक् कल्पस्व। कल्पय। हविर्भागं तैः सह युक्तं वा कुरु। नोस्मान् समरणे संग्रामे मा वधीः मा हिं
सीः। यद्वा लुप्तदृष्टांतः। संग्रामे यथा विरोधिनं हंसि न तथास्मानिति॥ ॥अथ तृतीया॥ किं नो भ्रातरगस्त्य स
खा सन्नति मन्यसे॥ विद्मा हि ते यथा मनोस्मभ्यमिन्न दित्ससि॥ ॥इदमिंद्रवाक्यं॥ हे भ्रातर्हे अगस्त्य हविः
प्रदानवरप्रदानाभ्यां परस्परोपकारत्वात् त्वं तादृशः सखा सन् अस्मद्धितकार्यपि सन् नोस्मान् किमति
मन्यसे कस्मादपराधादतिक्रम्य मनुषे अवलिंपासि नायमपलापः। किं तु तथ्यमेवेति चेत्। उच्यते अंग त्वं ते तव म

न प्रतिगृह्य गत्वा च पार्थिवे सदने देवयजने यष्टव्यं कुरु। हविर्भोजनाय अध अपि यत्तु यदा तेषां त्वत्साहाय्यकारि
णां मरुतां संबंधिनः पृथुबुध्नासो विस्तीर्णमूला एताः पृषद्वर्णा गंतारो वा अश्वाः अरेः शत्रोः पौंस्यानि तीर्थेन
युद्धमार्गेण इव तस्थुः तिष्ठंति मेघानाक्रमंते। तद्वेषां मरुतां पृथुबुध्नासः बृहन्मूला एताः कृष्णवर्णा मेघाः तिष्ठं
ति। तत्र दृष्टांतः अर्यः अरणीयस्य स्वामिनः पौंस्यानि बलानि तीर्थेन राजवीथ्यां यथा तिष्ठंति तद्वत्॥ ॥अथ
सप्तमी॥ ॥प्रति घोराणामेतानामयासां मरुतां शृण्व आयतामुपब्दिः। ये मर्त्यं पृतनायंतमूमैरृणावानं न पत
यंत सर्गैरिति॥ ॥हे इंद्र ते संबंधिनां घोराणां भयानकरूपाणामभिमानानां वा एतानां वर्णनीयानामयासां अयसां स्वगम
नशीलानां मरुतां आयतां आगच्छतां मरुतां उपब्दिः उपगुर्वादि समीपे गम्यते। लायते उपपद्यत इति उपब्दिः
वाक्शब्दो श्रूयते। कर्मणि कर्तृप्रत्ययः। त एव विशेष्यते। ये मरुतो मर्त्यं मरणधर्माणं ऊमैः स्वरक्षणैः उदकानि
गमनसाधनैर्वा पृतनाः आत्मन इच्छंतं वैरिणं मेघं वा सर्गैः सृष्टैः स्वकीयप्रभावविशेषैः पतयंत पातयंति तेषा

स्य हृत्तिभ्यां बद्धुं त्वं नित्यसंबंधश्च प्रतिपद्यते यद्वा हे वस्व वसूनामीशिषे इति योजना॥ द्वितीयो वसुशब्दः ह्यनुवादो
वा तथा हे मित्राणां मित्र पते अस्मदादिमित्रस्य नियंपालक इंद्र त्वं धेष्ठः सर्वस्यादिशायनधारकोसि हे इंद्र त्वं उ
त्तमहिमस्त्वं मरुद्भिः संवदस्व तैः सार्धं सम्यक्कृतमितिवदस्व। अथ अपि च त्वं ऋतावृतौ। उपलक्षणमेतत्का
लस्य तत्तद्यागकाले हवींषि आज्यचर्वादीनि प्रकृष्टेन प्रवर्षेण भुंक्ष्व॥ ॥इति द्वितीयस्य चतुर्थे दशमो वर्गः॥
॥ प्रति व इति पंचर्चं चतुर्दशं सूक्तं आगस्त्यं त्रैष्टुभं मारुतं आद्ये द्वे केवलमारुतः शिष्टाश्च तस्रो मरुत्वदिंद्रदे
वताकाः प्रति वः षष्मारुत्वं तु चतस्रो मरुत्वतीया इत्यनुक्रमणिका विशेषविनियोगो लैंगिकः॥ तत्र प्रथमा॥
प्रति व एना नमसा हमेमि सूक्तेन भिक्षे सुमतिं तुराणां॥ रराणता मरुतो वेद्याभिर्नि हेळो धत्त विमुचध्वम
श्वानिति॥ ॥हे मरुतः वो युष्मान् अहं प्रत्येमि। अभिगच्छामि केन साधनेन नमसा नमस्कारेण हविषा वा
नमइत्यन्ननाम तथा सूक्तेन शोभनवचनेन स्तुतिरूपेण त्वरमाणानां हिंसकानां वो युष्माकं सुमतिं शोभन

मतिं अनुग्रहबुद्धिं भिक्षे याचे इदमस्यैव पुनर्हविः प्रदानादिदं याच्यते। किंच हे मरुतो यूयं वेद्याभिर्वेदितव्याभिः
स्तुतिभिः रराणता रममाणाननमसा इत्थंभूताः संतो हेळः क्रोधनाम एतत्। क्रोधः युष्मदतिक्रमजनितं ध
त्त निकृत्तं धारयत त्यजतेत्यर्थः॥ तथाश्वान् विमुचध्वं रथेभ्यो वियोजयत क्रोधात्पुनर्गमने मारुतेत्यर्थः॥ ॥
अथ द्वितीया॥ ॥एष वः स्तोमो मरुतो नमस्वान् हृदा तष्टो मनसा धायि देवाः॥ उपेमायात मनसा जुषाणा यूयं
हि ष्ठा नमस इद्वृधासः॥ ॥हे मरुतः एष वः स्तोमः इदानीं क्रियमाणः प्रकारो वो युष्माकं युष्मदर्थमित्यर्थः।
किंच हृदा तष्टः युष्मान्निवेदनबुध्या संपादितः तादृशः स्तोमो हे देवाः देवनशीलाः मनसा अस्मदनुग्रहवता
चित्तेनाधायि धार्यतां तदर्थं मनसा आदरयाबुध्या जुषाणाः ईमेनां स्तुतिं तद्वि विश्वसेवमानाः उपेत उप
गच्छतैवमाविलंबं कुरुत। यूयं नमसोन्नस्य हवीरूपस्य इद्वृधासस्थ हि वर्धयितारो भवथ खलु अतो गंत
व्यमेव इत्यूरणः॥ ॥अथ तृतीया॥ स्तुतासो नो मरुतो मृळयंतूत स्तुतो मघवा शंभविष्ठः॥ ऊर्ध्वा नः सं

तु कोम्या वनान्यहानि विश्वा मरुतो जिगीषेति॥ ॥ते मरुतः स्तुताः संतो नोस्मान्मृळयंतु उत अपि च मघवाम
घमिति धननाम अस्मान् दातव्या बहुधनेन तद्वानिंद्रः स्तुतः शंभविष्ठः सुखस्य भावयितृतमः सन्नुअ
स्मान्मृळयतु॥ किंच हे मरुतोस्माकं जिगीषा जिगातेर्गतिकर्मणो जिगीषा जिगीषितव्यानि उत्तरत्रानुपमा
नानि विश्वा सर्वाण्यहानि दिवसानि ऊर्ध्वा उन्नतानि उपर्युपरि श्रियाय शसावो हृष्टानि कोम्या कम्यानि स्पृह क
णीयानि वनानि सार्वैः संभजनीयानि संतुभिष्टानि जेतव्यानि च संत्विति योज्यं। एवं कृत्वा मरुतश्चेंद्रश्च
यूयेस्मरवयंतीयर्थः॥ ॥अथ चतुर्थी॥ अस्मादहं तविषादीषमाण इंद्राद्भिया मरुतो रेजमानः॥ युष्मभ्यं
हव्यानि शितान्यासे तान्यारे चकृमा मृळता न इति॥ ॥हे मरुतः शृणुत अहं अस्मात् प्रसिद्धात्तविषाद्ब
लवत इंद्रात्सकाशात् भियाभीत्या ईषमाणः पलायमानः पुरतः स्थातुमशक्तः तथा रेजमानः वश्वभाव
तश्चाक्रिमा यातमित्यत आह॥ यानि युष्मभ्यं हव्यानि हवींषि निशितानि संस्कृतान्यासन् तानि तान्येव आरे

नः मनसं यथावस्तु विद्मो जानीमः कथं जानीथेति। उच्यते। अस्मभ्यमिन्न दित्ससि अस्मदर्थं निरूप्तमस्मभ्यंदा
तुं नेच्छसीव बुद्धेवार्थः॥ ॥अथ चतुर्थी॥ अरं कृण्वंतु वेदिं समग्निमिंधतां पुरः। तत्रामृतस्य चेतनं यज्ञं ते तनवाव
हा इति॥ इदमिंद्रवाक्यं। अपरे अगस्त्यवाक्यमाहुः॥ हे ऋत्विजो यूयं अगस्त्योंगीकृतवान्। तस्मादिंद्रं अरं कृण्वं
तु कुर्वंतु संमार्जनपर्युक्षणादिना परिचरंतु। तथा पुरः पुरस्तात् अग्निमाहवनीयादिकं समिंधतां इध्मप्रक्षेपे
ण प्रज्वालयंतु तत्रामृतस्य मरणलक्षणस्य देवत्वस्य चेतनं प्रज्ञापकं यज्ञं हे अगस्त्य ते त्वदीयं वाहं च तन
वावहे अगस्त्यवाक्यपक्षे। इष्टमाविंद्रीष्टं तत्र वयममृतस्य तत्साधनस्य हविषश्चेतनं प्रज्ञापनमासादनं कुरुत
वे आवां पत्नीयजमानौ अध्वर्युयजमानौ वा हे इंद्र ते तदर्थं यज्ञं तनवावहे॥ ॥अथ पंचमी॥ त्वमीशिषे वसुपते
वसूनां त्वं मित्राणां मित्रपते धेष्ठः॥ इंद्र त्वं मरुद्भिः संवदस्वाध प्राशान ऋतुथा हवींषीति॥ इदमगस्त्यवाक्यं। हे
वसूनां वसुपते अतिप्रभूतानां पुरोडाशादिधनानां स्वामिन् हे इंद्र त्वमीशिषे ईश्वरो भवसि। सर्वस्य हे

द्वि॰भा॰ ॥२४३॥

गतमन्युर्भव। मरुत्सु तथा भव। किंच स्वप्रवृत्तैभिः शोभनप्रज्ञैस्तैर्मरुद्भिः सहसः सहितैः शत्रूणामभिभवितारस्त्वं द-
धानः अस्मदभिमतस्य धारयिता भवेति शेषः। शिष्टो व्याख्यातः॥ ॥इति द्वितीयस्य चतुर्थे एकादशो वर्गः॥
चित्रो व इति तृचात्मकमष्टमं सूक्तं आगस्त्यं मारुतं गायत्रं। चित्रस्तृचं गायत्रमित्यनुक्रमणिका। लैंगिको विशेषविनि-
योगः॥ ॥तत्र प्रथमा॥ चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः॥ मरुतो अहिभानवः॥ ॥हे मरुतो वो युष्माकं
यामो युष्मदागमनं चित्रश्चायनीयः पूजा आश्चर्यभूतो वास्तु भवतु। न केवलमागमनमेव चित्रं किं तु हे सुदान-
वः शोभनदानाः हे अहिभानवः अहीयमानप्रकाशाः युष्माकं सत्वो धीरः चित्रः स आगमः ऊती ऊत्या रक्षया
दृढलपर्णिया वा युक्तः भवतु। त्वदागमनं शीघ्रमस्तु। अभिमतप्रदं वास्त्वित्यर्थः॥ ॥अथ द्वितीया॥ ॥आरे
सा वः सुदानवो मरुत ऋंजती शरुः॥ आरे अश्मा यमस्यथ॥ ॥हे सुदानवः शोभनदानाः मरुतो वो युष्मा-
कं सा दीधिती ऋंजती प्रसाधयती स्वतेजसा स्वात्मानं बलं कुर्वती प्रवृद्धं प्राप्नुवाना वा सा प्रसिद्धा शरुः हि- श्रीः ॥२४३॥

सकर्त्री हेतिः आरे दूरे भवतु। तथा यमस्यथाक्षिपथ यथा सो अस्माकं स्यापक आयुधविशेषः। आरे दूरनामैतत्। दूरे भ-
वतु। मां न प्राप्नोतु। यद्वा अरे शब्द आराच्छब्दपर्यायः स च दूरे समीपे च वर्तते। अत्र समीपवर्णनं। यमस्मत्तोऽन्य-
मस्यथ। तं वैरिणमस्माकं उपलो मनः कुठिन आयुधविशेषः। आरे समीपं प्राप्नोतु॥ ॥अथ तृतीया॥ ॥तृणस्क-
न्दस्य नु विशः परि वृंक्त सुदानवः॥ ऊर्ध्वान्नः कर्त जीवसे इति॥ ॥हे मरुतः सुदानवः शोभनदाना यूयं तृणस्कन्दस्य
तृणवच्चलनस्वभावस्य शुष्यमाणस्य वा ममविशः पुत्रभृत्यादिरूपाः प्रजाः नु क्षिप्रं परि वृंक्त परिवर्जयत बाध-
परिहारेण रक्षयद्वा अलक्षणवृत्तस्यानुशिरः विशेषस्यान्यप्रजा परिवर्जयत। किंच नोस्मानूर्ध्वान् कर्त कुरुत
जीवसे चिरजीवनाय॥ ॥इति द्वितीयस्य चतुर्थे द्वादशो वर्गः॥ ॥गायत्साम इति त्रयोदशर्चं नवमं सूक्तं आगस्त्यं
त्रैष्टुभं ऐंद्रं गायत्साम इत्यनुक्रान्तं सूक्तं अहे दशरात्रे तृतीये छंदोमे मरुत्वतीय शस्त्र एतत्सूक्तं। विकृ। जितो
ग्निं नर इति खंडे सूत्रितं॥ तृतीयस्य द्वितीयाहे गायत्सामेति॥ तत्र प्रथमा॥ ॥गायत्साम नभन्यं १ यथा वेरर्चा-

द्वि॰भा॰ ॥२४५॥ मतह्यृ वृधानं स्वर्वत्॥ गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं विवासानिति॥ ॥हे इंद्र नमस्यं नमस्यैन
भसिभवं नभो व्याप्तिनं हिंसकं वा राक्षसादिकं स्यनभन्यं वधकर्माणि भजति॥ अदंतीति वधकर्मस्य गणनात् तादृशं
सामहे इंद्र यथा वेर्येन प्रकारेण वेभ्सि तथा गायत॥ गायत उक्थानि तत तस्मात् यत स्तोतितलः कारणात् वृधानं
वर्धमानं स्वर्वत् पूज्यभूतेन स्वर्गेणान्वितं यं इंद्रं यथा वेस्तथार्चाम पूजामः शंसामेत्यर्थः स्वलमनुत्तमं सतीति न्या
यात् यद्वा नतउकलक्षणं साम वर्धानं सर्वत्र यथा भवति तथार्चामि सद्मानं सीदस्त्वं दिव्यं दिवि भवमिंद्रं ला
श्चा विवासान् विवासंति परिचरणकर्मा आगत्य परिचरंति क्षीरं दुहंतीत्यर्थः॥ ॥अथ द्वितीया॥ ॥अर्चद्वृ
षा वृषभिः स्वेदुहव्यैर्मृगो नाश्नो अति यज्जुगुर्यात्॥ प्रमंदयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः॥
वृषा हविषां वर्षितारं यजमानाः स्वेदुहव्यैः स्वायत्त हविर्भिः यद्वा स्वयं प्राप्तं रद्दूदकं हव्यं येषां तादृशैर्वृषभि
र्वर्षकैः हविः प्रदातृभिः अध्वर्य्वादिभिः विशिष्टः सन् अर्चन् अयष्टेंद्रं॥ यद्वा वृषा पूज्यस्य वर्षिता तर्भि श्री ॥२४६॥

च कर्म दूरे कृतवंतो वयं इंद्र भयात्॥ अतो नोस्मान पराधिनो मृळतस्सुषयत्॥ ॥अथ पंचमी॥ ॥येनमानासश्चितयं
तउस्रा व्युष्टिषु ज्यायस्वतीनां॥ सनो मरुद्भिर्वृषभश्रवो धा उग्र उग्रेभिः स्थविरः सहोदा इति॥ ॥हे इंद्र शवसावलभूते
न त्वया नु गृहीता यमाना सोमन्यारः त्वयाभिमानिता या उस्राः रश्मयः ज्यायस्वतीनां नियानो बह्वीनां उषसां व्युष्टिषु स
तीषु प्रकाशनेषु सत्सु चितयंते चेतयंते प्राणिनां स्वस्व व्यवहाराय प्रज्ञापयंति। एवं ज्योतिरिति तेन त्वया अनुगृहीता उषसो रश्म
य उच्छंतीति प्रसिद्धं हे वृषभ वर्षितरिंद्र सदृशस्त्वं मरुद्भिः सहितः श्रवो धाः स सर्वत्र श्रूयमाणमन्नं धेहि स्थाप
य देहीत्यर्थः॥ कीदृशस्त्वं उग्रः उद्गूर्णबलः सहोदाः पराभिभवसामर्थ्यं बलं सहस्तस्य दातो कीदृशैर्मरुद्भिः उग्रेभिः
क्रूरबलैः एवं महानुभावो नो देहि॥ ॥अथ षष्ठी॥ त्वं पाहींद्र सहीयसो नॄन् भवा मरुद्भिरवयातहेळाः॥ सुप्रकेतेभिः
सासहिर्दधानो विद्मा मेषं वृजनं जीरदानुमिति॥ ॥हे इंद्र त्वं पाहि रक्षक नॄन् सहीयसः नॄन् सहस्वितमान् त्वदनु
ग्रहेणातिप्रवृद्धबलान्नॄन् मनुष्यान् प्रबलान् मरुतो वा किंच मरुद्भिः सार्धं अस्माकं मवयातहेळा भव अपग

मानं पार्थिवं हविर्भरत वसंते वसंते ज्योतिषा यजेतेति श्रुतेः तथा कृत्वा क्रंदत्। अक्रवः शुष्मोपममेतत्। अक्र
इव क्रंदतीति हर्षातिशयात्। ध्वनिं कुर्वन् नयमानः नयन् इंद्राय हविर्भागं किंच गोर्गता वृषो वृषइव रुवत्तरो शब्दाय
ते ध्वनिं कुर्वन् इतो नवार्त्तहारो इतस्ततो रोदसी रोदस्योः द्यावापृथिव्योरंतर्मध्ये रोदस्यावंतरावावावृ स्तूयमानो नः
स्तुवन् देवान् चरत् चरति गच्छति हरिश्री कृपाय द्यावापृथिवीः तस्मा पणाय द्युम्ने च परिभ्रमतीत्यर्थः। वक्रे
वृत्तीरिव मंगता। वा हिब्रुवीयादिना ह्वेः दीर्घो संप्रसारणं॥

अथचतुर्थी ताकर्माषतरास्मै प्रच्यौत्नानि देवयंतो भरंते जुजोषदिंद्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः ४

अथपंचमी तमुष्टुहींद्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसो विहंता५ १३

अथषष्ठी प्रयदित्थामहिना नृभ्यो अस्त्यरं रोदसी कक्ष्ये३ नास्मै संविव्य इंद्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्यां ६

अथ सप्तमी — समत्सुत्वा शूरसतामुराणं प्रपथिन्तमं परितंसयध्यै सजोषस इंद्रं मदे क्षोणीः सूरिं चिद्ये अनुमदंति वाजैः ७

इंद्र उक्तलक्षणैरध्वर्युभिरभ्यर्च्यते यस्मादश्वोऽपवूः पानाद्यर्थं धावन् मृगेन हरिणादिरिव अयमिंद्रो अ
श्वो अशनक्षीलः सन् अति जगुर्यात् अयं यथा मुक्तो हविर्भक्षणाय यथा मृगः क्षुत्पिपासार्दितः शीघ्रमुद्धवेत्त
थायमिंद्रो देवं तस्मादर्च्यति यद्वायमिंद्रो यतद्यथा अश्वो मृगइवाति जुगुर्यात् भक्षयेत् तथाऽर्च्यतीत्यर्थः॥ द्विंच
तेगूर्त उद्गूर्णे द्रमनां मननं स्तोत्रमिच्छन्तां देवानां मंदयुः स्तुतियुक्तो यो होता मनुषवत् तन्त्रामवृत्तस्त्विवृ यजत्रोया
गनिषादवूः सन् मिथुना मिथुनानि युग्मरूपाणि याज्यपुरोनुवाक्यादीनि मिथुनेव जायापतिरूपेतः सन् प्रभर
ते प्रकर्षेण संपादयति तस्मादर्च्यतीत्यर्थः॥ ॥अथ तृतीया॥ ॥नक्षद्धोतारं परि सद्मानि मितायन्भरद्गर्भमाशर
दः पृथिव्याः॥ क्रंदद्दश्वो नयमानो रुवद्गौरंतर्दूतो नरोदसी चरद्वाग्गिति॥ ॥होता होमनिषादवूयमग्निर्मित
परिमितानि सद्मसदनानि गार्हपत्यादिस्थानपनीयमन्नं हविर्लक्षणमाभरत्॥ आहरति स्त्रीवूरोति संभवति के
संवत्सरपर्यंतं वर्धितं भूम्यामुत्पन्नमित्यर्थः॥ यद्वा संवत्सरसंबंधिनं वसंतादि कालेज्योतिष्टोमादिषु दीय

द्वि॰ भा
॥२४७॥

स्वागोः सर्वापि स्तोत्ररूपा वाक् ते त्वां अनुक्रमेण जोषा जोषणात् प्रीणयित्री भवतु भवति। कृद्यदिस्स
रीश्चिव स्तोत्रादिप्रेरकः स्तोतृजनानां विविधेषां धिषणया प्रज्ञया दृ॰ प्रदानरूपेण कर्मणा वा येषि कर्मयसे तदा
सर्वापि स्तुतिर्वदर्थाभवति॥ ॥अथनवमी॥ असाम यथा सुषखाय एनः स्वभिष्टयो नरां न शंसैः॥ असद्य
था न इंद्रो वंदनेष्ठास्तुरो न कर्म नयमान उक्थेति॥ ॥हे एनः इनः ईश्वर इंद्र यथा सुषखायः शोभनसखाय उपस
हायवंतोऽसाम भूयास्म किंच स्वभिष्टयाः शोभनाभिष्टयः शोभनाभीष्टाश्चासाम। किमिव नरां न शंसैः नराणां
राजादीनां शंसैस्तैरेव स्तुतिभिर्यथा मनुष्याः शोभनानुभीष्टा भवंति तद्वत्॥ इदानीं परोक्षेणाह॥ नोस्माभ
रिंद्रो वंदनेष्ठाः अस्मत्स्तुतौ वर्तमानः सन् तुरो न त्वरमाण इव नोस्माकं कर्म उक्थैः शास्त्रैर्नयमानः उक्थ
न्यफलं प्रापयन् स्तुत्यो तुष्टः सन् अस्मदीयेन कर्मणा फलप्रापयिता यथा सन् भवेत्। हे ऋत्विजस्तथा
कुरुतेति शेषः॥ ॥अथदशमी॥ ॥ विष्पर्धसो नरां न शंसैरस्माकासदिंद्रो वज्रहस्तः॥ मित्रायुधो

श्री
॥२४७॥

न पूर्पतिं सुशिष्टौ मध्यायुव उप शिक्षंति यज्ञैरिति॥ ॥नरां नेतॄणां मध्ये सस्पर्धान्नराः अन्यथा विष्पर्धसः
कुर्वंति स्पर्धिनः ता तद्वयमपि इंद्रं शंसैः स्तुतिभिः सखायो वयं तथा कुर्मः स वज्रहस्तो विरोधि शिक्षणा
य सर्वदा वज्रधारी इंद्रो अस्माकमसत् विष्पर्धमनुकूलो भवतु। किंच मित्रायुधो न मित्रेच्छवः हितैषिण इव सु
शिष्टौ स्तुखायते वर्तमानं पूर्पतिं पुरस्वामिनं यथाभिमतदानेन पूजयंति तथा मध्यायुव अस्माकं श्रियां य
ज्ञस्तां मध्ये वास्थिनं श्रमयमाना अध्वर्य्वादयो यज्ञैर्यत्तु सज्जनैर्हविस्तोत्रादिभिरुपशिक्षंति उपेत्य यजंते। ज्ञ
क्षति दानकर्म॥ ॥इति द्वितीयस्य चतुर्थे चतुर्दशोवर्गः॥ ॥अथैकादशी॥ ॥यज्ञो हि ष्मेंद्रं कश्चिदृंधंजु
हुराणश्चिन्मनसा परियन्॥ तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वेति॥ ॥कश्चिद्यत्तोय
जमानो यत्नानुष्ठायी ऋंधन् वर्धयन् भवति। इंद्रं यत्नेन वर्धयतीत्यर्थः॥ जुहुराणाश्चित् कुटिलगतिस्तु आश्चि
त मनसा देवलेन परितो गच्छन् लौकिकविषयादिकं ध्यायन् वर्तते। यद्वा परिवर्जनार्थः। वर्जयित्वा गच्छन्

द्वि·भा· ॥२४८॥

नेदं प्राप्नोति। तत्र दृष्टांतः। तीर्थे प्रसिद्धे मार्गे अच्छ आभिमुख्येन समीपे वर्त्तमानमोदकं पानीयादिकं सद्

नं। तत् तृषाणं पिपासायुक्तं यथा अविलंबेन प्रीणाति स यथा तत्सह आगच्छतीत्यर्थः। तद्वद्यत्नेन कु। श्चित्तुम

निंद्रमभिगच्छतीति कुटिलस्य पुरुषं आ कृणोति अर्वाक्करोतीति नीचैः करोतीत्यर्थः वर्जयतीत्यर्थः॥ तस्मा

द्युत्तमार्गमजानानो वक्रो दूरे परिभ्रमति नैवेंद्रं तर्पयति तद्वल्लक्षणस्यक वर्जयस्येव। ॥ अथ द्वादशी॥ मोषू

णइंद्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः॥ महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वंदते गीरि

ति॥ ॥हे इंद्रात्र पृत्सु एषु परिस्थितेषु संग्रामेषु इत्यर्थः मे षु जयेषु देवैर्मरुद्भिः सह नोस्मान् मो षु मैव याक्षी

रिति शेषः मरुद्भिः सह हि ये युध्यस्वेत्यर्थः। हे शुष्मिन् बलवान्निंद्र अस्ति हि ष्मा ते अस्ति हि स्म तव खलु तवाद्वि

मस्तीति उच्यते। अवयाः अवयजनं अवयुस पृथक्करणं यजनं हविर्विभागोस्ति मरुद्भिः पृथगप्यस्ति हविर्वि

भागः केवलं मरुद्भ्य एव दीयते नास्मभ्यं अतः कथं यात्स्यामीति न मंतव्यमित्यर्थः॥ यद्वा अवयाः न्यूनं श्री ॥२४८॥

तेर्थं मदेत वमहार्थं च सजोषया सह सेचमानाः समानप्रीयतोक्षोणीः क्षोण्यो विशः परिजनाः मरुतः प्रयंतइति

वृ। इंद्रस्ते वाजैर्बलैः अनुकूलं मादयंति संग्रामे मरुत्स्थामवस्थामिनं कृत्वा मादयंतीत्यर्थः। यद्वा ये यजमानाः

वाजैर्हविर्भिर्मादयंति ते समानप्रीतियुक्तास्तव मनुष्यभूता ऋत्विजा यजमानभूताः प्रजाः समत्सु सहामान

दस्थानेषु यागेषु म्भ लक्षणविशिष्टं तामेव पूजयंतु तव मदाय चयतंते॥ ॥अथाष्टमी॥ एवा हि ते शं सवनास

मुद्र आपो यत्त आसु मदंति देवीः॥ विश्वा ते अनु जोष्या भूद्गौः सूरींश्चिद्यदि धिषा वेषि जनानिति॥ ॥हे इंद्र एवा

हि एवं हि स्मृतिः ते तव संबंधीनि सवनानि सूयते सोमो त्रेति सवनानि सोमयागाः ते त्वां शं सुखकरा भवंति। कथं स

त्तियत्तत्र यदि देवी। द्योतमाना आपः समुद्रे उदकं समुद्रवर्षणापादनभूतेंऽतरिक्षे आसु प्रजासु निमित्त

भूतासु ते त्वां मदंति मादयंति अंतर्भावितण्यर्थोयं यदा प्रस्युपकारार्थं वर्षणाय त्वां प्रेरयंति दृष्ट्वा सुदकानि ति

दा खलु तव सोमयागाः सुखकरा भवंतीत्यर्थः यत्तु साधकं वृष्टिप्रदानेन यागान्निर्वर्तयेत्यर्थः। किंच हे इंद्र ते त्वां वि

त्वं राजेंद्र ये च देवा रक्षा नॄन्पाह्यसुर त्वमस्मान्। त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः॥ इति॥ हे इं-
द्र त्वं राजा अधिपतिः सर्वस्य जगतः किंच मे देवाः मरुदादयः संति तेषामपि विशेषेण पालक हे असुर असुराणां
निरसितः त्वं नॄन् मनुष्यान् कर्मनेतॄन् यजमानान् रक्ष पालय विशेषतोस्मान् परिरक्ष त्वं च सत्पतिः सतां स-
तः कर्मपूतस्य वा पालक मघवान् धनवान् नोस्माकं तरुत्रः तारयिता पायात् किंच त्वं सत्यो हे अबाध्यः
सत्यफलो वा वसवानः स्वतेजसा सर्वं छादयन् वसतिं वा कुर्वन् स्तोतृभ्यः सहोदाः सहसो बलस्य बलस्य
दाता भवेति शेषः॥ ॥अथ द्वितीया॥ दनो विश इंद्र मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त्॥ ऋणोरपो अ-
नवद्यार्णा यूने वृत्रं पुरुकुत्साय रंधीरिति॥ ॥हे इंद्र त्वं वृत्रसंबंध्यसुराणां पुरः योधनसमये मृध्रवाचः मर्षण-
वचना विशः तदीयाः प्रजाः शर्मसुखं यथा भवति तथा दनः अदमयः दमिरिदं रूपं। यद्वा वर्णव्यत्ययः नद-
अनदः अशातयः असुरः प्रजाः प्रति भयंकरशब्दमकरोः। कृदेरात। यच्च यदा शारदीः प्रसयायद्धेत

संवत्सरपर्यंतं दृढीकृता अपि सप्त पुरः एतत्संख्याकाः पुरीः दर्त् अदारयः पुरुषव्यत्ययः दृणातेर्लङि छांदसो
विकरणस्य लुक् करोतेरवयस्येति नियमान्नलोपाभावः तथा कृत्वा अनवद्य कृतयत्वादिति दने। हे इंद्र अर्णा अर्णआ-
रणशीलाः यः तदीय दुर्गस्थानुदकश्रयाणि तथच्छत्वादीनि ऋणोः अगमयः प्रावर्तयः भग्नान्यकरोः एवमु-
पद्रुत पुरुकुत्साय एतन्नाम्ने राज्ञे नित्यतरुणाय तदर्थं वृत्रमेतन्नामकमसुरं रंधीः असाधयः अयमेतिहासि-
कपक्षे निरुक्तरूढ्यातु हे इंद्र मृध्रवाचो विशः मर्षणध्वनियुक्ताः वृत्रस्वरूपाः प्रजाः दनः अदमयः अशातृयोर
अवर्षयः इत्यर्थः। कृदाय तयदा सप्त पुरः शारदीर्दर्त् सर्पणस्वभावान् प्रयमानान् वृष्टजयन् दृष्टास्ते दानुअ-
दानं दाता रत्नौ प्रपद्रुपन् पद्रुयेतिनेतरः अर्यमणाय कृविदिता पद्रयन् पद्रयेतः त्वामजयंतः आयो मनुष्यस्य स-
चास्तदायभूतोः त्वया भूतः क्षिप्रावर्जिताः अपर्यं पुत्रं वहमानाय सेतितानुजघन्वा भवतीत्यर्थः॥ ॥अथ तृ-
तीया॥ ॥अजा वृत इंद्र शूरपत्नीर्द्यां च येभिः पुरुहूत नूनं॥ रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि

वस्तोरिति॥ ॥हे इंद्र शूरपत्नीः शूरैः रक्षोभिः पालिताः हतः वर्त्तत आस्विति बलो पुरः पुरीः यद्वा शूरा यजमानपत्नीः
पालिता हतो। वेदिभूमिः अजगच्छ जेतु तथा हत्वा द्यां च नूनमवद्ध्यमज। वृंत्वमेव एव मरे पुरुहूत वद्धुरभिवर्द्ध
धा हतं इयेभिर्यैर्मरुदादिभिः अनुगतोसि तैः सहितः स तथा हत्वा अस्तुषं अशोषयितारं अशुं तं वा तूर्वयाणं
तूर्णगमनमग्निं वेद्धतं होमाधारं वा ग्निं रक्षोरक्षस्वे वह्निमर्थं रक्षणमित्युच्यते। इमे गृहे अपांसि कर्माणि कुर्वन्नु
स्तोः वत्स्यमनाः सतायमहः अभ्यूत्तवः तदर्थं भिदः भर्त्तृघातिकाः अदेवीः आसुरीः पुरान्पुरीः अपि भिन्नतविद्व
शितवान्। त्रिपुरुषव्यत्ययः। नरा हृद्यार्थे तथा अदेवस्य अस्तुः यस्य पीयोः सिंहवृस्याप्रस्यबधः वज्रं ननमः अ
नमयः अनुकूलमकरोः यद्वास्तु यद्वा वासयितुं कारयितुमित्यर्थः। रक्षणे दृष्टान्तः यज्ञाद्भिः द्रुकृतिनो नौकूस्थिरे
सति यागगृहेनु स्थानपरास्यास्यामीत्यर्थः॥ रक्षणे दृष्टान्तः तुःसिंहोन सिंह इव यथा स्वाश्रयभूते वने गजादि
पद्रवपरिहारेण रक्षति तद्वत्। असुरपुरभंगगमने वा दृष्टान्तः सिंहो यथा निर्भजो विरोधिमृगान् हंतुं धा

वहुतायंगंता वहोरिति कुं च हविष्मतः प्रदेयहविर्युक्तं मीढुषो हविः प्रदातुं यस्मादेतस्य इद्वयं मरुतां विशेषणं
यस्य ममयया पूलेनेंद्रेण वा सह मिश्रयंतीगीः स्तुतिशास्त्रादिरूपा वाकू महः श्रेष्ठं महतोपि मीढुषः सेक्तन्
हविष्मतोस्मदीय हविष्मान्हूतो वंदते स्तौतीति॥ ॥अथ त्रयोदश्यामस्तुकादिमारभ्य कृतां स्तुतिं निगमयपूर्वं प्रा
र्थयते॥ एष स्तोम इंद्र तुभ्यमस्मे एतेन गातुं हरिवो विदो नः॥ आ नो ववृत्याः सुविताय देव विद्यामेषं वृजनं जी
रदानुमिति॥ हे इंद्र एषः स्तोमः इदानीं कृतः इत प्रकारस्तोत्रविशेषस्तुत्यं त्वदर्थं हे हरिभ्यां वहभ्यां तद्वन्निंद्र ए
तेन स्तोत्रेण ममाननवानोस्मदीयं गातुं देवयजनमार्गं विदः विश्वं विदित्वा वहे देव सुविताय शोभनगमनाय वा
नोस्मान् आ ववृत्याः आवर्त्तस्व अस्मद्यागं प्रयगच्छ विद्यामेति व्याख्यातं॥ ॥इति द्वितीयस्य चतुर्थे पंचदशो व
र्गः॥ ॥त्वं राजेति दशर्चं चंद्रद्रूमं सूक्तं मागस्त्यमैंद्रं त्रैष्टुभं। त्वं राजा दशेत्यनुक्रांतं इष्टल हे स्तोम दृष्टो स्तोम
स्यातिरात्रे सनार्थं तोत्रे उक्तेन छंदस्त्ये दशर्णि त्रैष्टुभान्येमरुद्वत्यावपेरानितिसूत्रितं॥ ॥तत्र प्रथमा॥ ॥

हे इंद्र कुत्सं तन्नामानमृषिं प्रावः स्यूमन्यु स्यूमन्युमिति सुखनाम तदिच्छतो शुल्लतनगामिनो ऋज्वो ऋजुगामिनो वा
तस्य वायोः समानवेगौ अश्वौ तदीयाववृश्वौ वह प्रापय यस्मिन् हविषि निमित्तभूते सति कुत्सं चाकन् कामयसे तर्प
यसे वा हविरादिकं तदर्थं सूरः प्रेरकः सूर्यः चक्रं स्वमंडलं स्वरथचक्रं वा अभीके आसन्ने देशे वृहत् लातु उर्ध्व
गमयतु प्रवृक्तं हृयतु। अथ परोक्षेणाह। वज्रिवो अक्षुरयमिंद्रः स्पृधः संग्रामे कुर्वतः शत्रून् अभियासिषत् अ
भियातवान्॥ ॥इति द्वितीयस्य चतुर्थे षोडशो वर्गः॥ ॥अथ षष्ठी॥ ॥जघन्वाँ इंद्र मित्रेरूंचोदप्रवृद्धो हरि
वो अदाश्वन्॥ प्र ये पश्यन्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अपत्यमिति॥ ॥हे इंद्र हरिवः हरिभ्यां त
द्वत्त्वं चोदप्रवृद्धः चोदनैः स्तोत्रैः प्रवृद्धः सन् अदाश्वन् आदातॄन् अमित्रेरून् मित्राणां यजमानानां ईर
यितॄन् बाधकान् तद्वैरिणं मित्रत्वं गच्छतो वा जघन्वान् हतवानसि। वायः अर्यमणमजयद्धाः स्तासि अभि
नाशुपारय अपालयः संपूर्णजलवर्षणेन। तथा च मंत्रांतरं त्वमपो यदवे तुर्वशाय अरमय इति॥ ॥अथ

थ सप्तमी॥ त्वमपत्तूविरिंद्रा वृक्षं सातो क्षां दासायोपवर्हिणीं कः॥ करस्तिस्रो मघवा दानुचित्रा नि दुर्योणे कुयवाचं
मृध्रि श्रेदिति॥ ॥हे इंद्र त्वं वृधिः कृतं दस्युर्यन्न्त्र चानो हानायूसातौ अर्चनीयस्यान्नस्य उभे निमित्तभूते सति पर
तस्तोति॥ यद्वा एतन्नाम स्ववितपत्त्र। अस्त्रोतः। अन्नार्थं तस्याति प्रभूतमन्नं प्रादा इत्यर्थः॥ तथा च दासाय प्र
पा कुलक्षयित्रे असुराय क्षां भूमिं उपवर्हणीं शय्यां कः अकारोः हत्वा भूमावपातय इत्यर्थः। करोते लुङि मंत्रे
दृशेति च्लेलुक्। अथ परोक्षकृतः। मघवान् धनवान् य इंद्रः तिस्रो भूमीः दाशुद्धशः शुद्धस्तोमिवरूपा भूमीः सि
धेत रिक्षद्युरूपा वा भूमी दानुचित्राः दानेन देयैर्धनैर्वाचायनीयाः करत्करोति। यद्वा तिस्रः अयोरजतहिरण्य
मयीः पुरी दानुचित्राः स्वंउनेन चित्रा न्यकरोत्। तथा दुर्योणे दुष्टयोनौ सति एतन्नाम कस्य राज्ञः प्रत्यर्थं कुयवा
चं कुत्सितं शब्दायतं एतन्नामानमसुरं मृधि संग्रामे निश्रेत् हिंसितवान्॥ ॥अथाष्टमी॥ ॥सना ता त इंद्र
नव्या आगुः सहोनभो विरणाय पूर्वीः॥ भिनत्सुरो नाभिदो अदेवीर्न नमो वधरदेवस्य पीयोरिति॥ ॥हे इं

द्र ते तव संबंधीनि सना सदातनानि नित्यानि ता तानि वीर्याणि नव्याः नवतराः इदानीतना ऋषयः आगुः आ
गच्छंति स्तुतिव्याजेन प्राप्नुवंतीत्यर्थः॥ कानि तानीत्युच्यंते। पूर्वीर्बह्वीर्नभा हिंसाः नभेर्हिंसार्थात्। बहुलमेतदं
लस्येदं रूपं वा हिंसाः अविरणाय अविगतरणाय संग्रामेनासनाय महः अभ्यभवः तदर्थं भिदः भेत्तव्या घाति
का आसुरीः पुरः न पुरीः अपि भिनत् अभिनत्। बान्त शिपुरुषव्यत्ययः। नञ् उपमार्थे तथा अदेव अदेवस्य पीयोः हिंस
कस्यासुरस्य वधः वज्रेण ननमः अनमयः अनुकूलमकरोः। यद्वा हे इंद्र सनाः पुरातनकाले ते तव संबंधिन्यः ता तानि
लिंगव्यत्ययः पूर्वीः पुरातन्यः आपः नव्याः नूतनाः सहाः सहः आसन् राजच्छंदसि बहुमर्थे अविरणाय प्राणिना
मविनाशाय तदर्थं नभः हिंसकान् वधकान् मेघान् सहः मर्षितवानकरोः। किंच देवीः पुरः अवर्षणेनादेवनशीला
उदकपुरः उदकबंधान् अभिनत् अभिनत् अकरोः तथा वै अदेवस्य अदेवनशीलस्य पीयोः अविलस्य वृत्रस्य वधः
वज्रेण ननमः अनमयः॥ ॥अथ नवमी॥ त्वं धुनिरिंद्र धुनिमतीर्ऋणोरपः सीरा न स्रवंतीः। प्र यत्समुद्रमति

वति तद्वत्॥ ॥अथ चतुर्थी॥ शेषन्नु त इंद्र सस्मिन्योनौ प्रशस्तये पवीरवस्य मह्ना। सृजदर्णांस्यव यद्युधा
गास्तिष्ठद्धरी धृषता मृष्ट वाजान्॥ ॥हे इंद्र ते त्वत्तः सस्मिन् सर्वस्मिन् समाने वा योनौ स्वकीये स्थाने अंतरि
क्षे वा योनिरंतरिक्षे नु क्षिप्रं शेषन् शेरते। शीङ् स्वप्ने लेट्यडागमः। व्यत्ययेन परस्मैपदं सिब्बहुलमिति सिप् बहुमर्थे प्रश
स्तये प्रशंसनाय तव स्तुतये त्वन्महिमप्रख्यापनायेत्यर्थः। किं सेनादिसाधनेनेत्यत आह। पवीरवस्य कुलिशाख्यस्य
वा मह्ना महिम्ना त्वद्वज्रप्रहारेण हता मेघाः शत्रवो वा तत्र वज्रे रते निपाते अपालयंत इत्यर्थः। किंच यत्त्वं यदा यु
धः प्रहरणसाधनेन युधेन वा गाः तदर्णांसि उदकानि अवसृजः अवाङ्मुखमपातयः पुरुषव्यत्ययः तदर्थं अहरी
अश्वौ अश्वतिष्ठः अत्रापि पुरुषव्यत्ययः यद्वा यदा हरी अधितिष्ठसि तदा अवसृजः अथैव सा वाजानन्नानि
सस्यादिलक्षणानि धृषता धर्षकेण सामर्थ्येन मृष्ट शोधय प्रवर्धयेत्यर्थः॥ ॥अथ पंचमी॥ वह कुत्समिं
द्र यस्मिन्चाकन्स्यूमन्यू ऋज्रा वातस्याश्वा। प्र सूरश्चक्रं वृहतादभीके ऽभि स्पृधो यासिषद्वज्रबाहुः॥ ॥

आगस्य मैंद्रं आद्यास्कंधोग्रीवी बृहती द्वितीयपादस्य द्वादशाक्षरत्वात् इतरेषां त्रयाणामष्टाक्षरत्वाच्च। द्वितीय
श्चान्यं कुसारिणपुरोबृहती वा स्कंधोग्रीवा वेत्युक्तलक्षणसद्भावात् अंत्या त्रिष्टुप् शिष्टास्त्रिष्टुबंतं परिभाषया आनुष्टु
भं। त्विति त्रोषवचनेनापोदितत्वादानुष्टुभः मात्सिषळानुष्टुबं तु त्रिष्टुबंतं त्वाद्यास्कंधोग्रीवा वेत्यनुक्रांतं द्वितीयेस्वर
साम्निराद्यस्तृचः स्तोत्रियः अभिजित बृहत्स्तृ इति खंडे सूत्रितं॥ ॥तत्र प्रथमा॥ ॥मत्स्यपायि ते महः पात्रस्ये
व हरिवो मत्सरो मदः॥ वृषा ते वृष्ण इंदुर्वाजी सहस्रसातमः इति॥ ॥ते महः पात्रस्येव तत्सोत्रेणयथा धार्यते। सो
मः तत्संदृष्टेन त्वया तत्तीयार्थे षष्ठी। यद्वा पात्रस्येव ते तव स्वभूतो महान् सोमः इति वा योजना। अपायि पीयतं आ
त्तं सा व्याप्तिविवक्षितत्वात्। भूतवत्प्रयोगः। यतः पिबसि अतो मत्स्यसि माद्यसि मोदयस्व वा पात्रे यथा सोमः स्
यते तथा त्वयि धिवृं पिब पीत्वा च मादयस्वेत्यर्थः। किंच हे वृषाते अभिमतवर्षित्रे तुभ्यं चतुर्थ्यर्थे षष्ठी। मत्सरो मदसा
धनः मदरूर्पयिता वर्षिता इंदुः कुंदयिता आल्हादयितारी इत्यर्थः। वाजी अन्नवान् अन्नकार्यतृप्तिसद्भावादन्नव

निरुच्यते॥ सहस्रसातमः अपरिमितदानतमः सहस्रपुरुषसंभजनपर्याप्तत्वात्कांतिश्रयो वा ये वं महानुभावः सोमः
संपादितः तं पिबेत्यर्थः॥ ॥अथ द्वितीया॥ आ नस्ते गंतु मत्सरो वृषा मदो वरेण्यः॥ सहावाँ इंद्र सानसिः पृतना
षाळमर्त्य इति॥ ॥हे इंद्र ते नो अस्मदीयः मत्सरो वर्षणसाधनः सोम आ गंतु आगच्छतु कीदृशः वृषा वर्षकः
मदस्तर्पयिता वरेण्यो वरणीयः सहावान् सहायवान् सहः साबलेन तद्वान् सानसिः संभजनीयः पृतनाषाट् शत्रु
सेनाया अभिभविता। अमर्त्यः अविनाशी ईदृशः सोमस्त्वामागच्छतु। यद्वा उत्तरार्धे इंद्र परतया व्याख्येयः
हे इंद्र सहावान् अस्मदन्नसोमसहायवान् बलवान्वा सानसिः सः अस्माभिः संभजनीयः पृतनाषाट् अमर्त्यश्च
भवेति॥ ॥अथ तृतीया॥ ॥त्वं हि शूरः सनिता चोदयो मनुषो रथं॥ सहावान् दस्युमव्रतमोषः पात्रं न शोचिषे
ति॥ ॥हे इंद्र त्वं खलु शूरः शौर्योपेतः सनिता दाता सि अतो मनुषो मनुष्यस्य मे रथं रंहणं स्यंदनं मनोरथं वा
स्वर्गगमनसाधनं यज्ञाख्यं रथं वा चोदयः प्रेरय। किंच त्वं सहावान् सोमसहायवान् बलवान्वा भूत्वा दस्युमु

द्वि·भा·४

॥२५४॥

पक्षयितारमव्रतमकर्माणं अननुष्ठायिनं ओषः सह । किमिव शोचिषा दीप्त्या ज्वालया । पात्रं न स्वाधारं पात्रमि
वौषमिव यागाधिकरणीयेन येन यजते । तं दहेत्यर्थः ॥ ॥अथ चतुर्थी ॥ ॥ मुषाय सूर्यं कवे चक्रमीशान ओजसा ॥
वह शुष्णाय वधं कुत्सं वातस्याश्वैरिति ॥ ॥ हे कवे क्रांतदर्शिन् ईशानः समर्थः सूर्यं सूर्यस्य सुपां सुपो भवंतीति
षष्ठ्येकवचनस्य द्वितीयैकवचनादेशः तत्संबंधि चक्रमेकं ओजसा बलेन सामर्थ्यातिशयेन मुषाय अमुष्णाः छिं
दसित्यय जयातीत्य यजादेशः । पूर्वं सूर्यरथस्य चक्रद्वयमस्ति एकमिंद्रो मुमुषे तामिति हासः ॥ तथा च तंत्रांतरं ।
प्रान्यच्चक्रमवहः सूर्यस्य कुत्सायान्यादिति । किंच शुष्णाय एतन्नामकायासुराय तद्वधार्थं द्वितीयार्थे चतुर्थी । शुष्णासुरं हंतुमित्यर्थः ।
कुत्सं कृतेन साधनं वधं वज्रं वा तस्य वायोरश्वैर्वायुवेगैर्वा युक्तः सन्नवह अवहः । शुष्णं हंतुं वज्रमधारयः । यद्वा शुष्णवधा
य वज्रमवहः तं च हत्वा तदीयैर्वायुवेगैरश्वैस्तदुपलक्षितैः कुत्सं महर्षिं अगमः । शुष्णासुरधनं कुत्सायादा इत्यर्थः ॥ तथा चा
न्यत्रात्तं कुत्सं शुष्णं हत्सेषाविषा । कुत्साय शुष्णमकृषमित्यादीनि ॥ ॥अथ पंचमी ॥ ॥ शुष्मिंतमो हि ते मदो द्युम्निंतम उत क्रतुः ॥ श्रीः ॥२५४॥

शूर पर्षि पारया तुर्वशं यदुं स्वस्तीति ॥ ॥ हे इंद्र त्वं धुनिः कंपयिता शत्रूणामसि अतो धुनिमतिः कंपनोपेततरंग
वतिः अथवा धुनिर्नाम जलप्रतिरोधकार्य असुरः स एव प्रतिबंधकत्वाय यासां तादृशीरपः कर्मणोः अगमयः भू
मावपातयः तत्र दृष्टांतः स्रवंतीः प्रवहंतीः सीरा न नदीनामैतत् सरेणवतीर्नदीरिव तद्वत्सततं तरस्यर्थः । एवं
कृत्वा हे शूर यत्तदा समुद्रमतिपर्षि अतिक्रम्य पूरस्यै यदकं तेदानीं तुर्वशं यदुं उभा अपि पारयः तदेत्यर्थः ॥ ॥
अथ दशमी ॥ ॥ त्वमस्माकमिंद्र विश्वध स्या अवृकतमो नरां नृपाता । स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृ
जनं जीरदानुमिति ॥ ॥ हे इंद्र त्वमस्माकं विश्वध विश्वस्मिन्नपि काले विश्वप्रकारैर्वा अवृकतमः अबाधकतम इ
त्यर्थः । स्याः भव तथा नृणां नृपाता अस्मदीयानां पुत्रभृत्यादिरूपाणां बहूनां मनुष्याणां सर्वदा रक्षको भव ।
अपरा नृशब्दोनुवादः । किंच स त्वं विश्वासां स्पृधां सर्वासां स्पर्धिनीनां सेनानां सहोदाः सामर्थ्याय ब
लस्य दाता भव । विद्यामेतिगतं ॥ ॥ इति द्वितीयस्य चतुर्थे सप्तदशो वर्गः ॥ ॥ मत्स्यपायीति षडृचमेकादशं

इष्टयइंद्रमिंदो वृषा विश॥ ऋघायमाण इन्वसि शत्रुमंति न विंदसीति॥ ॥हे इंद्रो क्लेदयितः सोम त्वं नो वस्य इष्टये वसीयसो धन-
स्य प्राप्त्यै उक्तलक्षणाय यागाय वा इंद्रं मादयस्व। तदर्थं त्वमेवेंद्रं वृषा त्वं विश। अथ तथा पातः सन् ऋघायमाणः शत्रून् हिंस-
न्त्वमिन्वसि व्याप्नोषि अतः अंतिके शत्रुं न विंदसि न लभसे यतः त्वत्सामर्थ्येन पालयितः अतः न विंदसि यद्वा उत्तरार्धः इंद्रपरतया व्या-
ख्येयः। हे इंद्र त्वं तं सोमं पीत्वा ऋघायमाणः सन् इन्वसि त्वं अंतिके शत्रुं न विंदसि॥ ॥अथ द्वितीया॥ तस्मिन्ना वेशया गिरो य ए-
कश्चर्षणीनां॥ अनु स्वधा यमुप्यते यवं न चर्कृषद्वृषेति॥ ॥हे अंतरात्मन् होतर्वा तस्मिन्नस्मिन्ने इंद्रे गिरः स्तुतिरूपा वाचः आवे-
शय स्थापय युक्तं स्तुहीत्यर्थः। य इंद्रश्चर्षणीनां ज्ञानवंतां मनुष्याणां एक एव स्थानीयः यमनु यमेवेंद्रं स्वधा हविर्लक्षणान्नमुप्यते
दीयत इत्यर्थः। से नेंद्रो वृषा वर्षकः सन् यवं नवमिव पक्वं यवं यथा चर्कृषत् क्रमेण ददते कर्षकात् तद्वद्दाद्दत्ते। यद्वा अनु स्वधा अ-
न्नसाधनं व्रीह्यादिकं उप्यते। भूमौ यस्येंद्रस्य वृष्टिरूपस्य तमनुग्रहमपेक्ष्योप्यत इत्यर्थः। स च वृष्टेर्वर्षिता स इंद्रो यवं नवमि-
व सर्वबीजमपि चर्कृषत् पुनः करोति॥ ॥अथ तृतीया॥ यस्य विश्वानि हस्तयोः पंच क्षितीनां वसु॥ स्पाशयस्व यो अस्म-

राम

॥२५१॥

ध्रुग्दिव्येवाशनिर्जहीति॥ ॥यस्येंद्रस्य हस्तयोः पंच क्षितीनां क्षियंति निवसंति गच्छंतीति वा क्षितयो मनुष्याः पंचानां मनुष्याणां
प्राणं चित् विविश्वानि सर्वाणि वसूनि निधृतानि भवंति। देवा मनुष्याः पितरः पशवः पक्षिणश्चेति पंच जनाः चत्वारो वर्णा निषाद-
पंचमाः पंच जना इत्यन्ये। स तादृशेंद्र त्वं स्पाशय स्वबाधयस्व। यो अस्मध्रुक् अस्मभ्यं द्रुह्यति तं। केन प्रकारेणेति स उच्यते। दि-
व्या दिविभवा अशनिरिव अशनिर्हत्वा अस्मद्द्रुहं त्वं जहि॥ ॥अथ चतुर्थी॥ ॥असुन्वंतं समं जहि दूणाशं यो न ते मयः॥ अ-
स्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते॥ ॥हे इंद्र असुन्वंतं सोमाभिषवमकुर्वाणं त्वाम यजंतमित्यर्थः दूणाशं दुःखेन नाश-
नीयं समं अयं सर्वानुदात्तः सर्वशब्दपर्यायः यष्टॄन् सर्वान्। यद्वा समः एको घ्यागेन अविशेषेण वा जहि तेन किमपराधमित्य-
त आह॥ यस्ते तव मयः मयति सुखं नाम तव सुखहेतुर्न भवति। यो वा मनः स्तुसान प्रीणाति तं जहि। किंचास्य वेदनं धनं म-
स्मभ्यं दद्धि देहि ददद्दान इत्यस्माद्व्यसेपेन परस्मैपदं। छांदसः शपो लुक् सूरिश्चिद्दोहते चिद्देवार्थः स्तुरितवस्तो वे वज्रोहवे वृह-
ति प्राप्नोति धनं॥ ॥अथ पंचमी॥ आवो यस्य द्विबर्हसो र्केषु सानुषगसत्॥ आजाविंद्रस्येंदो प्रावो वाजेषु वाजिनमिति॥ ॥हे

इंद्रो इंद्र सोम तव यद्धि बर्हसः स्तोत्रहविरूपद्विविधपरिहृढकर्मवतो यजमानस्य अर्केषु मंत्रेषु सानुषक् सानुषंगः स्नातयस
हायवत् सहभावः तं यजमानं रक्षसि। तर्पयसि वा समे यज्ञाकर्मणि षष्ठीयं द्वयोः स्थानयोः परिदृढमिदं। हे इंद्र यदा अर्केषु सा
नुषक् असत्त्वमवः तदा आवः अरक्षः अतर्पयो वा तस्यैवेंद्रस्य आजौ संग्रामे हे सोम वाजिनं तथा त्वं वंतं तमिंद्रं वाजेषु बलेषु त्वं
सुवानि मित्रत्वं तेषु प्रावः प्रकर्षेण रक्षः पानसमये तर्पयिता संग्रामसमये बलवर्धनेन यज्ञ प्रासरा त्रुधनतर्पणेन वा अ
रक्षेत्यर्थः॥ ॥यथा पूर्वेभ्य इति षष्ठी व्याख्याता॥ ॥इति द्वितीयस्य चतुर्थे एकोनविंशो वर्गः॥ ॥आ चर्षणिप्रा इति पंचर्चं त्रयोद
शं सूक्तमागस्त्यं ऐंद्रं त्रैष्टुभं। आ चर्षणिप्राः पंचेत्यनुक्रमणिका। षोत्र करास्त्वेषु स्तोमद्दृष्ट्या वक्ष्य विशेषविनियोगः ऐंद्राणि
त्रैष्टुभान्यमरुद्धान्यावपेरन्निति॥ ॥सूत्रितत्वात्॥ ॥तत्र प्रथमा॥ आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इंद्रः॥
स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाङिति॥ ॥अयमिंद्रः चर्षणिप्राः चर्षणयो मनुष्यास्तेषां धनादिना
प्रीणयिता जनानां सर्वेषां वृषभः। कामानां वर्षयिता तथा कृष्टीनां मनुष्याणामेतत्। मनुष्याणां राजा स्वामी पुरुहूतः बहुभि

वृत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातम इति॥ ॥हे इंद्र तव ते मदः सोमपानजनितः शुष्मिंतमः बलवत्तमः उत अपि च ते क्रतुः कर्मव्या
पारो ऽस्मदर्थो द्युम्निंतमः अतिशयेन वा निमग्नो वा त्वा उभयत्रापस्मायादीनि छंदसीति भसंज्ञाया बाधितत्वात् न लोपः। हे इंद्र अ
श्वसातमः अश्वोपलक्षितबहुधनदाः त्वं वृत्रघ्ना वृत्रघाति नो वरिवोविदा धनस्य परिचरपास्य वा वेदितारौ तव मदक्रतू मंसी
ष्ठाः अनुज्ञातवानसि। शत्रुघातिनौ धनदातारौ च स्यातामित्यनुग्रहमकरोदित्यर्थः॥ ॥अथ षष्ठी॥ यथा पूर्वेभ्यो जरितृभ्य इंद्र म
य इवापो न तृष्यते बभूथ॥ तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुमिति॥ ॥हे इंद्र पूर्वेभ्यो जरितृभ्यः पुरातनेभ्यो ज
रितृभ्यः स्तोतृभ्यो मय इव बभूथ मयः सुखं सुखस्वरूपमिव भवः तद्वत् स्तोतृभ्यो ऽस्मभ्यं सुखो भव। तत्र दृष्टांतः। तृष्यते आपो न
तृषार्त्तस्य उदकानि यथा सुखकराणीति तद्वत् तस्मात् त्वा निविदं त्वत्कीर्तिकरीं प्रसिद्धां स्तुतिं त्वा तुभ्यं अनु जोहवीमि पुनः पुरा
ह्वयामि। विद्यामेति व्याख्यातं॥ ॥इति द्वितीयस्य चतुर्थे अष्टादशो वर्गः॥ ॥मस्तिन इति षळर्चं द्वादशं सूक्तमागस्त्यमैंद्रमानु
ष्टुभं पूर्वत्रानुशाष्टः त्रिष्टुबंतं लिंग कृत्वात् अंत्या त्रिष्टुप् मस्तिन इत्यनुक्रांतं। विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ मस्तिनो वस्य

रा कुतइंद्रइंद्रोस्मानायात्वा आगच्छतु। उत्तरार्धः। परोक्षवादः। हेइंद्र स्तुतोस्माभिः अवस्यन् हविर्लक्षणान्नमिच्छन् अवसा अस्मद्र
क्षणेन वायुक्तः सन् त्वं मद्रिक्कमदभिमुखमागच्छन् वृषणा वर्षकौ युवानौ हरी अश्वौ युक्त्वा रथे योजयित्वा अर्वाङ् अस्मदभिमुखमा
याहि। आगच्छ वयं च हेइंद्र सोमे सति त्वा त्वां हवामहे ह्वयामः॥ ॥अथ द्वितीया॥ येते वृषणो वृषभास इंद्र ब्रह्मयुजो वृषरथासो अत्याः॥
तां आतिष्ठ तेभिरायाह्यर्वाङ् हवामहे त्वा सुत इंद्र सोम इति॥ ॥ — अत्र द्वितीयायाः ऋग्भाष्यं नास्ति॥

अथ तृतीया॥ आतिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि॥ युक्त्वा वृषभ्यां वृषभ क्षितीनां हरिभ्यां याहि प्रवतोप मद्रिग्
ति॥ ॥हेइंद्र त्वं रथमातिष्ठ आश्रय यज्ञगमनार्थं। कीदृशं रथं वृषणं वर्षकं कामानां किमर्थमागमनमिति मीतिचेत्। तेत्वदर्थं

वृषा वर्षकः सोमः सुतोभिषुतः तथा मधुनि मधुराणि घृतक्षीरादीनि परिषिक्ता परितः सिक्तानि संपादितानि यद्वा मधूनि
मधुराः सोमरसाः चमसेषु ईरिताः। आगमनप्रकार उच्यते। हे वृषभ वर्षिकं द्वृषभ्यां वर्षकाभ्यां हरिभ्यां युक्ता रथं योजयित्वा
क्षितीनां कर्मसु निवसतां यजमानानामस्माकं अनुग्रहाय क्षितीनां वृषभेति वा योज्यं। प्रवता वेगवता रथेन मद्रिक् मदभिमु
खमस्मदभिमुख्येय याहि॥ ॥अयं यज्ञ इत्येषा चतुर्थी॥ अयं यज्ञो देवया अयं मियेध इमा ब्रह्माण्ययमिंद्र सोमः॥ स्तीर्णं बर्हि
रा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह॥ ॥अहर्गणेषु मध्ये बहस्सु हारियोजनग्रहस्य याज्या॥ अग्निष्टोमो यग्नि
ष्टोम इति खंडे स्तक्तिं। अयं यज्ञो देवया अयं मियेधः पशुः॥ पशुर्वै मेध इति हि श्रुतेः। इमा इमानि ब्रह्माणि मंत्राः अयं सुतः सोम
स्तीर्णं बर्हिः असना या अस्तृतादर्भा एते पादार्धास्त्वदुचिता एवं संपादिता। हे शक्र शक्तेंद्र तु पुनः किमित्युक्ते। आप्रयाहि प्रक
र्षेण शीघ्रमागच्छ आगत्य च निषद्य बर्हिष्षु पविश्य पिब सोमं तदर्थमिहास्मिन्देवयजने हरी अश्वौ विमुच वियोजय छांदसो
नुमभावः॥ ॥अयं पंचमी॥ ओ सुष्टुत इंद्र याह्यर्वाङुप ब्रह्माणि मान्यस्य कारोः॥ विद्याम वस्तोरवसा गृणंतो विद्यामेषं वृ

अयं राजा यजमान ईश्वरो वा इंद्रः नोस्मदीयानि कर्माणि नादभत् सर्वतो न हिंस्यात् कानीत्युच्यते। यायानि कर्माणि दृष्ट्यादिरू
पाणि स्वसारा परस्परं स्वसृभूते स्वयं सरणभूते अहोरात्रे नुपूर्वपाः। योनौ स्वकीयस्थाने कृण्वंत द्विवचनस्थाने बहुवचनं कुरु
तः। कृविर्हिंसाकरणयोः। षिश्चित्तनिपूर्वयोरेव स प्रत्ययः। बहुलग्रहणच्छया। तानींद्रोप्यनुजानात्वित्यर्थः। स्वसृभूता वध्र्युर्यज
मानो वा कुरुतः। यद्वा स्वसारांगुलयो नौयो फलोसादनस्थाने यज्ञे यानि कृतवंत स्तानीतियोज्यं। किंच। अस्मा इंद्राय सुतुकाः शोभ
नबलहेतुत्वापः अपूर्का यानि हवींषि अवे षनव्यामुवंति। नोस्मभ्यमिंद्रः सख्यासख्यानि वयश्च भूतमन्नं च गमन् गमयतु॥
अथ तृतीया॥ जेता नृभिरिंद्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः॥ प्रभर्ता रथं दाशुष उपाकं उद्यंता गिरो यदि च त्मना भूदि
ति॥ ॥अयमिंद्रः शूरो विक्रांतः सन् नृभिः संग्रामे नेतृभिर्मरुद्भिः सहितः सन् पृत्सु संग्रामेषु जेता जयशीलो शत्रूणां तथा ना
धमानस्य त्वदनुग्रहं याचमानस्य कारोः स्तोतुः हवमाह्वानं श्रोता भवति। किंच यदि च यदा च त्मना आत्मना अध्यप्रेरितः
एवं गिरः स्तुतिरूपाणि वचांसि स्तोतृत्वा उद्यंता उद्धंयिता भूते भवेत्तदा दाशुषो हविर्दत्तवतो यजमानस्य उपाके समीप

नामेतत् समीप एव यागदेशे रथं प्रभर्ता सम्यक् प्रभर्ता भवति। जेते स्वादिषु च प्रंतेषु न लोकाव्यये सादिना कर्मणि षष्ठी। प्रतिषे
धः यदा स्तुत्वं श्रोतुमिछति। तदा स्वयमेव शीघ्रं रथं धाके यजमाने र्दत्तं पृक्षो र्हविर्लक्षणमन्नं सुश्रवस्या शोभनान्नेछया अ
त्ति छुर्यप्रखादः प्रकर्षेण खादिता एवमेवं यथैव मित्रः सहायवशातो पि यजमानशत्रून् नन्ति भूत अभिभवति॥ ॥अथ चतुर्थी॥
एवा नृभिरिंद्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत्॥ समर्य इषः स्तवते विवाचि सत्राकरो यजमानस्य शंसइति॥ ॥एवा
नृभिर्ह्वषितेन नृभिर्मरुद्भिः सहितोयमिंद्रः सुश्रवस्या प्रखादः सन्नेतमेव मित्रेणाचतिशूप मित्रवतो यजमानस्यार्थे तदभिभ
ताय भवतीत्यर्थः। अथ तथा भूतः सन् विवाचि परस्परहनने ध्वनियुक्ते समर्ये मर्त्यै यज्ञे युक्ते वा तन्निमित्तं यजमानस्य शंसः शं
सकः सन् सत्राकरः फलानां अन्यकार्येयमिंद्रो इषो हविर्लक्षणमन्नं स्तवते स्तौति॥ ॥अथ पंचमी॥ त्वया वयं मघवन्निंद्र शत्रू
नभिष्याम महतो मन्यमानान्॥ त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुमिति॥ ॥हे मघवन् धनवन्निंद्र त्वया स
हायेन वयं यजमानाः महतो मन्यमानान् अति बलान वध्यान् मन्यमानान् शत्रून् अभिष्याम सहायेन अभिभवितारो भवेम॥

हे इंद्र त्वं त्राता त्वमेवास्माकं रक्षकः अतस्त्वमु त्वमेव नोस्माकं वृधे धनादिवर्धनाय स्म भव विद्यामेत्यादि गतं॥ ॥इति द्वितीयस्य चतुर्थे
एकविंशो वर्गः॥ ॥पूर्वीरहमिति षळृचं पंचदशं सूक्तं त्रैष्टुभं मुपांत्या बृहती अत्र त्रयाणामृचां लोपामुद्रागस्त्य तच्छिष्या दृष्टत्वा
त्त्रय ऋषयः सूक्तप्रतिपाद्यो र्थो रतिर्देवता अत्रानुक्रमणिका। पूर्वीः षळ्जाया पत्योः लोपमुद्रयागस्त्यस्य द्वाभ्यां रत्यर्थं संवा
दं श्रुत्वांतेवासी ब्रह्मचार्यंते द्वे हसादी अपश्यदिति विशेषविनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ लोपामुद्रा आह॥ पूर्वीरहं शर
दः शश्रमाणा दोषा वस्तोरुषसो जरयंतीः॥ मिनाति श्रियं जरिमा तनूनामप्यूनु पत्नीर्वृषणो जगम्युरिति॥ ॥अहमगस्त्य
अहं लोपामुद्रा पूर्वीः शरदः पुरातनानसंख्यातान् दोषा रात्रीः वस्तोरहानि तथा देहं जरयंतीरुषसः कालांश्च सर्वत्रायं
तसंयोगे द्वितीया अद्यतनकालपर्यंत बहुसंवत्सरं कार्त्स्न्येन त्वच्छुश्रूषया शश्रमाणा श्रांता भूवं इदानीं तु जरिमा जरा त
नूनामंगानां श्रियं सौंदर्यं मिनाति हिनस्ति एवमेपि नानुक्तासीत्यर्थः। अप्यूनु अपिः संभावनायां उ इत्येवधारणे नु इ
ति वितर्के इदानीमपि किं संभावनीयं लोके हि पत्नीः स्त्रियः वृषणः सेक्तारः पुरुषाः जगम्युः गच्छेयुः संप्रयोगं कुर्युः। अतो

जनं जीरदानुमिति॥ ॥हे सुष्टुतः अस्माभिः सम्यक् स्तुतः सन् अर्वाङ् अस्मदभिमुख आयाहि। आगच्छ मा विलंबय। किमुद्दिश्य
मान्यस्य माननीयस्य कारोः स्तोतुः कर्तुः यजमानस्य वा ब्रह्माणि मंत्रान् उपलक्ष्य गायंतः स्तुवंतः अभिमतशब्दयंतो वा। अयं
अवसा त्वद्रक्षणेन रक्षिताः संतो वस्तोः वस्तुं सुखेन संस्थातुं अहनि वा सर्वेष्वहस्सु अन्नादिकं विद्याम लभेमहि। विद्यामेत्यादि
व्याख्यातं॥ ॥इति द्वितीयस्य चतुर्थे विंशो वर्गः॥ ॥यद्ध स्येति पंचर्चं चतुर्दशं सूक्तमागस्त्यमैंद्रं त्रैष्टुभं। यद्ध स्येत्यनुक्रमणिका।
विशेषविनियोगः पूर्ववत्॥ तत्र प्रथमा॥ यद्ध स्या त इंद्र श्रुष्टिरस्ति यया बभूथ जरितृभ्य ऊती॥ मा नः कामं महयंतमा धग्वि
श्वा ते अश्यां पर्याप आयोरिति॥ ॥हे इंद्र यत् यद्य स्या सा प्रसिद्धा श्रुष्टिः सर्वत्र श्रूयमाण समृद्धिस्ते तव अस्ति। यया जरितृभ्यः
स्तोतृभ्यः ऊतीरन्ये रक्षय बभूथ समर्थो भवसि। नोस्माकं महयंतं अस्मान्महतः कुर्वाणं कामं अभीष्टं माधक् मा धाक्षीः तेत
व संबंधीनि विश्वा सर्वाणि भोगजातानि आपः आप्तः अतयः आयोर्मनुष्यस्योचिताः पर्यश्यां परितो व्याप्नुयां॥ ॥अथ द्विती
या॥ ॥न घा राजेंद्र आ दभन्नो या नु स्वसारा कृणवंत योनौ॥ आपश्चिदस्मै सुतुका अवेषन्गमन्न इंद्रः सख्या वयश्चेति॥ ॥

मां किमिय वमन्यसे। इदानीमपि संभावयेत्यर्थः॥ ॥अथ द्वितीया॥ सात मेकाह॥ ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिर
वदन्नृतानि। ।ते चिदवासुर्नह्यंतमापुः समू नु पत्नीर्वृषभिर्जगम्युरिति॥ ॥अगस्त्यये चिद्धि ये पितुपूर्वे पुरातना ऋतसापः
सत्यस्यापयितारः व्याप्नुवाना महर्षयः आसन् ते हि रभिः दैवैः साकं सह ऋतानि सत्यवाक्यान्यवदन्नवदंति। ये महत्तपोयु
क्तं वा अनुतिष्ठंति। एवं वेदवाक्यानि वेदस्मृतिरूपाणि वदंति ते चिन्नु चिदप्यर्थे ते पि अवासुः अवाक्षिपंति स्वं तिरूपस्य रेतोवि
मोचने वर्त्तंते तेन ह्यंतमापुः न हि ब्रह्मचर्यादेरंतं प्राप्नुवन् ब्रह्मचर्यमनिषिद्धऋतुकालावगमनमपि कुर्वंतीत्यर्थः। तथा पत्नीः पत्न्यः
तपस्यमानाः वृषभिर्भोगवर्षकैः पतिभिः सह सम् नु जगम्युः उन्विति पूरणौ। संगछेरन्। अतस्त्वं कथं मां नानुभवसीत्यर्थः॥ ॥
अथ तृतीया॥ ॥अगस्त्य स्तामाह॥ ॥न मृषा श्रांतं यदवंति देवा विश्वा इत्स्पृधो अभ्यश्नवाव॥ जयावेदत्र शतनीथमाजिं यत्सम्यं
चा मिथुनावभ्यजावेति॥ ॥भो पत्नि त्वया मायान्मृषा श्रांतं व्यर्थं नैव खिन्नमावाभ्यां यत् यस्मात्ताद्देवाअंतरिक्षं नितपोभिः प्रीता
देवा अभिप्रेत मायुरादिकं वितरंति अतो वयं विश्वा इत्सर्वा अपि स्पृधः स्पर्धमानाः सेनाः पापाः अभ्यश्नवाव अभितो व्याप्नुवा

वअद्यतनीयंअपरमितभोगप्राप्तिसाधनमार्जिंप्राप्तिंपरस्परंजयाव।जयलक्षणंसुरतसंग्रामंवाजयान्वयतयस्मात्संम्यं
चासम्यकुपरस्परंगच्छंतौहूजयंतौचामिथुनामिथुनौस्त्रीपुरुषरूपौसतौअभ्यजावलंचाहमपिपरस्परमभिजयावेसेवंतयोक्तं
संभोगंसंभावयामास॥ ॥अथचतुर्थ्यायगस्त्यआह॥ ॥नदस्यमारुधतःकामआगन्नितआजातोअमुतःकुतश्चित्॥ लोपामु
द्रावृषणंनिरिणातिधीरमधीराधयतिविश्वसंतमिति॥ ॥हेजायेनदस्यनदभजयद्वाढयितुंजपाध्ययनकर्त्तुःरुधतोरेतो।
निरोधकंब्रह्मचर्यमास्थितस्यउभेकर्मणिषड्भ्यौउक्तलक्षणांमांकामआगमन्आगमन्।नदस्यमारुधतः।कामआगमदितिनि
रुक्तं।कस्यहेतोरितिउच्यते।इतःतत्संगमनिमित्तात्।तथाअमुतोवसंतादिकालात्कुतश्चित्कारणादतःसर्वउत्पन्नः।यद्वाइत
एतल्लोकजनितादमुतोलोकांतरजनिताद्वाकुतश्चिन्निमित्तात्संरतिकामात्कथमितिउच्यते।इयंलोपामुद्रावृषणंरेतसःप्रव
र्षकंमानीरिणातिनितरांगच्छतुकिंवुधीरंधीमंतंनियमादविचालितंविह्वलसंतंमहाप्राणंमहापापंअधीराक्रांतरैषायोषित्
धयति।उपभुक्तो॥ ॥अथानयोर्दंपत्योःसंभोगंसंतोषंश्रुत्वातंप्रायश्चित्तंचिकीर्षुरुत्तराभ्यामाह॥अनयोर्विनियोगःशौनं

स्योत्पादनसाधनैर्यज्ञस्तोत्रादिभिः स्वनमानः फलमभिमतमुत्पादयन् प्रकर्षेण पुनःपुनर्जायमानमपत्यं कुलस्यायतनं साधनं
पुत्रादिकं बलं चेछमानः सन् यद्वा प्रजां प्रस्यादिरूपां चेछन् ऋषिरतींद्रियद्रष्टा महानुभावउग्रः उद्गूर्णः संसारे संचरन्नप्यपापः स
न् शुभोवर्णोवर्षनीयावाकारोऽगस्त्यो पुपोष। सत्या आशिषोदेवेषु देवेभ्योजगामप्राप्तवानित्यर्थः योऽयं महानुभावः तस्माद्दस्मा
न्यापातीत्यर्थः॥ ॥इतिद्वितीयस्य चतुर्थे द्वाविंशो वर्गः॥ ॥इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
प्रथमे मंडले त्रयोविंशोनुवाकः॥ ॥अथ चतुर्विंशोनुवाके द्वादशसूक्तानि॥ तत्र युवोरजांसीति दशर्चं प्रथमं सूक्तं आगस्त्यं त्रैष्टुभं
तुह्यादि परिभाषया दमादि सूक्ते पंचकमाश्विनं। युवोर्दशाश्विनं वाइत्यनुक्रमणिका। एवमाद्यादीनित्ततीयवर्जितानि पंचसूक्तानि प्रा
तरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छंदसि विनियुक्तानि। अथाश्विनमिति खंडे सूत्रितं। युवोरजांसीति पंचानां तृतीयमुद्धरेदिति॥ ॥
तत्र प्रथमा॥ ॥युवोरजांसि सुयमासोअश्वारथोयद्वांपर्यर्णांसि दीयत्॥ हिरण्ययावां पवयःप्रुषायन्मध्वःपिबंताउषसः सचेथे इति॥ ॥ श्रीः ॥२६१॥
हेअश्विनौयुवोः युवयोरश्वाः रथोवोढारा रजांसि रंजकान्सुयमासः शोभननियमानालोकत्रयसंधारिणइत्यर्थः। कदेत्याह यत्

वा।
यद्वां वां रथः अर्णांसि अरण्ययावभिमतदेशात्। परिदीयत् परिगछेत् परितोगछति दित्यर्थः। दीयतिर्गतिकर्मा दीयतिटक
तीति तत्कर्मसु पाठात्। किंच त्वदागमनेकासे वां युवयोः पवयः वज्राः रथोनमायावाहिरण्ययाहिरण्मयान्युधांति अभिमतं
यद्वाहिरण्मयानि पवयोमधुनापात्राणि वा युवाभ्यामर्थयियस्मादेवं तस्मात् युवामधोमधुनोमधुरस्यसोमरसस्य
कर्मणिषष्ठी। सोमरसं पिबंतावास्वघंतौ उषसः उषःसंबंधिनि कालेसचेथे यज्ञं संगछेथे। अत्र मोनविवक्षितः उषःकाले एवा
गत्य मधुरं सोमरसं पिबत इत्यर्थः॥ ॥अथ द्वितीया॥ युवमत्यस्यावनक्षथोयद्विपत्मनोनर्यस्य प्रयज्योः॥ स्वसायद्वांविश्वगूर्ती भ
रातिवाजायेट्टे मधुपाविषे चेति॥ ॥हेअश्विनौ युवं युवां यत् अन्यस्यातनशीलस्य सततसंचारिणो विपत्मनो विविधगमनस्य
वानर्यस्य मनुष्याणां हितस्य प्रयज्योः प्रकर्षेण पूज्यस्य एतानि कर्माणि षष्ठ्यंतानि। उक्तरूपं स्वछ अव अवस्तात् तदुदयात्पूर्वं निक्ष
थोव्याप्नुथो देवयजनं गंतुं। किंच यत्तया विश्वगूर्तीः सर्वस्तुत्योसर्वदोद्गूर्णो धावां युवयोः स्वसा स्वसृस्थानीया स्वयं सारिणीवोषाः
भरातिपोषयते। त्वदागमनाय प्रभातं करोति। यदा मधुपौमधुरस्य सोमस्य पातारौ युवां यजमानो वाजाय बलाय गमनाय

वाइषेप्रभृतायाचायई द्रुस्तौति। तदारथं वा प्रयइत्यर्थः॥ ॥अथतृतीया॥ युवंपयउस्त्रियायामधत्तंपक्वमामायामवपूर्व्यंगोः॥ अं
तर्यद्वनिनोवामृतप्सूह्वारोनशुचिर्यजतेहविष्मानिति॥ ॥हेअश्विनौयुवंयुवांउस्त्रियायांगोनामैतत्। भोगोस्वादिपयांगविप
योअधत्तंअधारयतंस्थापितवंतौ। तथाआमायांअपक्वायांपरिपक्वंभोग्यंयोग्यंगोसंबंधिदुग्धंपूर्व्यंपूर्वभवंतंतथैवोस्त्रियंअ
वअवस्तादधारयतंस्थापितवंतौ। गविक्षीरमुत्पाद्यपुनर्भोगायदुग्धकृतवंतावित्यर्थः। यत् यस्मात् हेऋतप्सू ऋतस्वरूपौय
ज्ञियहविषातद्वान् शुचिः शुद्धोयजमानोयजतेपूजयति। युवांतस्मादेवमकुरुतां। यद्वायदेवंयजमानःकरोतितदेवेत्यर्थः। तत्र
दृष्टांतः। वनिनोवनसंबंधिवृक्षस्यांतर्मध्येह्वारोनचोरइवसयथाजागरूकोवर्त्तते। तथायंयजमानोपीत्यर्थः॥ ॥अथचतुर्थी॥ यु
वंहघर्मंमधुमंतमत्रयेपोनक्षोदोवृणीतमेषे॥ तद्वांनरावश्विनापश्वइष्टीरथ्येवचक्राप्रतियंतिमध्वइति॥ ॥अत्रेतिहासमाहुः॥ ॥
प्रवर्ग्येपात्रवरंतमत्रिंराक्षसास्तस्मिन्घर्मेपातयत्तप्यमानोश्विनौतुष्टावतौस्तुतावाइमंमनसाचरक्षतामिति। अपरेत्वत्रेःक्षिप्त
मपालयतमित्याहुरिति। हेअश्विनौयुवंयुवामधुमंतंपयोघृतरूपाभ्यांमधुभ्यांतद्वंतंघर्मंदीप्तंप्रवर्ग्यएषोसौख्यमिछतेत्रये

केनोक्तः॥ इमंनुसोममभिसेतेहृदृचौप्रयतोजपन्॥ सर्वान्कामानवाप्नोतिपापेभ्यःप्रमुच्यतइति॥ तयोर्मध्येप्रथमासूक्तेपंचमी॥ ॥इमं=
नुसोममंतितोहृत्सुपीतमुपब्रुवे॥ यत्सीमागश्चकृमातत्सुमृळतुपुलुकामोहिमर्त्यइति॥ ॥उपेसमनसाप्राप्यप्रार्थयेकिंब्रवीतिउच्यते।
यदागः गुर्वोःकामप्रलापश्रवणविषयंपापंचकृमकृतवंतोवयंततस्मादागसःससोमःसुसम्यक्सुखयतुपापजनितदुःखं
माकरोत्वित्यर्थः। महसापमननुमृज्यमानंप्रार्थनयाकथंसुप्यतइत्यतआह॥ हियस्मात्मर्त्योमनुष्यःपुलुकामाबहुकामनावान्
अल्पेनैवकर्मणाबहुकामनाकल्पयतियस्मादेवंतस्मात्परिहरेदित्यर्थः। यद्वापापमवर्जनीयतयाप्यतएवेत्याह॥ पुरुकामोहि=
खलुमर्त्यःकामहतःसन्कनमिननिरुद्धएववर्त्तते। अतस्तयोरुत्सेकोयुक्तः। तछद्व्रवपादोषोपिप्रमादिकोस्माकंप्रासाल्पेनसो
मेनपरिहर्त्तव्यइत्यर्थः। यद्वायंमंत्रः। चंद्रपरोव्याख्येयः। मनसोभिमानित्वाद्वतस्यपापस्यापिमनस्येवासंभवत्वात्अन्यस्मिन्पक्षे
अहस्सुपीतंहृदयस्थितमित्यर्थः। शिष्टंस्पष्टं॥ ॥अथविनियुक्तयोर्मध्येद्वितीयसूक्तेषष्ठ्यांतेवास्याह॥ ॥अगस्त्यःखनमानः
खनित्रैःप्रजामपत्यंबलमिछमानः॥ उभौवर्णावृषिरुग्रःपुपोषसत्यादेवेष्वाशिषोजगामेति॥ ॥अयमगस्त्योमहर्षिःखनित्रैःफल

एतन्नाम्ने महर्षये सोदः क्षोदांसि क्षोदमानानि अपो न उदकानीव अवृणीतं अवारयतं। उत्सं शैत्यं लक्ष्यते। अपः क्षोदो न अपः इति
षष्ठ्यर्थे द्वितीया। उदकानां शैत्यं यथा भवति तद्वत्पक्षांतरे तु घर्मं दीप्तमग्निं अमुं तं कृत्वा वृणीतं। सुखेयतामित्यर्थः। तथा च मंत्रांतरं।
तं संघर्ममोम्यावंतं मन्नये इति। तस्मात् यस्मादतस्तस्मात्। हे नरौ वा अश्विना अश्विनौ वां युवाभ्यां पज्र इष्टिः। अग्नेयागः सर्वो यु
ष्मदर्थं प्रवर्त्तत इत्यर्थः। यद्वा पज्रुसाध्यो यागो युवाभ्यां प्रवर्त्तत इति शेषः। अश्विनं धूम्रललाममालभेत। या दूर्वाः ब्रह्मणः सोमं पिपा
से दिष्ठ अश्विभ्यां पज्रु विहितः तथा मधो मधुसदृशाः सोमरसाः अपि युवाभ्यां प्रतियंति अभिगछंति तद्वत्॥ ॥अथ पंचमी॥ आ वां दाना
य ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः॥ अपः क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रेति॥ ॥हे दस्रा शत्रूणामुपक्षयि
तारौ अश्विनौ वां युवां दानाय अस्मादभिमताय युवाभ्यां हनयितुं आ ववृतीय आवर्तयामि यागादश्वावृत्तेरंतर्भावितण्यर्थस्येदं के
न साधनेनेति। तदुच्यते। गोस्तुतिरूपाया वाक् ओहेन वहनेन साधनेन यद्वा आवर्त्तन काल उच्यते। गोर्गे आ उषसो वहनेनाजि
व्रिः जीर्णो जयन्नीलो वा तौग्र्यो न तुग्राख्यस्य राज्ञः पुत्रो भुज्युः रिवसय या शत्रुभिः संताड्य समुद्रे पातितो युवां परितोषयस्तोत्रद्वारा

न्यममीयमानयत् तद्वा चकमाश्चर्यमहमावर्तयामिति किंतु अपः। क्षोणी अप इत्यंतरिक्षनाम क्षोणीति पृथिवीनाम द्यावापृथि
व्यावपि वां युवयोर्महिना माहात्म्येन युवयोः प्रसादेन सर्वोपकारिण्याविति ख्याति सर्वप्रदेशा वा चलं वा सचते सेवते प्रसेकं। यद्वा
वां महिनायं यजमानो द्यावापृथिव्यौ सचते। किंचाह यजत्राय पृथिव्यौ प्रसादादयम्मृषिः जूर्णः जरया जीर्णांगः स रंहसः पापा
त् जरालक्षणात् प्रमुच्य अक्षः चिरकालव्यासो दीर्घजीवी भूयात्। यद्वा हे यजत्रावां प्रसादात् जूर्ण जीर्णो यजमानः अंहसो
दुरितस्य हंत्रीरपः उक्तलक्षणानि सोमरसरूपाण्युदकानि क्षोणी क्षोण्यां ससम्यर्थं गृहीताश्चर्म्यां चिरकालं अक्षः व्यासः सन्
महिमानो माहात्म्येन सचते द्वितीयो वामित्ययमादरार्थः॥ ॥इति द्वितीयस्य चतुर्थे त्रयोविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥ नियद्युवेथे
नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिं॥ प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजमिति॥ ॥हे सुदानू शोभनदाना
वश्विनौ यत् यदा नियुतो श्वान्। नियुवेथे नियुंजाथे नियोजयथः ताभिरस्मद्यज्ञगमनाय संयुक्तो भवथः। तदा स्वधाभिरन्नैः
सत्कारणे रुदकैर्वा पुरंधिं बहूनां धात्रीं पृथिवीं उपसृजथः उपसृष्टां कुरुथः। एवं च सति सूरिः स्तोतायं यजमानो वातेन वायु

हे अश्विनौ युवां चिद्धि श्वितिश्रयः पूरणाः अनुद्यून् प्रतिदिनं रुद्रस्य विशिष्टोपदुःखद्राविणस्य विविधरूपमाणाद्रवणवतो वा प्रस्त्रवया
स्य हस्कृदके संस्थावस्य सतो लाभे निमित्तभूते सति अगस्त्य एवा तन्नामा महर्षेः नरां नेतॄणां कर्मनिर्वाहकाणां मनुष्याणां नृषु येषु
ताहशा मनुष्याः संति तेषु प्रशस्तः प्रशस्यतरो यं स हस्कैः अपरिमितैः स्तोत्रैः चितयत् चेतयति। स्तुत्या प्रबोधयति। तत्र दृष्टांतः कार
धुनीव कारशाद्ध्रः तस्य धूनयिता उत्सादयिता शंखादिः स इव मध्ये यद्वै तदगस्त्यविशेषणं कारः शब्दः धूनयिता उत्सादयिता शंखादि
ता होत्रादिः तस्य धूनिः कंपयिता प्रेरकः इवेति संप्रसर्थे अस्त्ययमार्थस्य संप्रसर्थः प्रयोग इतिनिरुक्तं॥ ॥अथ नवमी॥ प्र यद्वहेथे
महिना रथस्य प्र स्यंद्रा याथो मनुषो न होता॥ धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्यामेति॥ ॥हे अश्विनौ युवां रथस्य ग
मनसाधनस्य महिता महत्वेन यत् यस्मात् प्रवहेथे धारयथो यज्ञवद्धा रथस्य स्वर्गे गमनसाधनस्य यागस्य धुरं वहथः चेत्। तत्र श्रीः
दृष्टांतः मनुषो होता न मनुष्यस्य यजमानस्य होता यथा यज्ञप्रारंभ आगच्छति कर्मण्यपवृत्ते पुनर्निर्गच्छति तद्वत्। आगमनस ॥२६४॥
मये सूरिभ्यः धत्तं धारयतं फलं। उत चा स्वश्व्यं शोभनाश्वसमूहं नासत्या सत्यस्वभावौ सौ न आसतौ नासत्यौ हि ता दृशौ त्वदनुग्रहा

द्रयिसाचो धनमसवायिनः स्याम भवेम॥ ॥अथ दशमी॥ तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यं॥ अरिष्टनेमिं परि
द्यामियानं विद्यामेषं वृजनं जीरदानुमिति॥ ॥हे अश्विना अश्विनौ वां युवयोः संबंधिनं शीघ्रगमनेन स्तुसं रथं वयं गमस्त्या अद्यास्मि
न्न दिने स्तुसेहनि हुवेम आह्वयेम केन साधनेनेति। उच्यते। होत्रैः स्तोत्रैः किमर्थं सुविताय पत्रयासाय कीदृशं नव्यं स्तुसं नूतनं वा
तथा अरिष्टनेमिं अहिंसितं चक्रवयीयं द्यामियानं द्युलोकस्य परितो गच्छंतं विद्यामेत्यादिगतं॥ ॥इति द्वितीयस्य चतुर्थे चतुर्विंशो
वर्गः॥ ॥कदु प्रेष्ठाविति नवर्चं द्वितीयं सूक्तं आगस्त्यं त्रैष्टुभमाश्विनो कदु नवेत्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः
पूर्वस्मिन्नुक्त एवोक्तः॥ ॥तत्र प्रथमा॥ कदु प्रेष्ठाविषां रयीणामध्वर्यन्ता यदुन्निनीथो अपां॥ अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अ
वितारा जनानामिति॥ ॥हे अश्विनौ प्रेष्ठौ प्रियतमौ वां युवां कदु कदा भविष्यति इषां इष्यमाणानां अन्नानां रयीणां धनानां कर्म
पिषद्धौ तानि धनानि च उन्नेनीयः। ऊर्ध्वं प्रापयथः। अध्वर्यन्ता अध्वरं पारयितुमिच्छंतौ युवां अपां हस्कृदकानां हस्कृदकादीनि
चोन्नीय उत्कृष्टं अधः प्रापयथ इति च ततः कदा कस्मादेवमुच्यत इति। उच्यते। अयं यज्ञोस्माभिः अनुष्ठीयमानो वां युवापुवाप

रेव प्रशास्ति प्रशंसां स्तुतिं मकृतकरोति यज्ञे शंसनीयानि शस्त्राणि युवामेव प्रशंसतीत्यर्थः। यस्मादेवं तस्मात् हे वसुधिती वसुनो
धनस्य धातारौ वस्तकंव्यर्माणौ। हे जनानाम वितारा उक्तलक्षणयो युवां कदा अन्तानां धनानां च दातारौ भवथ इति॥ ॥अथ द्वितीया॥ आ
वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः॥ मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहंत्विति॥ ॥अश्वासो
शोभनाश्वयुक्तौ वां युवां अश्वासः युष्मदीया इहास्मिन्यज्ञे आवहंतु प्रापयंतु अवशिष्टान्यश्वविशेषणानि। कीदृशास्ते शुचयः
शुद्धा दीप्ता वा पयस्पाः वृष्टयुदकस्य पातारः वातरंहसः वायुवेगाः दिव्यासो दिव्याः दिवि भवाः आताम अतनशीलाः मनोजुवः मनो
जवाः वृषणो वर्षका युवान इत्यर्थः। वीतपृष्ठाः कांतपृष्ठाः। वर्ष्मंत इत्यर्थः। स्वराजः स्वयमेव राजमानाः ईदृशा वहंतु॥ ॥अथ तृती
या॥ आ वां रथो वनिर्न प्रवत्वांत्सृप्रवंधुरः सुविताय गम्याः॥ वृष्णः स्थातारा मनसो जवीयानहंपूर्वो यजतो धिष्ण्या य इति॥ ॥
पूर्वमंत्रे अश्वव्याजेनाश्विनोराजानमुक्तं। अनेन रथव्याजेनोच्यते। हे धिष्ण्याउन्नतस्थानार्हौ स्थातारा स्वरथाधिष्ठातारौ वां युवयो
रथो रथोस्ति। स सुविताय शोभनफलाय गम्याः अस्मद्यज्ञमागच्छतु। पुरुषव्यत्ययः। कीदृशो रथ इति स विशिष्यते। अवनि

रिव तद्वत् क्षिप्रं युवां प्रेषत् तर्पयतु वेषत् व्याप्नोतु। कामं कामयतां वा प्रीणातेर्वेतेश्च लेटि रूपं। अनंतरं सुष्वतो न अति प्रशस्त
कल्प्यादि कुर्मे वा निववाजोन्नं महे महते त्वाय अयं यजमान आददे आदत्ते। स्वीकरोति अङ्गो दोनास्य विहरणाइत्यासने पदे लोप
स्तु आसने पदे षितितलोपः। यद्वा छांदसि लिटि रूपं स्वीकृत्य महत्त्वाय युवमेव तर्पयित्वे सर्थः॥ ॥अथ सप्तमी॥ वयं चिद्धि वा
जरितारः सत्या विपन्यामहे वि पणिर्हितावान्॥ अधा चिद्धि ष्माश्विनावनिंद्या पाथो हि ष्मा वृषणावंतिदेवमिति॥ ॥वयं चिद्धि
वयमपि जरितारः स्तोतारः सत्याः सत्यफलाः संतो विपन्यामहे विविधं स्तुमः पणिः पणनाधारो द्रोणकलशश्च विहितावान्।
स्थापितरसवानासीत् यद्वा पणिर्वणिक् छद्मको अयष्टा हितवान् निहितधनो धनाद्योप्युदृष्टां विवियुज्यतां। उपसर्गश्रयोग्य
क्रियाध्याहारः। अध अपि वा चिद्धि ष्म एते त्रयः पूरणाः। हे अश्विनौ अनिंद्यौ प्रशस्यतमौ तत्त्व हे प्रशस्ये वृषणौ हे कामानां व
र्षितारौ युवां अंतिदेवं देवानामंतिके पाथः सोमं पिबथः यद्वा अंतिदेवानामंतिके देवो वर्तमानेन्द्राद्यप्रभुवान सोममिति योज्यं॥ ॥
अथाष्टमी॥ ॥युवां चिद्धि ष्माश्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सातौ॥ अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः॥ ॥

नेप्रवत्वान् भूरिवासंतविस्तारवान्रथः प्रबंधुरः विस्तीर्णधुरोभागः वृष्णोवर्षकस्याश्वस्य मनसोजवीयान् मनोवेगवानित्यर्थः।अ
हंपूर्वः अहंकारपूर्वः मनस्वी वा स्वदारः यजतो यष्टव्यः ईदृशः आगच्छतु॥ ॥अथ चतुर्थी॥ इहेहजातासमवावशीतामरेपसात
न्वा३नामभिः स्वैः॥ जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे इति॥ ॥हे अश्विनौ युवां समवावशीतां सहसम्य
क् वायुनापुनस्तुयो युकामयेथां वायज्ञं। पुरुषव्यत्ययः। कीदृशौ युवां इहेह जोहता उभाभ्यामिह ह्वाभ्यां मध्यमोत्तमस्थाने उच्ये
ते। तया संभूसैत्वं इस्तूयेयोतियावत्। सूर्यचंद्रमसाविसैकइतिनिरुक्तं। अरेपसा अलेपौ अथर्वणास्य गुरोः शिरश्छेदनाद्
नापापलेपरहिताविति भावः। आथर्वणायाश्विनादधीचेऽश्व्यं शिरः प्रत्यैरयतमित्यादिमंत्रवर्णात्। केन हेतुनेति। उच्यते। तन्वा
शरीरेण शरीरसौंदर्येण निमित्तेन। स्वैर्नामभिः स्वैर्माहात्म्यविशिष्टैः अश्विनौ नामेत्यादिभिः परिरमणीयशरीरत्वान्महिमो
पेतनामवत्वाच्च हेतोः संस्तूयेथे इत्यर्थः। यद्वा अरेपसा तन्वेति योज्यं। उक्तप्रकारेण गुरुशिरश्छेदपापेनशीघ्रेणतादृशहत्व
व्याख्यापनेनेति वत्। यावत्। किंच वां युवयोः। अन्य एको मध्यमस्थानस्यांतरिक्षस्य सूत्रस्थानीयः सोमजिष्णुर्जयशीलः सु

द्वि·भा·४
॥२६६॥

मखस्य यज्ञस्य सूरिः प्रेरयिता सन् तुहे वति। विश्वं जगद्धारयति। चंद्रात्मनस्तस्योदये सति। ओषधिवनस्पत्यादयो वर्धंते।
अन्यः अपरः उत्तमस्थानो दिवाद्युलोकस्य पुत्रः पुत्रस्थानीय आदित्यः सुभगः शोभन रश्मिरूप धनं तुहे वहति। क्व स्य एवं द्व
थ कृजगन्ति वाहको महानुभावो युवां सहस्तूयेते। तत्र निरुक्तं। इहेहजातौ संस्तूयेथे पापेनालिप्यमानाया यातन्वा नाम विश्व
स्वेर्जिसुर्वामन्यः सुमहतो महतो बलस्येरयिता मध्यमो दिवो अन्यः सुभगः पुत्र तुहे आदित्य इति॥ ॥अथ पंचमी॥ प्रवां निचे
रुः ककुहो वशाँ अनु पिशंगरूपः सदनानि गम्याः। हरी अन्यस्य पीपयंत वाजैर्मथ्रा रजांस्यश्विना विघोषैरिति॥ ॥हे अश्वि
ना अश्विनौ वां युवयोर्मध्ये न्यस्यैकैकः ककुहः श्रेष्ठः पिशंगरूपः हिरण्मयरूपः पीतवर्णो वा बहुभिरस्माद्युवयवैर्निरूप्यमाणे
वा राया वशान् अनकामान तु वे लक्ष्य यथाकामं अस्मद्यज्ञागमने छयेत्यर्थः। यद्वा वशान् स्वाधीनान् ककुहः दिग्गाः दिगंतरा
लान तुक्रमणानि चेरुर्विश्वरन् स्वस्थानाद्देवयजनमुखमागछन् सदनानि अस्माद्यागगृहाणि प्रगम्याः प्रकर्षेण गछतु
रुषव्यत्ययः। अत्र यद्यप्यस्येन्येति नोक्तं। तथाप्युत्तरवाक्ये स्तयोक्तत्वात् अत्रापि लभ्यते। अन्यस्य युवयोरन्यतमस्य हरी अश्वौ

श्रीः
॥२६६॥

यंति॥ ॥अथ सप्तमी॥ असर्जि वां स्थविरा वेधसा गीर्बाह्ळे अश्विना त्रेधा क्षरंती। उपस्तुताववतं नाधमानं यामन्नयामञ्छृ
णुतं हवं मेति॥ ॥हे वेधसा विधातारौ अश्विनौ वां युवयोर्बाह्ळे दृढे स्थैर्ये निमित्तभूते सति गीः स्तुतिरूपा वाक् असर्जि सृज्यते।
कीदृशी सा स्थविरा असंतान्स्थिरा नित्या। वेदमयी त्रिधा मंत्रभेदेन त्रिःप्रकारा क्षरंती युवां गच्छंती ईदृशी स्तुतिः कृतेत्यर्थः। तथा
उपस्तुतौ संतौ नाधमाना अभिमतफलं याचमाना भवतं रक्षतं तर्पयतं वा। किंच यामन् अयामन् गमने अगमने च हव
माह्वानं शृणुतं॥ ॥अथाष्टमी॥ उत स्या वां रुशतो वप्ससो गीस्त्रिबर्हिषि सदसि पिन्वते नॄन्। वृषा वां मेघो वृषणा पीपाय
गोर्न सेके मनुषो दशस्यन्निति॥ ॥हे अश्विनौ वां युवयो रुशतो दीप्तस्य वप्ससो रूपस्य वपुषो वा ख्यापयित्री गीः स्तुतिर्वा
नॄन् त्रिबर्हिषि त्रेधा स्तीर्णबर्हिष्के सदसि यागे सदनेन कर्मनेतॄन् पिन्वते आप्याययति आप्यायनु वोचिते प्रमादादिना
केन प्रकारेण उच्यते। हे वृषणा वर्षितारौ वचमानो वां युवयोः स्वभूतो मेघः सेक्ता जलधरः व्यदानविशेषो वा वृषा वर्षकः
सन् मनुषो मनुष्यान् प्रति दशस्यन् प्रयच्छन् पीपाय आप्याययति। आप्यायने दृष्टांतः गोर्न सेके उदकसेक इव गां तना श्रीः ॥२६७॥

सेके उदकस्येव तघृथा आप्याययति। तद्वदित्यर्थः। यद्वा नेति संप्रत्यर्थे गोरुदकस्य सेके निमित्तभूते सति पीपायेति संबंधः॥ ॥
अथ नवमी॥ युवां पूषेवाश्विना पुरंधिरग्निमुषां न जरते हविष्मान्। हुवे यद्वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानु
मिति॥ ॥हे अश्विनौ युवां पुरंधिर्बहुप्रज्ञः पूषेव पोषक इव हविष्मान् हविर्युक्तो जरते स्तौति। यद्वा पुरंधिर्बहूनां धारयि
त्री पूषेव पृथिवी वह्नितीयार्थे प्रथमा। ते यथा स्तौति तद्वत्। किमिव अग्निमुषां न अग्निमुषसं च यथा तथा युवामपि प्रातरनु
वाकाश्विनशस्त्रयो राद्विनक्रतुवशाद्गेपस्ययोरपि स्तुवादिति भावः। कदेत्याह॥ यत् यदा वां वरिवस्या वा परिचर्यया युक्तो
गृणानः स्तोता स्तौति। तदा यदिदं मिसंजमानो पि जरत इत्यर्थः। विद्यामेत्यादि गतं॥ ॥इति द्वितीयस्य चतुर्थे षड्विंशो वर्गः॥
अभूदिदमिति षष्ठं चर्चं तृतीयं सूक्तं। अगस्त्यस्यार्षमाश्विनं जागतं। अंतविध्य मिति षष्ठी। तद्वांनरानास्त्यावित्यष्टमी। चोभे त्रिष्टुभौ।
अभूदिदमष्टौ षष्ठ्यंते त्रिष्टुभावित्यनुक्रमणिका। प्रातरनुवाकाश्विनशस्त्रयोर्जगिते छंदस्य विनियोगः। तथा च सूत्रितं।
अभूदिदं यो वां परिज्मेति त्रीणि॥ ॥तत्र प्रथमा॥ अभूदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः॥ धियंजि

न्वा। धिष्ण्या। विरपलाव सू। दिवोन पातासु कृते शुचिव्रतेति॥ ॥हे मनीषिणो मनस्विनो मेधाविनः ऋत्विजः अस्माकमिदं वयुनं प्र
ज्ञानमस्तु। उ सत्त्वं कीदृशं तदिति उच्यते। वृषण्वान् अभिनवर्षणवान् रथः अश्विनोः संबंधी गमनसाधनो रथः अग
त इति शेषः तस्मादश्विना आ उ षु भूषत ओ इति निपातद्वयसमुदायात्मक एको निपातः सुष्ठु आ भूषत अभिमुखा भवत स्तोतुं ता
दृशौ महानुभावावश्विनौ महत। अंतर्भावितण्यर्थे दिमद यत संभावयत। अश्विनौ विशेष्येते। सुकृते सुष्ठु कृतवते मह्यं धिये
जिन्वा कर्मणो बुधे वर्षपी वायितारौ धिष्ण्या धिषणार्हौ रस्तुसो विरपलावसू विरपान् राज्ञां अस्माकं पालयितृ धनौ विरपलाख्या
याः छिन्नजंघायाः हिरण्मजंघप्रदनेन धनभूतौ। सद्यो जंघामायसी विश्पलायै इत्यादि निगमः। दिवः आदित्यस्य न पातानसा
रोन पातयितारौ वा शुचिव्रता दीप्तकर्माणो ईदृशावश्विनौ महत॥ ॥अथ द्वितीया॥ इंद्रतमा हि धिष्ण्या मरुत्तमा
मरुध्यागगामिनौ मितरागिणौ मतरावश्विनौ वा स्त्वा तु रक्षयितारौ शत्रूणां दंसिष्ठा अतिशयकर्माणौ रथ्या रथाहौ रथ्यं वं
तोयथा रथिनो नेतारः तेषां रथितमौ श्रेष्ठौ रथी रथधराणामिस्य स्य ब्रह्मणा रथी इत्यस्य नेतृपरतया व्याख्यातत्वात् इंद्रशो
३४ मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा॥ पूर्णं रथं वहेथे मध्व आचितं तेन दाश्वांसमुप याथो अश्विनेति॥ ॥हे अश्विनौ युवां इंद्रतमा ३४
हि ईद्रश्वरतमौ खलु एवं प्रति विशेषणं हि संबंधः। तथा धिष्ण्या ३४

रजांसि लोकान् अत्र लोकशब्दो जनवाचकः। ते यजमानरूपा जना इत्यर्थः। तेन मध्वा मथने न लोडनेनूनिष्पादिते वाजिरं न्वैरा
मिक्षादिरूपे घर्षि स्तुतिभिः अश्व आह्वानादिशब्दविशिष्टे वर्षपीपयंत आप्याययंति॥ ॥इति द्वितीयस्य चतुर्थे पंचविंशो वर्गः॥ ॥अथ
षष्ठी॥ ॥प्र वां शरद्वान्वृषभो न निःषाड् पूर्वीरिषश्चरति मध्व इष्णन्॥ एवैरन्यस्य पीपयंत वाजैर्वेषंतीरूर्ध्वा नद्यो न आगुरिति॥ ॥
हे अश्विनौ वां युवयोरन्यतमो मध्यमस्थानः शरद्वान् शरणवान् मेघवृक्षपर्णादीनां विशरणवान्। अथवा बद्धसंवत्सरप्र
वर्तनां निर्येत इत्यर्थः। वृषभो न वर्षिता देवेंद्रः सदृ वृत्राणां नितिः सारयितासन् पूर्वीः बह्वीः पुरातनीर्वा इषः अन्नानि सस्यादी
न्यभिद्रय प्रचरति। प्रकर्षेण गच्छति। मध्यस्थानश्चंद्र इति। पक्षे शरद्वान् शरत्कालवान् तस्मिन्नृतौ हि चंद्रः प्रसन्नो भवति। ते
न च तृणगुल्मौषध्यादीनि वर्धंते। स किमर्थमेवं करोतीति उच्यते। मध्व इष्णन् मधुनो मधुसदृशस्य हविषः कर्मणि ष
ष्ठी। हविरिच्छन् तदर्थमेवं करोति। तथान्यस्योत्तमादित्यस्य एवैः कामैर्गमनैर्वा निमित्तभूतैः पीपयंत आप्याययंति हवि
र्भिर्यजमाना नुद्वेन तेन तेन प्रेरिताः वेषंतीः व्याप्नुवंतीः ऊर्ध्वा उन्नता उत्तीर्णा नद्यो न नद्य इलायया नो अस्मदर्थं आयुः आग

युवां मध्वो मधुमद्रसस्योदकस्यामृतस्य वा पूर्णं पूरितं अचितं सर्वतः सन्नद्धं रथं वहेथे तथा तेनोक्तविशिष्टेन रथेन हे अश्विनौ
उक्तगुणविशिष्टौ संतावुपयाथः यज्ञमभिप्राप्नुथः॥ ॥अथ तृतीया॥ किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्मही
यते॥ अतिक्रमिष्टं जुरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यव इति॥ ॥हे दस्रावुपक्षयितारौ युवां अस्मिन्मनुष्ये किं कृणु
थः कृमथः हविषोभावादिति भावः। तत्रैव किमासाथे मयिषथः। अत्रेरुक्तं। अत्रेस्याह। यः कश्चिज्जनाज्जन्मवान् अहविः यज्ञा
र्थं हविरहितो महीयते पूज्यते स्ववन युष्मान् पूजयंति तं जनमतिक्रमिष्टं। परांमुखयतिष्ठं तं न केवलमतिक्रममात्रं किंतु पणे
र्वणिग्रूपस्य लुब्धकस्यायष्टुः तस्यासुं प्राणं जुरतं अहिंसिष्टं अनीनशतं न केवलमतिक्रममात्रं पणेर्वणिग्रूपस्य लुब्धक
स्यायष्टुः तस्यासुं प्राणं जुरतं अहिंसिष्टं अनीनशतं विप्राय मेधाविने वचस्यवे वचसः स्तोत्ररूपस्य युवाभ्यामिच्छते महो
ज्योतिः कृणुतं युष्मद्यजनविषयज्ञानं कुरुतं॥ ॥अथ चतुर्थी॥ जंभयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना॥
वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं ममेति॥ ॥हे अश्विनौ रायतः निंदितं शब्दं यो वास्मान् हंतु आगच्छतो

वांकृतनःस्वसदृशानभितोजंभयंतंनाशयंतंतथामृधस्तेषांसंग्रामान्संयामंकुर्वंतोवाहतंतानिहननानियान्नाविदथुःआ
नीयः।किंचजरितुःयुष्मान्स्तोतुर्वाचंवाचंतांतांस्तुतिलक्षणांवाचंरत्निनींकृतंसर्वामपिस्तुतिरमणीयफलवतींकुरुतं।हे
नासत्यभूतौयुवामुभाउभौममदीयंइमांसंस्तुतिंअवतंरक्षतं॥ ॥अथपंचमी॥युवमेतंचक्रथुःसिंधुषुप्लवमात्मन्वंतंपक्षि
णंतौग्र्यायकं॥येनदेवत्रामनसानिरूहथुःसुपप्तनीपेतथुःक्षोदसोमहरिति॥ ॥हेअश्विनौयुवंयुवांसिंधुषुसमुद्रोदकेषुए
तंप्लवंप्रसिद्धंस्तुतिसाधनंप्लवंनावंआत्मन्वंतंदीर्घवंतंपक्षिणंपक्षिवत्स्तुतिसाधनद्रव्यवंतंतौग्र्यायतुग्रनाम्नोराज्ञःपु
त्रायभुज्युनाम्नेराज्ञेकंसुखकरंचक्रथुः।तौग्र्याभुज्यूराज्यासमुद्रवतीससेनःपरचक्रंप्रथमयितुंप्रस्थितः।तंप्रतीपंबला
न्यागसपातयंत।सचप्रमादफलकधारावश्विनौस्तुत्वास्वात्मानंचरक्षेत्यपमितिहासोबहुविधःपूर्वंप्रपंचितः।यद्वा
कमितिपूरणः।तस्यतुसंचारिथस्यसहायभूतान्बहूनूरथादीन्कुरुतमित्यर्थः।अयमर्थस्तुसमूहफल्नौभिस्वतस्थानावः
स्त्विभीरथैरित्यादिमंत्रांतरेषुसिद्धः।येनयुद्दत्तेनप्लवेनदेवत्रादेवेषुमध्येमनसानुग्रहयुक्तयाबुध्यायेनमनसेतिवायोज्यं

नशीलस्यमृगस्यमध्येयंवृक्षंतोजयितुंशोधयितुः हेमादेराहतेआलंबनायपर्णापर्णातीवृक्षाइवतेयथाआलंबनायप्रभव
ति।तद्वत्।हेअश्विनौश्रोमतायकीर्तिमतेवायउद्वहथुःऊर्ध्वंप्रापयथः स्तुतिपक्षेस्तोत्रादिवृक्षमश्विनयर्वंततमूहथुरित्यर्थः॥ ॥अ
ष्टमी॥ तद्वांनरानासत्यावनुष्याद्यद्वांमानासउचथमवोचन्॥अस्मादद्यसदसःसोम्यादाविद्यामेषंवृजनंजीरदानुमिति॥ ॥
हेनरौनेतारौकर्मणोनराकारौवा।हेनासत्याअसत्यरहितौसत्यफलौवांयुवांअतस्तात्इंस्तोत्रंअनुष्यात्।अनुकूलंभवतुअ
नुदनुवातदित्याहवांप्रतिमानासःसजावंतोस्मदीयाइत्यर्थः यदिहोत्रादयोयत्उक्थंस्तोत्रमवोचन्।तद्वांमनुष्यात्।हेअश्विनौ
अद्यास्मिन्नद्यतनयागेदिनेअस्मादस्माभिःक्रियमाणात्सदसः सोम्यात्सोमयागसंबंधोदकात्आइत्यर्थेअस्माभिर्यजमानैर
द्यक्रियमाणादपिस्तोत्रात्प्रीणयतमिति।विद्यामेतिगतं॥ ॥इतिद्वितीयस्यचतुर्थेत्र्याविंशोवर्गः॥ ॥तंयुंजाथामितिषडृचंच
तुर्थंसूक्तंत्रैष्टुभंअगस्त्यंआश्विनं।तंयुंजाथांषळित्यनुक्रमणिका।प्रातरनुवाकाश्विनशस्त्रयोः युवोरजांसीसनेनसहो
क्तोविनियोगः॥ ॥तत्रप्रथमा॥ तंयुंजाथांमनसोयोजवीयांत्रिवंधुरोवृषणायस्त्रिचक्रः॥येनोपयाथःसुकृतोदुरोणंत्रिधा श्री ॥२७०॥
तुनापतथोविर्नपर्णैरिति॥ ॥हेवृषणावर्षकौकामानांयुवांतंवक्ष्यमाणगुणविशिष्टंरथंयुंजाथांयोजयतं।तमित्युक्तं
कमित्याह।योरथःत्रिवंधुरःत्रिःप्रकारेणारथिस्थानंवंधुरंरथिनःस्थानमित्याह।आयाह्यर्वाङुपवंधुरेष्ठाइत्यादिमंत्रांतरा
तयश्चत्रिचक्रःचक्रत्रयोपेतः।पुनःसएवविशेष्यते।येनरथेनोपयाथःउपगच्छथः।किंसुकृतःशोभनस्तोत्रयज्ञकर्मवतोय
जमानस्यदुरोणंगृहनामैतत्।यागगृहं।येनेत्युक्तंकेनेत्याह।त्रिधातुनात्रिःप्रकारस्थानोपेतेनसुवर्णरजतताम्रधातुत्र
योपेतेनवारथेनपतथःगच्छथः॥ ॥अथद्वितीया॥ सुवृद्रथोवर्ततेयन्नभिक्षांयत्तिष्ठथःक्रतुमंतानुपृक्षे॥वपुर्वपुष्यासच
तामियंगीर्दिवोदुहित्रोषसासचेथेइति॥ ॥हेअश्विनौयुवयोःरथःसुवृत्शोभनवर्त्तनःशोभनचक्रपरिभ्रमणःयन्गच्छ
न्क्षांअभिवर्ततेदेवयजनभूमिंप्रतिगच्छति।यत्यंरथंक्रतुमंतामंकस्यवंतोवापृक्षेअन्ननामैतत्हविर्निमित्तभूत
तेसतिअनुअन्विषध्यथोअधितिष्ठथः।आश्रयथः।तादृशोरथोदेवयजनंप्रत्यागतमित्यर्थः।अनंतरंवपुषायुष्म
पुषिहिताशरीरवर्धनीयंगीःइदानींक्रियमाणप्रकारास्तुतिरूपायावाक्वपुःसचतांयुवांचदिवोद्युलोकस्यादित्यस्य

वादुहित्राइतितत्स्थानीयाउषसा उषोदेवतया सचेथे यज्ञंसंगछेथे उषस्याश्विनयोः समानकालत्वादिति भावः॥ ॥अथतृ
तीया॥ आतिष्ठतंसुवृतंयोरथोवामनुव्रतानिवर्त्ततेहविष्मान्॥ येननरानासत्येषयध्यैवर्त्तिर्याथस्तनयायत्मने चेति॥॥
हे अश्विनौ वां युवां सुवृतं शोभनवर्त्तनं रथं आतिष्ठतं आश्रयतं योरथोहविष्मान् षष्ठ्यर्थे प्रथमा। हविष्मतो यजमान
स्य व्रतानि कर्माण्यनुवर्त्तते। यद्वा यजमानदत्तहविषा तद्वान् येन चरथेन हे नरा नेतारौ वा। हे नासत्या असत्यरहितौ युवा
मिषयध्यै यज्ञं प्राप्तमिछतामिति शेषः। तेन रथेन वर्त्तिः गृहं नामैतत् यजमानस्य यज्ञगृहं तनयाय पुत्रलाभाय उत्मने आत्मरहितं
यथा॥ ॥अथचतुर्थी॥ मावांवृकोमावृकीरादधर्षीन्मापरिवर्क्तमुतमातिधक्तं॥ अयंवांभागोनिहितइयंगीर्दस्राविमेवांनिधयोम
धूनामिति॥ ॥हे दस्रा शत्रूणामुपक्षयितारौ अश्विनौ वां युवयोः अनुग्रहादिति शेषः। वृकः हिंसाकारण्यपश्वादिर्मादधर्षीत्। धर्षणं
माकार्षीत्। मातथा वृकीः वृक्योहिंसकाः अन्या अपि मादधर्षीत्। एवं नन्यस्य धर्षणं माकार्षुः। युवामेव वामोदधर्षीदितियोज्यं
तं। युवां मापरिवर्क्तं। परितो मा वर्जयतं मां। उत अपि च माकार्षुः। युवामेव वामोदधर्षीदितियोज्यं। तायुवां मापरिवर्क्तं। अस्माद् श्रीः ॥२७१॥

निरूहथुः निर्गमं कुरुथः तथा सुपप्तनि शोभनपतनं यथा भवति सुपप्तनी वा युवां महो महतः क्षोदसः उदकनामैतत्। उदका
न्येतथुः। तदधः पतनं उत्तरीतुं॥ ॥इति द्वितीयस्य चतुर्थे सप्तविंशो वर्गः॥ ॥अथषष्ठी॥ अवविद्धं तौग्र्यमप्स्वंतरनारंभणे तमसि
प्रविद्धं॥ चतस्रोनावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयंतीति॥ ॥अप्सु अंतर्मध्ये अवविद्धं अवस्तात् शत्रुभिः पातितं अनारं
भणे अनालंबके आलंबनरहिते तमसि तमोवत्तमः दृष्टिप्रसादप्रतिबंधके जलमध्ये प्रसिद्धं प्रकर्षेण पीडितं तौग्र्यं भुज्युं ज
ठलस्य जठरस्य जठरवद् उदककरस्य मध्ये जुषः सेविताः यद्वा कर्मणि षष्ठी। जठरं प्राप्ताः त्वं तत् जलं प्रविष्टाः अश्विभ्यामिषिताः च
तस्रो नावा उत्सादयंति ताः चतस्रो नावः उत्सादयंति प्रापयंति॥ ॥अथसप्तमी॥ कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः प
र्यषस्वजत्॥ पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कमिति॥ ॥कस्वित् कश्चिदनुग्राहको वृक्षः वृक्षविकारो र
थः विकारे प्रकृतिशब्दः संस्तवाभिप्रायमेतत् स्तोत्रं वृक्ष इत्यर्थः कीदृशो रथः निष्ठितः निश्चलं वर्त्तमानः कुत्रेति उच्यते। अर्णसः उ
दकस्य मध्ये यं वृक्षं तौग्र्यः तुग्रपुत्रो भुज्युः नाधितः याचमानः पर्यषस्वजत् परिषक्तमकरोत्। आलंबने दृष्टांतः पतरोः पत

तिकस्मान्यस्मैमादत्त। किमर्थमिति। उच्यते। वांयुवयोरर्थयायोभागोभजनीयोहविरंशोनिहितःरथेपंचगीःस्तुतिरूपावागपिनि
हितेतिशेषः। हेदस्रावश्विनौवांयुवाभ्यांइमेमानिधयःमधूनांसोमरसानांनिधयोनिधनानिस्थापितानि॥ ॥अथपंचमी॥ यु
वांगोतमःपुरुमीह्लोअत्रिर्दस्राहवतेवसेहविष्मान्॥ दिशंनदिष्टामृजूयेवयंतामेहवंनासत्योपयातं॥ ॥हेदस्राअश्विनौयु
वांगोतमश्चपुरुमीह्लश्चअत्रिश्चमहर्षयश्चएषैकैकोहविष्मान्सन्अवसेयुष्मत्तर्पणायपश्चरक्षणायमेथंवाहवतआह्व
यति। एवमहमपिसाधनाकृहस्तांतः। याताउपगंताउपतंतुकामःऋजूयायाइवद्वितीयायाआकारःऋजुगामिनंमार्गयाह्
दिशंदिशंनगंतव्यं। अभिमतांदिशंप्रतियथातथावामपियथाध्वगामीस्वगंतव्यस्यदेशस्यप्रगमनायमार्गज्ञंऋजुगामिनमाह्व
यति। तद्वत्। तद्वान्ऋजुएवइवशब्दएवार्थेयंगंताऋजुनैवमार्गेणाइष्टांदिशमिवतथायुष्मत्समीपानेनमार्गेणास्वाभिमतंफ
लंप्राप्नोति। हेनासत्यामेममहवमाह्वानंआलक्ष्योपयातं॥ ॥अथषष्ठी॥ अतारिष्मतमसस्पारमस्यप्रतिवांस्तोमोअश्वि
नावधायि॥ एहयातंपथिभिर्देवयानैर्विद्यामेषंवृजनंजीरदानुमिति॥ ॥हेअश्विनौवांप्रतिस्तोमःस्तोत्रंअधायिअकारीत्य

थः। युवां देवयानैर्देवैर्गंतव्यैर्मार्गैरिति हास्मद्यज्ञे अतारिष्मं तं आगछतं। शिष्टो व्याख्यातः॥ ॥इति द्वितीयस्य चतुर्थे एकोनत्रिंशो व
र्गः॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिक
मार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणाचार्यविरचिते माधवीये वेदार्थप्रकाशे द्वितीयाष्टके चतुर्थोध्यायः॥ ॥य
स्य निःश्वसिता वेदा यो वेदेभ्योखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ द्वितीयाष्टकमध्यस्थश्चतुरोध्याय आदरात्।
व्याख्यातः सायणार्येण पंचमो व्याकरिष्यति॥ तत्र ता वामितीदं प्रथममंडलस्य चतुर्विंशेनुवाके पंचमं सूक्तं। पूर्वसूक्ते षळित्युक्तत्वा
त्। सूक्तसंख्यानुवर्तत इति परिभाषितत्वात्। षळर्च ऋषिश्चान्यस्मादिति परिभाषयागस्त्यं तथाश्विनं वा इत्युक्तत्वात्तुह्यादि परि
भाषायेदमप्याश्विनं। अनादेशपरिभाषया त्रैष्टुभं। ता वामित्यनुक्रांतं। युवो रजांसीत्यादीनां पंचसूक्तानां तृतीयवर्जितानां प्रात
रनुवाकाश्विनशास्त्रयोर्विनियोग उक्तः। तत्रेदं पंचमी॥ तत्र प्रथमा॥ ॥हरिः ॐ॥ ता वामद्य तावपरं हुवेमोच्छंत्यामुषसि वह्निरुक्थैः॥
नासत्या कुह चित्संतावर्यो दिवो नपाता सुदास्तराय॥ इति॥ ॥ता तौ रक्षकत्वेन प्रसिद्धौ वां युवां अद्यास्मिन्यागदिने हुवेम आह्व

मेतत् रात्रौ मदंतामाद्यंतौ यद्वा गिरिति सोमनाम। उर्मिर्यस्तेप वित्र आइत्यादिषु तथा प्रयोगात्। अस्मदीयेन सोमेन मदंतौ ताहृशौ
युवां मे मम होत्रभिरामिमुख्यकरैर्निर्मळैर्वेदवाक्यैररचिताः मतीनां कर्मणि षष्ठी। मननसाधनास्तुतीः कर्णैराकर्णसाधनैः श्रोत्रैः
श्रृतं श्रृणुतं। हे नरा नेतारौ युवां खलु एष्टा अन्वेष्टारौ वस्मात्स्तुतीनां निचेतारौ वां लब्धा तां तासां सवयव कर्त्तारौ निरिये षस्व मि
येतस्य स्थाने। यस्मादेवंविधस्तस्मात् श्रृणुतामिति॥ ॥अथ तृतीया॥ श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः॥ वच्यं
ते वां ककुहा अप्सुजाता युगा जूर्णेव वरुणस्य भूरेरिति॥ ॥ सविता सूर्यां दुहितरं स्तु पत्ये। प्रदानुमतोः देवानाहूय सामथ्यां
समीक्ष्यमाणायाजि परिकल्पय य इमे जेष्यति स एतां कन्यकामर्हतीस हस्व कृत्सं स्तोत्रं चलभं तदुसेकस्य यत् तत्तमग्निः प्रथममजय
त्तमश्विनावपिजित्वासिं प्रष्ट्रष्णुरक्सहस्रं कन्यकां चलभेतां। तत इंद्र उषाश्चाजयतां तौ च तैरग्न्यादिभिः प्रार्थितौ स्वशकि
त्तुविद्युम्नागंतेभ्यः परिकल्प्य सूर्यां स्वरथे धारयतामपि। अयमितिहासो ब्राह्मणे प्रजापतिः सोमाय राज्ञ इत्यात्मनोरस्माभिः श्रीः
प्रथमाष्टके। आ वां पतित्वं सख्याय सत्र प्रपवितः। तमत्राह। हे पूषन्पोषक सूर्य एतत् इंद्रस्याप्युपलक्षणं। सूर्याचंद्रमसो ॥२७३॥

रश्विनावित्वात्। सूर्याचंद्रमसावित्येक इति यास्केनोक्तत्वात्। अतः पूषन्निसूक्ते हे पोषकावश्विनाविस्युक्तं भवति। हे पोषकौ हे नास
साअसत्यरहितौ देवौ युवां श्रिये श्रयसे शरण्यस्य कन्यायाश्च लाभायेत्यर्थः। इषुकृतेव इवशब्द एवार्थः अभिधावना। येषु वह्नीश्चर्जुगा
मिनौ स्थतौ वेवसंतौ सूर्यायाः एतन्नामिकायाः सवितुः पुत्र्याः कर्मणि षष्ठी। सूर्यां वहतुं धारयितुमाजिमुदंजयमित्यर्थः। यस्मादेवं त
स्मात् अप्सुजाताः कर्मसु संपादिताः। ककुहाः ऋजुरूपास्तु तयः रूपाः अविच्छिन्नप्रवाहस्य वरुणस्य फलप्रतिबंधकयापरिचारक
स्य सिध्यर्थं तत्संबंधिन्यो वा वच्यंते उच्यंते। होत्रादिभिः युवामेव शास्त्रगतामंत्रा यागकाले स्तुवंतीत्यर्थः। युगा जूर्णेव जीर्णे वा जीवा
नि युगानीव इवशब्दः संप्रत्यर्थे पुरातनायागकालाय यान्तद्युत् ता अपीत्यर्थः। पूर्वकाले यथा युवामेव स्तुवंति तद्वदिदानीमपी
ति तात्पर्यार्थः॥ ॥अथ चतुर्थी॥ अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः॥ अनु यद्वां श्रवस्या सुदानू सुवीर्या
य चर्षणयो मदंतीति॥ ॥हे माध्वी मधुपूर्णपात्रयुक्तौ अश्विनौ वां युवयोः संबंधिनी सा प्रसिद्धा रातिर्दानमस्मे अस्माकं अस्तु
भवतु तदर्थं मान्यस्य माननीयस्य कारोः स्तोतुरगस्त्यस्य स्तोमं स्तुतिं हिनोतं प्रीणयतं हे सुदानू शोभनफलदानौ वा युवां

अवस्याकीर्तेरन्नस्य इच्छया यतः यस्मात् सुवीर्याय यजमानाय शोभनबलाय यवाचर्षणीयो मनुष्या ऋजिगूपाः अनुमदंति
अनुक्रमेण माद्यंति युवाभ्यां सहस्वयं वा॥ ॥अथ पंचमी॥ एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति॥ यातं वर्तिस्त
नयाय त्मने चागस्त्ये नासत्या मदंतेति॥ ॥हे अश्विनौ मघवानाहविर्लक्षणान्नवंतौ वां युवाभ्यां एषः स्तोमः स्तोत्रं सुवृक्ति सुष्टु
यापवर्जनं यथा भवति तथा यद्वा सुमासि अकारि कृतः कीदृशो यं मानेभिर्मानैः हविःप्रदानरूपाभिः स्वहितः हे नासत्या असत्य
रहितौ युवां अगस्त्यरूपे एतन्नाम्नि महर्षिमिमदं पिता माद्यंतौ वर्तिः गृहं यज्ञसंबंधि वा तं प्राप्नुतं किमर्थं तनयाय पुत्रादिलाभा
यात्मने आत्मने व हिताय॥ ॥अथ षष्ठी अतारिष्मेति व्याख्यातं॥ ॥इति द्वितीयस्य पंचमे प्रथमो वर्गः॥ ॥कतरा पूर्वेत्येकादश
र्चं षष्ठं सूक्तमागस्त्यं त्रैष्टुभं॥ कतरैकादश द्यावापृथिव्यमित्यनुक्रांतं। आभिप्लविके षष्ठेहनि वैश्वदेवशास्त्र इदमेव द्यावापृथि
व्यं निविद्धानं वर्तमानाभिप्लविकात्तृतीयसवनमित्यतिदेशात्॥ तत्र प्रथमा॥ कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि
वेद॥ विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेवेति॥ ॥ययोक्तनयो द्यावापृथिव्योर्मध्ये कतरा पूर्वा पूर्वा सुसन्नाक

यामह इत्याशीः तथा अपरं अपरस्मिन्नपि दिने तौ युवां हुवेमा परिमिसे तदपरस्मिन्नित्यर्थे समभिव्याहारात्॥ अद्याचनोम्रुच्छयता
परं वेत्यादिमंत्रांतरे तथादर्शनाच्च। अपरयागं प्रसपीति। युवयोः कस्मिन्काले उषसि उषो देवतायां उच्छंत्यां तमो विवासयंत्यां उषःका
ले हि प्रातरनुवाकाश्विनशस्त्रे प्रयुज्येते। उक्ते काले हे नासत्या असत्यरहितौ दिवो नपाता द्युलोकस्य न पातयितारौ नहूरच्छा
नीयौ वा कुह चित् सन्तौ कुत्र चिद्देशे वर्तमानौ युवां वह्निः स्तोता वोढा अर्यः ईरयिता स्तुतेः ईश्वरो वा इहशणहं होता सुदास्तराय अयं
तशोभनहविर्दात्रे यजमानाय एतदर्थं तौ युवां उक्थैः शस्त्रैः हुवेमेति संबंधः अत्राख्यातं पदमेकवचनतया नेतव्यं। वह्निर
र्यः शंसी वा बहुवचनत्वेन नेतव्यौ। अथवा वाक्यद्वयं यस्माद्वह्निरार्यो होता उक्तगुणको युवां शंसति। तस्माद्वयं यजमानः
स्तो युवां आह्वयाम इति॥ ॥अथ द्वितीया॥ अस्मे ऊ षु वृषणा मादयेथामुत्पणीँर्हतमूर्म्या मदंता॥ श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा
नरा निचेतारा च कर्णैरिति॥ ॥हे वृषणौ कामानां वर्षकावश्विनौ युवां अस्मे उ अस्मे अस्मास्वेव सुमादयेथां सुष्टु तृप्यतं
अस्मभ्यं तर्पयत मभिमतं। तथा पणीन् वणिजो लुब्धकान् एतान् उत उन्मूल्य हतं नाशयतं कीदृशौ युवां। ऊर्म्या रात्रिना

तरा वा अपरा पश्चाद्भाविनी॥ एवं पूर्वापर्यप्रश्नः उभयोरविनाभावेन सहैव वर्त्तमानत्वादिति भावः। तथा कथा केन हेतुना जाते कि
मनयोरुत्पादनमित्यर्थः। हे कवयः क्रांतदर्शिनः अतींद्रियप्रज्ञा यूयं वदत। को विवेद एवं पौर्वापर्यप्रकारं यो च विशेषेण विविच्य वा जाना
ति नैकेनापि ज्ञायत इत्यर्थः। अज्ञाने कारणमाह। यद्वा यस्मात् खलु हेतोर्नाम प्रसिद्धं विश्वं कृत्स्नमपि जगदशेषं त्मनेन। आ
त्मनैव अनन्यैरपेक्षणैर्वा बिभृतो धारयतः। यद्वा यद्वा नाम यत्किंचित्पदार्थमस्ति विश्वं तत्सर्वमात्मना बिभृतः। अनेन यत्कारणं जात४
ब्रूमः। तदप्याभ्यामेव बिभ्रयतः। इति कारणाभावः प्रतिपादितः। उत्तरेण पौर्वापर्याभाव उच्यते। अहनी द्यावापृथिव्ये चक्रियेव
चक्रयुक्तेरिव विवर्त्तेते। पर्यायेण वर्त्तेते। अत्र कतरा पूर्वा कतरापरेत्यादि निरुक्तं द्रष्टव्यं॥ ॥अथ द्वितीया॥ भूरिं द्वे अचरं
ती चरंतं पद्वंतं गर्भमपदी दधाते॥ नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वादिति॥ ॥अचरंती अविचले द्वे ए
वैते द्यावापृथिव्यौ भूरिं बहुतरं चरंतं पद्वंतं पादयुक्तं गर्भं गर्भवदाश्रितं। कृत्स्नं प्राणिजातं अपदी स्वयं पादरहिते धार
यतः अनयोर्मध्ये खलु सर्वं जगत् प्रत्यक्षेणावर्तते। धारणे दृष्टांतः। पित्रोः माता पित्रोरुपस्थे उत्संगे वर्त्तमानं नित्यं ध्रुवमात्म

जंस्तनुं। नपुत्रमिव यथा स्नेहेन वर्धयंतौ धारयतां मातापितरौ तद्वत्। अथ प्रत्यक्षेणाह। हे द्यावापृथिवी द्यावापृथिव्यौ उत्त
रे त्वरापेक्षया द्वित्वमुभयोः नोस्मान घाद्यमहतो भयहेतोः यया रक्षत पालयतं। यद्वा अभ्वात्। अभ्वं महत्। असर्थमित्यर्थः
अभ्वेति महन्नाम द्वंद्वे कृत द्यावादेशस्य द्यावापृथिवीशब्दस्य मध्येंतरिक्षमिति पदप्रयोगश्छांदसः। आमंत्रितस्याविद्यमा
नत्वायेन विद्यते भावः॥ ॥अथ तृतीया॥ अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत्। तद्रोदसी जनयतं जरित्रे द्यावा
रक्षतं पृथिवी नो अभ्वादिति॥ ॥अदितेः एतदंतरिक्षस्याप्युपलक्षणं। अखंडनीयाया। पृथिव्यास्तथा द्युगोंतरिक्षस्य च संबंधि
दात्रं धनं हुवे आह्वयामि। स्पृहणीयामित्यर्थः। कीदृशं तद्धनं अनेहः अपापं दुःखरहितं सुखात्मकं। अनर्वं अनरणं अक्षी
णमित्यर्थः। स्वर्वत् फलभूतेन स्वर्गेण तद्वत् अवधं हिंसितं नमस्वत्। अन्नवत् ईदृशं धनं हुवे तदस्मदभिकांक्षितं उक्तलक्षणं
धनं। हे रोदसी द्यावापृथिव्यौ जरित्रे स्तोत्रे यजमानाय सृध्या
अथ चतुर्थी॥ अतप्यमाने अवसावंती अनुष्याम रोदसी देवपुत्रे॥ उभे देवाना

च निगमे दिवं च पृथिवीं चांतरिक्षमथो स्वः। अथवा द्यावापृथिवी निष्टंतक्ष्णुरिति। पित्रोः सर्वस्य पितृस्थानीययोः पालकयोः
तयोरुपस्थे उत्संगे स्थितं भुवनं भूतजातस्य नाभिवं धमुदकं अभि जिघ्रती अभिघ्राणं कुर्वत्यौ स्पृशत्यौ। समानमेतदुदकमि
त्यादिमंत्रवर्णात् उभयोरुदकप्रदत्वं प्रसिद्धं। ईदृश्यौ द्यौर्रक्षतं॥ ॥इति द्वितीयस्य पंचमे द्वितीयो वर्गः॥ ॥उर्वी सद्मनी बृहती
ऋतेन हुवे देवानामवसा जनित्री॥ दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वादिति॥ ॥उर्वी विस्तीर्णे सद्मनी
सदनाधारभूते बृहती महत्यौ महानुभावे देवानामुपलक्षणमेतत्। देवमनुष्यादीनां अवसा प्रीयानिमित्तेन जनित्री वृष्टि
सस्ययोर्जनयित्र्यौ हव्यादेः देवानामवसा तर्पणेन निमित्तेन ऋतेन यज्ञेन च निमित्तभूतेन हुवे आह्वयामि देवानां हविरर्थं
अस्मद्यज्ञायेत्यर्थः। ये सुप्रतीके शोभनरूपे अमृतमुदकं दधाते धारयतं युवामाह्वयामि। शिष्टं स्पष्टं॥ ॥अथ सप्तमी॥ उर्वी
पृथ्वी बहुले दूरेअंते उप ब्रुवे नमसा यज्ञे अस्मिन्॥ दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वादिति॥ ॥उर्वी
महत्यौ पृथ्वी पृथिव्यौ अनेकप्रकारेण प्रथमाने बहुलाकारे अंते विप्रकृष्टांतदेशे। अपारे इत्यर्थः। पुनः कीदृश्यौ ये सुभगे शो

श्रीः ॥२७६॥

भनभाग्ये सुप्रतूर्ती सुप्रहततरूपे शोभनदाने दधाते विभ्यं जगत्। ते युवामुपब्रुवे स्तौमि॥ ॥अथाष्टमी॥ देवान्वा य
त्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा॥ इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वादिति॥ ॥हे द्यावा
पृथिव्यौ वयं देवान्देवान्प्रति यत्किंचित् आगः अपराधं तत्र यागकाले तेषां तेषां अयागलक्षणं सदमित् सर्वदैव चकृ
म कृतवंतो वयं सखायं वापि यं मित्रं वा प्रति यच्चकृम। जास्पतिं। जाः सुच्यः तासां पतिं जामातरं च। अजया पतिं प्रति दोषा
रोपणकलहोत्पादनादिरूपं यत्सर्वदैव चकृम। एषामुक्तरूपाणां पापानामवयानं अपगमं कर्तुमियं धीर्बुद्धिः स्तुतिरू
पमिदं कर्म भूयाः भूयात् भवतु। द्यावेत्यादि गतं। अत्र सर्वस्य प्रकारांतरेण रक्षतं रक्षतमिति प्रार्थनं तयोरक्षिप्या
द्विसावशमननास्ससंभवादुचितमेवतस्मात् स्वस्थान एव एवं स्थिते अनुकूले भवतमित्येवं प्रार्थ्यते॥ ॥अथ नव
मी॥ ॥उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेतां॥ भूरि चिदर्यः सुदास्तरायेषा मदंत इषयेम देवाः इति॥ ॥
उभा शंसा द्यावापृथिव्यौ उभयो विषयाकाशंकमयोत्वयिशंसो नर्यानरेभ्यो हितौ दृश्यावुभयायथे स्तुति मामवि

ष्टां रक्षतां। यद्वा द्यावापृथिव्यभिमानिदेवयोरेवं रोदसी शब्देनाभिधानात् पुंलिंगता। उभेउती रक्षके द्यावापृथिव्यौ मामवसा
रक्षणेन सावतां। यद्वा प्राणिभ्यो हितकरानुभावैहिकामुष्मिकविषयौ तौ सोमाम विद्वांसा प्रभुतां तयोर्भ आभूती तयोः संबं
धिन्यौ अभिमानयोर्देवतासा स्मत्तर्पणेन निमित्तेन सचेतां। हे देवाः द्यावापृथिव्योरंतर्हिताः सर्वेपि देवाः अयं स्तोता रोदयं
सुदास्तराय अतिशयेन शोभनदातृत्वाय इष्टान्नेन सोमलक्षणेन मदंतः मादयंतः संतो भूरि विंद्र पूजायामभि पूजितं धा
नमिषाय मइच्छेम। यद्वा अर्यइति षष्ठ्यां रूपं ईश्वरस्य द्रव्येजादिरपि सुदास्तराये त्यर्थः। शिष्टं समानं॥ ॥ऋतं दिवइति॥ हे द्यावा
पृथिवीयपशौ पुरोडाशस्य हविषो रनुवाक्ये अग्नीषोमाविति खंडे सूत्रितं। ऋतं दिवे तद वोचं पृथिव्या इति द्वेइति॥ ॥अथ दश
मी॥ ऋतं दिवे तदवोचं पृथिव्या अभिश्रावाय प्रथमं सुमेधाः॥ पातामवद्याद्दुरितादभीके पिता माता च रक्षतामवोभिरिति॥
सुमेधाः शोभनप्रज्ञोहं दिवे द्युदेवतायै पृथिव्यै पृथिवीदेवतायै तत्त्व प्रीतिकरं स्तोत्रं प्रथमं मुख्यं नामैतत् प्रथमं प्रकृष्टतमं
अवोचं ब्रवीमि किमर्थं अभिश्रावाय। अभितः सर्वतः श्रवणाय किंच पिता पालको द्युलोकः माता सस्यदे निर्मात्री पृथिवीवामे

सुभयेभिरन्हां द्यावा रक्षतं पृथिवी नो अभ्वादिति॥ ॥अतप्यमाने अनीश्वरे तपैश्वर्यकर्मणा इदं रूपं यद्वा अतप्यमाने अन्यैरपी
डयमाने अवसा अन्नेन अवंती यं पसौ देवपुत्रे देवाः व्यवहर्तारो मनुष्याः पुत्रस्थानीया याः ताद्दृश्ये लोकद्वयस्था मनुष्या देवाश्च
त उपजीव्यत्वात् पुत्रा इत्युच्यंते। ईदृशावुभे रोदसी द्यावापृथिव्यौ देवानामह्नां एतद्द्वितीय उपलक्षतं। द्योतमानानामह्नां रात्रीणां च
संबंधिभिरुभयविधैः शीतोष्णादिरूपैर्विचक्षणैर्धनैर्निमित्तभूतैः तौ तेषां लाभायेत्यर्थः। तदर्थं युवामनुस्याम। अनुभावे
म। शिष्टो व्याख्यातः॥ ।।अथ पंचमी॥ संगच्छमाने युवती समंते स्वसारा जामी पित्रोरुपस्थे॥ अभिजिघ्रंती भुवनस्य नाभिं द्या
वा रक्षतं पृथिवी नो अभ्वादिति॥ ॥परस्परमुपकार्योपकारकत्वेन सहयुज्यमाने हविषो च परस्परमुपकारकभावः यद्वा पू
र्वं संस्कृष्टे एव सतोपश्चाद्वियुज्य हविर्हविषा अकुर्वतो पश्चान्मनुष्यैः प्रार्थिते द्वौ विवाहिते सत्यो संगते अभूतामित्याद्युः अ
यमर्थो द्यावापृथिवी सहस्तां मेत्यादि ब्राह्मणे समाम्नातः युवती नित्यतरुण्यौ मिश्रयंसौ वासर्वेषु भावेषु समंते समानान्तिके
समानपर्यंत सुदास्तराय परस्परं स्वसारौ भ्रातेजामी बंधुभूते प्रजापतेः सकाशात् सहोसन्नत्वात्। परस्परं जामित्वं तथा

अवघात्। निंदितात् दुरितात् दुःखप्रापकादंहसः सकाशात् पातां तं रक्षतां। तथा अभीके अभीके अंतिकनामैतत्। समी
प एवावोभिरभिमततर्पणैः रक्षतां पालयतां॥ ॥अथैकादशी॥ इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वां। भूतं देवा
नामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुमिति॥ ॥द्यावापृथिवी द्यावापृथिव्यौ इदमस्माभिः क्रियमाणं स्तोत्रं सत्यमस्तु अ
वितथं भवतु फलवद्भवत्वित्यर्थः। इदमित्युक्तं किं तदित्यत आह। हे पितः द्यौः हे मातः पृथिवि युवां प्रति इह अस्मिन् यज्ञे यत्
स्तोत्रमुपब्रुवे उपेत्य ब्रवीमि तत्सत्यमस्तु देवानां स्तोतॄणामस्माकं अवमे अंतिकनामैतत् असंनिहिते युवां वां अवोभिः तर्प
णैर्युक्तिभूतं भवतं अवशिष्टं गतं॥ ॥इति द्वितीयस्य पंचमे त्रितीयो वर्गः॥ ॥आ न इळाभिरिति सप्तमं सूक्तं एकादशर्चं आ
गस्त्यं त्रैष्टुभं वैश्वदेवं आनोवैश्वदेवमित्यनुक्रांतं विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ आ न इळाभिर्विदथे सुशस्ति विश्वानरः
सविता देव एतु। अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषेति॥ ॥नो विदथे अस्मदीये यज्ञे सुशस्ति सुपाठकं सुश
स्तिभिः शोभनशंसनैः स्तुतिभिः प्रहेयैः रातैः सह यद्वा इळाभिः तदाश्रितेषु ताछब्द्यं भूमिस्थानाभिर्देवताभिः सह विश्वानरः सर्व

प्रेष्ठं प्रियतमं सर्वेषामाह्लादनत्वात् हविर्वहनाद्वाग्निर्देवानां प्रियतमः यमतिथिं गृणीषे गृणे स्तौमि। व्यत्ययेन मध्यमः। के
न साधनेन शस्तिभिः स्तुतिभिः। कीदृशो हतुर्वणिस्तुर्वणिः शीघ्रमं भक्ता सजोषाः युष्माभिः सह प्रीयमाणः तमग्निं गृणीषे
यथा येन प्रकारेण नोस्माकं वरुणः एतन्नामको देवः सुकीर्तिः शोभनकीर्तिः मानमतसुकीर्ति भिक्षे वरुणस्य हरेरित्यादिमंत्रव
र्णेषु वरुणात् सुकीर्तिरेवेषणीया। अरिगूर्तः अरिषु युद्धात्सुसदा शब्दितः अरीणां हननाय याज्ञो वास्त्वरिः प्रेरयितायं वरुणः
र इषस्वान्नानि पर्यतसरपे तु तथा तमपि स्तुमइत्यर्थः॥ ॥अथ चतुर्थी॥ उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः॥
समाने अहन् विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन्निति॥ ॥हे देवाः वो युष्माकं नमसा हविषा नमस्कारेण वा उप उपे
त्य जिगीषा पापानां जिगीषया आ इषे इच्छामि इष गतावित्यस्य वेषे तेर्वा गत्याद्यर्थस्य लटि उत्तमैकवचने इदं रूपं भजामि। क
स्मिन्काले उषासानक्ता अहनि रात्रौ वा ते अप्यतिगच्छामि गतो दृष्टांतः सुदुघा धेनुरिव। सुदोग्ध्री धेनुर्यथा दोहायदो
ग्धुर्गृहमागच्छति तद्वत्। किं कुर्वन् सस्मिन् समाने ऊधन् ऊधसि उषस्ये विषुरूपे नानारूपे पयसि समन्तादिके अर्क

श्रीः
॥२८१॥

मर्चनीयमन्नं पशुपुरोडाशादिकं विमिमानः कस्मिन्काले समाने हन् षष्ठ्यहनि एकस्मिन्नेवाहनि सर्वदेवार्थः। एकस्मिन्ने
वाहनि समा ऊधस्य स्वर्त्तिर्नानारूपे पयसि वदर्थं हविर्मेमा उपगच्छामीत्यर्थः। यद्वा सस्मिन् सर्वस्मिन् ऊधसि फलाख्य
क्षीरासादके यज्ञे निमित्तभूते सति विषुरूपे पयसि नान्यरूपे सोमलक्षणोदके अर्कं मन्त्रसाधनं स्तोत्रं विमिमानोहं युष्मा
नभिगच्छामि॥ ॥अथ पंचमी॥ उत नोहिर्बुध्न्यो मयस्कः शिशुं न पिप्युषीवेति सिंधुः॥ येन नपातमपां जुनाम मनोजुवो वृष
णो यं वहन्तीति॥ ॥उत अपि च नोस्माकं महिः अंतरिक्षगामी अहन्ता वा अहीनो वा अहन्यमानो वा एतन्नामको देवाः
स एव बुध्न्यः बुध्न्यः बुध्नं बंधकमंतरिक्षं तदर्हतीति बुध्न्योंतरिक्षवाची एतन्नामको देवो मयः सुखं कः करोतु करोतु कुरो
तेर्लिङिरूपं किं च पिप्युषी व इव शब्द एवार्थः। पूरणीवा अस्मान्नश्वेन व्यापयंति सिंधुः नामत — धेनुः आगच्छतु तत
त्र दृष्टांतः। शिशुं नय यथा शिशुं न तथा शिशुमाप्यायति गौर्गच्छति। तद्वत्। अपां नपातं उ कृदृनामपत्ते ति पितारं कर्षक मेत
न्नामकं यद्वा दकाता नप्रास्रतीयं पुत्रं अद्भ्यः ओषधिवनस्पतयः तेभ्योग्निरिति नप्तृत्वं ते दृशमग्निं जुनाम संगच्छे मा जुइति

सौत्रो धातुरित्यर्थः। यद्वेवं मनोजुवो मनोवेगा वृषणः वर्षकामे घा अश्वा नावहंति सुसुखं करोतु॥ ॥इति द्वितीयस्य पंच
मे चतुर्थो वर्गः॥ ॥अथ षष्ठी॥ उत न ईं त्वष्टा गंत्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः॥ आ वृत्रहेंद्रश्चर्षणिप्रास्तुविष्टमो नरां
न इह गम्या इति॥ ॥त्वष्टा देवो पि नोस्मान् अच्छ अभिप्राप्नोतु। इदानीमेनं यज्ञं वा आगंतु आगच्छंतु आगत्य अस्मत्सहायो
प्राज्ञस्य बावर्तते। अत्र प्रशंसायां प्रज्ञस्त्वं यथा तथा अभिपित्वे अभिगंतव्ये यज्ञे निमित्तभूते सति सूरिभिः स्तोतृभि
र्त्विग्भिः सजोषाः समानप्रीतिर्भवत्विति शेषः। तथा वृत्रहा तीचर्षणिप्राः चर्षणीया मनुष्याः यजमानाः कामैः तेषां पू
रकः तुविष्टमो बहुतमो महत्तमः इहास्मिन्कर्मणि नरां नृणां नोस्माकं मुक्तगुणोपेतः सन् आगम्याः आगच्छतु॥ ॥अ
थ सप्तमी॥ ॥उत न ईं मतयोश्वयोगाः शिशुं न गावस्तरुणं रिहंति॥ तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसंतेति॥ ॥
उत अपि च ईं एवं तरुणं नित्ययुवानमिंद्रं मतयोस्मद्बुद्धयेअश्वयोगाः समानप्रासायां रिहंति अश्वादयंति स्तुवंतीत्यर्थः।
तत्र दृष्टांतः। गावो दोग्ध्र्यो धेनवः शिशुं न शिशुमिव तं तथा लिहंति। तदिदाह। तमींतमो तमो वे तं नरां नराणां यज

प्राणिहिंसकार्यग्निः सविता प्रेरक आदित्यश्च देव एतु आगच्छतु। हे युवानो नित्यतरुणाय इज्ञस्य मिश्रयितारो वायुर्यं नोस्मा
न् अभिपित्वे अभिषतनाये स्म घ्नंते मनीषा मनीषया मनसा इति श्रुतत्वेन स्वेच्छकृत्स्नं प्रपंचं मत्स्व थ मादयथ तथास्मान
पि। यद्वा जगच्छध्यो यजमानरूपमनुष्यं दावा। सर्वानपि यजमानान्मत्स्येयेत्यर्थः। वैश्वदेवे पशौ जानो विश्वइत्येषा हविषः पु
रोनुवाक्या॥ आ नो देवानामुप वेतु शंसः आ नो विश्व आस्क्रा गमंतु देवाइति॥ ॥सैषा द्वितीया॥ आ नो विश्व आस्क्रा गमंतु
देवा मित्रो अर्यमा वरुणः सजोषाः॥ भुवन्यथा नो विश्वे वृधासः करन्सुषाहा विथुरं न शवइति॥ ॥नोस्माकं यदेते विश्वे सर्वे देवाः
आस्क्राः शत्रूणामास्कंदयितारः। आक्रमयितारो वा आगमंतु आगच्छंतु। केत मित्रः अर्यमा मित्रश्च त्रयोपि सजोषाः सजोष
सः समानप्रीतयः संतु आगच्छंतु। किं तु विश्वे देवाः नोस्माकं वृधासो वर्धयितारो यथा भुवन् भवेयुः तथा सुषहाः सुष्टु शत्रू
णामभिभवेन नोस्मदीयं शवो बलं विथुरं हीनं तथा न कारां तं कुर्युः। तथा आगच्छंतु॥ ॥अथ तृतीया॥ प्रेष्ठं वो अतिथिं गृणी
षेग्निं शस्तिभिस्तुर्वणिः सजोषाः॥ असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिरिति॥ ॥हे देवाः वो युष्माकं

एषा सेना ह स्म त्सादका विध्वंस सर्वं भुवनं इरिणं तु षर प्रदेशं यथा तथा सर्वतः मुषायंत उत्सादयंतु। तत्र दृष्टांतः। सुदिने मेघावरणा
दिरहिते दिने शूरः अंधकारहिंसकः प्रकाश इव स यथा सर्वे नाम हयोति। तथा मरुत्सेना अहृष्या सर्वं मूषां करोति यदा मरुन्महिमावृ
ष्टिर्भवति तदा सस्यादि समृद्धौ सत्यां प्रयोगं कुर्वंति। तदा जयंति तदा मरुत्सेनाः सर्वा महामुदं तेष्येवं महानुभावा मरुत इति। तेषां
स्तुतिः॥ ॥अथ दशमी॥ प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि संति॥ अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृ
तीय देवान्॥ ॥हे ऋत्विजः अश्विनौ एतन्नामानौ देवौ बुद्धिरूप अवसे रक्षणाय प्रो कृणुध्वं स्तुतिप्रकर्षेणैव प्र पूषणं पो
षकमेतन्नामकं देवमप्यवसे प्रकर्षेण स्तुतिं कृणुध्वं। किंच। स्वतवसः स्वायत्तबलाः संति तानपि प्रकृणुध्वं। के ते अद्वेषः द्वेष
रहिता विष्णुर्व्याप्तः एतन्नामको देवः प्रथमम् मना हूतोपि न कुप्यतीति वक्तुमद्वेष इत्युक्तं तथा वातः सर्वत्र संचारी वायुः ऋभु
क्षाः पतिरिंद्रः एतानपि प्रकृणुध्वं। अतो हं स्वायत्तबलान् सर्वानपि देवान् सुम्नाय सुखाय अच्छ आभिमुख्येन स्तोत्रैर
भिवर्तयेयः॥ ॥अथैकादशी॥ इयं सा वो अस्मे दीधितिर्यजत्राः अपिप्राणी च सदनी च भूयाः॥ नि या देवेषु यतते वसूयुर्वि ॥ श्रीः ॥२८१॥

मिषं हुजनं जीरदानुमिति॥ ॥हे यजत्रा यष्टव्या देवाः वो युष्मत्संबंधिनी सेयं प्रसिद्धा दीधितिर्दीप्तिरस्मे अस्माकमपि प्राणी स
सर्वदा चेष्टयित्री सदनी च निवासवती च भूयाः। भूयात् भवतु। या दीधितिर्वसूयुः वसुमती देवेषु नि यतते नियमेन यत्नं करोति
तान् प्रकाशितुं सेव भूयात् विद्यामेति गतः॥ ॥इति द्वितीयस्य पंचमे पंचमो वर्गः॥ ॥पितुमित्येकादशर्चमष्टमं सूक्तं। आग
स्त्यमन्नदेवताकं गायत्रं आद्या नुष्टुप् गर्भो ष्णिक् आद्यो पंचत्रयोदशका अनुष्टुगर्भा विरक्तत्वात् तृतीया पंचमी षष्ठी सप्तम्येका
दशी चेति पंचानुष्टुभः। तथा चानुक्रमणिका। पितुं नन्नस्तुति गायत्रं त्वाद्यानुष्टुप् गर्भो इत्युक्तत्वात् तृतीया पंचम्या षष्ठी स
सप्तम्येकादशी चेति पंचानुष्टुभः। विनियोगः शौनक आह। पितुं न्वित्युपतिष्ठेत नित्यमन्नमुपस्थितं। पूजयेदशनं नित्यं भुंजी
नू॥ यादेवकुत्सयंस्तां नास्य स्यादन्नजो व्याधिर्विषमप्यमृतं भवेत्। विषं च पीत्वैतत्सूक्तं जपेत विषनाशनं॥ नो वाग्यत स्तु
भुंजीत नाशुचिर्न जुगुप्सितं। दद्याच्च पूजयेच्चैव जुहुयाच्च शुचिः सदा॥ क्षुद्भयं नास्य किंचित्स्यान्नान्नजां व्याधिमाप्नुया
दिति॥ ॥तत्र प्रथमा॥ पितुं नु स्तोषं महो धर्माणं तविषीं॥ यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयदिति॥ ॥अहमगस्त्यः तु क्षिप्रं

पितुं पालकमन्नं स्तोषं स्तौमि। महो महांतं धर्माणं सर्वस्य धारकं तविषीं बलात्मकं यस्य महतो लोकस्य धारकं अस्यान्न
स्योजसा बलेन सामर्थ्येन त्रितो विस्तीर्णतमः ख्यातकीर्त्तिः त्रिषु क्षित्यादिस्थानेषु तायमानो इंद्रो वृत्रं विपर्वं विच्छिन्नसंधि
कं यथा तथा र्दयत् हिंसितवान्॥ ॥स्वादो पितो मधो पितो वयं त्वा ववृमहे॥ अस्माकमविता भवेति॥ ॥हे स्वादो आस्वादनीय
पितो पालक मधो माधुर्योपेत पितो हे पानसाधनान्न वयं त्वा ववृमहे। सेवामहे अत्र सर्वान्तानामनुदात्तानां पूर्वस्य सा
मान्यवचनत्वेनाद्युदात्तत्वं अनुदात्तानां तु विशेषवचनत्वान्निघातत्वं सकलस्य तु शब्दस्य श्रवणं तस्य प्राशस्त्यख्यापनार्थं हे पि
तो अस्माकमविता तर्प्पयिता भव॥ ॥अथ तृतीया॥ उप नः पितवा चर शिवः शिवाभिरूतिभिः॥ मयोभुरद्विषेण्यः सखा सु
शेवो अद्वयाः इति॥ ॥हे पितो पितः त्वं शिवः मंगलः अतः शिवाभिः मंगलयुक्ताभिः ऊतिभिः रक्षणैः नो अस्मान् आ चर आ
गच्छ आगत्य च मयोभुः सुखस्य भावयिता अद्विषेण्यः अद्वेष्यरसः प्रियरससमर्थः सखा सखिवत् प्रियकारी सुशेवः अ
त एव सुष्ठु सुखकरः अद्वयाः द्वयरहिताः सखाय यथा मयोभुरद्विष्यश्च भवति तद्वत्त्वमपि भवेत्यर्थः॥ ॥अथ चतुर्थी॥ ॥

मानानां सुरभिष्टम अतिशयेन सुरभिः जनयः फलस्योत्पादयितारो गिस्त्नयो न संतत्या मुवंति नसतिर्व्याप्तिकर्मा। तत्र दृष्टांतः।
जनयो न उत्पादयित्र्यः पत्नीः पत्न्याः पतिमिव॥ ॥अथाष्टमी॥ उत न ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदंतु॥ पृषदश्वासो
ऽवनयो न रथा रिशादसो मित्रयुजो न देवाः इति॥ ॥उत अपि च नोस्मदादीनां अस्मदीयमेनं यागं वा मरुतः स्मत् सहापि सदंतु
गच्छंतु। कुतो देशात् यद्वा रोदस्याव पिगच्छतां। कीदृशास्ते मरुतः वृद्धसेनाः वृद्धबलाः। समनसः समानवयस्काः पृषदश्वाः पृ
षद्वर्णाश्वाः पृषत्यो मरुतामित्युक्तेः। अवनयो नु नाद्यो न मनस्वभावाः पथास्वभावाः रथवंतो वा मत्वर्थो लुप्यते। अवनयो
रक्षकारथा इव स्थिताः रिशादसः रिशाः शत्रवः तेषां मत्तारः मित्रयुजो देवाः न मैत्रीयुक्ता अन्ये न देवा यथा गच्छंति तद्वत्॥
अथ नवमी॥ ॥प्र नु यदेषां महिना चिकित्रे प्र युंजते प्रयुजस्ते सुवृक्ति॥ अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायंत सेना
इति॥ ॥एषां मरुतां महिना महिमा वृद्धिलक्षणोपेत यस्मात् प्रचिकित्रे प्रज्ञायते। यद्वेषां महत्त्वेन युक्ता नराः चिकित्रे जानंत्यनुष्ठेयं
नु इति पूरणः ततस्ते ज्ञातारः सुवृक्ति। सुपोसु पोसु सुष्ठु नानां प्रपुलः प्रयोगात् प्रयुंजते। अध अथ प्रयोगानंतरं यत् यस्मात्

तवत्येपितोरसारजांस्यनुविष्ठिताः॥दिविवाताइवश्रिताः॥ ॥हेपितोतवत्वत्संबंधिनःत्येतेस्वाद्वाम्लादिषड्रसाःरजांसिलोका
न्लोकस्थानादर्थान्ननुआनुकूल्येनविष्ठिताःविविधंस्थिताःविविधस्थिते।दृष्टांतः।दिविद्युलोकेंतरिक्षेश्रितावाताःवायवःत
थाआव्यासास्तइत्यर्थः॥ ॥अथपंचमी॥तवत्येपितोददतस्तवस्वादिष्ठतेपितो॥प्रस्वाद्मानोरसानांतुविग्रीवाइवेरतेइति॥ ॥हे
पितोपालकान्नत्येतेतवदार्थिनोनरास्तवभोक्तारोभवंतीतिशेषः।केतेनराःहेस्वादिष्ठस्वादुतमपितोपालकतवत्वदुतु
यहात्।तेत्वांददःप्रयच्छतोभवंति।यद्वातेपितोइत्यादरार्थमभ्यासेहिभूयांसमर्थंमन्यंते।किंचतवरसानांस्वादम्लादीनांषण्णां
स्वाद्मानःस्वादयितारोभक्षयितारएवतुविग्रीवाइवतुवीतिबहुनाम।प्रवृद्धग्रीवाएवप्रेरतेप्रकर्षेणागच्छंतिचरंति।इवशब्दए
वकारार्थः।पूरणोवाभूलोकेअत्तारएवदृढांगाभवंतीतिप्रसिद्धं।अनशनेहिग्रीवाअधोलंबते।यद्वातवरसानामत्तारःअ
संख्यातग्रीवाइवभवंति।रसानांबाहुल्यादितिभावः।एवंबहुरसोपेतमन्नमितितस्यस्तुतिः॥ ॥इतिद्वितीयस्यपंचमेष
ष्ठोवर्गः॥ ॥अथषष्ठी॥त्वेपितोमहानांदेवानांमनोहितं।अकारिचारुकेतुनातवाहिमवसावधीदिति॥ ॥हेपितोमहानां

पूज्यानांमहतांचदेवानांइंद्रादीनांमनास्त्वेत्वयिहितंनिहितंअकारिअमृतमितिविहायत्वय्येववर्त्तंतेहिपितोतवचारुस
मीचीनेनकेतुनात्वत्कृतेनप्रज्ञानलक्षणेनअवसारक्षणेनअहिंमेधंवृत्रंवाअवधीदहतवानिंद्रः।अन्नमयंहिसोम्यम
नइतिश्रुतेः।अथवात्वयिकेतुनाजगद्रक्षणेननिमित्तेनेतियोज्यं।जगद्रक्षणार्थंहिदेवाहिर्म्रियते॥ ॥अथसप्तमी॥यद्दो
पितोअजगन्विवस्वपर्वतानां॥अत्राचिन्नोमधोपितोरंभक्षायगम्याइति॥ ॥हेपितोऽन्नयद्यदादिवस्वसुपोलुक्।अ
न्यालोपश्छांदसः।विवासनवताविद्युद्रूपप्रकाशनवताविबोधनंउदकलक्षणंधनवतांवापर्वतानांमेघानांसंधिअदःप्रसि
द्धंतदुदकंअजगन्अगमत्गच्छेत्आगच्छेत्अत्रचित्अस्मिन्कालेनोस्मान्हेमधोहेपितोमाधुर्योपितान्नत्वंनोस्मा
न्अरंअलंसंपूर्णंभक्षयाभक्षणायगम्याः।गच्छसंनिहितोभव॥ ॥अथाष्टमी॥यदपामोषधीनांपरिंशमारिशामहे॥वा
तापेपीवइद्भवेति॥ ॥यत्यनअपामोषधीनांपरिंशंपरितःसुखकरमन्नमारिशामहे।आस्वादयामः।ननानोदक
सारेणवातापेवातेनप्राणेनाप्नोतिस्वनिर्वाहमितिवैतेनाप्यायय।तद्इतिवा।वातापिशरीरंहेशरीरत्वंपीवइत्आप्यायितं।

विषां सहस्रं हे यितारं न केवलं देवेभ्य एव किंतु सधमादं अस्माभिः सह मादयितारं कृतशोषरूपं वातां अस्मभ्यमर्थमपि ॥ ॥
इति द्वितीयस्य पंचमे सप्तमो वर्गः ॥ ॥समिद्धो अद्येत्येकादशर्चं नवमं सूक्तमागस्त्यं पूर्ववद्गायत्रं। समिद्धाग्नितनूनपादादयः
एकादशेत्यूचं देवताः यास्केन किंदेवताः प्रयाजा इत्युपक्रम्याग्नेयाः प्रयाजा ऋतुदेवताः छंदोदेवताः पशुदेवताः प्राणदेवताः आ
त्मदेवता इत्युपन्यस्य ब्राह्मणानि व प्रदर्श्याग्नेया एवेति सिद्धांतितं समिध्य आप्य इत्यनुक्रांतं। पशौ वागस्त्यानामेकादश
प्रयाजरूपमिदमाप्रीसूक्तं॥ ॥तत्र प्रथमा॥ समिद्धो अद्य राजसि देवो देवैः सहस्रजित्॥ दूतो हव्या कविर्वहेति॥ ॥हे अग्ने
देवैर्हव्यकर्तृभिः ऋत्विग्भिः समिधः सम्यग्दीपितः देवः अतएव दीप्यमानः प्रसिद्धैर्वा देवैः संहितः समिद्धः सन् अद्यास्मि
न् यागदिने राजसि ईशिषे। हे सहस्रजित् सहस्रस्य धनस्यैतत्संख्यानां शत्रूणां वा जेतः। ततः दूतः देवानां दूतत्वात् यत्ता
द्विवार्तहरः आहूतो वाग्निर्देवानां दूत आसीदिति श्रुतेः कविः क्रांतदर्शी ईदृशस्त्वं हव्यानि अस्मदीयानि हवींषि वह
देवेभ्यः प्रापय॥ ॥अथ द्वितीया॥ तनूनपादृतं यते मध्वा यज्ञः समज्यते॥ दधत्सहस्रिणीरिषइति॥ ॥तनूनपात् यत

शरीरस्य नपातयितः यद्वा आपो तनूच्य इत्युक्तत्वादपां नपातयिता तासां नेता वा ऊर्जः ओषधय ओषधीभ्योऽग्निरिति नबू
लं यज्ञः यज्ञः पूज्यः यज्ञनिर्वाहको वा यज्ञः ईदृशोऽग्निः ऋतं यज्ञाय ते गच्छते अनुतिष्ठते यजमानाय तदग्निमतार्थं मध्वा मधुरे
णाज्यसोमादिद्रव्येणा समज्यते। किं कुर्वन्नपां सह स्रिणीः एतत्संख्याकानि इषोन्नानि दधत् यजमानेभ्यो धारयत्॥ ॥
अथ तृतीया॥ आजुह्वानो न ईड्यो देवाँ आ वक्षि यज्ञियान्॥ अग्ने सहस्रसा असीति॥ ॥हे अग्ने आजुह्वानः अस्माभिरा
हूयमानः सन् ईड्यो स्माभिः स्तुत्यः इ एतन्नामकस्त्वं नोस्मदर्थं यज्ञियान् यज्ञभाजो देवान् आवक्षि आवह। हे अग्ने त्वं सहस्रसा असि
अपरिमितस्य धनस्य दातासि॥ ॥अथ चतुर्थी॥ प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन्॥ यत्रादित्या विराजथेति॥ ॥प्राचीनं प्रा
गग्रं सहस्रवीरं सहस्रसंख्याका वीराः शत्रूणां विशेषेणेरयितारो देशा यस्य तेनादृकृ यद्वा अपरिमितवीरः पुत्रादयो येन तादृशं ब
र्हि ओजसा मित्र उक्षणा बलेनोपेता ऋत्विजः अस्तृणन् आच्छादयन् यत्र यस्मिन् बर्हिषि। हे आदित्या अदितेः पुत्रा यूयं विराज
थ विविधं राजथ तद्बर्हिन्नस्तृणन्॥ ॥अथ पंचमी॥ विराट् सम्राड्विभ्वीः प्रभ्वीः बह्वीश्च भूयसीश्च याः॥ दुरो घृतान्यक्षरन्निति॥ ॥

विराट्‌विशेषेणराजत इतिव्यत्ययेनैकवचनं सम्राड्सम्यगितितरांराजमाने: अत्रापिव्यत्ययेनैकवचनंविभ्वी।विभ्वी।विविधं
भविव्यः प्रभ्वीः प्रभ्वः प्रकर्षेण भविव्यःव ह्वीर्बह्व्यः भूयसी लोकप्रसिद्धाः संख्याभिश्च भूयस्यश्चयाउरोयज्ञग्रहद्वारः संति।ता
न्यूतान्यूदकानिप्राप्यु पकारार्थमक्षरन्नक्षरंति।यद्वा बह्वी भूयसी रिसेतेसंख्यावचनेशिष्टानितास्सांनामधेयानि॥ ॥इतिद्विती
यस्य पंचमे ष्टमोवर्गः॥ ॥अथषष्ठी॥सुरुक्मेहिसुपेशसाधिश्रिया विराजतः॥ उषासावेहसीदतामिति॥ ॥सुरुक्मेशोभनदीप्ति
भरणे प्रसिद्धे सुपेशसाशोभनेरूपे।ईदृशावहे।रात्रेदेवतेअधिअधिकंश्रियासौंदर्येण विराजतः विशेषेणदीप्यते।हियोगा
दनिघातः।तादृश्याःवुषसौ एतशब्देरस्य पलक्षणांउषःशब्देदेवसस्योपुलक्षणंरात्रिरूपाश्चोभेइहास्मिन्न्दिनेअवसीदतां
आगत्यतिष्ठतांआगछतांवा॥ ॥अथसप्तमी॥ प्रथमाहिसुवाचसाहोतारादैव्याकवी॥ यज्ञंनोयक्षतामिममिति॥ ॥प्रथमामु
ख्यनामितत्प्रत्तमौप्रकृष्टतमौहिप्रसिद्धौसुवाचसाप्रियवचनौदैव्यादेवानामाह्वातारौहोमनिष्पादकौवाकवीमेधावि
नौएतौनोस्मदीयमिमंयज्ञंयक्षतायजतांगछतांवा॥ ॥अथाष्टमी॥ भारतीळेसरस्वतियावःसर्वाउपब्रुवे॥ तानश्चोदयतश्रिये॥ ॥

एवअन्तोदकाभ्यांशरीरव्रधिः प्रसिद्धायद्वायद्यप्यपामोषधीनांपरिंशल्लेशमास्वादयामः।तथापिहेवातापेवाताप्रेमवत्सर्व
व्यापकपितोत्वमपितोत्वमपिपीवःपीवानेवभव॥ ॥अथनवमी॥ यत्तेसोमगवाशिरयवाशिरोभजामहे॥ वातापेपीवइद्भवेति॥ ॥
पूर्वमन्त्रसामान्येनस्तुत्वदानींसोमलक्षणमन्त्रंस्तौति।हेसोमतेतवतमंशं।गवाशिरःगोविकारक्षीराद्याश्रयणद्रव्यायवाशि
रःयवाद्याशिरःद्रव्याश्रयेश्चवयंभजामहे।वातापेपीवोभव।यद्वातेनांशेनवातापेउक्तस्वरूपशरीरेपीवोभव॥ ॥अथदशमी॥
करंभओषधेभवपीवोवृक्कउदारथिः॥ वातापेपीवइद्भवेति॥ ॥करंभःयःकरंभादिरूपःसक्तुपिंडोस्तितदात्मकहेओषधेत्वं
पीवःस्थौल्यवान्वृक्कः व्याध्यादिवर्जितोभव।उदारथिःउर्ध्वगमनसाधनःइंद्रियाणामुद्दीपयिताभव।विशिष्टोगतः॥ ॥
अथैकादशी॥ तंत्वावयंपितोवचोभिर्गावोनहव्यासुषूदिम॥ देवेभ्यस्त्वासधमादमस्मभ्यंत्वासधमादमिति॥ ॥हेपितोअ
न्नसोमरूपतंतादृशंत्वांमहानुभावंवचोभिःस्तुतिवाग्भिःवयंसुषूदिमक्षारयामोरसान्॥ तत्रदृष्टांतःगावोनहव्या
गावइवहवींषिउसादयंतितथात्वत्सकाशात्।सोमसुषूदिमकिमर्थंकीदृशंचेतिचेतदुच्यते।देवेभ्यइंद्रादिभ्यःतदर्थंसधमा

हे भारति भरत आदित्यः तस्य संबंधिनी भारती तादृशी द्युलोकदेवते। हे इळे भूदेवि हे सरस्वति सरतीति सरो वायुरुदकं।
वा तद्वत्यंतरिक्षे देवते तादृशि देवि एताः तिस्र इळादिदेवताः एतास्तिस्रः आदित्यप्रभावविशेषरूपा इत्याहुः। यास्तिस्रः सर्वा
यो युष्मान् उपब्रुवे उपेत्यास्तौमि ता यूयं नोस्मान् श्रिये संपदे चोदयत प्रेरयत॥ ॥अथ नवमी॥ त्वष्टा रूपाणि हि प्रभुः पशू
न्विश्वान्समानजे॥ तेषां नः स्फातिमा यजेति॥ ॥त्वष्टा यज्ञसाधनपात्राभिमानी देवो रूपाणि योनौ स्रष्टा निरेतोसि रूपाणि
कर्तुं हि। हिशब्दात् त्वष्टृत्वं तत्प्रसिद्धिद्योतनार्थः। प्रभुः यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोतीति श्रुतेः। स देवो वि
श्वान् सर्वानपि पशून् अस्मदीयान् गवादिकान् समानजे सम्यगनक्ति व्यक्तीकरोति। सपूर्वादनक्तेर्लिटि तस्मान्नुडिति नुट्। अ
थ प्रत्यक्षः। तेषामस्माकं पशूनां स्फातिं वृद्धिं नोस्मदर्थमायज सर्वतः पूजय कुर्वित्यर्थः॥ ॥अथ दशमी॥ उप त्मन्या वनस्पते
पाथो देवेभ्यः सृज॥ अग्निर्हव्यानि सिष्वददिति॥ ॥हे वनस्पते यूपाभिमानिदेव त्मन्या आत्मनैव देवेभ्यः स्वादिभ्यः पाथः
पशुरूपमन्नं उपसृज उत्सादय। यूपाभावे पशुनियोजनाभावे हविषो भावत्वेप्येवं कृतवति सति अग्निर्हव्यानि हवींषि सि

स्वदतु। स्वदयतु। स्वादु करोतु॥ ॥अथैकादशी॥ पुरोगा अग्निर्देवानां गायत्रेण समज्यते॥ स्वाहाकृतीषु रोचते इति॥ ॥अ
यमग्निः देवानां पुरोगाः असुरयुद्धं प्रति पुरोगामी। यद्वा देवानां मध्ये यज्ञं प्रत्यग्निरेव पुरोगामी अत एवाग्रणीत्वादेवाग्नि
शब्दनिष्पन्न अग्निः कस्मादग्रणीर्भवतीति निरुक्तं। तादृशोऽयं गायत्रे एतदुपलक्षितेन मंत्रेण समज्यते सम्यग्व्यज्यते स्वा
हाकृतीषु स्वाहाकारेषु संस्कृहविष्षु दीयमानेषु रोचते अयं दीप्यते एताः प्रयाजदेवताः यज्ञावयवाभिमानिनः तथाद्वारा
यज्ञ एवात्र स्तूयत इति केषांचिन्मतं। अग्नेरेव नामांतरमित्यन्ये॥ ॥इति द्वितीयस्य पंचमे नवमो वर्गः॥ ॥अग्ने नयेति दशर्चं
सूक्तमप्यर्चमागस्त्यं त्रैष्टुभमाग्नेयं। अग्ने नयाष्टावाग्नेयमित्यनुक्रमणिका। प्रातरनुवाकाश्विनशस्त्रयोः त्रिष्टुप्छंदसि वि
नियोगः। अथैतस्या उत्सत्राग्नेनयाग्ने बृहन्नित्यस्याः सुत्तमास्तिस्र उद्धारयन्ति सूत्रितत्वात्। अत्र शौनकः। उत्पथप्रति
पन्नो योऽत्र होता वापि पथः च्युतः। पंथानं प्रतिपद्येत कृत्वा वा कर्म गर्हितं। अग्ने नयेति सूक्तेन प्रत्यृचं तु जुहुयाद्घृतं।
जपेद्वा प्रयतो नित्यमुपतिष्ठेत चानलमिति॥ आद्यास्तिस्रः श्रावणकर्मणि विनियुक्ताः श्रावण्यां पौर्णमास्यामित्यत्र सू

परिचरेम कुर्मः॥ ॥आयुःकामेष्ट्यां अग्ने त्वं पारयेति द्वे स्विष्टकृतो याज्ये पाहि न इति चतुर्थी॥ अनुवाक्या पाहि नो अग्ने पायु
भिरजस्रैः अग्ने त्वं पारया नव्यो अस्मानिति संयोज्ये इति हि सूत्रितं। एत एव स्वस्त्ययन्या पथि संयाज्ये इति सूत्रित्वात्तत्र॥ ॥
सैषा द्वितीया॥ अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा॥ पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तन
याय शं योरिति॥ ॥हे अग्ने त्वं नव्यो नवतरः स्तुत्यो वा स अस्मान् यागानुष्ठातॄन् पारय कर्म समापय्याति पारय अतिक्र
मिकेन साधनेन स्वस्तिभिः पूजितः सुशब्दः शोभनवचनः अस्यं तं पूजितैर्यज्ञादिसाधनैः कानि दुर्गाणि दुर्गमनानि पापा
नि अनतिक्रमणीयानि दुरिताख्यानि अतिपारय। किंच। नोस्माकं पृथ्वी पृथुतरा पूश्च पूर्यपि भवत्विति शेषः। चशब्दो व
क्ष्यमाणेन सहस्समुच्चयार्थः। पूरिति जात्येकवचनं। पूरण्यापि भवंत्वित्यर्थः। तथा नोस्माकं उर्वी पृथ्वी बहुला समस्त्यादिना ब
हुतरा भवतु तोकाय पत्याय तनयाय पुत्राय तोकशब्दोपत्यसामान्यवचनः। तनयशब्दः पुत्रवचनः। शं सुखं च योर्मिश्रयि
ता भव। यद्वा रोगाणां शमनं भयानां यावनं भव कुर्वित्यर्थः॥ ॥अथ तृतीया॥ अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्य

मंत कृष्टीः॥ पुनरस्मभ्यं सुविताय देव क्षां विश्वेभिरमृतेभिर्यजत्रेति॥ ॥हे अग्ने त्वं अमीवा रोगान् अस्मत् अस्मत्तो युयोधि
व्यावर्तय। अनग्नित्राः अग्निना अपासिताः कृष्टीः। प्रजा अभ्यमंत। अभिमंते स्मात् यच्छब्दो ध्याहारादनिघातः तां युयोधि। य
द्वा नः अनग्नित्राः पापिष्ठाः कृष्टयः प्रजाः अभ्यमंत त्वं बाध्यमितुं अभितो रोगैः प्रापयितुमर्हति। वयं तु नतादृशाः अतोस्मत्तो
वियोजयेत्यर्थः। न केवलं वियोगमात्रं अपि तु पुनः पुनरिदं कर्तव्यं अस्मभ्यं अस्मदर्थं सुविताय शोभनफलाय हे यजत्र यष्ट
व्य द्योतमानाग्ने विश्वेभिरमृतेभिः सर्वैरमरणधर्मभिः अन्यैर्यष्टव्यैः क्षां पृथिवीं देवयजनलक्षणां आगच्छेति शेषः॥ ॥पा
हि न इत्यस्या विनियोगद्वयमग्ने त्वं पारयेत्यत्रोक्तं। तथाग्नेयपशावेषैव हविषानुवाक्या तथा च सूत्रितं॥ पाहि नो अग्ने पायु
भिरजस्रैः प्रवः शुक्राय भानवे भरध्वमिति॥ ॥सैषा चतुर्थी॥ पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वा
न्॥ मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वरिति॥ ॥हे अग्ने नोस्मान् अजस्रैः अनवरतैरविच्छिन्नैः पायुभिः पा
लनप्रकारैः पाहि पालय उत अपि च प्रिये सदने प्रियभूते यागगृहे आ सर्वतः शुशुक्वान् दीप्यमानो भवेति शेषः।

किंच हे यविष्ठ युवतम। ते तव जरितारं स्तोतारं मा गरितारं नु नमघप्तयं मा विदत्। मा लप्सतां मा प्राप्नोतु। हे सहस्वः बल
वन्न् अपरम् परस्मिन्काले भयं च मा विदन्॥ ॥अव्कृतप्नो मादिकपालः पुरोडाशहोमे मानो अग्न इत्यनया यांशंक्तिपमभि
जुहोति॥ ॥सेषा पंचमी॥ मानो अग्ने वसृजो अघायाविष्यवे रिपवे दुच्छुनायै॥ मा दत्वते दशते मादते नो मा रीषते सहसा
वन्पराद्वा इति॥ ॥हे अग्ने नोस्मान् अघाय हिंसाय अविष्यवे अविष्यन्ति रक्तिकर्मा भक्षे छवे दुच्छुनायै पैशुनं सुखं दुष्ट
सुखकारिणां दुःखकारिण इत्यर्थः। तस्मै रिपवे वैरिणे मा वसृजः मा त्याक्षीः। तदधीनान् मा कुर्वित्यर्थः। तथा नोस्मान् दत्वते
दंतवते दशते खादते सर्पादयो मा वसृजः तथा नोस्मान् अदते अदंभकाय श्रृंगादिभिर्वर्तनैर्मा वसृजः तथा रिषते हिंस
काय तस्कराभासाय। सहसावन् मा परादाः परा घृतं मा देहि सर्वथा न देहीत्यर्थः॥ ॥इति द्वितीयस्य पंचमे दशमो वर्गः॥ ॥
अथ षष्ठी॥ विघत्वावां ऋतजात यंसद्‌गृणानो अग्ने तन्वे वरूथं॥ विश्वाद्रिरिक्षोरुत वा निनित्सो रभिद्रुतामसि हि देव वि
ष्यड् इति॥ ॥हे ऋतजात यज्ञार्थं सुसमं वरूथं वरूणीयं त्वा तन्वे शरीर पोषये गृणते स्तुवन् त्वा वा नत्वया देवतया तज्ञान्

आ

श्रीः
॥२९८॥

तं। अग्ने नय सुपथा राये अस्मान्। पाहि नो अग्ने पायुभिरजस्रैरिति। आग्राग्रायणीये ष्ट आग्राग्नेयस्यानुवाक्यासे वोदयनी
ये याज्या तदहः प्रायणीयेष्टिरित्यत्र सूत्रितं। अग्ने नय सुपथा राये अस्मानिति तिसृभिः प्रसृचं जुह्वेति। आग्नेय पशो वपा
पुरोडाशयो रांधेहे आनुवाक्ये। तथा च सूत्रितं। अग्ने नय सुपथा राये अस्मान्। पाहि नो अग्ने पायुभिरजस्रैरिति। आग्रा
प्रायणीयेष्टिरित्यष्टत्र सूत्रितं। अग्ने नय सुपथा राये अस्मानादेवानामपि पंथामगन्मेति। विपरीताश्च याज्यापुरोनुवा
क्या इति च॥ ॥तत्रे सूक्ते प्रथमा॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्य स्मज्जुहुराण
मेनो भूयिष्ठां ते नम उक्तिं विधेमेति॥ ॥हे अग्ने अंगनादिगुणविशिष्ट देव द्योतमान विश्वानि वयुनानि सर्वाणि प्रज्ञाना
नि अतेनैतदनुष्ठितमिदं प्रापणीयमिति यद् ततज्ज्ञापनमस्ति तद्विद्वानित्यर्थः। यतो विद्वान् अतस्त्वमस्मान् सुपथा शोभ
नेन मार्गेण राये गंतव्याय स्वर्गाय द्वितीयार्थे चतुर्थी प्रापणीयं रयिं प्रति नय तादर्थ्यं जुहुराणं कुटिलकार्येनः पापफल
प्रतिबंधकरूपमस्मत् अस्मत्तो युयोधि पृथक् कुरु। ते तव वयं भूयिष्ठां अप्रतिहक्षां नम उक्तिं नमस्कारोक्तिं स्तुतिं विधेम

नो वियंसत्। विमुंचति। स्वस्वात्मानं। कस्मात्सकाशात् रिरिक्षोः हिंसितुमिच्छोः घोरादेः सकाशात् उत वा अथवा निनित्सोः निंदितु
मिच्छतः। हे देव अग्ने द्रुतां आभिमुख्येन कुटिलं कुर्वतां द्विषां विष्वग्विशेषबाधको सि हि अतस्त्वदनुग्रहाद् यं जनो पि यंसत्॥
अथ सप्तमी॥ त्वं तौं अग्न उभयान्वि विद्वान्वेषि प्रपित्वे मनुषो यजत्र। अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः इति॥
हे जयत्र यष्टव्याग्ने त्वं तानुभयान् मनुषो मनुष्यान् विविद्वान् प्रपित्वे सन्निहित एव काले वेषि कामयासे यष्टॄन् तथा
कुर्वन् अक्रमिना त्वमनाचव षष्ठ्यर्थे चतुर्थी। मनुष्यस्य यजमानस्य अभिपित्वे अभिप्राप्तकाले आभिगमन भवति यज्ञे वा शा
स्यो भूः शिक्षणीयो भव इदं कुर्विदं कुर्विति विधेयो भव मर्मृजेन्यः। साधयिता यजमानः उशिग्भिः कामयमानैः ऋत्विग्भिर्वो॥
अथाष्टमी॥ अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ॥ वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदा
नुम् इति॥ ॥वयं अस्मिन्नग्नौ निवचनानि नियमपूर्वकारीणि वचांसि स्तोत्राणि अवोचाम ब्रूमः। अग्निर्विशेष्यते। मानस्य
सूनौ सहस्वने त्रराणां मभिभवितरि अवोचाम वयमेभिर्ऋषिभिरतींद्रियार्थप्रकाशकैर्मंत्रैः साधनैः सहस्रमपरिमितं

धनं समं नैभजेमहि विद्यामेत्यादि गतं॥ ॥इति द्वितीयस्य पंचमे एकादशो वर्गः॥ ॥अनर्वाणमित्यष्टर्चमेकादशं सूक्तमागस्त्यं
बार्हस्पत्यं त्रैष्टुभं अनर्वाणं बार्हस्पत्यमित्यनुक्रांतं शौनकविनियोगो लैंगिकः। अत्र शौनकः। स्तावाजपेतानर्वाणं नमस्यं बृहस्प
तिं॥ वीरं धनं च प्राप्नोति सुश्लोकाय नियच्छति॥ ॥तत्र प्रथमा॥ अनर्वाणं वृषभं मंद्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः॥ गाथान्यः
सुरुचो यस्य देवा आशृण्वंति नवमानस्य मर्ताः॥ ॥हे होतर्नव्यं नवतरं स्तुत्यं वा तमनर्वाणं गंतारं स्तोतुरधीनमित्यर्थः वृष
भं अपां फलानां वर्षितारं मंद्रजिह्वं मादकवाचं बृहस्पतिं मंत्रस्य पालयितारं एतन्नामकं देवं अर्कैः स्वसाधनैर्मंत्रैर्वर्धय
प्रवृधं कुरुतः शोभनदीप्तिर्नवमानस्य स्तूयमानस्य कर्मणि कर्मणि कर्तृप्रत्ययः यस्य बृहस्पतेः कर्मणि षष्ठ्यः। रोचमानं
स्तूयमानं गाथान्यः गाथेति वाङ्नाम स्तुतिर्वा सो नेतारो व्यवहर्तारो मर्त्या मनुष्या होत्रादयः यद्वा नवमानस्य यजमा
नस्य संबंधिनस्ते आशृण्वंति आश्रावयंति पुरातनं बृहस्पतिं वर्धय। अत्र नवमानमघस्य तमन्यस्मिन्नित्यादिकं नि
रुक्तं द्रष्टव्यं॥ ॥बार्हस्पत्ये पशौ तमृत्वियेतेषां च याज्या। सूत्रितं च। बृहस्पते अतियदर्यो अर्हात् तमृत्विया उपवाच

नेनोपेत्य क्रियमाणं स्तुतिं नमसो हविर्लक्षणस्यान्नस्योद्यतिं उद्धारं च श्लोकं। अन्यो यो मंत्रविशेषोस्ति तं च प्रयंसत् प्रकर्षेण
यतते स्वीकर्तुं यजमानात् तत्सर्वं प्रयच्छति अस्मै तत्र दृष्टांतः सवितेव सूर्य इव। स यथा स्तोत्रादिकं स्वीकरोति। तद्वत् यजमानात् प्र
दानःपक्षे सविता सूर्य इव स यथा बाहुल्यः प्रकाशादि प्रयच्छंति। तद्वत् बाहू बाहुभ्यां यजमानोपीत्यर्थः। तस्य सहत्वमाह। अर
क्षसः स्वविरोधिरक्षोरहितस्यास्य बृहस्पतेः क्रत्वा कर्मणा सामर्थ्येनाहन्यो न्विको धुर्यः स्र्योस्ति स भीमो न मृग एव भयजन
कः सिंहादीनेव भीमो भयहेतुः स्तुविष्मान् परिघ्नमतीति विशेषः। यस्य माहात्मनो मंत्राभिमानिनो बृहस्पतेः सामर्थ्यात्। मं
दुहा घस्तुरजित्वाति तेजस्य श्लोको दिवीयते पृथिव्यामत्यो न यंसद्यक्षभृद्विचेताः। मृगाणां न हेतयो यंति चेमा बृहस्पतेरहिमा
याँ अभि द्यून् इति॥ ॥अस्य बृहस्पतेः श्लोकः स्तुत्यात्मिका कीर्त्तिः गर्जितवाग्वा दिवि द्योतमाने द्युलोके पृथिव्यां च ईयते गच्छति
व्याप्नोति यो बृहस्पतिरत्यो न अतनशील आदित्य इव यक्षभृत्। पूजितं हविरादिकं दधानः विचेताः विविधं चेतयिता प्राणि
नां विविधप्रज्ञायुक्तो वा यंसत् नियच्छति फलं किंच मृगाणां हंतुमन्विष्यतां हेतयो न आयुधानीवास्य बृहस्पतेरिमा हेतयः। श्रीः ॥२९०॥

हिंस्र्याण्यायुधानि यंति गच्छंति च। च वा योगे। तिन विघ्नतः। अहिमायान् अगत्य हंत्र्या अंतरिक्षवारिण्यो वा माया येषां वृत्रादीनां तान
सुरान् द्यून् दिवसान् कालाध्वनोरिति द्वितीया तान्यायुधान्यभिलक्षयति। च उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥ ॥अथ पंचमी॥ ये त्वा
देवोस्त्रिकं मन्यमानाः पापा भद्रमुपजीवंति पज्राः। न दूढ्ये३ अनु ददासि वामं बृहस्पते चयस इत्पियारुमिति॥ ॥हे देव बृहस्पते पापाः
पापबुद्धयः अल्पाः पज्राः हविर्लक्षणान्नवंतः पापेन जीर्णा वा नराः भद्रं कल्याणं वा त्वां उस्त्रिकं उस्रियेति॥ अल्पं यावंत इत्यर्थः।
दूढ्ये दुर्ध्ये येव चनव्यस्त्ययः। दुर्बुद्धिस्य स्तेभ्यो वामं वननीयं धनं नानुददासि। अनुकूलं न विचरसि। हे बृहस्पते देवपियारुं सो
मपानशीलं सोमं न यष्टारं महाफलरिक्षं नु चयस इत् गच्छस्त्ते च। अनुगृहीतुं चयगतौ विसर्गस्य दं रूपं। यद्वा बृहस्पते पियारुं
हिंसकं। पीयते हिंसाकर्मणा इदं रूपं प्राणिहिंसकं चयस इत् हंस्येव। बृहस्पते यज्ञे तयसि देवपीयुमिति निरुक्तं॥ ॥इति द्वितीय
स्य पंचमे द्वादशो वर्गः॥ ॥अथ षष्ठी॥ सुप्रैतुः सूयवसो न पंथा दुर्नियंतुः परिप्रीतो न मित्रः। अनर्वाणो अभि ये चक्षते नो पीवृ
ता अपोर्णुवंतो अस्थुरिति॥ ॥हे ब्रह्मणस्पते त्वं सुप्रैतुर्मनुष्यस्य सूयवसः शोभनान्नस्य पंथानं मार्ग इव सुष्ठु यज्ञमार्ग

गामिनो यजमानः सुयवसः पंथाइव भवतः सुखकारी भवेत्यर्थः॥ किंच दुर्नियंतुः दुःखेन नियंमितुं राज्ञः परिप्रीतः सर्वप्रकारे
णा संतुष्टः द्वेषादिरहितो मित्रो न सुहृन्मैत्रीं वसन् यथा पुनर्याति वर्तये तितद्वत्त्वमपि तथास्मभ्यं कुर्वित्यर्थः॥ सखिवदमा
गान्ति वर्त्से मार्गे पश्वादिरूपे यो जेन्यत्वात्तत्रापि फलप्रदो भवेत्यर्थः॥ किंच अनर्वाणः अपापोयेनरानोस्मानभि आभिमुख्येन च
क्षते अभिवदंति ते पीहृताः॥ आत्वादिना रक्षिता अपि अपोर्णुतः अपगतरक्षणा भवंति॥ ॥संयुस्तु भइसेषाबार्हस्पत्ये पशौ
पुरोडाशस्य याज्यास्तु त्रितं च संयंस्तुभ्यो वनयोनयंत्से वापित्र इति॥ ॥सेषा सप्तमी॥ संयंस्तुभो वनयो नयंति समुद्रं नस्र
वतो रोधचक्राः॥ सविद्वाँउ भयं चष्टे अंतर्बृहस्पतिस्तर आपश्च गृध्रइति॥ ॥यं बृहस्पतिः स्तुभः स्तोत्राणि अवनयो नस्रवा
पि अवनयो मनुष्यामनुष्या यथा स्वामिनं कर्म प्रतिवासयंति। संगच्छंति तद्वत् तथा समुद्रं रोधचक्राः नदीनामैतत्। रोधन
शीलानि चक्राणि यासु ताः तादृश्यः कूलंकममाणा यास्रवतः स्रवंतो नद्यो यं यांयंति तद्वत् सर्वे अपि स्तुतयः यमेव प्राप्नुवंति
गृध्रः गर्धनशीलवृष्टिमाकांक्षमाणः स बृहस्पतिः विद्वान् वक्ष्यमाणाभिज्ञः तरतरणं जलाभिवृष्टि अपां अपः उदकानि। वामस

सचंत इति॥ ॥सेषा द्वितीया॥ तस्यां त्विया उपवाचः सचंते सर्गो न यो देवतया मसर्जि॥ बृहस्पतिः सद्धंजो वरांसि विभ्वा भवत्सम्
ते मातरिश्वेति॥ ॥तं बृहस्पतिं ऋत्वियाः वर्षर्तुसंबंधिन्यो वाचो माध्यमिका उपसचंते समीपे सेवंते। यः सर्गो न उदकस्य स्रष्टा
पि। न शब्दो प्यर्थः देवयंतां देवानिच्छतां यजमानानां असर्जि फलाय। यद्वा देवत्वमिच्छतां मनुष्याणां असर्जि स्वष्टवान्। वृष्ट
दकं यद्वा ऋत्वियाः प्राप्तकालीना वाचः होत्रादिप्रेरिता वाचः उपसचंते तां यः सर्गो न उदकस्य स्रष्टा इव विवसः एव बृहस्पतिः। अंजो
हि यं जपः खलु तस्मिन्वर्षति सर्वे भवंति अत एव विभ्वा विभुर्व्याप्तो मातरिश्वा वृष्टि विवसः स एव बृहस्पतिः मातयंतरि
क्षे वेष्टा माता वायुस्तद्वशो वा वरांसि वरणीयानि वृष्ट्यादि फलानि संपादयन् कृते उदके निमित्तभूते सति समवेभ तासं भूते
अथवा अजो यज्ञानां पदार्थानां व्यंजकः। मातरिश्वा फलस्य निर्माता रियज्ञे श्वसिता वर्त्तमान बृहस्पतिः ऋते यज्ञे निमित्तभूते
सति वरांसि वरणीयानि हवींषि इच्छन् विभ्वा विभुः समभवत्॥ ॥अथ तृतीया॥ उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सविते
व प्रबाहू॥ अस्य क्रत्वाहन्यो३ यो अस्ति मृगो अभीमो अरक्षसस्तुविष्मानिति॥ ॥अयं बृहस्पतिरुपस्तुतिमिति। यजमा

अंतर्मध्ये स्थित्वा चष्टे पश्यति करोतीत्यर्थः॥ ॥अथाष्टमी॥ एवा महस्तुविजातस्तुविष्मान्बृहस्पतिर्वृषभो धायि देवः॥ स नः
स्तुतो वीरवद्धातु गोमद्विद्यामेषं वृजनं जीरदानुमिति॥ ॥महः महान् तुविजात बहुधमुत्पन्नः तुविष्मान् बलवान् वृषभोऽपां
वर्षिता देवो बृहस्पतिरेव एवं स्तुतप्रकारेण धायि धीयते स्तूयत इत्यर्थः। स स्तुतो देवो नोऽस्माकं वीरवत् पुत्राद्योपेतं गोम
त् गोभिर्युक्तं फलं धातु दधातु करोत्वित्यर्थः। विद्यामेति गतः॥ ॥इति द्वितीयस्य पंचमे त्रयोदशो वर्गः॥ ॥आद्यास्तिस्रो महापं
क्तयः। अष्टकौ सप्तकः। षट्कौ दशको नवकश्चेत्युक्तलक्षणोपेतत्वात्। नवानामिति षात्रयोदशी महाबृहतीइत्युक्तं॥ अत्रैय
द्यप्यक्षराणि न्यूनानि तथापि व्यूहेन पूरणीयानि। अत्रानुक्रमणिका। कंकतः षोडशोपनिषदानुष्टुभमप्सूर्यादैवतं
विषशंकावानगस्त्यः तस्य परिहारार्थं दृष्टवान्। अथ तस्य विशेषविनियोगो लैंगिकः॥ अत्र शौनकः। कंकतो नेति सूक्तं तु वि
षार्तः प्रयतो जपेत्॥ विषं नश्यति मंत्रेणास्य सर्पदंष्ट्र विषादपि। यत्कीटलूतांबु विषं दंष्ट्रि वृश्चिकजं च यत्॥ मौलं चैव कृत्रिमं
चैव जपात्सर्वमपोहतीति॥२॥ ॥तत्र प्रथमा॥ कंकतो न कंकतोऽथो सतीनकंकतः॥ द्वाविति प्लुषी इति न्यदृष्टा अलिप्सतेति॥

कंकतः अल्पविषः कश्चित् न कंकतः तद्विपरीतो नल्पविषो महारोगादिं तकतेर्गत्यर्थस्य वर्णव्यत्ययेन क्कत इति सरंनभ
वति। अथो अपि च सती नकंकतः सती न मिस्रुकइकनामसती नंगहनमिति तन्नामसुपाठात्। उदकंच। अल्पविषवान् क
श्चिदुंडुभादि एवं द्वावपि अल्पविषमहाविषमहाविषभेदेन जलस्थलभेदेन वा द्विप्रकाराविति पुंषीद्वतिजेषणाविति प्र
कारेद्वै विध्य इहकत्वयोः प्रतिपादनयेति कारद्वयं तथा अदृष्टा अदृश्यमानरूपा एतत्संज्ञाकाश्चकेचिद्विषधरा एवमुक्तप्र
कारायेति तेन्द्रूनं मान्यलिप्सत। विषेणालिंपति सर्वाण्यंगानि विषं नाद्दृयोति नज्ञायत इति भावः॥ ॥अथ द्वितीया॥ अदृष्टा
न्हंस्यायत्यथोहंति परायती॥ अथो अवघ्नती हंस्यथो पिनष्टि पिंषती ति॥ ॥अनेन विषघ्नौषधिः स्तूयते। आयती विषहृत्स्य
सकाशमागच्छंती विषनिर्हरणसाधनौषधिः अदृष्टान् दृश्यमानविषंधरान् हंति हिनस्ति। अथो अपि च परायती परागच्छंती
समाजनसमये वाक्यहत्तांहंति नाशयति जलचरविषधारान्। अथो अपि च अवघ्नती कर्मणि कर्तृप्रत्ययः अवहन्यमानौ
षधिः स्वगंधेन हंति बहुविषबहुषानयद्वा काचिदोषधिर्दंशकान् मारयत्येव। अथो अपि च पिंषती पेषणं कर्त्री इषत

प्रतिबुध्रा अभूतनेति॥ ॥ये ते एते सर्पाः प्रत्यदृश्रन् प्रतिदृश्यंते रात्रौ श्वासादिलिंगेन यद्वा ते रात्रौ हंतारः दिवा एति प्र
तिदृश्यंते। तत्र दृष्टांतः। प्रदोषं रात्रिशेषाः रात्रिं प्रति तमसा तिधूतास्तु रात्रिषु तस्कराइव हिंसकाश्चोरा दृश्यंते यथा तद्व
त्। कीदृशास्ते अदृष्टाश्च परिदृश्यमाना विश्वदृष्टाः विश्वं द्रष्टं ये स्तेनासदृशास्ते प्रतिदृश्यंते। अतो हे नराः प्रतिबुध्रा अभूत
न भवत॥ ॥इति द्वितीयस्य पंचमे चतुर्दशो वर्गः॥ ॥अथ षष्ठी॥ द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा॥ अदृष्टा
विश्वदृष्टास्तिष्ठतेलयता सुकमिति॥ ॥अतः परं विषविचिकित्सा तत्र तावद्वा हे सर्पाः वो युष्माकं द्यौः पिता पृथिवी माता
सोमो भ्राता दितिर्देवमाता सा स्वसा एवं महानुभावा महोरगाः अदृष्टाः अन्यैरदृश्यमानरूपाः स्वयं तु विश्वदृष्टाः सर्वस्य द्र
ष्टारो यूयं तिष्ठत स्वस्वस्थाने मां प्रति मागच्छत सुसुतरां कं सुखं यथा तथा इलयत इरयत गच्छत सोम इवाद्वेन सोम्य धारा घु
ल्कोऽरुच्यते। पृथिव्यंतरिक्षद्युस्थानस्थाः सर्पाः स्वस्वस्थं प्राप्नुत। अस्मद्बाधां मा कुरुतेत्यर्थः॥ ॥अथ सप्तमी॥ ये अंस्या
ये अंग्याः सूचीका ये प्रकंकताः॥ अदृष्टाः किंचनेह वः सर्वे साकं नि जस्यतेति॥ ॥ये अंस्याः अंसार्हाः अंसगाः अंसे भवाः अं
साभ्यां स्वादंता वा नथा ये अंग्याः अंगमाः अंगेन शरीरेण दंतारो वा सूचीकाः यः सूचकीः सूचीसदृश्यमानाः किंचन यत्किंचित्
सर्पजातमस्ति इह अस्मिन् समीपे यो युष्माकं किमपि तः यूयं सर्वे साकं सह नितरां जस्यत मुंचत तस्मान् जसु मोक्षणे दैवादि
कः॥ ॥अथाष्टमी॥ उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा॥ अदृष्टान्त्सर्वाञ्जंभयन्त्सर्वाश्च यातुधान्य इति॥ ॥असौ सूर्यः
पुरस्तात्पूर्वस्यां दिश्युदेति कीदृशः स विश्वदृष्टा विश्वे दृष्टस्यायं स्य स तादृशः अदृष्टहा विषविशेषा विषधरविशेषा वा ते
षां हंता यद्वा अदृष्टमदर्शनमज्ञानमंधकारस्तस्य हंता सूर्य उदेति सति सर्वे विषधराः विषाणि वा पालयंते। किं कुर्वन्न
देतीचेत्। उच्यते। सर्वान् दृष्टान् अदृष्टव्यान् विषराक्षसादीन् जंभयन् हिंसन् तथा सर्वाः यातुधान्यः यातनावायायात
ना। तीव्रवेदनाः तासां धात्रीर्महोरगीराक्षसीर्वा जंभयन् पुरस्तादुदेति अतोस्मत्तो निजस्यतेति संबंधः॥ ॥अथ नवमी॥
उदपप्तदसौ सूर्यः पुरुविश्वानि जूर्वन्॥ आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहेति॥ ॥असौ पुरस्ताद्दृश्यमानः सूर्यः सर्वस्य
प्रेरकः आदित्यः उदपसत् उर्ध्वं गच्छति पतते राहुः पुमागमे रूपं। किं कुर्वन् विश्वानि पुरु प्रभूतं जूर्वन् कीदृशो सो पर्व

तिभ्यः पर्वस्थाप्राणिभ्यः तेषामुपकाराय आदित्यः। विषोदकादीनामदनशीलः विश्वदृष्टः विश्वं दृष्टं येन तादृशः अदृष्टहा
अदृष्टानां विषविशेषाणां हंता एवंमहानुभावः सूर्य उद्धमारोहति। अतो विशेषशंकायी॥ ॥अथ दशमी॥ सूर्ये विषमा
सजामि दृतिं सुरावतो गृहे॥ सो चिन्नु न मराति वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकारेति॥ ॥आ
दित्यमंडले च तुर्थेनांगुलिना विषमादाय मधु रूसयोजयित्वा निर्विषा भवेदिति॥ यदेतद्विषविद्यायामुक्तं तदिदम
त्रोच्यते। अहं विषावतो गस्त्यः स्तर्येसर्वस्यप्रेरयितरि मधुविद्यारूपे सूर्यः मंडले विषमाहृसवर्त्तमानं स्तायं आ
सजामि असक्तं करोमि। सुरावतो गृहेति सुरनिर्मातृसदने इतिमिवचमेम य सुरापात्रमिव यथा तत्कर्तुर्न दोषा
य भवति। तद्वद्विषमादित्यस्य न बाधकमित्यर्थः। सो चित्तु सविनसजायातुः प्रसिद्धो। नूनं यः सूर्यः खलु न मराति न म्रि
यते नो वयं मरामतद्वदनुग्रहात्तत्रैव विषस्य योजितत्वाद्वयमपि न म्रियामहे। उभयोरमरणकारणमाह। हरि
ष्ठाः हरयोश्वाः तेषु स्थित आदित्या आरे दूरे अस्य विषस्य योजनं प्रापणं चकार तदेवोच्यते। हे विषत्वां मधु

पिष्यमाणगचोषधिः पिनष्टि चूर्णीकरोत्यल्पविषान्। अथ वा सर्वेषु वाक्येषु अतिशोषेणास्वविकाराणां नाम उक्तः॥ ॥
अथ तृतीया॥ शरासः कुशरासो दर्भासः सैर्या उत॥ मौंजा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सतेति॥ ॥अन्यांश्च विषहं
तृ नाह॥ शरासः शरा वृष्णदंडसदृशाः अंते छिद्रास्तृणविशेषाः कुशरासः कुत्सितशराः आसा छिद्राः शरसदृशास्तृ
णविशेषाः दर्भासः दर्भाः कुशारोरासः कुशाः सैर्याः तारणादि प्राप्योद्भवाः तृणविशेषा आश्ववालाइति प्रसिद्धाः मौंजाः
मुंजाः प्रसिद्धाः वैरिणाः। वीरिणप्रकाराः एतेषु वर्त्तमानाः अदृष्टा उक्तरूपाः सर्वे विषधराः साकं मिलित्वा न्यलिप्स
त निलिंपंति स्वं॥ ॥अथ चतुर्थी॥ नि गावो गोष्ठे असदन्नि मृगासो अविक्षत॥ नि केतवो जनानां न्य१दृष्टा अलि
प्सतेति॥ ॥गावो गोष्ठेन्यसदन् निषीदंति मृगासो मृगाः न्यविक्षत। निविष्टाः स्वस्वस्थाने उपरताः जनानां प्राणिनां
केतवः प्रज्ञानानि। उपसर्गश्रुतेर्योग्ये क्रियाध्याहारः। नीचराण्यभवन्। एतस्मिन्समये अदृष्टाः अदृश्यमान
रूपाः संतान्यलिप्सत। निलिंपंति विशेषेण॥ ॥अथ पंचमी॥ एत उ से प्रत्यदृश्रन्प्रदोषं तस्करा इव॥ अदृष्टा विश्वदृष्टाः

अमृतंचकारविषस्यविषमावाङ्करेपानांघामतीचकारेतियोजनाएषैवमधुलामधुदात्रीतिनिर्विषांकर्त्रीमधुविद्यापदेतदा
दित्यस्यविषयोजनंनचामृतीकरणंपदेषामधुविद्या॥ ॥इतिद्वितीयस्यपंचमेपंचदशोवर्गः॥ ॥अथैकादशी॥ इयत्तिकाशकुं
तिकासकाजघासतेविषं॥ सोचित्तुनमरातिनोवयंमरामारेअस्ययोजनंहरित्वामधुलामधुलाचकारेति॥ ॥इयत्तिकाइ
यत्ताकुर्वाणाइयत्तावतीबालेत्यर्थः॥ शकुंतिकाशकुंतःतस्यस्त्रीतांकपिंजलीमाहुः॥ सकायानेतद्विषंजघासभक्षितवं
तीविषहंत्रीतिप्रसिद्धासोचित्सोइतिनिपातसमुदायएकपदं॥ सापिशकुंतिकानम्रियंतेनिस्यप्रतिपक्षत्वाद्विषस्याशिष्टं
व्याख्यावरं॥ अनेनविद्यायांयदेहद्दतविषंतस्यशकुंतेभ्यःआहुत्याप्रदानमस्तीत्युक्तंभवति॥ ॥अथद्वादशी॥ त्रिःसप्तवि
ष्फुलिंगकाविषस्यपुष्पमक्षन्॥ ताश्चित्तुनमरंतिनोवयंमरामारेअस्ययोजनंहरित्वामधुलामधुलाचकारेति॥ ॥त्रिः
सप्तत्रिगुणिताःसप्तसंख्याकाविष्फुलिंगकाःविविधाःविष्फुलिंगकाःसूक्ष्मवरविकाविषस्यप्रतिपक्षभूताःविषस्यास्मदा
वरकस्यपुष्पपोषकमक्षन्अहंतुनाशयंतु॥ ताश्चनमरतिनवयमपिशिष्टमवशिष्टं॥ ॥अथत्रयोदशी॥ नवानांनवतीनां

नवाधिकानां नदीनां पुनः कीदृशीनां विषस्यास्मध्यापकस्य सर्वस्य विषस्य रोपुषीणां लेपयित्रीणां सर्वासां उक्तानां गंगा
दिनदीनां अग्रभंगट पहामिसंकीर्त्तयामियहे स्थांदसे लुङि छांदसः। क्ते लुक्। ग्दगटहे र्मः। अस्ययोजन मित्यादिगतं॥ ॥अथ
चतुर्दशी॥ त्रिःसप्त मयूर्यः सप्तस्वसारो अग्रुवः॥ तास्ते विषं विजभ्रिर उदकं कुंभिनीरिवेति॥ ॥त्रिःसप्त एकविंशति संख्याकाः
मयूर्यो मयूरस्त्रियः ताः विषकारी सर्पद्विषण्य इति प्रसिद्धाः। रागद्वेषि गरुडपक्षाडुसन्नत्वात् तथा एत त्सप्त संख्याका
सर्पणस्वभावः स्वसारः स्वयमेव सरणाः अग्रुवः नदीनामैतत् अग्रुवाः गंगाद्याः प्रसिद्धाः सप्तनद्यः संति तास्ते हंदेहं तव
विषं विजभ्रिरे विशेषतो हरंतु। तत्र दृष्टांतः। उदकं कुंभिन्यः कुंभवन्त्यः कुंभेन जलधारिण्य इव ता यथा सद्वरं तितहंन्त
योमयूर्यश्चाति प्रभृतं हरंतु॥ ॥अथ पंचदशी॥ इयत्तकः कुषुंभकस्तकं भिनद्म्यश्मना॥ ततो विषं प्रवावृते पराचीरनु संवतः
इति॥ ॥इयत्तकः कुत्सिते यत्तः अल्पप्रमाण इत्यर्थः। कुषुंभकः। कुं पृथ्वी। सुम्नाति विलेखतीति सर्पाणां कुत्सितं संभयिता नि
गृहीता वा कुषुंभको न कुलः स ते विषहरं त्विति शेषः। यदि न तथा करोति तं कं कुत्सितं नकुलमश्मना भिनद्मि। विदारयामि

सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे द्वितीयाष्टके प्रथमे मंडले चतुर्विंशोऽनुवाकः ॥ ॥ प्रथममंडलं च ॥ इतैतै
ता प्रथममंडलं व्याख्यातं। अथ गार्त्समदं द्वितीयं मंडलं व्याख्यायते। त्वमग्ने द्युभिरिति षोडशर्चं प्रथमं सूक्तं मंडलद्र
ष्टा गृत्समद ऋषिः स च पूर्वमांगिरसकुले शुनहोत्रस्य पुत्रः सन् यज्ञकाले असुरैर्गृहीतः इंद्रेण मोचितः पश्चात्तद्व
चनेनैव भृगुकुले शुनकपुत्रो गृत्समदनामाभूत्। तथा चानुक्रमणिका य आंगिरसः शौनहोत्रो भूत्वा भार्गवः शौन
को भवत्। गृत्समदो द्वितीयं मंडलमपश्यदिति। तथा आद्यस्यैव शौनकस्य वचनमृष्यनुक्रमणौ। त्वमग्न इति गृत्स
मदः शौनकः गृत्समद ऋषिः जगती छंदः मंडलादिपरिभाषयाग्नेयं। अत्रानुक्रमणिका। त्वमग्ने जातगतं त्विति।
प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदसीदमादिसूक्तद्वयस्य विनियोगः। त्वमग्ने द्युभिरिति सूक्ते इति सूत्रितत्वा
त्। उपाकर्मोत्सर्जनयोरप्याद्या विनियुक्ता ॥ ॥ तत्र प्रथमा ॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मन
स्परि। त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ इति ॥ ॥ हे अग्ने अग्रणीत्वादिगुणविशिष्ट हे नृणां

नृपते नराणां मनुष्याणां मध्ये नराय इथारः संति तेषां विशेषेण पालयितः यद्वा भार्याः पादाभ्यां बहुव्रीहिर्नियस्वामित्वें
वे च प्रातिपद्यते। सर्वेषामपि नराणां नित्यपालक इत्यर्थः। नृणामित्यस्य नित्याती भावश्छांदसः। तादृश हे देव त्वं द्युभि
र्यागदिवसैः निमित्तभूतैर्जायसे यागार्थं मथनेनोत्पद्यस इत्यस्यार्थः। यद्वा तादृशैर्दिवसैः सहितो जायसे तद्यागदि
वसेषु प्रवृद्धो भवसीत्यर्थः। तथा त्वमाशुशुक्षणिः जायसे आ सर्वतो दीप्यमानो भवसि। उपपदे च दीप्ताविदं तस्य धा
तस्य मिदं रूपं यद्वा आशु शीघ्रं शुचा दीप्तः सन्नयतः संसेव्यत इति आशुशुचंक्षोशुंसनोति ददाति शत्रुभ्यो दहादि
ने सा शुशुक्षणिः तादृशो भवसि एवं सर्वत्र प्रतिविशेषणं जायस इति योज्यं। हे अग्ने त्वं दह्युदकेभ्यो जायसे वैद्युतरू
पेण वाडवरूपेण वा समुद्रोदकेभ्यः अश्मनः मेघात् पाषाणाद्वा परिजायसे। यो अश्मनोरंतराग्निं जजानेति हि मं
त्रांतरं। त्वं वनेभ्यः वृक्षादिसमूहेभ्यो दावरूपेण त्वमोषधीभ्यः व्रीह्यादिभ्यः वैश्वानररूपेण एवं महानुभावस्त्वं म
थनेनोत्पन्नः सन् सर्वात्मको भवसीत्यर्थः। शुचिरेव जायसे। शुचिरादिरूपेण जायस इत्यर्थः। अत्र त्वमग्ने द्यु

द्वि. भा. ५

॥२९६॥

सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे द्वितीयाष्टके प्रथमे मंडले चतुर्विंशोनुवाकः॥ ॥प्रथममंडलं च॥ इतवै
ता प्रथममंडलं व्याख्यातं। अथ गार्त्समदं द्वितीयं मंडलं व्याख्यायते। त्वमग्ने द्युभिरिति षोडशर्चं प्रथमं सूक्तं मंडलद्र
ष्टा गृत्समदऋषिः स च पूर्वमांगिरसकुले शुनहोत्रस्य पुत्रः सन् यज्ञकाले असुरैर्गृहीतः इंद्रेण मोचितः पश्चात्तद्व
नेनैव भृगुकुले शुनकपुत्रो गृत्समदनामाभूत्। तथा चानुक्रमणिका य आंगिरसः शौनहोत्रो भूत्वा भार्गवशौन
को भवत् गृत्समदो द्वितीयं मंडलमपश्यदिति। तथा आद्यस्यैव शौनकस्य वचनमप्यनुक्रमणे। त्वमग्न इति गृत्स
मदः शौनको गृत्समदऋषिः जगती छंदः मंडलादिपरिभाषयाग्नेयं। अत्रानुक्रमणिका। त्वमग्ने जातगतं त्विति।
प्रातरनुवाके आश्विनशस्त्रे यो जगिते छंदसीदमादिसूक्तद्वयस्य विनियोगः। त्वमग्ने द्युभिरिति सूक्ते इति सूत्रितत्वा
त्। उपाकर्मोत्सर्जनयोरप्याद्या विनियुक्ता॥ ॥तत्र प्रथमा॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मन
स्परि। त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिरिति॥ ॥हे अग्ने अग्रणीत्वादिगुणविशिष्ट हे नृणां

श्रीः

॥२९६॥

नृपते नराणां मनुष्याणां मध्ये नरा यष्टारः संति तेषां विशेषेण पालयितः यद्वा भार्याभ्यां पादाभ्यां बहुत्वं नियस्त्वामित्थं
त्वं च प्रतिपद्यते। सर्वेषामपि नराणां नित्यपालक इत्यर्थः। नृणामित्यस्य निघाताभावश्छांदसः। तादृश हे देव त्वं द्युभि
र्युगादिवसैः निमित्तभूतैर्जायसे यागार्थं मथनेनोत्पद्यस इत्यस्यार्थः। यद्वा तादृशैर्दिवसैः सहितो जायसे तद्यागदि
वसेषु प्रवृद्धो भवसीत्यर्थः। तथा त्वमाशुशुक्षणिः जायसे आ सर्वतो दीप्यमानो भवसि। उपपदे च दीप्तावित्यंतस्य धा
तुस्सनिदं रूपं यद्वा आशु शीघ्रं शुचा दीप्तः सन्वयतः संसेव्यत इति आशु शुशुचं कृत्वा सनोति ददाति शत्रुभ्यो दहादि
ने सा आशुशुक्षणिः तादृशो भवसि एवं सर्वत्र प्रतिविशेषणं जायस इति योज्यं। हे अग्ने त्वं दत्भ्युदकेभ्यो जायसे वैद्युतरू
पेण वाडवरूपेण वा समुद्रोदकेभ्यः अश्मनः मेघात् पाषाणाद्वा परिजायसे। यो अश्मनोरंतराग्निं जजानेति हि मं
त्रांतरं। त्वं वनेभ्यः वृक्षादिसमूहेभ्यो दावरूपेण त्वमोषधीभ्यः व्रीह्यादिभ्यः वैश्वानररूपेण एवं महानुभावस्त्वं म
थनेनोत्पन्नः सन् सर्वात्मको भवसीत्यर्थः। शुचिरेव जायसे। शुचिर्नामादियरूपेण जायस इत्यर्थः। अत्र त्वमग्ने द्यु

भिरियादिनिरुक्तमनुसंधेयं॥ ॥अथ द्वितीया। तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः॥ तव प्रश
स्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे इति॥ हे अग्ने होत्रं होतुः कर्म त्वद्यागादिलक्षणं यदस्ति त
दपि तवैव तदर्थमित्यर्थः। तथा पोत्रं पोतुः कर्म यस्मिन् तदपि तवैव तथा ऋत्वियं प्राप्तवू त्वमार्त्विज्यं तवैव।
नेष्टुः कर्म प्रास्थितया ज्यादिरूपं तव। हे अग्ने त्वमग्नित् आग्नीध्रश्च त्वमेवासि ऋतायतः यज्ञमिच्छतस्तवैव प्रशास्त्रं
यत् प्रशास्त्रः मैत्रावरुणस्य कर्म तत्। हे अग्ने त्वमध्वरीयसि अध्वरं अध्वरं यतं कर्मयसे अध्वर्युर्भवसीत्यर्थः। त
थाध्वर्युः अध्वर्युनाम्या अध्वर्युरध्वर्यु अध्वरयुः अध्वरस्य नेवाध्वरं कर्मयंतन्ति इति घोतिर्हि निरुक्तं तथा ब्रह्मा ब्रा
ह्मणाच्छंसस्य चासि तथा नो दमे अस्मद्यज्ञगृहे गृहपतिश्चासीति॥ ॥अथ तृतीया॥ त्वमग्न इंद्रो वृषभः सतामसि
त्वं विष्णुरुरुगायो नमस्यः॥ त्वं ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्त्तः सचसे पुरंध्येति॥ ॥हे अग्ने त्वं यतः वर्द्धि
तोसि यद्वा सतां साधूनां इंद्रोसि कामानां वर्षितासि त्वं विष्णुरसि यत उरुगायः बहुभिर्गेयमानो नमस्यः नम

विषनिबर्हणप्रयोगे यावद्विषापगमनं। पाषाणमपनुघतमनुतिष्ठंति तद्विहः तदिह मंत्रोक्तं। ततः एवं प्रयोगे सति विषं प
वाहेन विषात् ताद्दिवाद्विषं प्रवाहेन निर्गच्छतु कः प्रति उच्यते। पराचीः परांगवनतीः रतिं दारगाः। संवतः संविभागवतो दिशो तु
लक्षीकृत्य दिगंतं प्रतिगच्छतु। न मा प्रतिगच्छत्वित्यर्थः॥ ॥अथ सयोपारणयोत्सर्गयोः कुषुंभकस्तदित्येषा विनियुक्ता दधिस
क्तून् जुहोतीसूपक्रम्य कुषुंभकस्तदब्रवीदिति सूत्रितत्वात्॥ ॥सैषा षोडशी॥ कुषुंभकस्तदब्रवीद्गिरेः प्रवर्त्तमानकः॥ वृश्चि
कस्यारसं विषमरसं वृश्चिक ते विषमिति॥ ॥एवं महानुभावे नागस्य महर्षिणोच्यमाने सति गिरेः सकाशात् प्रवर्त्तमानकः
प्रवर्त्तमानो ति शीघ्रमभिगच्छन् कुषुंभकनकुलस्तदब्रवीत् तद्वाक्यमां च कथ्यौ किं तदिति उच्यते। वृश्चिकस्य तद्विषं अरसं अ
सारं बाधकं न भवतीत्यर्थः। तथा लोकोपि सर्पदष्टमपि क्रिम्यादिदं पानमेव अतो न बाधत इति हि वदंति। एवमपि वचनेन सो
पि निर्विषो भवत्। अथ तं वृश्चिकं प्रति नकुल आह। वृश्चिकादविषमरसं अतस्त्वम्हर्षि किं करिष्यति। तस्मात्सरि हरति। यादेव
मवादीत्। तदा प्रभृति वृश्चिकविषं कैमारमाभवत्। एषा विषनिर्हरण्युपनिषत्॥ ॥इति द्वितीयस्य पंचमे षोडशो वर्गः॥ ॥

स्वाध्यश्च भवसि हे ब्रह्मणस्पते परिवृढस्य बृंहिणं मंत्रस्य वा पालयितस्त्वं यतः रयिवित् गवादिधनस्य वेत्ता अतो
ब्रह्मासि। हे विधर्त्तः विविधधारक त्वं वैश्वानररूपस्त्वं पुरंध्या बहुप्रकारया बुद्ध्या सचसे सेसे हे वर्त्तसे सर्वदा बुद्ध्या
भूयस इत्यर्थः॥ ॥ अथ चतुर्थी॥ ॥त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः॥ त्वमर्यमा सत्प
तिर्यस्य संभुजं त्वमंशो विदथे देव भाजयुरिति॥ ॥ हे अग्ने त्वं यतो धृतव्रतः धारितकर्मासि अतो वरुणो राजा
सि दस्मः शत्रूणां उपक्षययिता ईड्यः स्तुत्यश्च अतो मित्रः एतन्नामको देवोऽसि यतः सत्पतिः सतमेभिमतप्रदाने
न पालितः अतः अर्यमा भवसि। दातृत्वं चार्यमादिलिंगं अर्यमा तमाहुः। यो ददातीति यस्यार्यम्णो दानं संभुजं
सततभुजं व्याप्यं भवति। यद्वा यस्य धनं संभुजं सम्यग्भोगाय साधु गृहीतृणां तथा त्वं अंशः सूर्यमूर्त्तेनरभूतए
तन्नामको देवोऽसि। ने दूरदेव विदथेऽस्मदीये यज्ञे भाजयुः फलानां भाजयिता प्रापयितासि॥ ॥ अथ पंचमी॥
त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यं। त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः

स्ति। हे अग्ने त्वष्टा पूजकस्य साधु संपादयिता त्वं विधसे परिचरसे जनाय सुवीर्यं शोभनवीर्यं तस्मै तुर्भवसि। ग्नाव:
या: स्तुतिवाच: संति तास्तव स्वभूता: हे मित्रमह: हितकारितेज: सजात्यं-- स्वाकं बांधवं भजस इत्यर्थ:। हे अ
ग्ने आशुहेमा आशुप्रेरयिता त्वं स्वश्व्यं शोभनाश्वसमूहोपेतं पूलं ररिषे ददसि। हे अग्ने पुरूवसु: प्रभूतधनस्त्वं
नरां नराणां शर्धो बलस्थायेसि।। ।। इति द्वितीयस्य पंचमे सप्तदशो वर्ग:।। ।। अथ षष्ठी।। त्वमग्ने रुद्रो असु
रो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे। त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधत: पासि नु त्मनेति।। हे अग्ने म
हो दिवो महतो द्युलोकस्य तेउपलक्षणमेतत् लोकत्रयासु असुर: शत्रूणां निरसिता रुद्रोसि रुत् दु:खहेतुर्वा पापा
दि: तस्य द्रावयिता एतन्नामको देवोसि रुद्रो वा एष यदग्निरिति श्रुते: अग्ने रुद्रशब्देन व्यवहारात्। यद्वा त्वं रुद्र: रोदि
मारमनिष्टा दु:खेपतिष्ठंती तिरुद्र: ता हृद्रोसि। रुद्रो रौतीति सत इति निरुक्तं। तथा महो महतो द्युलोकस्य सं
बंधी असुरोसि। असुर्बलं तस्य दाता आदित्यरूपश्च त्वमसि अग्ने द्युलोके वृं संबंधसुरस्त्वं। उत वा दिवो अ

सहस्राणि शतानि दश प्रतीति ॥ ॥ हे अग्ने विश्पतिं यजमानानां पालकं त्वां । विशः यजमानाः दमे स्वकीये पस्त्यगृहे आ आसादयं
ति । उपसर्गवशाद्योग्यक्रियाध्याहारः । तथा कृत्वा राजानं दीप्यमानं सुविदत्रं शोभनज्ञानं यदनुकूलं वस्तु सुधनं च त्वां ऋंजते
प्रसाधयंति ऋंजं प्रसाधनं कर्मेति यास्कः । यत एवं ततो हे स्वनीक शोभनज्वालारूपः सन् त्वं विश्वानि सर्वाणि हवींषीति शेषः ।
षष्ठ्यर्थे द्वितीया विश्वेषां हविषां आज्यसोमपुरोडाशादीनां पत्यसे ईश्वरो भवसि । ईश्वरो नामैतत् । इरज्यति पत्यत इति तन्ना
ठा । मसु पाठात् । यद्वा पतिभावमाचरसि । त्वं तु सहस्राणि शतानि दश एते संख्याकान्ति प्रति एतत्संख्याकानामभिमतसाध
नानां प्रतिनिधिरित्यर्थः । प्रतिः प्रतिनिधिप्रतिदानयोरिति कर्मप्रवचनीयत्वं तेन यत्फलं भवति । तत्त्वया लभ्यत इत्यर्थः ॥ ॥
अथ नवमी ॥ त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचं ॥ त्वं पुत्रो भवसि यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः ॥ ॥
हे अग्ने पितरं पालकं त्वां नरो नेतारो यजमानाः इष्टिभिः एषणसाधनैर्यागैः यजंत इति शेषः । पितृत्वलालनीयं यजंत इत्य श्री
र्थः । तथा तनूरुचं शरीरे दीपकं शरीरेषु दीप्यमानं वैश्वानरात्मना त्वां भ्रात्राय भ्रातृत्वाय सौभ्रात्राय शम्या कर्मणा नामैतत् । ॥२९९॥

कर्मणा यजंत इति शेषः । यद्वा भवान् वक्ष्यमाणेनाविदधदित्याननसंबंधः । हे अग्ने यो नरस्ते त्वां अविधत परिचरते तस्य त्वं
पुत्रो भवसि पुत्रवत्पालयिता भवसि । तथा त्वं सखा समानख्यातः सखिवद्धितकारी सुशेवः शेवमिति सुखनाम सुष्ठु सुखक
री सन् आधृषः आधर्षकात्पापात् पासि रक्षसि । पितृत्वकामाय पितृत्वेन भ्रातृत्वकामाय भ्रातृत्वेन पुत्रत्वकामाय पुत्रस्था
नीयो भवसि त्रिःप्रकारेण रक्षसीत्यर्थः ॥ ॥ अथ दशमी ॥ त्वमग्न ऋभुराके नमस्यः त्वं वाजस्य क्षुमतो राय ईशिषे । त्वं विभास्य
नु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिरिति ॥ ॥ हे अग्ने त्वं ऋभुः उरु भासमानो महान् धीमान् वा त्वमाके अंतिके संनिधावेव न
मस्यो नमस्कार्यः स्तुत्य इत्यर्थः । इतरदेवतावन्मंत्र प्रतिपाद्यत्वाकारेण स्तुत्यो न भवसि किं तु प्रत्यक्ष इत्यर्थः । तथा त्वं क्षुमतः श
ब्दवतः सर्वत्र श्रूयमाणस्य वाजस्यान्नस्य रायो धनस्य च ईशिषे स्वामी भवसि अतस्तद्देहीत्यर्थः । हे अग्ने त्वं विभासि विशे
षेणादीप्यसे तदर्थमनुक्रमेण अनुधक्षि दहसि काष्ठादीन् दहेर्लेटि सिपि रूपं संहितायां भषभावाभावश्छांदसः । किमर्थमेवं
दावने छेदनाय अंधकारस्य यद्वा हविषो दानवते यजमानाय वा किं च त्वं यज्ञं विशिक्षुः विशेषेण शिक्षयिता शोधयितासि न

लोकाव्यथेतिषष्ठ्यानिषेधः। तथा आतनिः फलस्य सर्वतो विस्तारयिता॥ ॥इति द्वितीयस्य पंचमे द्वादशो वर्गः॥ ॥अथैकाद
शी॥ त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा॥ त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वतीति॥ ॥हे अ
ग्ने देव त्वं दाशुषे हविर्दत्तवते यजमानायादितिरखंडयिता परिपालयितासि यद्वा अदीना भूमिरसि किंच त्वं होमनिष्पादिका भा
रतस्यादिव्यस्य संबंधिनी रश्मिरूपा सती इरा स्तुत्या वर्धसे प्रवृद्धो भवसि किंच त्वं शतहिमा हिमशब्दः कालोपलक्षकः अपरि
मितकालं नित्या इळा भूमिरसि तादृशी सती दक्षसे दानाय समर्थो भवसीति उत्तरत्वादनिघातः। तथा हे वसुपते धनपा
लक वृत्रहा पापादेर्हंता त्वं सरस्वती सरस्वान्वायुः तत्संबंधिनी एतन्नियामिका मध्यमिकासि आदित्याग्निवायूनां संबंधि
न्यो भारतीळासरस्वत्यस्तिस्रो देव्यः संनिध्यः अपि त्वमेवेत्यर्थः॥ ॥अथ द्वादशी॥ त्वमग्ने सुभृत उत्तमं वयस्तव स्पा
र्हे वर्ण आ संदृशि श्रियः॥ त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुरिति॥ ॥हे अग्ने त्वं सुभृतः सुष्ठु पोषितः
सन् उत्तमं निरतिशयं वयः अन्नमायुष्यं वा त्वमसि तत्संपादकोसीत्यर्थः। तथा तव स्पार्हे स्पृहणीये वर्णे लोहित्ते शुक्ला

सुराय मन्मेत्यादिषु। तथा त्वं मारुतं शर्धः मरुत्समूहरूपं बलमसि। वा पुरुषश्च त्वमसीत्यर्थः। वायुरूपश्च त्वमसीत्यर्थः। एवम
न्यादिष्वपि वायुरूपस्त्वं पृक्षो अन्नस्य हविर्लक्षणस्य त्वमीशिषे। त्वमीश्वरो भवसि। यस्मादेवं तस्मात्त्वं वातैर्वायुसंबंधिभिररुणैररुणवर्णैरश्वैः शं
गयः सुखस्य गृहरूपः आवासभूतः सन् पासि प्राप्नोषि। यागगृहं यथा वरुणो गमनशीलैर्वातिर्वायुभिः नुन्नः सन् वने तथा
त्वं पूषा सर्वस्य पोषकः सन् नु क्षिप्रं त्मना आत्मना अनुग्रहरूपया सुबुद्ध्यैव विधतः परिचरतो यजमानान् पासि॥ ॥अथ
सप्तमी॥ त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि॥ त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेविधदिति॥ ॥
हे अग्ने त्वं अरंकृते त्वामलंकुर्वते। यजमानाय द्रविणोदाः हिरण्यस्य दातासि। देवो द्योतमानः सविता सविता सर्वस्य प्रसविता
सत्कर्मसु प्रेरकस्त्वं रत्नधाः रत्नधाः रमणीयानां धनानां मणिमुक्तादीनां धारयितासि। तथा हे नृपते नृणां पालकाग्ने त्वं भग
भजनीयः सन् वस्वः वसुनो धनस्य ईशिषे समर्थो भवसि। - - - यजमानो दमे यज्ञगृहे त्वां अविधत् परिचरति तस्य पा
युः पालकस्त्वमसि॥ ॥अथाष्टमी॥ त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृंजते॥ त्वं विश्वानि स्वनीक पत्यसे त्वं

दिलक्षणेसंदृष्टिःसम्यग्दर्शनीयस्यश्रियःऐश्वर्यापिकांतयोर्वाआश्रियवर्ततिउपसर्गश्रुतेर्योग्यक्रियाध्याहारः।किंचत्वंवा
जःअन्नःसाधकत्यताहृष्यंअन्नस्यधकइत्यर्थः।प्रतरणःप्रतारयितापापात्अतएवबृहन्महानसितथात्वंरयिर्धनंस्पृ
वोसिबहुलःसर्वविषयबाहुल्योपेताविश्वतःपृथुःविस्तीर्णःप्राप्यतइत्यर्थः॥ ॥अथत्रयोदशी॥त्वामग्नआदित्यासआस्यं।त्वां
जिह्वांशुचयश्चक्रिरेकवे॥त्वांरातिषाचोअध्वरेषुसश्चिरेत्वेदेवाहविरदंत्याहुतमिति॥ ॥हेअग्नेत्वांआदित्यासःअदितेः
पुत्राःइंद्रादयःआस्यंस्वकीयंमुखंभक्षणपानादिसाधनंचक्रिरेइतिवक्ष्यमाणेनसंबंधः।तथाहेकवेक्रांतप्रज्ञत्वामेवशु
चयःशुध्धादीप्तादेवाजिह्वांस्वकीयजिह्वास्थानीयमास्वादनसाधनंचक्रिरेत्वन्मुखेनेवभक्षयंतित्वज्जिह्वयास्वादयंतीत्य
र्थः।तथात्वामेवरातिषाचःरातिरनिंदत्तहविराधनंवानेनसमवेतादेवाअध्वरेषुयज्ञेषुसश्चिरेसेवंतेत्वामेवप्रतीक्षंते।
विनात्वयातेषांहविर्भक्षणागयागाःएवंकृत्वात्वेचपिदेवाःसर्वेआहुतंसर्वतोदत्तंहविरदंति।एवंसर्वदेवोपकारि
णंमहाभागस्तोमीत्यर्थः॥ ॥अथचतुर्दशी॥त्वेअग्नेविश्वेअमृतासोअद्रुहआसादेवाहविरदंत्याहुतं॥त्वयामर्तासः

द्वि॰भा॰५
॥३०१॥

स्वदंतआहुतिंत्वंगर्भोवीरुधांजज्ञिषेशुचिरिति॥ ॥हेअग्नेत्वेत्वयिविश्वेसर्वेअमृतासःअमरणधर्माणःअद्रुहःअ
द्रोग्धारोदेवाःआसात्वदीयेनास्येनाहुतंहविरदंतिभक्षयंति।आस्यशब्दस्यतृतीयैकवचनेपद्दन्नोमासीत्यादिनाआस
न्नादेशः।ऊडिदंपदादीतिविभक्तेरुदात्तत्वं।तथामर्तासोमनुष्याअपित्वयासाधनभूतेनासुतिंरसरूपमन्नादिकंस्वदंते
आस्वादयंतित्वमेववीरुधांलतादीनांगर्भःगर्भस्थानीयःतेषांमध्यस्थान्यत्।वसुसर्वेषांवासभूतःसन्जज्ञिषेउत्पादय
सिसस्याद्युत्पन्नं॥ ॥अथपंचदशी॥त्वंतान्त्संचप्रतिचासिमज्मनाग्नेसुजातप्रचदेवरिच्यसे।पृक्षोयदत्रमहिनाविनेभुवदनुद्या
वापृथिवीरोदसीउभेइति॥ ॥हेअग्नेमज्मनाबलेनतान्प्रसिद्धान्देवान्संचासिसंगच्छसितैःसहितोपिभवसितथासा
मर्थ्येनप्रतिचासिप्रत्येकंतैःविभिन्नःप्रतिनिधिर्भवसिप्रतीस्वीकारःसमाप्यतैःसहितोभवसिवियुक्तोभवसीत्यर्थः।हेसुजा
तशोभनजननमंत्रसहितमंथनेनोत्पन्नत्वाद्धेअग्नेसुजन्मत्वंतादृशाग्नेहेदेवप्ररिच्यसेसचनिर्बलेनबाधितोभवसि।
आधिक्येकरणमाह॥यत्यस्मात्त्वयस्मिन्यज्ञेपृक्षःसर्वमप्यन्नंव्यत्ययेनबहुवचनेनतेतवविभुवत्समर्थंभवतिमहिना

श्री
॥३०१॥

जागतेस्तुंदस्यविनियोगःसूत्रविनियोगस्तुपूर्वसूक्तएवोक्तः।तथाचातुर्विंशिकेतृतीयसवनेजातवेदस्यनिविद्धानीयमिदं।यज्ञेनव
र्धतेत्याग्निमारुतइतिसूत्रितत्वात्।पृष्ठ्याभिप्लवषडहयोर्द्वितीयेहन्यपिजातवेदस्यविनिधानमिदं।चातुर्विंशिकेतृतीयसवन
मितिचातुर्विंशादिदृष्टत्वात्॥ ॥तत्रप्रथमा॥यज्ञेनवर्धतजातवेदसमग्निंयजध्वंहविषातनागिरा॥समिधानंसुप्रयसंस्वर्ण
रंद्युक्षंहोतारंवृजनेषुधूर्षदं॥इति॥ ॥हेयजमानाऋत्विजोवायूयंजातवेदसंजातानांवेदितारंजातधनंजातप्रज्ञंवाग्निंय
ज्ञेनयागेनवर्धतप्रवर्धयतसामान्येनोक्ताविशेषयाहहविषाचरुपुरोडाशादिनातनाविस्तृतयागिरास्तुत्याचयजध्वंपू
जयध्वं।कीदृशंसमिधानंसमिध्यमानंसुप्रयसंशोभनान्नंस्वर्णरंस्वर्गेणनेतव्यायजमानायस्यतादृशं।यद्वास्वरितिपर्यायःसु
वीनांनेतारःस्तोतारःबहुस्तोतारमित्यर्थः।द्युक्षंदीप्तंद्युनिवासिनंचहोतारंहोमनिष्पादकंवृजिनेषुबलेषुधूर्षदंबलस्य
कर्त्तारमित्यर्थः।अग्निपाटवेसतिशरीरस्यबलंभवतिहिप्रसिद्धं॥ ॥अथद्वितीया॥अभित्वानक्तीरुषसोववाशिरेग्नेवत्संन
स्वसरेषुधेनवः॥दिवइवेदरतिर्मानुषायुगाक्षपोभासिपुरुवारसंयुतइति॥ ॥हेअग्नेत्वात्वांअभिप्रतिनक्तीःरात्रीउषसः श्री ॥३०२॥

अहानिसर्वासुरात्रिषुसावर्णहस्म यद्वानक्तशब्दःसायंकालंलक्षयति।सायंप्रातरग्निहोत्रस्यसद्भावात्सर्वेषुकालेषुववाशि
रेआकांक्षंतेयजमानायष्टुं।यद्वाअहानिरात्रयश्चत्वामेवकामयंते।होतुंकालेकर्मणाप्रादनात्।कालनांकामानामु
पचर्यते।तत्रदृष्टांतः।स्वसरेषुस्वयंस्मरणशीलेष्वहःसुसुस्वरणाधिकरणेषुगोष्ठेषुवाधेनवोवत्संनतपातिवा।किंच।
हेपुरुवारबहुभिर्वरणीयाग्नेसंपातावियतस्त्वंदिवइवद्युलोकस्येवअरतिःव्याप्नोतिविस्तृतः।तत्रस्थानांदेवानांहविःप्रदा
नायेवसर्वत्रवांतेत्यर्थः।मानुषामानुषाणांयजमानानांसंबंधीनियुगायुगानियुगशब्दःकालोपलक्षितःप्रातरादिसवनानिसर्वे
षुसवनेषुअत्यंतसंयोगेद्वितीया।क्षपोरात्रीःसर्वासर्वासुरात्रिष्वपिआभासिआसमंताद्दीप्यसे॥ ॥अथतृतीया॥तंदेवाबुध्नेर
जसःसुदंससंदिवस्पृथिव्योरर्रतिंन्येरिरे॥रथमिववेद्यंशुक्रशोचिषमग्निंमित्रंनक्षितिषुप्रशंस्यमिति॥ ॥तंप्रसिद्धमुक्तगुण
विशिष्टंविशिष्टमग्निंदेवाःप्रसिद्धाःव्यवहर्त्तारःऋत्विजोवारजसोरंजनात्मकस्यास्यालोकस्यबुध्नेमूलेपृथिव्यांवेद्यामित्यर्थः।त
त्रन्येरिरेनितरामीरयंतिव्यापारयंति।स्वस्वहविर्लंभाय।ऋत्विक्पक्षेस्तोत्रादिनानितरांगच्छंति।भजंतेकीदृशमित्याह।

सुदृंसं सुदर्शनं दिवस्पृथिव्योः द्यावापृथिव्योः अरतिं ईश्वरं गंतारं व्याप्तं वा वेद्यां वेदो धनं तस्मै हितं रथ्यमिव यथा
स्वाभिमतलाभायाश्रयंते तद्वत् यद्वा रयमिव प्राप्तिसाधनत्वेन वर्त्तमानं विधंते वेदितव्यं उशिक्त्वेऽश्रेचिषं दीप्तवर्णमग्निं मित्रमिव
सखिवत्कार्यसाधकं। यद्वा आदित्यमिव क्षितिषु यागभूमिषु मनुष्येषु वा प्रशंस्यं प्रकर्षेण स्तुत्यं। एवं महानुभावमग्निं। न्येरिरे
इति॥ ॥अथ चतुर्थी॥ तमुक्षमाणं रजसि स्व आ दमे चंद्रमिव सुरुचं ह्वार आ दधुः॥ पृश्न्याः पतरं चितयंतमक्षभिः पाथो न पायुं ज
नसी उभे अनु इति॥ ॥त्वं स्तुत्यनंतरं रजसि अंतरिक्षे अत्र उक्षमाणं सर्वतः सिंचेतं वृष्टिजलं रजसि पृथिव्यां वेद्यां वृतादिना अ
भिसिच्यमानं वा स्वे स्वकीये ह्वारे हृत जनेदमे यागगृहे आदधुः। ते कीदृशं तं चंद्रमिव हिरण्य नाम हिरण्यं हिरण्यमिव शोभन
दीप्तिं पृश्न्याः तत्त्वावस्थायां पृश्न्याः पतरं द्युलोकस्यांतरिक्षस्य गंतारं अक्षभिः स्वकीयैर्ज्वालारूपैः अवयवैः चितयंतं चेतय
मानं पाथो न पायुं उदकमिव रक्षकं। उभे जनसी सर्वस्य जनयित्र्यौ द्यावापृथिव्यावनुव्याप्तं। भस्या वेद होमाधारत्वेन स्थितिवाह
विः प्रापणाय द्युलोकगामि भावः। एवंरूपमग्निमादधाते॥ ॥अथ पंचमी॥ स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋंजते गिरा॥ श्री ॥३०३॥

माहात्म्येन महत्त्वमसि अत इत्यर्थः। कुत्रेति तदुच्यते। रोदसी स्वैर्दैर्निरोदनस्वभावे उभे द्यावापृथिव्यावनु ते प्रतितावां मध्ये
व्याप्तमित्यर्थः। त्वयि द्रुतमनन्तं त्वन्महत्त्वेन लोकत्रयव्याप्तमित्यर्थः॥ ॥अथ षोडशी॥ ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रा
तिमुपसृजंति सूरयः॥ अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीरा इति॥ ॥अनया होता स्तुतिं निगमयन्नभिम
तमाशास्ते। हे अग्ने ये सूरयः मेधाविनः प्रेरयितारो वा यजमानाः स्तोतृभ्यः स्तुतिकर्तृभ्यो गोअग्रां गावो ग्रा गामिन्यो यस्या
दृशीं गोप्रमुखां अश्वपेशसं पेश इति रूपनाम अश्वेन निरूपणीयां। गोश्वामुख्या जाश्चेति दक्षिणा गणेषु गवाश्वयोः प्राथ
म्यात् ता रातिं उपसृजंति ददति यन्तु जमानानस्मांश्च ऋत्विजो वा स्यादसीयः श्रेष्ठं स्वर्गादिस्थानं आ सर्वतः प्रणेषि हि प्रक
र्षेण नयसि खलु नयेत्यर्थः। हि प्रसिद्धौ वयं च सुवीराः शोभनपुत्रादिसहिताः विदथे यज्ञे बृहत् मंत्रजातं वदेम घारयामः स्तु
म इत्यर्थः॥ ॥इति द्वितीयस्य पंचमे एकोनविंशो वर्गः॥ ॥यज्ञेन वर्धत इति त्रयोदशर्चं द्वितीयं सूक्तं मंडलद्रष्टुर्गृत्समदस्या
र्षमंडलादित्वादाग्नेयं परिभाषयाग्नेयं तु शब्दानुकर्षादिमं द्विजागतं। यज्ञेन सप्तोनेत्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयो

हिरिशिप्रो वृधसानासु जर्भुरद्द्योर्नस्तृभिश्चितयद्रोदसी अन्विति॥ ॥सः अग्निः होता होममनिःपादकः सन् विश्वं सर्वं अध्वरंया
गं परिभूतु परितो भवतु व्याप्नोतु उत उत्तमेवाग्निं हव्यैर्हविर्भिः गिरा स्तुत्या वा हविषो मनुष्यान्स्त्वं जातप्रसाधयंति त्वं जते प्रसाध
नकर्मा हिरिशिप्रो हरणशीलहनुः दीप्तोष्णीषो वा॥ शिप्राः शीर्षस्तु वितता हिरण्ययीरिति मंत्रांतरात्। वृधसानासु वर्धमान
स्वोषधीषु ज्वालासु वा जर्भुरत्। पूर्यमाणो यज्ञगंता शाश्वंतपदं। यद्वा द्वितीयार्थे सप्तमी। वर्धमाना ओषधीर्जर्भुरत् पुनःपुन
र्दहन्नित्यर्थः। द्यौर्द्युलोकं स्त्यैत अंतरिक्षं स्तृभिर्नक्षत्रैरिव रोदसी अनुद्यावापृथिव्या अनु चितयत् चेतयति ज्वालाभिर्विस्फुलिंगै
श्च भुवमंतरिक्षं च व्याप्नोतीत्यर्थः॥ ॥इति द्वितीयस्य पंचमे विंशो वर्गः॥ ॥अथ षष्ठी॥ सनो रेवत्समिधानः स्वस्तये संददस्वान्
यिमस्मासु धीमहि॥ आनः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देववीतय इति॥ ॥हे अग्ने स तादृशस्त्वं नोस्माकं स्वस्त
ये स्वस्त्यै अविनाशिनामक्षिमायारवतरयिमतरयिं धनं उ पर्षुपरिवृध्रिमत दानयोग्यं वा धनं अस्मासु संददस्वान् सम्यक्प्र
यच्छन् समिधानोस्माभिः सम्यगिध्यमानः सन् दीदिहि। दीप्यस्व यद्वा रेवदिति क्रियाविशेषणं। राधनं सद्धिमत यथा तथा दी

प्यस्वेति तथाभूतः सन्नोस्मभ्यं सुविताय सुहिताय यद्वा मन फलाय रोदसी द्यावापृथिव्या वा कृणुष सर्वतः कृणु उभे लोके भोगप्रदे कु
र्वित्यर्थः। किमर्थमिति तदुच्यते। हे देवाग्ने मनुषो मनुष्यस्य च यजमानस्य मम संबंधीनि हव्या हवींषि वीतये देवेभ्यो भक्षणाय पुनः
पुनर्यागायानुष्ठानायेत्यर्थः॥ ॥अथसप्तमी॥ दानो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि॥ प्राची द्यावापृथिवी ब्रह्म
णा कृधि स्वर्ण शुक्रमुषसो विदिद्युतुरिति॥ ॥हे अग्ने नोस्मभ्यं बृहतो महतः प्रभूतान् गवाश्वादिधनविशेषान् दाः देहि। तथास
हस्रिणः सहस्रसंख्योपेतान् पुत्रभृत्यादीन् दाः देहि ददाते र्छान्दसे लुग्रूपं वाक्यभेदादनिघातः। श्रुत्यै कीर्त्यै वाजमन्नं दुरो न
द्वाराण्यपि न द्वारस्थार्थे अनावृधि अपवृणु प्रेरयेत्यर्थः। यद्वा द्वाराणीव तत् प्राप्त्युपायान् विशदयति। तदर्थं द्यावापृथिवी ब्रह्म
णा परिवृढेन कर्मणा प्राचीप्रकृष्टांचा न अस्मदनुकूले कृधि कुरु स्वर्ण आदित्य इव स यथा जगत् प्रकाशयति। तद्वत् शुक्र
कं दीप्तं त्वामुषसः उषःकालादि विद्युतुः विद्योतयंति। उषःकालेग्निमन्वयः प्रज्वाल्यं॥ ॥अथाष्टमी॥ स इधान उषसो राम्या अ
नु स्व१र्ण दीदेदरुषेण भानुना। होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे इति॥ ॥सोग्निः राम्याः रमणा हे

नाः सुवीर्यं सामर्थ्यमेतं यथा तथा अर्वता वा अरणं कुशलेनाश्वेन वा शश्वाश्वां यें ब्रह्मणा वा अन्नेन च त्वद्दत्तेन जातानान स्मत्स्त-
मानेनेति चितयेम अतिक्रम्य शश्वायेम हि कर्मणि कृत्प्रत्ययः। यद्वा त्वद्दत्तेनाश्वेनान्येन वा सुवीर्यं चितयेम प्रकाशयेम तदर्थमस्मा-
कं पंचसु कृष्टिजनेषु निषादपंचमेषु चतुर्षु वर्णेषु उशा उशेः अतिप्रभूतं दुस्तरं अन्येन प्राप्तं द्युम्नं धनं स्वर्णं सूर्य इव अ-
धिकं रुरुचीत दीप्यतां। अधीय यमनथो कावाः॥ ॥अथैकादशी॥ स नो बोधि सहस्य प्रशंस्यो यस्मिन्त्सुजाता इषयंत सू-
रयः॥ यमग्ने यज्ञमुपयंति वाजिनो नित्ये तोके दीदिवांसं स्वे दम इति॥ ॥हे अग्ने सहस्य शत्रूणामभिभवतः बलप्रभवः प्रशं-
स्यः स्तुत्यस्त्वं नोस्मदीयं स्तोत्रादिकं बोधि बुध्यस्व सइ सूक्तं कइत्याह। यस्मिन्नग्नौ सुजाताः शोभनजननाः सूरयः स्तोतारः
ऋत्विजः इषयंत गमयंति स्तोत्राणि किं च हे अग्ने यज्ञं यजनीयं यं वाजिनो हविर्लक्षणान्नवंतो नित्ये तोके औरसे पुत्रे निमि-
त्तभूते सति। यद्वा तस्मिन्नुपस्थादीप्यंते पुत्रगृहे यथा दीप्यति तद्वत्स्वे दमे स्वकीये यागगृहे सवनीयादिस्थाने दीदिवांसं श्री ॥३०५॥
दीप्यमानं उपयंति हविःस्तोत्रादिना सावाधीस्येत्यन्वयः॥ ॥अथ द्वादशी॥ उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सू-

रयश्च शर्मणि॥ वस्वो रायः पुरुश्चंद्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि न इति॥ ॥हे जातवेदः जातानां वेदितरग्ने स्तोतारः त्वां स्तु-
वंतः ऋत्विजः सूरयो मेधाविनो यजमानाश्च एवमुभयासः उभये वयं शर्मणि सुखे निमित्तभूते सति त्वत्संबंधिनः स्याम भवेम। य-
द्वा ते शर्मणि स्याम त्वं च नोस्माकं वस्वो निवासहेतोर्वसिष्ठस्य रायो गवादिधनस्य पुरुश्चंद्रस्य अतिशयेनाह्लादकस्य ब-
हुहिरण्योपेतस्य वा भूयसः प्रभूतस्य प्रजावतो भृत्याद्युपेतस्य पुत्रादिभोगपर्याप्तस्य वा स्वपत्यस्य शोभनपुत्रस्य ईदृग्रू-
पं धनं नोस्मभ्यं शग्धि देहि दातुं शक्तो भवसि॥ ॥अथ त्रयोदशी॥ ये स्तोतृभ्य इति व्याख्याता॥ ॥इति द्वितीयस्य पंचमे एकविंशो
वर्गः॥ ॥समिद्धो अग्निरित्येकादशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभं सप्तमी जगत्यनुक्रमणिका द्यंशोन का नामिदं मा प्रीसूक्तं यू-
त्समदस्यापि शुनकत्वात् समिद्धो अग्निरिति शुनकानामिति हि स्रहत्रितं॥ ॥तत्र प्रथमा॥ समिद्धो अग्निर्निहितः पृथिव्यां प्रत्य-
ङ्विश्वानि भुवनान्यस्थात्॥ होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन्निति॥ ॥पृथिव्यां वेदिलक्षणायां समि-
द्धः सम्यग्दीप्तः एतन्नामको ग्निः निहितः स्थापितः सन् विश्वानि सर्वाणि भुवनानि भूतजातः प्रत्यङ् अभिमुखः सन् अस्थात्।

तिष्ठति यथा सर्वे जनाः पश्यंति तथा वृधो भवदित्यर्थः ॥ किंच सोग्निर्होता होमनिष्पादको देवानामाह्वाता वा पावकः शोधकः प्रदिवः पुराणः सुमेधाः शोभनप्रज्ञो देवो द्योतमानः एवं महानुभावोग्निः अर्हन् यागयोग्यः सन् देवान् यजतु अत्र यष्टव्यानिंद्रादीन् तथा पूजयतु ॥ ॥अथ द्वितीया॥ नराशंसः प्रति धामान्यंजंतिस्रो दिवः प्रति मह्ना स्वर्चिः ॥ घृतप्रुषा मनसा हव्यमुंदन्मूर्धन्यज्ञस्य समनक्तु देवानिति ॥ ॥ नराशंसः नरैर्विद्वद्भिः शंसनाय एतन्नामकोग्निः स्वर्चिः शोभनज्वालः सन् धामानि स्थानानि आ — अधिकरणानि तेजांसि प्रति प्रत्येकं मह्ना स्वमहिम्ना अंजन् व्यक्तीकुर्वन् ॥ तिस्रो दिवः द्योतमानाः स्त्रीन् भूम्यादिलोकांश्च प्रति प्रत्येकमंजन् स्थितां भूमिं प्रकाशेनांतरिक्षं हविः प्रापणेन तद्देवमित्यभिप्रायः ॥ यद्वा लोकानां प्रत्येकं त्रित्वोपतत्वात् ॥ तिस्रो दिव इत्यविरुद्धं ॥ तिस्रो दिवः पृथिवीस्तिस्र इत्यादिमंत्रवर्णात् त्रयो वा इमे त्रिवृतो लोका इति ब्राह्मणाच्च तथा घृतप्रुषा घृतं सिंचता मनसा हव्यं हविरुंदन् क्लेदयन् सुखीकुर्वन् यज्ञस्य मूर्धनि मुखे होमसमये देवान् यष्टव्यान् समनक्तु व्यक्तीकरोतु तर्पयत्वित्यर्थः ॥ ॥अथ तृतीया॥ ईळितो अग्ने मनसा नो अर्हन् देवान्यक्षि मानुषात्पूर्वो अद्य ॥ स आ वह म

तुभ्यतां उषसः अनु अनुलक्ष्य उद्धानः इध्यमानः दीपितः सन् अरुषेण रोचमानेन भानुना तेजस्वर्णं अदित इव दीदेत् दीप्यति ॥ सोग्निर्मनुषो मनुष्यस्य हेतुः होत्रादिभिः होत्रेति वाच्या महोमसाधनाभिः स्तुतिभिः स्तूयमानः ॥ स्वध्वरः शोभनयागो विश्वां प्रजानां राजा राजमानः स्वामी आयवे मनुष्याय यजमानाय तदर्थं चारुः चरणशीलः अतिथिः अतिथिवत्पूज्यो भवति ॥ ॥अथ नवमी ॥ एवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा ॥ दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणीति ॥ ॥ बृहद्दिवेषु प्रभूतद्युतिषु अमृतेषु देवेषु मध्ये हे पूर्व्य पूर्वमाजिन्ताग्ने त्वां मानुषा मनुष्याणां मध्ये नोस्मदीया धीर्बुद्धिः स्तुतिः कर्म वा एव एवं पीपाय प्याययति ॥ यद्वा मनुष्यो मनुष्यान् अस्मान् धीः त्वदीया बुद्धिः कर्म वा प्याययतु ॥ तथा त्वदीया धीर्वृजनेषु यज्ञेषु कारये स्तोत्रे दुहाना धेनुः दोग्ध्री धेनुरिव त्मना सा यमात्मतत्वेनात्मने वेइषणि एषणीयां स्यांशतिनं अपरिमितसंख्याकं पुरुरूपं गवाश्वादिरूपेण नानारूपं धनसमृद्धं दुहाना भवति ॥ ॥अथ दशमी ॥ वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ॥ अस्माकं द्युम्नमधि पंच कृष्टिषूच्चा स्वर्ण शुशुचीत दुष्टरमिति ॥ ॥हे अग्ने वयं यजमा

रुतां शर्धो अच्युतमिंद्रं नरो बर्हिषदं यजध्वमिति॥ ॥हे अग्ने ईळितोस्माभिः स्तुतः सन् मनसास्मदनुरक्तेन देवानां योगबुध्या
वा अर्हन् यागयोग्यः सन् मानुष्यात् होतुः पूर्वभाविनोस्मदर्थं मद्यास्मिन्दिने देवान् यक्ष्या नियक्षि त्वं मे यजसि ताहशो यष्टा
त्वमावह आकारय कान् मरुतान् शर्धो गणं अच्युतमक्षीणमिंद्रं अद्रिनाशीभूतमिंद्रमपि बुध्धो मरुद्भिरुपेतमिंद्रं अनंत
रे हे नरो नेतारः ऋत्विजो बर्हिषि सीदंतं तमिंद्रं यजध्वं॥ ॥अथ चतुर्थी॥ देव बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्यां॥
घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियास इति॥ ॥हे बर्हिः देव एतत् दर्भमा निन्यम् वर्धमानं सुवीरं शोभनवीर
संपादकं सुभरं सुपूर्णं स्तीर्णं अस्मदीयैर्ऋत्विग्भिः आस्तृतं भव किमर्थं राये धनाय अस्यां वेद्यां वेद्यो समस्यार्थे प्रगृह्य संज्ञा।
सहितायां यणादेशः छांदसः। घृतेनाक्तमिदं स्निग्धबर्हिः सीदत के हे वसवः एतन्नामकाः हे विश्वे सर्वे देवाः हे आदित्याः हे
यज्ञिया सायज्ञार्हास्तेषु यमिदं बर्हिर्निषीदत अस्मिन् बर्हिषि सीदतेत्यर्थः॥ ॥अथ पंचमी॥ विश्रयंतामुर्विया हूयमाना
द्वारो देवीः सुप्रायणा नमोभिः॥ व्यचस्वतीर्वि प्रथंतामजुर्या वर्णं पुनाना यशसं सुवीरमिति॥ ॥द्वारो देवीः अग्नेर्द्वा

राभिमा निन्योदेव्यो विविच्यश्रेव्य विहृता विधानाभवंतु कीदृश्यस्ताः उर्वियाः उर्व्याः महत्यः नमोभिः नमस्काराः तैः स्तोत्रैः
हूयमानाः सुप्रायणाः सुष्ठुप्रकर्षेणगंतव्याः ईदृश्यादेवाविश्रयंतां व्यचस्वतीः व्याप्तिमत्यः अजुर्याः अजुर्याः अहिंस्याः अ
जननावासुवीरं शोभनपुत्राद्युपेतं यशःसंयत्रो युक्तं वर्यं वर्णनीयं रूपविशेषं पुनानाः यजमानाय शोधयित्र्यः संपादयि
त्र्यो देव्यो विप्रथंतां विशेषेण प्रख्याता भवंतु ॥ ॥ इति द्वितीयस्य पंचमे द्वाविंशो वर्गः ॥ ॥ अथ षष्ठी ॥ साध्वपांसि सनता न उक्षि
ते उषासानक्ता वय्येव रण्विते ॥ तंतुं ततं संवयंती समीची यज्ञस्य पेशः सुदुघे पयस्वतीति ॥ ॥ साधु साधूनि नोस्म
दीयानि अपांसि कर्माणि उद्दिश्य सनता सनातनेन अविच्छिन्नप्रवृत्तिकेन स्तोत्रादिना उक्षिते पूजिते यद्वा पुरारेवाची वि
भक्त्यतः सनछब्दोस्ति । तस्य प्रथमाद्यवनस्याकारः सनातने नित्य इत्यर्थः । अस्मिन् पक्षे उक्षिते फलस्य सेवयित्र्यौ कर्त
रि निषा उषासानक्ता होरात्रे देवपत्न्येव वय्याइव वयने कुशले इव रण्विते शोभिते स्वते परस्परं गच्छंत्यौ वा ततं तनुः ततं स्थानी
यं यज्ञावयवं संवयंती सम्यक् विस्तृतं सह वावयंत्यौ उत्सादयित्र्यौ सम्यक् प्रवृत्तिके परास्परानुकूले । किमर्थं संवदंती यज्ञ

स्थानित्वर्णानियस्यास्तादृशी सर्वविषयगताकाउतद्रुभयविशेषणं तिस्रोदेवीः एतास्तिस्रोदेव्यः स्वधया अस्मद्दत्तहविषा
निमित्तेनेदं बर्हिः यज्ञं अच्छिद्रं यथा तथा पांतु॥ ॥पिशंगरूपइति त्वाष्ट्रपशोः पुरोडाशस्य याज्या पिशंगरूपः सुभरो वयोधाः
प्रथमभागं यज्ञेसंवयोधामितिसूत्रितत्वात् पाठस्तु॥ ॥अथनवमी॥ पिशंगरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवका
मः। प्रजां त्वष्टा विष्यतु नाभिमस्मे अथा देवानामप्येतु पाथइति॥ ॥पिशंगरूपः सुवर्णवर्णः नानारूपो वा सुभरः शोभन
यज्ञः शोभनभरणो वा वयोधाः वयसोन्नस्य धारयिता दाता श्रुष्टी क्षिप्रगुणा वीरो विविधप्रेरयिता देवकामः देवान्काम्य
ते येन तादृशः। पुत्रो जायते जायतामुत्पद्यतां त्वष्टुरनुग्रहात् सत्वष्टा एतन्नामको देवो अस्मे अस्मभ्यं नाभिं कुलस्य बंधिकां
प्रजां पुत्रादिरूपां विष्यतु मुंचतु वितरत्वित्यर्थः। अथ अपि च देवानां संबंधि पाथोन्नमप्यस्मानेतु गच्छतु। अपः क्रिययापासंबं
ध्यते गच्छत्वित्यर्थः॥ ॥अथदशमी॥ वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः॥ त्रिधा समक्तं नयतु प्रजानन्देवेदे
व्यः शमितोप हव्यमिति॥ ॥वनस्पतिः यूपाभिमानी एतन्नामकोग्निः। अवसृजन् अस्मदीयकर्मानुजानन् उपास्मंस

मीपेस्थात् तिष्ठतु अग्निः पाकाधारोग्निश्च हविः पश्वरूपं धीभिः कर्मभिः विशेषैः पाकसाधनैः प्रकर्षेण सूदयाति। क्षारयाति अप
क्वादिराहित्येन हविः पचतीत्यर्थः। किंच देव्यो देवसंबंधी आह्वयधिकरणभूतोभिः शमिता हविषः संस्कर्ता यद्वा देव्यः शमिता एतन्ना
मकोग्निः अग्निर्वै देवानां शमितेति श्रूयते त्रिधा त्रिप्रकारं उपस्तरणावदानाभिधारणैः समक्तं सम्यक्सिक्तं हव्यं हविः प्रजानन्
विनयन्प्रकारान् जानन् देवेभ्यः उपनयतु समीपं प्रापयतु॥ ॥अथैकादशी॥ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंम्व
स्य धाम॥ अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यमिति॥ ॥अस्याघृतमाज्यं मिमिक्षे अग्निंवामियोतोस्य घृतं यो
निः कारणं उत्पन्नोतैपि घृते श्रितः आश्रितः अस्याग्नेर्घृतमेव तेजः घृतेन ह्ययंदीप्यते इदानीं संबोध्योच्यते। हे अग्ने वृषभ फ
लस्य वर्षितस्त्वं अनुष्वधं प्रतिहविः सर्वेष्वपि हविःषु दीयमानेषु आवह देवान् आह्वय तान् मादयस्व प्रीणय स्वं। स्वाहाकृतं स्वा
हाकारेण दत्तं वक्षि वह॥ ॥इति द्वितीयस्य पंचमे त्रयोविंशो वर्गः॥ ॥जुवेव इति नवर्चं चतुर्थं सूक्तं भार्गवः सोमाहुतिनाम
कऋषिः। अग्निर्देवता त्रिष्टुप् छंदः। जुवेनवसोमाहुतिर्भार्गवो हे सत्यनुक्रमणिका प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभच्छंदसीदंसू

श्री
॥३०८॥

ऋ॰भा॰५
।।३०२।।

त्रितं वा हुवे व इत्युवे वः सुद्योत्मानंनि होता होतृषदने विदान इति सूक्ते इति॥ ॥तत्र प्रथमा॥ हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसं॥ मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदा इति॥ ॥हे यजमाना वो युष्मदर्थं अग्निं हुवे आह्वयामि कीदृशं तं सुद्योत्मानं सुवृक्तिं सुवर्जितं पापैः शोभनस्तुतिं विशां यजमानानां अतिथिं अतिथिवत्सदा पूज्यं सुप्रयसं शोभनहविर्लक्षणान्नं किं च जातवेदाः जातानां वेदिता यो देवोग्निर्मित्र इव सखा आदित्य इव वा दिधिषाय्यः धारयिता भूत् भवति कुत्रेति उच्यते आदेवे देवपर्यंते जने मनुष्यप्रभृति देवपर्यंतेषु तेषां धारको भवतीत्यर्थः॥ ॥अथ द्वितीया॥ इमं विधंतो अपां सधस्थे द्वितादधुर्भृगवो विक्ष्वायोः॥ एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्व इति॥ ॥इममग्निं विधंतः परिचरंतो भृगवो महर्षयः अपां सधस्थे सहस्थाने अंतरिक्षे आयोर्मनुष्यस्य यजमानस्य स्वभूतासु विक्षु प्रजासु च विक्ष्वेतेषां मध्ये च द्विता द्वयोः स्थानयोः स्थानयोः तायमानं छांदसं रूपस्य द्विता द्वित्वेनं वेधूतात्मना अंतरिक्षे यागार्थं विक्षु वा दधुः आधारयन् दधातेर्लिटि रूपं एषोग्निर्भूमा अस्य यो विश्वानि भूतजातान्यस्मद्विरोधीन्यभ्यस्तु अभिभवतु कीदृशः देवानामग्निररतिरीश्वरः तेषां मध्ये शीघ्रं अरणाः शीघ्रो वा यस्य भागे प्रति जीराश्वः॥ ॥अथ तृतीया॥

श्री
।।३०१।।

स्यानुशीयमानेस्यापाशानुरूपं निर्मातुमिति शेषः। यज्ञं निवर्तयितुं तद्वयवान्क्रमेणानुष्ठापयित्र्यावित्यर्थः। आ रात्रा भ्यां हि यज्ञस्यास्तभ्यंते सुदुघे सुष्ठु फलस्यादोग्ध्र्यौ पयस्वती उदकवत्यौ अहोरात्राभ्यां जलवृष्टिर्जायते एवं महानुभावे अहोरात्रे देवते अस्मद्यनि वेहतामित्यर्थः॥ ॥अथ सप्तमी॥ दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा॥ देवान्यजंता वृतुथा समंजतो नाभा पृथिव्या अधि सानुषु त्रिष्विति॥ ॥दैव्यादिविभवा दिव्योग्निः तस्माद्दिव्याद्ग्नेर्जातो होतारा आह्वातारौ देवानां होमनिष्पादको वाग्नी पार्थिवं वांतरिक्ष्यौ प्रथमयं वृषव्यो विदुष्टरा विद्वत्तमौ वपुष्टरा प्रकृष्टवपुषौ देवा वृचा मंत्रेण ऋजु अविकलं यथा तथा सम्यग्यक्षतः ऋतुथा तत्तदतौ तत्र तत्र काले देवान् यष्टव्यान् यजंतु पूजयंतु तौ देवौ पृथिव्या नाभा नाभौ उत्तरवेद्यां अधि उपरि त्रिष्वेषु सानुषु समुच्छ्रितेषु प्रदेशेषु गार्हपत्यादिषु समंजतः समक्तः। अंजेर्लघूपगमः॥ ॥अथाष्टमी॥ सरस्वती साधयंती धियं न इळा देवी भारती विश्वतूर्तिः॥ तिस्रो देवीः स्वधया बर्हिरेदमछिद्रं पांतु शरणं निषद्येति॥ ॥ नोस्मदीयां धियं बुद्धिं यो गं वा साधयंतीति। वर्तयती सरस्वती एतन्नामिके यद्देवी तथा इळा देवी भारती च विश्वतूर्तिः वि

अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यंतो न मित्रं ॥ स दीदयदुशतीरूर्म्या आदक्षाय्यो यो दास्वते दम आ ॥ देवासो देवाः क्षेष्यंतः स्वर्गं प्र
तिगच्छंतः संतः पूर्वं मानुषीषु मनुष्यसंबंधिनीषु विक्षु प्रजासु प्रियं देवानां प्रीणयितारमग्निं धुः अधुः स्थापितवंतः तत्र दृष्टांतः क्षेष्यंतो मित्रं नराः
यं प्रतिगच्छंतो नरा मित्रं प्रियं सखायं स्वगृहरक्षार्थं स्थापयंति तद्वत् स एवं देवैः स्थापितो योग्निर्दास्वते हविर्दत्तवते यजमानाय तदर्थं दमे तदीये
यागगृहे आ आहितः स्थापितः दक्षाय्यः समर्धयिता दाता वा सोग्निः उशतीः कामयमानाः ऊर्म्याः रात्रीः सर्वासु रात्रिषु आदीदयत् दीप्यते सर्वतः
सर्वरात्रिरादीपयति वा ॥ ॥ अथ चतुर्थी ॥ अस्येव रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः ॥ वि यो भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दो
धवीति वारानिति ॥ ॥ अस्याग्नेः पुष्टिः शरीरवृद्धिः रण्वा रमणीया शश्वद्युक्ता वा । तत्र दृष्टांतः स्वस्य पुष्टिरिव यथा लोके स्वकीया पुष्टिः स्वात्मे
रमणीया भवति तद्वत् यद्वा अस्याग्नेः संबंधिनी पुष्टिः यजमानविषया रण्वा स्वस्याग्नेः पुष्टिर्यथा रण्वा तद्वत् किंच हियानस्य समृद्धिं गच्छतो
व्याप्नुवतो धक्षोः । काष्ठानि दिधक्षोः दग्धुमिच्छोरस्याग्नेः संदृष्टिः संदर्शना विभ्रावोपि रण्वा । यो ग्निरोषधीषु काष्ठेषु जिह्वां ज्वालां जात्येकवच
नं ज्वालां विभरि भ्रत् अत्यर्थं विहरति कंपयतीत्यर्थः । हरतेर्यङ्लुगंतत्वेन दाधर्त्यादिषु निपातिता लोउयडागमः । यद्योगादनिघातः । तत्र दृष्टांतः ।

रथ्योरथाहोऽत्यान्नवाजी यथा वारणदशवारणं साधनात्रवासान्नृद्रो धवीति कंपयति तद्वत्। योऽग्निर्ज्वालाः कंपयति अस्याग्नेः पुष्टारण्वे
ति॥ ॥अथ पंचमी॥ आ यन्मे अभ्वं वनदः पनंतोशिग्भ्यो नामिमीत वर्णं॥ स चित्रेण चिकिते रंसु भासा जुजुर्वां यो मुहुरा युवा भूदिति॥ ॥
यतो अस्या त्वं महत्वं मम संबंधिनो वनदः वनं तत्संभक्तारः यद्वा वनदः प्रशंसां प्रशस्तं रूपं तत्स्तोतारः अवशंस्या प्रशंसार्थवाचीत सूर्वोन्नदः क्विप् अ
व्ययोरित्यकारलोपः आपनंत समंतात्स्तुवंति सो ऽग्निरुशिग्भ्यो स्मदीयं रूपं कामयमानेभ्य ऋत्विग्भ्यो वर्णं स्वहंशं रूपं। नामिमीत नुशब्दश्चार्थे
निर्मिमीते वसवरं सुरमणीवेष्यादिह दिषुनिमित्तेषु चित्रेण भासा हिरण्यकनकादिना वर्णयादीप्त्या चिकिते विज्ञायते किंच योऽग्निः जुजुर्वा
न्जीर्णः सन् ज्वालोपशमे स एव मुहुः पुनः पुनः आयुवा सर्वतो मिश्रयिता तरुणो वा अभूत् आ भवति। पुनराज्यादिसंयोगात्॥ ॥इति
द्वितीयस्य पंचमे चतुर्विंशो वर्गः॥ ॥अथ षष्ठी॥ आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत्॥ कृष्णाध्वा तपू रण्वश्चिकेत द्यौरि
व स्मयमानो नभोभिरिति॥ ॥ योऽग्निर्वनानि वनानि वृक्षसमूहान् तातृषाणः तृषितः इव त्वरमाण इत्यर्थः। आ भाति आभासयति दहतीत्यर्थः। यद्वा वना
वने आभाति किंच वार्ण उदकमिव यथा प्रवणेन मार्गेण गच्छति तद्वत्। किंच कृष्णाध्वा कृष्णवर्त्मा तपुस्तापकः रण्वो रमणीयः एवंभूतः

तृतीयसवने यद्वा प्रातरनुवाकसंबंधिना आग्नेयोषस्याश्विनानां मध्ये अन्यतमे तृतीये क्रतौ मन्म मननीयं स्तोत्रं शंसि अशंसि
शास्यते स्माभिः। हे अग्ने त्वं चास्मे अस्मभ्यं संयद्वीरं संयाता वीरा यस्मिन् तादृशं बृहंतं महांतं क्षुमंतं शब्दवंतं कीर्त्तिमंतं वाजमुत्कृष्टरू
पामन्नं स्वपत्यं रयिं दाः देहि॥ ॥अथ नवमी॥ त्वया यथा गृत्समदासो अग्ने गुहा वन्वंत उपरां अभि ष्युः। सुवीरासो अभिमातिषाहः स्म
त्सूरिभ्यो गृणते तद्वयो धा इति॥ ॥हे अग्ने त्वया रक्षकेण वन्वंतः गृत्समदासो गृत्समदाः ऋषयः अस्मनि परोक्षे पावचनं यथा गुहा गुहायां
वर्त्तमानान् उपरान् उपरे अधिकत्वेन वर्त्तमानान् न्यायेन भिस्युः अभिभवयुः तथा कुर्वित्यर्थः। कीदृशाः सुवीरासः शोभनपुत्रा
द्युपेताः अभिमातिसहः वैरिणां पापादीनां सोढारः। किंचेत्सूरिभ्यो मेधाविभ्यो यजमानेभ्यः गृणाते व्यत्ययेनैकवचनं शब्दयद्भ्यः स्तोतृ
भ्यः यद्वा सूरिभ्यो यजमानेभ्यः गृणते स्तोत्रं च स्मत् सुमत् अतिप्रभूतं तत् तादृशं प्रसिद्धं वयो धाः धेहि॥ ॥इति द्वितीयस्य पंचमे
पंचविंशो वर्गः॥ ॥होता जनिष्टेत्यष्टर्चं पंचमं सूक्तं सोमाहुतेरार्षमाग्नेयमानुष्टुभं होताष्टावनुष्टुभमित्यनुक्रांतं प्रातर
नुवाकाश्विनशस्त्रयोराग्नेये क्रतावस्य विनियोगः। सूत्रितं च। आग्नेये होता जनिष्टेति चतुर्विंशेऽहन्यपीदमेवाज्यं चतुर्विंशे होता

श्रीः
॥३११॥

जनिष्टेत्याज्यमिति आभिप्लविको द्वितीयेहनीदमेवाज्यं द्वितीयस्य चतुर्विंशेनाज्यमित्यनिर्दिष्टत्वात्॥ ॥तत्र प्रथमा॥ होता जनि
ष्ट चेतनः पिता पितृभ्य ऊतये। प्रयक्षंजेन्यं वसु शकेम वाजिनो यममिति॥ ॥होता होमनिष्पादकः चेतनः चेतयितास्मदनुष्ठित
स्य पिता पालकोऽस्मद्यज्ञस्य ईदृशोऽग्निर्जनिष्ट उत्पन्नः किमर्थं पितृभ्यः पालकेभ्यो यजमानेभ्य षष्ठ्यर्थे चतुर्थी तेषामूतये रक्षणा
य च वयं च वाजिनः हविर्लक्षणान्नवंतः संतः प्रयक्षं प्रकर्षेण पूज्यं जन्यं जेतव्यं यमं यमैतव्यं वसु धनं शकेम शक्ता भूयास्म लब्धुमि
तिशेषः। यद्वा वाजिनोऽन्नस्य यमं यमनं कर्तुं शकेम प्रयक्षं जेन्यं वसु धनमित्युपायनं उक्तलक्षणं धनमिव तत् यथा वरोत्थकं शक्नमस्त
हुत॥ ॥अथ द्वितीया॥ आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि॥ मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वतीति॥ ॥यज्ञस्य नेतरि याग
स्य निर्वाहके यस्मिन्नग्नौ सप्त रश्मयः सप्तसंख्याका रश्मिवद्व्याप्ता होत्रका आतताः स्वस्य कर्मभिः सर्वतो व्याप्ता भवंति स पोता पा
चको देवानां पोत्राख्या ऋत्विग्रूपो वाग्निर्मनुष्वत् मनुष्ययोर्न्नवत् दैव्यं देवो यज्ञा तत्संबंधि अष्टममष्टमम् ऋत्विक्संबंधित द्विश्वं कर्तव्यं जा
तं सप्त होत्रैः सह स्वमष्टमः सन् इन्वति व्याप्नोति यद्वा तदित्यस्यालिंगव्यत्ययः स पोतेति संबंधः सप्तहोत्रकैः सहाष्टमो भूत्वात

इध्यसंनिबर्हतीत्यर्थः॥ ॥अथ तृतीया॥ दधन्वेवायदीमनुवोचद्ब्रह्माणिवेरुतत्॥ परिविश्वानिकाव्यानेमिश्चक्रमिवाभवत्इति॥ ॥पूर्वस्मि
न्मंत्रेहोत्रादिवत् अयमप्यिग्ने निर्वहतीत्युक्तं। अत्र तु सर्वं तत्तदास्मनास्थित्वा स्वयमेव निर्वहतीत्याह॥ वा अथवा ईमेनं यज्ञं अनुलक्ष्
क्ष्य यत् हविरादिकं दधन्वे धारयत्यंध स्वादिरूपः। यानि ब्रह्माणि शस्त्रादीनि अनुवोचत्। अनुब्रवीति होत्रादिरूपः अत्र वान्विषे
तद्योज्यं तत्सर्वं वेरुत्स्वस्वेकाम पतेजानाति। इत्थं स्वयमनुष्ठातुं अयमग्निर्विश्वानि सर्वाणि काव्या काव्यानि कवयो मेधाविनो ऋत्वि
जस्तत्संबंधीनि कर्माणि पर्यभवत्। परिभवति स्वायत्तानि करोति व्याप्नोतीत्यर्थः। व्याप्तौ दृष्टांतः। नेमिर्बहिर्वेष्टन वलयः चक्रं रथांगं
यथा काव्यान् व्याप्तवद्वत्॥ ॥अथ चतुर्थी॥ साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि॥ विद्वां अस्य व्रता ध्रुवा वया इवानुरोहत इति॥ ॥
शुचिः स्वयं शोधकः प्रशास्ता देवानां एतन्नामकऋत्विक्प्रशासितेवायजन्विशेषाणां शुचिना क्रतुना शोधकेनाग्निहोत्रादि कर्मणा साकं
हि सह हि वाजनि उत्पन्ने जातमात्र एव शुद्धः सर्वस्य प्रशास्ता। वसन्नग्निहोत्रादि निर्वोढा भवदित्यर्थः। अस्याग्नेर्ध्रुवा ध्रुवाणि फलपर्यवसायी व श्री
नि ताव्रतानि कर्माणि विद्वान् जानन्यजमानो वया इव विस्तृताः शाखा इवानुरोहात्क्रमेणानुतिष्ठति॥ ॥अथ पंचमी॥ ता अस्य वर्णमायुवो नेष्टुः स ॥३१२॥

न्। चिकेतज्ञायते प्रकाशितइत्यर्थः। कइवनभोभिर्नक्षत्रैः स्मयमानः प्रकाशमानो द्यौरिव। द्युलोकइव सयथा नभोभिरंतरिक्षप्रदेशैः विशेषः स्म
यमानः शोभमानोद्यौरादित्य इव नीलवर्णांतरिक्षवायादित्येयथा ज्ञायते तद्वत्स्वसंचारे पाकहस्मीत्यतेमार्गेज्ञायते प्रकाशयत इत्यर्थः॥ ॥अथ
सप्तमी॥ स्वयो व्यस्थाद् अभि दक्षि उर्वी पशुर्नैति स्वयुरगोपाः॥ अग्निः शोचिष्मां अतसान्युष्णन् कृष्णव्यथिरस्वदयन्न भूमेति॥ ॥ योग्निर्व्यस्थाद्वि
विधं तिष्ठति व्याप्नोति विश्वं यथा यो ग्निरुर्वी विस्तृतां पृथ्वीं सर्वं पशु अभिदक्षत् आभिमुख्येन प्रवर्धमानो भवति। उभे अपि यच्छद्दर्पा
गोन्तनिहन्येत सोग्निः पशुर्न पशुरिव यथा जातः पशुः स्वछंदतः चरति तथास्वयुः तथास्वयमेव गच्छन् अगोपाः गोपनी रहितनिया
मकवर्जितइत्यर्थः। एति गच्छति किं कुर्वन् शोचिष्मान् प्रकृष्टदीप्तिः कृष्णव्यथिः कृष्णवर्त्मा प्राप्ता ग्राम्यथा करणः कंटकादयो येन तादृशः स
न् भूम अत्यधिक अस्वदयन् न आस्वादयतीव वृक्षमतान् रसान् अतसानि संततानि नीरसानि वसगुल्मादीनि उष्णन् दहन्नेति॥ ॥
अथाष्टमी॥ नूते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि॥ अस्मे अग्ने संयद्वीरं बृहंतं क्षुमंतं वाजं स्वपत्यं रयिं दा इति॥ ॥हे अग्ने ते
तव संबंधिनः पूर्वस्य पूर्वं यागसमये कृतस्यावसाभिमतत र्पणास्य अधीतौ स्मरणे सति। अत्रदृष्ट्या अद्याधि तृतीये विदथे यागे

चंतधेनवः॥कुवित्तिसृभ्यआवरंस्वसारोयाइदंययुरिति॥ ॥याःवक्ष्यमाणलक्षणयाअंगुल्यः इदमनुष्ठीयमानंकर्मययुःप्राप्नुवंतिअनु
ष्ठितंताः आयुवः गंत्र्यः व्याप्ताधेनवः प्रीणयित्र्यः स्वसारः स्वयंसारिण्योंगुलयो नेक्षुः हविर्याचितुः मक्षयितुः पोषयितुः सेतुर्वेश्यान्नेः यद्वेत
न्नामकऋत्विग्रूपस्यतिसृभ्योलोकत्रयवर्तिद्युतिभ्योवरमधिकंवर्पांवर्णनीयंरूपंयद्वातिसृभ्योपिऋतिभ्योधिकांयद्वाषष्ठ्यर्थेचतुर्थ्येति
स्रस्यआगाहेपुत्रादिमूर्तीनामपिवरंवर्पांकुवित्बहु ऋत्विजःसचंतेपरिचरंति॥ ॥अथषष्ठी॥यदीमातुरुपस्वसाघृतंभरंत्यस्थित॥ता
सामध्वर्युरागतौयवोवृष्टीवमोदतइति॥ ॥यदियदीमातुःसर्वस्यनिर्मातुर्भूम्याःवेदिलक्षणायाःस्वसास्वसृस्थानीयाजुहूर्घृतंभरं
तीसतीउपास्थितउपतिष्ठदग्निंएकवचनमविवक्षितंजुहूपभृद्ध्रुवाःघृतंभरंत्यःतिष्ठंतीत्यर्थः।तदातासांजुह्वादीनांआगतौयागाय
प्रासौस्यामध्वर्युः।एतन्नामकऋत्विग्रूपःअध्वरकामयमानोवाअग्निः।मोदतेहृष्यतियवोव्हीबवद्वृष्ट्यायथामोदतेतद्वत्॥ ॥अथस
समी॥स्वःस्वायधायसेकृणुतामृत्विगृत्विजं॥स्तोमंयज्ञंचादरंवनेमाररिमावयमिति॥ ॥अयमग्निःस्वःस्वायमेवस्वायस्वकीयायधा
यंसेकर्मपोहविषांधारणायवाऋत्विक्होताजनिष्टयोदिनात्तलक्षणोहोतृपोतृप्रशास्ताध्वर्यूपःऋत्विजंआर्त्विज्यंभावप्रधानोयं

द्वि.अ.५
॥३३२॥

निर्देशः। हे च त्विद्रूपः सन्नृत्विजं मानुषमार्त्विज्यं कृणुतां करोतु वयं च तदनुग्रहान्नु आदनंतरमेव स्तोमं स्तोत्रं यज्ञं च तदा अयं यागम
पि अरं असमर्थं वनेम संभजे महि ररिमदर्देमहि च हविः। यद्वा स्तोमं वनेम यज्ञयोग्यं हविरिरिम॥ ॥यथा विद्वां अरं करद्विश्वेभ्यो य
जतेभ्यः॥ अयमग्ने त्वे अपि यं यज्ञं चकृमा वयमिति॥ ॥हे अग्ने विद्वान् त्वं महातयाभिज्ञः प्रयोगज्ञो वा यजमानो यथा विश्वेभ्यो यजते
भ्यः। अपरं पर्याप्तं करत् कुर्यात् तथा त्वमनुग्रहाणेत्यर्थः। वयमपि यं यज्ञं यागविशेषं च कृम कुर्महे यागस्त्वे अपि अपिरेवार्थे त्वे व त्व
य्यीत्यर्थः। तमेव तस्मात्त्वं सर्वदेवार्थं यागं तत्तद्रूपः सन्निर्वहतीत्यर्थः॥ ॥इति द्वितीयस्य पंचमे षोडशो वर्गः॥ ॥इमां म इत्यष्ट
र्चं षष्ठं सूक्तं सोमाहुत्यार्षमाग्नेयं गायत्रं। इमां मे गायत्रं हीत्यनुक्रांतं प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदस्यास्य विनियोगः सूत्रि
तं च। इमां मे अग्ने समिधमिति तु सामिधेन्य इति॥ तत्र प्रथमा॥ इमां मे अग्ने समिधमिमामुपसदं वनेः॥ इमा उ षु श्रुधी गिरः इति॥ ॥
हे अग्ने मे मदीयामिमां आधीयमानां समिधमिमामुपसदं उपसदनसादनामाहुतिमुपसद्यागे क्रियमाणां वा वनेः संभजेथाः। तथेमा
उ इमा अपि गिरः स्तुतीः सु सुष्ठु श्रुधि कृणु॥ ॥अथ द्वितीया॥ अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे॥ एना सूक्तेन सुजातेति॥ ॥हे अग्ने

श्री
॥३३२॥

नो गिरः॥ यजिष्ठ होतरा गहीति॥ ॥हे यविष्ठ युवतम हन्तदेवानां यज्ञादिस्तुत्यकर्तृ यजिष्ठ अतिशयेन यष्टव्य होतः देवानामाह्वातरग्ने
नो गिरा अस्मदीयया स्तुत्या ईळानाय पूजयित्रे अवस्यवे रक्षणमिच्छते मेद्यं आ गहि आगच्छ॥ ॥अथ सप्तमी॥ ॥अंतर्ह्यग्न ईय
से विद्वान् जन्मोभया कवे॥ दूतो जन्येव मित्र्य इति॥ ॥हे कवे मेधाविन्नग्ने अंतः जनानां हृदयं ईयसे हि गच्छसि जानासि वा हिः सस्रगदूय
चिकित्व अंतरीयस इत्यादिमंत्रांतरप्रसिद्धिद्योतनार्थः। कीदृशस्त्वं उभया उभयविधानि जन्मानि यष्टॄणां यजमानानां यष्टव्यानां देवानां
संबंधानि विद्वान् जानन् सन् ईयस इति संबंधः। तत्र दृष्टांतः। जन्ये। जनेभ्यो हितः मित्र्यो विशेषेण मित्रेभ्यो हितो दूत इव यथा प्र
जानां चित्तवृत्तिज्ञानाय राज्ञा प्रेरितः। तासामंतो जानाति तद्वत्तम यस्मात्कं अंतरीयस इत्यर्थः॥ ॥अथाष्टमी॥ स विद्वां आ च पिप्रियो
यक्षि चिकित्व आनुषक्॥ आ चास्मिन्त्सत्सि बर्हिषीति॥ ॥हे अग्ने स त्वं विद्वान् विशेषाभिज्ञः सन् आ च पिप्रयः सर्वतोस्मान् पूजय च
कामैः। हे चिकित्व चेतनावन्। आनुषक् अनुक्रमेण आयक्षि यज देवान्। आ सत्सि। अस्मदीयायां सित्तीर्णे बर्हिषि॥ ॥इति द्वितीयस्य पंच
मे सप्तविंशो वर्गः॥ ॥श्रेष्ठं यविष्ठेति षळृचं सप्तमं सूक्तं सोमाहुत्यार्षमाग्नेयं गायत्रं प्रातरनुवाक्याश्विनशस्त्रयोर्गायत्रं छंदस्यस्य विनि श्री ॥२१४॥

योगः पूर्वसूक्त एवोक्तः। श्रावणीकर्माण्याद्या विनियुक्तास्तेषां सूक्ते प्रथमा॥ ॥श्रेष्ठं यविष्ठ भारताग्ने द्युमंतमा भर॥ वसो पुरुस्पृहं रयिं॥ ॥
हे अग्ने यविष्ठ युवतम हे भारत भरता ऋत्विजः। तेषां संबंधी भारतः। ते अध्वर्य्वादिभिः मथनहविःस्तोत्रादिना व्याप्रियमाणत्वात्। तादृ
शो हे वसो वासक व्यापक वा एवंरूप मय्यग्ने श्रेष्ठं अतिप्रशस्यं द्युमंतं दीप्तिमंतं पुरुस्पृहं बहुभिरर्थिभिः स्पृहणीयं रयिं आ भर आहर॥ ॥अथ
द्वितीया॥ मा नो अरातिरीशत देवस्य मर्त्यस्य च॥ पर्षि तस्या उत द्विष इति॥ ॥हे अग्ने त्वदनुग्रहान्नोस्मान् रातिः अदानं शत्रुत्वं यद्वा छंद
सः रातिशब्दः शत्रुवाची। स्त्रीलिंगो भवति। अदाता शत्रुः मा ईशत पराभवितुं शक्तो मा भूत्। विषयीकुर्यात्। अरातिर्विशेष्यते। देवस्य च मर्त्य
स्य च। संबंधिनी ततः कारितो अपि च तस्या भयविधायाः द्विषः अस्मद्रातेः पर्षि पूरय॥ ॥अथ तृतीया॥ विश्वा उत त्वया वयं धारा उद
न्या इव॥ अति गाहेमहि द्विष इति॥ ॥उत अपि च हे अग्ने वयं त्वदनुग्रहात् विश्वा द्विषः सर्वान् द्वेष्टॄन् उदन्या धारा इव उदकसंबंधिनी धारा
अस्रस्रुती रिवत्मना आत्मनैव अन्यनिरपेक्षेणातिगाहेमहि अतिक्रम्य गच्छेम॥ ॥अथ चतुर्थी॥ शुचिः पावक वंद्योग्ने बृहद्विरोचसे॥
त्वं घृतेभिराहुत इति॥ ॥हे पावक शोधक अग्ने शुचिः शुद्धो वंद्यः नमस्कार्यः सम्बृहत्वं महत् अत्यधिकं विरोचसे विविधं

दीप्यसे यतस्त्वं घृतेभिः घृतैराहुतः समंतादभिषिक्तः अतो विरोचसे॥ ॥अथ पंचमी॥ त्वन्नो अग्ने भारताग्ने वशाभिरुक्षभिः॥ अ
ष्टापदीभिराहुतइति॥ ॥हे भारत दक्षिणां पुत्रस्थानीयाग्ने नोऽस्मदीयः त्वं वशाभिः संध्याभिः उक्षभिः सेक्तृभिः बलीवर्दैः अष्टापदीभि
र्गर्भिणीभिश्चाहुत अशाधितोसि॥ ॥अथ षष्ठी॥ द्रुन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः॥ सहसस्पुत्रो अद्भुतइति॥ ॥द्रुन्नः समिद्रू
पान्नः सर्पिरासुतिः सर्पिरास्तूयते यस्मिन् तादृशः प्रत्नः पुरातनः होता होमनिष्पादकः वरेण्यो वरणीयः सहसस्पुत्रः सहसो बल
स्य पुत्रस्थानीयः बलेनोत्पन्नत्वात् अद्भुतः आश्चर्यभूतो रमणीय इत्यर्थः॥ एवं महानुभावाग्निः मामनुजानात्वित्यर्थः॥ ॥इति द्विती
यस्य पंचमे अष्टाविंशो वर्गः॥ ॥वाजयन्निवेति षळृचमष्टमं सूक्तं सोमाहुतेर्हरिश्चाद्यानुवृत्तस्याभावान्मंडलद्रष्टा गृत्समदऋषिः अ
ग्निर्देवता हिआद्याद्या गायत्री छंदः अंत्यानुष्टुप्। वाजयन्निव नू रथान्योगां अग्नेरुपस्तुहि। यशस्तमस्य मीळ्हुषइति॥ ॥हे अंतरात्मन् तु
क्षिप्रं अग्ने योगान् अश्वान् उपस्तुहि किं दृशस्याग्नेः यशस्तमस्य प्रवृद्धयशसः मन्त्राथैर्लिप्यते। मीळ्हुषः सेक्तुः फलस्य ईदृशस्य योगात्
स्तुहि होतरिति संबोध्य। स्तुतौ दृष्टांतः वाजयन्निव अन्नमिच्छन्पुरुष इव स यथाश्वानागमनाय स्तौति तद्वत्। यद्वोक्तलक्षणस्याग्नेः

ते त्वां अया अनया आहुत्या विधेम परिचरेम ऊर्जो निपातं बलस्य नसः। तस्य नापातयितव्यो। हे अश्वमिथे व्यापकपुत्र यद्वा आहुतिक्रिय
माणं कर्मास्ति तदिच्छतीति अश्वमिथिः। सत्वरमाणाः सपसदाचरंति कर्मभिः समवरंत हेतिसामिधेनीरनूच्यति सो देवतान्यपुनन्तीति
ब्राह्मणं। तादृशाग्ने ते त्वां अयानया आहुत्या विधेम परिचरेम तथा हे सुजात शोभनजनन नएनाएतेन सूक्तेन स्तोत्रेण प्रीणयामीति शेषः।
यद्वा स्तुरूपं ब्रूहि। तेन विधेम॥ ॥अथ तृतीया॥ तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः॥ सपर्येम सपर्यवइति॥ ॥हे द्रविणोदः धनस्य
दातः अग्ने तं तादृशं गिर्वणसं गीर्भिः स्तुतिभिः सपर्येम परिचरेम॥ ॥अथ चतुर्थी॥ स बोधि सूरिर्मघवा वसुपते वसुदावन्॥ युयोध्य
स्मद्द्वेषांसीति॥ ॥स मघवा अन्नवान् सूरिर्विद्वान् प्रेरको वा उक्तलक्षणाकः स्त्वं बोधि बुध्यस्व अस्मदीयं स्तोत्रं। किंच हे अग्ने द्वेषांसि द्वेष्टॄ
न् अस्मत्तो युयोधि॥ पृथक् कुरु॥ ॥अथ पंचमी॥ स नो वृष्टिं दिवस्परि स नो वाजमनर्वाणं॥ स नः सहस्रिणीरिषइति॥ ॥सः स एवाग्नि
र्नो अस्मदर्थं दिवस्परि द्युलोकादंतरिक्षात्परीति पंचम्यर्थानुवादी वृष्टिं करोतीति वाक्यशेषः। स एव नोऽस्मदर्थं अनर्वाणमविचलमन
ल्पं वाजं बलं ददातु तथा सहस्रिणीः अपरिमितप्रकाराणि इषः अन्नानि स एवाग्निर्ददातु॥ ॥अथ षष्ठी॥ ईळानायावस्यवे यविष्ठ दूत

गमन् साधनान् रथान् त्वं हि॥ ॥अथ द्वितीया॥ यः सुनीथो ददाशुषे जुर्यो जरयन्नरिं॥ चारुप्रतीक आहुत इति॥ ॥सुनीथः शोभननयनः
अजुर्य अजरणीयं अनभिभाष्यः चारुप्रतीकः शोभनोपक्रमो यो यो ऽस्ति सोऽग्निः दाशुषे हविर्दत्तवते यजमानाय तदर्थं अरिं तस्य शत्रुं ज
रयन् आहुतः स्तं मंदां ताधितो भवति॥ ॥अथ तृतीया॥ य उ श्रिया दमेष्वा दोषोषसि प्रशस्यते॥ यस्य व्रतं न मीयत इति॥ ॥यो ऽग्निः उ श्रिया
ज्वालया युक्तः सन् दमेषु आ आगतः दोषा रात्रिषु उषसि अहः सु च प्रशस्यते स्तूयते यस्याग्नेः व्रतं कर्म न मीयते न हिंस्यते न क्षीयते
वा॥ ॥अथ चतुर्थी॥ आ यः स्वा१र्ण भानुना चित्रो विभात्यर्चिषा॥ अंजानो अजरैरभीति॥ ॥यो ऽग्निः चित्रः चायनीयो नानावर्णो वा अर्चिषा
ज्वालया रश्मिसमूहेन अविभाति। सर्वतो भासते। तत्र दृष्टांतः। स्वर्ण भानुना किरणेन सूर्य इव स यथा विभाति तद्वत्। किं कुर्वन् अजरैः नित्यैः
ज्वालासमूहैः अभि सर्वतः अंजते व्यंजयन् प्रकाशयन्॥ ॥अथ पंचमी॥ अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः॥ विश्वा अधि
श्रियो दध इति॥ ॥अत्रिं शत्रूणां अत्तारं वा भक्षकं स्वराज्यं स्वयमेव राजमानं स्वराज्यमनु अभिलक्ष्य वा अग्निं उक्थानि शस्त्राणि
वावृधुः वर्धयंति। स चाग्निः विश्वाः सर्वाः श्रियः अधि दधे धारयति॥ ॥अथ षष्ठी॥ अग्नेरिंद्रस्य सोमस्य देवानामूतिभिर्वयं॥ अन

द्वि॰भा॰५
॥३३६॥

रिष्यंतः सचेमह्यभिष्याम पृतन्यतइति॥ ॥अरिष्यंतः केनाप्यहिंस्यमाना वयं अग्नेरिंद्रस्य सोमस्य देवानामन्येषामपि ऊति
भिः रक्षणाभिः सचेमहि संगच्छेमहि युक्ता भवेम तथा रक्षायुक्ता वयं पृतन्यतः पृतनामात्मन इच्छंतः। शत्रून् अभिष्याम अभिभ
वेम। पृतनाशब्दात् क्यचि कव्यध्वरपृतनस्यर्चिलोप इत्यकारलोपः॥२९॥ ॥इति द्वितीयस्य पंचमे एकोनत्रिंशो वर्गः॥ ॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवै
दिकमार्गप्रवर्त्तकवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणामासेन विरचिते वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्विती
याष्टके पंचमोध्यायः॥ ॥छ॥ ॥श्रीमद्वेदपुरुषार्पणमस्तु॥ ॥छ॥ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

श्री
॥३३६॥

हरणेन नानाविधरूपस्य धारक इत्यर्थः। यद्वा सहस्रस्य सर्वस्य भर्तेति। तथा च वाजसनेयं। सर्वं वै सहस्रं सर्वस्य भर इत्येव तदाहेति। शुचिजिह्वः ज्वालारूपा यस्य स तथोक्तः। एवंभूतोऽग्निः होतृषदने होताऽत्रसीदत् तीति होतृषदनमुत्तरवेदी अधिकरणे ल्युट्। तत्र न्यसदत् नितरां सीदतु। उक्तार्थे ब्राह्मणं। नि होता होतृषदने इत्यग्निर्वै देवानां होता तस्यैतद्धोतृषदनं यदुत्तरवेदीनाभिस्त्वेषो दीदिवां असदत्सुदक्ष इत्यासन्नो हि स तर्हि भवत्यदब्धव्रतप्रमतिर्वसिष्ठ इत्यग्निर्वै देवानां वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निरित्येषा ह वा अस्य सहस्रंभरता यदेनमेकं सन्तं बहुधा विहरन्तीति। अथ द्वितीया॥ त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता॥ अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः॥ इति॥ ॥ हे वृषभ अभिमतफलप्रवर्षक हे अग्ने त्वं दूतः अस्मदीये यज्ञे देवाह्वानार्थं दूतो भव। त्वमु त्वमेवास्मदभिमुख्येन परस्पाः प्रापयिता भव। अप्रयुच्छन्न प्रमाद्यन् दीद्यत् दी। दिवुर्मार्गे भायमानः त्वन्नोऽस्माकं तोकस्य पुत्रस्य तने तनोति विस्तारयति

कुलमिति। ततः पौत्रं तस्मिन् अस्मदीयानां तनूनां गोपाः गोपायिता। तथा च ब्राह्मणं। अग्निर्वै देवानां गोपा अग्निमेव तत्सर्वतो गोप्तारं परिदत्त आत्मने च यजमानाय चेति। तादृशस्त्वं गोपायिता भवामीति बोधि बुध्यस्व॥ अथ तृतीया॥ ॥ विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे। यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे॥ ॥ हे अग्ने परमे उत्कृष्टे जन्मन् जायते प्रादुर्भवत्यस्मिन्निति जन्म स्थानं द्यौः तस्मिन् द्युलोके वर्तमानाय तुभ्यं विधेम स्तोत्रैः परिचरेम। अवरे द्युलोकादधस्तने सधस्थे अन्तरिक्षे स्थिताय तुभ्यं स्तोमैः स्तोत्रैः विधेम परिचरेम यस्माद्योनेः पृथिवीरूपात् त्वमुदारिथाः उद्गतोऽसि प्रादुर्भूतोऽसि तं पृथिवीप्रदेशं यजे पूजयामि तत्र हि समिद्धे समिद्धे समिध्यमाने त्वयि हवींषि पुरोडाशादीनि प्रजुहुरे अध्वर्य्वादयः प्रजुहोतेर्लिटि रूपं॥ अथ चतुर्थी॥ अग्ने यजस्व हविषा यजीयाञ्छ्रुष्टी देष्णमभि गृणीहि राधः। त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोतेति॥ ॥ हे अग्ने यजीयान् यष्टृतमस्त्वं हविषास्मदृत्तेन यजस्व देवान् संयोजय देष्णं देयं राधो धनं श्रुष्टी श्रुष्टि

तिक्षिप्र नाम क्षिप्रं अभिगृणीहि। देवानां पुरतः इदं स्वादुतरमिति ब्रूहि। यद्वा श्रुष्टी क्षिप्रकारी त्वं देवैर्देयं राधो धनम
भिगृणीहि। अस्मदभिमुखेन ब्रूहि। प्रयच्छेत्यर्थः। दानसामर्थ्यं दर्शयति। त्वं रयीणां धनानां मध्ये रयिपतिः। उत्तमस्य धन
स्य पतिरसि हि। यद्वा रयीणां रयिपतिरिति सिद्धो रयिशब्दोनुवादः। त्वं शुक्रस्य वचसः अस्मदीयस्य स्तोत्रस्य मनोता भवसि य
द्वा मनोता॥ ॥अथ पंचमी॥ ॥उभयं ते न क्षीयते वसव्यं दिवे दिवे जायमानस्य दस्म। कृधि क्षुमंतं जरितारमग्ने कृ
धि पतिं स्वपत्यस्य रायः इति॥ ॥दस्म दर्शनीय हे अग्ने दिवे दिवे प्रतिदिनमग्निहोत्रकाले जायमानस्य ते तव उभयं व
सव्यं दिव्यं भौमं च वसु वस्वादित्वात् स्वार्थिको यत्प्रत्ययः। तादृशमुभयं वसु न क्षीयते अस्तोभयविधधनसद्भावे मंत्रवर्णः।
त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य क्षयसीति। अतः त्वं जरितारं तव स्तोत्रं कुर्वाणं इमं यजमानं क्षुमंतं तमन्नमंतं वा कृधि कु
रु। च स्वपत्यस्य शोभनापत्ययुक्तस्य राधो धनस्य पतिं स्वामिनं कुरु॥ ॥साकमेधे पर्वणि पूर्वेद्युरनुसवनीति स्त इष्टयः तत्र
प्रथमायामग्नेरनीकवतः सैनानीकेति याज्या। तथा च सूत्रं साकमेधाः इति खंडे सूत्रितं। सैषा सूक्ते षष्ठी॥ ॥सैनानीकेन
सुविदत्रो अस्मे यष्टा देवां आयजिष्ठः स्वस्ति। अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहीति॥ हे अग्ने स

०॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे। यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥१॥ यस्य निःश्वसितं
वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥२॥ ॥नि होता होतृषदने इति नवर्चं नवमं सूक्तं गृत्सम
दस्यार्षं निहोतेत्यनुक्रांतत्वात् अनुक्तत्वात् त्रिष्टुब् मंडलादिपरिभाषयाग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयोराग्ने
ये क्रतौ त्रिष्टुप्छंदस्य सूक्तस्य विनियोगः। अथैतस्येति खंडे सूत्रितं। निहोता होतृषदन इति। अग्निप्रणयने आ
धेरृचौ विनियुक्तः। पंचम्यां पूर्णमास्यामिति खंडे सूत्रितं। निहोता होतृषदन इति। तस्मिन् सूक्ते प्रथमा॥ ॥निहोता
होतृषदने विदानस्त्वेषो दीदिवां असदत्सुदक्षः॥ अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निरिति
गृत्समदः स्तौति। होता देवानामाह्वाता विदानो विद्वान् त्वेषः प्रवृद्धः दीदिवान् दीप्यमानः सुदक्षः शोभनबलः अ
दब्धव्रतप्रमतिः अदब्धानि अहिंसितानि व्रतानि कर्माणि यस्याः सा अदब्धव्रता प्रमतिः प्रकृष्टा बुद्धिर्यस्य तथो
क्तः वसिष्ठः सर्वस्य वासयितृतमः। वासयतेस्तृजंतस्य इष्ठनि रूपं सहस्रंभरः सहस्रस्यानेकविधस्य भर्ता वि

द्वि·भा·६
॥३१९

श्रवस्यः श्रव इत्यन्ननाम तस्मै हितः वाजी बलवान् सोग्निर्मर्मृजेन्यः सर्वैः परिचरणीयो भवति। यद्वलुगंताल्लम्यप्र
सयः॥ ॥अथ द्वितीया॥ श्रुधी अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः। श्यावा रथं वहतो रोहिता
वोतारुषाह चक्रे विभृत्र इति॥ अमृतो मरणधर्मरहितः विचेताः विशिष्टप्रज्ञः चित्रभानुर्विचित्रदीप्तिः चायनी
यदीप्तिर्वा सोग्निः विश्वाभिर्गीर्भिः श्रुतिसाधनभूतैः सर्वैर्वाक्यैः क्रियमाणं मे मम हवं स्तोत्रं श्रुधी शृणोतु त
स्याग्ने रथं श्यावाः श्याववर्णाः अश्वौ वहतः हरिद्वर्णयोरश्वयोः श्यावादिवर्णपरिग्रहस्त्रिष्टया भवति विभृतः
नानास्थानेषु हृतः चक्रे इति क्विन्मि खण्डिरवलुवूरोतेः वूमणि लिट्॥ ॥अथ तृतीया॥ उत्तानायामजनयन्त्सुषू
तं भुवदग्निः पुरुपेशासु गर्भः॥ शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेता इति। उत्तानायामुत्तानशी
यायामरण्यां सुषुतं अग्निहोत्रार्थं सृष्टं प्रेरितं अग्निमजनयन् अध्वर्य्वादय उदपादयन् सोग्निः पुरुपेशासु पेशा
इति रूपनाम बहुरूपास्वोषधीषु गर्भो भुवत् अंतर्वर्त्तिमध्ययागगर्भ इव भवेत्। भवतेर्लिङि रूपं शिरिणायां शीर्यां

श्री
॥३१९॥

३

तस्यां भूतानीति शिरिण्या रात्रिः तस्या अक्तुना अक्तन इदक्तु तमः तेन तमसा अपरीवृतः असंस्पृष्टः अत एव महो
भिस्तेजोभिर्युक्तः प्रचेताः प्रकृष्टप्रज्ञः सन्नु वसति दीप्यमानो वर्त्तते॥ ॥अथ चतुर्थी॥ जिघर्म्यग्निं हविषा घृतेन
प्रतिक्षियंतं भुवनानि विश्वा। पृथुं तिरश्चा वयसा बृहंतं व्यचिष्ठमन्नै रभसं दृशानमिति॥ ॥विश्वा सर्वाणि भुवना
नि प्रतिक्षियंतं वैश्वानरस्य नाधिष्ठंतं पृथुं महांतं तिरश्चा सर्वतः प्रवर्त्तमानेन वयसा तेजसा बृहंतं प्रवृद्धं अन्नैर्हवि
र्लक्षणैर्व्यचिष्ठं व्याप्तं रभसं बलवंतं दृशानं एवंगुणवत्त्या दृश्यमानमग्निं पुरोडाशादिलक्षणेन हविषा घृतेन चाभि
घर्मि सिंचामि। दीप्त्या मिवा घृक्षरणदीप्त्योः लटि रूपं। असिन्नु सवे वाजसनेयकं। जिघर्म्यग्निं हविषा घृतेन प्रतिष्ठि
ष सर्वाणि भूतानि। क्षितिः पृथिव्याः एव वयसा धूमेन बृहत् व्यचिष्ठमन्नैरभसं दृशानमित्यन वक्तानवत मन्नैरन्ना
दं दीप्यमानं इत्येतदानि स्वतरद्या दि सर्वतः प्रसृतं जुहोमीत्येदरक्षसे ह्यस्ते समानेन मसमानसेदं जषतेन्ये तन्मर्य
श्रीरिति मर्यश्रीरियेष स्मृति नोहयवर्णो अग्निनामिमत्सर इति नस्त्रैषामत्रो तदीप्यमाना भवतीति॥ ॥अथ पंचमी॥

आविष्कृतः प्रयुंचं जिघर्म्यरक्षसा मनसा तज्जुषेत। मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा३ जर्भुराणः इति।।
विष्कृतः सर्वत्र व्याप्य वर्त्तमानं प्रयुंचं यज्ञं प्रयागछंतं अग्निं येन घृतेन आजिघर्मि आसिंचामि। अरक्षसा बाधर
हितेन मनसा स्तोत्रेण सह तद्घृतं जुषेत भवान् सेवेत। मर्यश्रीः मर्यैर्मर्त्यैः श्रयणीयो भजनीयः स्पृहयद्वर्णः याग्द
र्शनीयवर्णो यजमानः स्पृहयति। तादृशो वर्णोपेतः तन्वा तेजसा जर्भुराणः पूर्यमाणोग्निः नाभिमृशे अतितेजस्वित
या अभिमर्शनीयो भवति। अभिपूर्वान्मृशेः कृत्यार्थे केन्प्रत्ययः।। ।।अथ षष्ठी।। त्रेया भागं सहसानो वरेण त्वा
दूतासो मनुवद्वदेम।। अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि इति।। वरेण वारयितव्येनेन त्वाद्दूतासि
वरे तेजः तेन सहमानः शत्रून् अभिभवन् त्वं भागं भजनीयं स्तोत्रं त्रेया जानीहि। आशीर्लिङि वा न्यस्य संयोगादेरि
येत्वं। त्वादूतासः दूतं त्वं दूतो येषामिति ते त्वादूतासः। यद्वा त्वया प्रेरिताः वयं मनुवत् मनुरिव वदेम स्तोत्रं ब्रूयाम। जु
ह्वा ह्वयते यस्यामिति जुहूः होमपात्रविशेषो वा अनूनं संपूर्णं मधुपृचं मधुना कर्मफलेन यजमानं संयोजयंत

तादृशं त्वं एना एनानीकेन युक्तस्त्वं सुविदत्रः सुप्रतिक्षः सुधनो वा अस्मे अस्माकं भव देवान् यष्टा देवानां हविःप्रदानेन
पूजकः आयजिष्ठः यष्टृतमः अदब्धः केनाप्यतिरस्कृतः गोपाः देवानां गोपयिता उत अपि च नोस्माकं परस्पाः शत्रु
तेभ्यः पारयिता पालकश्च त्वं द्युमत् दीप्तिमद्युक्तं उत अपि च रेवत् धनयुक्तं यथा भवति तथा स्वस्ति दीदिहि क्षेमेण सर्वतो
दीप्यस्व।। ।।द्वितीयस्य षष्ठे प्रथमो वर्गः।। ।।जोहूत्र इति षळृचं दशमं सूक्तं गार्त्समदं त्रैष्टुभमाग्नेयं। जोहूत्र इत्य
नुक्रांतत्वात्। सूक्तविनियोगः पूर्वेण सहोक्तः। अथ तस्मिन्सूक्ते प्रथमा।। ।।जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे
मनुषा यत्समिद्धः।। श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्यः स वाजी इति। जोहूत्रः सर्वैर्यज्ञार्थं ह्वातव्यो हो
तव्यो वा जुहोतेर्वा रूपं तादृशः प्रथमः अग्निर्वै देवानामवम इत्याम्नानात् मुख्यो योग्निः यत् यदा इळस्प
दे इळायाः पदे उत्तरवेद्याख्ये स्थाने मनुषा मनुष्येण यजमानेन समिद्धः तदसौ अग्निः पितेव देवानां हविःप्र
पणेन पालको भवति। श्रियं दीप्तिं वसानः आच्छादयन् अमृतः मरणधर्मरहितः विचेताः विविधप्रज्ञः

ऋ॰भा॰६
॥३२१॥

पिन्वः परिष्ठिता अहिना शूर पूर्वीः ॥ अमर्त्यं चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधान इति ॥ शूर शत्रूणां हिंस
क हे इंद्र या अपो अपिन्वः अवर्धय पूर्वीः प्रभूता स्ता अहिना मेघेन वृत्रेण वा परिष्ठिता अधिष्ठिता आक्रांताः त
ताः त्वं तस्मादहेः सकाशात् महीः महतीः अपः सृजः व्यसृजः उक्थैर्वावृधानो वर्धमानस्त्वं दासं सर्वस्योपक्षपयि
तारं अमर्त्यं चित् मरणधर्मरहितमेवात्मानं मन्यमानं तमसुरं अवाभिनत् अवाङ्मुखं यथा भवति तथा भिदि
र विदारणे लङि सिपि रूपं ॥ ॥ अथ तृतीया ॥ उक्थेष्विन्नु शूर येषु चाकन्स्तोमेष्विंद्र रुद्रियेषु च । तुभ्येदेता य
सु मंदसानः प्रवायवे सिस्रते न शुभ्रा इति ॥ ॥ हे शूर इंद्र येषु उक्थेषु होत्रादिभिः क्रियमाणेषु रुद्रियेषु रुद्रियेस
र्वैं तत्साधनभूतेय द्वा रुद्राः स्तोतारः तत्कृतेषु रुद्र वृतां स्तोमेषु च नु क्षिप्रं चाकन् चकन्ति कामयसे कमतेः कमातः
कुनातवार्यच्छः छिंरूपं यासु स्तोत्र रूपासु स्तुतिषु मंदसानो हृष्यन् भवसि ता एताः शुभ्राः दीप्यमानः
स्तुतयः वायवे अस्मदीयं यज्ञं प्रयागच्छते तुभ्यमेव प्रासिस्रते तदर्थमेव प्रसरंति नः से प्रयथेता अधुनासे श्री
॥३२१

वस्व ॥ ॥ अथ चतुर्थी ॥ शुभ्रं नु ते शुष्मं वर्धयंतः शुभ्रं वज्रं बाह्वोर्दधानाः ॥ शुभ्रस्त्वमिंद्र वावृधानो अस्मे दासी
र्विशः सूर्येण सह्या इति ॥ ॥ हे इंद्र ते तव शुभ्रं नु शोभनं शुष्मं बलं स्तोत्रैर्वर्धयंतः शुभ्रं दीप्तं वज्रमायुधं निदधानाः
भवाम । वावृधानः स्तोत्रैर्वर्धमानः शुभ्रस्तेजसा युक्तः त्वं अस्मे अस्माकं दासीः उपक्षपयित्रीः विशः आसुरीः प्रजाः
सूर्येण सृष्टुप्रेरकेण आयुधं हि प्रेरयति । त्वं युध्यस्वेति एवं रूपेण बाह्वोर्निहितेन वज्रेण सह्याः अभिभव सहते
र्यस्ययेन लिङः परस्मैपदं ॥ ॥ अथ पंचमी ॥ ॥ गुहाहितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियंतं । उतो अपो
द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येणेति ॥ ॥ हे शूरेंद्र गुहा गुहायां हितं निहितं अत एव गुह्यं अप्रकाशं गूळ्हं गूढं
अपीवृतं तिरोहितं । अत्रैकस्मिन्नेव तिरोधाने निरूपेर्थे पुनरुक्तयतिरोधानभूयस्त्व प्रतिपादनपराः अभ्यासेन हि भू
यानर्थो भवति । यथाहे दर्शनीयेति ता दृशं मायिनं मायाविनं असुरं क्षियंतं निवसंतं उतो अपि च अपो द्यां दि
वं तस्तभ्वांसं स्वसामर्थ्येन स्तंभयंतं रक्ष्यंभूतं अहिं असुरं मेघं वा वीर्ये सामर्थ्यैभूतेन वज्रेण हन् । हिंसागत्यो

द्वि॰भा॰६
॥३२२॥

रियस्य लङि रूपं॥ ॥इति द्वितीयस्य षष्ठे तृतीयो वर्गः॥ ॥अथ तस्मिन्सूक्ते षष्ठी॥ ॥स्तवा नु त इंद्र पूर्व्या महा
न्युत स्तवाम नूतना कृतानि॥ स्तवा वज्रं बाह्वोरुशंतं स्तवा हरी सूर्यस्य केतू इति॥ ॥हे इंद्र पूर्व्या पुरातनानि महा
नि महांति ते तव कर्माणि नु क्षिप्रं स्तव स्तवाम। किंच सूर्यस्य स्रष्टुः प्रेरकस्य वीर्यस्य वा सूर्यात्मनो वा इंद्रस्य तस्य
केतू प्रज्ञापकौ हरी एतन्नामकावश्वौ स्तव स्तवाम। ष्टुञ् स्तुतौ तिङां तिङो भवंतीति उत्तमबहुवचनस्य मध्यमैक
वचनादेशः। बहुलं छंदसीति शपो लुगभावः॥ ॥अथ सप्तमी॥ हरी नु त इंद्र वाजयंता घृतश्चुतं स्वारमस्वार्ष्टां।
वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन् इति॥ ॥हे इंद्र वाजयंता वेगं कुर्वंतौ तत्करोतीति णिच्। ते तव
हरी एतन्नामकावश्वौ घृतश्चुतं घृतस्योदकस्य च्यावयितारं स्वारं मेघध्वनिं नु क्षिप्रं अस्वार्ष्टां। स्वरतिः शब्दक
र्मा पाकं पचतीतिवदाकृधातुरनुवादः लुङि रूपं समना समस्थलाः यद्वा समना सर्वतो व्यप्रथिष्ट गर्जनं श्रुत्वा
समसोपरि वृष्टिर्भवतीति प्रथिता भूत्। तथा पर्वतश्चिद्गिरिर्मेघोऽपि सरिष्यन् अरंस्त अरमत रेमतेर्लुङि रूपं॥

श्री
॥३२२॥

६

मग्निं धनसाः धनस्य संभक्ताहं वचस्या स्तुतिलिङ्गामनया जोहवीमि आह्वयामि॥ ॥इति द्वितीयस्य षष्ठे द्वितीयो व
र्गः॥ ॥श्रुधी हवमिति एकविंशत्यृचमेकादशं सूक्तं गार्त्समदं अत्रानुक्रमणिका। श्रुधि सैकेंद्रं विराट्स्थानमृतेंत्यामिति।
विराट्स्थाना त्रिष्टुप् पूर्वं त्रिष्टुभस्यानुक्तत्वात् इंद्रो देवता। पृष्ठ्यस्य चतुर्थेऽहनि मरुत्वतीयशस्त्रे इदं सूक्तं निविद्धानं तत्र
इदं तृतीये सूक्तं चतुर्थेऽहनि इति खंडे सूत्रितं श्रुधी हवमिंद्र मरुत्वाँ इंद्रेति मरुत्वतीयमिति। अथ तस्मिन्सूक्ते प्रथ
मा॥ श्रुधी हवमिंद्र मा रिषण्यः स्याम ते दावने वसूनां। इमा हि त्वामूर्जो वर्धयंति वसूयवः सिंधवो न क्षरंत इति॥
हे इंद्र मे हवं मदीयमिदं स्तोत्रं श्रुधि शृणु मा रिषण्यः मा हिंस्यः इंद्र मनः प्रसाधयन्निति इति। स्य निराकृष्टः दुरुस्यु
द्रविणस्युर्वृषण्यतिरिषण्यतीति निपातितः वयं ते तव वसूनां दावने दानाय। स्याम पात्रभूता भवेम। इमा अस्मा
भिर्दत्तानि वसूयवः दातुर्यजमानस्य धनस्य धनमिच्छंति। छंदसि परेच्छायां क्यच्। तादृश्यो न क्षरंतः स्रवंतः
सिंधवः इव अभितः क्षरणशीलाः ते ऊर्जो हविर्लक्षणान्यन्नानि त्वां वर्धयंतीति हि॥ ॥अथ द्वितीया॥ सृजो महीरिंद्र या अ

अथाष्टमी॥ विपर्वतः साद्यप्रयुछन् संमातृभिर्वावशानो अक्रान्॥ दूरेपारेवाणींवर्धयंत इंद्रेषितां धमनिंपप्र
थंन्निति॥ ॥अप्रयुछन् अप्रमाद्यन् वर्षेण सावधानः पर्वतो मेघः निषादि नभसि निषण्ण आसीत्॥ मातृभि
रद्भिर्मध्यमिकाभिर्वाग्भिर्वावशानः सह शब्दं कुर्वाणः अक्रान् अक्रमीत्॥ इतस्ततः सर्वारमवरोत् क्रमतेर्लुङि॥
बहुलं छंदसीति विकरणस्य लुक्॥ दूरे पारे अतिदूरेंतरिक्षे स्थितां वाणीं मध्यमिकां वाचं वर्धयंतः स्तोत्रैः सम
र्धयं कुर्वतः स्तोतारो मरुतो वा इंद्रेषितां इंद्रेण प्रेरितां धमनिं शब्दं कुर्वाणीं तां वाचं नितरां प्रप्रथन् अप्रथयन्॥ ॥
अथ नवमी॥ ॥ इंद्रो महांसिंधुमाशयानं मायाविनं वृत्रमस्फुरन्निः॥ अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो
अस्य वज्रादिति॥ बलवानिंद्रः महान् महती सिंधुं स्यंदने इतस्ततः संचरतीति सिंधुर्मेघ तमाशयानं तमधिशाय
शयानं मायाविनं वृत्रमसुरं यद्वा सिंधुरुदकं तदधिशाय शयानं वृत्रं वृणोत्याकाशमिति वृत्रो मेघः तं निरस्फु
रन् हिंसः वर्षकस्य कनिक्रदतः शब्दं कुर्वाणाद्वज्रात् भियाने भयं प्राप्ते रोदसी द्यावापृथिव्यौ अरेजेतां अकंपेतां

दाधर्त्तिदर्धर्तिदर्धर्षीत्यादिना कनिक्रदच्छब्दो निपातितः॥ ॥अथ दशमी॥ अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं य
न्मानुषो निजूर्वात्। नि मायिनो दानवस्य माया अपादयत्पपिवान्सुतस्येति॥ ॥वृष्णः कामानां वर्षकस्येंद्रस्य वज्रः अ
रोरवीत् भृशं शब्दमकरोत्। वृद्धेस्यपेक्षायामाह। यद्यदा अमानुषं मनुष्याणां रहितं यद्वा मानुषो हे त सर्वामीये
वं मन्यमानेन मत्सरं मानुष्याणां हितकारी। यद्वा मतिमानिंद्रो निजूर्वात् नितरां हिंस्यात् तज्जिघांसतीत्यर्थः। जूर्वतिर्हिं
साकर्मणो लेटि रूपं सुतस्याभिषुतं सोमं पपिवान् पीतवान् मायिनो मायाविनो दानस्य दानवस्य दनुर्नाम वृत्रस्य
माता दनुः सुरय इत्यादिषु दृष्टत्वात् तस्याः पुत्रस्य वृत्रस्य मायाः वचनानि न्यपादयत् न्यपातयत्। बबाधेतिया
वत्॥ ॥इति द्वितीयस्य षष्ठे चतुर्थो वर्गः॥ अथ तस्मिन्नेव सूक्ते एकादशी॥ पिबा पिबेदिंद्र शूर सोमं मंदंतु त्वा मंदि
नः सुतासः॥ पृणंतस्ते कुक्षी वर्धयंत्वित्था सुतः पौर इंद्रमावेति॥ शूर बलवन् हे इंद्र पिबापिबेत्। अभिषुतमि ॥३२३॥
मं सोमं पिबैव आदरार्थे वीप्सा मंदिनो मदकराः सुतास्त्वभिषुताः सोम आमंदंतु त्वा मदयंतु मादिस्तुत्वादिषु

द्वि·भा·६
॥३२४॥

मत्तं वर्धयंतो भवंति। वयं ते स्याम त्वदधीना भवेम। देव द्योतमान हे इंद्र। श्रिंतमं दानभोगयोग्यं तयष्ब लवत्तमं
यद्वा शत्रूणां शोषयितृतमं रयिं चाकृतामकृमयामहे। कृनते: कृं सथस्थिय उ: लुगंतस्य लेटि रूपं। वीरवंतं पुत्रपौ
त्रैः सहितं तादृशं रयिमस्मे अस्मभ्यं रासि देहि॥ ॥अथ चतुर्दशी॥ रासि क्षयं रासि मित्रमस्मे रासि शर्ध इंद्र मा
रुतं नः। सजोषसो ये च मंदसानाः प्र वायवः पांत्यग्रणीतिमिति॥ ॥हे इंद्र क्षयं क्षियंति निवसंत्यत्रेति। क्षयो गृ
हं तदस्मभ्यं त्वं रासि। देहि तथा मित्रं सखायं अस्मे अस्मभ्यं रासि वाक्यभेदादनिघातः मारुतं मरुतां देववि
शां संबंधि शर्धो बलं नोस्मभ्यं रासि। एतेन मरुतामप्यागमनं प्रार्थ्यते। ये मरुतः सजोषसः सह प्रीयमाणाः
मंदसानाः मोदमानाः वायवो यंतं प्रतिगंतारः संतः अग्रणीतिं अग्रं नीयमानं सोमं प्रयांति। प्रपूर्वः पापिबे
ति। तेषां शर्ध इति समन्वयः। यद्वापि ब वायवो अग्रनीयमानं सोमं पिबंति तेषां वायूनां बलं रासि वायव इति
पूजार्थां बहुवचनं। वायुर्हि सोमस्याग्रपातेति॥ ॥अथ पंचदशी॥ व्यंत्विन्नु येषु मंदसानस्तृपत्सोमं पाहि

श्री
॥३२४॥

द्रह्यदिंद्र॥ अस्मांत्सु पृत्स्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः॥ हे इंद्र येषु त्वत्सहाय भूतेषु मरुत्सु मंदसानो माद्यन्
भवसि ते मरुत्वानु क्षिप्रं व्यंतु सोमं भक्षयंतु तु इत् एवार्थे द्रह्यत्। दृहतेरिदं रूपं आत्मानं दृढीकुर्वन् त्वं तृपत् तर्प
यंतमिमं सोमं पाहि पिब तत्र शत्रूणां हिंसक हे इंद्र बृहद्भिर्बलवद्भिरर्कैरर्चनीयैर्मरुद्भिः सहितस्त्वं आ तृति वार्थे ते
नोस्मान् द्यां च सु पृत्सु पुरोडाशादिभिरस्मान् पालयतेन च दिवं समर्धय। यद्वा येषु सोमेषु मंदसानो मंद
मानो भवसि ते सोमो व्यंतु त्वां गच्छतु शेषं पूर्ववत्॥ ॥इति द्वितीयस्य षष्ठे पंचमो वर्गः॥ अथ षोडशी॥ बृह
न्नु ये ते तरुत्रो क्वथभिर्वसि स्वमाविवासान्॥ स्तृणानासो बर्हिः प्रस्तावत्वोता इदं इंद्र वाजमग्मिन्निति॥ तरुत्र
आपद्भ्यस्तारक हे इंद्र ये पुमांसः मनुष्याः सखायं त्वा मुक्थैः शस्त्रैः आविवासान् परिचरेयुः। विवासतेर्लेटि यडा
गमः तएव पुमांसः तु क्षिप्रं अविलंबेन बृहंतो महांतो भवंति। वेति पूरणः किंच बर्हिः स्तृणानासः वेद्यां बर्हिराच्छा
दयंतः। ये त्वां परिचरंति ते होता इतनया रक्षितारः संतः एव प्रस्तावत्। ग्रहसहितं वाजमन्नं अग्मन् गच्छति॥ ॥

अथ सप्तदशी॥ उग्रेष्विन्नु शूर मंदसानस्त्रिकद्रुकेषु पाहि सोममिंद्र॥ प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां
सुतस्य पीतिमिति। हे शूर बलवन्निंद्र उग्रेषूद्गूर्णेषु बहुस्तोत्रशस्त्रवत्सु त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नाम
केषु आभिप्लविकेष्वहःसु मंदसानो हृष्यन्सोमं पाहि ततः प्रीणानः सोमपानेन प्रीतो भवन्नुत्तमश्मश्रुषु लिप्तं सो
मं प्रदोधुवत्। धुञ् कंपने। यङ्लुगंतस्य शत्रंतरिरूपं। पुनः पुनर्धुन्वन्सुतस्याभिषुतस्य पीतिं पानमुद्दिश्य ह
रिभ्यामश्वाभ्यां युक्तः सन्याहि गच्छ॥ ॥अथाष्टमी॥ धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभं। अ
पावृणोर्ज्योतिरार्याय नि सव्यतः सादि दस्युरिंद्रेति॥ शूर हे इंद्र शवस्त्वदीयं बलं धिष्व धारय दधातेर्लोटि बहु
लं छंदसीति शपो लुक्। छंदस्युभयथेति वा सार्वधातुकत्वादिडागमः येन बलेन दानुं दानवं पुत्रं वृत्रं और्ण
वाभं ऊर्णवाभिः कीटविशेषः और्णवाभ इत्युच्यते तमिव अवाभिनत्। बिभेदिथ। यद्वा और्णवः ऊर्णनाभिः त
द्वाभं तत्सदृशमित्यर्थः। ततस्तमोरूपस्य हननादार्याय कर्मणामनुष्ठात्रे जनाय कुत्साय राजर्षये वा ज्योतिः प्रकू

व्यसयेन परस्मैपदं। ते सोमास्त्वत्कुक्षी उदरस्योपमे पानैर्दृणंतः पूरयंतः संतः त्वा वर्धयंतु इत्था अनेन प्रकारेण पौरः
उदरपूरकः स्तु सोऽभिषुतः सोमः इंद्र त्वामव तर्पयतु अवतेस्तर्पणार्थस्यैतद्रूपं॥ ॥अथ द्वादशी॥ ॥त्वे इंद्राप्यभू
म विप्रा धियं वनेम ऋतया सपंतः॥ अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्यामेति॥ ॥हे इंद्र विप्राः मेधावि
नो वयं त्वयि त्वद्हृदये अभूम अपि सखानुनये प्रश्ने वर्त्तते। तेन त्वद्धृदये किं वर्त्तामहे इति ऋतया ऋतेन कर्मफलं तत्कामनु
यास पंतः त्वां परिचरणाख्येन कर्मणा स्पृशंतो वयं धियं त्वदुद्देशेन क्रियमाणं कर्म वनेम संभजेमहि। वन षण संभक्तौ
आशीर्लिङि। लिङ्याशिष्यङिति सुजभ्यस्य किंच अवस्यवः त्वत्तो रक्षणमिच्छंतः प्रशस्तिं शस्तिं। शंसनं प्रकृष्टं शंसनं स्तो
त्रं धीमहि। त्वयि धीमहि। ततस्ते त्वदीयस्य रायो धनस्य दावने दानाय पात्रीभूताः सद्यः स्याम इदानीं भवेम॥ ॥
अथ त्रयोदशी॥ स्याम ते त इंद्र ये त ऊती अवस्यव ऊर्जं वर्धयंतः॥ शुष्मिंतमं यं चाकनाम देवास्मे रयिं रासि वीरवं
तमिति॥ हे इंद्र ते तव ऊती ऊत्या प्रणयनेन अवतेः प्रार्थ्यर्थस्य क्तिनि रूपं तेन अवस्यवो रक्षाकामाः ऊर्जं हविर्लक्षण

पायोः कृतरिरूपं संज्ञावचनाभ्यदं तोदात्त। यथातरं तद्वइव मंहनेति॥ ॥अथ विंशी॥ अस्य सुवानस्य मंदिनस्त्रित
स्य न्यर्बुदं वावृधानो अस्तः॥ अवर्तयत्सूर्यो न चक्रं भिनद्वलमिंद्रो अंगिरस्वानिति॥ ॥ मंदिनो स्य मदकरस्य मिमं सुव
नस्य सुम भवतः त्रितस्य तीर्णतमस्य सुस्य महर्षेर — वावृधानः सोमेन वर्धमान इंद्रः अर्बुदं अर्बुनिदस्तीत्यर्थः। सोमेन
अर्बुदो मेघः अनुस्वारस्य रेफश्छांदसः। यद्वा नामैतत्। अर्बुदाख्यमसुरं न्यस्तः स्तृहिंसायामित्यस्य लङि तिपि बहु
लं छंदसीति विकरणस्य लुक् गुणे कृते तहल्ङ्याब्भ्यो दीर्घादिना तिलोपः नितरामवधीत्। महांतं चिदर्बुदं नि क्रमीः पदेय
दिषु अर्बुदार्थः स्पष्टमुक्तं। किंच अंगिरस्वान् अंगिरोभिः सहित इंद्रः अवर्तयत्। असुरहननार्थं वज्रमभ्राम
यत्। सूर्यो न यथा सूर्यश्चक्रं भ्रामयति तद्वत्। यद्वा तस्मादसुरान् भिया सूर्यः स्वकीयं रथचक्रं आवर्तयत्। नि
षेधार्थ उपयोत्र नकारः वर्त्तयितुं नाशक्नोत् तं बलं पणीनां प्रभुमसुरं भिनत्। तेनावज्रेणाभिनत्। यद्वा द्विचक्रो हि पूर्व
सूर्यस्य रथः तस्यैकं चक्रमिंद्रेणापहृतं सूर्य इति सूर्पांसस्तुगिति षष्ठ्येकवचनस्य सुः सूर्यस्य संबंधि अपहृतं

तदेकं चक्रमवर्तयत्। रक्षोहननार्थं अभ्रामयत्। तेन चक्रेण बलमभिनच्च। नस्त्वार्थे। अहर्गणेषु माध्यंदिनसवने
नीयमानरूपेषु अच्छावाकस्य अहरहः शस्यसंततकमस्मिताह्वे वेति सूक्तं। नूनं सा त इत्येषा तस्यांतेवसनीयास्तृ
त्रिंतेच। नूनं सा त मुत्तरामिति॥ ॥सैषा सूक्ते एकविंशी॥ ॥ नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीरा इति॥ ॥हे इंद्र दक्षिणा दानं समुत्साहं न करोतीति दक्षिणा
स्तोतृभ्यो देया। तत्वसंबंधिनी धनवती सा दक्षिणा धनवती धनवते स्तोत्रे वयं श्रेष्ठमभिमतमर्थं नूनं प्रतिदुहीय
तदिदानीं प्रतिदोग्धि॥ संपादयतीत्यर्थः॥ अन्येभ्यो दक्षिणां मा दाः। प्रथममस्मभ्यं दत्वा पश्चादन्येभ्यो दीयतामित्य
र्थः। यद्वा नेप्स्मादंकृमान् माधक् माधाक्षीः अपेक्षितपूरुदानेन पूरयेत्यर्थः। सुवीराः शोभनपुत्रपौत्राः वयं विदथे
स्मिन् यज्ञे बृहत् प्रभूतं स्तोत्रं वदेम त्वामुद्दिश्य ब्रुवाम। अत्र सा ते प्रतिदुग्ध प्रकृत्य वारयन्य मित्रान्वे ते वस्या इति कृ
र्मणो वीयतेर्वसं तेनिरुक्तमनुसंधेयं॥ ॥ इति द्वितीयस्य षष्ठे षष्ठो वर्गः॥ इति गार्त्समदे मंडले प्रथमोनुवाकः॥

द्वि·भा·६
॥३२७॥

द्वितीयेऽनुवाके एकादश सूक्तानि ॥ तत्र यो जात इति पंचदशर्चं प्रथमं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं संस्थावनिष्केवल्ये शि
विधानीयस्य पुरस्ताद्यो जात एवेति सूक्तं शंस्येत यदि पर्यायानिति खंडे सूत्रितं यो जात एवेति निष्केवल्ये इति अभिप्लुवि
के तृतीये हनि निष्केवल्ये यो जात एवेति निविद्धानीयं सूत्रितं च तृतीयस्य त्र्यर्यमा यो जात एवेति सोमसूक्तं शंसेत् तु विश्व
जितोऽग्निं नर इति खंडे सूत्रितं ॥ सत्रामदासो जात एवा भूरेवृ इति साम सूक्तानीति अतिनिष्केवल्येति विधानमिदं इये
नाजिरव्यामिति खंडे सूत्रितं । तिष्ठा हरी यो जात एवेति माध्यंदिन इति महाव्रते निष्केवल्ये यो जात एवेति सूक्तं ॥ उक्त
इति खंडे सूत्रितं । वनेन वायो न्यधायि चाकन् यो जात एव प्रथमो मनस्वानिति ॥ ॥ अत्रेतिहासो बृहद्देवतायामुक्तः ॥
संयुज्य तपसात्मानमैंद्रं बिभ्रज्जन्म हृद्गुः ॥ अदृश्यत मुहूर्तेन दिवि चैवेह स च ॥ तमिंद्र इति मत्वा तु दैत्यौ भीमप
राक्रमौ ॥ धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः ॥ उचितं तत्स तयोर्भावमृषिः पापं चिकीर्षतोः । यो जात इति सू
क्तेन कर्माण्यैंद्राण्यकीर्तयत् ॥ अमुत्र चैव तन्नार्या वर्णयेति ॥ ॥ पुरा किलेंद्रादयो वैन्यय इंसमाजग्मुः गृत्समदोऽपि त

श्री
॥३२७५

त्मकमादित्यमपावृणोः उद्घाटितवानसि दस्युः कर्मणामुपक्षयिता सवृत्रः सव्यतः तव सख्युः पार्श्वे निषादितवानित
रांस न्यो बाधितो वर्त्तते ॥ ॥ अथैकोनविंशी ॥ सनेम ये त ऊतिभिस्तरंतो विश्वाः स्पृध आर्येण दस्यून् । अस्मभ्यं तत्त
त्वाष्ट्रं विश्वरूपमरंधयः साख्यस्य त्रिताय ॥ इति ॥ ॥ सनेम तान् पुरुषान् संभजेमहि ये ते तव ऊतिभिः पालनैः विश्वाः स्पृधः
स्पर्धमानाः सर्वा विशः तरंतः तथा आर्येण आर्यभावेन दस्यून् उपक्षयिष्यन् हिंसंतो भवंति । तदस्मभ्यं वशमा
नय । किं तदाह । त्वाष्ट्रं त्वष्टुः सुतं विश्वरूपमेतन्नामकमसुरं अरंधयः रंध्यतिर्वशगमने वशमानय । किं तत्त
दाह । यद्वा तमसुरमवधीः रध हिंसासंराध्योः । रधिजभोरचीतिनुम् । इंद्रस्त्वाष्ट्रमवधीदित्ययमर्थः । तैत्तिरीयके वि
श्वरूपो वै त्वाष्ट्र इत्यत्र महता प्रबंधेन प्रपंचितः । किं च सख्यास्य सखिभावस्य अनुजनाय त्रिताय महर्षये वशमानय
यद्वा सनेम ते वयं प्रवृद्धा भवेम ये वयं तव रक्षाभिः स्पर्धमानः प्रजा दस्यूंश्च तरंतो तिक्रामंतो भवेम । सनेमेति वृद्ध्यर्थ
आद्युदात्तः । यथा सनेम मित्रावरुणा सनंत इति सर्वकर्मकृत्श्चेन्मध्यमोदात्तः । सनेम वाजं तव ते । तरं तह पुवनतर

वतेर्व्यत्ययेन च सः कृक्किती तीटः प्रतिषेधः॥ यस्येंद्रस्य शुष्मात् शरीरात् बलात् रोदसी द्यावापृथिव्यौ अभ्यसेतां अ
बिभीतां। भ्यस भयेन आनुदात्तेत्। भ्यस भय विपनयो इति नैरुक्ताः अभ्यसेतां वेपेतां वा। तथा च मंत्रांतरे। इमे
चित्तव मन्यवे वेपेते भियसा मही इति। नृम्णस्य सेनालक्षणस्य बलस्य मन्हा महत्वेन युक्तः स इंद्रो नाहमिति। अत्र
निरुक्तं। यो जायमान एव प्रथमो मनस्वान् देवो देवान् क्रतुना कर्मणा पर्यभवत्। पर्यगृह्णात्। पर्यरक्षदिति वा सद्
द्विविधा। यस्य बलाद् द्यावापृथिव्यावप्य बिभीतां नृम्णस्य मन्हा बलस्य महत्वेन स जनास इंद्र इत्यृषेर्दृष्टार्थस्य
प्रीतिर्भवत्याख्यानसंयुक्तेति। ॥ अथ द्वितीया॥ यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान्प्रकुपितां अरम्णात्॥
यो अंतरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इंद्र इति॥ ॥ हे जनाः यः इंद्रः व्यथमानां चलंतीं पृथिवीं अ
दृंहत्। शर्कराभिरिहामकरोत्॥ दृह दृहि वृद्धौ। यश्च प्रकुपितान् इतस्ततश्चलितान् पक्षयुक्तान् पर्वतान् अरम्णा
त्। नियमितवान्॥ स्वस्वस्थाने स्थापितवान्॥ अरम्णात् रमु क्रीडायां अंतर्भावितण्यर्थस्य व्यत्ययेन श्राप्र

त्ययः। यश्च वरीयो उरुतमं अंतरिक्षं विममे निर्ममे विस्तीर्णं चकारेत्यर्थः। यश्च द्यां दिवमस्तभ्नात् स्तंभ निरुद्धां अकरोत्
स्तंभुरोधन इति सौत्रो धातुः स एवेंद्रो नाहमिति॥ ॥ अथ तृतीया॥ यो हत्वाहिमरिणात्सप्त सिंधून्यो गा उदाजदप
धा वलस्य॥ यो अश्मनोरंतरग्निं जजान संवृक्समत्सु स जनास इंद्र इति॥ ॥ यः अहिं मेघं हत्वा मेघं महतं संस
र्पणशीलाः सिंधून् स्यंदनशीला आपः अरिणात् प्रैरयत् यद्वा सप्त गंगायमुनाख्या नदीः अरिणात् रीङ् स्रवणे क्र्या
दिः यश्च बलस्य बलनामकस्यासुरस्य अपधा इति अपधानात् तिरोधानात् निरुद्धा गा उदाजत् निरगमयत्। अपधा अप
पूर्वाद्दधातेरातश्चोपसर्ग इति भावे अङ् सुपां सुलुगिति पंचम्या आकारः। यश्च अश्मनोः अश्नुते व्याप्नोति अंतरिक्षमि
त्यश्मा मेघः अश्मनोः अतिमृदुरूपयोः अंतर्मध्ये विद्युतमग्निं जजान उत्पादयामास यश्च समत्सु संभक्षयंति। यो वृणक्ति मापृषी
तिसमदः संग्रामाः तेषु संवृक् वृणक्ति हिनस्ति शत्रूनिति संवृक् भवति। वृणक्ते हिंसार्थस्य क्विपि रूपं स इंद्रो नाह
मिति॥ ॥ अथ चतुर्थी॥ येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः॥ श्वघ्नीव यो जिगीवां लक्षमाद

द्वि॰ भा॰ ६ र्यः पुष्टानि स जनास इंद्र इति॥ ॥येनेंद्रेण इमा इमानि विश्वा विश्वानि च्यवना अनश्वराणि भुवनानि स्थिरीकृतानि। यश्च दा
॥३२१॥ सं वर्णं शूद्रादिकं यद्वा समुपक्षयितारं अधरं निकृष्टमसुरं। गुहा गुहायां गूढस्थाने नरके वा अकः अकार्षीत् कृञो लुङि म
न्त्रे घसेत्यादिना च्लेर्लुकि रूपं। लक्षं लक्ष्यं जिगीवान् जिजये क्वसौ सल्लिटोर्जेरिति अभ्यासादुत्तरस्य कुत्वं दीर्घः छां
दसः जितवान् यः अर्यः आरः षष्ठ्येकवचने छांदसो यणादेशः। शत्रोः संबंधी पुष्टानि समृद्धानि आदद। अदत्ते।
अत्र दृष्टांतः। श्वघ्नीव श्वभिः मृगान् हंति इति श्वघ्नी व्याधो यथा व्याधो जिघृक्षितं मृगं परिगृण्हाति तद्वत्॥ ॥अथ पं
चमी॥ यं स्मा पृच्छंति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनं। सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जना
स इंद्र इति॥ अपश्यंतो जना घोरं शत्रूणां घातकं यं पृच्छंति कुह सेति स इंद्रः कुत्र वर्तते। सेति सो चि लोपे चेत्पादपूर
णमिति सो लोपे गुणः। न कुत्रचिदसौ तिष्ठतीति मन्यमाना जना एनमिंद्रमाहुः एवं इंद्रो नास्तीति। तथा च मंत्रः। नेंद्रो अ
स्तीति नेम उ त्व आहेति ईमिति पूरणः स इंद्रः विज इव इवशब्द एवार्थे उद्वेजक एव सन् अर्यः आरः संबंधीनि पुष्टीः पो ॥३२१॥

१७

त्रा गृत्समदस्यासीत्। वैन्याश्चेंद्रजिघांसया तत्र समागमन्। तान् दृष्ट्वा निर्जगामेंद्रो यज्ञात् गृत्समदं तमसुराः परि
वव्रुः नाहमिंद्रस्त्वक्षः किंत्वेवंगुणोपेतः स इत्यनेन सूक्तेन तान्प्रत्युवाच। अपरे त्वेवं कथयंति॥ ॥गृत्समदस्य यज्ञे प्र
विष्टमेकं केनमिंद्रं ज्ञात्वा असुराः परिवव्रुः॥ स इंद्रो गृत्समदरूपेण यज्ञद्वारान्निर्गत्य स्वर्गं जगाम। ततो असुराः इंद्रे
विलंबितइत्येतः प्रविश्य गृत्समदं दृष्ट्वा पूर्वमेव गृत्समदो गतः। अयं त्विंद्रोऽस्मद्भया गृत्समदरूपेणास्त इति तं जगृहुः।
स तत्राहमिंद्रोयमित्यनेन सूक्तेन प्रत्युवाच। अयमेवार्थो महाभारते प्रपंचितः॥ तत्रैषा सूक्ते प्रथमा॥ ॥यो जात इति
गृत्समदो ब्रूते॥ ॥यो जात एव प्रथमो मनस्वान् देवो देवान्क्रतुना पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य
मह्ना स जनास इंद्रः॥ ॥जनासो जनाः हे असुराः यः जात इति जायमान एव सन् प्रथमः देवानां प्रधानभूतः मनस्वा
न् मनस्विनामग्रण्यः। देवो द्योतमानः सन् क्रतुना वृत्रवधादिलक्षणेन स्ववीर्येण कर्मणा देवान् सर्वान् पर्यभूषत् रक्षकत्वेन
पर्यगृह्णीत् भूष अलंकारे भ्वादिः लङि रूपं। यद्वा सर्वानन्यान् देवान् पर्यभूषत् पर्यभवत्। अत्यक्रामत् अस्मिन्पक्षे प

द्वि॰ भा॰ ९
॥३३०॥

ग्रामा यस्य विश्वे रथासः ॥ यः सूर्यं य उषसं जजान यो अपां नेता स जनास इंद्रः इति॥ ॥यस्य सर्वांतर्यामितया वर्त्त-
मानस्य प्रदिशि प्रदेशने अनुशासने अश्वासो अश्वा वर्त्तंते। यस्यानुशासने गावः यस्यानुशासने ग्रामाः ग्रसंते
अत्रेति ग्रामा जनपदाः यस्याज्ञायां विश्वे सर्वे रथासो रथा वर्त्तते। यश्च वृत्रं हत्वा सूर्यं जजान जनयामास। यश्चो-
षसं। तथा मंत्रः। जजान सूर्यमुषसं सुदंसा इति मेघभेदेन द्वारा अपां नेता प्रेरकः स इंद्र इत्यादि प्रसिद्धं॥ ॥अ-
थाष्टमी॥ यं क्रंदसी संयती विह्वयेते परेवर उभया अमित्राः॥ समानं चिद्रथमातस्थिवांसा नाना हवेते स जना-
स इंद्र इति। यं क्रंदसी रोदसी शब्दं कुर्वाणौ मानुषी दैवी च द्वे सेने वा संयती परस्परं गच्छंत्यौ यमिंद्रं विह्वयेते
स्वरक्षार्थं विविधमाह्वयतः परे उत्कृष्टाः अवरे अधमाश्च उभयाः उभयविधाः अमित्राः शत्रवः यमाह्वयंति स-
मानमेकं रथमारूढाविंद्राग्नी हवेते। यच्चार्थं यजमानैः पृथगाह्वयेते तयोरन्यतरः स इंद्रो नाहमिति॥ ॥अथ न-
वमी॥ यस्मान्न ऋते विजयंते जनासो यं युध्यमाना अवसे हवंते। यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत्स

श्री
४

जनास इंद्र इति। यस्मादृते जनासो जनाः न विजयंते विजयं न प्राप्नुवंति। अतः युध्यमानाः युद्धं कुर्वाणाः जना
अवसे रक्षणाय यमिंद्रं हवंते आह्वयंति यश्च विजयिता स इंद्र इत्यादि प्रसिद्धं॥ ॥अथ दशमी॥ ॥यः शश्वतो म-
ह्येनो दधानानमन्यमानांछर्वा जघान॥ यः शर्धते नानुददाति शृध्यां यो दस्योर्हंता स जनास इंद्र इति॥ ॥यः महि
महत एनो दधानान् शश्वतो बहून् अमन्यमानान् अस्मानमजानतः स इंद्रमपूजयंते। ताजनान् शर्वा शृणाति
शत्रूननेनेति शरुर्वज्रः तेनायुधेन जघान हंतेर्लिटि रूपं यश्च शर्धते। उत्साहं कुर्वते अनात्मज्ञाय यजमानाय शृ-
ध्यां उत्साहजननीयं कर्म नानुददाति। न प्रयच्छति। अनुपूर्वाद् डुदाञ् दाने जुहोत्यादिकः अभ्यस्तानामादिः इति चो-
दात्तत्वं तिङ्ङतिङ इति निघातः यश्च दस्योरुपक्षयितुः शत्रोर्हंता घातकः स इंद्र इत्यादि पूर्ववत्॥ ॥इति द्वितीयस्य षष्ठे ष-
ष्ठो वर्गः॥ ॥अथैकादशी॥ यः शंबरं पर्वतेषु क्षियंतं चत्वारिंश्यां शरद्यन्वविंदत्। ओजायमानं यो अहिं जघान दानुं
शयानं स जनास इंद्र इति॥ ॥यः पर्वतेषु क्षियंतं इंद्रभिया बहून् संवत्सरान् प्रच्छन्नो भूत्वा पर्वतगुहासु निवसंतं

द्वि॰ भा॰ ६
॥३३१॥

शंबरमेतन्नामकं मायाविनमसुरं चत्वारिंश्यां शरदि चत्वारिंशे संवत्सरे अन्वविंदत्। अन्विष्यालभत लब्ध्वा च यः ओ
जायमानं कर्तुं इच्छतः सलोपश्च ओजसो प्सरसो नित्यं इति सकारलोपः बलमाचरंतं अहिं आहंतारं दानुं दानवं शंबरं अ
सुरं जघान हतवान् स इंद्रो नाहमिति॥ ॥अथ द्वादशी॥ ॥यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त
सिंधून्। यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहंतं स जनास इंद्र इति॥ ॥यः सप्तरश्मिभिः सप्तसंख्याकाः पर्जन्याः
सप्तरश्मयो यस्य ते तथा रश्मयः वराहवः स्वतपसो विद्युन्महसो धूपयश्च श्वापयो गृहमेधाश्चेत्येते॥ ये चेमे शिमिवि
द्विषः पर्जन्याः सप्त पृथिवीमभिवर्षंति वृष्टिभिरिति तैत्तिरीयारण्यके ह्याम्नाता वृषभो वर्षकः तुविष्मान् वृद्धिमान् बलवा
न्वा सप्त सर्पणः स्वभावान् सिंधून् अपः सर्तवे सरणाय अवासृजत् अवसृष्टवान्। यद्वा गंगाद्याः सप्त नदीरसृजत् यश्च
वज्रबाहुः स नूद्यां दिवमारोहंतं रोहणमसुरं अस्फुरत् अजघान स्फुरणं तुदादिः॥ ॥अथ त्रयोदशी॥ द्यावा चि
दस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयंते॥ यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इंद्र इति॥ अ

श्री
॥३३१॥
१५

षत्वानि गवाश्वादीनि धनानि आ अभिमतानि सर्वतो दिनाति मीङ् हिंसायां मिनाते र्निगम इति द्रष्टव्यः। तत्तस्मात्। अस्मा
इंद्राय स इंद्रोस्तीति विश्वासमत्र कुरुत। यद्यप्यसौ विशेषतोस्माभिर्न दृश्यते। तथापि अस्तीति विश्वासं कुरुत। एवं
निर्धारणीयमहिमोपेतः स इंद्रो नाहमिति॥ ॥इति द्वितीयस्य षष्ठे सप्तमो वर्गः॥ ॥अथ तस्मिन्सूक्ते षष्ठी॥ यो र
ध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः। युक्तग्राव्णो योविता सुशिप्रः सुतसोमस्य स जनास इंद्र इ
ति॥ यः रध्रस्य रध हिंसासंराध्योः समृद्धस्य चोदिता धनानां प्रेरयिता भवति। यः कृशस्य दरिद्रस्य यश्च नाध
मानस्य नाधृणात्। धृ याच्ञोपतापैश्वर्याशीःषु याचमानस्य कीरेः कीरतेः कीर्त्यते वा स्तोतुर्ब्राह्मणस्य धनानां प्रेर
यिता यश्च सुशिप्रः शोभनहनुः सुशीर्षकः सन् युक्तग्राव्णः अभिषवार्थमुद्यतग्राव्णः सुतसोमस्याभिषुतसोमस्य य
जमानस्याविता रक्षिता भवति। स एवेंद्रो नाहमिति॥ ब्रह्मशब्दस्य लब्धपरत्वे याघृदार्जनतास्यात्। यथा ब्रह्मवन्वानो
अजैस्कवीरमिति। अयं तं तोदस्तः पदयत इति नाम्नपरः॥ ॥अथ सप्तमी॥ यस्याश्वासः प्रदिशि यस्य गावो यस्य

द्वि. भा. ६
॥३३२॥

रासो विदथमा वदेमेति॥ ॥इदानीमृषिः साक्षात्कृतमिंद्रं प्रतिब्रूते॥ हे इंद्र यो दध्रः दुर्धरः सन् सुन्वते सोमाभि
षवं कुर्वते। पुरोडाशादिहवींषि पचते च यजमानाय वाजमन्नं बलं वा आददर्षि भरसि प्रापयसि स त्वं सत्यः
यथार्थभूतोसि न पुनर्नास्तीति बुद्धियोग्योसि। व्रीलेति प्रसिद्धौ। तव प्रियासः सुवीरासः कल्याणपुत्रपौत्राः सं
तो वयं विश्वह सर्वेषु अहस्सु विदथं स्तोत्रं आ वदेम॥ ॥द्वितीयस्य षष्ठेन वमो वर्गः॥ ॥ऋतुर्जनित्रीति त्रयोदश
र्चं द्वितीयं सूक्तं गार्त्समदं ऋतुः सप्तोनं सा त्रिष्टुबित्यनुक्रमणिका। अस्मभ्यं तदु सो इति त्रयोदश्यंत्रिष्टुप् शिष्टा
स्त्रिष्टुबेतत्परिभाषया जगत्यः इंद्रो देवता उक्थ्ये तृतीयसवने ऽच्छावाकशस्त्रे एतत्सूक्तं ऋतुर्जनित्रीत्येनियान्येवा
हीनानीति सूत्रितं॥ ॥अथ तस्मिन्सूक्ते प्रथमा॥ ॥ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते।
तदाहना अभवत्पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यमिति॥ ॥ऋतुर्वर्षर्तुरूपः कालः जनित्री सोमस्य जनयित्री
भवति। परितस्याः जनन्याः सकाशाज्जातः सोमः अपः उदकानि मक्षु शीघ्रमाविशत्। यासु अप्सु सोमो वर्ध

श्री
॥३३२॥

ते तत्र अविशदित्यन्वयः। तस्मादस्य प्रविष्टत्वात्सोमस्य आहना आहंतव्यो अभिषोतव्यो भवत्। आहन्य इति षष्ठ्यंतमि
दं पदं। तथा च मंत्रवर्णः। ये ते मदा आहनसो विहायस इति। या गा सस्रूपा सोमलता पयः सारभूतं पिप्युषी वर्धयंत्य
भवत्। प्यायते र्लिटि रूपं सोऽलिड्यस्ति ह्नुश्चेति पीभावः वसोः संप्रसारणं उगितश्चेति ङीप्। अंशोः तस्याः सोमस्य लता
याः पीयूषं रसभूतं यत् उक्थ्यं प्रशस्यं हविः इंद्रस्य भवति॥ ॥अथ द्वितीया॥ सध्रीमायंति परिबिभ्रतीः पयो विश्व
प्स्न्याय प्र भरंत भोजनं॥ समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्य इति॥ ॥अवंते उदकं इत्थं सः
सहस्य सध्रीरिति सध्र्यादेशः अंतोदात्तत्वे नानिपातितः सध्रीचीनाः पयः उदकं परिपरितो बिभ्रतीबिभ्राणाः इ एता
नद्यः आयंति सर्वतो गच्छंति तान् नद्यो विश्वप्स्न्याय विश्वप्सोमपामालयभूताय समुद्राय भोजनं भुज्यते भोजनं पयः
प्र भरंत प्रकर्षेणास्यां दधति कृत एतत् तदाह प्रवतं प्रवणवलानां पयसामनुष्यदे कृतार्थे हवै केन्यत्वत इति प्रे
स्वयः। अनुष्यंदनीयो ध्वा मार्गः समानः एको हि यस्त्वं ता तानि सोमो सादनना हि प्रवर्तनादीनि कर्माणि प्रथमं पूर्व

अह्रणोः अक्रूरः सन् तादृङ्महिमोपेतः त्वं उक्थ्योऽसि सर्वैः प्रशस्यो भवसि॥ ॥अथ तृतीया॥ अन्ये त्वेवं वदन्ति य
द्दृशाति तद्रूपाभिन्नेन तद्रूपा एव दृश्यते। विश्वा एवास्य वितुदस्ति तिक्षते यस्त्वा कृणोः प्रथमं सास्युक्थ्य इति॥ ॥यजमा
नो यद्धविर्देवेभ्यो ददाति तद्देवो होता वदति याज्यापुरोनुवाक्याभ्यां देवताः स्मारयति। एवं ध्वर्युः रूपपद्धादीन्
रूपाणि भिन्नं न हिंसन् तद्रूपाः द्विरूंसनारवयमप अमूर्मयस्य तादृङ् सन् ईयते देवयजने सर्वत्र गच्छति। एवमस्याध्व
र्योः विद्रव वितुदः सर्वाणि तत्कर्तव्याणि विक्षेपणरूपाणि कर्मवैगुण्यानि तितिक्षते तत्तद्योग्यप्रायश्चित्तकरणेन ब्र
ह्मा सहते गुप्तजिह्वः सन् मायाभिष्यते। तानि हविःप्रदानादीनि कर्माणि यस्त्वमक्षणा कारयसि त्वमुक्थ्योऽसि
॥ ॥अथ चतुर्थी॥ प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते। असिन्वन्दंष्ट्रैः पितुरत्ति भोज
नं यस्त्वा कृणोः प्रथमं सास्युक्थ्य इति॥ ॥हे इन्द्र पुष्टिं त्वया दत्तं पोषकं धनं स्वकीयेभ्यः प्रजाभ्यः विभजन्त अस्यैत
वदस्यैतावदिति विभागं कुर्वतो गृहमेधिन आसते स्वस्वगृहेषु निवसन्ति तत्र दृष्टान्तः आयते प्रयागच्छते यथा

स्मै इन्द्राय द्यावापृथिवी इतरेतरापेक्षया द्विवचनं। प्रमित्रयोर्वरुणयोरिति वत् नमेते स्वयमेव प्रह्वीभवति न तु प्रह्व
ते कर्मवर्जनैरिन्द्रहस्तनमांयद्विणामिति यद्वः प्रतिषेधः चिदपि च अस्येन्द्रस्य शुष्मात् बलात् पर्वता भयन्ते बिभ्य
ति। यः सोमपाः सोमस्य पाता निश्चितः सर्वैः यद्वा अन्येभ्योऽपि देवेभ्यो दृढाङ्गः वज्रबाहुः वज्रसदृशबाहुः यश्च वज्र
हस्तः वज्रयुक्तः स इन्द्र इत्यादि प्रसिद्धं॥ ॥अथ चतुर्दशी॥ ॥यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमान
ती मूती॥ यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्र इति॥ ॥यः सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमान
मवति रक्षति। यश्च पुरोडाशादीनि हवींषि पचन्तं यश्च ऊतीऊतये सुपां सुलुगिति चतुर्थ्याः पूर्वः सवर्णदी
र्घः स्वरक्षायै शास्त्राणि शंसन्तं यश्च शशमानं अवति स्तोत्रं कुर्वाणं रक्षति परिदृढं स्तोत्रं यस्य वर्धमानं वृद्धिकरं भवति
तथा यस्य सोमो वृद्धिहेतुर्भवति। यस्य चेदमस्मदीयं राधः पुरोडाशादिलक्षणमन्नं वृद्धिकरं भवति। स इन्द्र इत्यादि
प्रसिद्धं॥ ॥पंचदशी॥ यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि सत्यः। वयं त इन्द्र विश्वह प्रियासः सुवी

द्वि·भा·६
।।३३४।।

शुष्कं मधुमद्दुदोहिथ ।। स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्य इति ।। हे इंद्र यस्त्वं भोजनं भुज्यत इ
ति भोजनमन्नादि च दयसे यजमानेभ्यः प्रयच्छसि । दयतिर्दानगतिरक्षणहिंसादानेषु आत्मनेपदी । किंच वर्धनं वृद्धि
करं धनं बलं वा दयसे । तथा आर्द्रात् कुं उन्नं शुष्कमनार्द्रं ब्रीह्यादिकं मधुमत् मधुरसोपेतं दुदोहिथ दुग्धवानसि ।
दुहेर्लिटि थलि क्रादिनियमादिडागमः । स त्वं शेवधिं विवस्वति तेपरिचरणं कुर्वाणे यजमानाय शेवधिं धनं सुखनं निद
धिषे दधासि । किं बहुना विश्वस्य सर्वस्य जगतः एकः अद्वितीय एव सन् ईशिषे स्वामी भवसि । ईश ऐश्वर्ये । ईशः स
तीडागमः सय्यादिसिद्धिः ।। ।। अथ सप्तमी ।। यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्यवनीरधारयः । यश्चास
मा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्य इति ।। ।। हे इंद्र यस्त्वं पुष्पिणीः पुष्पवतीश्च प्रस्वः प्रसूताः
प्रसूयमाना वा अवनी रक्षित्रीः ओषधीः दाने अधि उपलूयंते । सस्यान्यत्रेति दानं क्षेत्रं अधिकरणे ल्युट् । तस्मिन्क्षे
त्रे धर्मणा सकललक्षणेन कर्मणा अधारयः न्यदधाः । यश्च त्वं दिवा द्योतमानस्य सूर्यस्य असमाः ~~मसंसं~~

श्री
।।३३५।।

~~अभितः सर्वतः~~ नानाप्रकाराः विद्युतः दीप्तीरजनयः यद्वा दिवो नक्षत्राणि जनेर्लङि व्यत्ययेन शप् । यश्चोरुः महांस्त्वं
अभितः सर्वतः उर्वान् महतः प्राप्ति निकृत्यान् पर्वतान् वा जनयः । शिष्टं स्पष्टं ।। ।। अथाष्टमी ।। यो नार्मरं सहवसुं
निहंतवे पृक्षाय च दासवेशाय चावहः । ऊर्जयंत्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्य इति । पुरुकृत् पुरू
णां कर्मणां कर्तः हे इंद्र यस्त्वं नार्मरं नॄन् मनुष्यान् मारयतीति नृमरः कश्चिदसुरः तस्यापत्यं नार्मरः । तं सहवसुं व
सूनां सह वर्तत इति सहवसुः असुरनामैतत् । एतन्नामकमसुरं निहंतवे हंतुं तुमर्थे तवेन्प्रत्ययः । तादौ च निति
ति गतेः प्रकृतिस्वरत्वं निहंतुं ऊर्जयंत्याः बलवत्याः वज्रधारयाः अपरिविष्टमलादिभिरव्याप्तं आस्यं अद्यैव अहतम
सुरं प्रापय । यद्वा ऊर्जयंत्याः पृथ्व्याः विकृत्याः आस्यं प्रापयः । किमर्थं पृक्षाय तं हविर्लक्षणान्न लाभाय दासवेशाय दासा
नां दस्यूनां वेशाय विनाशाय च यद्वा अस्मात्कमन्नलाभाय दस्युविनाशाय ।। ।। अथ नवमी ।। शतं वा यस्य दश साकमा
माद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ । अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्य इति ।। ।। हे इंद्र य

कस्य एकाकिनः श्रेष्ठस्य स्ववाय स्वश्रुष्टेः सखनिमित्ते तदर्थं कृतं दश कृतानि हरयो वाहनार्थं भवंति। तथा च मंत्रवर्णः
इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति। अपि च यश्च आ अद्यः सर्वेषां सर्वतः उपजीव्यः न तस्य द्वि
यं नाद्याद्यं द्वै तेनाद्य इरिदिति हि श्रुतिः। यद्वा यश्च त्वां वा दं स्तोत्राणां प्रेरकं यजमानं आविथ रक्षितवानसि। किं च यस्त्वं
अरज्जौ रज्जुवर्जिते बंधनागारे दस्यून् पक्षयितृन् दभीतये दभीतिनामकमृषिं दाषः तदर्थं समुनयन् हिंसितवा
नसि उन्नते हिंसाकर्मणो लङि व्यत्ययेन श्नम् हेर्लुगित्यादिना सिलोपश्छांदसः। किं च सरूप्रान्यः सख्ये नैव रूपसर्पणीयो
भवः। शिष्टं सिद्धं॥ ॥अथ दशमी॥ विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनं। षळस्तभ्ना विष्टि
रः पंच संदृशः परि परो अभवः सास्युक्थ्य इति। विश्वे सर्वे लुप्तमिति जस आकारः सर्वा एव रोधनाः रोधस्य यो नद्यः
अस्येंद्रस्य पौंस्यं पुंसो भावः पौंस्यं वीर्यमिति यावत्। अनु तद्वीर्यं अनुवर्तंते अस्मै इंद्राय ददुः हविर्लक्षणमन्नं यज
मानाः प्रयच्छंति किं च कृत्नवे कर्मणां कर्त्रे इंद्राय धनं दधिरे सर्वे जना धारयंति। तथा च मंत्रः इंद्राय द्याव ओषधीः

दृष्टं धारकप्रभवं तं बहुभरणसमर्थं च यथ्नं यथा विभज्य प्रयच्छंति तद्वत्। असिन्वन् सेतुबंधादि कर्म कुर्वन् लो
कः पितुः पालयित्र्या दिवः सकाशात् आगता भोजनमुदकं तत्कार्यं ओषधीः दंष्ट्रैर्दंतैः अग्निर्भक्षयति। यद्वा असि
न्वन् अद्यान् प्रियमाणोऽग्निः पितुः पालकस्य यजमानस्य संबंधि भोजनं हविर्लक्षणमन्नं दंष्ट्रैर्दंतैः रूपैर्ज्वालैरत्ति। य
त्स्पाकृणोरित्यादि प्रसिद्धं॥ ॥अथ पंचमी॥ अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्य इति। हे इंद्र अध अपि च त्वं दिवे द्योतमानाय सूर्याय पृथि
वीं बलितं सतीं दृढां कृत्स्नस्य संदृशे संदर्शनीयाम् पथः मार्गान् अरिणक् व्यरेचयः गंतुं योग्यानकरोरित्यर्थः। रिचिर् वि
चने लङि सिपतस्य हल्ङ्याब्भ्य इत्यादिना लोपः अहिहन् अहेर्वृत्रस्य मेघस्य वा हंतः हे इंद्र देवाः स्तोतारस्त्वा त्वां स्तो
मेभिः स्तोत्रैः अजनन्। तत्र दृष्टांतः। उदभिर्न यथा वाजिनमश्वं उदभिरुदकैर्वर्धयंति। पद्दन्नोमास्यादिना उदक
स्य उदभावः। शेषं सिद्धं॥ ॥इति द्वितीयस्य षष्ठे दशमो वर्गः॥ ॥अथ षष्ठी॥ यो भोजनं च दयसे च वर्धमानमार्द्राद

द्वि॰भा॰६ ॥३३६॥

दश्री॥ अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय क्षरंतिं॥ नीचा संतमुदनयः परावृजं प्रांधं श्रोणं श्रवयन्त्सा
स्युक्थ्य इति॥ ॥हे इंद्र अरपसः सरणमपः कर्मयासां ताः अरपसः शब्दं ध्वादित्वा स्वरूपं। ताः अपः कं सुखेन तरा
य तरणाय अरमयः अस्तंभयः। किंच तुर्वीतये तुर्वीतिनामकऋषये तस्मै ताभ्यां स्रुतिं सरणं प्रति अरमयः तौ हि ज
लपूर्णमहानदीं दृष्ट्वा तरीतुमसमर्थावास्तां तौ च त्वया तारितौ परावृजं पतितः पापानि वृणक्ति दहतीति परावृजे
कऋषिः तमस्मन्नं नीचा नीचैः संतमुदनयः आपद्भ्यः ऊर्ध्वं जितवानसि। किंच। अंधं संतं श्रोणं पंगुं संतं चक्ष
र्दानात्पंगुकरणाद्य उदनयः। किं कुर्वन् प्रवप्रवर्षेण श्रावयन् आत्मानं कीर्तिमंतं कुर्वन् उदनय इति समन्वयः। सह
स्यादिसिद्धं॥ ॥अथ त्रयोदशी॥ ॥अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यं। इंद्र यच्चित्रं श्रवस्या
अनु द्यून्बृहद्वदेम विदथे सुवीरा इति। वसो। सर्वस्य वासक वसुमान्वा हे इंद्र स्तोतृभ्यो अस्मभ्यं तद्राधो धनं दाना
य उपलक्षणमेतत्। भोगाय च समर्थयस्व देहि। अस्मान्संगमयेत्यर्थः। अर्थयाचने चुरादिरदंत आत्मनेपदी

श्री ॥३३६॥

तितव बहु प्रभूतं वसव्यं वासकं वसव्यं वस्वादिकं त्वा स्वार्थिको यत्। तादृशं प्रभूतं धनमस्ति। खलु चित्रं चायनीयं यद्धनं
अनु द्यून् अन्वहं। कालाध्वनोरिति द्वितीया। श्रवस्याः भाग्यमिच्छेः अंतरण्यर्थत्वात्। अकर्मकत्वं। यथा रोदितीति
सत्वसं हेत्यत्र कर्मणी उद्दिश्य कर्म च विधेयकर्मांतर्भूतं उद्दिश्यकर्मणा सकर्मको भविष्यति। यथा माणवकं दुत्रायती
ति भाष्य उदाहृतं। अवः शब्दात् छंदसि परिच्छेदं योक्यपार तदंतस्य लोदयागमेरूपं। सुवीराः कल्याणपुत्रपौत्राः सं
तो वयं विदथेस्मिन्यज्ञे बृहत्प्रभूतं वस्वादिकं वाक्यं वदेम॥ ॥इति द्वितीयस्य षष्ठे त्रयोदशो वर्गः॥ ॥अध्वर्यवो भ
रतेति द्वादशर्चं तृतीयं सूक्तं गार्त्समदं त्रिष्टुभमैंद्रं अध्वर्यवो भरतेंद्राय सोममिति याज्येति सूत्रितं॥ ॥तस्मिन्सू
क्ते प्रथमा॥ अध्वर्यवो भरतेंद्राय सोममामत्रेभिः सिंचता मद्यमंधः॥ कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदि
देष वष्टीति॥ ॥गृत्समदो ब्रूते। अध्वर्यवः अध्वरस्य नेतारः अध्वरं यजमानाय इच्छंतः क्यच्यध्वर एतनस्य विलोप
इयकारलोपः। अत्र यास्कः। अध्वर्युरध्वरयुरध्वरं युनक्ति अध्वरस्य नेता अध्वरं कामयत इति। हे अध्वर्यवः इंद्राय

द्वि॰ भा॰ ६ ॥२३७॥

देवाय सोमं हविर्धानादुत्तरवेदिं प्रति भरत हरत आमित्रस्याविद्यमानत्वादनिघातः हत्वा अमत्रेभिः अमात्सह
अदन्यत्र होत्रादय इति अमत्राणि चमसाः तैः मद्यं मदकरमंधः सोमलक्षणमन्नं आसिंचत अक्षौ प्रक्षिपत। अ
त्रयास्कः। आसिंचतमत्रैर्मदनीयमंधो मत्रं पात्रममास्मिन्नदंतीति। वीरः स इंद्रः अस्य सोमस्य पीतिं पानं प्रतिस
दं सदैव कामीति कामयमानो हि तस्मात् दृषभाय वर्षित्रे इंद्राय सोमं जुहोत। जुहोत जुहुत नादनयोर्लोटि तप्तनप्तनथनाश्च
तितबादेशः। एष इंद्रः तदिततदेव सोमं इच्छ्री वष्टि कामयते॥ ॥अथ द्वितीया॥ अध्वर्यवो यो अपो वव्रिवांसं वृत्रं ज
घानाशन्येव वृक्षं। तस्मा एतं भरत तद्वशायां एष इंद्रो अर्हतीति पीतिमस्य॥ ॥ हे अध्वर्यवः यः इंद्रः अपः मेघसं
बंधीन्युदकानि वव्रिवांसं निरोधकं वृत्रमसुरं जघान आहतवान् यथा अशन्या वृक्षमिव तस्मै एतस्मा इ एतं इंद्राय व
शं हूयमानायां भरत एषः अस्य सोमस्य पीतिं पानं अर्हति॥ ॥अथ तृतीया॥ अध्वर्यवो यो दृभीकं जघान
यो गा उदाजदप हि वलं वः। तस्मा एतमंतरिक्षे न वातमिंद्रं सोमैरोर्णुत जूर्न वस्त्रैरिति॥ ॥ हे अध्वर्यवः य इंद्रः

श्री ॥२३७॥

२९

रुतापो रध्यं रक्षंतीति जीर्ण्यो वनानीति। विशिष्टो विस्तीर्णः। षट् षट्संख्याकाः उर्वीः तास्च द्यौश्च पृथिवी चाहश्चापश्चौषध
यश्चेत्येवंरूपाः ता अस्तभ्नाः नियमितवानसि। संदृशः सम्यक् पश्यंतीति संदृशो जनाः पंचसदृशः पंचजनान् परिसर्व
तः परः पारयिता पालयिता वा अभवः भवसि। गतमन्यत्॥ ॥इति द्वितीयस्य षष्ठे एकादशो वर्गः॥ ॥अथैकादशी॥
स्तू प्रवाचनं तव वीर वीर्यं यदेकेन क्रतुना विंदते वसु। जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेंद्र विश्वास्युक्थ्य इति।
वीर बलवन् हे इंद्र तव वीर्यसामर्थ्यं सुप्रवाचनं सुष्ठु प्रवचनीयं सर्वैः श्लाघनीयमित्यर्थः। किं तत् एकेन क्रतुना कर्म
णा वसु वित्तं शत्रूणां धनं लभते। विद्लृ लाभे। तुदादिः स्वरितेत्। यद्वा तत् यद्धनं स्तोतृन् प्रापयसि। इति यत्तत्त
द्वीर्यमित्यर्थः। सहस्वतो बलवतो जातूष्ठिरस्य एतन्नामकः कस्यचिद्वयो न प्रादाः। यदा जातूष्ठिरस्य जातु कदाचित्सु
व्रतस्थिरस्य सहस्वतः बलवतो यजमानादेः कर्मणः संबंधि वयो हविर्लक्षणमन्नं प्रविंदस इति। समन्वयः या यानि इमा
नि अन्यानि विश्वा सर्वाणि कर्माणि चकर्थ। कृतवानसि। स त्वं हे उक्थ्य उक्थ्यः सर्वैः प्रशंसनीयो भवति॥ ॥अथ द्वा

द्वि·अ·६ ॥३३९॥ पंचमी॥ अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसं। यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इंद्रायांधसो जुहोते
ति॥ ॥अध्वर्यवः यः इंद्रः स्वश्नं अश्नाति भक्षयति प्राणिजातमिति। यद्वा अश्नुते स्वजसा व्याप्नोतीति। अश्नः वृत्रि
दस्युः तमसुरं स सु जघान यः अशुषं केनाप्यशोषणीयं। शुष्णमसुरं यश्च व्यंसं अंसहीनं कृत्वा जघा
न यश्च पिप्रुं तेजसा जगद्व्याप्य वर्त्तमानं एतन्नामकमसुरं जघान। यः तैत्तिरीयके नमुचिमसुरं नावालभेतेति
प्रकृत्य फेनेन शिर उदवर्त्तयदिति तेन वाक्यसंदर्भेण नमुचिवधः प्रपंचितः। तथा मंत्रश्च। अपां फेनेन नमुचेः शि
र इंद्रोदवर्त्तय इति। रुधिक्रां एतन्नामकमसुरं यश्च जघान तस्मै इंद्राय अंधसो हविर्लक्षणान्यन्नानि जुहोत जुहु
त॥ ॥अथ षष्ठी॥ अध्वर्यवो यः शतं शंबरस्य पुरो बिभेदाश्मनेव पूर्वीः। यो वर्चिनः शतमिंद्रः सहस्रमपावपद्भर
ता सोममस्मा इति॥ हे अध्वर्यवः यः इंद्रः शंबरस्य मायाविनोसुरस्य पूर्वीः पुरातनीः शतं पुरः पुरीः अश्मनेव
अश्मकेष्य सदृशेन वज्रेण बिभेद यश्चेंद्रो वर्चिनः वर्चदीप्तौ गमेरिति विधीयमान इति बहुलवचनादस्मा ॥३३९॥

वतियद्भ्यानामेतत्। तस्यासुरस्य शतसहस्रं सो चैवं हथो अप्रयसुर एतत्संख्याकान् परिमितान् अर्चिनः
पुत्रान् अपावपत्॥ तथा च मंत्रवर्णः॥ शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरानिति॥ ॥इति द्विती
यस्य षष्ठे त्रयोदशो वर्गः॥ ॥अथ सप्तमी॥ अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेवपज्जघन्वान्। कुत्सस्या
योरतिथिग्वस्य वीरान्न्यावृणग्भरता सोममस्मा इति। हे अध्वर्यवो जघन्वान् पूर्वं शत्रून् हतवान् यः इंद्रः शतं सहस्र
मसुरान् भूम्या उपस्थे उत्संगे अवपत्। एवं वज्रेण प्रकारेणापातयत्। किंच यः कुत्सस्य एतन्नामकस्य राजर्षेः आ
योः पौरुषस्य राजर्षेः अतिथिग्वस्य दिवोदासस्य एतेषां त्रयाणां वीरान् अभिगंतॄन् पातीति। द्वंद्विनः शुष्णादीनसु
रान् न्यावृणक् वृणक्तिर्हिंसाकर्मा अवधीत्। तथा च मंत्रवर्णः। त्वं कुत्सं शुष्णहत्येष्वाविथारंधयोतिथिग्वाय शंब
रमिति। तादृशायेंद्राय सोमं भरत॥ ॥अथाष्टमी॥ अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहंतो नशथा तदिंद्रे।
गभस्तिपूतं भरत श्रुतायेंद्राय सोमं यज्यवो जुहोतेति॥ ॥नरः कर्मणां नेतारो हे अध्वर्यवः यदभिलषितमर्थं का

ऋ॰ भा॰ ६
॥३३९॥

मयाध्वे कामयते लेड्यगमः श्रुष्टी। क्षिप्रं इंद्रं सोमं वहतः प्रापयत। यूयं तदभिलषितं फलं नशाथ। प्राप्नुत स्तुताय
ऽमे वृषभ सिक्षायेंद्राय गभस्तिपूतं हस्ताभ्यां जनदोह नाभिः शोधितं सोमं भरत उन्नयत वक्षिं प्रतिदिर तातायज्यवः
यागं कुर्वाणाः हे अध्वर्यवः आहृतं सोममिंद्राय जुहोत जुहुत अग्नौ प्रक्षिपत॥ ॥अथ नवमी॥ अध्वर्यवः कर्तन
श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वं॥ जुषाणो हस्त्यमभि वावशे व इंद्राय सोमं मदिरं जुहोतेति॥ ॥हे अध्वर्यवः अ-
स्मै इंद्राय सोमं श्रुष्टिं सुखकरं कर्तन कुरुत॥ करोते लोटि बहुलं छंदसीति विकरणस्य लुक्। तप्तनप्तनथनाश्चेति
तबादेशः। आमंत्रितस्याविद्यमानत्वात् अभिघातः। किंच वने संभजनीये वने उदके निपूतमाप्यायनेन शोधितं सो-
ममुन्नयध्वं जुषाणः प्रीयमाणः स इंद्रः वो युष्माकं हस्त्यं हस्ताभ्यां अभिषुतं सोमं अभिवावशे कामयते। वशकां-
तौ। यङ्लुगंतस्य लिटि व्यत्ययेनात्मनेपदं। लोपस्त आत्मनेपदेष्विति लोपः। मदिरं मदकरमिमं सोमं इंद्राय जु-
होत। इंद्रोद्देशेनाग्नौ प्रक्षिपत॥ ॥अथ दशमी॥ अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमि-

श्री
॥३३९॥

23

दृभीकं सर्वान् विदारयतीति भियं करोतीति दृभीको नामासुरः तमसुरं जघान यश्च बलासुरेण निरुद्धा गा उदाजत्
निरगमयत्। यश्च तमेव बलमसुरं अपवः अपावृणोत्। हिंसितवानित्यर्थः। वृणोतेर्लङि मंत्रे घसेत्यादिना च्लेर्लुक्।
हल्ङ्याब्भ्य इति लोपः। तस्मै इंद्राय एतं सोमं अंतरिक्षे वातं न वातमिव यथा सर्वाभिव्याप्तिं कुरुते तदेवाह। सोमैरिंद्रं आ
ऊर्णुत। सर्वत आच्छादयत। ऊर्णुञ् आच्छादने अदादिकः। लोटि रूपं तत्र दृष्टांतः। जूर्न जीर्णा यथा वस्त्रैः अंगमाच्छाद-
यति तद्वत्॥ ॥अथ चतुर्थी॥ अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून्॥ यो अर्बुदमव नीचा बबा-
धे तमिंद्रं सोमस्य भृथे हिनोतेति॥ ॥हे अध्वर्यवः य इंद्रः नवनवतिं च एकोनशतं बाहून् चख्वांसं वा दृष्टिदं रूपं य-
कुर्वतः ख्यासो रूपं जने लोपः छांदसं रूपं सर्वस्य दर्शयितं। उयद्वा आत्मने देहे निखातवंतं उरणं एतन्नामकमसुरं
जघान। यश्चार्बुदं एतन्नामकमसुरं च नीचाधोमुखं कृत्वा अवबबाधे तमेनमिंद्रं सोमस्य भृथे सोमैर्बिभ्रति यज्ञि
हिनोत वर्धयत। यद्वा सोमस्य भृथे भरणे संपादने सति हिनोत स्तोत्रैः प्रीणयत। हिनोतिर्वृद्ध्योः स्वादिः॥ ॥अथ

पः कर्म वो युष्माकमस्तु॥ ॥अस्मभ्यं तद्दस्रौ॥ अस्मभ्यं तदित्येषा ऋक् व्याख्याता॥ ॥इति द्वितीयस्य षष्ठे
चतुर्दशो वर्गः॥ ॥प्र घा न्वस्येति दशर्चं चतुर्थं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं। अत्रानुक्रमणिका। प्र घ दशेति द
शरात्रे षष्ठेहनि निष्केवल्ये त्रीणि सूक्तानि तत्रेदं द्वितीयं। षष्ठस्येति खंडे सूत्रितं। ऐंद्रस्याहुः पुनः प्र घा न्वस्याभ
रेष इति निष्केवल्यमिति। एकाहे निष्केवल्ये प्र घा न्वस्येत्येष सूक्तमुखीया उक्तस्तोमेन सूत्रितं। अयं मामनु
षा देवता। प्र घा न्वस्य महतो महानीति॥ सेषा सूक्ते प्रथमा॥ प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि
वोचं॥ त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिंद्रो जघानेति॥ ॥गृत्समदो ब्रूते। महतो बलवतः सत्यस्य सत्य
फलस्यास्येंद्रस्य सत्यासत्यानि यथार्थानि महानि महांति करणानि कर्माणि नु अद्य प्रवोचं प्रकर्षेण ब्रवीमि।
वच परिभाषणे छंदसि लुङ्लङ्लिट इति वर्तमाने लुङ्। अस्यतिवक्तिख्यातिभ्योङ् वच उम इति प्रतिषेधो
लितानि उच्यंते। त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येवंरूपेष्वाभिप्लविकेष्वहस्सु सुतं तस्याभिषुतं सोमं इंद्रोपिब

त्। ततः पीतस्यास्य सोमस्य मदे हर्षे संजाते सति इंद्रः अहिं वृत्रमसुरं जघान हतवान्॥ ॥अथ द्वितीया॥
अवंशे द्यामस्तभायद्बृहंतमा रोदसी अपृणदंतरिक्षं॥ स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इंद्रश्चकारेति॥
अवंशे आकाशे द्यां तद्योतमानं तं सूर्यं द्युलोकं वा अस्तभायत् इंद्रः अस्तभ्नात्। अनवलंबनस्य तस्यावस्थापनमद्भुत
मित्यर्थः। स्तंभ इति सौत्रो धातुः। क्र्यादिः। लङि रूपं च व्यत्ययो बहुलमिति अदावपि शायजादेशः। बृहंतं महदंतरि
क्षं रोदसी द्यावापृथिव्यौ च अपृणत्। प्रथ प्रख्याने। ण्यंतस्य लुङि रूपं चङ्यन्यतरस्यामिति मध्योदात्तत्वं। सोमस्य मदे
हर्षे संजाते तानीमानि कर्माणि इंद्रश्चकार॥ ॥अथ तृतीया॥ सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनां॥
वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इंद्रश्चकारेति॥ ॥ सद्मेव यथा यज्ञगृहाणि मानैः षट्त्रिंशत्प्रक्रमप्राची
न्यंतरूपैः परिमाणैः प्राक्प्रवणानि कुर्वंति तद्वत् सिंधून्लोकान्वा नृजून्वा परिमाणैः प्राचः प्राङ्मुखो विमिमाय इंद्रो
विशेषेण निर्मितवान्। तथा नदीनां खानि निर्गमद्वाराणि वज्रेण अतृणत् अखनत् तृदिर् हिंसानादरयोः रुधादि

॥३४०॥

त्सरु॥ तथा च मंत्रः। इंद्रो अस्मां अरदद्वज्रबाहुरिति। तथा दीर्घयाथैः बहुकालं गंतव्यैः पथिभिर्मार्गैः पृथक्सृजत्॥ अ
नायासेन तान् नदीः पुरं संरुध्य परिगृह्य तस्मात्सुत्रिरगुरिति। अत्र ग्रंथयोगतोऽस्ति॥ ॥अथ चतुर्थी॥ स प्रवोळ्हॄन्परि
गत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ। सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इंद्रश्चकार॥ स इंद्रः द
भीतिनाम्न ऋषेः राजर्षिः तस्य प्रवोळ्हॄन् सहिवहिरोदवर्णस्थे योत्वं प्रकर्षेण तं दभीतिं वहतस्तान् सकरान् मध्ये मार्गे
परिगत्य तेषां विश्वं सर्वं आयुधमिद्धे अग्नौ संदीप्यमाने वह्नौ अधाक् अधाक्षीत्। दहेर्लुङि। मंत्रे घसेत्यादिना च्लेर्लु
क्। पश्चात्तं दभीतिं गोभिरश्वैरथेभिरथैश्च समसृजत्। संयोजितवान्। सममस्यासि धमिति॥ ॥अतिनाम्नैदृ
हे मरुत्वतीयस्य नमुरवीया अग्निष्टोमेन तिरवंडे सूत्रितं। स ईं महीं धुनिमेतोररम्णादिति॥ ॥अथ पंचमी॥ स ईं महीं
धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति। त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इंद्रश्चकारेति॥ स इंद्रः
ईमेनां महीं महतीं धुनिं धुनोति स्नोक्ष्णां पापानीति। धुनयः परुष्णी नदीनां एतोः ईश्वरपदां संनिधानेपितास्मत्र

द्रं। वेदाहमस्य निभृतं म एतद्दित्सन्तं भूयो यजतश्चिकेतेति॥ ॥हे अध्वर्यवः यथा गोरूधः पयसः पूर्णं तद्वदिमेनं भो
जं फलस्य दातारं चेंद्रं सोमेभिः सोमैः पृणत पूरयत। मे मदीयस्य सोमस्य निभृतं गूढं सुरवं साधनस्वभावमहं
मेव वेद जानामि इति पूर्वेन परास्मैकुर्षितं तथापि युष्मभ्यं ब्रवीमि। ये वेदित्संतं सोमं दातुमिच्छंतं यजमानं यजतो य
ष्टव्य इंद्रोऽभ्योति पुण्येन चेकेनादित्संतं। ददातेर्नूदाने। इच्छायां सन् सनिमीमा घेति अभ्यासस्य ईत्वं आदेशः। अत्र
लोपोभ्यासस्यार्थधातुकेति सकारस्य तत्वं॥ ॥अथैकादशी॥ अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्य
स्य राजा। तमूर्दरं न पृणता यवेनेंद्रं सोमेभिस्तदपो वो अस्त्विति॥ ॥हे अध्वर्यवः य इंद्रः दिव्यस्य द्युलोकवर्तिस्य वस्वो
वसुनो राजा भवति॥ यश्च पार्थिवस्य पृथिवीशब्देन विस्तीर्णमंतरिक्षमुच्यते। तत्रत्यं धनं पार्थिवस्य राजा यश्च
क्षम्यस्य क्षमा भूमिः तत्रत्यं धनं क्षम्यं तस्य च राजा भवति तमेव मिंद्रं सोमेभिः पृणत पूरयत। तत्र दृष्टांतः ऊर्द
रं न ऊर्दरं दीर्णमृजुं द्रोण डिदरं यथा यवेन तस्पूर्णं तद्वदिंद्रं पूरयतेति तात्पर्यं सोमादिनेंद्रोदरपूरणलक्षणम्

प्रत्ययः। ऋषीणां गमनार्थं अरम्णात् उपारमयत्। महाजलां नदीं अल्पोदकामकरोदित्यर्थः॥ ततः स इंद्रः उत्स्म
यतो नदीः उत्तार्य यं ऋषिं अपेक्ष्य गच्छंति तं ऋषिं अभिरक्ष्य प्रतस्थुः प्रतस्थिरे॥ स्थो हं प्रसिद्धं॥ ॥इति द्वितीय
स्याष्टमे पंचदशो वर्गः॥ अथ षष्ठी॥ सोदंचं सिंधुमरिणान्महित्वा वज्रेणान उषसः संपिपेष॥ अजवसो जविनी
भिर्विवृश्चन्सोमस्य ता मद इंद्रश्चकार॥ ॥स इंद्रः सिंधुं प्राचं संतं महित्वा स्वकीयेन महिम्ना उदंचं मरिणात्। उद
ङ्मुखमकरोत्। सिंधुशब्दश्छंदसि पुंल्लिंगः। उषसः उषोदेव्याः अनः शकटं वज्रेण संपिपेष। चूर्णीचकार। ए
तद्दिवश्चिद्दुहितरमित्यत्र स्पष्टं वक्ष्यते॥ किं कुर्वन् अजवसः जवहीनान् दुर्बलान् समाजविनीभिः ताभिः सेनाभिः
विवृश्चन् विच्छेदेन भिंदन् विपेषेति समन्वयः। नु ब्रश्चू छेदने ऽस्मात् शतरि ग्रहिज्यादिना संप्रसारणं। शिष्टं स्पष्टं॥ ॥अ
थ सप्तमी॥ स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक्॥ प्रति श्रोणः स्थाद्व्यनगचष्ट सोमस्य ता मद इं
द्रश्चकार॥ ॥पुरा किल कन्यकाः चक्षुर्हीनं पादहीनं परावृजं जिघृक्षमृषिं दृष्ट्वाऽभिदुद्रुवुः। ततः स ऋषिः इंद्रं

स्थलाच्चक्षुः पादं च लेभे। तदेतदाह॥ ॥कनीनां कन्यकानां अपगोहे अपगोहनं तिरोभावं विद्वान् परावृक् ऋषिः आ
विर्भवन् सर्वेषां प्रत्यक्षो भवन् उदतिष्ठत्। श्रोणः पूर्वं पङ्गुरिदानीं इंद्रःसप्रसादाद्विभग्नजानु ताः कन्याः प्रति
स्थात्। पूर्वमंधः अधुना चक्षुष्मानभवत्सः। ताः कन्यकाः ऋजिश्वेण पश्यंतिस्म। तानीमानि कर्माणि स इंद्रश्च
कार॥ ॥अथाष्टमी॥ ॥भिनद्वलमंगिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत्॥ रिणग्रोधांसि कृत्रिमाण्येषां
सोमस्य ता मद इंद्रश्चकारेति॥ ॥अंगिरोभिर्गृणानः स्तूयमानः स इंद्रः बलं बलनामकमसुरं अभिनत् अभिनत्त
था गवां निरोधकस्य पर्वतस्य दृंहितानि दृढानि द्वाराणि दृढीकृतानि द्वाराणि रिणक् उदघाटयत्। गतमन्यत्॥ ॥अ
तिमूर्तिं नास्य महे निषेवल्ये स्थूलं सुरखीयस्वप्नेनिन्या च स्वप्नित्तं। स्वप्नेनाभ्युप्या चुमुरिं धुनिं चेति सूक्तमुखीयेति।
सैषा सूक्तेन वर्मी॥ ॥स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघंथ दस्युं प्र दभीतिमावः॥ रंभी चिदत्र विविदे हिरण्यं सोमस्य
ता मद इंद्रश्चकारेति॥ ॥सः त्वं दस्युं सर्वस्योपक्षपयितारं चुमुरिं धुनिं च एतन्नामानावसुरौ स्वप्नेन। नदीघी

द्वि॰भा॰६
॥३४३॥

एवार्थः। दीप्यमानएवाग्नौहविः प्रभरे संपादयामि॥ ततः परं सुष्टुतिं स्तोभनां च स्तुतिं करोमि॥ भरे इति भृञ्भरणे
चित्वादुभयपदी। उदिद्रूपं अजुर्यं अजरणीयं जरयंतं सर्वमन्यज्जरयंतं उक्षितं सोमेन सिक्तं सनात्सनातनं नित्यं त
रुणं तादृशमिंद्रं वसेस्माकं रक्षणाय तस्य तर्पणाय वा हवामहे। आह्वयामः॥ ॥अथ द्वितीया॥ यस्मादिंद्राद्बृह
तः। किंचनेमृते विश्वान्यस्मिन्संभृताधि वीर्या। जठरे सोमं तन्वी३ सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुमिति॥
बृहतो महतः यस्मादिंद्रादृते किमपि ईमिदं जगत् किंचन नस्तीत्यर्थः। चेतिनेति निपातद्वयसमुदायश्चनेति चेति
च्चिदित्यर्थे नेति निषेधार्थः एवं पदद्वयसंप्रदायकं। उक्तार्थे मंत्रः। नेंद्राद्दृते पवते धाम किंचनेति। यद्वा ऋते ईमिदं ज
गत्। किं नक्षत्रमयभ्यामित्यर्थः। उच एतन्नदोवाच्यते। अस्मिन्निंद्रे विश्वा सर्वाणि सामर्थ्यानि अधि संभृता अधि
कं संभृतान्यासते। यश्चेंद्रो जठरे स्वोदरे स्तोममभिषुतं सोमरसं भरति बिभर्ति। किंच तन्वां स्वकीये सर्वस्मिन्नपी
रे सहो बलं महः हस्ते जयश्च बिभर्ति हस्ते वज्रमायुधं बिभर्ति शीर्षणि शिरसि क्रतुं विज्ञानं भरति बिभर्ति च यहस्तयो श्री ॥३४३॥

गादनिघातवाक्यभेदाद्वानिघाताभावः। शीर्षणि शीर्षन् छंदसीति॥ ॥अथ तृतीया॥ ॥न क्षोणीभ्यां परिभ्वे त
इंद्रियं न समुद्रैः पर्वतैरिंद्र ते रथः॥ न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुर्विति॥ ॥हे इंद्र ते तव इंद्रि
यं बलं क्षोणीभ्यां द्यावापृथिवीभ्यां न परिभ्वे न परिभवनीयं कृत्यार्थे तवैकेन्यत्वन इति केन्प्रत्ययः। उदात्तस्वरित
योरिति स्वरितत्वं। किंच ते रथः समुद्रैः पर्वतैश्च न परिभवतीयः तव वज्रमायुधं कश्चन पुमान् अन्वश्नोति न व्याप्नो
ति परिभवितुं। अश्नुं व्याप्तौ व्यत्ययेन परस्मैपदं। यद्यदा स्वरवधार्थ शिघ्रैर्जयवद्भेः पुरु पुरूणि बहूनि योजनानि त
पसि गच्छसि। तदा तव बलादि न परिभवनीयमिति समन्वयः॥ ॥अथ चतुर्थी॥ विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भ
रंति वृषभाय सश्चते। वृषा यजस्व हविषा विदुष्टरः पिबेंद्र सोमं वृषभेण भानुनेति॥ ॥हे यजमान विश्वे सर्वे जनाः य
जताय सर्वैर्यजनीयाय धृष्णवे शत्रूणां धर्षणशीलाय वृषभाय कामानां वर्षित्रे सश्चते सज्जमानाय स्मै सादि कर्मकस्स
स्तोत्रं पुरस्तात् ताद्दृशायेंद्राय क्रतुं यज्ञादिलक्षणं कर्म भरंति हरंति खलु प्रीणयंतीत्यर्थः॥ भरंतीति हियोगादनिघातः यस्मा

द्वि॰ भा॰ ६ ॥३५४॥

देवं तस्मा वृषा सोमरससेचनसमर्थः। विदुष्टरः। विद्वच्छब्दात्तरपि छांदसं संप्रसारणं। शासिवसिघसीनां चेति संहि
तायां षत्वं। विदुष्टरस्मै हविषा तमिंद्रं यजस्व। इदानीमिंद्रं संबोध्याह॥ हे इंद्र वृषभेण वर्षमाणेन वृष्णा भानुना दी
प्यमानेनाग्निना सह सोमं पिब॥ ॥अथ पंचमी॥ ॥वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय पातवे। वृषणाध्व
र्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वतीति॥ ॥हे इंद्र वृष्णः पूतस्य वर्षितुः मध्वः मदकरस्य सोमस्य
कोशः ऊर्मिः अनुष्ठातॄणां च प्रेरकः सन् पवति पवते। अनुदात्तेत्त्वाभावमर्थं वृषभान्नाय वृषभवर्षकाणि अन्नानि य
स्य स तथोक्तः तादृशाय वृषभाय वर्षमाणाय वर्षित्रे इंद्राय पातवे पानार्थं पवत इति समन्वयः। किं च वृषणा सोमरससे
सेचनसमर्था अध्वर्यू प्रतिस्थातारौ वृषभासः वर्षका अद्रयो भिषवग्रावाणश्च वृषणं स्वर्गादिफलस्य वर्षकं सोमं वृ
षभाय तुभ्यं सुष्वति सुन्वते लेट् बहुलं छंदसीति विकरणस्य श्लुः अदभ्यस्तादिति झस्यादादेशः॥ ॥इति द्वितीयस्य ॥३५४॥
षष्ठे सप्तदशो वर्गः॥ ॥अथ षष्ठी॥ वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा॥ वृष्णो मदस्य वृष

इया अभ्युप्य संयोज्य जघंथ हतवानसि। ततस्ताभ्यां युध्यमानं दभीतिं राजर्षिं प्रावः रक्षितवानसि। तथा च मंत्रव
र्णः। त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहंत्विति। अवेः अवतेः लक्षणार्थस्य लङि। सिपि रूपं। रंभी चि
त् वेत्रधारी तस्य दौवारिकः अत्रास्मिन् युतायां सत्यां हिरण्यं धनं विविदे लेभे विद्लृ लाभे स्वरितेत् तदानीमानिद्रमणि
सोमस्य मदे सतीति च कारेति॥ ॥अथ दशमी॥ ॥नूनं सा ते प्रति वरं जरित्रे इति॥ एषा व्याख्याता॥ ॥इति द्वितीयस्य
षष्ठे षोडशो वर्गः॥ ॥प्र वः सतामिति नवर्चं पंचमं सूक्तं गार्त्समदमैंद्रं अत्रानुक्रमणिका। प्र वो नव सा त्रिष्टुबिति। नव
मी त्रिष्टुप्। शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः तृतीयपर्याये ऽच्छावाकशस्त्रे प्र वः सतामिति सूक्तं अतिरात्र इति खंडे
सूत्रितं। प्र वः सतां ज्येष्ठो हरयः कृमग्निमिन्धितिय ज्येति॥ तस्मिन्सूक्ते प्रथमा॥ ॥प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नावि
व समिधाने हविर्भरे। इंद्रमजुर्यं जरयंतमुक्षितं सनाद्युवानमवसे हवामहे॥ ॥प्र वः सतामिति॥ गृत्समदो ब्रूते॥ हे
यजमाना वो युष्मदर्थं सतां महतां देवानां ज्येष्ठतमाय अतिशयेन श्रेष्ठाय इंद्राय तदर्थं अग्नाविव समिधाने इव[illegible]

भत्वमीशिष इंद्र सोमस्य तृम्पुहीति ॥ वृषभक्रममाणो वर्षक हे इंद्र ते तव वज्रः वृषा कामवर्षकः तथा ते रथोपि वृषा ते हरी अ
तन्नामकश्च वृषत्वो वृषण्वद्वर्षकौ ते तव आयुधा वज्रव्यतिरिक्तान्यायुधान्यपि वृषभाणि वृषा सोवर्षकस्य मदकरस्य सोमस्य
सोमेन तृम्पुहि तृप्तो भव । तृप प्रीणने । स्वादिक्षु धादिषु तृप्तन मन तृम्फोत्ताविति पठितं तथापि सर्वविधीनां छंदसि विक
ल्पितत्वाद् तृणत्व प्रतिषेधो न भवति ॥ ॥ अथ सप्तमी ॥ प्र ते नावं न समने वचस्युवं ब्रह्मणायामि सवनेषु दाधृषिः ॥
कुविन्नो अस्य वचसो निबोधिषदिंद्रमुत्सं न वसुनः सिचामहे इति ॥ ॥ दधृषिः त्वस्मात् शत्रूणां धर्षकोहं समने सं
ग्रामे वचस्युवं अभितस्तुतिं वा दुवदुः देशः स्तोत्रमिच्छंतं नावं नावमिव आपद्भ्यः स्तारकं ते त्वां सवनेषु त्रिषु ब्रह्मणा स्तोत्रे
प्रयामि । प्राप्नोमि । किंच अस्य वचसः स्तुतिलक्षणात् भवद्विषयं कुविद्बहु निबोधिषत् इंद्रो नितरां बुध्यतां । बुध अव
गमने । लेटि सिप् बहुलमिति सिप ॥ कुविद्योगात् निघातः तिङ् चोदात्तवतीति गतेर्निघातः । वयं च उत्सं न जलस्य
विधानभूतं कूपमिव वसुना निधानभूतमिंद्रं सिचामहे सोमेन सिचामः । सिचिरक्षरणे स्वरितेत् ॥ आगमानुष्ठ स

नस्यानिसत्वानुभावः॥ ॥अथाष्टमी॥ पुरासंबाधादभ्याववृत्स्वनोधेनुर्नवत्संयवसस्यपिप्युषी। सकृत्सुते
सुमतिभिः शतक्रतो संपत्नीभिर्नवृषणो नसीमहि॥ हे इंद्र शत्रुसंबंधात् शत्रुजन्यात्संबाधात् पुरानोस्मान्
अभ्याववृत्स्व आवर्त्तय यथा संबाधोस्मान् अस्पृशन् तथा कुर्वित्यर्थः। तत्र दृष्टांतः। यथा यवसस्य घासस्य यव
सेन पिप्युषी आप्यायिता धेनुर्वत्सं क्षुद्बाधात् परावर्त्तयति तद्वत्। हे शतक्रतो वयं सुमतिभिः त्वद्विषयैः शोभ
नैः स्तोत्रैः सकृत् सकृदपि युनज्मीमहि सकृत्सु व्याप्य सहितेऽत्र दृष्टांतः। वृषणो नसेक्तारो युवानः यथा पत्नीभिर्व्या
प्नैते तद्वत्॥ ॥अथनवमी॥ नूनं सेति व्याख्याता॥ ॥इति द्वितीयस्य षष्ठेऽष्टादशो वर्गः॥ ॥तदस्मा इति नव
र्चं षष्ठं सूक्तं गार्त्समदं ऐंद्रं। अत्रानुक्रमणिका॥ तदस्मै द्वित्रिष्टुभमिति। अंत्ये त्रिष्टुभौ। शिष्टाः सप्त जगत्यः अतिरा
त्रे द्वितीयपर्याये अच्छावाकशस्त्रे तदस्मा इति सूक्तं॥ अतिरात्रेयाणामिति सूत्रितं। तदस्मै नव्यमस्यायि वयस्या
जनान्द्रंहियाज्येति॥ ॥तस्मिन् सूक्ते प्रथमा॥ तदस्मै नव्यमंगिरस्वदर्चत शुष्मा इदस्य प्रत्नथोदीरते॥ वि

शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुंचतेति। इंद्रोभूत् तथा भवतु वर्धतामित्यर्थः। य इंद्रो जस्तेजोब
लं भिमानः कुर्वाणः सन् प्रथम प्राथमिकं यथा यसे। धेट् पाने। सोमपानाय महिमानमातिरत्। अवर्धयत्। आतिरते:
व्यत्ययेन शः। यद्योगाद् निघातः। शूरः शत्रूणां शातयिता। य इंद्रः युत्सु युद्धेषु तन्वं स्वकीयं शरीरं परिव्यत वर्मणा प
रिवीतमकरोत्। स इंद्रो महिना स्वकीयेन महिम्ना शीर्षणि स्वशिरसि द्यां प्रत्यमुंचत आधारयत्॥ ॥अथ तृती
या॥ अधाकृणोः प्रथमं वीर्यं महद् यदस्याग्रे ब्रह्मणा शुष्ममैरयः। रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्र
ते सध्र्यक् पृथगिति॥ ॥अथापि च हे इंद्र त्वं प्रथमं मुख्यं तद्वीर्यं सामर्थ्यं अकृणोः अकरोः। किं तत्। ब्रह्मणा स्तो
त्रेण स्तुतिसाधनभूतेन वेदवाक्येनास्य वीर्यस्य स्तोतुर्जनस्याग्रे पुरतः यत् शुष्मं शत्रूणां शोषकं बलं ऐरयः उ
दगमयः। जीरयो रंजितारो बाधका असुराः रथेष्ठेन रयस्य रथस्य स्थितेन हर्यश्वेन त्वया विच्युताः स्वस्थानात् च्या
विताः संतः सध्र्यक् सध्रीचीनाः परस्परं संगताः पृथग्भी आतियुक्ताः संतः प्र सिस्रते प्रकर्षेण धावंति सृ गतौ जु

होत्यादित्वाद् द्विर्वचनं छंदसीत्यभ्यासेत्वं। सध्र्यगिति सहस्य सध्रिः इति सध्र्यादेशः। अद्रिसः धातोरंतोदात्तत्वेति नि
पातनादुदात्तस्वरितयोर्यणः स्वरितत्वं॥ ॥अथ चतुर्थी॥ अधाय्यो विश्वा भुवनाभि मज्मनेशानकृत् प्रवया
अभ्यवर्धत॥ आ रोदसी ज्योतिषा वह्निरातनोत् सीव्यंत् तमांसि दुधिता समव्ययदिति॥ अधापि च प्रवयाः प्रवृद्धो
नः पुरातनो वा य इंद्रः विश्वा भुवना सर्वान् लोकान् मज्मना बलेनाभिभूय ईशानकृत् आत्मानं पर्वस्याधिपतिं कु
र्वन् यद्वा अग्न्यादीन् देवान् तत्तल्लोकाधिपतीन् कुर्वन् अभ्यवर्धत। सर्वतः प्रवृद्धोभवत्। अनंतरं वह्निः जगतां वोढा
स इंद्रः ज्योतिषा स्वकीयेन तेजसा रोदसी द्यावापृथिव्यावतनोत्। प्राप्नोत्। किंच तमांसि तमोरूपाणि रक्षांसि दुधित
दुःखितानि दुर्गतानि सीव्यत्। विस्तारयत्। समव्ययत्। आवृणोत्। जगद्व्याप्यवर्ततेत्यर्थः॥ ॥अथ पंचमी॥ स
प्राचीनान् पर्वतान् दृंहदोजसाधराचीनमकृणोदपामपः। स धारयत् पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्र
सः इति॥ स इंद्रः प्राचीनान्नेतोरूलस्मातः प्रकर्षेणांचतो गच्छतः सपक्षान् पर्वतान् ओजसा बलेन दृंहत् पक्षच्छेदं कृत्वा

ऋ·भा·६
॥३४७॥

भूमौ दृंहीचकार। अचलानकरोदित्यर्थः। अपां मेघस्थितानामुदकानामपस्यंदनलक्षणं कर्म अधराचीनं अध
प्रदेशमंचंति। गच्छंतीय धराचीनं तादृशम् अकृणोत्। मेघभेदनं कृत्वा अपो भूमाववपातयदित्यर्थः। किंच विश्वधाय
सं विश्वस्य धात्रीं पृथिवीं बलेन धारयत्। मायया प्रज्ञया उपायेन द्यां द्युलोकं अवस्त्रसः। संस्कृतो संपद्रादित्व
क्षणो भावे क्विप् अवपतनादस्तभ्नात्॥ ॥इति द्वितीयस्य षष्ठे एकोनविंशो वर्गः॥ ॥अथ षष्ठी॥ सास्मा
अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि॥ येना पृथिव्यां निक्रिविं शयध्यै वज्रेण हत्व्यवृणक् तुवि
ष्वणिरिति॥ ॥स ताहक् इंद्रः अस्मै जगते अरमलं पर्याप्तो बभूव। रक्षकत्वेन स्वामी बभूवेत्यर्थः। पिता सर्वस्य
पालकः प्रजापतिः विश्वस्मात् सर्वस्मादकृणोत् चोदनात् परितो युक्तस्माद्वेदसो ज्ञानात् ऐश्वर्यं स्वकीयाभ्यां
यमाकृणोत्। तुविष्वणिः बहुकीर्त्तिः महाध्वनीवासः इंद्रः येन ज्ञानेन क्रिविं एतन्नामानमसुरं वज्रेण हत्वा स्त
ब्धादियश्चेति हत्वा ताम् उधित्वा पृथिव्यां भूमौ शयध्यै शयनाय दीर्घनिद्रायै न्यवृणक् वृणक्ति हिंसाकर्मन्येव ॥३४७॥

३१

श्वायद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरयदिति॥ ॥गृत्समदोद्भुते। हे स्तोतारः नव्यं नवतरमन्वेष्य
दृष्टपूर्वं तत्तादृशं स्तोत्रमंगिरस्वदंगिरस इयास्मा इंद्रायार्चत ब्रूत यद्यस्माज्जातमात्रस्यैंद्रस्य शुष्मा शत्रू
णां शोषकाणि तेजांसि प्रत्नथा प्रत्नपूर्वे विश्वे माध्वालब्धै छंदसि इवार्थः थाल्प्रत्ययः। प्रत्नानि पुरातनानीव उ
दीरते उद्गच्छंति ईरते अनुदात्तेत्। तिङः चोदनवती तिङ् गतेति वा तिः। यद्यस्माच्च सर्वान् गोत्रा गा उदकानि त्रायंते
रक्षंतीति गोत्रा मेघाः परिवृता वृत्रेणाक्रांतान् सर्ववस्कपुरोडाकृतान् दृंहितानि तेन दृढीकृतान् मेघात् सोमस्य
मदे हर्षे संजाते संजाते सति सहसा बलेन मैरयदुदघाटयत्। मेघभेदनमपः प्रेरयामासेत्यर्थः। यद्वा विश्व
सर्वाणि परीवृता वृत्रासुरेणाक्रांतेति दृंहितानि पर्वतबिलेनिरुद्धानि गोत्राद्रुलित्रकद्यी वच्येति समूहार्थे त्रप्रत्ययः
गवां वृंदानि सहसा प्रैरयत्। तस्माद्बिलान्निरगमयत्। तस्मादर्चतेति समन्वयः। ऐरयत इरगतौ ण्यंतस्य लङि रू
पं यद्दृंहिताया गा दर्शनेच्छेत्॥ ॥अथ द्वितीया॥ स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत्।

ति षष्ठीश्चै प्रतिषेधः। दातारः खलु हे इंद्र चित्रया नानाप्रकारया ऊती ऊत्या पालनेन नोऽस्माना विदु रक्ष। वृषन् कामा
नां वर्षक हे इंद्र नोऽस्मान् वयस्वतः अतिशोभनवस्त्रमतः कृधि कुरु॥ ॥अथ नवमी॥ नूनं सा इति व्याख्याता॥ ॥इति
द्वितीयस्य षष्ठे विंशो वर्गः॥ प्रातारथ इति नवर्चं सप्तमं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं। प्रातरिसनुक्रांतं। लैंगिको विनि
योगः॥ तस्मिन् सूक्ते प्रथमा॥ प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः॥ दशारित्रो मनुष्यः स्वर्षाः
स इष्टिभिर्मतिभी रंह्यो भूत्॥ ॥रथो रंहणात् रथो यज्ञः स च नवो नूयते स्तूयते स्तोतृभिरिति नवः स्तुतिमान् सस्निः ष्णा शौ
चे। आदृगमहनेति किप्रत्ययः। शुद्धः एवंविधो यज्ञः प्रातः प्रातः कालेऽयोजि अस्माभिः चतुर्युगः युज्यंत इति यु
गानि ग्रावाणः चत्वारि युगानि यस्य सः तथोक्तः अध्वर्य्वादि ऋत्विगभिप्रायं वा त्रिकशः तिस्रः कशाः मंद्रमध्योत्कृष्ट
रूपा यस्य स तथोक्तः सवनत्रयाभिप्रायं वा। सप्तरश्मिः अश्नुवते व्याप्नुवते व्याप्नुवंतीति रश्मयः छंदांसि
सप्तसंख्याकानि गायत्र्यादीनि छंदांसि यस्य स तथोक्तः। दशारित्रः पापेभ्यः त्रायत इति अरित्राः ग्रहाः दशसंख्या ॥३४८॥

काः ग्रहाः यस्य स तादृशः चमसाध्वर्य्वभिप्रायणीयातिथ्यादिभिः मतिभिर्मननीयैः शास्त्रैः रंह्यो भूदभूत्। यद्वा
नवोभिः नवः सस्निः सनोतेर्द्विर्वचनादि कामानां दाता रथो रमंते अस्मिन्निति रथः स्यंदनः प्रातः सवने वसोमपा
नार्थमयोजि। अश्वैरयोजि। कीदृशः चतुर्युगः त्रिकशः तिस्रः कशाः यस्य स तथोक्तः सप्तरश्मिः सप्तरज्जुः दशा
रित्रः दशचक्रः मनुष्यः मनुष्यहितः स्वर्षाः स्वर्गस्य संभक्ता इदियथः इष्टिभिर्यज्ञैः मतिभिः स्तोत्रैश्च प्राप्तव्यो
भवति॥ ॥अथ द्वितीया॥ सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता॥ अन्यस्या गर्भमन्य ऊ जनंत सो
अन्येभिः सचते जेन्यो वृषेति। सः यज्ञः सोमो वा अस्मै इंद्राय प्रथमं प्रातः सवने अरं पर्याप्तो भूत्। स च द्वितीयं मा
ध्यंदिने सवने पर्याप्तो भूत्। सर्वत्र कालाध्वनोरिति द्वितीया। स यज्ञः सोमो वा मनुषो मनुष्यस्य होता अभिमतानां दाता भवति।
किंच अन्याः ऋत्विजः अन्यस्याः पृथिव्याः वेद्याख्याया वा गर्भं स्थितं सोमं यज्ञं वा जनंत। उ प्रसिद्धार्थः। वृषा अभि
मतफलवर्षकः जेन्यः जयसमर्थः स यज्ञः सोमो वा अन्येभिः अन्यैरिंद्रादिभिर्देवैः सचते संगते स च समवाप अनु

द्वि॰भा॰६
।।३४१।।

दातेह ॥ अथ तृतीया ॥ हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ॥ मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्य
जमानासो अन्ये इति ॥ इंद्रस्य संबंधिनि रथे हरी एतन्नामकौ वडवौ नु क्षिप्रं सूक्तेन आयै गमनाय नवेन अन्यैरकृतपू
र्वेण वचसा वेदात्मकेन सूक्तेन साधनेन योजं युनज्मि । युजिर्योगे लुङि इरितो वेति रङादेशः ॥ अत्र यस्मिन्यज्ञे बहवो वि
प्रा मेधाविनः स्तोतारो भवंति हि तथापि अन्ये मद्व्यतिरिक्ता ये यजमानासः यजमानाः त्वां सु सुष्ठु मो नि रीरमन् । नि
तरां रमयंतु । अतोऽस्मदीयं यज्ञमागत्य सोमं पिबेत्यभिप्रायः । रीरमन् रमतेर्ण्यंतस्य लुङि चङि सन्वद्भावादभ्या
सस्येत्वं दीर्घो वाक्यभेदादत्र हि योग्यभावेन निघातः ॥ ॥अथ चतुर्थी ॥ ॥आ द्वाभ्यां हरिभ्यामिंद्र याह्या चतुर्भिरा षड्भि
र्हूयमानः ॥ आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः इति ॥ ॥ हे इंद्र हूतो त्वमिमैः हूयमानश्च द्वाभ्यां ह
रिभ्यामश्वाभ्यामिमं यज्ञं प्रति सोमपानार्थमायाहि । चतुर्भिर्हरिभिरायाहि । तथा षड्भिरागच्छ सोमपेयं । पापने
कर्मणि यत् इंद्रपत्नी तीर्थं यातव्यं सोमं प्रति अष्टाभिरश्वैरायाहि । अष्टनो दीर्घादिति विभक्तेरुदात्तत्वं । दशभि

श्रीः
।।३४१।।
३३

र्वीतः ॥ ॥अथ सप्तमी ॥ अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगं ॥ कृधि प्रकेतमुप मास्या भ
र दद्धि भागं तन्वो येन मामहः इति ॥ हे इंद्र अमाजूर्यावज्जीवं गृह एव जीर्यंती पित्रोः सचा सा अमा मातापितृभ्यां
सह भवंती तया शुश्रूषणपरा पतिमलभमाना दुहिता समानात् स्वस्मिन् पित्रोः स्वसाधारणात् सदसो गृहात् । अधि
करणे चोपसंख्यानमिति पंचमी । गृहदुपस्थाय यथा भागं यथा च स्तोता हं भागं भजनीयं धनं याचे इये । इत्वा
दिषु लिङ्युत्तमस्याति व्यत्ययेनात्मनेपदी । इयानः इंद्र एवं त्वां यस्य पित्र्यादेयं धनं प्रकेतं प्रकृष्टेण ज्ञातव्यं विश्वजननीयं कृ
धि कुरु तत् उपमासि एतावदिदं धनमिति तं कुरु आ भर तत्र धनं मम हे स्तोतॄन्निमान् येन पूजयसि ॥ ॥अथाष्टमी ॥
भोजं त्वामिंद्र वयं हुवेम ददिष्ट्वमिंद्रापांसि वाजान् । अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निंद्र वस्यसो नः इति ॥ हे इं
द्र भोजं पालयितारं भोजयितारं वा त्वां वयं हुवेम ह्वयतेर्लिङि बहुलं छंदसीति संप्रसारणं । हे इंद्र त्वं अपांसि कर्मा
णि वाजान् अन्नानि ददिः दाता दाण् दाने आदृगमहनजन इति किप्रत्ययः । लिड्वद्भावाद् द्विर्भावादभ्यासादिका ये नलोपः व्यय नि

हरिभिरागछस्मखस्ययज्ञस्यधनंवाहेइंद्रअयंसोमस्त्वदर्थमभिषुतः।आ।नेयत्तस्यमृधोहिंसाःमाभूःमाभूवन्व
रोतेर्लुङि।मंत्रेघसेत्यादिनाच्लेर्लुक्गुणेकृतेहल्ङ्यादिनासिलोपः।यद्यपिइंद्रस्यद्वावेवहरीतथापितयोर्विभूतिभेदा
न्नानात्वं।अतोबहुत्वमविरुद्धं॥ ॥अथपंचमी॥ आविंशत्यात्रिंशतायाह्यर्वाङाचत्वारिंशताहरिभिर्युजानः॥आ
पंचाशतासुरथेभिरिंद्राषष्ट्यासप्तत्यासोमपेयमिति॥ हेइंद्रसोमपेयंपानव्यंसोमंप्रतिअर्वाङस्मदभिमुखःस
न्विंशत्याविंशतिसंख्याकैरश्वैरायाहि।त्रिंशतात्रिंशत्संख्याकैर्हरिभिर्युजानोयुयुजानस्त्वंसोमपानेप्रयागछ॥ ॥
इतिद्वितीयस्यषष्ठेएकविंशोवर्गः॥ ॥अथषष्ठी॥ आशीत्यानवत्यायाह्यर्वाङाशतेनहरिभिरुह्यमानः॥अयंहि
तेशुनहोत्रेषुसोमइंद्रत्वायापरिषिक्तोमदायेति॥ ॥आशीत्याअशीतिसंख्याकैरश्वैःसोमपानार्थमर्वाङस्मद
भिमुखःसन्आयाहिनवत्याएतत्संख्याकैरश्वैःआगछ।शतेनशतसंख्याकैरश्वैरुह्यमानोधार्यमाणस्त्वंआया
हि॥ हेइंद्रयस्मात्तेमदायहर्षायशुनहोत्रेषुसुखेनहूयतेसोमायएभिरितिशुनहोत्राःपात्रविशेषाःतेषुअयंसोमः

द्वि·भा·६
॥३५०॥

त्वयात्वत्कामनयापरिखिन्नः॥ ॥अथसप्तमी॥ ॥ममब्रह्मेंद्रयाह्यच्छाविश्वाहरीधुरिधिष्वारथस्य।पुरुत्राहिवि
हव्योबभूथास्मिंछूरसवनेमादयस्वेति॥ ॥हेइंद्रममअस्मदीयामेवस्तुतिमच्छाभिलक्ष्ययाहि।विश्वा।यौह
रीरथस्यधुरियुगप्रांतेधिष्वधिष्ठापय।पुरुत्रापुरुभिर्बहुभिर्यजमानैःत्वंविहव्योविविधंह्वातव्योबभूथ।ततंथा
जगृभ्मववर्थेतीतिनिपातनादिडभावः।हेशूरअस्मिन्सवनेयज्ञेमादयस्वसोमपानेनहृष्टोभव॥ ॥अथाष्टमी॥
नमइंद्रेणसख्यंवियोषदस्मभ्यमस्यदक्षिणादुहीत।उपज्येष्ठेवरूथेगभस्तौप्रायेप्रायेजिगीवांसःस्यामेति॥इंद्रेण
सहमेममसख्यं--यष्टव्यलक्षणंसख्यंनवियोषत्कदाचिदपिनवियुज्यतां।यौतेर्लेटिसिब्बहुलमितिसिपः।अडा
गमः अस्येंद्रस्यदक्षिणाइंद्रकर्तृकंदानमस्मभ्यंदुहीतअभिमतफलंदुग्धां॥दुहेर्लिङिरूपं।ज्येष्ठेअतिशयेनप्रशस्य
वरूथेआपदांवारकेवरणीयेवागभस्तौबाहूउपसमीपेवर्जिनःस्याम॥इंद्रस्यहस्तस्यदृष्टियोग्याभवेमेत्यर्थः॥किंचप्रा
येप्रायेसोमपानार्थमिंद्रस्ययज्ञगृहगमनायांप्रवेशेजिगीवांसःशत्रूणांजेतारोभवेम।यद्वाप्रायेप्रकृष्टेरणेईयतेगम्यतेयो ॥३५०॥

३४

द्वि॰भा॰६ ध्वो वज्रहस्तो हिमिंद्रो अर्णोवृतं वि वृश्चत्। प्र यद्वयो न स्वसराण्यछा प्रयांसि च नदीनां चक्रमंतेति॥ अस्य मध्वः तृ
॥३५१॥ तीयार्थे षष्ठी अनेन मद्वूरेण वा सोमेन मंदानो हृष्यन् वज्रयुक्तो हस्तो यस्य स इंद्रः अर्णोवृतं उदकस्यावरकं उदकेनावृ
तं वा अहिं वृत्रं मेघं वा विवृश्चत विशेषेण वा छिनत्। ओव्रश्चू छेदने तौदादिकः लङि। ग्रहिज्यादिना संप्रसारणं। यद्यदा अ
हिभेदने जाते नदीनां प्रयांसि प्रीणयितॄणि जलानि अच्छ समुद्रमभिलक्ष्य चक्रमंत गंतुं उपाक्रमत। तत्र दृष्टांतः।
वयो न यथा पक्षिणः स्वसराणि स्वकीयानि अयांति प्राप्यंते इति स्वसराणि कुलायाः तानभिलक्ष्य गच्छंति तद्वत्॥
॥अथ तृतीया॥ ॥स माहिन इंद्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रं। अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साध
दिति॥ ॥माहिनो महनीयः पूजनीयः यद्वा महिमोपेतः अहिहा अहिं मेघं हतवान् इंद्रः ब्रह्मभ्रूणवृत्रेषु क्विप्। बहुलं छं
दसीति। भूतकाले क्विप्। स इंद्रः अपामर्णः ऋगतौ स्रोतोलक्षणं प्रवाहं समुद्रमच्छाभिलक्ष्य प्रैरयत्। किंच स इंद्रः अं ॥३५१॥
गिरस्यां विहितं तदर्थं निमातृतां गवां लंभाय सूर्यमजनयत्। ततः गाः पणिभिरपहृता अविंदत्। अलभत। विदि

रला भे लुङि इरितो वेति च्लेरङादेशः। गाम्यभेदादनिघातः॥ अथ चतुर्थी॥ ॥सो अप्रतीनि मनवे पुरूणींद्रो दा
शद्दाशुषे हंति वृत्रं। सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातावित्ति॥ ॥य इंद्रः सूर्यस्य सातौ साप्तिः सं
भजनीयं सूर्यं संभजन विषयभूते पस्पृधानेभ्यः अहमेव प्रथमं सूर्यं प्राप्नुयामीति स्पर्धमानेभ्यः स्तोतृभ्यः सद्य
स्तदानीमेव अतसाय्यः स्तोतृभिः अनुभूतः सन् समश्रयणोऽभूदभूत्। यद्वा सूर्यस्य सातौ तेषां भूमिकि अधिक
रणे। किं न सूर्यं संबोधिनि युद्धे पस्पृधानेभ्यः सूर्येण सह स्पर्धमानेभ्यः तत्र साय्यो भूत्॥ ॥अथ पंचमी॥ ससुन्व
त इंद्रः सूर्यमादेवो रिणङ्मर्त्याय स्तवान्। आयद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन्निति॥ ॥स्तवान् एत
द्गुणेन स्तूयमानः देवो द्योतमानः स इंद्रः सुन्वते। सोमाभिषवं कुर्वते। मर्त्याय मनुष्याय एतशाय सूर्यमा रिणक् एत
शेन स्पर्धमानं सूर्यं बलेन रेचयत्॥ तथा च निगमः। प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिंद्र इति। यद्यस्मा एत
शः सौवश्व्ये राजा दशस्यन् यजमानः अस्मै इंद्राय गुहदवद्यं प्रच्छन्नावद्यं सोमममाभरत संपादयामास। तत्र दृष्टांतः

द्वि॰भा॰६
॥३५२॥

अंशं न यथा पिता अंशं भागं पुत्राय भरति तद्वत्॥ ॥इति द्वितीयस्य षष्ठे त्रयोविंशो वर्गः॥ ॥अथ षष्ठी॥ स रंध
यत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय॥ दिवोदासाय नवतिं च नवेंद्रः पुरो व्यैरच्छंबरस्येति॥ ॥सदिवः दी
प्तियुक्तः स इंद्रः सारथये आत्मनः सारथ्यं कुर्वते कुत्साय अरये राजर्षये शुष्णं शोषयति सर्वमिति शुष्णः शुष्णिदस
रः तमशुषं न केनापि शोषणीयं एतन्नामानमसुरं रंधयत्। रध्यतिर्वशगमने। वशमनयत्। यद्वा रध्यतिर्हिंसासंराध्यो
रित्यस्य ण्यंतस्य रधिजभोरचीति नुम्। अवधीत्। किं च स इंद्रः दिवोदासाय एतन्नामकाय राज्ञे शंबरस्यासुरस्य न
वनवतिं पुरः व्यैरत् विदारितवान्॥ ॥अथ सप्तमी॥ ॥एवा त इंद्रोचथमहेम श्रवस्या न त्मना वाजयंतः॥ अश्याम
तत्साप्तमाशुषाणा ननमो वधरदेवस्य पीयोरिति॥ हे इंद्र श्रवस्या सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घः। अ
न्नेच्छया वाजयंतः सा बालिनं कुर्वंतः। यद्वा श्रवस्या यशः कामनया वाजयंतो न्नमिच्छंतः। इच्छार्थामपितिन् दृश्यते।
अश्वयंतो गव्यंतो वाजयंत इति॥ वाजयंता इति प्राप्ते पदिकस्यांतोदात्तत्वं स्यात्। वाजयंतः शतृ कृतुमिति यथा ता ॥३५२॥

३६

धृष्णिरिति प्राप्ये युध्यं तस्मिन् युध्ये राजिगीवांसः शत्रून् जितवंतो भवेम॥ ॥नवमी॥ नूनं सा त इति व्याख्याता॥ ॥इति द्वि
तीयस्य षष्ठे चतुर्विंशो वर्गः॥ ॥अपाय्यस्येति नवर्चमष्टमं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं अपायीत्यनुक्रांतं। लैंगिकः सूक्त
विनियोगः। द्वितीये पर्याये द्वितीये शस्त्रे याज्या। अपायीत्येषा। सैषा सूक्ते प्रथमा॥ अपाय्यस्यांधसो मदाय मनीषिणः
सुवानस्य प्रयसः। यस्मिन्निंद्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यंतश्च नर इति॥ सवनस्य सोमाभिषवं कुर्वाणस्य
मनीषिणः प्राज्ञस्य यजमानस्य संबंधिनः। प्रयसः प्रीङ् तर्पणे। असुन्। प्रीतिकरस्यास्य सोमलक्षणस्यांधसः मदाय
अपायि एतदन्नमिंद्रेणापीतमित्यर्थः। यद्वा अपायीति पातेर्व्यत्ययो बहुलमिति च्लेश्चिण् भवति। छंदसि लुङ्लङ्
लिट इति लोडर्थे लुङ्। प्रीतिकरस्यांधसः अपायि शेषविवक्षया कर्मणि षष्ठी। इंद्रः सोमं पिबतु प्रदिवि पुराणे यस्मि
न् सोमस्य लक्षणे धासि वावृधान इंद्रः ओको दधे सेव्यतया निवासं चकार। किं च ब्रह्मण्यंतः इंद्रस्य स्तोत्रमिच्छंतः
नरः कर्मणां नेतारः ऋत्विजः यस्मिन्निवासं विदधिरे तदेतदपायीति पूर्वेणान्वयः। अथ द्वितीया। अस्य मंदानो म

इंद्र वयं ते तुभ्यमवतः क्थं स्तोत्रमात्मना आत्मनो स्वयमेव नः अहमप्रापयेम हि गतौ संप्रसर्थे इदानीं आस्तुषाणाः
आभूते: नून निष्पन्नाया यावबहुलुम्मितितिलि रूयपि विवूरण्य दूयउ प्रसयः। सत्रसाम भुवानाः वयं यदभिलषितं तस्य
तं सत्ते पुरुषसंबंधिस्थाप्तप दीनं। सदन्यं अवृद्याम। व्याप्नुयाम। अदेवस्य देवादीन् इंद्रादीन् जानतः पीयोः पीयति
हिंसाकर्म हिंसकस्य रस्य वधः वध्यं ते कृत्रवोनेने तिवरायुधं नमः तत अयोनमयः ननमः णमु प्रह्वत्वे। ण्यैतस्य
लुप्ति. वत्ति. रूपं। हिंसकस्यासुरस्यास्व मितिस्वरः।। ।।अथाष्टमी।। एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि त
क्षुः।। ब्रह्मण्यंत इंद्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः।। ।।शूर बलवन् हे इंद्र ते तुभ्यं गृत्समदाः अत्रयास्कः
गृत्सौ गृत्से मदो मदनो गृत्स इति मेधाविनाम गृणाते: स्तौतिकर्मण इति।। यथा विधमन्मननीयं स्तोत्रं तुभ्यमे
व तक्षुः ततक्षुः वध्क्षुः तत्र दृष्टांतः अवस्यवोन अवः गमयन्थ्या देवा तरं सुनिरूपमवदति। आवीगमनमिछंतः पुमां
सो वयुनानि मार्गान् यथा कुर्वंति तद्वत्। किंच नवीयः स्तूपं स्तुत्या निषद्यात् तुतुष्टुर्। नवीयसो नवतरस्य नवः ब्रह्म

व्यंतः स्तोत्रं कर्तुमिच्छंतः गृत्समदाः सुक्षितिमिषं रूपेण भजनिवासोपेतमूर्जमन्नं बलं वा सुम्नं सुखं वा स्युः प्राप्नुयुः ए
वस्य गृत्समदे बहुवचनं परोक्षनिर्देशश्च॥ ॥अथ नवमी॥ ॥नूनं सा त इति सिद्धार्थी॥ ॥इति द्वितीयस्य षष्ठे चतु
र्विंशो वर्गः॥ ॥वयं ते वय इति नवमं सूक्तं नवर्चं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं॥ वयं त इत्यनुक्रांतं॥ सूक्तविनियोगो लैंगिक
एव धार्यतां॥ तस्मिन्सूक्ते प्रथमा॥ वयं ते वय इंद्र विद्धि षु णः प्र भरामहे वाजयुर्न रथं॥ विपन्यवो दीध्यतो मनीषा सु
म्नमियक्षंतस्त्वावतो नॄन्॥ ॥हे इंद्र ते तुभ्यं वयः सोमलक्षणमन्नं प्रभरामहे प्रकर्षेण संपादयामः। तत्र दृष्टांतः वाजयु
र्न यथा तमात्मन इच्छन् पुमान् रथं शोभनं संपादयति। तद्वदेवं हविः संपादयतोऽस्मान्सु षु विद्धि जानीहि। विदेर्ज्ञाना
र्थस्य लोटि रूपं वाक्यादित्वाद् अनिघातः॥ किं कुर्वंतो वयं विपन्यवः तव स्तोत्रं कुर्वाणाः मनीषा मनसर्षिया स्तुत्या दीप्यं
तो दीप्यमानाः। दीधीङ् दीप्तिदेवनयोः। व्यत्ययेन शतृ। त्वावतः युष्मदस्मभ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप्
त्वत्सदृशान् नॄन् नॄन् नेतॄन् अस्मादीन् सुम्नं सुखमियक्षंतः याचमानाः यद्वा सुम्नं सुखेन नॄन् नेतॄन् अस्मादीन्दे ॥३५३॥

कं पाताललोको भवति। यः शुष्माणि तुं संतं यश्च शुशुमानं शाशापुतगतो क्रियां कुर्वाणं पुरोडाशादीनि हवींषि पचंतं
स्तुवंतं सामभिः स्तोत्रं कुर्वाणं स्तुतशस्त्रयोः प्रगीताप्रगीतमंत्रसाध्यत्वेन भेदस्य प्रतिपादकत्वात् अत्र पृथगुद्देशः
एवंविधं यजमानं ऊती तुस्या रक्षणेन प्रनेषत्। नयतेर्लेटि सिब्बहुलमिति सिपि अडागमः। तिङि चोदात्तवतीति ग
तेर्निघातः। कर्मण्यं धारं प्रापयेत्॥ ॥अथ चतुर्थी॥ तमु स्तुष इंद्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च॥ सब
स्वः कर्म पीपरदिया नो ब्रह्मण्यतो नूतनस्यायोः॥ तमु तमेवेंद्रं गृणीषे स्तुमः सामि। उभयत्र पुरुषव्यत्ययः। यस्मिन्नि
ंद्रे पुरा पूर्वं स्तोतारो वावृधुः प्रवृद्धा अभवन्। शाशदुश्च शत्रून् हिंसंतश्च शादृशातेर्नेलिटि तुजादीनामित्यभ्यास
स्य दीर्घः। इयानः स्तोतृभिर्याच्यमानः स इंद्रः ब्रह्मण्यतः स्तोत्रमिच्छतो नूतनस्यायोर्मनुष्यस्य यजमानस्य वस्वः
वसुनः कर्म मम अभिलषितं पीपरत् अभिलषितफलदानेन पूरयतु॥ ॥अथ पंचमी॥ ॥सो अंगिरसामुचथा जुजु
ष्वान्ब्रह्मा तूतोदिंद्रो गातुमिष्णन्। मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथः पूर्व्याणि। अंगिरसो बलं से

वंधी नि उचथा उक्थानि जुषाणान् जुषी प्रीतिसेवनयोरित्यस्य लिटि क्वसो रूपं सेवमानः स इंद्रः गातुं पणिभिरपहृता
नामंगिरसां मार्गमिष्णन् प्रेरयन् ब्रह्म तेषां स्तोत्रं कर्मप्रदानेन कृतोवतुतुदाविस्यस्य लङि बहुलं छंदसीति शि
करणस्य श्लुः। अवर्धयत्। किंच स्तवान् स्तोतृभिः स्तूयमानः सूर्येण स्वात्मभूतेन उषासो मुष्णन्। अपहरन्। उ
दिते हि सूर्ये उषसां व्या वर्जते। तादृशः स इंद्रः अश्नस्य अश्नुते। स्वतेजसा सर्वं जगदित्यश्नः कश्चिदसुरः तस्य पू
र्व्याणि पुरातनानि पुराणि बलानि वा शिश्नथः शिथिलीचकार॥ ॥इति द्वितीयस्य षष्ठे पंचविंशो वर्गः॥ ॥अथ
षष्ठी॥ ॥स ह श्रुत इंद्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः॥ अव प्रियमर्शसानस्य साह्वांछिरो भरद्दासस्य स्वधावा
न्॥ ॥देवो द्योतमानः श्रुतः कीर्तिमान् अत एव दस्मतमः सर्वैरतिशयेन दर्शनीयः स इंद्रः मनुषे मनोरर्थायोर्ध्वो भुव
न् कामप्रदानप्रवृत्तः उन्मुखो भवतु नाम प्रसिद्धौ हेति पूरणः। तदुच्यते साह्वान् शत्रूनभिभवन् स्वधावान् बलवानिंद्रः
अर्शसानस्य लोकबाधमानस्य दासस्य एतन्नामकस्यासुरस्य शिरः अभरत्। अधःपातयत्। हरतेर्लङ्यडागमः

हृत्प्रहेर्भः॥ ॥अथ सप्तमी॥ स वृत्रहेंद्रः कृष्णयोनीः पुरंदरो दासीरैरयद्वि। अजनयन्मनवे क्षामपश्च सत्राशंसं य
जमानस्य तूतोत्॥ ॥वृत्रहा वृत्रस्य हंता पुरंदरः पुरां दारयिता स इंद्रः कृष्णयोनीः निकृष्टजातीः दासीः उप
क्षयित्रीः दासुरीः सेना व्यैरयत् व्यतुदत्। किंच मनवे मनोरर्थं क्षां पृथिवीं अपः उदकानि च अजनयत् यजमानस्य
सत्रा महांतं शंसं अभिलाषं तूतोत् तत्काम प्रदानेन पूरयतु वृद्धावितिसौत्रो धातुः श्यमंतुः तुजादित्वाद्दीर्घः य
द्वा सत्रा महत् शंसनीयं शस्त्रं काम प्रदानेन वर्धयतु। यद्वा कृष्णयोनीः कृष्णाख्येनासुरेण निषिक्तरेतस्काः दा
सीर्भार्या व्यैरयत् व्यतुदत्। तथा मंत्रः॥ यः कृष्णगर्भा निरहन्नृजिश्वनेति॥ ॥अथाष्टमी॥ तस्मै तवस्यमनु
दायि सत्रेंद्राय देवेभिरर्णसातौ॥ प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत्॥ देवेभिर्देवनशी
लैः स्तोतृभिः अर्णसातौ उदकलाभनिमित्ते तस्मै इंद्राय तवस्यं तवसे बलाय हितं बलवर्धनं हविः सत्रा सत
त सर्वेष्वहस्सु अनुक्रमेण सवनक्रमेण दायि दत्तम्। तवस्यं यद्वा बलं प्रवृद्धं प्रदीयते तत्तवस्यं देवेभिर्देवैरुदकमं

वान् इत्यक्षंतः इत्यक्षतिगलितं र्मो हविषा तान्प्राप्नुवतो वयं भरामह इति समन्वयः॥ ॥अथ द्वितीया॥ त्वं न इंद्र त्वा
भिरूती त्वायतो अभिष्टिपासि जनान्॥ त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा॥ ॥हे इंद्र त्वं ताभिरूतिभिः
पालनाभिः नोस्मान् पाहि। किंच त्वायतः स्वप आत्मन इच्छतः शतुरनुम इति विभक्तेरुदात्तत्वं। त्वत्कामान् जनान् अ
भिष्टिपासि तु अभितिसेरणकारः अभिष्टाभिरभिगंतारः शत्रवस्तेभ्यः पाता रक्षकोसि भवसि दाशुषो हविर्दत्तवतो य
जमानस्य त्वमिनः ईश्वरः खलु वरूता असि तस्तभितस्तभितेति निपातनादीकारस्य उकारः बाधकानां निवारको
हि। किंच तस्य स्तोतुः इत्थाधीः एवंविधो द्रवद्गमरूपकर्मा य इयत्त्वाम् अभि नक्षति हविषा परिचरति॥ ॥अथ तृतीया॥
स नो युवेंद्रो जोहूत्रः सखा शिवो नरामस्तु पाता॥ यः शंसंतं यः शशमानमूती पचंतं च स्तुवंतं च प्रणेषत्॥ ॥युवा त
रुणो यस्तरुणो बलस्य शमयिता वा जोहूत्रः स्तोतृभिराह्वातव्यः होतव्यो वा सखा सखिभूतः शिवः सुखकरः स इंद्र
नरां नराणां हृस्वाभावश्छांदसो गुणः नरस्य हृस्वस्य नामि अनागमानुनासिकस्यानित्यत्वान्नुडभावः। कर्मणे त्वम स्मा

ऋ॰ भा॰ ६ ॥३५६॥

सर्वस्याभूः तस्या जेत्रे। अश्वजिते। गोजिते बलेनापहृतानां गवां जेत्रे। अब्जिते वृत्रेणापहृतानामपां जेत्रे यजत
याय जनीयाय तस्मै इंद्राय हर्यतं हर्य गतिकांत्योः। भृमृदृशीत्यादिना कर्मण्यतच्। कमनीयं स्पृहणीयं वा सोमं भरेति स
मन्वयः॥ ॥अथ द्वितीया॥ अभिभुवेऽभिभंगाय वन्वतेऽषाळ्हाय सहमानाय वेधसे। तुविग्रये वह्नये दुष्टरीतवे सत्रा
साहे नम इंद्राय वोचत॥ ॥अभिभुवे सर्वस्याभिभवित्रे अभिभंगाय आसुराणां भंजकाय वन्वते वननसंभक्त्रे
व्यत्ययेन तृन्प्रत्ययः। शत्रूणां वयं संभजनाय अषाळ्हाय सहेः कर्मणि निष्ठा। उत्वाभावश्छांदसः। शत्रुभिरनभिभू
ताय सहमानाय सर्वसहाय वेधसे। सर्वस्य वोढ्रे। दुष्टरीतवे अन्यैर्दुस्तराय दुर्हिंसाय सर्वदाभिभवित्रे महतोऽभिभवि
त्रे वा एवंविधायेंद्राय नमो नमः। शब्दं पूर्ववत् स्तोत्रं वा वोचत। हे स्तोतारो यूयं ब्रूत। ब्रुवो लुङि ब्रुवो वचिः अस्यतिवक्ति
ख्यातिभ्यो ङ इत्यङादेशः। वच उमित्युमागमः॥ ॥अथ तृतीया॥ सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो
अनु जोषमुक्षितः। वृतंचयः सहुरिर्विक्ष्वारित इंद्रस्य वोचं प्र कृतानि वीर्या॥ ॥सत्रासाहः बहूनामभिभविता ज श्री ॥३५६५

नभक्षः जनानां यजमानानां कर्मप्रदानेन संभक्तैः संभजनीय इति वा जनंसहः बलिनो जनानामभिभविता च्यव
नः शत्रूणां च्यावयिता स्वस्थानात्। युध्मः योद्धा जोषमनु प्रीतिमनु उक्षितः सिक्तः सोमेन। वृतंचयः वृतस्याभीष्ट
स्य चेता संचेता दातेत्यर्थः। यद्वा वर्तते पुनः पुनरभिमुखमागच्छतीति वृतः शत्रुः तं चयते अथ पुत्रमथ पौत्रं चयते
त्वेवैनमिति। सहुरिः जसिसहोरुरिन्निति उरिन्प्रत्ययः। अभिभविता शत्रूणां। विक्षु प्रजासु आरितः फलवृत्ते
न प्रापिता भवति। तादृशस्येंद्रस्य कृतानि वृत्रहननरूपाणि वीर्याणि सामर्थ्यानि प्रवोचं प्रकर्षेण वदामि॥ ॥अथ च
तुर्थी॥ अनानुदो वृषभो दोधतो वधो गंभीर ऋष्वो असमष्टकाव्यः। रध्रचोदः श्नथनो वीळितस्पृथुरिंद्रः सुयज्ञ
उषसः स्वर्जनत्॥ ॥अनानुदः अनुपश्चाद्ददातीत्यनुदः आतश्चोपसर्गे इति कः। स नास्ति यस्य स तथोक्तः प्रभू
तधनदानेन समानो नास्तीत्यर्थः। अत एव वृषभः कामानां वर्षिता दोधतः दुहिः हिंसाकर्मा हिंसकस्यासुरस्य वधः
हंता गंभीरः महत्त्वेन गांभीर्योपेतः ऋष्वः महान् यद्वा दर्शनीयः सर्वैः असमष्टकाव्यः अशू व्याप्तौ कर्मणि निष्ठ

उदित्वा दिद्वि कृत्यान्न समासः अन्यैरव्याप्तं कर्म रध्रचोदः रधहिंसासंराध्योः रध्राणां समृद्धानां प्रेरकः यद्वा हि
सकानां शत्रूणां नोदकः अथ नः शत्रूणां बलापहारेण कृतयितावी। तितो दद्वांनः पृथुः स्वतेजसा जगद्व्याप्यवर्त्ती
मानः स यतः सकर्मा एतादृशः पुरुष सः स्वः सूर्यो ज्योतिः स्वः सूर्य इति हि ब्राह्मणं सूर्यं च जनत् प्रादुरभावयत्।। ।।अ
थ पंचमी।। यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः।। अभिस्वरा निषदा गा अवस्यव इन्द्रे हि
न्वाना द्रविणान्याशत।। धियो हिन्वानाः स्तुतीः प्रेरयंतः उशिजः इंद्रं कामयमानाः मनीषिणो मेधाविनो अंगिरसः अप्तुरः
अपां प्रेरकाः दित्वा गातुं गवां मार्गं यज्ञेन तपसा विविद्रिरे लेभिरे ततः अवस्यवः रक्षणमिच्छंतः इंद्रेणाः स्तुतीर्हिन्वा
नाः हिन्वाना इति द्वयोः स्वादिः प्रेरयंतः अंगिरसः अभिस्वराः अभितः स्वराः सरणं शब्दनं यस्य तेन स्तोत्रेण निषद
उपसदनेन द्रविणानि गाः धनानि आशत प्राप्नुवन्। अश्नोतेर्लुङि बहुलं छंदसीति विकरण्य लुक्।। ।।अथ ष
ष्ठी।। इंद्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे।। पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदि

जने अनुक्रमेण तद्बलं तस्मै इंद्राय दायि। तथा मंत्रः। अनु ते दायि मह इंद्रियायेति। यद्यदा अस्येंद्रस्य वाह्वोर्वज्रं प्रतिधुः स्तो
तारः स्वधसः वर्द्धनं स्तोत्रेण प्रतिनिदधुः। स्वयजमानो हि इंद्रः दस्यवधार्थं वज्रमादत्त। दधुः दधातेर्लुङि गातिस्थे
ति सिचो लुक्। आत इति झेर्जुस्। ततस्तेन वज्रेण दस्यून् असुरान् हत्वा तदीया आयसीः अयोमयीः पुरो नितारीत्। नित
राम नाशयत्।। ।।अथ नवमी।। नूनं सा त इति व्याख्याता।। ।।इति द्वितीयस्य षष्ठे षड्विंशो वर्गः।। ।।विश्वजित इति
षळर्चं दशमं सूक्तं गार्त्समदस्यैंद्रं आद्यास्तिस्रः पुरउष्णिहः पंचजगत्यः। तृतीये पर्याये होतुः शस्त्र एतत्सूक्तं स्तोत्रिते च।
विश्वजिते तिष्ठा हरीरथ आयुज्यमाने तियाज्येति।। ।।तस्मिन्सूक्ते प्रथमा।। विश्वजिते धनजिते स्वर्जिते सत्राजि
ते नृजित उर्वराजिते। अश्वजिते गोजिते अब्जिते भरेंद्राय सोमं यजताय हर्यतं।। ।।हे अध्वर्यो इंद्राय सोमं भरस
पादय। कीदृशाय विश्वजिते सर्वस्य जेत्रे। तदेव प्रपंचयति। धनजिते शत्रुविजयेन तदीयधनानां जेत्रे स्वर्जिते स्व
र्गस्य जेत्रे अधिपतये। सत्राजिते सत्रा सततं जयशीलाय महते जेत्रे वा नृणां नायकानां जेत्रे उर्वराजिते उर्वरा

नत्वमन्हां॥ ॥हेइंद्रश्रेष्ठान्युत्तमानिद्रविणानिधनानिअस्मभ्यंधेहि। दक्षस्यदक्षेर्भावेघञ्। वृद्धेर्बलस्यसामर्थ्य
स्यचित्तिंख्यातिंधेहि।अस्मेअस्मभ्यंसुभगत्वंशोभनधनवत्त्वंसौभाग्यंवानिधेहि।रयीणांत्वयादत्तानांधनानांपो
षंसमृद्धिंधेहि।नूतनानामंगानांयद्वातायतएभिःकुलमितितन्वःपुत्राःतनोतेःवूरणेउप्रत्ययः।तेषामरिष्टिंत
थास्मदीयायावाचःस्वाद्मानंस्वादुतांअन्हांसुदिनत्वंशोभनदिनत्वंचधेहि।येषुहीन्द्रदयोदेवाइज्यंतेतानि
सुदिनानितेषांभावःसुदिनत्वं॥ ॥इतिद्वितीयस्यषष्ठेसप्तविंशोवर्गः॥ ॥त्रिकद्रुकेष्वितिचतुर्ऋचंएकादशंसू
क्तंगार्त्समदमैंद्रं।तत्रेयमनुक्रमणिका॥ ॥त्रिकद्रुकेषुचतुष्कमष्ट्याद्यातिशक्वर्यंत्यात्रिष्टुबेतिआद्यायामष्टिःछंदः
चतुःषष्ट्यक्षराअतिशक्वर्यांअंत्यात्रिष्टुब्।षोडशिशस्त्रेत्रिकद्रुकेष्वितितृचःसूत्रितं।त्रिकद्रुकेषुमहिषोयवाशिरं
प्रोघस्मैपुरोरथमितितृचावतिछंदसाविति।अविवाक्येहनिमरुत्वतीयेप्रतिपत्तृचस्यत्रिकद्रुकेष्वितिप्रथ
मेदसामेहनीतिखंडेसूत्रितं॥आत्वारथंयथोतयइत्यस्यस्थानेत्रिकद्रुकेषुमहिषोयवाशिरमितिआद्यमे

द्वि॰ भा॰ ६

॥३५८॥ धिके मध्यमेहनि मरुत्वतीये आद्यात्तस्य विशेषाद्दृश्यामहृतिरवं उक्थत्रितं ॥ त्रिकद्रुकेषु महिषो यवाशिरमिति म
रुत्वतीयस्य प्रतिपदिति महाव्रतेपि माध्यंदिनसवने ब्राह्मणाच्छंसिनः स्तोत्रियस्तृचः त्रिकद्रुकेषु महिषो यव
शिरमिति स्तोत्रिय इति सूत्रितं ॥ ॥ तस्मिन्सूक्ते प्रथमा ॥ ॥ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोम
मपिबद्विष्णुना सुतं यथावशत् ॥ स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिंद्रं सत्य इंदुः ॥ ॥ गृ
त्समदो ब्रूते ॥ महिषः महान् पूज्यः तुविशुष्मः बहुबलः त्रिप तृप्तप्रीणने तुदादिः आगमानुशासनस्या
नित्यत्वान्नुमभावः ॥ तृपन्निंद्रः ॥ त्रिकद्रुकेषु ज्योतिर्गौरायुरिति त्रिनामकेषु आभिप्लविकेषु अहस्सु सुतमभिषुतं य
वाशिरं यवमयैः सक्तुभिर्मिश्रितं आशीः पूर्वस्य श्रीणातेः क्विपि अपस्पृधेथामित्यादिनाशिरइत्यादेशः तं सोमं वि
ष्णुना सहापिबत् यथावशत् पूर्वं यथा सोममकामयत् तथापिबत् अवशत् वष्टेर्लङि बहुलं छंदसीति शपो लुगभावः पीतः
स सोमः महामहांतमुरुं तेजसा विस्तीर्णं ईमेनमिंद्रं ममदत् मदेर्मादयतेर्वा कर्मणे महीं महि महनीयत्वादिलक्षणं ब्र ॥३५८॥

४१

वाम्यं वसु सेनं सश्चद्देवो देवं सत्यमिंद्रं सत्य इंदुः॥ ॥ क्रतुना कर्मणा प्रज्ञया साधुं सहजातः साधुमोजसा बले-
नसह ववक्षिथ। विश्वो देवो दुमिच्छुसिवहेः अनंतस्याऽलिहि मंत्रत्वाद्दन्मो भवति। किंच त्वं वीर्यैः शत्रुहननादिल-
क्षणैः पराक्रमैः साकं प्रवृद्धः सम्यग्योहिंसकान् संग्रामान्वासासहिन त्वेकृत्य येति षष्ठी प्रतिषेधः। तेषामभिभ-
विता विचर्षणिः पुण्यकृतो पापकृतश्च विद्रष्टा चेणद्रष्टा सन्वतेस्तोत्रं कुर्वाणाय यजमानाय राधः साधकं वा-
म्यं प्रार्थनीयं वसु धनं दाता सन् ववक्षिथेति समन्वयः। सेनमिति परोक्षनिर्देशः सिद्धार्थः॥ ॥ अथ चतुर्थी
तव त्यं नर्यं नृतोय इंद्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतं ~~परोक्षनिर्देशः सिद्धार्थः॥ ॥ अथ चतुर्थी~~॥ यद्देवस्य श-
प्र वसा ~~श्च~~ रिणा असुं रिणन्नपः। भुवो विश्वमभ्यदेवमोजसा विदादूर्जं शतक्रतुर्विदादिषं॥ ॥ नृतो सर्वेषां नर्त्तयि-
तः हे इंद्र नर्यं नराणां हितकरं प्रथमं प्रथतं प्रथनमितियास्कः। पूर्व्यं पूर्वकालभवं त्वया कृतं। तत्र त्यं तत् अपः कर्म
दिवि स्वर्गलोके प्रवाच्यं प्रकर्षेण वक्तव्यं श्लाघनीयमित्यर्थः। किं तत् देवस्य विजिगीषोरसुरस्य असुं प्राणं प्र-

णन् अपः तेन निरुद्धान्युदकानि अरिणाः प्रेरय इति यदेतत्कर्म तत्प्रवाच्यमिति समन्वयः। परोक्षनिर्देशो वाव-
शिष्टः स इंद्रः विश्वं व्याप्तं अदेवं तमोरूपमसुरं ओजसा बलेन अभिभुवत् अभिभवतु। किंच शतक्रतुरिंद्रः ऊर्जं
बलं विदात् इषं हविर्लक्षणमन्नं च विदात्॥ विदिरत्र लाभे शाविकरणं छांदसोऽडागमः॥ ॥ इति द्वितीयस्य षष्ठेऽष्ट-
विंशो वर्गः॥ ॥ गणानामिदं मंडले द्वितीयोनुवाकः॥ तृतीयोनुवाके दश सूक्तानि। तत्रेदमेकोनविंशत्यृचं गणानामिदं
प्रथमं सूक्तं तत्रेयमनुक्रमणिका॥ गणानामेकोना ब्राह्मणस्पत्यं हि बार्हस्पत्यास्तु मंत्रदृष्टलिंगाः पंचदश्ये तेत्रि-
ष्टुभाविति। पंचदश्येकोनविंशी चात्रिष्टुभौ शिष्टा जगत्यः। यस्तु बृहस्पतिशब्दः श्रूयते। ता बार्हस्पत्यः प्रवर्ग्येऽभि-
ष्टव एव एतत्सूक्तं। सूत्र्यो दक्षमिति खंडे सूत्रितं। गणानां त्वा प्रथश्च यस्येति॥ अथ तस्मिन्सूक्ते प्रथमा॥ ॥ गणा-
नां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं॥ ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सा-
दनं॥ ॥ हे ब्रह्मणस्पते ब्रह्मणोऽन्नस्य परिवृढस्य कर्मणो वा पते पालयितः गणानां देवादिगणानां संबंधेन गणपतिं

द्वि-भा-६
॥३६०॥

स्वकीयानां पतिं कवीनां क्रांतदर्शिनां कविं उपमश्रवस्तमं उपमीयते अनयेत्युपमा सर्वेषां मंत्राणामुपमानं श्रवोऽन्नं यस्य स तथोक्तः अतिशयेनोपमश्रवा उपमश्रवस्तमः उपमः माङ् माने आतश्चोपसर्गे करणे अङ् प्रत्ययः ङ्यापोः संज्ञाछंदसोरिति ह्रस्वत्वं। ज्येष्ठराजं ज्येष्ठाः प्रशस्यतमाः तेषां मध्ये राजंतं ब्रह्मणां स्वामिनं त्वां हवामहे अस्मिन्कर्मण्याह्वयामः। किंच नः नोस्माकं स्तुतीः शृण्वन् त्वं ऊतिभिः पालनैर्हेतुभूतैः सदनं सीद इह स्थिभिरिति सदनं यज्ञगृहमासीदोपविश॥ ॥अथ द्वितीया॥ देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः॥ उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि॥ ॥असुर्य असुराणां हंतः हे बृहस्पते प्रचेतसः प्रकृष्टज्ञानाः ते त्वदीयो देवाश्चित् देवा अपि यज्ञियं यज्ञार्हं भागमानशुः॥ प्राप्नुवन्। यद्वा प्रचेतस इति बृहस्पतेर्विशेषणं प्रकृष्टज्ञानवतस्तेतव संबंधिनो देवा इति योजनीयं। यद्वा प्रचेतसः क्षिप्रक्षिपरिणमः प्रचेताः सत्वायि सति देवा यज्ञियं भागमानशिरे। कर्मविघ्नकारिणामसुराणां रक्षोघ्नमंत्रैरपाकरणात्। नाद ब्रह्मण्याद्दृविषयतीतिश्रवणात्। ज्योतिष

श्रीः
॥३६०॥
४३

मकृत्स्नविकृतुः सत्य इंद्रः स्ववत् देवो दीप्यमानः सः सोमः सत्यं यथार्थभूतं देवं सोमं कामयमानमेनमिंद्रं सश्चति व्याप्नोतु व्याप्नोतु॥ ॥अथ द्वितीया॥ अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्रववृधे। अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिंद्रं सत्य इंदुः॥ अथ सोमपानानंतरं त्विषीमान् दीप्तिमानिंद्र ओजसा बलेन क्रिविं नामासुरं युधा युद्धेन अभ्यभवत्। अभिभूतवान्। किंच स इंद्रः रोदसी द्यावापृथिव्यौ अपृणत् स्वतेजसा समंतात् पूरयामास। तथा अस्य पीतस्य सोमस्य मज्मना बलेन प्रवावृधे। प्रवृषेण वर्धते। यद्वा अस्य क्रिवेरसुरस्य मज्मना सारेण रोदसी अपूरयत्। स इंद्रः सोमं द्विधा विभज्य अन्यं भागं स्वकीये जठरे अधत्त। ईमिनं परं भागं देवेभ्यः प्रारिच्यत प्रारेचयत्। एतेनार्धमिंद्राय अर्धमन्येभ्योपि देवेभ्य इत्युक्तं भवति। तथा तैत्तिरीयकं। यत्सर्वेषामर्धमिंद्रः प्रतिवाति तस्मादिंद्रो देवतानां भूयिष्ठभाक्तम इति॥ ॥अथ तृतीया॥ साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः। दाता राध स्तुवते

तेजसा महनीयः यः उस्राइव सत्वेषु परं तेज इति उस्राः किरणाः स्फुरयितं चीयादिनाक्षरप्रत्ययः। यथा किरणान्
जनयंति तथा विश्वेषां सर्वेषां ब्रह्मणां जनिता जनयति वचांसि जनिता मंत्र इति निपातनात् णिलोपः॥ ॥अथ तृती
या॥ आ विबाध्या परिरापस्तमांसि च ज्योतिष्मंतं रथमृतस्य तिष्ठसि॥ बृहस्पते भीममम्मित्रदंभनं रक्षोहणं गोत्र
भिदं स्वर्विदं॥ ॥बृहस्पते परिरपः पापरूपं रक्षः यद्वा लप्रत्ययांतायां वाचि विहिता परिरप्वदंतो निंदकान् तमांसि च विबा
ध्य तेजसा निराकृत्य ज्योतिष्मंतं ज्योतिषा लब्धं ऋतस्य यज्ञस्य प्रापकं भीमं शत्रूणां भयजनकं अमित्रदंभनं शत्रूणां हिं
सकं देवैः रक्षोहणं रक्षसां हंतारं गोत्राभिदं मेघानां भेत्तारं स्वर्विदं स्वर्गलंभकं रथमातिष्ठसि। अधितिष्ठसि॥ ॥अथ
चतुर्थ्याः॥ सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत्॥ ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते
महि तत्ते महित्वनं॥ हे बृहस्पते सुनीतिभिः शोभननीतयो येषु ते सुनीतयः सन्मार्गाः तैर्जनं नयसि अपेक्षितपुरु
षं प्रापयसि त्रायसे जनं मा पश्चाद्रक्षसि च यो यजमानः तुभ्यं हविर्लक्षणमन्नं दाशात् प्रयच्छेत्। दाशृ दाने लेट्याडु

गमः तमंहः पापं पापरूपं दारिद्र्यं च नो अश्नुवत् न प्राप्नुयात्। अश्नोतेर्लेटि व्यत्ययेन परस्मैपदं अडागमः ब्रह्मद्विषः ब्रा
ह्मणानां मंत्राणां वा द्वेष्टुः तपनः तापकोसि किंच मन्युमीः मन्योः क्रोधस्य परेषां ज्ञानस्य च हिंसकोसि मीङ् हिंसा
यां॥

अथ पंचमी॥ न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः। विश्वा इदस्माद्ध्वरसो वि बाधसे यं सु
गोपा रक्षसि ब्रह्मणस्पते॥ ॥ हे ब्रह्मणस्पते सुगोपाः सुष्ठु पालयिता त्वं यं जनं रक्षसि पालयसि तं जनं अं
हः तदर्थं दुःखेन बाधसे। दुरितं तत्कारणं पापं च न बाधते। अरातयः तं जनं कुतश्चन सर्वासु दिक्षु न तितिरुः। तिरति
र्हिंसाकर्मा। लिट्। न हिंसंति तथा द्वयाविनः मनस्यन्यद्वाच्यन्यदिति द्वयं येषामस्ति। ते द्वयाविनो वंचकाः तमि
नेजनं न बाधंते। किंच ध्वरसो वा हिंसकाः विश्वाः सर्वाः सेनाः तदर्थं विबाधसे विशेषेण बाधस एव॥ ॥ इति द्वि
तीयस्याष्टमे एकोनत्रिंशो वर्गः॥ ॥ अथ षष्ठी॥ त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे।

यामहे वस्पर्त्तरि अधिवक्तारमस्मयुं ॥ बृहस्पते देवविदो निबर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥ अवस्पर्त्तः उपद्र-
वेभ्यः पारयितः यद्वा अवसा रक्षणेन आपद्भ्यः पारयितः हे ब्रह्मणस्पते त्वं नूनामंगानां पुत्रादीनां त्रातारं पा-
लयितारं अधिवक्तारं अस्मास्पक्षपातेन अधिवक्तारं अस्मयुं हविःप्रदानमस्मान् कामयमानं त्वा हवामहे
आस्मिन्कर्मणि आह्वयामः । किंच देवनिदो देवनिंदकान् सकलान् अरातीः शत्रून् जंभय नाशय । जभिनाशे
नवमी चुरादिः । अत्र निरुक्तं । त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि । यो नो दूरे तलितो या अरात-
योऽभिसंति जंभया ता अनप्नसः ॥ त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीम-
हि । याश्च नो दूरे तलितो यांथ्यांतिके अरातयः दानकर्मणो वा दानप्रज्ञा वा जंभय ता अनप्नसोऽप्न इति रूपनामाप्नाती-
ति सतो विद्यन्ता तलिदंतिवती २ तिकनामसु ॥ अथ दशमी ॥ त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा स-
स्निना युजा ॥ मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि ॥ ॥ हे बृहस्पते पप्रिणा पृ पाल- श्री

नपूरणयोः । आदृगमहनेति किन्प्रत्ययः । छंदसः यण्वादेशः । कामानां पूरकेण सस्निना शुद्धेन युजा सहायेन त्वया
हेतुना उत्तमं वयो हविर्लक्षणमन्नं वयं धीमहे धारयामः । धीधारणे । दैवादिकः । दुःशंसः दुःशंसनीयः अभिदिप्सुः अ-
भिदंभितुमिच्छुः पुरुषः नोऽस्माकं मा ईशत । मा ईश्वरो मा भवतु । बहुलं छंदसीति इडागमः । वयं मतिभिः स्तोत्रैः सु-
शंसाः शोभनशंसनसोपेताः संतः प्रतारिषीमहि प्रवृद्धा वर्द्धेमहि ॥ ॥ इति द्वितीयस्य षष्ठे त्रिंशो वर्गः ॥ ॥ अथैका-
दशी ॥ अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः । असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चि-
द्दमिता वीळुहर्षिणः ॥ हे ब्रह्मणस्पते अनानुदः अनु पश्चाद् ददातीत्यनुदः । स यस्य नास्ति सोऽनानुदः । दातृत्वे तस्मा-
न्यरहित इत्यर्थः । अत एव वृषभः कामानां वर्षिता । आहवं आहूयते इति आहवो युद्धं आङि युद्धे इत्यप्प्रत्ययः । संग्रामा-
र्थं च तदर्थं जग्मिः गंता । आदृगमहनेति किन्प्रत्ययः । लिड्वद्भावादाहवमित्यत्र षष्ठीप्रतिषेधः । शत्रुं तापयिता-
रं निष्टप्ता नितरां तस्य तापयिता । तृन्नंतत्वात् षष्ठीप्रतिषेधः । निसस्तपतावनासेवन इति षत्वं वादे वैदिती लिंगतः स

ऋ॰ भा॰ ६
॥३६३॥

रः। पृतनासु संग्रामेषु सासहिः। शत्रूणामभिभविता। एतादृशस्त्वं सत्यः सत्यपराक्रमः सत्यप्रतिज्ञो वासि। ऋण
याः ऋणस्य यावयितासि। यु मिश्रणामिश्रणयोः। ण्यंतस्य क्विपि। लोपो व्यो- र्वलीति लोपः। किं च उग्रस्य चिदु
ओजस्विनोपि दमिता उपशमयिता वीळुहर्षिणः दृढहर्षस्य बद्धमुक्तस्य नास्तिकस्य दमितासि॥ ॥अथ द्वादशी॥
अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति। बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेव
स्य शर्धतः॥ ॥यः अदेवेन मन्यमानेन यद्वा असुराणि तानि विशिष्टेन मनसा अस्मान् रिषण्यति हिनस्ति दुवस्यु द्र
विणस्यु वृषण्यति रिषण्यतीति निपातितः। यश्चोग्रः परपविचवितमन्यमानः आत्मानं बहु मन्यमन्यमानः पुमान्
शासां तच्छस्य शंसितारं यद्वा अस्माकमाशंसां शासितृणामुग्र इति वा योजनीयं। अस्मान् जिघांसति हंतुमि
च्छति। हंतेः सनि अज्झनगमां सनीति दीर्घः। हे बृहस्पते तस्य वधः वध्यतेऽनेनेति वधः। आयुधं नोस्मान् मा प्रण
क्। पृची संपर्चे। श्नम् विकरणो व्यत्ययेनाडागमः। चादिलोप इति न निघातः व्यत्ययेनाद्युदात्तः। किं च दुरेवस्य दुष्ट

श्री
॥३६३॥
१८

बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती॥ ॥बृहस्पते त्वं नोस्माकं गोपाः पालयिता पथिकृत्स
मार्गकृत् च भवसि। विचक्षणः विशेषेण द्रष्टा सर्वज्ञस्त्वं तव व्रताय त्वत्संबंधिने यज्ञाय मतिभिः स्तोत्रैः जराम
हे स्तुमः। जरतिस्तुतिकर्मा। यः पुमान् नोस्मान् अभि अभिलक्ष्य ह्वरः ह्वृ कौटिल्ये भावे असुन् कौटिल्यं दधे वि
दधाति। तं स्वा तं स्वकीया दुच्छुना दुर्बुद्धिः हरस्वती वेगवती। मर्मर्तु मोचयतु मृङ् प्राणत्यागे। अंतर्भावितण्यर्थ
स्य यङ्लुकि लोटि रूपं॥ ॥अथ सप्तमी॥ उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः। बृहस्पते अप
तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि॥ ॥उत वा अपि च हे बृहस्पते अरातीवा अभिमुखमागतवान्
सानुः समुच्छ्रितमिति यास्कः। वृकः वृकु आदाने। धनादीनामादाता यो मर्तो मनुष्यः अनागसो अपराधहीनान् अस्मा
न् मर्चयात् मर्चयति हिनस्ति कर्महिंसा। तं मर्त्यं पथः मार्गात् अपवर्जयति वर्तय नोस्माकं अस्यै देववीतये
यज्ञाय नोस्माकं सुगं सुष्ठु गंतव्यं वृद्धिं कुरु यज्ञानुष्ठानाय सुमतिं देहीत्यर्थः॥ ॥अथाष्टमी॥ त्रातारं त्वा तनूनां ह

षयं दधिरे। कृतवंतः। तान् तपयेति समन्वयः। ते तव उक्थ्यैः सर्वैः प्रशंसनीयं यद्वीर्यमसत् तद्विमासीत्। तदधुना
आविष्कृष्व प्रकटीकुरु तेन च वीर्येण परिरपः परितो निंदतो निंदकान् नमस्स्य शत्रून् अवधीद्देयं च विशेषेण बाधस्व
बार्हस्पत्ये पशौ एषा हविषोऽनुवाक्या। प्रदानानामिति खंडे सूत्रितं। बृहस्पते अति यदर्यो अर्हादिति - यत्
उपवाचः सचंत इति। एषैवाश्विन शस्त्रे परिधानीया सूत्रितं। बृहस्पते अति यदर्यो अर्हादिति परिधानीयेति।
सैषा सूक्ते पंचदशी॥ बृहस्पते यत् अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात
तदस्मासु द्रविणं धेहि चित्रं॥ ॥ऋतप्रजात सत्येनोत्पन्न हे बृहस्पते अर्यः श्रेष्ठो ब्राह्मणः सर्वान् कामानतीत्य
ब्रह्मवर्चसं तेजः अर्हात्। पूजयेत्। अर्ह पूजायां। लेट्याडागमः। जनेषु ब्राह्मणेषु द्युमत् दीप्तियुक्तं क्रतुमत् ज्ञा
नोपेतं यद्ब्रह्म संविभाति। विशेषेण दीप्यते। यच्छवसा बलेन स्वाश्रयं जनं दीदयत्। दीदयतिर्दीप्तिकर्मा दीपय
ति चित्रं चायनीयं तद्ब्रह्मवर्चसं रूपं द्रविणं अस्मासु धेहि। तथा च ब्राह्मणं। बृहस्पते अति यदर्यो अर्हादित्येत

या परिदध्यात्तेजस्कामो ब्रह्मवर्चसकामोतीव वा अन्यान्ब्रह्मवर्चसमर्हतीति द्युमद्विभातीति वीव वै ब्र
ह्मवर्चसं भाति। यद्दीदयच्छवस ऋतप्रजातेति दीदयेव वै ब्रह्मवर्चसं तदस्मासु द्रविणं धेहि चित्रमिति दीदयेव
वै ब्रह्मवर्चसं ब्रह्मवर्चसी ब्रह्मयशसी भवतीति॥ ॥इति द्वितीयस्य षष्ठे एकत्रिंशो वर्गः॥ ॥अथ षोडशी॥ मा न
स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः॥ आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः सा
म्नो विदुः॥ ॥हे बृहस्पते नोऽस्मान् स्तेनेभ्यः स्तानमस्ति येष्विति स्तेनाश्चोराः तेभ्यो मा दाः तान् दर्शयिति। ये द्रु प
द्रुहः प्राणद्रोहस्य पदे स्थाने निरामिणः नितरां रमणशीलाः रिपवः हिंसकाः संतः अन्नेषु परकीयेषु अभिजागृ
धुः अभिकांक्षंति। गृधु अभिकांक्षायां। लिटि रूपं। ये च देवानां वि व्रयः विशेषवर्जनं व्री सहीति धातुर्वर्जने वर्तते
ते यए वं विद्वान् दक्षिणां प्रतिगृह्णाति नेनं दक्षिणा वृणीतीति एकस्य वर्जनार्थे दृष्टस्यापि वर्जनार्थत्वं। तदुत्पादिस्व
कीये हृदये आ ओहते। आवहति। देवनीयागान् स्तुतीश्च न कुर्वाम इति यावत्। तेभ्योऽस्मान् मा दा इति समन्वयः।

द्वि॰ भा॰ ६
॥३६५॥

ये पुमांसो सर्वे साम्नः साममया ऋचः परः परस्तादन्य दुष्टं साममयद्रक्षोघ्नं साम वै रक्षोहनं विदुर्जनितिविंतु
सर्वं साधकं साम त्वामवाग्विदुषो स्मरन्स्तनेभ्यो माद्ः॥ ॥अथ सप्तदशी॥ विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टा
जनत्साम्नः साम्नः कविः। स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हंता मह ऋतस्य धर्त्तरि॥ ॥हे ब्रह्मणस्पते ब्रह्मण
स्पतिं महो महतः ऋतस्य यज्ञस्य धर्त्तरि धारकं यजमाने ऋणचित् तास्तो ऋकर्मस्त्रयमियाचिनातीति ऋणाचित्
किंच ऋणया पापरूपस्य ऋणस्य पावयिता पृथक्कर्त्ता विद्रुहः कर्मणां द्रोग्धुः राक्षसस्य हंता भवति॥ ॥अथाष्टा
दशी॥ तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदंगिरः॥ इंद्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो
अर्णवं॥ अंगिरः अंगिरसोद्भव बृहस्पते गवां मारकेण बलेनाधिष्ठित पर्वतः। तव श्रिये आश्रयणार्थं व्यजिही
त विवृतद्वारमगच्छत्। ततः त्वं यद्यदा गोत्रं गुनि अबूचा ब्रेति समूहार्थे त्रत्र प्रत्ययः। गवां समूहमुदसृजो नि
र्गमयः। तदा तदा इंद्रेण युजा सहायेन युक्तस्त्वं तमसा वृत्तासुरेण परीवृतं परितः आक्रांतं अपामर्णवं स्थ

श्रीः
॥३६५॥
४८

गमनस्थं वर्षितोर्बलवतः यद्धुद्वपाभिसंधये वेगं कुर्वतः तस्य मन्युं क्रोधं स्थाने वा निकुर्म त्वत्प्रसादान्निरामकुर्मचा
॥ ॥अथ त्रयोदशी॥ भरेषु हव्यो नमसोपसद्यो गंता वाजेषु सनिता धनंधनं॥ विश्वा इदर्यो अभिदिप्स्वो
मृधो बृहस्पतिर्विववर्हा रथां इव। स बृहस्पतिः भरेषु संग्रामेषु हव्यः योद्धृभिः स्वस्वरक्षणार्थं माह्वातव्यः नम
सोपसद्यः सर्वैर्नमसोपासनीयः किंच वाजेषु गंता रक्षार्थं गमनशीलः तथा धनंधनं सनिता रंभ्रकृद्दाता तृ
जं तत्रा तुषष्ठी प्रतिषेधः। तथा अर्यः स्वामी बृहस्पतिः अभिदिप्स्वः अभिभवने छावतीः विश्वाः इत्यास
वीः एवं मृधः हिंसकः सेनाः रथानिव युद्धे वेगेन परकीयान् रथानिव विववर्ह विवृहे विश्लेषणार्थश्चिलीचवूर। यद्धर्
वर्गद्वृथार्थे। रथां इव वर्ह। लडर्थे लिट्॥ ॥अथ चतुर्दशी॥ तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृ
ष्टवीर्यं। आविस्तत्कृष्व यदसत्त उक्थ्यं बृहस्पते विपरिरापो अर्दय॥ हे बृहस्पते तेजिष्ठया अतिशयेन तिग्म
या तपनी रक्षसो रिण्या हे सा रक्षसो रक्षसां तपकापे राक्षसाः दृष्टवीर्यं रूपेषु दृष्ट पराक्रमं त्वां निदे निंदयो वि

नभूतं निरौजः नितरामधोमधोमुखमकार्षं ॥ ॥ अथैकोनविंशी ॥ ब्रह्मणस्पते त्वमस्य यंता सूक्तस्य बोधि तनयं च
जिन्व ॥ विश्वं तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः ॥ ॥ हे ब्रह्मणस्पते ब्रह्मणां स्तोत्राणां अधिपते अस्य जग
तो यंता नियामकस्त्वं सूक्तस्य अस्मदीयमिदं ब्राह्मणस्पत्यं सूक्तं बोधि बुध्यस्व त्वं तनयं पुत्रपौत्रादिलक्षणं संतानं जि
न्व जिविः प्रीणनार्थः लोडिदं रूपं प्रीणय भवतु यद्देवा यदवंति रक्षंति तन्महद्विश्वं सर्वं भद्रं कल्याणं भवति अ
तो वयं विदथेऽस्मिन् यज्ञे सुवीराः शोभनपुत्रपौत्राः संतः बृहत्प्रभूतमिदं स्तोत्रं वदेम ब्रूयाम ॥ ॥ वेदार्थस्य प्रका
शेन तमो हार्दं निवारयन् ॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्ग
प्रवर्त्तकवीरबुक्कभूपालसाम्राज्यसायणामात्यधुरंधुरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभा
ष्ये द्वितीयाष्टके षष्ठोऽध्यायः ॥ ॥ श्रीमद्वेदार्थप्रकाशेन द्रष्टृणां कल्याणानि प्रयच्छतु विश्वेशः ॥ छ ॥

द्वि॰भा॰६
॥३६६॥

॥३६६॥
श्री
५

द्वि·अ·७
॥३६७॥

योनंत्वान्यनमन्न्योजसोतादर्दर्मन्युना शंबराणि वि॥ प्राच्यावयदच्युता ब्रह्मणस्पतिराचाविशद्वसुमंतं विपर्वतं॥ ॥यो ब्रह्मणस्पतिः नंत्वानि
नमनीयानि राक्षसादीनि ओजसा बलेन निनमत्। नितरामनमयत्। प्रह्वीभूतान्यकरोत्। उत अपि च स ब्रह्मणस्पतिर्मन्युना क्रोधेन वा
मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वधकर्मणो वेति यास्कः। शंबराणि मेघनामैतत्। मेघान् व्यदर्दः वर्षणार्थं विदारितवान्। दृ विदारणे। इत्यस्मा
द्यङ्लुगंताल्लङ्। एतद्रूपं। तदनंतरं अच्युता अच्युतानि नेतरबलेन मेघे स्थितान्युदकानि प्राच्यावयत्। प्रकर्षेणागमयत्। मेघान्निरगम
यदित्यर्थः। तथा वसुमंतं गोरूपधनवंतं पर्वतं बलनाम्नासुरेण बिलद्वारे पिधानार्थं निहितं शिलोच्चयं आ अविशत्। आभिमुख्येनावत्। चश
ब्दश्चेत्यर्थः। समुच्चयार्थत्वे तु चवायोगे प्रथमेति पूर्वस्या च्यावयदिति अस्माद्युदात्तत्वं स्यात्। अस्य च अनुदात्तत्वं। वेदार्थे तु निपातैर्यद्यदि
हंतेति। निघातप्रतिषेधः सिध्यति। व्याविशत्। विशेषेण प्रविशति। तदिदानीं तद्गोरूपं धनं प्राप्नोदित्यर्थः॥ ॥अथ तृतीया॥ तद्देवानां देवत
ऋ माय कर्त्वमश्रथ्नन्दृह्ळाव्रदंत वीळिता॥ उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः॥ ॥देवानामिंद्रादीनां मध्ये देवतमाय श्री
अतिशयेन दानादिगुणयुक्ताय षष्ठ्यर्थे चतुर्थी। इंद्राय ब्रह्मणस्पते तत्कर्तुं किं पुनस्तदिति तदुच्यते। दृह्ळानि दृढानि व्रतादीनि अ ॥३६७॥
श्रथ्नन्। श्रथ विमोचनप्रतिहर्षणयोः। अस्य बलेन श्लथितानि शिथिलान्यभवन्। तथा वीळिता वीळितानि संस्तंभितानि दृढीकृतानि

दृढानि वीळयति व्रीळयतिश्च संस्तंभकर्माणाविति यास्कः। अव्रदंत मृदून्यभवन्। व्रदतिर्मृदुभावकर्मा। अपि च स ब्रह्मणस्पतिः बलेनापहृ
ता गोः उदाजत्। अज गतिक्षेपणयोः। देवान्प्रत्युदगमयत्। तथा ब्रह्मणा आत्मीयेन मंत्रेण बलं सर्वस्यावरकमसुरं अभिनत्। मंत्रसामर्थ्ये ६
नोभिनत्। तदनंतरं बलेनासादितं तमो ध्वांतमगूहत्। गुहू संवरणे। गूढमदृश्यमकरोत्। स्वरादित्यं व्यचक्षयत्। तमसो निराकरणेन
तत्स्पष्टमदर्शयत्। चष्टिः पश्यतिकर्मा॥ ॥अथ चतुर्थी॥ अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत्। तमेव विश्वे पपिरे स्व
र्दृशो बहु साकं सिसिचुरुत्समुद्रिणं॥ ॥ब्रह्मणस्पतिः ब्रह्मणो मंत्रस्य पतिः पालयिता देवः अश्मास्यं अश्मवद्दृढतरास्यं। यास्कस्त्वाह। अ
शनवंतमास्यंदनवंतमिति। धापनवंतं आसेवतमिति तस्यार्थः। मधुमादयित्रीउपराधायस्य तादृशं अवतं अवस्तात्कृतविस्तृतं यं मेघं
ओजसा बलेन अभ्यतृणत्। उ दिर हिंसानादरयोः। अहिंसीत् वर्षणार्थं अवधीदित्यर्थः। तमेव मेघं विश्वे सर्वे स्वर्दृशः स्वरादित्यः तत्सं
बंधिनो द्रष्टारो रश्मयः पपिरे ग्रीष्मकाले पिबंति मेघेन दृष्टस्योदकस्य पानात् तमेव पिबंतीत्युच्यते। ते रश्मयो वर्षासु उत्सं उत्सेचनवंतं
वरं उद्रिणं मेघं साकं सह बहु रुपितं सिंचंतीत्यर्थः॥ ॥अथ पंचमी॥ सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरंतः॥ अयतंता चरतो

द्वि॰ अ॰ ७
॥२६८॥

अन्यदन्यदिद्याचकार वयुना ब्रह्मणस्पतिः ॥ ॥ हे ऋत्विग्यजमाना वो युष्मदर्थं । सना सनातनानि तानि कानिचित् ब्रह्मणस्पतेः प्रज्ञा
नानि भुवनानां सुपां सुलुगिति सुलुक् । भुवनामुक्तानां प्रवी साभाव्यानां दुरोह्वाराणि माद्भिः मासैः पद्दन्नियादिना मासशब्दस्य मासभा
वः स्वतस्मासो षसां च तद इत्यत इति तत्वं । शरद्भिः संवत्सरैश्च अवरंत विहृपवति । तत्काले वर्षे पार्थं मेघद्वाराण्युद्धारयंती त्यर्थः । कानि पुनस्ता
नि ब्रह्मणास्पति वयुना ज्ञाननामैतत् जानाति मंत्रविषयाणि चकार कृतवान् तदनंतरं अयतं तायअयतमानो प्रयत्नोउभो लोको घो
श्च पृथिवीं च अन्यदन्यदित् । अन्यदन्यदेव पृथिवी व्यृजिनं दिव्यमुदकं द्योः उदकार्थं हविर्लक्षणा पोर्थि व मंत्र एवं परस्परं व्यतिहारेणाच
रतो भुजाते । चर गतिभक्षणयोः ॥ ॥ इति द्वितीयस्य सप्तमे प्रथमो वर्गः ॥ ॥ अथ षष्ठी । अभिनक्षंतो अभियेतमानः । निधिं पणीनां परमं
गुहा हितं । ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयंतदुदीयुराविशं ॥ ॥ गोसमूहे पणिभिरसुरैरपहृते सति पणीनां स्वहस्ताद्भूतेनाग्नि
नादग्ध्वा प्रयागच्छन् तदेवाह वेनोच्यते अभिनक्षंतः अभितो गच्छंतो ये गिरसस्तं निधिं गोसमूहरूपं निधानं परमम् उत्कृष्टं तृतीया
र्थे षष्ठी । पणिभिः गुहायां निहितं स्थापितं अभ्यानशः अभिलक्ष्यतमा शिरं प्रापसर्वतः विद्वांसोपि ज्ञास्तेंगिरसः अनृतानि असुरेश्च

श्रीः
॥२६८॥

श्रीरस्तु ॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ ॥ अथ ऋषिछंदोदेवताविनियोगपुरःस
रं सप्तमोध्यायो व्याख्यायते ॥ गार्त्समदस्य द्वितीयमंडले तृतीयानुवाके दशसूक्तानि तत्र वंशं सूक्तं व्याख्यानं कृतं ॥ सेमामिति षोडशर्चं
द्वितीयं सूक्तं । अत्रानुक्रम्यते सेमां षोडशांत्या त्रिष्टुप् द्वादशी तृचमैंद्री चेति । मंडलद्रष्टा गृत्समद ऋषिः द्वादशी षोडश्यौ त्रिष्टुभौ । शि
ष्टा श्चतुर्दश जगत्यः ब्राह्मणस्पत्यं हे सूक्तत्वात् तुह्यादि परिभाषया इदमादीनि त्रीणि सूक्तानि । ब्राह्मणस्पत्यानि अस्य सूक्तस्य द्वा
दशमैंद्री इंद्रदेवत्या च शशाद्धा ब्राह्मणस्पत्या च सामान्य विनियोगः पूर्वमेवोक्तः विशेषतः लिंगादेवावगंतव्यः ॥ ॥ तत्रैषा प्रथमा ॥ सेमा
मविड्ढि प्रभृतिं य ईशिषेया विधेम नवया महागिरा ॥ यथानो मीढ्वांत्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिं ॥ ॥ हे ब्रह्मणस्पते
य स्त्वं ईशिषे सर्वस्य जगतः ईश्वरो भवसि । स त्वं इमामस्मदीयां प्रभृतिं प्रकर्षेण भृतां स्तुतिं अविड्ढि प्राप्नुहि । अवतेः प्राप्त्यर्थस्य लोप
तद्रूपं । वयं च त्वां अया अनया छांदसो वर्णलोपः । नवया नूतनया प्रत्यग्रया महागिरा वेदरूपया स्तुतिलक्षणया वचो विधेम । परिचरे
म । विधतिः परिचरणकर्मा । उत अपि च नोस्माकं मतिं तदभिमतं फलं सीषधः साधय छांदसे लुङि च डि एतद्रूपं ॥ ॥ अथ द्वितीया ॥

ऋतमापः प्रतिचक्ष्य आविष्टुं आवेष्टुं प्रवेष्टुं यत उ यत एव तत्स्थानादयन् तत्स्थानं पुनरुदीयुः उदगच्छन्नु त्कर्षेण प्राप्ताः॥ ॥अथ
सप्तमी॥ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः॥ बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि
तं॥ ॥ऋतावानः ऋतमिति सत्यनामधेयं तद्वंतः कवयः क्रान्तदर्शिनः सर्वज्ञा अंगिरसः अनृता अनृतानि प्रतिचक्ष्य पूर्वोक्तप्रकारे
ण दृष्ट्वा अतः अस्मात्स्थानात्पुनरागिजिगमिषवः महस्पथो महतो मार्गात् प्रति आ तस्थुः अवतस्थिरे। अवतिष्ठमानाश्च ते
बाहुभ्यां हस्ताभ्यां धमितं मंथोत्पादितं प्रज्वालितमग्निं अश्मनि पर्वतानां निवासभूते। शिलान्वये जहुर्हि दग्धुं सक्तवंतः खलु
अरणः अरमयिता दोहनदुःखकारी सोग्निः पूर्वं तत्र न किरस्ति न विद्यते न विद्यमाने अग्निं स्वसामर्थ्यादुत्पाद्य तत्र प्रवेशुरित्यर्थः॥॥
अथाष्टमी॥ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना॥ तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयो
नयः॥ ॥ऋतं सत्यमेव ज्या यस्य तेन क्षिप्रेणाशुप्रक्षेपकेण धन्वना धरणभूतेन धनुषा हे ब्रह्मणस्पते त्वया स्तुत्याः ब्रह्मणस्पतिः
ब्रह्मणो मंत्रस्य पालयिता देवः यत्र यस्मिन्विषये वष्टि कामयते तत्प्राप्नोति प्रकर्षेण व्याप्नोति। अश्नोते व्यत्ययेन परस्मैपदं तस्य

द्वि॰भा॰७
॥३६९॥

धनुषः साध्वीः साधिकास्ता इषवो भवंति। याभिरिषुभिः ब्रह्मणस्पतिरस्यति। राक्षसादीन् क्षिपति। कीदृश्यस्ताः नृचक्षसः नृन्पश्यतः
उपलक्षणमेतत्। सर्वज्ञस्य ब्रह्मणस्पतेः दृश्ये दर्शनीयज्ञानाय जाताः कर्णयोनयः श्रोत्रेंद्रियेण याह्याः मंत्रभूताः आकर्णकृष्टा
वा ब्रह्मणस्पतिर्मंत्रैरेव सर्वं साधयतीति भावः॥ ॥अथ नवमी॥ स संनयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः।
चाक्ष्मो यद्वाजं भरते मती धनादित्सूर्यस्तपति तप्यतुर्वृथा॥ ॥पुरोहितो देवैः पुरतो व्यवस्थापितः स ब्रह्मणस्पतिः संनयः विश्लिष्टा
नां मंत्रैः संगमयिता भवति। तथा सुधिसंग्रामे नृणामनुग्रहाय प्रादुर्भवतीति शेषः। यद्यदा चाक्ष्मः चष्टेः क्षमते वा सर्वस्य द्रष्टा
सर्वस्य सहो वा ब्रह्मणस्पतिः वाजमन्नं मतीनांमननीयं प्रशस्तं धनाधनं वस्तोर्नृणामर्थाय भरते बिभर्ति। वृष्टिद्वारा पोषयति
आदित् अनंतरमेव तप्यतुस्तापकः सूर्यः वृथा अनायासेन तपति दीप्यते। ब्रह्मणस्पतिना दत्तैरन्नैर्धनैश्च यज्ञस्य सिद्धत्वात्स
यं केवलं हवींषि भुंजान एव वर्त्तत इत्यर्थः॥ ॥अथ दशमी॥ विभु प्रभु प्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या। इमा सा
तानि वेन्यस्य वाजिनो येन जना उभये भुंजते विशः॥ ॥विभु विभूनि प्रभु प्रभूणि प्रोढानि प्रथमं प्रथमानि मुख्यानि एवंभूतानि

श्री
॥३६९॥

द्वि·भा·७
॥३७०॥

नादिगुणयुक्तः देवान्प्रति सर्वेषां निप्रतिनिधिः सन्नूहद्युपप्रथे। अस्यं तं प्रथते यशसा विस्तीर्णो भवतीति यावत्। यस्मादेवं तस्मात्
विश्वे दुतासः वाव्यैवता तानि सर्वाणि भूतजातानि परिभूः परिभवन् अभिभवन् वर्तत इति शेषः॥ ॥अथ द्वादशी॥ ॥विश्वं सत्यं मघवा
नायुवोरिदापश्चन प्रमिनंति व्रतं वां॥ अच्छेंद्राब्रह्मणस्पती हविर्नोन्नं युजेव वाजिना जिगातं॥ ॥हे मघवाना मघमिति धनना
म तद्वंता वींद्रो ब्रह्मणस्पती युवोरितु युवयोरेव विश्वं सर्वं स्तोत्रं सत्यं यथार्थं स्तुत्याय घटु पाजातं प्रतिपद्यते। तत्सर्वं युवयो विद्य
मानं एव न त्वारोपितमित्यर्थः। तथा चनेसे तत्सदद्वय समुदायः। एकपदं त्वध्या पकसांप्रदा यिकं यद्य वशब्दस्य पूर्वपदेन आपश्च आ
पोपि उपलक्षणामे तत्। एतदुपलक्षितानि सर्वाण्यपि भूतानि वां युवयोर्व्रतं कर्म न प्रमिनंति न हिंसंति। मीङ् हिंसायां। त्रैय्या
दिकः। निगम इति ह्रस्वत्वं। हे इंद्राब्रह्मणस्पती नोस्माकं हविरन्नं छाभिमुख्येन जिगातं। आगच्छतमित्यर्थः यावत्। जिगातिर्गतिकर्मा
जोहोत्यादिकः। तत्र दृष्टांतः। युजेव वाजिना युजौ रथे नियुक्तौ वाजिनौ वेजनवंतावश्वौ अन्नं घासं प्रति यथा स्वयं। एवं शीघ्रं ग
छतं तद्वत्। शीघ्रमागतमित्यर्थः। युजेवे त्यत्र सुपांसुलुगिति प्रथमाद्विवचनस्याकारः। तृतीयायां सा वेकाच इति विभक्तेरुदात्तत्वं॥ ॥

श्रीः
॥३७०॥

अथत्रयोदशी

उताशिष्ठा अनु शृण्वंति वह्नयः सभेयो विप्रो भरते मती धना॥ वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः॥ ॥
उत अपि च शिष्ठाः आशुतराः शीघ्रगामिनो वह्नयः। अश्वनामैतत्। वोढारो ब्रह्मणस्पतेः अश्वा अनु शृण्वंति। अस्माकृतं स्तोत्रं अ
नुक्रमेण शृण्वंति यद्वा ब्रह्मणस्पतीनां कृतमनुशासनं शृण्वंति। अतस्ते तमस्मदीयं यज्ञं प्रापयंत्विति शेषः। सभेयः सभायां सा
धुः ढः छंदसीति ढ विप्रो मेधावी अध्वर्युर्होता वा मती मत्या मननीयेन स्तोत्रेण सुपांसुलुगिति पूर्वसवर्णदीर्घः। धना हविर्लक्षणानि
धनानि तस्मै ब्रह्मणस्पतये भरते बिभर्ति संपादयतीत्यर्थः। यद्वा स्तोत्रेण धनानि भरते बिभर्ति पोषयति। अतो वद्द्वेष्ये वीळ्द्वेषा दृ
ढान्प्रबलान्राक्षसादीन् द्वेष्टीति तादृशो ब्रह्मणस्पतिर्वशावशायोगे सुपांसुलुगिति षष्ठ्या लुक्। ऋत्यक इति प्रकृतिभावः। ऋ
णं अस्माभिर्यज्वभिः प्रदेयं अवदानात्मकं अनु अनुक्रमेण आददिः दाता भवत्विति शेषः। अवदानस्य ऋणत्वं च तैत्तिरीये त्रिभिर्ऋण
वा जायते ब्रह्मचर्येण ऋषिभ्य इत्यादिना स्पष्टमाम्नातं। यद्वा अनु रानुगुण्येन वशा वशस्य कामस्याभिलाषस्यानुगुणं दाता
स भवत्विति योज्यं। हा शब्दः प्रसिद्धौ। स खलु ब्रह्मणस्पतिः समिथे संसंगच्छंते तस्मिन्नाजाविति समिद्वा इति समिथा यज्ञः तस्मिन्

याजी अन्नवान् तस्माद्धविष आदाता भवतीति शेषः॥ ॥अथ चतुर्दशी॥ ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः।
यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक्॥ ॥महि महत् कर्म करिष्यतः। ब्रह्मणस्पतेः मन्युः मननसाधनो मंत्रः क्रोधो
वा यथावशं यथाकामं सत्यो ऽवितथो भवत्। तत्सत्यं यथा कामयते करोतीत्यर्थः। यो ब्रह्मणस्पतिः पणिभिरपहृता गोः। उदाजत्। उद्गमय
त्। गुहायां निर्गमयदित्यर्थः। स ब्रह्मणस्पतिः दिवे द्युलोकाय तत्रत्येभ्यः देवेभ्य इत्यर्थः। आतजघना गा विभक्ता व्यकरोत्। स च गोस
मूहः मही व रीतिः महती स्रुतिरिव रीङ् स्रवणे यथा गंगादीनां स्रोतः विभक्तं सत् निम्नदेशाभिमुखं प्रसरति। तथा आत्मीयेन बलेन
तत्तद्देवगृहं पृथक् विभिन्नं सरत् गच्छत्॥ ॥अथ पंचदशी॥ ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो वयस्वतः॥ वीरेषु वीराँ
उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवं॥ ॥हे ब्रह्मणस्पते मंत्राधिपते सुयमस्य सुष्ठु नियंतव्यस्य वयस्वतो ऽन्नयुक्तस्य रा
यो धनस्य विश्वहा विश्वेषु सर्वेष्वहस्सु रथ्यो ऽधिपतयः स्याम भूयास्म। रथ्या येषां संतीति रथ्यः। छंदसीवनिपाविति मत्वर्थीय ईकारः
अपि च नो ऽस्माकं वीर्योज्जातेषु अस्मदीयेषु वीरेषु वीरान् पुत्रान् त्वं उप पृङ्धि संपृक्तान् कुरुत उत्पादय। पृची संपर्के। रोधादिकः। वयं

मेहनावतः वृषण्वतो ऽवृषि प्रदस्य बृहस्पतेः बृहतो मंत्रस्य पालयितुः संबंधीनि सुविदत्राणि विद्लृ लाभे सुविदे रक्नन् सुष्ठु ल
ब्धव्यानि सुविदत्रं धनं भवतीति यास्कः। राध्यानि राध्यानि सम्यक् साधनीयानि प्राप्तव्यानीति यावत्। इमा तानी मानि धनानि वे
न्यस्य कमनीयस्य वाजिनो ऽन्नवतो ब्रह्मणस्पतेः दत्तीयार्थे षष्ठी। ब्रह्मणस्पतिना दत्तानि येन धनेन उभये उभय धनाजना
स्तोरो यजमानाश्च देवा मनुष्या यस्येति नैषदोषः। यद्यप्यासो कलिंगाख्य राज्ञः पुत्रस्तथापि। ततः कलिंगयेन स्वयं वृद्ध त्वा
त् अपसोपसादनायसामर्थ्ये मनुष्याश्च देवा मनुष्याश्च वा विशो निविष्टाः संतो भागान् लभते तत् सर्वं ब्रह्मणस्पतिना दत्तमित्यर्थः॥ ॥
इति द्वितीयस्य सप्तमे द्वितीयो वर्गः॥ ॥अथैकादशी॥ यो ऽवरे वृजने विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ॥ स देवो देवान् प्रति प
प्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः॥ ॥विश्वथा सर्वप्रकारेण विभुर्व्याप्तः रण्वो रमयिता स्तोतव्यो वा यो ब्रह्मणस्पतिः अवरे नि
कृष्टे वृजने वर्जनहेतुभूते बलं स्तमानं दुर्बलमिति यावत् महांमु महांतं च छांदसो वर्णलोपः उभयविधं स्तोतारं शवसा
आत्मीयेन बलेन ववक्षिथ। वोढुमिच्छति सर्वदा वहतीति यावत् वहतेः सनंतस्य लिड्युत्तद्रूपं। पुरुषव्यत्ययः। सदेवो दा

पौत्रानपिलभेमहीतियावत्‌।ईशानःसर्वस्येश्वरस्त्वं।ब्रह्मणाअन्नेनामेतुतद्विलक्षणेनान्येनसहामेहत्वंमदीयंस्तुतिलक्षणमा
ह्वानंवेविक्तास्यसेवीगतिप्रजनकांत्यशनखादनेषु।अंतोमयोक्तंकुर्वीत्यर्थः॥ ॥अथषोडशी॥ब्रह्मणस्पतेत्वमस्ययंतासूक्त
स्यबोधितनयंचजिन्व॥विश्वंतद्भद्रंयदवंतिदेवाबृहद्वदेमविदथेसुवीराः॥ ॥हेब्रह्मणस्पतेयंतासर्वस्यजगतोनियंतात्वंअस्यदस्म
क्तंक्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी॥बोधिबुधबुध्यस्वबुद्ध्वातनयंपुत्रंवास्माभ्यंजिन्वप्रेरयजिविःप्रीण
नार्थः।पुत्रप्रेरणेवर्त्तते।धातूनामनेकार्थत्वात्।यद्भद्रंकल्याणंदेवाःसर्वेअवंतिरक्षंति।विश्वंसर्वंतद्भद्रंचजिन्वेतिशेषः।वयंचसु
वीराःशोभनैर्वीरैःपुत्रपौत्रादिभिरुपेताःसंतःबृहत्प्रौढंस्तोत्रंविदथेवदंतियष्टव्यतयास्मिन्देवान्विदथोयज्ञःतस्मिन्वदेम
ब्रवाम॥ ॥इतिद्वितीयस्यसप्तमेतृतीयोवर्गः॥ ॥इंधानइतिपंचर्चंतृतीयंसूक्तंगार्त्समदंजागतंब्राह्मणस्पत्यं।तथाचानुक्रांतं।इं
धानःपंचजागतंत्विति।लैंगिकोविनियोगः॥ ॥तत्रप्रथमा॥इंधानोअग्निंवनवद्वनुष्यतःकृतब्रह्माशूशुवद्रातहव्यइत्॥जातेन
जातमतिप्रसर्स्रतेयंयंयुजंकृणुतेब्रह्मणस्पतिः॥ ॥अग्निमिंधानःब्रह्मणस्पतेर्योगार्थंअग्निंप्रज्वालयन्यजमानःवनुष्य

तोहिंसांकुर्वतोवाशत्रून्वनवत्वनुयात्हिंस्यात्।वनुष्यतिर्हिंसाकर्मेतियास्कः।इदितिवार्थे।कृतब्रह्माब्रह्मस्तोत्रंकृतंयेनतथो
क्तः।रातहव्यःरातंदत्तंहविर्येनएवंभूतःसन्शूशुवत्वर्धतेटुओश्विगतिवृद्ध्योः।अस्माण्ण्यंताल्लुङि।चङिरूपं।तथायजमा
नःजातेनपुत्रेणजातंजनितंउत्पादितंस्वस्यपौत्रंअतिप्रसर्स्रते अतीत्य महांतमपिपश्यन्चिरकालंजीवेदित्यर्थः।सर्तेर्यङ्लु
गंताद्व्यत्ययेनात्मनेपदं।यंयजमानंब्रह्मणस्पतिःस्तोत्रंहविषास्वीकरणेनयुजंसखायंकृणुतेकुरुतेसस्समानएवभवतीत्यर्थः॥॥
अथद्वितीया॥वीरेभिर्वीरान्वनवद्वनुष्यतोगोभीरयिंपप्रथद्बोधतुत्मना॥तोकंचतस्यतनयंचवर्धतेयंयंयुजंकृणुतेब्रह्मणस्पतिः॥॥
सयजमानःवीरेभिर्वीरैरात्मीयैःपुत्रैर्वनुष्यतोहिंसितःवीरान्शत्रुपुत्रान्वनवत्वनुयात्हिंस्यात्।अपिचगोभिःसहितंरयिं
धनंपप्रथत्प्रथयतिविस्तारयतिप्रथतेर्लुङिचङि।एतद्रूपं।तथात्मनाआत्मनैवबोधृतैःसर्वंजानाति अनन्याधीनज्ञानोभव
तीत्यर्थः।किंचतस्ययजमानस्यतोकंपुत्रः तनयं विभक्तिव्यत्ययः।तनयस्तसुतश्चवर्धतेप्रवृद्धोभवति।यद्वातोकंतनयंपुत्रंपौ
त्रंचब्रह्मणस्पतिर्वर्धयति।वृधिरंतर्भावितण्यर्थोद्रष्टव्यः।अन्यद्गतं॥ ॥अथतृतीया॥सिंधुर्नक्षोदःशिमीवांऋघायतोवृषेव

निष्टप्तत विषिः तविषीति बलनाम अनिभृष्टापरैरबाधिता तविषी बलं यस्य तादृशः सन् ओजसा बलेन हंति शत्रून्॥ ॥अथ
पंचमी॥ तस्मा इद्विश्वे धुनयंत सिंधवो छिद्रा शर्म दधिरे पुरूणि॥ देवानां सुम्ने सुभगः स एधते यं यं युजं कृणुते ब्रह्मणस्पतिः॥ ॥
तस्मा इत् तस्मा एव यजमानाय विश्वे सिंधवः सर्वाः स्यंदनशीला नद्यः धुनयंत चलयंति। एतदभीष्टफलसिध्यर्थं प्रवहंतीत्यर्थः।
तथा अछिद्रा अछिद्राणि छिद्ररहितानि संततानि पुरूणि बहूनि शर्म शर्माणि सुखानि दधिरे तस्मा एव धार्यंते। यद्वा शर्मे
ति गृहनाम छिद्ररहिता बहूनि सदनानि धार्यंते। स्वभगः शोभनधनः देवानां सुम्ने देवैः प्रत्ते सुखे वर्त्तमानः सन् एधते वर्ध
ते। शिष्टं स्पष्टं॥ ॥इति द्वितीयस्य सप्तमे चतुर्थो वर्गः॥ ॥ऋजुरिति चतुर्ऋचं चतुर्थं सूक्तं गृत्समदस्यार्षं जागतं ब्राह्मणस्पत्यं। त
था चानुक्रांतं। ऋजुश्चतुष्कमिति। गतो विनियोगः॥ ॥तत्र प्रथमा॥ ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयंतमभ्यसत्॥ सु
प्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्विभजाति भोजनं॥ ॥ऋजुरित् आर्जवयुक्त एव यद्वा ऋंजतिः प्रसाधनकर्मा स्तोत्राणां
प्रसाधक एवं शंसः ब्रह्मणस्पतेः स्तोता वनुष्यतो हिंसतः शत्रून् वनवत् वनुयात् हिंस्यात् वनतेर्हिंतिकर्मण एतद्रूपं तथा

देवयन्निद्देवं दानादिगुणयुक्तं ब्रह्मणस्पतिमात्मन इच्छन्नेव अदेवयुं तं तद्विपरीतं पुरुषं अभ्यसत् अभ्यभवत्। अस्तेर्लेङ्येतद्रूपं
तथा सुप्रावीरित् अवतेः सुपूर्वात् औणादिक ईकारप्रत्ययः। सुष्ठु प्रकर्षेण ब्रह्मणस्पतिं तर्पयितैव पृत्सु पृतनासु संग्रामे दुष्टरं तरीतुम्
शक्यं वनवत् हिंस्यात्। यज्वेत् ब्रह्मणस्पतिं हविषा इष्टवानेव अयज्योः अयज्वनः भोजनं भोगसाधनं विभजाति विशेषेण भजतीत्यर्थः॥ ॥
अथ द्वितीया॥ यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये। हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्पतेरव आ वृणीमहे॥ हे
ऋषिरात्मीयं पुरुषं शास्ति। हे वीर विशेषेण स्तुतीनां प्रेरक सारवतू यजस्व ब्रह्मणस्पतिं स्तुत्या पूजय मनायतः मन इव शत्रून् प्रवर्तमा
नान् हिंसकान्। यद्वा अभिमन्यमानान् शत्रून् प्रति प्रविहि प्रकर्षेणायुधार्थं गच्छ। वीगत्यादिषु छांदसो ह्रस्वः। वृत्रतूर्ये वृत्राणामावरक
णां शत्रूणां हिंसाहेतुभूते संग्रामे भद्रं कल्याणं धारयितं मनः कृणुष्व कुरुष्व। ब्रह्मणस्पतेरनुग्रहात् तवैव जयो भविष्यति। तथा
ब्रह्मणस्पतये हविः पुरोडाशादिकं कृणुष्व कुरु। यथा त्वं सुभगः शोभनधनो असि सि भव। अस्तेर्लेट्यडागमः। ब्रह्मणस्पतेर्यागेन त्वं
शोभनो धनो भविष्यसीति यावत्। अपि च वयं ब्रह्मणस्पतेः अवो रक्षणं आ आभिमुख्येन वृणीमहे प्रार्थयामहे॥ ॥अथ तृतीया॥ स इज्जनेन स

द्वि·मा·७
॥३७४॥

विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः॥ देवानां यः पितरं माविवासति श्रद्धामना हविषा ब्रह्मणस्पतिं॥ ॥यो यजमानः श्रद्धा
मनाः अविवासति परिचरति। विवासतिः परिचरणकर्मा। स इत् स एव यजमानः जातेन सर्वेण लोकेन वाजमन्नं भरते बिभर्ति संभ
रति वा स एव विशा प्रजया आत्मीयेन बंधुजनेन वाजं भरते स एव पुत्रैरात्मीयैः अपुत्रे वाजे भरते यथा नृभिर्नेतृभिरन्यैः परिचारकैः
धनाधनानि भरते बिभर्ति संपादयति वा॥ ब्रह्मणस्पतिमित्थं वर्त्तो यजमानस्य सर्वतो जनाः अन्नधनयोः साधका भवंतीति यावत्॥
अथ चतुर्थी॥ यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः॥ उरुष्यतीमंहसो रक्षती रिषोंहोश्चिदस्मा उरुचक्रिरद्भु
तः॥ ॥यो यजमानः अस्मै ब्रह्मणस्पतये क्रियाग्रहणं कर्त्तव्यमिति॥ कर्मणः संप्रदानत्वाच्चतुर्थी। इमं ब्रह्मणस्पतिं घृतवद्भिः उपस्ति
रणाभिघारणात्मकेनाज्येनोपेतैर्हव्यैः हविर्भिः अविधत् परिचरति। विधविधाने तौदादिकः। अयं परिचरणकर्मसु पठितः। स तं य
जमानं ब्रह्मणस्पतिः प्राचा प्राचीनेनर्जुमार्गेण प्रणयति प्रकृष्टं फलं प्रापयति। अपि च ईमेनं अंहसः पापात् उरुष्यति रक्षति उरु
ष्यति रक्षाकर्मेति यास्कः। तथा रिषो हिंसकादेनं रक्षति अंहोश्चित् अदत्तेर्दारिद्र्यात् यद्वा आगसः हंतुः परिरक्षति। अपि चास्मै यजमानाय अ

श्रीः
॥३७४॥

ध्रीरभि वष्ट्योजसा॥ अग्नेरिव प्रसितिर्नाह वर्तवे यं यं युजं कृणुते ब्रह्मणस्पतिः॥ ॥सिंधुः स्यंदनशीलो नदीक्षोदो न क्षुद्यमानं कूलं य
था भिनत्ति तथा शिमीवान्। शिमीति कर्मनाम ब्रह्मणस्पतेः परिचरणात्मना कर्मणा युक्तो यजमानः ऋघायतो हिंसितः शत्रून् ओज
सा बलेन अभिवष्टि हंतुमिच्छति कामयते। वशकांतौ। इदमपरं निदर्शनं। वृषेव वृषभो वध्रीन्वधा यानि ष्पिष्टमुष्का निर्वीर्या बलीवर्दाः तान्
वृषा सेचनसमर्थः सर्वीयविषभानि भवति। तद्वच्छत्रून् अभिभवतीत्यर्थः। अपि चासौ अग्नेरिव प्रसितिः प्रसीयते बध्यते अनयेति ज्वा
लाषिञ् बंधने करणे क्तिन्। यथा अग्नेर्ज्वाला अप्रतिहतप्रसरा एवमपि नो वर्त्तवे वारयितुं वा नृच शक्यते। अह इति शब्दो वधारणो। वृ निवर्तयितुं
पोतेरंतर्भावितण्यर्थात्वर्तेः वर्तितुमर्थे तवेप्रत्ययः। अन्यद्गतं॥ ॥अथ चतुर्थी॥ तस्मा अर्षति दिव्या असश्चतः स सत्वभिः प्रथ
मो गोषु गच्छति॥ अनिभृष्टतविषिर्हंत्योजसा यं यं युजं कृणुते ब्रह्मणस्पतिः॥ ॥तस्मै यजमानाय दिव्या दिवि भवा वृष्टिलक्षणा आ
पः असश्चतः असज्यमानाः अनिरुध्यमानाः सत्यः अर्षंति गच्छंति प्राप्नुवंति। अर्तेर्लेटि रूपं। तथा स यजमानः सत्वभिः सत्व
नः सादरा परिचारकाः तैः सहितः प्रथमो अन्येभ्यो यजमानेभ्यः पूर्वभावी सन् गोषु गच्छति गवादिधनं प्राप्नुवंतीत्यर्थः। किंच अ

ह्रुतः महन्नामेतत्। आचार्यैर्ष्टुतो महान् ब्रह्मणस्पतिः उरुचक्रिः उरो विस्तीर्णोपकारस्य कर्ता भवति॥ ॥इति द्वितीयस्य सप्तमे पंचमो वर्गः॥ १
इमा गिर इति सप्तदशर्चं पंचमं सूक्तं गृत्समदपुत्रस्य कूर्मस्यार्षं गृत्समदस्यैव वा त्रैष्टुभमादित्यदेवताकं। तथा चानुक्रांतं। इमा गिरः सप्तू
नाकूर्मो गार्त्समदो हि वादित्यमिति। सूक्तविनियोगो लैंगिकः। आदित्यदेवताकपशो पुरोडाशस्य इमा गिर इत्येषानुवाक्या। अग्नीषोमा वि
तिखंडे सूत्रितं। इमा गिर आदित्येभ्यो घृतस्नूः स्तुत आदित्य उरवो गभीरा इति॥ ॥सैषा सूक्ते प्रथमा॥ इमा गिर आदित्येभ्यो घृतस्नूः स
नाद्राजभ्यो जुह्वा जुहोमि॥ शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः॥ ॥आदित्येभ्यः अदितेः पुत्रेभ्यः राजभ्यः
ईश्वरेभ्यो वा मित्रादिभ्यः घृतस्नूः घृतप्रस्नाविनीः घृतं क्षरंतीः इमा गिरः स्तुतिलक्षणा वाचः सदा सर्वदा जुह्वा वाङ्नामैतत् वा
गिंद्रियेण जुहोमि प्रयछति करोमीति यावत् यद्वा जुह्वा स्रुचानीये घृतं क्षरंति वा यूपाणि हवींषि जुहोमि आदित्यानुद्दिश्य यजामि
मंत्राणां पयो घृतादिलक्षणाहेतुत्वं च पयद्वचो धीते पयसः कुल्या अस्येत्यादिना तैत्तिरीये स्पष्टमाम्नातं। नास्मदीयाः स्तुतिगिरः मि
त्रादयः प्रत्येकं स्पृणवंति। ते च तैत्तिरीये अष्टौ पुत्रासो अदितेरित्युपक्रम्य स्पष्टमनुक्रांताः। मित्रश्च वरुणश्च धाता चार्यमा च

अंशश्च भगश्चइंद्रश्च विवस्वांश्चेतइति। मित्रः प्रमीतेस्त्रायकः यद्वा सर्वेषां स्निग्धः। अरीन्यच्छति अर्यमा। भगो भजनीयो देवः।
तुवीति बहुनाम। बहुप्रदेशोद्भुतुयहार्यथाउर्द्धतः वरुणा विशेषणमेतत्। पापस्यनिवारणाद्वरुणाः एतच्चांशो विशेषणं पूर्वोक्तिरेव
पञ्चो इमं स्तोम मित्येषा वपायागस्य याज्या। सूत्रितं च इमं स्तोमं सक्रतवो मे अद्येति स्तोम् भूमीर्धारयन्निति॥ सेषा सूक्ते द्वितीया॥ ॥इ
मं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषंत॥ आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः॥ ॥इमममस्मदी
यं स्तोमं स्तोत्रं सक्रतः समानकर्माणः समानप्रज्ञा वा मित्रादयः अद्येदानीं जुषंतां सेवंतां कीदृशास्ते आदित्यासः अदितेः पुत्राः शु
चयो दीप्यमाना धारपूताः उदकधाराभिरिव पूताः निर्मला इति। अवृजिनाः वृजिना अवर्जेतारः सर्वाननुग्रहका इत्यर्थः। अनवद्याः
अवद्येन गर्ह्येण पापेन रहिताः अरिष्टाः केनाप्यहिंसिताः॥ ॥तस्मिन्नेव पञ्चेत आदित्यासइतिह विषोनुवाक्या सूत्रितं तु पूर्वमेवोदा
हृतं॥ ॥सेषा सूक्ते तृतीया॥ त आदित्यास उरवो गभीरा अदब्धासो दिप्संतो भूर्यक्षाः॥ अंतः पश्यंति वृजिनोत साधु सर्वं राजभ्यः पर
माचिदंति॥ ॥त आदित्यासः अदितेः पुत्राः उरवो महांतो गभीराः गांभीर्योपेताः अदब्धासः शत्रुभिरहिंसिताः संतः दिप्संतः शत्रून्

यितारो रक्षकाः दीर्घाधियः कर्माणि ज्ञानानि वा येषां तादृशाः। अन्येषामपि दृश्यत इति पूर्वस्य दीर्घः। असुर्यं असवः प्राणाः तेन च तद्धे
तुभूताः अपो लक्ष्यंते। अपां तद्धेतुत्वं च छंदोगैः स्पष्टमाम्नातं। आपोमयः प्राण इति। असुमुदकं ददातीत्यसुरो मेघः तत्र भवं मेघो
दर्वर्तमानमुदकं रक्षमाणाः तत्तत्काले वृष्ट्यर्थं ददाना यरक्षंतः असुरशब्दाद्भवे छंदसीति यत्। ऋतावानः सत्यवंतो यज्ञवंतो वा
छंदसीवनिपाविति मत्वर्थीयो वनिप्। पूर्ववद्दीर्घः। ऋणानि स्तोतृभिः अन्येभ्यः प्रदेयानि चयमानाः अपगमयंतः व्यपगतो
भौवादिकोनुदात्तेत्। एवंगुणविशिष्टाय हानुवा अस्मदधीना भवंत्विति शेषः॥ ॥अथ पंचमी॥ विद्यामादित्या अवसो वो अस्य
यदर्यमन्भय आ चिन्मयोभु॥ युष्माकं मित्रावरुणा प्रणीतौ परिश्वभ्रेव दुरितानि वृज्यां॥ ॥हे आदित्याः अदितेः पुत्राः वो युष्मा
कं अस्यावसः कर्मणि षष्ठी। इदं रक्षणं विद्याम लभेयं। भये राक्षसादिभ्यः आगते सतीति यद्यप्यदीयं रक्षणं। विद्याछब्दार्थेमा वि
यामुभयस्य सुखस्य भावयितृत्वात्। तदिदं लभेयेत्यन्वयः। हे अर्यमन् हे मित्रावरुणौ युष्माकं प्रणीतौ अस्मद्विषये प्रेरणेन नया
न सति श्वभ्रेव श्वभ्राणीव स्थातुमयोग्यानि गर्तवंति स्थलानीव दुरितानि पापानि परिवृज्यां परिसर्जेयं। वृजी वर्जने। बहुलं छंदसीति

विकरणस्य लुक्॥ ॥इति द्वितीयस्य सप्तमे षष्ठो वर्गः॥ ॥अथ षष्ठी॥ ॥सुगो हि वो अर्यमन्मित्र पंथा अनृक्षरो वरुण साधुरस्ति॥
तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहंतु शर्म॥ ॥अर्यमन् मित्रावरुणौ वो युष्माकं सुखेन गंतव्यः। अनृक्षरः ऋक्षरः कंट
कः ऋच्छतेररिति। तद्रहितः साधुः साधकः शोभनो वा एवंगुणविशिष्टः पंथा मार्गोस्ति विद्यते। खलु अतस्तेन पथा अस्मान् शोभनं
नयतेति शेषः। हे आदित्याः नोस्माकं अधिवोचत अधिवचनं पक्षपातेन वचनं कुरुत। अपि नोस्मभ्यं दुष्परिहंतु विनाशयितुमशक्यं
शर्म सुखं यच्छत। दाण् प्रदाने। शपि पाघ्रेत्यादिना यच्छादेशः॥ ॥अथ सप्तमी॥ पिपर्तु नो अदिती राजपुत्राति द्वेषांस्यर्यमा सुगेभिः। बृह
न्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः॥ ॥राजपुत्राः राजानो राजमाना मित्रादयः पुत्रा यस्याः तादृशी अदितिरदीना
अखंडनीया वा देवी नोस्मान् द्वेषांसि द्वेष्टृणि रक्षांसि अति पिपर्तु अति पारयतु अतिक्रम्य तद्रहितं देशं प्रापयत्वित्यर्थः। अर्यमा
च सुगेभिः सुखेन गंतव्यैर्मार्गैरस्मान्पारयतु। अपि च वयं पुरुवीराः बहुभिर्वीरैः पुत्रादिभिरुपेता अरिष्टाः केनाप्यहिंसिताश्च संतः
मित्रस्य वरुणस्य च बृहत् परिवृढं शर्म सुखं उपस्याम उपगता भवेम। पूर्वोक्तेष्टौ तिस्रोष्टमीरिति पुरोडाशस्य याज्यास्तत्र पूर्वमेवोदाहृतं॥ ॥

सेषा सूक्तेऽष्टमी ॥ ॥तिस्रो भूमीर्धारयंत्रीँरुत द्यूंत्रीणि व्रता विदथे अंतरेषां ॥ ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥ ॥ति
स्रो भूमीः अत्र भूमिशब्दो लोकत्रये वर्तते । यो द्वितीयस्यां तृतीयस्यां पृथिव्यामित्यत्र यथा पृथिवीशब्दः भूम्यंतरिक्षस्वर्गास्त्रीन्
लोकान् वृष्टिप्रदानादिना धारयंति उत अपि च द्यून् दीप्तान् तत उपरितनान् महरादिकानपि त्रीन् लोकान् धारयंति । यद्वा दीप्तान् अग्निं वायुं
सूर्यं च धारयंति । अपि च एषामादित्यानां विदथे यज्ञे अंतर्मध्ये त्रीणि व्रतानि सवनत्रयनिष्पाद्यानि त्रीणि कर्माणि संति । यद्वा एषां लोकानां अंतर्म
ध्ये विदथे यज्ञनिमित्तभूते सति एषामादित्यानां त्रीणि कर्माणि रसानां धारणविसर्जनलक्षणानि संति उत्तरोर्धर्चः प्रत्यक्षकृतः । हे आ
दित्याः ऋतेन सत्येन यज्ञेन वा महि महत् प्रभूतं वो युष्माकं महित्वं यन्महाभाग्यं हे अर्यमन् वरुण मित्र तन्महाभाग्यं चारु शोभनं सर्वोत्कृ
ष्टमित्यर्थः ॥ ॥अथ नवमी ॥ त्री रोचना दिव्या धारयंत हिरण्ययाः शुचयो धारपूताः ॥ अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्या
य ॥ ॥त्री रोचना त्रीणि रोचनानि रोचमानानि त्र्याणि तेजांसि दिव्या दिव्यानि दिवि भवानि धारयन् आदित्याः हिरण्ययाः हिरण्यालंकृ
तसर्वांगाः यद्वा हितरमणीयवेषाः शुचयो दीप्यमानाः धारपूताः उदकधारया क्षालिता इव निर्मलाः अस्वप्नजः अस्वप्नजाः स्वमाः सु
पांसुलुगिति जसः सुः अपर आह । अस्वप्नजः असंजातस्वप्नाः विगतनिद्राः स्वपितृषोर्नजिङिति नजिङ् प्रत्यय इति तदंतस्य

श्री
॥३७७॥

११

साग्निचिसे

दंभितुं हिंसितुमिच्छंतः । दंभु दंभे अस्मादिच्छायां सनि सनीवंतर्धेति इडभावपक्षे दंभ इच्छ इतीकारः । दंभेर्हलग्रहणस्य जातिवाचकत्वात् सि
ध्यमिति सनः कित्वं अनुनासिकलोपः । तथा भूर्यक्षाः बह्वक्षाः बहून्यक्षाणि चक्षूंषि येषां ते तथोक्ताः बहुतेजसो वा बह्वक्षी हो सक्थ्यक्ष्णोः स्व
संसमासांतः । एवंभूता आदित्याः अंतर्मध्ये प्राणिनां हृदि प्रेरकतया वर्तमानाः संतः वृजिना वृजिनानि पापानि उत अपि च साधु साधू
नि पुण्यानि च प्राणिभिः शेश्छंदस्येकादिलोपः पश्यंति जानंति परमा चित् परमाणि दूरदेशावस्थितान्यपि सर्वं सर्वाण्यपि दृश्यमानि र
जभ्यः राज्ञामीश्वराणामादित्यानां अंति अंतिके समीपे वर्तत इति शेषः । कादिलोपो बहुलमिति शब्दस्य कादिलोपः । उक्तो दीक्षणी
यायां आदित्ययागस्य धारयंत इत्यादिके द्वे आज्यानुवाक्ये । अत एव भुवनवद्भुवनपतिविशिष्टादित्ययोगे पि तथा च दीक्षणीयायामि
ति खंडे सूत्रितं । धारयंत आदित्यासो जगत्स्था इत्येते भुवनपतिमत्यावेति ॥ ॥तयोराद्या सूक्ते च तुर्थेषा ॥ धारयंत आदित्यासो जगत्स्था
देवा विश्वस्य भुवनस्य गोपाः ॥ दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥ ॥जगज्जंगमं स्थाः स्थावरं च तिष्ठतेः
कर्तर्यपुन एतदुभयविधं भूतजातं धारयंतः अवस्थापयंतः देवाः दानादिगुणयुक्ताः विश्वस्य भुवनस्य सर्वस्य लोकस्य गोपाः गोपा

कारस्य नाभिमतं। अनिमिषाः निमेषरहिताः अदब्धाः असुरादिभिरहिंसिताः उरुशंसाः उरुभिर्बहुभिः शंसनीयाः स्तोतव्याः ए
वंगुणविशिष्टा धारयंते इत्यन्वयः॥ ॥अथ दशमी॥ त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्त्ताः॥ शतं नो रास्व शरदो वि
चक्षेऽश्यामायूंषि सुधितानि पूर्वा॥ ॥हे असुर शत्रूणां क्षेपक वरुण त्वं विश्वेषां सर्वेषां राजासि। केषां ये च देवाः देवजनाः। ये च म
र्त्ताः मरणधर्माणो मनुष्यास्तेषामित्यर्थः। अतस्त्वं नोस्मभ्यं शतं शरदः शतसंख्याकान् वत्सरान् विचक्षे विशेषेण दर्शनाय रा
स्व प्रयच्छ। रादाने व्यत्ययेनात्मनेपदं। वयं च पूर्वा पूर्वैः सुधितानि सुष्ठु तानि हितानि शतसंवत्सरलक्षणान्यायूंषि अश्याम व्याप्नुया
म। सुधितवसुधितानमधित धिषुधिषीयच्चेति निपात्यते। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। पूर्वासु पांसुलुगिति तृतीया
या जादेशः॥ ॥इति द्वितीयस्य सप्तमे सप्तमो वर्गः॥ ॥आदित्यदेवताके पड्क्तौ न दक्षिणेत्येषा हविषो याज्या। तिस्रो भूमीर्धारयन्त्री
रुत द्यून्न दक्षिणा विचिकेते न सव्येति॥ ॥सैषा लेकादशी॥ ॥न दक्षिणा विचिकिते न सव्या न प्राचीनमादित्या नोत पश्चा॥ पाक्या चि
द्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्यां॥ ॥हे आदित्याः दक्षिणा दक्षिणो विभागः न विचिकिते मया न विज्ञायते। उभयथा

सुपांसुलुगिति सो रावादेशः॥ तथा प्राचीनं पुरस्तादपि न विज्ञायते। विभाषांवेरदिक्स्त्रियामिति स्वार्थे खः॥ उतापि च पश्चात्
पृष्ठभागमपि न ज्ञायते। नेत्रेण तमसा आवृतत्वात्। आंतरादज्ञानाद्वापश्च पश्चात् पतन्तु छंदसीति निपात्यते। किं बहुना पा
क्याचित्। पाक्यः पक्तव्यो ऽपरिपक्वज्ञानो ऽपि। डुपचष पाके। उभयत्र सुपांसुलुगित्याकारः। हे वसवो वासयितारः आदित्याः
युष्मानीतः युष्मानीतिः त्रो ऽभनेन मार्गेण प्रापितः सन् अभयं भयरहितं ज्योतिः षोंतरं तेजः आंतरं वाज्ञानाकं अश्यां प्राप्नुयां॥ ॥
अथ द्वादशी॥ यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयंति पुष्टयश्च नित्याः॥ स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः॥ १२
यो यजमानः राजभ्यो राजमानेभ्यः ऋतनिभ्यः ऋतस्य सत्यस्य वा नेतृभ्यः आदित्येभ्यो ददाश चरुपुरोडाशादिकं ददाति। यं यज
मानं पुष्टयः पोषका नित्याः शाश्वताः आदित्याश्च वर्धयंति स यजमानो रेवान् धनवान् प्रथमः प्रथितः प्रख्यातः वसुदावा वसूनां
धनानां दाता सन् प्रशस्तः सर्वैः प्रशस्यमानः विदथेषु वेद्येषु लब्धव्येषु गृहेषु रथेन वाहनेन याति गच्छति॥ ॥अथ त्रयोदशी॥
शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः॥ न किष्टं घ्नंत्यंतितो न दूराद्य आदित्यानां भवति प्रणीतौ॥ ॥स यजमानः

नशान्माभिमुख्येन व्याप्नुवंतु॥ ॥अथपंचदशी॥ उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन्। उभा क्षयावाजयन्या
ति पृत्सूभावर्धौ भवतः साधू अस्मै॥ ॥य आदित्यानां भवति प्रणीतौ द्वितीयं व्यवहितोप्युत्तरेदं शब्देन परामृश्यते। अस्मै यजमानाय
समीची संगच्छमाने उभे द्यावापृथिव्यौ पीपयतः प्याययतः कामान् वर्धयतः प्यायी वृद्धौ। अस्माण्ण्यंताच्छांदसो लुङ् व्यत्ययेन तस
स्तामादेशाभावः। धातोः पी भावश्च। स वसु भगः शोभनधनः दिवो द्युलोकादागतां वृष्टिं पुष्यन् वर्धयन् भवति। नामेति प्रसिद्धिर्द्यो
त्यते। किंच पृत्सु पृतनासु संग्रामेषु अजनयन् शत्रूणामभिमुख्येनाभिभवन्। उभा क्षामामा उभौ निवासौ क्षियंति निवसंत्यास्मि
न्निति क्षयो निवासस्थानं आत्मना अपकृतं परकीयं निवासस्थानं च याति गच्छति। तथास्मै यजमानाय उभावर्धौ जागतो भागौ
चराचरात्मकौ मसृणौ सर्वात्मकौ वा साधू साधकौ भवतः॥ ॥अथ षोडशी॥ ॥या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे वि
चृत्ताः। अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्स्याम॥ ॥हे यजत्राः यष्टव्या आदित्याः वो युष्माकं या मायाः अभिद्रुहे अभि
तो द्रोहं कुर्वते राक्षसादये निर्मिताः। ये च पाशाः रिपवे शत्रवे विचृत्ताः वृती हिंसाग्रंथनयोः प्रसारिता इत्यर्थः। तान् पाशान्मा

याश्वरथेन अतियेषं अतीत्य प्रयतेयं अतितारयामीत्यर्थः। तत्र दृष्टांतः। अश्वीव यथा शोभनाश्वः कश्चिद् दुस्तरान् मार्गान् शीघ्र
मतिक्रामति तद्वत्। येषृ प्रयत्ने भौवादिको नुदात्तेत्। छांदसो लङ् व्यत्ययेन परस्मैपदं तथा वयं अरिष्टाः शत्रुभिरहिंसिताः संतः उ
रौ विस्तीर्णे शर्मन् शर्मेति गृहनाम त्वया दत्ते सुखे गृहे वा आसमंतात् स्याम वर्तमाना भवेव॥ ॥अथ सप्तदशी॥ माहं मघोनो वरुण
प्रियस्य भूरिदाव्न आ विदं शूनमापेः। मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥ ॥हे वरुण मघोनो धनवतः प्रियस्या
नुकूलस्य भूरिदाव्नो भूरेर्बहुलस्य दातुराप्यस्याहं मा। अविदं आवेदयामि आवेदनं विज्ञापनं माकरवाणि। किं तदनावेद्यं। आ
पिर्ज्ञातिः शूनं शून्यं दारिद्र्यं वर्णलोपश्छांदसः। यद्वा शूनं गतं गतं प्राप्तदारिद्र्यं टुओश्वि गतिवृद्ध्योः श्वीदितो निष्ठायामितीण्णि
षेधः। यजादित्वात् संप्रसारणं। उदितं श्वेति नकारः। तृषादित्वादाद्युदात्तत्वं। एतदुक्तं भवति। अस्मदीयाः पुत्रादयः क्षुधिता इति।
प्रभुप्रभुसमीप्य धौ भियया च मानो मा भूवमिति। हे राजन् सुयमात् सुष्ठु नियम्यते गतेन पुरुषाग्रह इति सुयमः ईषद्दुःसु
षु इति खल् तादृशात् तादृशात् रायो धनान्माव स्थां अव युतस्थितो मा भूवं वयं सुवीराः शोभनपुत्राः विदथे यज्ञे गृहे वर्तमानाः

द्वि॰भा॰७
॥३८०॥

संतो बृहत्प्रौढस्तोत्रं वदेम उच्चारयाम॥ ॥इति द्वितीयस्य सप्तमे ऽष्टमो वर्गः॥ ॥इदमित्येकादशर्चं षष्ठं सूक्तं। अत्रानुक्र-
म्यते। इदमेकादश वारुणमिति। पूर्वसूक्ते कूर्मो गार्त्समदो हि वेत्युक्तत्वादस्योत्तरस्य च कूर्मो गार्त्समदो वा ऋषिः। त्रिष्टुप्छं-
दः वरुणो देवता॥ विनियोगो लैंगिकः। अत्र केचिदाहुः। इदमेकादशर्चं तु वारुणं भयपापनुत्। तृणाद्दारिद्र्यदुःस्वप्न-
नाशनं वेति सुश्रमेति॥ ॥तत्रैषा प्रथमा॥ इदं कवेरादित्यस्य स्वराजो विश्वानि सांत्यभ्यस्तु मह्ना। अति यो मंद्रो यजथा-
य देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः॥ ॥कवेः क्रांतदर्शिनः। आदित्यस्य अदितेः पुत्रस्य स्वराजः स्वयमेव राजमानस्य
ईश्वरस्य वारुणस्येदं हविः स्तोत्रं वा यजमानः करोतीति शेषः। स च विश्वानि सर्वाणि सांति द्वितीयभावविकारभांजि भू-
तजातानि मह्ना महिम्ना च तत्प्रसादाल्लब्धेन अभ्यस्तु अभिभवतु। यो देवो द्योतमानो वरुणः यजथाय यष्टृपुरुषाय अ-
तिशयेन मंद्रः स्तुत्यो हर्षयिता वा भवति। तस्य भूरेः भर्तुर्वरुणस्य सुकीर्तिं शोभनां स्तुतिं भिक्षे प्रार्थये। यद्वा वरुणस्येति
तृतीयार्थे षष्ठी। तेन वरुणेन दातव्यां शोभनां कीर्तिमहं याचे॥ ॥अथ द्वितीया॥ तव व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः॥

श्रीः
॥३८०॥

१४

शुचिर्दीप्यमानः शुभ्रो वा अदब्धः सपत्नैरबाधितः क्षयवयाः प्रभूतान्नः सुवीरः शोभनपुत्रः असन्नः सूयवसाः शोभन
सस्यान्यपः वृद्धिलक्षणान्युदकानि उपक्षेति उपनिवसति सर्वदा सुसस्यानां अपां समीपे निवसतीत्यर्थः। त्वयान किर्नचा-
यं घ्नंति हिंसंति अंतितो न अंतिकात् समीपदेशाच्च दूरादि प्रकृष्टाद्देशादागता बाधकाः। अंतिकस्य तसिलादिलोपइति लोपः।
यो यजमानः आदित्यानां अदितेः पुत्राणां मित्रादीनां प्रणीतौ प्रकृष्टेन यानप्रापणे भवति वर्तते वर्त्तते इति पूर्वत्रसंबंधः॥ ॥अथ
चतुर्दशी॥ अदिते मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः। उर्वश्यामभयं ज्योतिरिंद्र मा नो दीर्घा अभि नशंतमिस्राः॥ ॥
उत अपि च हे अदिते मित्र वरुण आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्यामंत्रितस्याविद्यमानवद्भावात् सर्वेषां षाष्ठिकमामं-
त्रितस्य आद्युदात्तत्वं यूयं प्रत्येकं मृळ अस्माकमुपरि दयां कुरुतेत्यर्थः। यत् यद्यपि वयं वो युष्माकं कच्चित् किंचिदागो पराधं
चकृम अकुर्म तथापि मृळतेत्यर्थः। हे इंद्र परमैश्वर्योपेत आदित्य उरु विस्तीर्णं अभयं भयरहितं ज्योतिस्त्वदीयं प्रकाशं ज्ञा-
नात्मकं वा अश्यां। अहं प्राप्नुयां दीर्घा विस्तीर्णास्तमिस्रास्तमसा युक्ता निशाः ज्योत्स्नातमिस्राशृंगिणेति निपातितो नोऽस्मान्माभि-

उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून्॥ ॥हे वरुण त्वा ध्यः शोभनाध्यानाः तुष्टुवांसः स्तुतावयं तव व्रते त्वदी
ये परिचरणाख्ये कर्मणि वर्तमानाः सुभगासः स्याम शोभनधना भवेम। अपि च गोमतीनां रश्मियुक्तानामुषसां उपायने उप
गमने सति अग्नयो न यथाग्नयोऽग्निहोत्रादिकर्मार्थं समिध्यंते एवमनु द्यून् अन्वहं हि तं जरमाणाः त्वां स्तुवंतो दीप्यमाना
भवेम॥ ॥अथ तृतीया॥ तव स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः॥ यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं
युज्याय देवाः॥ ॥हे प्रणेतः सर्वस्य जगतः प्रकर्षेण नेतः वरुणस्य पुरुवीरस्य शर्मन् शर्मणि सुखगृहे वा स्याम अदितेः पुत्रा
मित्रादयः परमपि छंदसीति परस्य षष्ठ्यंतस्य पूर्वांगवद्भावेनानुप्रवेशात्पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वं। अ
दब्धाः शत्रुभिरहिंसिताः एवंभूता हे देवाः यूयं नोऽस्मान् कृतापराधान् युज्याय सख्याय अभिक्षमध्वं अस्माभिः कृतमप
राधं सहध्वं॥ ॥अथ चतुर्थी॥ प्र सीमादित्यो असृजद्विधर्ताँ ऋतं सिंधवो वरुणस्य यंति॥ न श्राम्यंति न वि मुचंत्येते वयो न
पप्तू रघुया परिज्मन्॥ ॥विधर्ता सेतुरिव जलस्य धारयिता आदित्यो अदितेः पुत्रो वरुणः ऋतं विधारणहेतुमुदकं तं सं यद्वा

नदीनामुपदानभूतमुदकं सीं सर्वतः प्रासृजत् प्रकर्षेण सृष्टवान्। अणोः प्रगृह्यस्यानुनासिक इत्याकारः सानुनासिकः। तेन वरु
णस्य सिंधवः स्यंदनशीला नद्यो यंति गच्छंति प्रवहंति एते सिंधवः न प्रवहंति। श्राम्यंति। श्रमं न प्राप्नुवंति न विमुचंति। उपरता
न भवंति। अलस्ताः सर्वदैकरूपेण प्रवहंतीत्यर्थः। एतदेवोच्यते। वयो न वयः पक्षिण इव रघुया रघवः शीघ्रगामिनः परिज्मन् परि
ज्मनि भूम्यां पप्तुः पतंति। गच्छंति। पत्लृ गतौ। लिटुसि तनिपतीसोश्छंदसीत्युपधालोपः। स्थानिवद्भावात् द्विर्वचनादि। रघुया इ
त्यत्र सुपां सुलुगिति जसो याजादेशः॥ ॥अथ पंचमी॥ वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य। मा तंतुश्छेदि
वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः॥ ॥हे वरुण मत्सकाशात् रशनामिव रज्जुमिव आगः अहितानुष्ठानजनितं पापं वि
श्रथय शिथिलीकुरु विमोचयेत्यर्थः। ते त्वत्संबंधिनः ऋतस्योदकस्य पूर्णां खां नदीं खा इति नदीनाम तां ऋध्याम लभेमहि।
धियं कर्म वयतः संतन्वतो मे मम तंतुः कर्मसंततिः मा छेदि छिन्ना मा भूत् नैरंतर्येणेत्यर्थः। तथा ऋतोः समासिकालात् पुरा
पूर्वं अपसः कर्मणः मात्रा शरीरं प्राच्योदीच्यांगलक्षणं मा शारीः शीर्णं शिथिलं मा भूत्। शॄ हिंसायां। कर्मणि लुङ्। पुर ऋतो

नादस्येः सोरप्रकाशाद्वा प्रवसथानि प्रवासान्मागछन्नूसर्वदा गृहे वर्त्तमानः सूर्यं पश्यां। चिरकालंजीवेयमित्यर्थः। गमेर्लुङि
मंत्रे घसेति च्लेर्लुक्। तथा नोस्माकं जीवसे जीवनाय मृधो हिंसकान्न सुष्ठु वि शिश्रथ विश्लेषय बाधस्वेत्यर्थः॥ ॥अथाष्टमी॥
नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम। त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि॥ ॥हे वरुण पुरा पू
र्वस्मिन्काले ते तुभ्यं नमः नमस्कारप्रतिपादकं नम इति शब्दं मवादिष्म। उतापि च नूनमद्यापि ब्रवाम। उतापि च हे तुविजा
त प्रदेशेषु प्रादुर्भूत वरुण अपरं कालमागामिन्यपि काले नमः शब्दं ब्रुवाम उच्चारयाम। कस्मादिति चेदुच्यते। हे दूळभ दुर्दभि
तुं हिंसितुमशक्य डकारो दाशनाशच्छादनस्येति रेफस्योत्तरपदादेष्टुत्वं च। कि मिसेत् सदपूरणं। हि यस्मात् ते त्वयि पर्वते न
शिलोच्चय इव अप्रच्युतानि अन्यैः प्रच्यावयितुमशक्यानि व्रतानि कर्माणि विधारणानि श्रितानि आश्रितानि तस्मादित्य
र्थः॥ ॥अथ नवमी॥ पर ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजं॥ अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरु
ण तासु शाधि॥ ॥हे वरुण ऋणा ऋणानि पित्रादिभिः कृतानि अस्माभिर्देयानि परा सावीः परासुव पराचीनं प्रेरय। षू प्रेरणे।

धु छांदसो लङ्। अध अधुना मत्कृतानि मया निष्पादितानि ऋणानि परासुव। अपि च हे राजन् स्वामिन् वरुण अहमन्यकृतेन अ
न्यैरर्जितेन धनेन माभोजं भोगं मा लभेयं। किं कारणमिति तदुच्यते भूयसीः भूयस्यो बहुतराः उषसः अव्युष्टा इत् नु अव्युष्टा
एव अपरान्नेषु छाय ऋणानि चिंतयंतो मम व्युष्टा अव्युष्टकल्पा आसन्। हे वरुण तासूषःसु नोस्मान् जीवान् जीवनव
तः आ शाधि आ समंतात् अनुशिष्टान् कुरु ऋणान्यपाकृत्य भोगपर्याप्तं धनं प्रयच्छेदित्यर्थः॥ ॥अथ दशमी॥ यो मे राजन् युज्यो
वा सखा वा स्वप्ने भयं भीरवे मह्यमाह। स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान्॥ ॥हे राजन् वरुण मे मदीयो
युज्यो योजयन् समर्थः पित्रादिर्वा सखा यमानख्यातोन्यो बांधवो वा स्वप्ने दुःस्वप्नं द्विषंयं भीरवे भयशीलाय मह्यं आह ब्रूते तथा स्तेनश्चो
रो वा वृको वा प्यरण्यश्वा वा यो नोस्मान् दिप्सति जिघांसति। सनीवंतर्धेति विकल्पनादिडभावः। दंभेरच्चेतीत्वं। हे वरुण त्वं तस्मात् सर्वस्मा
दस्मात्पाहि रक्ष॥ ॥अथैकादशी॥ माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः॥ मा रायो राजन्त्सुयमादव स्थां बृहद्व
देम विदथे सुवीराः॥ ॥हे वरुण प्रियस्य भूरेर्धनस्य दातुर्धनवत आढ्यस्य पुरुषस्य पुत्रादेर्दौर्भिक्ष्यं अहं मा आ विदं मा अवे

दयानिद्रापयानि। हे राजन् सुष्टु नियामक धना त्वमा ह्वंवो भवन पुत्रः यज्ञे गृहे वा वर्त्तमानो प्रोदं स्तोत्रं उच्चारयामः॥ ॥इति
द्वितीयस्य सप्तमे दशमो वर्गः॥ ॥धृतव्रता इति सप्तर्चं सप्तमं सूक्तं गृत्समदस्यार्षं त्रैष्टुभं वैश्वदेवं। तथा चानुक्रांतं। धृतव्रताः
सप्त वैश्वदेवं इति गतो विनियोगः॥ ॥तत्र प्रथमा॥ धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः॥ शृण्वतो वो वरुण मि
त्र देवा भद्रस्य विद्वाँ अवसे हुवे वः॥ ॥हे धृतव्रताः धृतकर्माणः आदित्याः अदितेः पुत्राः इषिराः गमनशीलाः रवैरस्येषपी
याः स्वार्थं नीयावहे विश्वेदेवाः मदारे मत्तो दूरदेशे आगः स्हरिव रहसि अन्यैरज्ञातप्रदेशे सूरयत इति रहसूः व्यभिचारिणी
सा यथा गर्भं पातयित्वा दूरप्रदेशे परित्यजति तद्वत्। हे वरुण मित्र देवाः वो युष्मदीयस्य भद्रस्य युष्माभिः करणीयं श्रेयो विद्वा
न् जानन् अहं शृण्वतः। मत्कृतानि स्तोत्राणि श्रोत्रेण जानतो नं वो युष्मान् अवसे रक्षणार्थं हुवे आह्वयामि॥ ॥अथ द्वितीया॥
यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत॥ अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च॥ ॥हे देवाः
प्रमतिः प्रकृष्टा मतिर्यथा विनोदेः ता हृशाः पित्रादेः तादृशा अपि यूयमेव ओजो बलमपि यूयमेवापि च यूयं द्वेषांसि द्वेषि

७

रियत्र त्वस्कइति प्रकृतिभावः॥ ॥इति द्वितीयस्य सप्तमे नवमो वर्गः॥ ॥अथ षष्ठी॥ अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावो
नु मा गृभाय॥ दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे॥ ॥हे वरुण भियसं मत्तः सुष्ठु आ पो म्यक्ष अपगमय।
हे सम्राट् सम्यग्राजमान हे ऋतवः सत्यवत् यज्ञवन् वा वरुण मा मां अनु गृभाय अनुगृहाण। छंदसि शायजपीति श्नः शायजा
देशः। हृग्रहो र्भः छंदसि इति भत्वं। दामेव वत्सात् दोग्धा वत्सकाशात् बंधनीरज्जुं विमुंचति। तथा अंहः पापं मत्सकाशात् विमु
मुग्धि विमुंच मोचय छांदसः शपः श्लुः पृथक्कुरु। त्वदारे त्वत्तो दूरदेशे वर्तमान त्वदन्य इत्यर्थः। त्वत्तोन्यः कश्चित् निमिषश्चन निमेषस्या
पि अक्षिपक्ष्मचलनस्यापि न हि ईशे न त्वेव त्वमेव ईश्वर इत्यर्थः। लोपस्त आत्मनेपदेष्विति तलोपः॥ ॥अथ सप्तमी॥ मा नो व
धैर्वरुण ये त इष्टावेनः कृण्वंतमसुर भ्रीणंति॥ मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः॥ ॥हे वरुण नो अस्मा
न् वधैः हननसाधनैः मा हिंसीरिति शेषः। हे असुर पापकृतां निरसितः ते त्वदीये इष्टौ यज्ञे एनः अविहितानुष्ठानेन जनितं
पापं कृण्वंतं कुर्वंतं पुरुषं वधैः भ्रीणंति हिंसंति ते इति पूर्वत्र संबंधः। भ्रीष हिंसायां क्र्यादिकः। अपि च ज्योतिषगृहे वर्त्तमा

रक्षःपिशाचादीनि सन्तु तस्मिंश्च युयं अंतर्हितनामैत तत्त्वं अंतर्हिते प्रदेशे युयोत युयोत पृथक्कुरुत। यु मिश्रणामिश्रणयोः छांदसः। शपः
श्लुः पूर्ववत्तबादेशः। अभिक्षत्तारः शत्रूणां हिंसितारो यूयं अभिचक्षमध्वं अभिभवत शत्रून् अद्यास्मिन् दिने नोस्मान्मृळयत। सुख
यत। अपरं च अपरमपि कालं अगामिन्यपि कालेऽस्मान्मृळयत॥ ॥अथ तृतीया॥ किमू नु वः कृणवामापरेण किं सनेन वसव आ
प्येन॥ यूयं नो मित्रावरुणादिते च स्वस्तिमिंद्रामरुतो दधात॥ ॥हे देवाः वो युष्माकं नु अद्येदानीं किमु कृणवाम किं खलु कर्तुं शक्नवाम न
किमपीत्यर्थः। तथा अपरेण अपरकालभाविना कर्मणा किं कर्तुं शक्ताः। तथा हे वसवो वासयितारो देवाः सनेन सनातनेन आप्येन।
आप्तव्येन कर्मणा युष्माकं कर्तुं शक्ताः सर्वदापि युष्मदनुगुणं परिचरणं कर्तुं न शक्ताः इत्यर्थः। हे मित्रावरुणौ हे अदिते हे इंद्र मे मरुतः
इंद्रावति पूर्वपदस्यानङ्। सर्वे यूयं स्वस्ति अविनाशं नोऽस्मभ्यं दधात धत्त प्रयच्छत। लोटि तस्य तबादेशः। डु॰ श्नाभावेनातो लोपाभा
वः॥ ॥अथ चतुर्थी॥ हये देवा यूयमिदापयस्थ ते मृळत नाधमानाय मह्यं॥ मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म॥ १२
हये देवाः छांदसो वर्णोपजनः हे देवाः यूयमित् यूयमेव आपयः धनस्य प्रापयितारो बंधवः स्थ भवथ ते यूयं नाधमानाय

द्वि·भा·७
।।३८४।।

अभिमतंफलंयाचमानायमह्यंस्तोत्रेमृळयतसुखयत।तयावोयुष्माकंरथःकृतेअस्मदीयेयज्ञेनिमित्तभूतेमध्यमवाट्माभूत्
मंदगमनेनवाहकोमाभूत्शीघ्रंयुष्मान्वहत्वित्यर्थः।वयंयुष्मावतःयुष्मत्सदृशोवापितृषुबंधुषुसत्सुमाश्रमिष्मश्रांतामाभूम
वतुप्प्रकरणेयुष्मदस्मद्भ्यांछंदसिसादृश्यउपसंख्यानमितिवतुप्।आसर्वनाम्नइत्यात्वं॥ ॥अथपंचमी॥प्रवएको
मिमयभूर्यागोयन्मापितेवकितवंशशास॥आरेपाशाआरेअघानिदेवामामाधिपुत्रेविमिवग्रभीष्ट॥ ॥हेदेवाःवोयुष्माकंम
ध्येअहमेकःसन्भूरिबहुलंआगःपापंप्रमिमयंअहंप्रकर्षेणाहिंसिषंकथमस्माकंमध्येत्वामवइतिचेदुच्यते।यद्यस्मात्मां
पितेवकितवंयथाअपथप्रवृत्तंपुत्रंपितानुशास्तितथाशशास।अनुशिष्टंचकर्थ।शासुअनुशिष्टावित्यनुशिष्टौलिटिमध्य
मस्यरूपं।अपिचहेदेवायुष्मदीयाःपाशाःआरेअस्मत्तोदूरदेशेसंतुअघानिपापानिआरेसंतुमामाअधिपुत्रेअधिः।सप्तम्यर्थे
नुवादी।पुत्रेपश्यतिसतिपितरंसंतंविमिवपक्षिणमिवव्याधः।माग्रभीष्टमागृहीध्वं।माङिलुङि।हृग्रहोर्भइतिभत्वं॥ ॥अथष श्रीः ।।३८४।।
ष्ठी॥अर्वांचोअद्याभवतायजत्राआवोहार्दिभयमानोव्ययेयं॥त्राध्वंनोदेवानिजुरोवृकस्यत्राध्वंकर्तादवपदोयजत्राः॥ ॥हेयजत्राः

आसां प्रथमः सर्गः प्राथमिकं जन्म किं याता कियति काले निष्पन्नं आकारः प्रश्ने किंशब्द आक्षेपे यावति काले ता अजायंत स
कालः कियान् किंपरिमाणं तस्य कालस्य सं किमपि नियाः एव हिता इत्यर्थः॥ ॥अथ द्वितीया॥ योवृत्राय सिनमत्राभरिष्यत्प्रतंज
नित्री विदुष उवाच॥ पथो रदंतीरनु जोषमस्मै दिवेदिवे धुनयो यंत्यर्थं॥ ॥यः पुरुषो वृत्राया सुराय सिनमन्नं अत्र पाकस्थाने
अहर्तुं अभरिष्यत् संपादितवान् तं पुरुषं जनित्री जनयित्री इंद्रस्य माता अदितिः विदुषे इंद्राय अभिज्ञाय प्रोवाच उक्तवती प्रवचनस्य
हननार्थत्वात्। तं वृत्रं हतवानिति शेषः। अपि च अस्मै अस्येंद्रस्यानुजोषमनुकामं इच्छामनुसृत्य पथो मार्गान् रदंतीः विलिखं
तीः धुनयो नद्यः दिवेदिवसं अर्थं अर्तव्यं समुद्रं प्रतियंति गच्छंति॥ ॥अथ तृतीया॥ ऊर्ध्वो ह्यस्थादध्यंतरिक्षेधा वृत्राय प्रवधं
जभार॥ मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिंद्रः॥ ॥हि हेतौ॥ यस्मादयं वृत्रः अंतरिक्षे ऊर्ध्वः सन् सर्वमावृत्य
ध्यस्थात्। अधितिष्ठतोभूत्। अधः अतः कारणात् वृत्राय वृत्रं प्रति बंधहननं साधनं वज्रं इंद्रः जभार प्रचिक्षेप उयाह
र्गः। स हि खलु वृत्रो मिहं वृष्टेः सेक्तारं मेघं वसान आच्छादयन् ईमेनमिंद्रं उपदुद्रोत् उपागमत्। द्रु गतौ। लङि छांदसः शपश्लुः॥

तिग्मायुधः तीक्ष्णायुधः इंद्रः शत्रुं शयितारं तं वृत्रं अजयत् जितवान्॥ ॥अथ चतुर्थी॥ बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो
असुरस्य वीरान्॥ यथा जघंथ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिंद्र॥ ॥हे बृहस्पते बृहतां परिवृढानां पालयितरिंद्र तपु
षा तापकेन दीप्तेन वज्रेण अश्नेव अशनिः इव वृकद्वरसः संवृतद्वारस्यासुरस्य वीरान् पुत्रान् युद्धे संवृतद्वारान् असुरस्य वी
रान् विध्य ताडय वृणोतेः सवृषि भृसृ शुषि मुषिभ्यः क्विदिति कर्मणि क्वन्प्रत्ययः। द्रु गतौ। अस्मादौणादिको असन्प्रत्ययः वृका
णि संवृतानि द्वाराणि येषां बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हे इंद्र पुरा चित् पुरापि धृषता धर्षकेण वज्रेण यथा ज
घंथ। त्वं हतवान् एव एवमेवास्माकं शत्रुं जहि नाशय हंतेर्जे इति जहि। जा देशः॥ ॥अथ पंचमी॥ अव क्षिप दिवो अश्मानमु
च्चा येन शत्रुं मंदसानो निजूर्वाः॥ तोकस्य साता तनयस्य भूरेरस्मा अर्धं कृणुतादिंद्र गोनां॥ ॥हे इंद्र दिवो नभसः सकाशाद्
दमानः अश्मवत् कठिनं वज्रं उच्चा उच्चैर्वर्तमानस्त्वं अवक्षिप। अस्मदीयान् शत्रून् उद्दिश्य चेत्स्यात् प्रक्षिप। येन वज्रेण मंद
सानः स्तोत्रैः स्तूयमानः सन् शत्रुं निजूर्वाः। न्यहिंसीः। जुर्वी हिंसायां इत्यर्थः। तथा हे इंद्र गोनां गवां संभजनाय चास्मान् अस्माकं

विभक्तिव्यत्ययः। अर्धं समृद्धिं कृणुतात् कुरु। गोपदांत इति गोशब्दस्य मोनुडागमः॥ ॥इति द्वितीयस्य सप्तमे द्वादशो वर्गः॥ ॥८
अथ षष्ठी॥ प्रहिक्रतुं वृहथो यं वनुथोरध्रस्य स्थो यजमानस्य चोदौ॥ इंद्रासोमा युवमस्माँ अविष्टमस्मिन्भयस्थे कृणुतमु लो
कं॥ ॥हे इंद्रासोमौ यं वैरिणं वनुथः हिंसथः। वनुष्यतिर्हिंसाकर्मेति यास्कः। तं क्रतुं द्वेषस्य कर्त्तारं प्रहित् हथः हिं प्रकर्षेणोद्
छथः खलु उन्मूलयथ इत्यर्थः। वृहू उद्यमने। तौदादिकः। तथारध्रस्याराधकस्य यजमानस्य चोदौ शातॄणां प्रेरकौ स्थो भवथः।
तथा हे इंद्रासोमौ युवं युवां अस्मां अविष्टं अवतं। अस्मिन्भयस्थे भयस्थाने युद्धे घञर्थे कविधानमित्यधिकरणे कप्रत्ययः।
मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। अस्मिन्युद्धे लोकं भयरहितं स्थानं कृणुतं कुरुतं। उ इति पूरणः॥ ॥अथ सप्तमी॥ न मा तमन्
न श्रमन्नोत तंद्रन्न वोचाम मा सुनोतेति सोमं॥ यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वंतमुप गोभिरायत्॥ ॥स इंद्रो मां न तम
त् तमत्वं न ग्लपयतु तथा न श्रमत् श्रांतं मा करोतु। तमु ग्लाने। श्रमु तपसि खेदे च। अनयोर्हेतुमण्यंयोर्लेट्यडागमः। छंदस्यु
भयथेति शप आर्धधातुकत्वाण्णेरनिटीति णिलोपः। अन्यत्पूर्ववत्। इंद्रयागाय सोमं मा सुनोत माभिषुणुतेति अन्यान्यजमानान् ॥३८६॥

श्री

२०

यष्टव्या देवाः अद्येदमवर्चो अस्मदभिमुखा भवत यो युष्माकं हार्दिं हृद्यं वसिष्ठः तं रक्षसां भयमानो बिभ्यदहं अव्यथेयं आभिमु
ख्येन प्राप्नुयां। व्ययगतौ भौवादिकः। हे देवाः वृकस्य तस्करस्य अररुषः अप्यस्तुनो वा संबंधिनः निजुरो निहननात्। जूरी हिंसार्थः। अस्म
त्संपदादिलक्षणो भावे क्विप्। द्धांरसोद्रुस्वः। नोस्मान् बाधं बाधयध्वं॥ ॥अथ सप्तमी॥ माहं मघोन इति व्याख्यातेयं॥ ॥इति द्वितीयस्य
सप्तमे एकादशो वर्गः॥ ॥ऋतं देवायेत्येकादशर्चमष्टमं सूक्तं गार्त्समदमैंद्रं जगती। शिष्टास्त्रिष्टुभः। प्रहिक्रतुमित्येषा ऐंद्रासोम
दैवताका सरस्वति त्वमस्मानित्यर्धर्चः सारस्वतः। यो नः सनुत्य इत्येषा बार्हस्पत्या। अंत्या मारुती। शिष्टा ऐंद्र्यः। तथा चानुक्रांतं। ऋतं सैका
दश जगत्यंतं षष्ठ्यैंद्रासोमी सरस्वति त्वमिति त्रिष्टुप् सरस्वतोर्धर्चो यो नो बृहस्पतिस्त्वं वो मारुत्या मारुतीति गतो विनियोगः॥ ॥तत्रै
षा प्रथमा॥ ऋतं देवाय कृण्वते सवित्र इंद्रायाहिघ्ने न रमंत आपः॥ अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसां॥ ॥ऋतमु
दकं वृष्टिलक्षणं कुर्वते देवाय द्योतमानाय सवित्रे सर्वस्य प्रेरकाय अहिघ्ने अहिंसं वृत्रं हतवते इंद्राय यागार्थं आपो न रमंते।
तस्माद्धेतोर्नित्यं नोपरता भवंति तस्माद्व्यत्ययेन चतुर्थी। अपि तु तासामपामक्तुः सेचकः स्नातः अहरहः प्रत्यहं याति गच्छति

प्रतिनवोचामनञ्चामावक्तेश्छंदसोलुङ्। सुनोतेर्यत्ततच्चनयनाश्चेतितस्यवादेशः। तस्यापित्त्वेनङित्त्वभावाद्गुणः। यइंद्रोमेम
मपृणात्कामान्पूरयेत्। यद्वदहत्अभीष्टंफलंददातु यश्चनिबोधात्अस्मदीयंस्तोत्रं यागंवाअवगछत्। यइंद्रःसुन्वंतंसो
ममभिषुण्वंति। माअस्मभ्यंदातव्यैःगोभिःसहउपायात्। उपागछेत्सइंद्रइतिपूर्वत्रान्वयः। प्रपादित्यादिषुलेट्याडागमः॥ ॥
अथाष्टमी॥ सरस्वतित्वमस्मां अविड्ढिमरुत्वतीधृषतीजेषिशत्रून्॥ त्यंचिछर्धंतंतविषीयमाणमिंद्रोहंतिवृषभंशंडिकानां॥ ॥
हेसरस्वतिदेवित्वंअस्मान्स्तोतॄन्अविड्ढिरक्षांरक्षार्थंसेवतेलेड्येतद्रूपं। तथामरुत्वतीमरुद्भिर्युक्तामध्यमस्थानाहि
वाक्सरस्वतीमरुतश्चमध्यमस्थानस्थाः अतस्तद्वतीःसतीधृषतीधर्षयंतीशत्रून्शातयितॄन्वैरिणाजेषिजये।जयतेः
छंदसःशपश्लुः। किंचायमिंद्रःत्यंचितमप्यसुरंहंतिहतवान्। व्यत्ययोऽर्थेनभूतार्थेलट्। कीदृशंशर्धंतंप्रहसनशीलं। शृधुप्र
हसने। तविषीयमाणंतविषीबलमिवाचरंतंसर्वस्यप्रजनेशक्तंशंडिकानांशंडामकोवसुरपुरोहितौशंडवंश्यानांमध्येवृष
भंप्रधानं॥ ॥अथनवमी॥ योनःसनुत्यउतवाजिघत्नुरभिख्यायतंतिगितेनविध्य॥ बृहस्पतआयुधैर्जेषिशत्रून्द्रुहोरिषंतं

द्वि·भा·७
॥३८७॥

परिधेहि राजन्॥ ॥हे बृहस्पते यो नोऽस्माकं सनुतइयंतर्हितनाम। अंतर्हितो देशे भवश्चौरैः सगर्भस्सप्रथसनुताद्यत। उतवा
अपिवाजघत्नुर्जिघांसुर्भवति तमभिख्याय संवीक्ष्यति। गितेन तीक्ष्णेनायुधेन विध्य ताडय तथाऽस्मदीयान् आयुधैरायोध
नधेमानैरिषोदिभिर्जेषि जय। तथा हे राजन् राजमान बृहस्पते द्रुहे द्रोग्ध्रे शत्रवे रिषंतं हिंसंतं परिधेहि परितो धारय प्रक्षि
पेत्यर्थः॥ ॥अथ दशमी॥ अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि॥ ज्योगभूवन्ननुधूपितासो हत्वी तेषामाभरा
नो वसूनि॥ ॥हे शूर शौर्यवन्निंद्र अस्माकेभिरस्माकीनैः सत्वभिः परेषां हिंसकैः शूरैः शौर्योपेतैः भटैः तानि वीर्याणि वीर्या
णि वीरकर्माणि कृधि। कुरु। यानि ते त्वया कर्त्वानि करणीयानि। कृत्यर्थे तवैकेन्केन्यत्वन इति करोतेस्त्वन्प्रत्ययः। ज्योक् चिरकालं अनुधू
पितासः धूप्यमानहृदया मदीयाः शत्रवो अभूवन् आसन्। हत्वी तान् हत्वा स्नात्व्यादयश्चेतीकारः। तेषां शत्रूणां वसूनि धनानि
नोऽस्मभ्यं आभर आहर॥ ॥अथैकादशी॥ तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनं॥ यथा रयिं सर्ववीरं नशाम
हा अपत्यसाचं श्रुत्यं दिवेदिवे॥ ॥हे मरुतः वो युष्माकं शर्धं बलं मारुतं मरुत्समूहरूपं दैवेनेंद्रेण संबद्धं जनं प्रादुर्भूतं एवंगुण

श्री
॥३८७॥

द्वि॰भा॰७
॥३८८॥

देशाः पनः पुमिति पुमागमः। कीदृशो वयः श्रवस्यवोन्नकामाः हृषीवंतः प्राप्तहर्षाः वनर्षदः वने वृक्षादौ निषण्णाः सांहितिकः छांदसो रेफो पजनः॥ ॥अथ द्वितीया॥ अध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुं॥ यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जंघ
नंत पाणिभिः॥ ॥हे सजोषसः समानप्रीयमाणाः देवासो देवाः अध अधुना नोस्माकं वाजयुं वाजमन्नकामयमानं गतिविशेषयुक्तं वा
रथं विक्षु प्रजासु जनेषु अभि अभिमुखं उदवत उद्गमयत। अवतिरत्र गत्यर्थः। यद्यदास्मिन्नर्थे युक्ता आशवो व्यापनशीलाः अश्वाः
पद्याभिः पाद्यसाध्याभिर्गतिभिः रजो रजकं मार्गं तित्रतः तरंतः तरतेः शतरि वि बहुलं छंदसीति शपः श्लुः बहुलं छंदसीत्यभ्यासस्य
त्वं। अभ्यस्तानामादिरित्याद्युदात्तत्वं। पृथिव्याः प्रथितायाः भूमेः सानौ समुच्छ्रिते प्रदेशे पाणिभिः पाण्युपलक्षितैः पादैर्जंघनंत अत्य
र्थं गत्यर्थे हंतेर्यङ्लुगंतात् छांदसो लङ्। व्यत्ययेनात्मनेपदं। बहुलं छंदसीति शपो लुगभावः॥ ॥अथ तृतीया॥ उत स्य न इंद्रो विश्व
चर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः॥ अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये॥ ॥उत अपि च विश्वचर्षणिः वि
श्वस्य सर्वस्य द्रष्टा। यद्वा विश्वचर्षणाय मनुष्याय स्व सपरिवारकाः अथवा विश्वे सर्वे लोकाश्चर्षणा यादृष्टव्या येन बहुव्रीहौ वि
श्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। मारुतेन मरुत्समूहरूपेण शर्धेन सह सुक्रतुः शोभनकर्मा शोभनप्रज्ञो वा स्यः स इंद्रः अवृ

श्री
॥३८८॥

काभिः हिंसकरहिताभिः ऊतिभी रक्षाभिः सहितः सन् दिवो द्युलोकादागत्य नु अद्य नोस्माकं रथं अनु स्थाति आनुगुण्येनाधिति
ष्ठतु। छांदसः शपो लुक्। किमर्थं महे सनये महते धनाय तथा वाजसातये वाजस्यान्नस्य सातये संभजनार्थं॥ ॥अथ चतुर्थी॥ उत
स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथं॥ इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती॥ ॥उत अपि
च स्यः स च देवो दानादिगुणयुक्तः भुवनस्य भूतजातस्य सक्षणिः संभजनीयः सेव्यः ग्नाभिः देवपत्नीभिः छंदांसि वै ग्ना इति तैत्तिरीय
कं गायत्र्यादीनि छंदांसि च देवपत्न्य इत्युक्तं सजोषाः समानप्रीतिः एवंगुणविशिष्टः त्वष्टा अस्मदीयं रथं जूजुवत् प्रेरयतु जुरति
सौत्रो धातुर्गत्यर्थः। अस्माण्ण्यंतात् लुङि चङि रूपं। तथा इळा तिसृणां देवीनां सद्योजात आख्या देवी च रथं प्रेरयतु बृहद्दिवा बृह
न्महद्दीव्यति द्योततइति बृहद्दिवः इगुपधलक्षणः कः सुपांसुलुगिति विभक्तेराकारः। तादृशो भगश्च प्रेरयतु उत अपि च रोदसी
द्यावापृथिव्यौ पुरंधिः पूषा पूषको देवश्च अध अपि चाश्विनौ पती सूर्याया भर्तारौ अश्विनौ च एते सर्वे अस्मदीयं रथं प्रेरयंत्विस्यर्थः॥ ॥
अथ पंचमी॥ उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजुवा॥ स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे॥ ॥

अपि वा सेते प्रसिद्धे वा दिव्यौ देवनशीले सुभगे शोभनधने मिथूदृशा मिथः परस्परं पश्यंत्यौ एवंभूते उषासानक्ता उषा रात्रिश्च
जगतां जंगमानां अपीजुवा प्रेरयित्र्यौ भवतः तस्मादस्मदीयमपि रथं प्रेरयतां। उत्तरोऽर्धर्चो द्यावापृथिव्योः प्रत्यक्षकृतः हे पृथिवि विवां
युवां त्वा दिवं च नव्यसी नवीयसा नवतरेण प्रशस्येन वचः वचसा सुपां सुलुगिति तृतीयाया लुक्। यद्यदा स्तुषे स्तुवे उत्तमस्य व्यत्य
येन मध्यमः तदानीं स्थातुः स्थावरस्य चरस्य व्रीह्यादेः संबंधि पयोन्नं च रुपुरोडाशादिलक्षणं त्रिवयवाः वय इत्यन्ननाम ओ
षधिपशुसोमात्मकानि हविर्लक्षणान्यन्नानि यस्य तादृशो॥ हउपस्तिरे उपस्तृणो आज्येनोपस्तरणाभिघारणपूर्वकं प्रयच्छा
मीत्यर्थः। स्तृञ् आच्छादने। लङि उत्तमे छांदसो विकरणस्य लुक्। अत्र त्यशब्दश्चपि इति निपातौ तत्र पादपूरणौ। न्वृत इत्येतौ रि
ती त्वं निपाते यद्यद्धिहंतेति निघातप्रतिषेधः॥ ॥अथ षष्ठी॥ उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्योऽज एकपादुत॥ त्रित ऋभु
क्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि॥ ॥उतापि च हे देवाः उशिजामिव इवेति संप्रत्यर्थीयः अस्मत्तः स्तुतिं काम
यमानानां शंसं स्तुतिं उश्मसि कामयामहि। वश कांतौ। इदंतो मसिः ग्रहिज्यादिना संप्रसारणं। छांदसो वर्णलोपः। उतापि च हे

विशिष्टं नमसा नमस्कारेण हविषा वा गिरा। स्तोत्रेण उपब्रुवे स्तौमि। यथा येन प्रकारेण वयं सर्ववीरं सर्ववीरैर्विशिष्टं शत्रूणां
प्रेरकैर्भटैरुपेतं अपत्यसाचं अपत्यैरपतनहेतुभूतैः पुत्रादिभिरुपेतं श्रवस्यं श्रवणीयं प्रशस्यं दिवेदिवे प्रतिदिवसं नशामहै व्या
प्नवाम नशतिर्व्याप्तिकर्मा नशाउ आगमः वैतोन्यत्रेत्यैकारः॥ ॥इति द्वितीयस्य सप्तमे त्रयोदशो वर्गः॥ ॥अस्माकमिति सप्तर्चं नवमं सूक्तं
गृत्समदस्यार्षं वैश्वदेवं अंत्या त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रांतं अस्माकं सप्त वैश्वदेवं त्रिष्टुबंतमिति विनियोगो लैंगिकः॥ ॥
तत्र प्रथमा॥ अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा॥ प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवंतो वन
र्षदः॥ ॥मित्रावरुणा हे मित्रावरुणौ आदित्यैः धात्रर्यमादिभिर्द्वादशभिः रुद्रैः एकादशसंख्याकैः वसुभिः धाराध्रुवइत्यादिभिर
ष्टसंख्याकैः एवं त्रिभिर्देवगणैः सचाभुवा सह भवंतौ। सह वर्तमानौ युवामस्माकं रथं अन्नलाभाय प्रवृत्तं अवतं यद्यदस्मदी
या रथा वनस्पतिरिव संयस्मिन्निविश्वसनिवासस्थलं उपादिको मनिन् तस्मात्स्थानात् उपरि देशांतरा संक्रम्यः प्रवध्य
र्थ इति मत्वं। अध्वर्थउपर्यमिति वृत्तिः वयो न पक्षिण इव प्रपप्तन् प्रपतंति प्रकर्षेण गच्छंति पतेश्छांदसे लुङि लृदित्वात् च्लेरङा

अहिर्बुध्न्यः बुध्नमंतरिक्षं तत्र भवो हीनादेवः अज एकपात् न जायत इत्यजः एक एव पद्यते गच्छतीत्येकपात् । अज एकपात्संज्ञकः
सूर्यैः त्रितः विस्तीर्णतमः ऋभुक्षाः उरुक्षयः उरुनिवासः ऋभूणां निवासयिता वा इंद्रः सविता सर्वस्य प्रसविता च नोऽन्नं दधे विदधा
तु अस्मभ्यं करोतु तया आ ऋहे माऽऽशीघ्रगामी हिगता वित्यस्मादन्येभ्योपि दृश्यंत इति मन्तिन्न् । ताहशः अपां नपात् अपां पौत्रीयस्था
नीयोऽग्निः अद्भ्य ओषधिवनस्पतयो जायंते । ओषधिवनस्पतिभ्यश्चायमग्निर्जायत इत्यग्नेरपांपौत्रत्वं । स च धिया स्तुत्या शमिष्ठा शमी
तिकर्मनाम यज्ञकर्मणि शीलितिस्म बलि ति शेषः । यद्वा धिया कर्मणास्मदीयेन परिचरणलक्षणेन शमिष्ठां सुखं तन्निमित्तं भवत्विति शे
षः ॥ ॥ अथ सप्तमी ॥ एता वो वः श्मुच्यता यजत्रा अजनक्षन्नायवो नव्यसे सं । श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अह धीतिमश्याः ॥ ॥
हे यजत्रा यजनीया विश्वे देवाः वो युष्मदीयानि एतानि उद्यता उद्यतानि वसांसि इमि कामयेन नव्यसे । नवतराय स्तुत्यतमाय युष्म
द्रूपाय आयवः मनुष्याः अस्मत्त तया मनुष्याः किमेतानि स्तोत्राणि समतक्षन् समस्कुर्वन् । किमिच्छंतः श्रवस्यवः श्रवणीयं यशोऽन्नं वा आत्म
न इच्छंतः वाजं बलं च चकानाः कामयमानाः कनन्दीप्तिकांतिगतिषु । लिटः कानच् नरथ्यो रथसंबंधी सप्तिः सर्पणशील इव स्वयुष्मद्गणः

धीतिं अस्मदीयं कर्म अश्याः प्राप्नोतु। अश्नू व्याप्तौ॥ ॥व्यत्ययेन परस्मैपदं मध्यमो बहुलं छंदसीति विकरणस्य लुक्॥ ॥इति द्वि-
तीयस्य सप्तमे चतुर्दशो वर्गः॥ ॥अस्य मे इत्यष्टर्चं दशमं सूक्तं गृत्समदस्यार्षं षष्ठ्याद्यास्तिस्रोऽनुष्टुभः शिष्टाः पंच जगत्यः प्रथमा
द्यावापृथिवीया ततो द्वे ऐंद्र्यौ त्वाष्ट्र्यौ वा ततो द्वे राकादेवत्ये द्वे सिनीवालीदेवत्ये अंत्या गुंग्वादिषड्देवताका। तथा चानुक्रांतं अ-
स्य मे षोळा जागतं अनुष्टुबंतं द्यावापृथिव्यैकाद्वे ऐंद्र्यौ त्वाष्ट्र्यौ वा द्वे द्वे राकासिनीवाल्योरंत्या लिंगोक्तदेवतेति। अभिप्लवके चतुर्थे
ऽहनि वैश्वदेवशस्त्रे आद्यस्तृचो द्यावापृथिवीयनिविद्धानः तथा च सूत्रितं। अस्य मे द्यावापृथिवी इति तिस्रस्तंतं मे अप इति वै-
श्वदेवमिति॥ ॥तत्रैषा प्रथमा॥ ॥अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः॥ ययोरायुः प्रतरं ते इदं पुर उप-
स्तुते वसूयुर्वां महो दधे॥ ॥द्यावापृथिवी हे द्यावापृथिव्यौ ऋतायतः ऋतं यज्ञमात्मन इच्छतः सिषासतः युवां संभक्तुमिच्छतः वचसः
वक्तीति वचाः स्तोता असुन् स्तोतुरस्य मम अवित्री अवित्र्यौ भूतं भवतं ययोर्द्यावापृथिव्योरायुरन्नं प्रतरं प्रकृष्टतरं सुसघत
इति शेषः। इदमिदानीं। ते द्यावापृथिव्यौ उपस्तुते तत्र तत्र स्थितैः स्तोतृभिः स्तुते वां युवां वसूयुः धनकामोऽहं महो महतः विभक्तिव्यत्ययः।

पीभावः। उगितश्चेति ङीप्। संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। असश्चतं। असक्तावयवां एवंभूतां धेनुं आ
वह आभिमुख्येन प्रापय। अपि च हे पुरुहूत बहुभिराहूतेंद्र त्वं सुवर्णं पद्याभिः पदगतिभिः आडंव्यापनशीलं वचसा वा वाचं वा
जिनं वेगवंतं त्वां विश्वहा सर्वेष्वहस्सु हिन्वामि स्तुतिभिः प्रेरयामि हिगतौ वृद्धौ च॥ ॥अथ चतुर्थी॥ राकामहं सुहवां सुष्टुती हु
वे शृणोतु नः सुभगा बोधतु त्मना॥ सीव्यत्वपः सूच्याछिद्यमानया ददातु वीरं शतदायमुक्थ्यं॥ ॥पत्नीसंयाजेषु गृहपतेः प्राकु
सिनीवाल्योः पूष्टव्ये। तत्र राकायागस्य राकामहमित्यादिके याज्यानुवाक्ये सूत्रितं च। राकामहं सिनीवालि कुहूमहं इति द्वे द्वे कामे
ह्मिमिति। संपूर्णचंद्रा पौर्णमासी राका तां देवीं सुहवां स्वाह्वानं आह्वानप्रयोजनकारिणीं सुष्टुती शोभनया स्तुत्या अहं हुवे आह्वया
मि। सुष्टुती शब्दो न तत्तृतीयैकवचनस्य सुपांसुलुगिति पूर्वसवर्णदीर्घ ईकारः। सा च सुभगा शोभनधना नोऽस्माकमाह्वानं शृणोतु शृत्वा
च त्मना स्वयमेव बोधतु। अस्मदभिप्रायं बुध्यतां बुध्वा च अपः कर्म पुत्रोत्पादनलक्षणं सूच्या सूचिस्थानीयया अछिद्यमानया
अविछिन्नया अनुग्रहबुध्यासीव्यतु संतनोतु। यथा वस्त्रादिकं सूच्यास्यूतं चिरं तिष्ठति एवमिदं करोतु इत्यर्थः। वीरं विक्रांतं शतदायं ब

हुधनं बहुप्रदं वा उक्थ्यं पुत्रं ददातु॥ ॥अथ पंचमी॥ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि॥ ताभिर्नो अद्य सुम
ना उपागहि सहस्रपोषं सुभगे रराणा॥ ॥हे राके देवि सुपेशसः शोभनरूपास्ते तव याः सुमतयः शोभनाः बुद्धयः याभिर्मतिभिः
दाशुषे हविर्दत्तवते यजमानाय वसूनि धनानि ददासि प्रयच्छसि। अद्येदानीं ताभिर्मतिभिः सह हे त्वं सुमनाः शोभनमना भूत्वा उ
पागहि उपागच्छ गमेश्छांदसः शपो लुक् अनुदात्तोपदेशेत्यात्वं सहस्रपोषं सहस्रसंख्याकधनस्य पुष्टिं रराणा ददती। रादाने। व्यत्य
येन शानच् छांदसः शपः श्लुः। अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ ॥सिनीवाल्या यागे सिनीवाल्यादिके द्वे याज्यानुवाक्ये सूत्रितं पूर्वमु
दाहृतं। तत्रानुवाक्या॥ ॥सूक्ते षष्ठी॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा॥ जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः॥ ॥दृष्टचंद्रमा
वास्या सिनीवाली। हे सिनीवालि पृथुष्टुके पृथुजघने पृथुसंहते वा या त्वं देवानां स्वसासि स्वयंसंचारिणी भगिनी वा भवसि सा त्वं आहु
तं आभिमुख्येनाग्नौ प्रक्षिप्तं हव्यं अस्मदीयं हविर्जुषस्व सेवस्व। किं च हे देवि सिनीवालि नोऽस्माकं प्रजां पुत्रादिकां दिदिड्ढि उपचेतु अ
तिसर्जय वा देहीत्यर्थः। दिह उपचये। लेटि छांदसः शपः श्लुः। दिश अतिसर्जने। उत्स्मादा॥ ॥अथ सप्तमी॥ यासुबाहुः स्वंगुरिः सुषूमा

द्वि॰ मा॰ ७
॥३९२॥

बहुसूवरी॥ तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन॥ ॥ या सिनीवाली सुबाहुः शोभनबाहुः स्वंगुरिः शोभनांगुलिः सुषूमा सुष्ठु प्र-
सवित्री तेन बहुसूत्वेन क्वनिप् वनोरचेति ङीप्रेफौ। कृदुत्तरपदप्रकृतिस्वरत्वं। तस्यै सिनीवाल्यै विश्पत्न्यै विशां पालयित्र्यै विभाषा
संपूर्वस्येति पक्षे नकारांतादेशः। अयस्मयादित्वेन भत्वाद्विशो जस्त्वाभावः। परादिश्छंदसि बहुलमिति उत्तरपदाद्युदात्तत्वं। हे ऋत्विग्य-
जमानाः हविर्जुहोतन जुहुत। तप्तनप्तनथनाश्चेति तनादेशः॥ ॥अथाष्टमी॥ या गुंगूर्या सिनीवाली या राका या सरस्वती॥ इंद्रा-
णीमह्व ऊतये वरुणानीं स्वस्तये॥ ॥गुंगूशब्देन राकासिनीवाल्योः साहचर्यात्कुहूरुच्यते। या गुंगूस्तामहं आह्वयामि एवमु-
त्तरत्रापि योज्यं। इंद्राणीमिंद्रस्य पत्नीं ऊतये रक्षणार्थमाह्वयामि। तथा वरुणानीं वरुणस्य पत्नीं स्वस्तये अविनाशाय ह्वयामि। इंद्र-
वरुणयोरादिना ङीप्वानुगागमश्च॥ ॥इति द्वितीयस्य सप्तमे पंचदशो वर्गः॥ ॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रका-
शे दाशतय्यां द्वितीयमंडले तृतीयोनुवाकः॥ ॥चतुर्थेनुवाके एकादश सूक्तानि। तत्रातेपितरिति पंचदशर्चं प्रथमं सूक्तं गृत्स-
मदस्यार्षं त्रैष्टुभं रौद्रं। अनुक्रांतं च। आ ते पंचोना रौद्रमिति। रुद्रलगवादिरुद्रयज्ञेषु अनेन सूक्तेन प्रतीचीं दिशमुपस्थेयात्सूत्रितं च॥ श्री

॥३९२॥

२६

महता स्तोत्रेण पुरो दधे पुरस्करोमि॥ ॥अथ द्वितीया॥ मा नो गुह्या रिप आयोरहन्दभन्मा न आभ्यो रीरधो दुच्छुनाभ्यः॥ मा नो
वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत्त्वेमहे॥ ॥हे इंद्र त्वं सुवा आयोर्मनुष्यस्य शत्रुभूतस्य गुह्याः गोप्याः ज्ञातुमशक्याः
रिपो हिंसारूपाः मायाः नोस्मान् अहन् उपलक्षणमेतत् अहनि रात्रौ च मा दभन् मा हिंसिषुः। तथा अथ नोस्मान् आभ्यो दुच्छुनाभ्यः शु-
नमिति सुखनाम दुच्छुनाः दुःखकारिणीभ्यः शत्रुसेनाभ्यः नोस्मान् मा रीरधः वशं मा नैषीः रध्यतिर्वशगमन इति यास्कः। रध
हिंसासंराध्योः। अस्माण्यंताल्लुङि चङि रूपं। अपि च नोस्माकं सख्यानि सखित्वानि मा वियोः त्वया वियुक्तानि माकार्षीः। अपि तु
नोस्माकं तस्य तत्सखित्वं सुम्नायता सुखमस्माकमिच्छता मनसा विद्धि जानीहि। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वात्
चतुर्थ्यर्थे षष्ठी। तत्त्वा दृशं त्वां ईमहे अभिमतफलं याचामहे। सुपां सुलुगिति तत्छब्दादुत्तरस्या विभक्तेर्लुक्॥ ॥अथ तृतीया॥
अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतं॥ पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा॥ ॥हे
इंद्र त्वं सुवा अहेळता अक्रुध्यता मनसा श्रुष्टिं सुखकरीं दुहानां दोग्ध्रीं पिप्युषीं प्रवृद्धां पीनां प्यायी वृद्धौ लिटः क्वसुः लिड्याङोश्चेति

कद्रुद्राये मारुद्रायाते पितरि मारुद्राय स्थिरधन्वने गिरइति सर्वरुद्रयज्ञेषु दिशामुपस्थान इति रुद्रदेवसे पक्षे। आते पितर्मरु
तांसुम्नमेतु प्रबभ्रवे वृषभाय श्वितीचइति तिस्रइति। अनशौनकः। कृष्णायां दुश्चर्यामुपोष्य कंकुल्मस्य जुहुयात् हतं। आतेस्तूके
नरौद्रेण प्रसन्नं वाग्यतः शुचिः॥ दूर्वमाज्याहुती हुत्वा योपस्थाय शंकरं॥ हविःशेषेण वर्त्तेत नैकांतरमतंद्रितः॥ पूर्णे मासे यजेन्मासं
रोगेभ्यः परिमुच्यत इति॥ ॥सैषा सूक्ते प्रथमा॥ आते पितर्मरुतांसुम्नमेतु मानः सूर्यस्य संदृशो युयोथाः॥ अभिनो वीरो अर्वति क्षमेत प्र
जायेमहि रुद्र प्रजाभिः॥ ॥हे मरुतां पितः मरुत्संज्ञानां देवानामुत्पादक रुद्र परमपिछ-सीदेषध्यं तस्य पूर्वां मंत्रितां गवद्रावात् सर्वानु
दात्तत्वं। तत्त्वदीयं अस्मभ्यं दातव्यं सुम्नं सुखं एतु आगछतु। रुद्रस्य च मरुतां पितृत्वमिदं पितेमरुतामित्यत्राख्यायिका मुखेनावेदिष्य
तथा त्वं नोस्मान् सूर्यस्य संदृशः संदर्शनात् मायुयोथाः। मा पृथक्कार्षीः। युमिश्रणामिश्रणयोः। लङि छांदसः शपः श्लुः। छंदस्युभयथेत्या
र्धधातुकत्वेन ङित्वाभावाद्गुणः॥ अर्वति शत्रुः भ्रातृव्यो वा अर्वेति श्रुतेः। नोस्माकं वीरः वीर्यवान् पुत्रादिः अभि क्षमेत अभिभ
वतु। यद्वा वीरस्त्वं नोस्मान् कृतापराधान् क्षमस्वं हे रुद्र प्रजाभिः पुत्रपौत्रादिभिः प्रजायेमहि प्रभूतास्याम॥ ॥अथ द्वितीया॥ त्वाद

रुस्म चतुर्द

त्तेभीरुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः॥ व्यस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः॥ ॥हे रुद्र त्वा दत्तेभिः त्वया दत्तैः
शंतमेभिः अतिशयेन सुखकरैर्भेषजैरौषधैः शतं हिमाः शतं हिमा शतसंवत्सरान् अशीय व्याप्नुयां। अश्नोतेर्लिं ङिछांदसो वि
करणस्य लुक्। अपि च अस्मदस्मत्तः द्वेषो द्वेष्टॄन् विचातयस्व विनाशय तथा अंहः पापं वितरं मन्यं तं विचातयस्व अमीवाः रोगा
न्विषूचीः विषुजनो अंचंतीः कृत्स्नशरीरव्यापकान् रोगान् विचारयस्व अस्मत्तः पृथक्कृत्य विनाशय॥ ॥अथ तृतीया॥ श्रेष्ठोजा
तस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो॥ पर्षि णः पारमंहसः स्वस्ति विश्वा अभीतीरपसो युयोधि॥ ॥हे रुद्र जातस्योत्पन्नस्य सर्वस्य
जगतो मध्ये श्रिया ऐश्वर्येण श्रेष्ठः प्रशस्यतमोसि भवसि तथा हे वज्रबाहो आयुधहस्त रुद्र तवसां प्रवृद्धानां मध्ये तवस्तमः। अ
तिशयेन प्रवृद्धोसि। स त्वं नोस्मान् अंहसः पापस्य पारं तीरं स्वस्ति क्षेमं पर्षि पारय। तथा रपसः पापस्य अभीतीः अभिगमनं युयोधि पृ
थक्कुरु। यौतेश्छांदसः शपः श्लुः वा छंदसीति त्वस्य विकल्पनात्। ङित्वाभावे अङितश्चेति हेर्धिः॥ ॥अथ चतुर्थी॥ मा त्वा रुद्र चुक्रुधा
मा नमोभिर्मा दुष्टुती वृषभ मा सहूती॥ उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि॥ ॥हे रुद्र त्वां नमोभिः अपथ्याक्रि
यमाणैर्नमस्कारैः हविर्भिर्वा मा चुक्रुधम मा क्रोधाय मा क्रुधं मा कार्ष्म। क्रुध क्रोधे अस्मात् ण्यंतात् लुङि चङि रूपं हे वृषभ कामानां वर्षितः

द्वि॰भा॰७
॥३९४॥

वृशागमन इति यास्कः॥ ॥इति द्वितीयस्य सप्तमे षोडशो वर्गः॥ ॥अथ षष्ठी॥ उन्मा ममंद वृषभो मरुत्वांत्वक्षीयसा वयसा नाधमानं॥
घृणीव च्छायामरपा अशीयाविवासेयं रुद्रस्य सुम्नं॥ ॥वृषभः कामानां वर्षिता मरुत्वान् मरुद्भिः पुत्रैर्युक्तो रुद्रः नाधमानं याचमा
नं मा मा त्वक्षीयसा दीप्तेन वयसान्नेन उन्ममंद उत्कर्षेण तर्पयतु अपि चाहं घृणीव छायां यथा सूर्यकिरणसंतप्तः छायां प्रवि
शति एवं रुद्रस्य सुम्नं सुखं अरपाः अपापः सन् अशीय व्याप्नुयां तदर्थं रुद्रं आविवासेयं परिचारयं विवासतिः परिचरणकर्मा॥ ॥
अथ सप्तमी॥ क्व१ स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः॥ अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः॥ ॥
हे रुद्र ते तव मृळयाकुः सुखयिता स्यः सः हस्तः क्व कुत्र वर्तते। यो हस्तो भेषजः भैषज्यकृत् जलाषः सर्वेषां सुखकरो स्ति भव
ति। स हस्तो विद्यत एव तेन हस्तेन मां रक्षतीति भावः। अपि च हे वृषभ कामानां वर्षितः दैव्यस्य देवकृतस्य रपसः पापस्य अप
भर्ता विनाशयिता भूत्वा कृतापराधं मां मां नु क्षिप्रं अभिचक्षमीथाः अभिमस्व। क्षमूष् सहने। लिङि छांदसः शपः श्लुः। बहुल
छंदसीति इडागमः॥ ॥रुद्र देवस्य पशौ वपा पुरोडाश हविषां क्रमेण प्रबभ्रव इत्याद्यास्तिस्रो याज्याः प्रबभ्रवे वृषभाय श्वितीचे इति

श्री
॥३९४॥

क्ष

ति स्र आपस्तंबतान्वास्तस्या पुरस्तादिति॥ ॥तत्राद्यासूक्तेष्टमी॥ प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि॥ नमस्या कल्मली
किनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम॥ ॥प्रबभ्रवे विश्वस्य भर्त्रे बभ्रुवर्णाय वा वृषभाय कामानां वर्षित्रे तद्धस्तस्य कारिणे वा।
श्वितीचे श्वेत्यमंचते श्वेतावर्णे च। उणादिकउन् प्रत्ययः। श्वितीमंचतीति। अंचतेः ऋत्विगित्यादिना क्विन्। चतुर्थ्येकवचने अचइत्यका
रलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। एवंगुणविशिष्टाय रुद्राय महो महीं महतोपि महतीं सुष्टुतिं शोभन
स्तुतिं प्रेरयामि प्रकर्षेणोच्चारयामि। हे स्तोतः कल्मलीकिनं ज्वलतो नामधेयमेतत्। ज्वलंतं कलयस्य पगमयति कल्मलीकं ते
जः तद्वंतं रुद्रं नमोभिः नमस्कारैर्हविर्भिर्वा नमस्य पूजय वयं च रुद्रस्य त्वेषं दीप्तं नाम गृणीमसि गृणीमः संकीर्तयामः। गृशब्दे क्र
यादिकः इदंतो मसिः। प्वादीनां ह्रस्वः॥ ॥अथ नवमी॥ स्थिरेभिरंगैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः। ईशानादस्य
भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यं॥ ॥स्थिरेभिः स्थिरैर्दृढैरंगैः अवयवैर्युक्तः पुरुरूपः अपहृतानेकबहुरूपैः उपेत उग्रः उ
द्गूर्णस्तेजस्वी बभ्रुः भर्ता बभ्रुवर्णो वा रुद्रः शुक्रेभिर्दीप्तैः हिरण्यैर्हिरण्मयैर्हितरमणीयैर्वा अलंकारैः पिपिशे दीप्यते। पिशआ
र्यवे। कर्मणि लिट्। ईशानादीश्वरात् अस्य भुवनस्य भूजो तस्य भूरेर्भर्तुः रुद्रात् असुर्यं। असुक्षेपणे। असेरुरन्। असुरः क्षेप्ता। तस्य

साधुः अस्तुर्यं बलं । नवा उ पोषन् । नैव प्रथङ्गभवति । यौतेर्लेट्युयडागमः । सिब्बहुलं लेटीति सिप् । अथ दशमी ॥ ॥अर्हन्बिभर्षि सायका
नि धन्वार्हन्निष्कं यजतं विश्वरूपं ॥ अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥ ॥हे रुद्र त्वं अर्हन् अर्हो योग्य एव सन् सा
यकानि शरान् धन्व धनुश्च बिभर्षि धारयसि । तथा अर्हन्नेव यजतं यजनीयं विश्वरूपं बहुविधरूपयुक्तं निष्कं हारं बिभर्षि । तथा
अर्हन्नेव इदं सर्वं अभ्वं महन्नामैतत् । अतिविस्तृतं जगत् दयसे रक्षसि । देङ् रक्षणे । हे रुद्र त्वत् त्वत्तोन्यत् किंचित् ओजीयः ओ
जस्वितरं बलवत्तरं वा अस्ति न खलु विद्यते । अतस्त्वमेवोक्तव्यापारेषु योग्य इत्यर्थः । ओजस्शब्दान्मत्वर्थीयो विनिः । तत आति
शायिके ईयसुनि विन्मतोर्लुकि टेरिति टिलोपः ॥ ॥इति द्वितीयस्य सप्तमे सप्तदशो वर्गः ॥ ॥प्रयावो मृगस्य मनोज्ञं वचः श्रुत्वा स्तु
हि श्रुतमित्येतां जपेत् । सूत्रितं च । स्तुहि श्रुतं गर्तसदं युवानमिति मृगस्येति ॥ ॥सैषा त्रैकादशी ॥ स्तुहि श्रुतं गर्तसदं युवानं मृगं
न भीममुपहत्नुमुग्रं ॥ मृळा जरित्रे रुद्र स्तवानोन्यं ते अस्मन्नि वपंतु सेनाः ॥ ॥हे स्तोतः श्रुतं विश्रुतं प्रख्यातं रुद्रं स्तुहि । कीदृ
शं गर्तसदं गर्तो रथः तत्र सीदंतं युवानं नित्यतरुणं मृगं न भीमं सिंहमिव भयंकरं उपहत्नुं उपहंतारं शत्रूणां उग्रमुद्गूर्णं हे रु
द्र त्वं स्तवानः अस्माभिः स्तूयमानः सन् जरित्रे स्तोत्रे मह्यं मृळ सुखं च । तत्त्वदीयाः सेनाः अस्मदन्यं अस्मद्व्यतिरिक्तं पुरुषं निवपंतु निघ्नंतु ॥

श्री
॥३९५॥

दुष्टुती दुष्टुत्या अशोभनया स्तुत्या मा चुक्रुधाम । मैव तथा सहूती सहूत्या विसदृशैरन्यैर्देवैः सह आह्वानेन मा क्रोधयाम । श्रेष्ठो हि
त्वमस्मात् न्यूनेन सहाह्वाने क्रुद्धो भवति । स त्वं नोस्माकं वीरान् पुत्रान् भेषजेभिः त्वदीयैर्भेषजैरौषधैः उदर्पय । उत्कृष्टं संयोजय । हे
रुद्र त्वा त्वां भिषजां चिकित्साभिज्ञानां मध्ये भिषक्तमं अतिशयेन भैषज्यस्य कर्तारं शृणोमि । प्रथमो दैव्यो भिषगिति च मंत्रांतरे
प्युक्तं ॥ ॥अथ पंचमी ॥ हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ॥ ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मना
यै ॥ ॥हे रुद्र हविर्भिः चरुपुरोडाशादिभिः सहितैर्हवीमभिराह्वानैः स्तुतिलक्षणैः हवते आह्वयते स्तूयते व्यत्ययेन कर्मणि
कर्तृप्रत्ययः । बहुलं छंदसीति ह्वयतेः संप्रसारणं । तं रुद्रं स्तोमेभिः स्तोत्रैरवदिषीय अवखंडयामि । पृथक्करोमि । अपगतक्रो
धं करोमीति यावत् । दो अवखंडने । व्यत्ययेनात्मनेपदं । बहुलं छंदसीतीत्वं । ऋदूदरः ऋदूदरो मृदूदर इति यास्कः । सुहवः शोभना
ह्वानः बभ्रुः भर्ता सर्वस्य बभ्रुवर्णो वा । सुशिप्रः । शिप्रे हनू नासिके वा शोभनशिप्रः । एवं गुणविशिष्टः स रुद्रः अस्यै मनायै ह
न्मीति मन्यमाना बुद्धिर्मना तस्यै नोस्मान् मा रीरधत् । मा वशं नैषीत् । रध हिंसायां । राधस्तेः अस्मात् ण्यंतात् लुङि चङि रूपं । रध्यति

अथ चतुर्दशी॥ परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात्॥ अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृ
ळ॥ ॥रुद्रस्य महादेवस्य हेतिरायुधं नोस्मान् परि वृज्यात्। परिवर्जयतु तथा त्वेषस्य दीप्तस्य रुद्रस्य मही महती दुर्मतिः दुःख
कारिणी बुद्धिश्च परिगात् अस्मान्वर्जयित्वान्यत्र गच्छतु। अप परीवर्जने। हे मीढ्वः सेचनसमर्थ रुद्र स्थिरा स्थिराणि त्वदीया
नि धनूंषि मघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यः अव तनुष्व। अव ततज्यानि कुरु तथा तोकायास्मत्पुत्राय तनयाय
ततपुत्राय च मृळ सुखं कुरु॥ ॥अथ पंचदशी॥ एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि। हवनश्रुन्नो रुद्रेह बो
धि बृहद्वदेम विदथे सुवीराः॥ ॥हे बभ्रो जगतो भर्तः बभ्रुवर्णो वा वृषभ कामानां वर्षितः चेकितान सर्वज्ञानन्। हे देव द्योतमान
रुद्र यथा येन प्रकारेण न हृणीषे। न क्रुध्यसि न च हंसि। हृणीङ् लज्जायां। अयं क्रुध्यतिकर्मा च एवं च हवनश्रुत् अस्मदीयमाह्वा
नं शृण्वन् नोस्मान् हे रुद्र इहास्मिन्देशे बोधि बुध्यस्व विदथे यज्ञे गृहे वा सुवीराः शोभनपुत्राः संतः बृहत्प्रौढं त्वदीयं स्तो
त्रं वदेमोच्चारयाम॥ ॥इति द्वितीयस्य सप्तमे द्वादशो वर्गः॥ ॥धारावरा इति पंचदशर्चं द्वितीयं सूक्तं गार्त्समदं मारुतं त्रिष्टुब्वंतमिति

षस्याभिप्लवषडहयोस्तृतीयेहन्याग्निमारुतशस्त्रस्य इदं मारुतं निविद्धानं। सूत्रितं च। वैश्वानराय धिषणां धारावरास्त्वमग्ने प्रथ
मो अंगिरा इत्याग्निमारुतमिति॥ ॥तत्र प्रथमा॥ धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्तविषीभिरर्चिनः॥ अग्नयो न शुशु
चाना ऋजीषिणो भृमिं धमंतो अप गा अवृण्वत॥ ॥धारावराः उदकधारांतरिक्षमावृण्वत। यद्वा धाराणां धृतानां स्थिराणां
वृक्षादीनां निवारयितारः चालयितारः यद्वा सर्वस्य जगतो धारयितारः धृष्ण्वोजसः परेषां धर्षकेन बलेन युक्ताः अत एव मृगा
न भीमाः सिंहा इव भयंकराः तविषीभिरात्मीयैर्बलैः हविष्प्रदाना अर्चिनः सर्वं जगत्पूजयंतः अग्नयो न शुशुचानाः दीप्ता वह्नय इव
दीप्यमानाः। शुच दीप्तौ। लटः कानच्। ऋजीषिणः ऋजीषमुदकं तद्वंतः। यद्वा ऋजीषोपगतसारः सोमस्तेन युक्ताः तृतीयसवने ह्याग्नि
मारुते मरुतः स्तूयंते तत्र च सवनद्वये अभिषुतं गतसारं सोममभिषुण्वंति। अतस्तेषां तद्युक्तत्वं एवंभूता मरुतः भृमिं भ्रामयंतं मेघं
धमंतः वर्षणार्थं इतस्ततः प्रेरयंतः गच्छंतीति गाः वेष्ट्याः आपः अप अवृण्वत अपावृताः कुर्वंति। यथा सर्वे द्रवंते तथा प्रवर्षंतीत्यर्थः।
यद्वा भृमिर्णाख्या वीणाविशेषः तं धमंतः चोदयंतः गाः बलनाम्नासुरेण पिहिताः अपावृण्वत अपगताचरणा अकुर्वन्॥ ॥अथ

द्वितीया॥ ॥द्यावो न स्तृभिश्चितयंत खादिनो व्यभ्रिया न द्युतयंत वृष्टयः॥ रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र
ऊधनि॥ ॥स्तृभिर्नक्षत्रनामैतत्। यथाह यास्कः। नक्षत्राणि स्तृभिरिति। नक्षत्राणामिति नक्षत्रैर्द्यावो न यथा द्युलोकाश्चितयंत चेतयंति
स्वात्मानं ज्ञापयंति। चिती ज्ञाने। प्रकाशंत इत्यर्थः। तथा खादिनः शत्रूणां खादकाः मरुतः स्वकीयैराभरणैर्शोभ्यंते। यद्वा खादकं कटकं तद्
युक्ताः संतः प्रकाशंते तथा वृष्टयो वर्षका मरुतः अभ्रियान अभ्रेषु भवा विद्युत इति विद्युतयंत सर्वं जगद्द्योतयंति प्रकाशयंति। अ
त भ्रशब्दाद्भवार्थे वा समुद्राभ्राद्घ इति घप्रत्ययः। शेषः प्रत्यक्षकृतः। रुक्मवक्षसः रुक्मं रोचमानाभरणं वक्षःस्थले येषां तादृशा हे मरु
तः। यद्यदा वो युष्मान् वृषा सेचनसमर्थो रुद्रो महादेवः पृश्न्याः पृश्निर्माध्यमिकी वाक् तस्याः संबंधिनि शुक्रे निर्मले ऊधनि। ऊध
प्रदेशे अहनि अजनयत् तदानीमिति सर्वत्र संबंधः। यद्वा पृश्निर्नाम वा इयं भूमिः पुरा गोरूपधरासीत् तस्यां हे रुद्रो वृषो
भूत्वा मरुत उत्पादयामासेत्याचक्षते। तदत्रोच्यते। हे मरुतो यद्यस्माद्वो युष्मान् वृषो रुद्रः पृश्न्या गोः शुक्रे निर्मले ऊधसि पयस उ
त्पत्तिस्थाने अजनि अजीजनत् तस्माद्यूयं। एवं महानुभावा जाता इत्यर्थः। तथा चैतत्तैत्तिरीयकं। पृश्नियै वै पयसो मरुतो जाता इति॥ ॥ श्रीः ॥३९७॥

अथ द्वादशी॥ ॥कुमारश्चित्पितरं वंदमानं प्रति नानाम रुद्रोपयंतं॥ भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे॥ ॥वंदमानं आयु
ष्मान् भव सौम्येति स्तुवंतं पितरं कुमारश्चित् यथा कुमारश्चिदित्येतदुपमार्थे। हे रुद्र उपयंतं अस्मत्समीपे गच्छंतं त्वां प्रति ननाम प्रति
नतोस्मि। अपि च भूरेर्बहुनो धनस्य दातारं सत्पतिं सतां पालयितारं पसावेवर्षपदे इति पूर्वपदप्रकृतिस्वरत्वं। हे रुद्र एवं भूतं त्वां गृणीषे
स्तौमि। मिप स्तिडां तिङो भवंतीति से आदेशः। स्तुतस्त्वं अस्मे अस्मभ्यं भेषजं भेषजा निरासि देहि॥ ॥अथ त्रयोदशी॥ ॥या वो भेषजा
नि मरुतः शुचीनि या शंतमा वृषणो या मयोभु॥ यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि॥ ॥हे मरुतो रुद्रपुत्राः वो युष्माकं
या यानि भेषजा भेषजानि अस्मदारोग्यभूतु हे भूतान्यौषधानि शुचीनि शुद्धानि निर्मलानि संति। हे वृषणः कामानां वर्षितारो म
रुतः या यानि युष्मदीयानि भेषजानि शंतमा अतिशयेन सुखकराणि या यानि च भेषजानि मयोभु मयोभुवि मयसः सुखस्य भाव
यितॄणि नोस्मान् पिता मनुः यानि भेषजानि युष्मदीयान्यवृणीत वृतवान् तानि भेषजानि रुद्रस्य महादेवस्य संबंधि शं वयो
श्च यच्छमनीयानां रोगाणां अपशमनं यावनीयानां भयानां यद्यावनं अस्मत्तः पृथक्करणं तदुभयं च वश्मि। कामये वश कांतौ। अदादिकः॥ ॥

अथ तृतीया ॥ उक्षंते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयंत आशुभिः ॥ हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं यात पृषतीभिः स
मन्यवः ॥ ॥ अश्वान् व्यासान् लोकान् उक्षंते सिंचंति । अशू व्याप्तौ । औणादिकः श्वुन् प्रत्ययः । आजिषु संग्रामेषु अत्यानिव सततग
मिनस्तुरगान् यथा खेदाय उदकैः सिंचंति तद्वत् । अपि च ते मरुतः आशुभिः शीघ्रगमनैरश्वैः नदस्य शब्दवतो मेघस्य कर्णैः
कृतैर्मध्यप्रदेशैः तुरयंत वर्षणार्थं वृष्टिप्रसादनाय त्वरितं गच्छंति । तुर त्वरणे । शेषः प्रत्यक्षकृतः । हे हिरण्यशिप्राः शिप्रं शिरस्त्राणं
सुवर्णमयशिरस्त्राणाः समन्यवः समानवयस्काः समानक्रोधा वा । हे मरुतः दविध्वतः महीरुहादिकं कंपयंतो यूयं । धूञ् कंपने । इत
स्माद्दाधर्त्यादावेतद्रूपं निपात्यते । पृषतीभिः युष्मद्रथयोजिताभिः स्वगीभिर्वडवाभिर्वा पृक्षं अन्ननामैतत् । हविर्लक्षणान्नवंतं य
जमानं अच्छ आदित्योद्वः यथा गच्छथ ॥ ॥ अथ चतुर्थी ॥ पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ॥ पृषदश्वासो
अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥ ॥ पृक्षे पृक्षवति हविर्लक्षणान्नवते यजमानाय तानि विश्वानि सर्वाणि भुवना
निउदकानि मित्राय वा शब्द उपमार्थः । मित्रायेव सदं सदा आ ववक्षिरे मरुतः आवहंति । यद्वा वा शब्दोवधारणे मित्रभूताय यजमानायैव

दृक्षेऽन्ने निमित्तभूते सति वृष्ट्युदकान्यावहंति। कीदृशा मरुतः जीरदानवः क्षिप्रदानाः पृषदश्वासः पृषद्भिरश्वैर्बिंदुभिर्युक्ताः अ
श्वा येषां ते तथोक्ताः अनवभ्रराधसः न अवभ्रंशः अधःपतने। अवभ्रंशनं अवभ्रः डान्यत्रापि दृश्यत इति डप्रत्ययः। नास्त्यवभ्रो
यस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। अनवभ्रमवभ्रंशनरहितं राधो धनं येषां ते बहुव्रीहौ पूर्वपदप्रकृतिस्वर
त्वं जिह्मासो न अकुटिलं प्रवृत्ताववंतोश्वाइव वयुनेषु गंतव्येषु मध्ये धूर्षदः धुरि मेघस्य वहने सीदंतो निषण्णा इत्यर्थः॥ ॥अथ पं
चमी॥ इंधन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः। आ हंसासो न स्वसराणि गंतन मधोर्मदाय मरुतः समन्य
वः॥ ॥समन्यवः समानवयस्काः समानक्रोधाः समानतेजसो वा मरुतः भ्राजदृष्टयो दीप्यमानायुधा यूयं इंधन्वभिः समिं
धनवद्भिः इंधनशब्दाच्छंदसीवनिपौ चेति मत्वर्थीयो वनिप् छांदसो वर्णलोपः धेनुभिः प्रीणयित्रीभिः रप्शदूधभिः वि
रप्शीति महन्नाम महोधस्कैः उधस्सु जलस्रोतो मार्गः युष्माकं पल्लव्यक्तायां वाचि। शब्दायमानोच्छ्रितप्रदेशैः अध्वस्मभिर्ध्वंस
नरहितैः पथिभिः प्रतीतिगच्छंतीति पंथानो मेघाः एवंभूतैर्मेघैः सह मार्गैरिव वा आ गंतन आगच्छत। किमर्थं मधोर्मदाय सोम
स्य मदार्थं। तत्र दृष्टांतः हंसासो यथा हंसाः स्वसराणि स्वकीयानि निवासस्थानानि प्राप्नुवंति॥ ॥तद्वत्॥ ॥इति द्वितीयस्य सप्तमे

दिवेप्रतिदिवसं चितयत वर्चिंतयते प्रज्ञापयत युष्मगुणप्रख्यापनं ब्रह्मस्तोत्रं आपानं प्राप्नुवंतं अपिच उक्षमन्नं स्तोतृभ्यो स्मभ्यं दा
तप्रयच्छत। तथा वृजनेषु संग्रामेकारवे स्तोत्रे वचनव्यत्ययः शत्रुभिरहिंसितं दुस्तरं तुमशक्यं सहोबलं च प्रयच्छत॥ ॥अथाष्ट
मी॥ युयुंजते मरुतो रुक्मवक्षसोश्वान् रथेषु भग आसुदानवः॥ धेनुर्नशिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषं॥ ॥रुक्म
वक्षसः रोचनाभरणोरस्काः सुदानवः शोभनदाना मरुतः यद्यदा रथेषु भगः भजनीये स्थाने धुरि सर्थः। अश्वान् आयुंजते आ
भिमुख्येनयुक्तान् कुर्वंति तदानीमेव रातहविषे दत्तहविष्काय यजमानाय महीं महतीमिषं अन्नं तत्कारणभूतमुदकं वा स्वसरेषु
स्वकीयगृहेषु पिन्वते सिंचति। पिवि सेचने। तत्र दृष्टांतः। धेनुर्नशिश्वे यथा धेनुः प्रस्नुतस्तनी सती स्वकीयाय वत्साय क्षीरं प्रय
च्छति तद्वत्॥ ॥अथनवमी॥ यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः॥ वर्तयत तपुषा चक्रियाभि तमव रुद्रा
अशसो हंतना वधः॥ ॥हे मरुतः यो मर्त्यो मनुष्यः वृकताति अदाता वृकः वृक आदाने। वृकज्येष्ठाभ्यां तिल् तातिलौ च छंदसीति
स्वार्थिकस्तातिल् प्रत्ययः। तादृशः सन् नोस्माकं रिपुर्दधे रिपुतया आत्मानं धारयति। हे वसवो वासयितारो मरुतः रिषो हिंसकात् श्री ॥२९९॥

अस्मान् रक्षत पालयत अस्मभ्यं शत्रुभूतं मर्त्यं तपुषा पालयित्र्या चक्रियाचक्र्या रव्ययाशस्त्या अभिवर्तयत अभितो निवर्तयत।
हे रुद्राः रुद्रपुत्राः यद्वा रोरूयमाणाद्रवंतः अशसः शंसनं शसः कस्य अशसः अजनुष्यस्मात् दोषादिकोसि प्रत्ययः। तादृशस्य राक्षसादेर्वधः
हननसाधनमायुधं अवहतन अवपातयत अस्मत्तः पृथक्कृत्य नाशयत। हतेर्लोटि तस्य तनप्तनथनाश्चेति तनप्॥ ॥अथदशमी॥ चि
त्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः॥ यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः॥ ॥हे मरुतः
वो युष्माकं चित्रं चायनीयं यामप्रमाणं चेकिते सर्वैर्ज्ञायते। इदानीं परोक्षवदाह। अपिशब्दः प्रसिद्धौ। यद्यदा खलु पृश्न्याः माध्य
मिकाया वाचः संबंधि ऊधः उद्धतं मेघं आपयः प्रापयितारो मरुतः दुदुहुः दुहंति। दुहेः छांदसो लिट्। छंदस्युभयथेति वक्तव्यमिति द्वि
र्वचनाभावः। यद्वा यदा च नवमानस्य स्तुवतः त्रितस्य निदे। निंदकाय शत्रवे हिंसां कृतवंत इति शेषः। निंदि कुत्सायां। क्विप् चेति क्वि
प्। तदानीं हे अदाभ्याः अहिंस्याः रुद्रियाः रुद्रस्य पुत्राः मरुतः त्रितमृषिं जुरतां हिंसतां शत्रूणां जराय जरयाय विनाशाय अ
भूतेति शेषः॥ ॥इति द्वितीयस्य सप्तमे विंशो वर्गः॥ ॥अथैकादशी॥ तान्वो महो मरुत एवयाव्नो विष्णोरेषस्य प्रभृथे हवामहे।

द्वि॰भा॰७
॥४००॥

हिरण्यवर्णान् ककुहान् यतस्रुचो ब्रह्मण्यंतः शंस्यं राध ईमहे ॥ ॥ हे मरुतः एवयाव्नः एवं गंतव्यं स्तोत्रं यज्ञं वा गंतॄन् महतो
महानुभावांस्तान् वो युष्मान् विष्णोः व्यापकस्य केयहवसमादिषु सर्वत्र व्याप्य वर्त्तमानस्य एषस्य एषणीयस्य प्रार्थनीयस्य प्रभृ
थे प्रभरणे अभिषवादिभिः प्रकर्षेण संपादने सति हवामहे आहूय हिरण्यवर्णान् हिततरमणीयवर्णान् ककुहान् श्रेष्ठान्
स्तुत्यास्तुत्या एवंभूतास्तान् यतस्रुचः यागा योद्यतस्रुचः ब्रह्मण्यंतः ब्रह्म स्तोत्रं तदिच्छंतो वयं शंस्यं शंसनीयं राधो धनं ईमहे
याचामहे ॥ ॥ अथ द्वादशी ॥ ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वंतूषसो व्युष्टिषु ॥ उषा न रामीररुणैरपोर्णुते महो ज्यो
तिषा शुचता गोअर्णसा ॥ ॥ ते मरुतः दशग्वाः ये दशभिर्मासैः सिद्धिं गताः अंगिरसस्तद्रूपा भूत्वा प्रथमा आदित्याः प्रथम
भाविनः संतः यज्ञमूहिरे अवहन् आदित्या नामंगिरसां च स्वर्गगमनं प्रतिस्पर्धमानानां मध्ये पूर्वमेवांगिरसो यागानु
ष्ठानाय स्वर्गं प्राप्ताः । तथा च श्रूयते । आदित्याश्चैवांगिरसश्च तेग्निना अग्निमयजंतेति । तादृशास्ते उषसो व्युष्टिषु विवासेषु
प्रभातेषु सत्सु नोस्मान् हिन्वंतु प्रेरयंतु हि गतौ हर्षो चारामीः कृष्णवर्णा रात्रीः उषा न यथा उषाः अरुणैरारोचमानैः स्वतेजोभिः

राम
॥५००॥

३४

एकोनविंशो वर्गः ॥ ॥ अथ षष्ठी ॥ आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गंतन ॥ अश्वामिव पिप्यत धेनुमूधनि
कर्ता धियं जरित्रे वाजपेशसं ॥ ॥ समन्यवः समानमनसः समानक्रोधा वा हे मरुतः नोस्माकं ब्रह्माणि अन्ननामैतत् अन्ना
नि सवनानि अभिषुतसोमलक्षणानि हवींषि आगंतन आगच्छत । गमेर्लोटि छंदसः शपो लुक् । तप्तनप्तनथनाश्चेति तस्य तनबा
देशः । अत एव ङित्वाभावादनुनासिकलोपाभावः । तत्र दृष्टांतः । नरां नसैशं नराम् अस्माकं शंसः शंसनीयं स्तोत्रं यथा आगच्छत
तद्वत् नरशब्दात् षष्ठीबहुवचनस्य आमि समागमशासनमिति नुडभावः । शंसः कर्मणि लउयंत । आद्युदात्तः । सुपां सुलुगिति अमः सु
आदेशः । आगत्य च धेनुं उदकदानेन प्रीणयितारम् अश्वामिव पिप्यत यथा अश्वा पीना एव भवति तद्वत् मेघं वर्षणसमर्थं आप्याययित
कुरुतेत्यर्थः । अपि च जरित्रे स्तोत्रे । वाजपेशसं वाजैरन्नैरश्लिष्टं पिश अवयवे । धियं कर्म कुरुत करोतेः छांदसः शपो लुक् ॥ ॥ अ
थ सप्तमी ॥ तं नो दात मरुतो वाजिनं रथ आपानं ब्रह्म चितयद्दिवेदिवे ॥ इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ॥ ॥
कीदृशं वाजिनं अन्नवंतं बलवंतं वा रथे रहणे युष्मदीये आगमनेनिमित्तभूते सति । दिवे

अपोर्णुते अपवृणोत्यपसारयति। तथा महामहतावृश्च तादीयमानेन गोअर्णसा गच्छता उदकेन ज्योतिषा सूर्यरश्मिना तमो निवा
रयंति। सूर्यमंडलमावृण्वतो वृत्रादीन् हत्वा सर्वं जगत्प्रकाशयंतीत्यर्थः॥ ॥अथ त्रयोदशी॥ ते क्षोणीभिररुणेभिर्नांजिभी रुद्रा
ऋतस्य सदनेषु वावृधुः॥ निमेघमाना अत्येन पाजसा सुश्चंद्रं वर्णं दधिरे सुपेशसं॥ ॥रुद्रा रुद्रपुत्रास्ते मरुतः क्षोणीभिः
शब्दकारिणीभिर्वीणाख्यैर्वीणाविशेषैः अरुणेभिर्नांजिभिः नशब्दः समुच्चये आरोचमानैरारुणवर्णैः अरुणाभिः व्यंजकैरलंकारैश्च
समन्विताः संतः ऋतस्योदकस्य सदने सुष्ठुनिवासभूतेषु मेघेषु वावृधुः वर्धंते अपि च सत्येन सततगामिनां शीघ्रं व्याप्तवता पाजसा
आत्मीयेन बलेन निमेघमानाः नितरां मेघादुदकं सिंचंतः ते सुश्चंद्रं शोभनाह्लादनं सुपेशसं पेश इति रूपनाम शोभनरूपं वर्णं दधि
रे कांतिं धारयंति॥ ॥अथ चतुर्दशी॥ तां इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि॥ त्रितो न यान्पंच होतॄनभिष्टय आ
ववर्तदवरांश्चक्रियावसे॥ ॥तान् मरुतो महि महत् वरूथं वरणीयं प्रशस्तं धनं तन्मरुतः कुतः ये रक्षणार्थं इयानः इयानाः याच
माना वयं सुपां सुलुगिति जसः सुः एना अनेन नमसा नमस्कारेण स्तोत्रेण वा उपेत उपेत्य गृणीमसि स्तुमः घ इति पदपूरणः एनेसु

सुपांसुलुगिति तृतीयाया याज्जादेशः। नशब्दः समुच्चये। त्रित ऋषि अयानेतान् मरुतः पंचहोतॄन् अध्यात्मं प्राणापानादि पंचवृत्त्यात्म
ना वर्त्तमानान् अत एव होमनिष्पादकान् अभिष्टये अभिलिखितसिध्यर्थं चक्रेण यानाभिचक्रेण अवसे अवतं संगं तु आववर्त्तत् तु स्वे
स्मान्निजिगीषून् प्रावर्त्तयन् तान् स्तुम इति पूर्वत्रेति संबंधः। ववर्त्तदिति वृतेर्ण्यन्तात् लुङि चङि रूपं॥ ॥अथ पंचदशी॥ यया रध्रं पा
रयथात्यंहो यया निदो मुंचथ वंदितारं॥ अर्वाची सा मरुतो या व ऊतिरो षु वाश्रेव सुमतिर्जिगातु॥ ॥हे मरुतः यया ऊत्या रध्रं आराधकं यज
मानं अंहः पापं अतिपारयथ। अतिक्रमयथ। यया ऊत्या वंदितारं स्तोतारं निदो निंदितुः शत्रोः सकाशात् मुंचथ मोचयथ। हे मरुतो
वो युष्मदीया या ऊतिः सा अर्वाची अस्मदभिमुखा भवतु। तथा सुमतिः युष्मदीयानुग्रहात्मिका बुद्धिः वाश्रेव हंभा
रवं कुर्वती धेनुरिव वत्सं सुष्ठु जिगातु एवं गच्छतु अस्मान्प्रति सर्वथा आगच्छत्वित्यर्थः॥ ॥इति द्वितीयस्य सप्तमे एकविंशो वर्गः॥ ॥
उपेमिति पंचदशर्चं तृतीयं सूक्तं गात्समदं त्रैष्टुभं। अपान्नपाद्देवताकं। तथा चानुक्रांतं उपेमन प्रियमिति। सूक्तविनियोगो लैंगिकः॥ ॥
तत्रेषा प्रथमा॥ उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे॥ अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि॥ ॥
वाजयुः वाजमन्नमात्मन इच्छन्नहं इमं वचस्यां वचसः स्तोत्रस्येच्छां उपासृक्षि उपासृजामि उत्सादयामि। अपां नपात् स्तोतुः प्र

द्वि॰भा॰७
॥२४॥
॥४०२॥

नूतनानि वाजलालनयामास। आपोनद्यो येवसतीवरीस्समीपेवाधनास्सुप्रासास्सुसमन्यायती। येषानुवक्तव्यास्सुवितंच। समंन्या
यंस्तूपर्यंसन्या इतीथिदंशेडति सारस्वतेचशास्त्रेयघस्तूयम्यानिपतेत्। तदानीमपोनप्त्रीयश्चरुः कार्यः। तत्रैषैवयाज्यास्तुवि
तंचसमन्यायंस्तूपर्यंसन्याइत्येतेः समानंसुवेषमिति॥ ॥सेषास्सूक्तेतृतीया॥ समन्यायंत्युपयंत्यन्याः समानमूर्वंनद्यः पृणंति॥
तमूशुचिंशुचयोदीदिवांसमपांनपातंपरितस्थुरापः॥ ॥अन्यवरिष्याआपः संयंतिमृत्स्यां संगच्छंते। अन्याश्चपूर्वंतत्रावस्थि
ताउपयंति। उपगच्छंति ताः सर्वाः अपः समानंसहनघोनदीभूताउर्वंसमुद्रमध्येवर्त्तमानंवडवानलंपृणंति। प्रीणयंति। ह
पाप्रीणानेतोदादिकः तमुतमेषांपांनपातंशुचिनिर्मलंदीदिवांसंदीप्यमानंदीदेतिश्छांदसोदीप्तिकर्मालिट्क्वसुः क्वसेकाजाद्दुस्वा
मितिनियमादिडभावः। छंदसिवेति वक्तव्यमितिवचनाद्वा द्विर्वचनाभावः। एवंभूतंशुचयःशुद्धाआपः परितस्थुः परिवृत्य तिष्ठंति
एषहिवैद्युताग्निरूपेणमेघेवर्त्तमानोस्मान्जीजनदिति बुध्यावडवानलरूपेणावर्त्तमानं तं पर्युपासतइत्यर्थः। यद्वा अन्याए
कधनाख्या आपः संयंतिचात्वालोत्करयोर्मध्येवसतीवरीभिः संगच्छंते अन्यावसतीवर्याख्याआपश्च उपयंति उपगच्छंति ए
कमन्यं प्रासामवंति। एताश्चमिलित्वा यज्ञसाधयंत्यस्तत्साध्यवृष्टिद्वारा नद्योभूत्वा उर्वं पृणंतीत्यादिसमानं। एवंहिआपोवाअस्यैधृ

श्री
॥

तवयंपूर्वंयज्ञंवक्ष्यामइत्यादिकंब्राह्मणविनियोगश्चानुगदह्यते॥ ॥अथचतुर्थी॥ तमस्मेरायुवतयोयुवानंमर्मृज्यमानाःपरियंत्यापः॥
के सशुक्रेभिः शिक्वभीरेवदस्मेदीदायानिध्मोघृतनिर्णिगप्सु॥ ॥तमपांनपातमग्निंअस्मेराअस्मयमानादर्परहितायुवतयोयुवानं
युवरात्रमिव मर्मृज्यमानाः अत्यर्थमलंकुर्वाणाः आपः मज्जनशौचालंकारयोः परियंति परितोगच्छंति प्राप्नुवंति। घृतनिर्णिक्रक्ष
पाशीलोदकनिर्णेजनः। यद्वाघृतनिर्णिगितिरूपनामदीप्तिरूपः सोपांनपादप्सुअप्सुमेघांतर्गतासुवैसमुद्रगतासुवामध्येअनि
ध्मः इंधनरहितएवसन् अस्मे अस्माकं रेवद्धनयुक्तमन्नंयथाभवतितथाशुक्रेभिः शुभ्रैर्निर्मलैः शिक्वभिस्तेजोभिः दीदायदी
प्यते॥ ॥अथपंचमी॥ अस्मैतिस्रोअव्यथ्यायनारीर्देवायदेवीर्दिधिषंत्यन्नं। कृताइवोपहिप्रसर्स्रेअप्सुसपीयूषंधयतिपूर्वसूनां॥ ॥
नारीर्नेत्र्यस्तिस्रोदेवीर्देव्यः इलासरस्वतीभारत्याख्याः अव्यथ्यायअव्यथनायास्मैदेवायापांनपातेअन्नंसोमाख्यंदिधिषंति
धारयंति दिधिषत्यत्र जेहेत्यादिकं। व्यत्ययेनतादेशः। धातूनामनेकार्थत्वात् धारणार्थः। अप्सुउदकेषुकृताइवउपसस्रेप्रसरं
ति। स्रगतौ लिटि इरेयोरेइतिरेआदेशः। छांदसोहलादिशेषाभावः। यस्मादेवंतस्मात्पूर्वब्राह्मणः सकाशात् उत्पन्नानामपां
पीयूषसारभूतंसोमाख्यमन्नं सोपांनपात्दृश्यमितिपिबति॥ ॥इतिद्वितीयस्यसप्तमेद्वाविंशोवर्गः॥ ॥अथषष्ठी॥ अश्व

द्वि॰भा॰७
॥४०३॥

स्यात्रज निमास्य चस्वर्द्रुहो रिषः संपृचः पाहिसूरीन्॥ आमासु पूर्षु परो अप्रमृष्यन्नारातयो विनशन्नानृतानि॥ ॥अत्रास्मि
न्नपांनपात्संज्ञके देवे अश्वस्य जनिम जन्म भवति अपांन प्राधिनिष्ठितात्समुद्रादुच्चैःश्रवसो जातत्वात् किंबहुना अ
स्य वस्वः सुष्ठु अरणीयस्य सर्वस्य जगतो जन्मास्मिन्नेव भवति। अयं हि मेघस्य मध्ये वर्तमानो वृष्टिद्वारेण सर्वं जगज्जन
यति तादृशो पांनपात्त्वं द्रुहः द्रोग्धुः अपहंतुः रिषो हिंसकस्य च संपृचः संपर्कात् सूरीन् स्तोतॄन् अस्मान्पाहि। रक्ष आमासु अ
परिपक्वासु पूर्षु रिपुभिः पूरयितव्यासु स्वपूर्षु परः परस्तात् वर्तमान अप्रमृष्य अप्रधृष्यमाणं देवं अरातयः अदातारः पुरुषाः न विशान्
न प्राप्नुवन्न नशतिर्व्याप्तिकर्मा। लिङ्युडागमः॥ अनृतानि मायाविनरक्षांसि च न प्राप्नुवंति॥ ॥अथ सप्तमी॥ स्व आ दमे सुदुघा
यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति॥ सो अपां नपादूर्जयन्नप्स्वं१तर्वसुदेयाय विधते विभाति॥ ॥अपांनपात्स्वे दमे स्वकीये गृहे
तस्मिन्नक्षलक्षणे आसीदिति यस्य धेनुः माध्यमिका वाक् सुदुघा सुसुखेन दोग्धव्या भवति। स देवः स्वधां वृष्ट्युदकं पीपाये
वर्धयति। सो पांनपात्संज्ञो देवः ऊर्जयन् बलं कुर्वन् अप्स्वंतः मेघस्थासु अप्सु मध्ये विधते परिचरते यजमानाय वसुदेयाय धनदानं

श्री
॥४०३॥

३७

दृतो स्मीत्यर्थः। सजे स्थानाद्दसोलुक्। लिङ्। सिचावालसने पदे चिति सिचः। कित्वाद्गुणाभावः। सचना घोन दीनो झाह्रका रिपां मेघस्था
नामपां संबंधी आशुः हेमा आशुः शीघ्रं गंता विद्यस्मादन्येभ्यो पि दृश्यत इति मनिन्। एवं भूतो पांनपात् अपांपौत्रस्थानीयः ऋध्य
ओषधिवनस्पतिषु एषोग्निर्जायत इति तैत्तिरीयत्वात्। एतत्संज्ञको देवः गिरः गृणातीति गीः स्तोता तस्य मे मम कुवित् बहुनाम एतद् बहु
कुलं चनः अन्नं दधात् दधातु प्रयच्छत्वित्यर्थः। अपि चास्मान् सुपेशसः शोभनरूपान् शोभनालंकारान् वा करतिकरोतु करोतेर्व्यत्यय
न शप्। कः करत्करतिकृधि कृतेष्वनहत इति विसर्जनीयस्य सत्वं। हि यस्मादयं देवः जोषिषत् स्तोत्राणि सेवते तस्मादस्मानेवमनु
गृह्णातीत्यर्थः। जुषी प्रीतिसेवनयोः। लेट्यागमः। विकरणः सिप्। इडागमश्च। हि चेति निघातप्रतिषेधः॥ ॥अथ द्वितीया॥ इमं स्वस्मै हृ
द आ सुतष्टं मंत्रं वोचेम कुविदस्य वेदत्। अपांनपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान॥ ॥अस्मै अपांनपात्संज्ञकाय देवाय हृ
ह दो हृदयात् सुतष्टं सुष्ठु निर्मितं इमं मंत्रं सुष्ठु आभिमुख्येन वोचेम ब्रूयात। अस्य अस्माभिरुक्तमिमं मंत्रं कुवित् देवत्वं बहुलं जानातु
वेत्ति लेड्यडागमः। निपातैर्यद्यदिहंतेति निघातप्रतिषेधः। किंस्तोत्रमिति चेदुच्यते। अयं स्वामी अपांनपात्संज्ञको वैद्युताग्निः अ
सुर्यस्य असुरः शत्रून् क्षेप्ता तस्य स्वभूतस्य बलस्य मह्ना महिम्ना महत्वेन विश्वा सर्वाणि भुवनानि वृष्ट्युदकोनिवृष्ट्य सादनेन

विभाति विशेषेण दीप्यंते॥ ॥अष्टमी॥ यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति॥ वया इदन्या भुवनान्यस्य प्रजा
यंते वीरुधश्च प्रजाभिः॥ ॥यो अपांनपात् ऋतावा ऋतमित्युदकनाम तद्वत् सत्यवान् अजस्रो नित्यः एकरूपेण सदा वर्तमानः उ
र्विया उरु विस्तीर्णः अप्सु मेघस्थासु मध्ये शुचिशोचकेन दैव्येन देवसंबंधिना तेजसा आस्ते समंताद्विभाति विशेषेण प्रकाशते।
अस्यापांनपातः अन्या अन्यानि भुवनानि सर्वाणि भूतजातानि वया इत्शाखा एव वीरुधश्चौषधयः प्रजाभिः स्वकीयाभिः पु
ष्पफलादिभिः सह अस्मादेव प्रजायंते। पूर्वोसारस्वतसंज्ञस्यापोनप्त्रीये चरौ अपांनपाद्दादीत्येषानुवाक्या सूत्रितं च। अपांन
पात्रे चरुमपांनपादाह्यस्थादुपस्थमिति॥ ॥सेषा सूक्ते नवमी॥ अपांनपादाह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः॥ त
स्य ज्येष्ठं महिमानं वहंतीर्हिरण्यवर्णाः परि यंति यह्वीः॥ ॥अपांनपात्संज्ञकोऽग्निः उपस्थं अपामुपस्थानं अंतरिक्षं आ ह्यस्थात्
आस्थितवान् आरूढवान् खलु किं कुर्वन् जिह्मानां कुटिलगतीनामपां मध्ये ऊर्ध्वः स्वयमूर्ध्वं ज्वलन् विद्युतं विद्योतमानं मेघं व
वसानः आच्छादयन् अंतरिक्षमास्थाय वर्षणं कृतवान् तस्य वर्षितुमपांनपातः ज्येष्ठं प्रशस्यतमं महिमानं माहात्म्यं वहंतीः

वहंत्यः सर्वत्र यापयंत्यः यह्वीर्यह्व्यः महत्यः। हिरण्यवर्णाः नदीनामेतत् हिरण्यवन्निर्मलरूपा नद्यः परियंति परितो गच्छंति आपांनप्त्राम
हतीहि हिरस्माकं वहनायोत्पादिता इति कृतं तत्तया तदीयं माहात्म्यं सर्वत्र प्रकरयंत्य इव नद्यः प्रवहंतीत्यर्थः॥ ॥अथ दशमी॥ हिरण्यरू
पः स हिरण्यसंदृगपांनपात्सेदु हिरण्यवर्णः॥ हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै॥ ॥सोपांनपात् हिरण्यरूपस्व
प्यत इति रूपं शरीरं सुवर्णमयशरीरः हिततरमणीयेंद्रियो वा से दु स एवापांनपात् सम्यक्पश्यंतीति संदृशांइंद्रियाणि सुवर्णमयेंद्रि
यः हिततरमणीयेंद्रियो वा से दु स एवापांनपात् हिरण्यवर्णः। हिरण्यसदृशकांतियुक्तः एवं भूतः सन् हिरण्ययात् सुवर्णमयाद्योनेः
स्थानात् पर्युपरि निषद्योपविश्य राजत इति शेषः। अस्मै ईदृग्विधायापांनपाते हिरण्यदाः दक्षिणारूपस्य सुवर्णस्य दातारो यजमा
नाः अन्नं हविर्लक्षणं ददति प्रयच्छंति॥ ॥इति द्वितीयस्य सप्तमे त्रयोविंशो वर्गः॥ ॥अथैकादशी॥ तदस्यानीकमुत चारु नामापीच्यं
वर्धते नप्तुरपां॥ यमिंधते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य॥ ॥अस्यापांनप्तुर्देवस्य अनीकं रश्मिसमूहरूपं शरीरं चा
रु शोभनं उत अपि च अस्य नाम संज्ञा च चारु शोभनं पातयति विनाशयतीति नपादिति तद्भयस्तत्त्वे तदुभयं अपीच्यं अंतर्हितनाम

ह्नत्वा च स ईं सोयं मध्यमको वैद्युतोग्निः। तासां शिशुः पुत्रः सन् धयति। मेघस्था रक्ताः पिबति अविंधनोग्निसौ तं पुत्रस्थानीयमद्भिः आ
पश्लेरिहंति। लिह आस्वादने। कपिलकादित्वाल्लत्वविकल्पः। सोयमपांनपात् तृष्यादिसह शब्दो निपातितः। अम्लातवर्णाः। ओम्लै ते।
म्लातो म्लानः क्षीणो वर्णो यस्य तद्विपरीतोत्यर्थं दीप्यमानः सन् इहास्मिन् लोके। अन्यस्येव शब्दोवधारणे। अन्यस्य पार्थिवस्येवाग्नेत
न्वा शरीरेण काष्ठेंधनत्वलक्षणेन विशेषव्यासो बभूव। वृष्ट व्यासो॥ ॥अथ चतुर्दशी॥ अस्मिन्पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा
दीदिवांसं॥ आपो नप्त्रे घृतमन्नं वहंतीः स्वयमत्कैः परि दीयंति यह्वीः॥ ॥परमे उत्कृष्टे स्मिन्पदे तरिक्षलक्षणे स्थाने तस्थिवांसं स्थि
तवंतं अध्वस्मभिः ध्वंसनरहितैस्तेजोभिः विश्वहा सर्वहा सर्वाण्यहानि दीदिवांसं दीप्यमानमपांनपातं यह्वीः यह्व्यो महत्यः आत्मनः स्व
यमात्मनैव अत्कैः रतनशीलैः सततगंतृभिः स्वकीयैः रूपैः परि दीयंति परिगच्छंति। दीयतिर्गतिकर्मा। दीङ् क्षये। व्यत्ययेन परस्मैपदं।
किं कुर्वत्यः नप्त्रे अपांनपाते घृतं क्षरणशीलोदकात्मकमन्नं वहती वहंत्यः॥ ॥अथ पंचदशी॥ अयांसमग्ने सुक्षितिं जनायायांस्म
सुमघवद्भ्यः सुवृक्तिं॥ विश्वं तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः॥ ॥हे अग्ने सुक्षितिं शोभननिवासं त्वां अयांसं उपागच्छं कि

मर्थं जनाय अस्मदीयाय पुत्रादिजनार्थं तथा मघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यश्च सुवृक्तिं शोभनवर्जनं कं त्वद्विषयं स्तोत्रं अ
यांसं उपागच्छं। यांउपरमे। अतः कारणाद्यद्भद्रं सर्वे देवा अवंति रक्षंति विश्वं सर्वं तद्भद्रमस्माकं भवतु। सुवीराः सुपुत्रा वयं विद
थे यज्ञे गृहे वा बृहत्प्रौढं स्तोत्रं वदेम उच्चारयाम॥ ॥इति द्वितीयस्य सप्तमे चतुर्विंशो वर्गः॥ ॥तुभ्यमिति षळृचं चतुर्थं सूक्तं गार्त्सम
दं जागतं प्रथमं या इंद्रो मधुश्च देवता द्वितीयायो मरुतो माधवश्च तृतीयायास्त्वष्टा शुक्रश्च चतुर्थ्या अग्निः शुचिश्च पंचम्या इंद्रो
नभस्यश्च षष्ठ्या मित्रावरुणौ नभस्यश्च। तथा चानुक्रांतं। तुभ्यं षळृतव्यं तु जागतं त्विति। दशरात्रे षष्ठेहनि शस्त्रेषु यागेषु ऋतुशिरस्के
प्रैषैः प्रेषितव्यं यष्टव्यं च। तत्राद्यानां षण्णां प्रैषाणामुपरिष्टाद्देवताः षळृचो होत्रादिभिः क्रमेणावपनीयाः। तथा च सूत्रितं उप
रिष्टादृचं ऋतुयाजानामिसृपक्तमस्यतु तुभ्यं हिन्वानो वसिष्ट गा अप इति द्वादशोयं तेन॥ ॥तत्रैषा प्रथमा॥ तुभ्यं हिन्वानो वसिष्ट गा
अपो धुक्षन्त्सीमविभिरद्रिभिर्नरः॥ पिबेंद्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे॥ ॥हे इंद्र तुभ्यं त्वदर्थं हिन्वानः प्रेर्यमा
णः सोमः गाः गोविकाराणि दधिपयः प्रभृतीनि श्रयणार्थं अपः द्रव्याणि वसिष्ट वस्ते। वर्यास्यश्च वसिष्ट वस्ते आच्छादयति तैः संयुज्यत

इत्यर्थः। नरो यज्ञस्य नेतारो ध्वर्यवश्च सीमेनं सोमं अविभिः अवेर्वालमयैः दशापवित्रैः अद्रिभिर्ग्रावभिश्च अधुक्षन्नक्षारयन् ग्रावभि
रभिषुत दशापवित्रे पाः पुनान्तीत्यर्थः। हे इंद्र यस्त्वमीशिषे सर्वस्य जगत ईश्वरो भवसि सत्वं प्रथमः अन्येभ्यो देवेभ्यः पूर्वभावी सन्
स्वाहा स्वाहाकारेण प्रहुतं प्रकर्षेणाग्नौ क्षिप्तं वषट्कृतं वषट्कारेण वक्तव्यं स्तोमं होत्राद्धोतुर्यागादासमंतात् पिब॥ ॥अथद्वितीया॥ ॥
यज्ञैः संमिश्लाः पृषतीभिर्ऋष्टिभिर्यामंछुभ्रासो अंजिषु प्रिया उत॥ आसद्याबर्हिर्भरतस्य सूनवः पोत्रादासोमं पिबतादिवोन
रः॥ ॥येमरुतो यज्ञैर्यागैः संमिश्लाः संयुक्ताः पृषतीभिः स्ववाहनभूताभिः पृषतीभिर्बडवाभिर्युक्ते यानयामनि गमनसाधने रथे
वस्थिताः ऋष्टिभिः स्वकीयैरायुधैः शुभ्रासः शुभ्राः शोभमानाः उत शब्दश्चार्थे अंजिषु आभरणेषु प्रियश्च। हे भरतस्य सूनवः स
र्वस्य जगतो भर्तुः रुद्रस्य पुत्रा दिवो नरः दिवोंतरिक्षस्य नेतारः एवंभूता हे मरुतः ते यूयं बर्हिः आस्तीर्णं बर्हिषि आसद्योपविश्य
पोत्रात् पोतुर्यागात् सोमं पिबत॥ तृतीयसवने अमेव नइत्येषा नेष्टुः प्रस्थितयाज्या। तथाच सूत्रितं। अमेव नः सुहवा आहिगं
तनेंद्रा विष्णूपिबतं मध्वो अस्येति॥ ॥सैषा तृतीया॥ अमेव नः सुहवा आहिगंतन निबर्हिषि सदतना रणिष्टन॥ अथा मंदस्व जुजु

श्रीः
॥४०६॥

४०

धेयमेतत्। एषांतार्हितेसद्धर्धतेयुवतयः संगमनस्वभावा आपः हिरण्यसमानतेजसं यमपांनपातं इत्था अमुत्रांतरिक्षे समिंधते स
म्यग्दीपनं स्वयंति अस्यच देवस्य अनेकं तं रक्ष्णाशीलमुदकं अन्नं भक्ष्यं अविंधनो ह्यसौ देवः घृतान्नि॥ ॥अथ द्वादशी॥ अस्मैबहूनामवमा
यसख्ये यज्ञैर्विधेम नमसा हविर्भिः॥ संसानुमार्ज्मि दिधिषामि बिल्मैर्दधाम्यन्नैः परि वंद ऋग्भिः॥ ॥अस्मै पुरोवर्तिने बहूनां देवानाम
वमाय सख्ये अस्माभिः समानयोपांनपाते यज्ञैर्यागस्य धनैर्हविर्भिः चरुपुरोडाशादिभिः नमसा नमस्कारेण विधेम परिचरेम अस्या
पांनपातः सानु समुच्छ्रितप्रदेशं संमार्ज्मि संम्यक्करोमि शोधयामि वा मृजूशौचालंकारयोः। चादिलोपे विभाषेत्यस्य निघातप्रतिषेधः।
दिधिषामि धारयामि च बिल्मैर्भासनैः काष्ठैरनं धिषशब्दे। अयं धारणार्थोपि जुहोत्यादित्वात् शपः श्लुः। मिपो व्यत्ययेन लङागमः। अप्य
स्तानामादिरिस्याघृतान्नत्वं। दधामि धारयामि चैनं गार्हपत्यादिरूपेण अन्नैर्हविर्लक्षणैः तथाच ऋग्भिर्मंत्रैः परिवंदे परितः स्तौमि॥ ॥
अथत्रयोदशी॥ सईं वृषाजनयत्तासुगर्भं सईं शिशुर्धयतितं रिहंति॥ सो अपांनपादनभिम्लातवर्णोन्यस्येवेह तन्वा विवेष॥ ॥सईं
सोयमपांनपात्संज्ञो वृषासेक्ता भूत्वा तासुमेघस्थास्वप्सु गर्भमजनयत् स्वात्मानमेव गर्भरूपेण वर्षणार्थं कृतवानित्यर्थः। गर्भो

षाणो अंधसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः॥ ॥इवशब्दोवधारणे। हे सुहवाः शोभनाह्वानाः त्वष्ट्रप्रभृतयः नोस्मान् अमेवसहेवज्ञ
गंतन आगच्छत। गमेश्छांदसः शपोलुक्। तस्य तनसनतनथनाश्चेति तनबादेशः। हे शाह्नः पूरयाः। आगत्य च बर्हिषि वेद्यामास्तीर्णे निष
दतन निषण्णा भवत। सदेश्छांदसः सीदादेशाभावः। उपविश्य च रणिष्टन रमध्वं। रणिः शब्दार्थः। क्रीडायां वर्तते। धातूनामनेकार्थ
त्वात्। अस्माछांदसो लुङ् पूर्ववत्। वादेशः। अथानंतरं हे त्वष्टः देवेभिरन्यैर्देवैः दनभिर्देवैर्जनिभिः देवपत्नीभिश्च सुमद्गणाः शोभन
गणस्त्वं अंधसः सोमलक्षणस्यान्नस्य द्वितीयार्थे षष्ठी। सोमं लक्षणमन्नं जुजुषाणः सेवमानो मंदस्व तृप्तो भव॥ ॥अथ चतुर्थी॥
आवक्षि देवां इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु॥ प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृष्णुहि॥ ॥हे वि
प्र मेधाविन्नग्ने देवान् यष्टव्यानिंद्रादीन् आवेक्षि आवह। यो क्षि वतान् यजवहेहोतः देवानामाह्वातः त्वं च उशन् स्मदीयं कामयमा
नः सन् त्रिषु योनिषु स्थाने गार्हपत्यादिलक्षणेषु निषीद उपविश्य च प्रस्थितं होमार्थमुत्तरवेदिं प्रयानीतं सोम्यं सोममयं मधु प्रति
वीहि प्रतिकामयस्व कामयित्वा च आग्नीध्रादग्नीध्रयागात् सोमं पिब पीत्वा च तव भागस्य त्वदीयेन भागेन तृष्णुहि तृप्तो भव॥ ॥

अथ पंचमी॥ एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः। तुभ्यं सुतो मघवंतुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृप
त्पिब॥ ॥हे इंद्र स्यः सः एषः सोमस्ते तव तन्वः शरीरस्य नृम्णवर्धनः बलस्य वर्धकः तुभ्यं सुत इत्यनेन तत्संबंधः। येन सोमेन प्रदिवि पु
राणे त्वयि बाह्वोः हस्तयोः सहः परेषामभिभवनलक्षणं सामर्थ्यं ओजस्तु कारणभूतं तच्च संहितः निहितं भवति लिंगव्यत्ययः। हे मघवन्
धनवन्निंद्र तुभ्यं त्वदर्थं तादृशः सुतोध्वर्युभिरभिषुतः तुभ्यं त्वा होतुं आभृतः उत्तरवेद्यां प्रत्याहृतश्च अस्य इमे स्तोम इमे ब्राह्मणा
त् ब्राह्मणाच्छंसिनो यागात् तत्पूतः। तृपत् त्वं आपिब आभिमुख्येन पिब। ऋत्विग्ग्रहणं कर्तव्यमिति॥ ॥अथ षष्ठी॥ जुषेथां यज्ञं बोधतं
हवस्य मे सत्तो होता निविदः पूर्व्या अनु॥ अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु॥ ॥हे मित्रावरुणौ मदीयं यज्ञं जुषे
थां। मे मम हवस्य हवमाह्वानं। पूर्ववत्कर्मणि षष्ठी। बोधतं अवगच्छतं। सत्तो निषण्णोऽस्मदीये होता उर्व्याः चिरंतनीः निविदः वाङ्नामैतत्
शास्त्रलक्षणा वाचः अनुशासंतीति शेषः। उद्गातृभिः कृतस्य स्तोत्रस्यानुगुण्येन आज्यादीनि शस्त्राणि शंसतीत्यर्थः। अपि च नमः सोमलक्ष
णमन्नं आवृतं ऋत्विग्भिः वेष्टितं राजाना राजमानौ युवां आभिमुख्येन पिबतं॥ ॥इति द्वितीयस्य सप्तमे पंचविंशो वर्गः॥ ॥वेदार्थस्य प्रका
शेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवी
रबुक्कभूपालसाम्राज्यधुरंधरेण मासिन विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके सप्तमोध्यायः॥

द्वि॰ भा॰ ८

॥४०८॥

सार्धमग्निभिः ऋतुदेवैः सह सोमं पिब॥ ॥अथ द्वितीया॥ यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः॥ ॥हे द्रविणोदः यमु यं त्वामेव पूर्वं होतृकृते प्रैषे
मयानेऽहुवे आहूतवानस्मि। इदं संप्रति तं तमेव पोतृकृते सोमयनिहवे आह्वयामि। सैदु स एव द्रविणोदाः हव्यः आह्वात
व्यः। उ इति पूरणः। ददिरितीष्टफलस्य दाता यो नाम यः खलु पत्यते देवतात्वेनेष्टतस्मै द्रविणोदसे सोम्यं सोममयं
इदं मधु अध्वर्युभिः प्रस्थितं प्रणीतमासीत्। हे द्रविणोदः पोत्रात् पोतुर्यागात् ऋतुभिः ऋतुदेवैः सह सोमं
पिब॥ ॥अथ तृतीया॥ मेद्यंतु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते। आयूया धृष्णो अभिगूर्या त्वं
नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः॥ ॥हे द्रविणोदः येभिर्वह्निभिः ईयसे प्राप्नोषि। ते तव वह्नयो वोढारः इति यास्के
नोक्तत्वात्। तु मेद्यंतु तृप्यंतु वनस्पते वनानां पते परिषण्न् अहिंसन् वीळयस्व दृढो भव। हे धृष्णो धर्षक त्वं आ
पूय आगत्य अभिगूर्य उद्यम्य नेष्ट्रात् नेष्टुर्यागात् ऋतुभिः सह सं तव सोमं पिब॥ ॥अथ चतुर्थी॥ ॥अपा

श्री

॥४०८॥

१

द्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितं। तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः॥ ॥अद्य
वायूस्येयं यो द्रविणोदाः होत्रात् होतुर्यागात् सोममपात् पीतवान्। उत अपि च पोत्रात् पोतुर्यागात् अमत्त सोमं पीत्वा
अमत्त अमाद्यत्। उत अपि च नेष्ट्रात् नेष्टुर्यागात् हितं दत्तं प्रयः देवानामन्नरूपं सोमं अजुषत। असेवत।
स द्रविणोदसः हविःस्वरूप द्रविणस्य प्रदातृभ्य ऋत्विग्भ्यो हितः। ऋत्विजोऽत्र द्रविणोदस उच्यंते। हविषो दातारः इति
यास्केनोक्तत्वात्। तादृशो द्रविणोदाः अमृक्तं दशापवित्रेणामृष्टं अमर्त्यं अमरणसाधनं तुरीयं पात्रं चतुर्थपात्र
स्थं सोमं पिब॥ ॥अथ पंचमी॥ अर्वांचमद्य यय्यं नृवाहणं रथं युंजाथामिह वां विमोचनं। पृंक्तं हवींषि मधुना हि
कं गतमथा सोमं पिबतं वाजिनीवसू॥ ॥हे अश्विनौ अद्यास्मिन्नहनि यय्यं यायिनं तारं नृवाहणं नेत्रोर्युवयोर्वोढारं इ
ह यज्ञे वां युवयोर्विमोचनं विमोचयितारं रथं अर्वांचं यथा अस्मदभिमुखं भवति तथा युंजाथां। किं च मधुना स्वादुरसेन हवींषि पृं
क्तं संयोजयतं आगच्छतं। हि कं इति पूरणौ। अथानंतरं हे वाजिनीवसू वाज एव वाजिनी अन्नेन वाजयितारौ बल

द्वि॰भा॰८ ॥४०१॥

वर्धनो वा सोमं पिबतु ॥ ॥अथ षष्ठी॥ जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिं ॥ विश्वेभिर्विश्वाँ ऋ
तुना वसो मह उशन्देवाँ उशतः पायया हविः ॥ हे अग्ने समिधं जोषि जुषस्व आहुतिं पुरोडाशादिकं जोषि । जु
षस्व ॥ ब्रह्म ब्राह्मणं जन्यं जनेभ्यो हितं जोषि जुषस्व सुष्टुतिं शोभनस्तोत्रं जोषि जुषस्व । किंच वसो सर्वेषामावासभूत हे
अग्ने उशतः कामयमानान् महः महतः विश्वान् सर्वान् देवान् उशतः कामयमानस्त्वं ऋतुना तपस्यसंवत्सरेण सह त्वया वि
श्वेभिः सर्वैर्देवैः सह हविः हविरूपं सोमं पायय ॥ इति द्वितीयस्याष्टमे प्रथमो वर्गः ॥ ॥ उदु ष्य इत्येकादशर्चं षष्ठं सू
क्तं गार्त्समदं त्रैष्टुभं सावित्रं देवतार्थं अत्रानुक्रमणिका । उदु ष्य एकादश सावित्रमिति । व्यूढे दशरात्रे षष्ठेहनि वैश्वदे
वशस्त्र एतत्सूक्तं सावित्रनिविद्धानीयं व्यूढश्चेति खंडे सूत्रितं । षष्ठस्योदुष्य देव इति गार्त्समदमिति ॥ तत्र प्रथमा ॥
उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात् ॥ नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ॥ स
देवो द्योतमानः सविता तौ सवाय लोकानां प्रसवाय अनुज्ञायै शश्वत्तमं प्रतिदिनं उदस्थात् उत्तिष्ठति । वह्निः सं

श्रीः ॥४०१॥

२

॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ अथ द्वितीयस्याष्टकस्याष्ट
मोऽध्याय आरभ्यते ॥ ॥ द्वितीयमंडलस्य चतुर्थानुवाके मंदस्वेति षडृचं पंचमं सूक्तं गार्त्समदं । मंदस्वेत्यनुक्रांतं त्रिष्टु
भं तृतीयं तु जागतं ह्येति तुशब्दप्रयोगादिदमपि जागतं मंतव्यं । तत्राद्याश्चतस्र ऋचो द्रविणोदोदेवताकाः पंचम्याश्वि
नी षष्ठ्याग्नेयी । दशरात्रे षष्ठेहनि ऋतुयाजेषु प्रैषान् कृत्वाग्नीरस्कान् कृत्वा तैः प्रैषैः प्रेषितव्यं च तत्र सप्तमादीनां प्रैषाणा
मुपरिष्टात् मंदस्वेत्याद्याः षडृचः क्रमेण प्रक्षेपणीयाः सूत्रं तु पूर्वमेवोदाहृतं ॥ ॥ तत्र प्रथमा ॥ मंदस्व होत्रादनु जोष
मंधसोऽध्वर्यवः स पूर्णां वष्ट्यासिचं ॥ तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥ ॥ हे द्रविणो
दः द्रविणसो धनस्य दातः एतन्नामक हे देव अंधसः देवानामन्नरूपस्य सोमेन होत्रात् होतृकर्तृकाद्यागात् अनुजो
षं प्रीतिमनु मंदस्व हे अध्वर्यवः स द्रविणोदाः पूर्णां संपूर्णां आसिचं तिच्यवनमाहुतिं वष्टि कामयते अतस्तस्मै द्रवि
णोदाः ददिर्दाता युष्माकमभीष्टफलस्य दाता भवतीति शेषः ॥ किंच हे द्रविणोदाः होत्रात् हे तुयजिन् ऋतुभिः ऋतुमा

मुच्यते नूनमिपूरणः॥ अतमानं व्रितत्सततगच्छन्तमपिजनं एतोर्गमनात् अरीरमत् उपरमयति। किंच अह्यर्षू
णां अहिमाहंतारं शत्रुं अर्षंति अभिगच्छंतीयह्यर्षवः तेषामविष्यांगमनेच्छांन्ययान्नियच्छति सवितुः प्रेरकस्यसू
र्यस्य व्रतंकर्म अनुपश्चात् मोकी रात्रिः मोकी रोकी इति रात्रिः तन्नामसु पाठात्। आगात्। आगच्छति। सवितुश्चेष्टा
परतो रात्रिरागच्छतीतियावत्॥ ॥अथचतुर्थी॥ पुनः समव्यद्विततंवयंती मध्याकर्त्तोर्न्यधाच्छक्मधीरः। उत्सं
हायास्थाद्व्यृतूंरदर्धररमतिः सविता देव आगात्॥ ॥वयंती वस्त्रं वयंती नारीव रात्रिः विततं मासलोकं पुनः समव्य
त्। संवेष्टयते पुनः शब्दः पूर्वेद्युरप्येवमेवमकार्षीदिति द्योतयति। धीरः प्रज्ञोसि सवितालोकः कर्त्तोः क्रियमाण
कर्मकर्त्तो कर्त्तव्य इति तन्नामसु पाठात्। शक्म्यं कर्त्तुं शक्यमपि मध्या मध्ये उपरतं कर्म अपरिसमाप्तमेतीयर्थः। न्य
धात्। निहितवान् सवितर्युपरत इति शेषः। संहाय शय्यां विहाय उदस्थात् अवशिष्टं तथा च श्रूयते। कलिः शा
यानो भवति संजिहानस्तु द्वापर इति। सविता सर्वस्य प्रसविता सूर्यः अरमतिः अनुपरतिः देवः द्योतमानः आ श्री

गात् आगच्छत्। उदेतियावत्। नूनं कृत्वा विष्टीश्च व्यदर्दः विदारयतीति॥ ॥अथ पंचमी॥ नानौकांसि दुर्यो विश्वमा
युर्वितिष्ठते अधितिष्ठति विश्वमायुः सर्वमन्नं वाधितिष्ठति प्रभवः शोको अग्नेः॥ ज्येष्ठं माता सूनवे भागमाद
धादन्वस्यकेतमिषितंसवित्रा॥ प्रभवः प्रभूतः अग्नेः शोकः तेजः दुर्यः गृह्याः गृहे भवः। नानौकांसि यजमानानां पृथ
ग्भूतान् गृहान् वितिष्ठते अधितिष्ठति विश्वमायुः सर्वमन्नं वाधितिष्ठति। आयुरित्यन्ननामसु पाठात्। मा
ता सवित्रा अनिषितं अस्य केतं प्रज्ञापकं अग्नेः ज्येष्ठं प्रथमं अग्निहोत्राख्यं भागं सूनवे अग्नये आधात्। आदधा
ति॥ ॥इति द्वितीयस्याष्टमे द्वितीयो वर्गः॥ ॥अथ षष्ठी॥ समाववर्त्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरताममाभूत्।
शश्वाँ अपो विकृतं हित्व्यागादनुव्रतं सवितुर्दैव्यस्य॥ ॥जिगीषुः विजयमिच्छुः यो धावि ष्ठितः युद्धार्थं प्रस्थितः समाव
वर्त्तयति। सर्वेषां चरतां जंगमानां अमा अदम इति गृहनामसु पाठात्। गृहे प्रीतिकामाभूत् भवति। शश्वान् नित्यं कर्मरतो
अपः कर्म विकृतं अर्धकृतं हित्वी हित्वा आगात् गृहमागच्छति। एतत्सर्वं दैव्यात् देवभवस्य सवितुः प्रेरकस्य सूर्यस्य व्रतं अ

स्तमयाख्यं कर्मानुजायंत इत्यर्थः॥ ॥अथ सप्तमी॥ त्वया हितमप्यमप्सु भागं धन्वान्यनु मृगयसो वि तस्थुः॥ वना
नि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनंति॥ ॥हे सवितः त्वया अप्सु अंतरिक्षे आपः पृथिवीति। अंतरिक्ष
नामसु पाठात्। जलाधारेषु विहितं निहितं अप्यं अप्सु संबंधिनं भागं धन्वानु निर्जलप्रदेशेषु अरण्येषु यथा मृगयं
माणा मृगाः आसमंतात् वितस्थुः रक्षितिष्ठंति। किंच वनानि वृक्षाः विभ्यः पक्षिभ्यः आवासादिरूपेण त्वया भा
गो दत्तः अस्य ईशस्य तानि तादृशानि व्रतानि कर्माणि नकिर्मिनंति॥ ॥अथाष्टमी॥ ॥याद्राध्यं वरुणो योनिम
प्यमनिशितं निमिषि जर्भुराणः। विश्वो मार्तांडो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः॥ वरुणो याद्राध्यं पानी
यं साधनीयं अप्यं आप्तुं योग्यं अनिशितं अतीक्ष्णं सुखकरमिति यावत्। यानिस्थानं निमिषि निमेष सवितुर
स्तमये सति विश्रमार्थं प्राणिभ्यः प्रयच्छति वरुणस्य रात्रेर्निर्वाहकत्वात् जर्भुराणो भृशं गच्छन् विश्वः सर्वो मा
र्तांडो मृतात् अंडाद्भिन्नाद् उत्पद्यमानः पक्षी अगात् आगच्छति। विश्वः पशुरपि व्रजं गोष्ठमागात् सविता येषु स्थशः

सविता तदपाः तस्य सवकर्मा। यः अप्न इति कर्मनामसु पठितत्वात् वन्हेर्वोढा जगतो। किंच नूनं संप्रति देवेभ्यः स्तोतृभ्यो रत्नं
धनं विदधाति प्रयच्छति। हीति पूरणे। अथ अपि च वीतिहोत्रं कृतं तयज्ञं यजमानं स्वस्तौ अविनाशे क्षेमे अभजत् भागिनं करो
तु। स्वस्तिशब्दो विभक्त्यंतो निर्दिष्टः। त्रा पूरणस्तथाप्यध्यवसानार्थं परो भवति॥ ॥अथ द्वितीया॥ विश्वस्य हि श्रुष्ट
ये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति। आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन्॥ ॥देवो द्यो
तमानः सविता पृथुपाणिः महत्करः विश्वस्य श्रुष्टये जगतः सुखाय ऊर्ध्वः उद्गतः सन् बाहवा बाहू अप्रसिसर्ति प्र
सारयति॥ आपश्चिदापोपि अस्य प्रसवाख्ये कर्मणि सति व्रतं कर्वरमिति। तन्नामसु पाठात्। अस्य इदं तदिति शेषः।
तत्र निमृग्राः नितरां शोधयित्र्यः गंगादिरूपेण जगत्सर्वयंतीत्यर्थः। अयं चिद्वातः अयमपि वायुः परिज्मन् परित
गते व्याप्तेऽंतरिक्षे रमयते॥ ॥अथ तृतीया॥ आशुभिश्चिद्यान्वि मुचाति नूनमरीरमदतमानं चिदेतोः। अह्यर्षूणां
चिन्न्ययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात्॥ यातृगच्छन् सविता आशुभिश्चित् शीघ्रगामिभिरश्वैर्विमुंचति वि

स्थानेस्थानेजन्मानिजातानिभूतानिव्यापक्रुः पृथगकृषदित्॥ ॥अथनवमी॥ नयस्येंद्रोवरुणोनमित्रोव्रतमर्यमा
नमिनंतिरुद्रः॥ नारातयस्तमिदंस्वस्तिहुवेदेवंसवितारंनमोभिः॥ ॥सवितुर्देवस्यव्रतंप्रसवाख्यंकर्मइंद्रोनमिनाति
नहिनस्तिवरुणश्चनमितानिमित्रश्चार्यमाचनमिनातिरुद्रश्चनमिनातिअसरातयोसुराश्चनमिनंतिमिनातीतिश्रुत
माख्यातेयथायोगंविपरिणामेनप्रत्येकमभिसंबध्यते। तंसवितारंसर्वस्यप्रेरकंदेवंद्योतमानंइदमिदानींनमोभिर
न्नरूपैर्हविर्भिः सहनमः आयुरिष्यन्नामसूपठात्। स्वस्तिसोक्षेमायहुवेस्तौमि॥ ॥अथदशमी॥ भगंधियं
वाजयंतःपुरंधिंनराशंसोग्नास्पतिर्नोअव्याः॥ आयेवामस्यसंगथेरयीणांप्रियादेवस्यसवितुःस्याम॥ भगंभज
नीयंधियंध्यातव्यंपुरंधिंपुरस्यधारयितारंबहुप्रज्ञंवासवितारंपुरंधिर्बहुधीरितियास्कः वाजयंतःवाजिनंबलि
नंकुर्वंतःविभक्तिव्यत्ययः नक्षवतोस्मान्नराशंसःनरैःशंसनीयःग्नाःपातिःदेवस्यपत्नीर्नोपातिःछंदसांपतिर्वात
थाचश्रूयतेछंदांसिवैग्नाइति। उतग्नाव्यंतुदेवपत्नीरितिवासवितरव्याः॥ अव्यात्। आयेवामस्यधनस्यरयीणांप

ष्टूनां च। तथा च श्रूयते। दरो वा वैरयि रिति॥ आ ये आगमने संगमानु निमित्ते देवस्य द्योतमानस्य सवितुः प्रेरकस्य
वयं प्रियाः स्याम भवेम॥ अथैकादशी॥ अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आगात्। शं यत्स्तोतृ
भ्य आपये भवात्युरुशंसाय सवितर्जरित्रे॥ ॥ हे सवितः अस्मभ्यं त्वया दत्तं तत्प्रसिद्धं काम्यं कमनीयं राधो धनं
दिवः द्युलोकात् अद्भ्योंतरिक्षलोकात् पृथिव्या भूमेश्च आगात् आगच्छतु। किंच स्तोतृभ्यः स्तोतॄणाम् आपये बंधवे त
स्मै जायया धने शं सुखकरं भवाति भवेत्। उरुशंसाय बहुस्तुताय जरित्रे स्तोत्रे मह्यं जरिता। कूरुरिति स्तोत्रनाम
सुपाठात्। हे सवितः तत्प्रयच्छतु॥ ॥ इति द्वितीयस्याष्टमे तृतीयो वर्गः॥ ॥ ग्रावाणेवेत्यष्टर्चं सप्तमं सूक्तं गार्त्समदं
दं त्रैष्टुभं आश्विनं ग्रावाणेवाश्विनमित्यनुक्रांतं तत्ता तु। प्रवर्ग्ये अभिष्टवे पूर्ववत् पटलेस्य विनियोगः सूत्रितं च ग्रावा
णेव लेद्यावापृथिवी इति। प्रातरनुवाकाश्विनशस्त्रयोरपीदं सूक्तं सूत्रितं च ग्रावाणेव नासत्याभ्यामिति त्रीणी
ति॥ ॥ तत्र प्रथमा॥ ग्रावाणेव तदिदर्थं जरेथे गृध्रेव वृक्षं निधिमंतमच्छ॥ ब्रह्माणेव विदथ उक्थशासा दूतेव ह

व्याजन्यापुरुत्रा ॥ ॥ हे अश्विनौ ग्रावाणौ अरातिं प्रतिप्रेषितौ पाषाणाविव तदर्थं अर्थैर्न्ने धानौ रथ्यत्रा भूः । अर्थैर्नेति
तियास्कः ॥ तमरातिमित्यर्थः । इद्दि इरणः । जरेथे अरातिं अबाधेथां । दृष्टान्तः यथा गुरू ग्रावाणौ क्षिप्तौ तदानीमेव शत्रु घ्र
गच्छतः । तथा तत् तमर्थं गंतारं जरेथे गृध्रं गत्वास्कतमित्यर्थः । जरतिः स्तुतिकर्मा । क्विच गृध्रेव गृध्राविव पक्षिणावि
व वृक्षं फलितं वृक्षं निधिमंतं धनवंतं यजमानं अच्छ आगच्छतमिति शेषः । विदथे यज्ञे विदथः सवनमिति यज्ञनाम
स्कपाठात् । उक्थशासा उक्थशंसितारौ ब्रह्माणौ ब्राह्मणाविव जन्या जनपदेषु दूतेव राज्ञा प्रेषितौ दूताविव पुरुत्रा ब
हुभिः पुरुषैः हव्या ह्वातव्यौ युवामत्र उपमेयं द्वित्वानुसारेणोपमानं द्वित्वं ॥ ॥ अथ द्वितीया ॥ प्रातर्यावाणा रथ्येव वी
राजेव यमा वरमा सचेथे ॥ मेनेइव तन्वा३ शुंभमाने दंपतीव क्रतुविदा जनेषु ॥ ॥ हे अश्विनौ प्रातर्यावाणा प्रातरेव
यज्ञार्थं गंतारौ रथ्येव रथिनाविव धीरौ स्वकर्मणि शूरौ अजेव अजाविव यमा यमलौ मेनेइव नार्याविव तन्वा शरीरेण
शुंभमाने दंपतीव जायापती इव संगतौ जनेषु विषयेषु क्रतुविदा कर्मविदौ युवां वरं संभक्तारं आसचेथे आगच्छथ ।

अथतृतीया॥शृंगेवनः प्रथमागंतमर्वाकूछफाविवजर्भुराणातरोभिः॥चक्रवाकेवप्रतिवस्तोरुस्रार्वांचायातंरथ्ये
वशक्रा॥ ॥हेअश्विनौशृंगेवपक्षेः शृंगेइवप्रथमादेवानांप्रथमौशफाविवअश्वादेः खुराविवतरोभिर्वेगैः जर्भु
राणाभृशंगच्छंतौयुवांनोस्मान् प्रतिअर्वागभिमुखंआगतमागच्छतं। किंचहेअश्विनौवस्तोः प्रातः अहः प्रति
चक्रवाकेवचक्रवाकाविवउस्राउस्रौगमनशीलौवारथ्येवरथिनाविवशक्रास्वकर्मणिशक्तौअर्वांचौ
अस्मदभिमुखौयातंगच्छतं॥ ॥अथचतुर्थी॥नावेवनः पारयतंयुगेवनभ्येवनउपधीवप्रधीव॥श्वानेवनोअर
रिषण्यातनूनांखृगलेवविस्रसः पातमस्मान्॥ ॥हेअश्विनौनावाइवनावाविवसिंधूंश्चनोस्मान्दुर्गाणिपार
यतंयुगाइवरथारथस्ययुगेनभ्याइवरथारथचक्रनाभिफलकेउपधीइवरथातस्यान्र्वस्थेफलकेप्रधीइवय
थावाचक्रबाह्यवलयौरथेपारयततथानोस्मान्दुर्गाणिपारयतं। किंचश्वानेवश्वानाविवयथाश्वानौबाध
केभ्योरक्षतौतन्नोहिंसामपनयतः तथानोस्माकंतनूनांअंगानामरिषण्यावहिंसकौभवतं। खृगलाइवतनु

त्रेण तनुहिंसपो रक्षसः तथा विस्रसः जरायाः अस्मान्युवां पातं॥ ॥अथ पंचमी॥ वातेवाजुर्या नद्येव रीतिरक्षी
व चक्षुषा यातमर्वाक्॥ हस्ताविव तन्वे३ शंभविष्ठा पादेव नो नयतं वस्यो अच्छ॥ ॥हे अश्विनौ वाता इव वाताविव अ
जुर्या जरयितुमशक्यौ नद्या इव नद्याविव रीतिः व्यत्ययेनैकवचनं गमनशीलौ युवां अक्षी व चक्षुषा दर्शनेन अर्वागस्म
दभिमुखं आयातमागच्छतं॥ किंच हस्ता इव हस्ताविव पादाविव तन्वे शरीराय शंभविष्ठा सुखस्य भावयितारौ
युवां नोस्मान् वस्यः वसीयः श्रेष्ठं धनं अच्छ अभि नयतं॥ ॥इति द्वितीयस्याष्टमे चतुर्थो वर्गः॥ ॥अथ षष्ठी॥ ओ
ष्ठाविव मध्वास्ने वदंता स्तनाविव पिप्यतं जीवसे नः॥ नासेव तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे॥ ॥हे
अश्विनौ ओष्ठाविव आस्ने आस्याय मधुरस्य वक्तृवचनं वदंतौ स्तनाविव नः अस्मान् जीवसे जीवनाय पिप्यतं॥ किंच न
सेव नासिके इव नः अस्माकं तन्वः तनोः रक्षितारा रक्षितारौ भूतं भवतं अपि च कर्णाविव अस्मे अस्माकं सुश्रुता
सुश्रवणौ युवां भूतं भवतं॥ ॥अथ सप्तमी॥ हस्तेव शक्तिमभि संददी नः क्षामेव नः समजतं रजांसि॥ इमा गिरो अ

द्वि॰भा॰८
॥४५९॥

श्विना युष्मयंतीः क्ष्णोत्रेणेव स्वधितिं संशिशीतं ॥ ॥हे अश्विनौ हस्ताइव हस्ताविव शक्तिं सामर्थ्यं नोस्माकं अभि
संददी आभिमुख्येन सम्यक् प्रयच्छंतौ भवतं । किंच क्षामाइव रोदसी वरजांसि स्थानानि उदकानि वा उदकं रजउ
च्यत इति यास्कः ॥ नोस्माकं समजतं प्रेरयतं । अश्विना हे अश्विनौ इमा गिरः अस्माभिः कृताः स्तुतीः युष्मयं
तीः युवामिच्छंतीः स्वधितिमसिं क्ष्णोत्रेणेव तेजनसाणनात्त संशिशीतं सम्यक् तीक्ष्णीकुरुतं ॥ ॥अथाष्टमी॥
एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन् ॥ तानि नरा जुजुषाणोप यातं बृहद्वदेम विदथे
सुवीराः ॥ ॥अश्विना हे अश्विनौ वां युवयोः एतानि वर्धनानि वृद्धिसाधनानि ब्रह्म ब्रह्माणि मंत्रान् स्तोमं स्तोत्रं
गृत्समदासो गृत्समदाः अक्रन् अकुर्वन् तानि ब्रह्माणि नरा नेतारौ जुजुषाणा भजं प्रीयमाणौ युवामुपयातं उप
गच्छतं । किंच सुवीराः शोभनपुत्रा वयं विदथे यज्ञे युवां बृहद्वदेम प्रभूतं स्तोमं ॥ ॥इति द्वितीयस्याष्टमे पंचमो व
र्गः ॥ ॥सोमापूषणा षळृचमष्टमं सूक्तं गार्त्समदं त्रैष्टुभं सोमापूषदेवताकं । तथा चानुक्रांतं । सोमापूषणा षट्

श्रीः
॥४५९॥
७

सोमापूषणमंसोर्धर्चेष्वपि दितेरिति। अत्र तु देव्यदितिरित्येतस्यां सार्धर्चस्यादितिर्देवता। सोमापूषभ्यां पशुर्गवपापुरोडाशहविष
मादाग्निस्त्वः क्रमेणानुवाक्याः उत्तराग्निस्तोयाज्याः अग्नीषोमाविति खंडे सूत्रितं। तत्र प्रथमा॥ सोमापूषणाजननारयी
णां जननादिवो जननापृथिव्याः॥ जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिं॥ ॥सोमापूषणा हे सोमा
पूषणौ युवां रयीणां धनानां जनना जनयितारौ दिवः द्युलोकस्यापि जनना जनयितारौ पृथिव्याः पृथिव्याश्च जनयितारौ
भवतः। युवां च जातौ जातमात्रावेव भुवं विश्वस्य भुवनस्य कृत्स्नस्य जगतः गोपौ गोप्तारौ देवाः अमृतस्यामरस्य नाभिं हेतुम
कृण्वन् अकार्षुः॥ ॥अथ द्वितीया॥ इमौ देवौ जायमानौ जुषंतेमौ तमांसि गूहतामजुष्टा॥ आभ्यामिंद्रः पक्वमामास्वंतः सोमा
पूषभ्यां जनदुस्रियासु॥ ॥इमौ सोमापूषणौ देवौ द्योतमानौ जायमानौ उत्पन्नमात्रावेव जुषंत सर्वे देवा आजुषंत सेवितवं
तः इतियावत्। किंच इमौ सोमापूषणौ अजुष्टा असेव्यानि तमांसि सर्वस्य गूहतां नाशयतः। किंच आभ्यामेवाभ्यां सोमापूषणा
भ्यां सह इंद्र आमासु तरुणीषु उस्त्रियासु गोषु तमध्ये ऊधःप्रदेशं परिपक्वं पयो जनत् अजनयति॥ ॥अथ तृतीया॥ सोमा

पूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वं ॥ विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पंचरश्मिं ॥ सोमापूषणा हे सो
मापूषणौ रजसो लोकस्य रजांस्युच्यंत इति यास्कः ॥ विमानं परिच्छेदकं सर्वतमित्यर्थः ॥ सप्तचक्रं सप्तर्तुचक्रं त्रयोदशो मासः
सप्तमऋतुः अधिकत्रयोदशो मास इति श्रुतेः । अविश्वमिन्वं विश्वस्य परिच्छेदकं विषूवृतं विषु सर्वत्र परिवर्त्तमानं पंचरश्मिं
चतुरश्मिं हेमंतशिशिरयोः समासेन पंचर्त्तवः पंच । तथा च श्रूयते । द्वादश मासाः पंचर्त्तवो हेमंतशिशिरयोः समासेनेति । म
नसा युज्यमानं तं प्रसिद्धं जिन्वथः अस्मान्प्रति प्रेरयथः ॥ ॥ अथ चतुर्थी ॥ दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो
अध्यंतरिक्षे ॥ तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं विष्यतां नाभिमस्मे ॥ ॥ अन्यस्तयोरेकः पूषा उच्चा उच्चे उत्कृष्टे दिवि द्यु
लोके सदनं स्थानं चक्रे चकार अन्यो अपरः सोमः पृथिव्यामोषधिरूपेण अध्यंतरिक्षे चन्द्ररूपेण सदनं चक्रे चकार सोमापूष
णौ युवां पुरुवारं बहुभिर्वरणीयं पुरुक्षुं बहुकीर्त्तिं रायस्पोषं धनस्य पुष्टिं पशवात्मकं धनमित्यर्थः ॥ तथा च ब्राह्मणं । पशवो वै रायस्
पोष इति । अस्मे अस्माकं नाभिं विश्वस्य प्रोगहेतुं अस्मभ्यं विष्यतां विमुंचतां प्रयच्छतामित्यर्थः ॥ अथ पंचमी ॥ विश्वान्यन्यो

भुवनाजजानविश्वमन्योअभिचक्षाण एति॥ सोमापूषणावव तं धियंमेयुवाभ्यां विश्वाः पृतनाजयेम॥ हे सोमापूषणौ
अन्यः युवयोरेकः सोमः विश्वाभिभुवनाजजान अजनयत्। तथा च मंत्रः॥ सोमः पवते जनितामतीनाम तीनामिति। अन्यः
अपरः पूषा दिव्यो विश्वमभिचक्षाणः अभिपश्यन्नेतिगच्छति। तौ युवां सोमापूषणौ मे धियं कर्म धीः शचीति कर्मनामसु पाठा
त्। अवत रक्षत। किंच वयं युवाभ्यां विश्वाः पृतनाः सर्वाः शत्रुसेन्याः जयेम अभिभवेम॥ ॥अथ षष्ठी॥ धियं पूषा जिन्व
तु विश्वमिन्वो रयिं सोमो रयिपतिर्दधातु॥ अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः॥ पूषा दिव्यो विश्वमिन्वः विश्व
स्य प्रीणयिता धियमस्मदीयं कर्म जिन्वतु तर्पयतु रयिपतिर्धनपतिः। सोमः रयिं धनं दधातु अस्मभ्यं ददातु। किंच देवी
द्योतमाना अनर्वा अप्रहृता केनापि प्रातिकूल्यमप्रापिता अदितिः अवतु। अस्मान् रक्षतु अन्यत्सिद्धं॥ ॥इति द्विती
यस्याष्टमे षष्ठो वर्गः॥ ॥वायो इत्येकविंशत्यृचं नवमं सूक्तं गार्त्समदं गायत्रं ऐंद्रवितमइतिषट्सु स्य ऋचस्य आदितो द्वे अ
नुष्टुभौ तृतीया बृहती वायो ए ते इत्याद्यके द्वे ऋचौ वायव्यौ तृतीयस्याः प्रेषैं दे वायवी अयं वां मित्रावरुणेति पंचानाम् चां मित्राव

रुणावग्निर्विनाविंद्राविश्वेदेवाः सरस्वतीतिक्रमेण देवताः प्रेतां यज्ञस्येयं तस्तृचो ब्राह्मणस्त्रयोर्हविर्धानप्रवर्त्तने द्यावा
पृथिव्यनिविहानसत्वेन चाविनियुक्तत्वात्। द्यावापृथिव्योर्हविर्धानदेवत्योवा। अग्निं च हव्यवाहनमिति पादोग्निदेव
त्योवा। तथा चानुक्रांतं। वायोसैवृगायत्र्युक्ता देवताः प्रउगेण्ण द्वौ तु तृचौ द्वयायवी द्यावापृथिव्योर्यस्तृचो हविर्धानोवान्त
तीयः पादोवाग्नेयो द्वितमेनुष्टुभो बृहतीत्येति। पृष्ठ्याभिप्लवषडहयोर्द्वितीयेहनि प्रउगेयस्तृचवर्जमेतस्सं नं वायस्पत
चस्पवायोयेते सहस्त्रिणइत्यौ द्वौ तृचौ ऐंद्रवायवतृचस्य शुक्रस्याद्येषा तृतीया। तथा च सूत्रितं। वायोयेते सहस्त्रि
ण इति द्वे तीव्राः सोमासआगहीत्येकाउभादेवादिविस्पृशेति। द्वे तृतृक्स्याद्य गवाशिर इत्येकाअयं वां मित्रावरुणआ
नो मित्रावरुणेति तृचा इति सूत्रितत्वात्। आ द्यामित्रावरुणाग्रहण्यानुवाक्या सूत्रिते च। मैत्रावरुणस्य अयं वां मित्रावरुणे
ति प्रातरनुवाकश्विन इन्द्रयो गायत्रे छंदसी॥ गोमद्धिरण्वविन्तिस्तृचो विनियुक्तः गोमदूषुनासत्येति तृचा इति सूत्रितत्वात्
अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे इंद्रो अंग महद्भयमितितृचः अतिरात्रे पर्यायाणामिति खंडेसूत्रितं। इंद्रो अंग

महद्धयमभिन्यृषु वाचमिति। आग्रयणवैश्वदेवस्य हविषो विश्वेदेवा स इत्यनुवाक्या। आग्रयणमित्ति तिरखंडे सूत्रितं।
विश्वेदेवास आगत येवे चजमामहिनो अहिमाया इति। द्वितीये रात्रे प्रथमे हनि प्रउगशस्त्रमंवितमेन दीनमइति सारस्व
तः सप्रमस्तृचस्तृचः चतुर्थे हनी। तिरखंडे सूत्रितं। अंबितमेन दीतमइत्यनुष्टुभं प्रउगमिति। व्यूढे द्वादशरात्रे प्रथमे छंदो
मे वैश्वदेवशस्त्रे प्रतां यज्ञस्य शंभुवेति द्यावापृथिव्य निविद्धानी सूक्तं। अथ छंदोमा इति खंडे सूत्रितं। प्रतां यज्ञस्य शंभु
वया इवं यतमानेय दैतमिति॥ ॥तत्र प्रथमा॥ वायो ये ते सहस्त्रिणो रथासस्तेभिरागहि॥ नियुत्वान्सोमपीतये॥ हे वा
यो ते तव दीया ये सहस्त्रिणः सहस्रसंख्याकाः रथासः रथाः तेभिस्तैर्नियुत्वान् नियुद्भिर्युक्तः त्वं सोमपीतये सोमपाना
र्थमागत्यागच्छ। नानारूपत्वात्वायोः सर्वाग्निर्विभूतिभिः सहागमनं प्रार्थ्यत इति भावः॥ ॥अथ द्वितीया॥ नियुत्वान्वा
यवागह्ययं शुक्रो अयामि ते। गंतासि सुन्वतो गृहं॥ हे वायो नियुत्वान् नियुतो वहनानि वायोः तैर्युक्तः त्वं आगच्छ आगच्छ।
अयं शुक्रो दीप्यमानः सोमः ते तुभ्यं आयामि नियुतो गृहीत आसीत् अयामः वूर्मणि तुरु। सोमेनाभिषवं कुर्वतो यजमानस्य

द्वि॰ भा॰
॥४९७॥

गृहं गंतासि यातासवसि॥ ॥अथ तृतीया॥ शुक्रस्याद्यगवाशिर इंद्रवायू नियुत्वतः। आयातं पिबतं नरा हे नरा नेता
रौ हे इंद्रवायू अद्यास्मिन्नहनि नियुत्वतः विभक्तिव्यत्ययः। नियुत्वंतौ युवां गवाशिरः गवां पयः आशिरः आश्रयणसाध
नं यस्य शुक्रस्य दीप्तस्य सोमस्य पानार्थं आयातं आगच्छतं। आगत्य सोमं पिबतं॥ ॥अथ चतुर्थी॥ अयं वां मित्राव
रुणा सुतः सोम ऋतावृधा॥ ममेदिह श्रुधी हवं॥ ॥मित्रावरुणा हे मित्रावरुणौ युवाभ्यां अयं सोमः सुतः अभिषुतः
ऋतावृधा हे सत्ययज्ञस्य वा वर्धयितारौ ममे तममैव हवमाह्वानं श्रुतं शृणुतं॥ ॥अथ पंचमी॥ राजानावनभिद्रुहा ध्रुवे स
दस्युत्तमे। सहस्रस्थूण आसाते॥ ॥राजानौ दीप्यमानौ वा अनभिद्रुहा अनभिद्रोग्धारौ यौ मित्रावरुणौ ध्रुवे स्थिरे
उत्तमे उत्कृष्टे सहस्रस्थूणे सदसि स्थाने आसाते उपविशतः तावागच्छतमिति शेषः॥ ॥इति द्वितीयस्याष्टमे सप्तमो वर्गः॥
अथ षष्ठी॥ ता सम्राजा घृतासुती आदित्या दानुनस्पती॥ सचेते अनवह्वरं॥ सम्राजौ आहुतयैव सर्वेषां शास्तारौ ॥श्री ॥४९७॥
घृतान्नावक्षितिमेत्रौ तरातः। आदित्या अदितेः पुत्रौ दानुनस्पती दानुनो दानुनस्पती देयस्य वा धनस्पति स्वामिनौ

१०

तातौ मित्रावरुणौ अनहृरं अकुटिलं यजमानं सचेते। सेवेते॥ ॥अथसप्तमी॥ गोमदूषु नासत्याश्वावद्यातमश्विनावर्त्ती
रुद्रा नृपाय्यं॥ ॥अश्विना हे अश्विनौ हे नासत्या अनृतभाषणरहितौ हे रुद्रौ रोरूयमाणौ द्रवं तौ युवां वर्त्तिः मार्गः तेन मा
र्गेण रथेन नृपाय्यं नृभिः नेतृभिः देवैः पातव्यं सोमं गोमत् गोमद्यथा भवति तथा यातं गच्छतं कुरुष्व इति पूरणो॥ ॥अथा
ष्टमी॥ ॥नयत्स्वयो नोतरआदधर्षद्वृषण्वसू॥ दुःशंसं मर्त्यं रिपुं॥

अथनवमी॥ तानआवोळ्हमश्विना रयिं पिशंगसंदृशं॥ धिष्ण्या वरिवोविदं॥ ॥हे धिष्ण्या धिषण्यार्हौ अश्विना हे अश्विनौ
तौ युवां पिशंगसंदृशं पिशंगं नानारूपं वरिवोविदं धनस्य लंभकं रयिं पशुं नो अस्मभ्यं आवोळ्हं आवहतं॥ ॥अथदशमी॥
इंद्रे अंग महद्भयमभीषदपचुच्यवत्। सहिस्थिरो विचर्षणिः॥ ॥इंद्रो महत् अधिवृं अभीषवत्। अभिभवत्। भयं दूरं भ

यत्कारणं अपवृश्चवत् । अपच्छादयत् । यस्मात्कारणात् स स्थिरः । केनापि चालयितुमशक्यः । विचर्षणिः । विश्वस्य द्रष्टा ॥ ॥ इति द्वितीयस्याष्टमेऽष्टमो वर्गः ॥ ॥ अथैकादशी ॥ इंद्र श्च मृळयाति नो न नः पश्चादघं नशत् । भद्रं भवाति नः पुरः ॥ इंद्रः परमैश्वर्यवानिंद्रश्चेत् नोस्मान् मृळयाति सुखयेत् । पश्चात् पृष्ठतः नोऽस्मान् अघं दुरितेन न शत न प्राप्नोति । नोस्माकं पुरः पुरस्तादग्रे कल्याणं च भवाति भवति ॥ ॥ अथ द्वादशी ॥ इंद्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । जेता शत्रून् विचर्षणिः ॥ विचर्षणिः विविधस्य द्रष्टा जेता शत्रून् असुरान् जेता तन्नेतत्तादृषस्य भावः । इंद्रः परमैश्वर्यवान् सर्वाभ्य आशाभ्यो दिग्भ्यः अस्माकं अभयं करतु करोतु परितः पंचमीद्योतकः ॥ ॥ अथ त्रयोदशी ॥ विश्वेदेवास आगत शृणुता म इमं हवं । एदं बर्हिर्निषीदत ॥ विश्वे देवासः हे विश्वेदेवाः आगत आगच्छत मे मदीयं इमं आह्वानं शृणुत इदं बर्हिर्निषीदत उपविशत ॥ ॥ अथ चतुर्दशी ॥ तीव्रो वो मधुमां अयं शुनहोत्रेषु मत्सरः । एतं पिबत काम्यं ॥ हे विश्वेदेवाः तीव्रः तीव्रमदः मधुमान् रसवान् मत्सरः मदकरः सोमो यं युष्मदर्थं शुनहोत्रेषु गृत्समदेषु अस्मा ॥५१८॥

स्मस्थितः वृणध्वं वृमनीयमेतत्सोमं पिबत॥ ॥अथ पंचदशी॥ इंद्रज्येष्ठा मरुद्गणा देवासः पूषरातयः॥ विश्वे मम श्रुता हवं॥
॥हे इंद्रज्येष्ठाः इंद्रपुरोगमा मरुद्गणाः मरुत्समूहरूपाः पूषरातयः पूषाख्यो देवो रातिर्दाता येषां ते पूषरातयः देवासः हे
द्योतमाना देवाः विश्वे सर्वे यूयं मम मदीयं हवमाह्वानं श्रुत शृणुत इंद्रज्येष्ठाद्यः संबोधनंताः॥ ॥इति द्वितीयस्याष्टमे
नमो वर्गः॥ ॥अथ षोडशी॥ ॥अंबितमे नदीतमे देवितमे सरस्वति। अप्रशस्ता इव स्मसि प्रशस्तिमंब नस्कृधि॥ ॥अंबि
तमे मातॄणां श्रेष्ठे। नदीतमे नदीनां श्रेष्ठे देवितमे देवीनां श्रेष्ठे हे सरस्वति अप्रशस्ता इव धनाभावादसमृद्धा इव वयं स्मसि
भवामः। हे अंब हे मातः सरस्वति नोऽस्मभ्यं प्रशस्तिं धनसमृद्धिं कृधि कुरु प्रयच्छेत्यर्थः॥ ॥अथ सप्तदशी॥ त्वे विश्वा सर
स्वति श्रितायूंषि देव्यां॥ शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः॥ हे सरस्वति देव्यां द्योतमानायां त्वे त्वयि विश्वा विश्वानि सर्वाण्या
यूंषि अन्नानि आयुःसन्ततेस्य जननमस्य पाठात् श्रुता आश्रितानि सा त्वं शुनहोत्रेषु मत्स्व गृत्समदेष्वस्मासु विषयेषु मत्स्व सो
मपानेन तृप्यस्व। किंच हे देवि सरस्वति नः अस्मभ्यं प्रजां दिदिड्ढि॥ पुत्रान् देहि॥ ॥अथाष्टादशी॥ इमा ब्रह्म सरस्वति जुषस्व वा

जिनीवति॥ या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति॥ ॥हे वाजिनीवति अन्नवति ऋतावरि उदकवति हे सरस्वति
इमा इमानि ब्रह्माणि हवींषि जुषस्व स्वीकुरु॥ यानि मन्म मननीयानि देवेषु प्रिया देवानां मध्ये तुभ्यं प्रियाणि वर्तन्ते त्वदर्थं गृत्सम
दा जुह्वति॥ ॥अथैकोनविंशी॥ प्रेतां यज्ञस्य शंभुवा युवामिदा वृणीमहे। अग्निं च हव्यवाहनं॥ यज्ञस्य यागस्य शंभुवा सुखस्य स-
खस्य संपादकौ हविर्धाने अनसी तद्रूपे द्यावापृथिव्यौ वा प्रेतां वेदेः पश्चिमभागं प्रतिगच्छतां॥ अथ प्रत्यक्षकृतः युवामिता यु
वामेव आवृणीमहे प्रार्थयामहे हव्यवाहनमग्निं च आवृणीमहे अग्निरत्र निपातभागिति॥ ॥अथ विंशी॥ ॥द्यावा नः
पृथिवी इमं सिध्रमद्य दिविस्पृशं॥ यज्ञं देवेषु यच्छतां॥ द्यावा द्यौः पृथिवी च उभे सिध्रं स्वर्गादेः साधकं दिविस्पृशं देव्य
न्तगच्छन्तं नः अस्माकं इमं यज्ञं देवेषु यच्छतां नियच्छतां॥ ॥अथैकविंशी॥ आ वामुपस्थमद्रुहा देवाः सीदंतु यज्ञियाः।
इहाद्य सोमपीतये॥ अद्रुहा द्रोहवर्जिते हविर्धाने तद्रूपे द्यावापृथिव्यौ वां युवयो रुपस्थं समीपं यज्ञियाः यज्ञार्हा देवा इह ॥४१॥
यज्ञे अद्यास्मिन्नहनि सोमपीतये सोमपानाय आसीदंतु॥ ॥इति द्वितीयस्याष्टमे द्वाविंशो वर्गः॥ ॥वृषन्निन्द्र इति तृचं द्वादशं सू

त्कं॥ अत्रैवमनुक्रमणिका॥ कनिक्रदत्त्र्यृचमितिमंडलद्रष्टा गृत्समदोस्य ऋषिः त्रिष्टुप् छंदः कपिंजलरूपी इंद्रो देवता वयसा
मम नो त्यो वाचं श्रुत्वैतत्सूक्तं जपेत्॥ सूत्रितं च। वयसा मम नो त्यो वाचः श्रुत्वा कनिक्रदज्जनुषं प्रब्रुवाण इति सूक्ते जपेदिति॥
तत्र प्रथमा॥ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावं। सुमंगलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत्॥
कनिक्रदत् पुनः पुनः शब्दायमानः जनुषं जनिष्यमाणमर्थं प्रब्रुवाणः सूचयन् कपिंजलः अरितेव कर्णधार इव नावं वाचं इय
र्ति प्रेरयति। अथ प्रत्यक्षकृतः। हे शकुने कपिंजल त्वं सुमंगलः प्रकृष्टकल्याणश्च भवासि भव। किंच। काचिदभिभा कापि अभिभ
वः। त्वा त्वां विश्व्या विश्वतः सर्वस्मा दिक्षु मा विदत् मा प्रापयत्। शकुनिः शकुन्तो स्मिन्नेतु मामस्मान्यत्कंदी जन्म प्रब्रुवाणो यथास्य दृढः
तथा नामेरयति वाचमीरयितेव। नावं सुमंगलश्च शकुने भव कल्याणमंगलो मंगलं गिरतेर्गृणातेर्या गिरयन्तथा न्विवितियास्कः॥
अथ द्वितीया॥ ॥ मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता। पित्र्यामनु प्रदिशं कनिक्रदत्सुमंगलो भद्रवादी व
देह॥ ॥ हे शकुने त्वा त्वां श्येनः प्रबलः पक्षिविशेषो मा वधीत् मा हिंसीत्। तथा इषुमान् बाणवान्वीरः अस्ता क्षेप्ता धन्वी

द्वि.भा.८
॥४२०॥

सा त्वां मा विदत्। मा प्रापयतु। किंच पित्र्यां प्रदिशं दक्षिणां दिशं अनुदक्षिणस्यां दिशीत्यर्थः। कनिक्रदत् पुनः पुनः शब्दं कुर्वन् सु-
मंगलः भद्रवादी सन् इह अस्मिन्विषये वद। मंगलं सूचय॥ ॥अथ तृतीया॥ अवक्रंद दक्षिणतो गृहाणां सुमंगलो भद्रवादी शकु-
न्ते॥ मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः॥ ॥शकुंते हे कपिंजल त्वं सुमंगलो भद्रवादी च सन् गृहाणां दक्षिणस्यां
दिशि अवक्रंद। शब्दं कुरु। दक्षिणतः शब्दायमानः शकुंतो मंगलसूचको हि नो अस्मान् स्तेनः स्तेनो मा ईशत। मा ईष्ट। अघ-
शंसः अनर्थानीशंसकोऽपि मे मा ईष्ट। उत्तमपादो व्याख्यातचरः॥ ॥इति द्वितीयस्याष्टमे एकादशो वर्गः॥ ॥प्रदक्षिणिदिति त्र्यृचमे-
कादशं सूक्तं गार्त्समदं जागतं तथाद्यानुक्रांतं। प्रदक्षि जागतं मध्ये तिष्टुबंत्यष्टिर्वेति। द्वितीयातिशक्वरी अष्टिर्वा इतरे जगत्यौ
कपिंजलरूपी इंद्रो देवता। वयसामममनोत्तौ वास्तंश्रुत्वा प्रदक्षिणिदिति सूक्तं जपेत्। सूत्रं प्रागेवोदाहृतं। ॥तत्र प्रथमा॥ प्रदक्षिणि-
दभि गृणंति कारवो वयो वदंत ऋतुथा शकुंतयः। उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति॥ शकुंतयः कपिंजलाः
ऋतुथा काले काले वयोऽन्नं वदंतः वर्धयंतः कारवः स्तोतार इव प्रदक्षिणित् प्रदक्षिणं अभिगृणंति अभिवदंतु बकुवनेरजार्थं। बु

श्री
॥४२०॥

१३

च। उभे वाचौ गानां आनश्च। सामगा यत्रं त्रैष्टुभं च सामनीव शकुनिर्वदति। अनुराजति च शृण्वतो रनुरक्तान् करोतीत्यर्थः॥ अथ द्वि
तीया। उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि। वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद वि
श्वतो नः शकुने पुण्यमा वद॥ हे शकुने हे कपिंजल उद्गातेव साम यथोद्गाता साम गायति तद्वत् गायसि। मानस्वनं करोषि। ब्रह्म
पुत्र इव यथा ब्राह्मणाच्छंसी सवनेषु शस्त्राणि शंसति। कुलेषु शंसति श्रोतृस्वरं करोषि। वृषेव वाजी सेचनसमर्थोऽश्वः शि
शुमतीर्वडवा अपीत्य शब्दं करोति तथा त्वमपि वद। शिष्टं स्पष्टं॥ ॥अथ तृतीया॥ आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः
सुमतिं चिकिद्धि नः॥ यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम सुवीराः॥ ॥ हे शकुने हे कपिंजल आवदन् शब्दं कुर्वंस्त्वं भद्रमावद मंगलं
वद तूष्णीमासीनः तूष्णीं तिष्ठन्नपि नोऽस्माकं सुमतिं चिकिद्धि। बुध्यस्व। यदुत्पतन्वदसि कर्करिर्यथा कर्करीव वदसि। क
र्करिर्वाद्यविशेषः। अन्यद्व्याख्यातं॥ ॥ इति द्वितीयस्याष्टमे द्वादशो वर्गः॥ ॥ इति द्वितीये मंडले चतुर्थोनुवाकः॥ समाप्तं च द्विती
यं मंडलं॥ वैश्वामित्रे तृतीये मंडले चतुर्थोनुवाकाः। तत्र प्रथमेनुवाके द्वादश सूक्तानि। तत्र सोमस्येति त्रयोविंशत्यृचं प्रथमं सूक्तं। तथा

चानुक्रांतं। सोमस्य त्र्यधिकेति। अस्य मंडलस्य द्रष्टा विश्वामित्र ऋषिः। अनुक्तत्वात्त्रिष्टुप्छंदः। मंडलादित्वादाग्नेयमिति पारि
भाषयाग्निर्देवता। प्रातरनुवाकाश्विनशस्त्रयोः त्रैष्टुभे छंदसि विनियोगः। तथा च सूत्रं। सोमस्य मा तवसं प्रयस्व्यग्निरिति त्रीणि
ति॥ ॥तत्र प्रथमा॥ सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै। देवाँ अच्छा दीद्यद्युंजे अद्रिं शमाये अग्ने तन्वं जुषस्व॥ हे
अग्ने त्वं विदथे यजध्यै यष्टुं सोमस्य वह्निं वोढारं मा मां चकर्थ ततवानसि। तवसे तव स्विनं बलिनं वक्षि वह मय स्वा। किंच हे अग्ने देवा
न्यच्छ अभिदीद्यत् दीप्यमानोहं अद्रिं ग्रावाणं युंजे अभिषवणाय युनज्मि। शमाये सर्वं स्या स्विव। तथा च मंत्रांतरं। सो अग्न ईजे
शशमे च मर्तानिति। किंच। हे अग्ने तन्वं शरीरं जुषस्व। रक्षायै सेवस्व। यद्वा मूर्णि। तत्सं मां सेवस्वेत्यर्थः॥ ॥अथ द्वितीया॥ प्रांचं य
ज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन्। दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः॥ हे अग्ने वयं प्रां
चं प्रवृद्धं गच्छंतं यज्ञं चकृम अकार्ष्म। गीः मदीया स्तुतिर्वर्धतां एधतां। अग्निं समिद्भिर्नमसा हविषा च दुवस्यन् अस्मदीयाः परिचरे
युः। किंच दिवो द्युलोकाद्वागत्य देवाः कवीनां स्तोतॄणां विदथा ज्ञानानि स्तोत्राणि शशासुः। अन्वशिषन्। अपि च गृत्साय गृणातेरि
दं रूपं। स्तोतव्यायाग्नये तवसे वृद्धाय गातुं स्तोत्रं ईषुरिच्छन् स्तोतार इच्छंति। दिविदिति चार्थे॥ ॥अथ तृतीया॥ मयो दधे मेधिरः पूत ॥४२१॥

दक्षो दिवः सुबंधुर्जनुषा पृथिव्याः ॥ अविंदन्नु दर्शतमप्स्वंतर्देवासो अग्निमपसि स्वसॄणां ॥ ॥मेधिरः मेधावान् प्राज्ञः पूतद
क्षः शुद्धबलः जनुषा जन्ममात्रेण सुबंधुः शोभनबंधुः स्वत एव बंधुरित्यावत् ।योऽग्निर्दिवो द्युलोकस्य पृथिव्या भूमेश्च मयः सुखं
दधे। विदधाति। देवानां मनुष्याणां च सुखं करोतीत्यर्थः। दर्शतं दर्शनीयमग्निं देवासो देवाः स्वसॄणां सरणशीलानामप्स्वंत
र्मध्ये स्थितं अपसि यज्ञवाहनरूपे कर्मणि निमित्ते। उ इति पूरणः। अविंदन् लब्धवंतः ॥ अथ चतुर्थी॥ अवर्धयन्सुभगं सप्त य
ह्वीः श्वेतं जज्ञानमरुषं महित्वा। शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुष्यन्॥ सप्त सर्पणशीलाः यह्वीर्यह्वयः महत्यो नद्यः सुभ
गं शोभनं धनं श्वेतं शुभ्रं जज्ञानं जातं महित्वा महत्वेन अरुषमारोचमानं अप्सु स्थितमग्निमवर्धयन् स्ववीर्येणाभिवृद्धिं प्रापित
वत्यः यद्वा दिव्यमग्निं आपो वर्धयंति अग्निंधनत्वात्तस्य वृद्धिं च। शिशुं न जातं यथा जातं शिशुं अश्वा वडवा अभ्यारुः अभिगच्छंति तथा न
द्यः उद्यन्तमग्निं अभ्यारुः अभिजग्मुः। अपि च देवासः देवाः अग्निं जनिमन् जन्मन्युदये वा वपुष्यन् वपुः शोभितमकुर्वन्॥ ॥अथ पंचमी॥
शुक्रेभिरंगै रज आततन्वान्क्रतुं पुनानः कविभिः पवित्रैः। शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः॥ अग्निः शुक्रेभिः शुक्लैरंगैः
तेजोभिः तेजोंतरिक्षमाततन्वान् व्याप्नुवन् क्रतुं कर्मणां कर्तारं यजमानं कविभिः क्रांतप्रज्ञैः स्तोतव्यैश्च पवित्रैः शोधकैः तेजोभिः पुना

नः शोधयन् शोचिर्दीप्तिं वस्त्रस्थानीयं परिपरितो वसान आच्छादयन् अपां अपस्यतां कर्मवतां आयुः एतं बृहतीः प्रभूताः अ-
न्यूनाः असंपूर्णाः श्रियः संपदश्च मिमीते करोति॥ ॥इति द्वितीयस्याष्टमे त्रयोदशो वर्गः॥ ॥अथ षष्ठी॥ वव्राजा सीमनद-
तीरदब्धा दिवो यह्वीरवसाना अनग्नाः॥ सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त वाणीः॥ ॥अनदतीः अभक्षयं-
तीः अदब्धाः अहिंसिताः मातृभूताः अपो ग्निः सीं सर्वतो वव्राजति अग्निरपां शोषकः तं चापः शमयंति तदुभयमि-
ह नास्तीत्युक्तं भवति। कीदृश्यस्ताः दिवो यह्वीः अंतरिक्षस्यापत्यभूताः अवसानाः वस्त्रमनाच्छादयंतः वस्त्रस्थानीयस्य
नलस्य विद्यमानत्वात् अत एव अनग्नाः किंच अपि सनाः सनातन्यः युवतयः नित्यतरुण्यः नित्यवृद्धा इत्यर्थः। सयोनीः
समानमंतरिक्षस्थानं याः संताः सप्तवाणीः नद्यः एकं अग्निं गर्भं गर्भस्थं दधिरे दधते॥ ॥अथ सप्तमी॥ स्तीर्णा अस्य सं-
हतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनां॥ अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची॥ ॥घृतस्योदकस्य
योनौ स्थाने अंतरिक्षे संहतः पुंजीभूतो हंतेः क्विप् विश्वरूपाः नानाविधरूपाः स्तीर्णाः सर्वत्र प्रसृताः अस्याग्नेः र

रश्मयः मधुना मुदकानां स्रवथे स्रवणे सति अस्थुः तिष्ठति। पिन्वमानाः पूर्यमाणाः अत्राग्नौ आपः धेनवः सर्वेषां
प्रीरयित्र्यः अभवन्। समीची समंच्य वंसौ शोभमाने मही महत्यौ द्यावापृथिव्यौ दस्मस्य दर्शनीयस्य यस्याग्नेर्माति
रामातरौ अभवतः॥ ॥अथाष्टमी॥ बभ्राणाः सूनो सहसो व्यद्यौद्दधानः शुक्रा रभसा वपूंषि। श्चोतंति धारा मधुनो
घृतस्य वृषा यत्र वावृधे काव्येन॥ ॥हे सहसः सूनो सहसस्पुत्र बभ्राणाः स्वं शुक्राणि भास्कराणि रभसा वेगवं
ति वपूंषि दधानः। धारयं स्त्वं व्यद्योतः। विद्योतसे वृषा अग्निः यत्र यस्मिन् यजमाने काव्येन स्तोत्रेण वृद्धिं प्राप्नोति। त
दानीं मधुनः अस्यंतमधुरस्य घृतस्य उदकस्य धाराः श्चोतंति स्रवंते मदाय यजमानस्तोत्रेण अग्निस्तुष्टो भव
ति तदानीं वृष्टिर्भवतीत्यर्थः॥ ॥अथ नवमी॥ पितुश्चिदूधर्जनुषा विवेद व्यस्य धारा असृजद्वि धेनाः॥ गुहा चर
तं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा बभूव॥ ॥पितुः अंतरिक्षस्य ऊधः ऊधस्थानीयं जलप्रदेशं अयमग्नि

द्वि॰भा॰८
॥४२३॥

जनुषा स्वयमेव विवेद जानाति। किंचायमग्निः अस्योधसः संबंधिन्यो धाराः पयोधारा व्यसृजत् धेनूनां माध्यमिका
वाचश्चेति शिवेभिः शिवंकरैः सखिभिरात्मनः सखिभूतैर्वायुभिः दिवो यह्वीभिः अंतरिक्षस्यापत्यभूताभिरद्भिश्च स
ह गुहा गुहायां चरंतं वर्त्तमानमेनमग्निं गुहा गुहायां स्थितः कोपि न बभूव प्राप्तुं समर्थो नाभवत्॥ ॥अथदश
मी॥ पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः॥ वृष्णे सपत्नी शुचये सबंधू उभे अस्मै मनुष्ये३ निपाहि॥ ॥
अयमग्निः पितुरंतरिक्षस्य गर्भं वृष्टिद्वारा गर्भभूतं जनितुः सर्वस्य लोकस्य जनयितुः ब्राह्मणश्च लोकं ओषध्यादिकं
बभ्रे बिभर्त्ति एक एवाग्निः पूर्वीर्बह्वीः पीप्यानाः प्यायमानाः वृद्धिं प्राप्ता ओषधीः अधयत् धयति भक्षयति। सपत्नी समा
न एकः पतिः सूर्यः यायाः। तं मनुष्ये मनुष्येभ्यो हिते उभे द्यावापृथिव्यौ वृष्णे वर्षित्रे अस्मै शुचये सबंधू भवतः।
अनयोरग्निरेव बंधुरित्यर्थः। हे अग्ने त्वं ते द्यावापृथिवी निपाहि नितरां रक्ष॥ ॥इति द्वितीयस्याष्टमे चतुर्दशो वर्गः॥ ॥

श्री
॥४२३॥

१९

अथैकादशी ॥ उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः ॥ ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसॄणां ॥ ॥
महानयमग्निः अनिबाधे असंबाधे उरौ विस्तीर्णेंतरिक्षे ववर्ध वर्धते । कारणमाह । हि यस्मात्कारणात्पूर्वीर्बह्व्यो यशसः यशोन्नं तद्वत्य आ
पः अग्निं संवर्धयंति । एवं अभिवृद्धिं प्राप्तोग्निः ऋतस्योदकस्य योनौ स्थानेंतरिक्षे स्थिते स्वसॄणां स्वतः सरंतीनां जामीनां भगिनीस्था
नीयानां हेतुभूते अपसि पयसि दमूना दांतमनाः सन् अशयत् अशेते ॥ ॥अथ द्वादशी ॥ अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सू
नवे भाऋजीकः ॥ उदु स्त्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः ॥ ॥ जनिता सर्वस्य लोकस्य जनिता अपां उदकानां गर्भः ग
र्भरूपः नृतमः नेतृतमः अतिशयेन मनुष्याणां रक्षिता यह्वः महान् योग्निः अक्रः परेषां आक्रमिता परैरनाक्रमणीयो वा । नेति पादपू
रणः । समिथे संग्रामे महीनां महतीनां स्वसेनानां बभ्रिः भर्ता दिदृक्षेयः सर्वैर्दर्शनीयः भाऋजीकः स्वदीप्त्या प्रकाशमानः सोग्निः
सूनवे हविषां प्रदात्रे यजमानाय तदर्थं उस्त्रियाः आपः उज्जजान उदजनयत् । स्त्रवंना वृषु प्रसरण इत्यस्माद्धातोरौणादिको नुप्र
त्ययः ॥ ॥अथ त्रयोदशी ॥ अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपं । देवासश्चिन्मनसा सं हि जग्मुः पनिष्ठं जातं तवसं

दुवस्यन्॥ ॥सुभगासुभग्यावनासैर्वैर्विननीया अरणिःदर्शतिं दर्शनीयं विरूपं नानाविधरूपं अपां ओषधीनां च रूपं च गर्भं अग्निं
जजान अजनयत् देवाश्चित्सर्वे देवा अपि पनिष्ठं स्तुसंतं वसं वृधं जातं जातमात्रं तमग्निं मनसा स्तुत्या संजग्मुः उपागछन् प्रही
तिपूरणाः ते दुवस्यन् पर्यचरन्॥ ॥अथ चतुर्दशी॥ बृहंत इद्भानवो भाऋजीकमग्निं सचंत विद्युतो न शुक्राः॥ गुहेव वृद्धं सदसि
स्वे अंतर पार ऊर्वे अमृतं दुहानाः॥ ॥अपारे अगाधे अर्यार्वे समुद्रे अंतर्मध्ये अमृतं उदकं दुहानाः रक्षंतः बृहंत इद् भानवः
शुक्रा दीप्यमानाः विद्युतो न विद्युद् दिवसे स्वकीये सदसि सदने अंतरिक्षे गृहे व गुहायामिव वृद्धं प्रवृद्धं भाऋजीकं प्रभया दीप्यमा
नं सचंत आश्रयंति॥ ॥अथ पंचदशी॥ ईळे च त्वा यजमानो हविर्भिरीळे सखित्वं सुमतिं निकामः॥ देवैरवो मिमीहि संजरित्रे र
क्षा च नो दम्येभिरनीकैः॥ ॥यजमानो हं हविर्भिः साधनैः त्वां त्वां ईळे च पूजादि लक्षणं धनं च याचे सुमतिं शोभनां मतिं धर्मविष
यां बुद्धिं निकाममतितरां कामयमानः त्वया सह सखित्वं ईळे याचे। त्वं देवैः सह जरित्रे स्तोत्रे स्तोत्रं कुर्वते मह्यं अस्मदर्थं अवः
पश्वादिविषयो रक्षे। मिमीहि कुरु। दम्येभिः दमनीयैः नियंतव्यैः प्रयत्न नियंतव्यतया उद्गूर्बलतोक्ता। अनीकैस्तेजोभिः नः

मृतो मर्त्यानां राजा ससाद विदथानि साधन्॥ घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान्॥ ॥अमृतः नित्यः राजा राजमा
नोयोग्निः विदथानि यज्ञान् साधयन् मर्त्यानां अग्निहोतॄणां दुरोणे गृहे निषसाद निषीदति। विश्वानि काव्यानि विद्वान् जानन् घृतप्रतीकः
घृतेन संधुक्षितावयवः उर्विया विस्तीर्णः सोग्निः व्यद्यौत् विद्योतते॥ ॥अथैकोनविंशी॥ आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरू
तिभिः सरण्यन्॥ अस्मे रयिं बहुलं संतरुत्रं सुवाचं भागं यशसं कृधी नः॥ ॥सरण्यन् सर्वत्र सरणं गमनमिच्छन् महान् त्वं शिवेभिः शि
वकरैः सख्येभिः सख्यैः सखिकर्मभिः महीभिः ऊतिभिः रक्षाभिश्च नोस्मान् प्रति आगहि। आगच्छ। अस्मे अस्मभ्यं च बहुलं विस्ती
र्णं संतरुत्रं सर्वेषामुपद्रवाणां संतारकं सुवाचं शोभनवाचं भागं सर्वैर्भजनीयं यशसं यशसा कीर्त्या संयुक्तं रयिं धनं नोस्म
भ्यं कृधि देहि। अस्मानिति पुनर्वचनं आदरातिशयार्थं॥ ॥अथ विंशी॥ एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचं॥
महांति वृष्णे सवना कृतेमा जन्मंजन्मन्निहितो जातवेदाः॥ ॥हे अग्ने पूर्व्याय पुरातनाय ते तुभ्यं सनानि जनिमानि कर्माणि स्तोत्रा
णि वा प्रवोचं जातवेदाः जातप्रज्ञो जातधनो वा जन्मन् जात इति जन्मानस्ते सर्वेष्वन्येषु निहितो यागार्थं तस्मै वृष्णे संपदां वर्षित्रे

अग्नये इमा इमानि सवनानि कृता कृतानि॥ ॥अथैकविंशी॥ जन्मंजन्मन्निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः॥ तस्य
वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम॥ ॥जन्मन् जन्मन् सर्वेषु मनुष्येषु निहितो जातवेदाः विश्वामित्रेभिः विश्वामित्रैः पूजा
यां बहुवचनं महर्षिणा विश्वामित्रेणायो जातवेदाः अजस्रः अजस्रमनवरतं इध्यते दीप्यते सुमतौ वर्तमाना वयं तस्य यज्ञियस्य
यज्ञार्हस्यापि भद्रे भजनीये सौमनसे सुमनोभावे अनुग्रहबुद्धौ अपि स्याम॥ प्रार्थनायां लिङ्॥ ॥अथद्वाविंशी॥ इमं यज्ञं स
हसावंत्वं नो देवत्रा धेहि सुक्रतो रराणः॥ प्र यंसि होतर्बृहतीरिषो नोऽग्ने महि द्रविणमा यजस्व॥ ॥हे सहसावन् बलवन् सुक्रतो शो
भनकर्मन्। हे अग्ने रराणः सर्वदा रममाणः शब्दं कुर्वाणो वा त्वं नोस्मदीयमिमं यज्ञं देवत्रा देवेषु धेहि निधेहि। हे होतः देवानामाह्वातः
बृहतीः इषः अन्नानि नोस्मभ्यं प्रयंसि। प्रयच्छ। हे अग्ने महि महत् द्रविणं पश्वादिलक्षणं धनं आजयस्व। प्रयच्छ। अत्र यजिर्दानक
र्मा॥ ॥अथत्रयोविंशी॥ इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध॥ स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भू
त्वस्मे॥ ॥इयं सर्वेषां पशूनां पशुपुरोडाशस्य स्विष्टकृतः पुरोनुवाक्या। सूत्र्यते। इळामग्ने पुरुदंसं सनिं गोर्होता यक्षदग्निं पुरो

ढाशस्विष्टकृतइति।हेअग्नेपुरुदंसंबहुकर्माणंगोःगवांसनिंप्रदात्रींइडांभूमिंहवमानायस्तुवतेमह्यंशश्वत्तमंचिरकालंयथाभ
वतितथासाध।साधयनोस्माकंसूनुःतनयःसंतानस्यविस्तारयितावापुत्रपौत्रादिरूपेणस्वयंविजायतइतिविजावास्यात्।
हेअग्नेस्यप्रसिद्धातेसुमतिःत्वदीयाअनुग्रहबुद्धिःअस्मेअस्मासुभूतुभवतु॥ ॥इतिद्वितीयस्याष्टमेषोडशोवर्गः॥ ॥वैश्वा
नरायेतिपंचदशर्चंद्वितीयंसूक्तं।तथाचानुक्रांतं।वैश्वानरायपंचोनावैश्वानरीयंतुजागतंत्विति।विश्वामित्रऋषिःजगतीछं
दः।वैश्वानरोग्निर्देवता।षडह्याभिप्लविकयोस्तृतीयेहनिआग्निमारुतेवैश्वानरायधिषणामितिवैश्वानरनिविद्धानीयंसूक्तं।तृ
तीयस्येतिखंडेसूत्रितं।वैश्वानरायधिषणांधाराएवरामरुतइतीति॥ ॥तत्रप्रथमा॥वैश्वानरायधिषणामृतावृधेघृतंनपूत
मग्नयेजनामसि॥द्विताहोतारंमनुषश्चवाघतोधियारथंनकुलिशःसमृण्वति॥ ॥ऋतावृधेऋतस्योदकस्ययज्ञस्यवावर्धयित्रे
वैश्वानरशब्दोयास्केनव्याख्यातः।वैश्वानरःकस्माद्विश्वान्नरान्नयतिविश्वएनंनरानयंतीतिवापिवाविश्वानरएवस्या
त्प्रत्यृतःसर्वाणिभूतानितस्यवैश्वानरस्यैषाभवतीति।तस्मैपूतंघृतंनघृतमिवधिषणांस्तुतिंजनामसि।जनयामः।यथापूतं

पि

अस्मान्रक्षस्व॥ ॥इतिद्वितीयस्याष्टमेपंचदशोवर्गः॥ ॥अथषोडशी॥उपक्षेतारस्तवसुप्रणीतेग्नेविश्वानिधन्यादधानाः॥सु
रेतसाश्रवसातुंजमानाअभिष्यामपृतनायूँरदेवान्॥ ॥सुप्रणीतेशोभनप्रणयन्।हेअग्नेतवउपक्षेतारःउपगंतारःअत्रक्षि
तिर्गत्यर्थेवर्तते।विश्वानिसर्वाणिधन्याधन्यानिपश्वादिधनप्राप्तिहेतुभूतानिकर्माणिदधानाःकुर्वंतःतुंजमानाःहवींषिप्रयच्छंतो
वयंसुरेतसाशोभनवीर्येणश्रवसाबलकृतेननान्नेनअदेवान्देवेभ्योन्यान्नञिवयुक्तन्यायेनराक्षसाएवगृह्यंते।यज्ञविघ्नकारि
णस्तान्पृतनायून्शरीराद्युपद्रवकारिणःशत्रून्अभिष्यामअभिभवेम।यद्वादेवान्पूजयंतःशत्रूनितिवायोज्यं॥ ॥अथस
प्तदशी॥आदेवानामभवःकेतुरग्नेमंद्रोविश्वानिकाव्यानिविद्वान्॥प्रतिमर्ताँअवासयोदमूनाअनुदेवान्रथिरोयासिसाधन्॥
हेअग्नेमंद्रःस्तुत्यःकेतुःयज्ञेदेवानांप्रज्ञापकस्त्वंआभवआसमंताद्भवसि।सर्वव्यापकोभवसीत्यर्थः।किंचविश्वानिसर्वाणिकाव्यानिय
जमानादिभिःकृतानिस्तोत्राणिविद्वान्जानन्त्वंमर्तान्मर्त्यान्स्तोतॄन्स्वाभिलषितवस्तुसंपादनेनप्रीतान्विधायगृहेषुप्रस
यःसंप्रतिवासयति।रथिरःरथीःसाधन्देवानांहितानिकार्माणिसाधयन्देवान्अनुयासिच॥ ॥अथाष्टादशी॥निदुरोणेअ

प्रीतिंजनयतितयाप्रीतिंकरोमीत्यर्थः॥द्विताद्विधागार्हपत्याहवनीयरूपाभ्यांयुक्तंहोतारंदेवस्यान्यमाह्वातारंअग्निंमनुषःमनुष्याःवा
घृतश्चत्विजस्वधियाकर्मणाकुलिशोवास्यादिःरथंनरथमिवसम्यक्प्रवृतिसंस्कुर्वंति॥ ॥अथद्वितीया॥सरोचयज्जनुषारोदसीउ
भेसमात्रोरभवत्पुत्रईड्यः॥हव्यवाळग्निरजरश्चनोहितोदूळभोविशामतिथिर्विभावसुः॥ ॥सोअग्निर्जनुषाजन्मनाउभेरोदसीद्यावापृथि
व्यौरोचयत्अरोचयत्प्रकाशयति।समात्रोर्द्यावापृथिव्योरीड्यःस्तुत्यःपुत्रोभवत्।हव्यवाट्हव्यानांवोढाग्निःअंगनादिगुणयु
क्तःअजरःजरारहितःनोस्मंहितंयजमानेनिहितंयेनासौचनोहितःदूळभःहिंसितुमशक्यःसौयंविभावसुःप्रसाधनःविशांमनु
ष्याणांअतिथिरिवपूज्योभवति॥ ॥अथतृतीया॥क्रत्वादक्षस्यतरुषोविधर्मणिदेवासोअग्निंजनयंतचित्तिभिः॥रुरुचानंभानुना
ज्योतिषामहामत्यंनवाजंसनिष्यन्नुपब्रुवे॥ ॥चित्तिभिःज्ञानैःउपलक्षितादेवासःतरुषःव्यसनेभ्यस्तारकस्यबलस्यक्रत्वाकर्मणा
विधर्मणिविधारकेयज्ञेअग्निंजनयंतअजनयन्भानुनाभासमानेनज्योतिषारुरुचानंरोचमानंमहांमहांतंअग्निंअत्यंतभारस
हमश्वमिववाजमन्नंजनिष्यन्लिप्समानोहंउपब्रुवेस्तोमि॥ ॥अथचतुर्थी॥आमंद्रस्यसनिष्यंतोवरेण्यंवृणीमहेअह्रयंवाजमृग्मियं॥

रातिं भृगूणामुशिजं कविक्रतुमग्निं राजंतं दिव्येन शोचिषा॥ ॥मंद्रस्य स्तुत्यस्य वैश्वानरस्य संबंधिनं वरेण्यं वरणीयं अह्रयं अलज्या
वहं ऋग्मियं प्रशस्यं वाजमन्नं सनिष्यंतः लिप्समाना वयं भृगूणां ऋषीणां अभिलषितार्थप्रदातारं उशिजं अभिलष्यंतं कविक्रतुं क्रांतप्रज्ञं
दिव्येन दिविभवेन शोचिषा रोचिषा राजंतं भ्राजमानं अग्निं आवृणीमहे संभजामहे॥ ॥अथ पंचमी॥ अग्निं सुम्नाय दधिरे पुरो जना
वाजश्रवसमिह वृक्तबर्हिषः॥ यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसां॥ ॥वृक्तबर्हिषः स्तीर्णबर्हिषः यतः स्रुचः
प्रासस्रुचः ऋत्विजः सुम्नाय सुखार्थं वाजश्रवसं मनुष्येभ्यः प्रेरितान्नं सुरुचं प्रशस्तदीप्तिमंतं विश्वदेव्यं विश्वेभ्यो देवेभ्यो हितं रुद्रं
असुराणां द्रावकं अपसां कर्मवतां यज्ञानां यजंतीति यज्ञा यजमानास्तेषां साधदिष्टिं साधितयज्ञं पुरो दधिरे स्तुवंति॥ ॥इति द्वितीयस्या
ष्टमे सप्तदशो वर्गः॥ ॥अथ षष्ठी॥ पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः॥ ॥अग्ने दुव इच्छमानास आप्यमुपासते द्र
विणं धेहि तेभ्यः॥ ॥हे पावकशोचे शोधकदीप्ते हे होतः देवानामाह्वातः यज्ञेषु परिपरितः वृक्तबर्हिषः स्तीर्णबर्हिषः दुवस्यवः परिचरणा
मिच्छंतः उद्धंतो नरो नेतारो यजमाना आप्यं आप्तुं योग्यं तव त्वत्संबंधिनं क्षयं निवासं यागगृहं उपासते सेवंते तेभ्यो द्रविणं धनं धेहि देहि।

अथ सप्तमी॥ आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन्॥ सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः॥ ॥रोद
सी द्यावापृथिव्यौ अपृणत् आपूरयत् तथा महत् प्रभूतं स्वः अंतरिक्षं अपृणात् अपसः कर्मवंतो यजमानाः जातं यत् एनं अग्निं अधारयन्
अत्यो न अश्व इव कविः क्रांतः सर्वत्र व्याप्तः चनोहितः निहितान्नः सोयमग्निः वाजसातये वाजस्य अन्नस्य कीर्त्तये वा सातये जातापतेयप्रा
र्थं गीयते॥ ॥अथाष्टमी॥ नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसं॥ रथीर्ऋतस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहि
तः॥ ॥अथ नवमी॥ तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः॥ तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः॥ ॥
रथीन्येता बृहतो महत ऋतस्य यज्ञस्य विचर्षणिः द्रष्टा यो ग्निः देवानां पुरोहितः पुरस्ताद्धव्यत यास्थापितो भवत् हव्यदातिं देवेभ्यो ह
विषां दातारं स्वध्वरं शोभनयज्ञं दम्यं दमेभ्यो गृहेभ्यो हितं जातवेदसं जातप्रज्ञं अग्निं नमस्यत पूजयत दुवस्यत परिचरत॥ ॥तिस्रो यह्वस्ये
ति। उशिजः कामयमानाः अमृत्यवो मृत्युरहिता देवाः यह्वस्य महतः परिज्मनः परितो गंतुः समिधः प्रकाशिकास्तिस्रः पार्थिवं वैद्युत
सूर्यरूपास्तिस्रः तनूः अपुनन् अशोधयन् ते देवाः भुजं सर्वेषां पालयित्रीं तासां तानां नामध्ये एकां पार्थिवीं तनुं मर्त्ये मर्त्यलोके अ

द्वि॰भा॰८
॥४२८॥

इधुःन्यदधुः उ इति पादपूरणः इतरेद्वे तन्नूजामिं लोकं असेन्नमंतरिक्षं उपेयतुः उपगछतः त्रीन्नपरिधीन्स्तित्वः समिध इति निगमः॥
अथ दशमी॥ विशां कविं विश्पतिं मानुषीरिषः संसीमकृण्वन्त्स्वधितिं न तेजसे॥ स उद्वतो निवतो याति वेविषत् स गर्भमेषु भुवनेषु
दीधरत्॥ ॥इषः पश्वादिलक्षणं धनमिछंतः मानुषीः मनुष्यप्रजाः विशां प्रजानां विश्पतिं प्रभुं कविं मेधाविनं सीमनं स्वधितिं न असिमिव
तेजसे तैक्ष्ण्यार्थं समकृण्वन् समस्कुर्वन् सोग्निः उद्वतः उच्छ्रायवतः निवतो नीचैर्भाववतश्च प्रदेशान् वेविषत् व्याप्नुवन् याति गछति स एषु भु
वनेषु दीधरत्॥ ॥इति द्वितीयस्याष्टमे दशमो वर्गः॥ ॥अथैकादशी॥ स जिह्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु नानदन्न सिंहः॥ वैश्वानरः
पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे॥ ॥प्रजज्ञिवान् जातः वृषा वर्षकः स वैश्वानरः चित्रेषु नानाप्रकारेषु प्राणिनां भेदनात् जठर
पां भेदः तेषु जिह्वते वर्धते चित्रेषु नानाविधेष्वरण्येषु नानदत् अन्यर्थं शब्दं कुर्वन् सिंह इव किंविधो विश्वानरः पृथुपाजाः पृथुतेजाः अथवा
पृथुवेगः अमर्त्यः मरणधर्मरहितः दाशुषे हविषां प्रदात्रे यजमानाय रत्ना रमणीयानि धनानि विशेषेण दयमानः प्रयच्छन्॥ ॥अथ
द्वादशी॥ वैश्वानरः प्रत्नथा नाकमारुहद्दिवस्पृष्ठं मंदमानः सुमन्मभिः॥ स पूर्ववज्जनयंजंतवे धनं समानमज्मं पर्येति जागृविः॥ ॥सुम

श्री
॥४२८॥

न्मभिः स्तोतृभिः मंदमानः स्तूयमानः वैश्वानरः जातमात्र एव प्रत्नथा प्रत्न इव चिरंतन इव नाकं सुखं अकं दुःखं न विद्यते अकं यस्मि-
न् नाकं दिवः अंतरिक्षस्य पृष्ठं उपरितनप्रदेशं स्वर्दृशोभिः आरुहत् आरोहति। स वैश्वानरः पूर्ववत् पूर्वेभ्य ऋषिभ्यः एव जंतवे स्तोत्रे
यजमानाय धनं पश्वादिलक्षणं अजनयन् संपादयन् जागृविः सदा प्रबुद्धः समानं सर्वेषां देवानां साधारणं अज्म आक्रमणं मा-
र्गं पर्येमि सूर्यरूपेण गच्छति॥ ॥अथ त्रयोदशी॥ ऋतावानं यज्ञियं विप्रमुक्थ्यमा यं दधे मातरिश्वा दिवि क्षयं। तं चित्रयामं हरिकेश-
मीमहे सुदीतिमग्निं सुविताय नव्यसे॥ ॥ऋतावानं बलवंतं यज्ञियं यज्ञार्हं विप्रं मेधाविनं उक्थ्यं स्तुत्यं दिवि द्युलोके क्षयं निवसंतं य-
मग्निं मातरिश्वा वायुः द्युलोकादाहृत्य पृथिव्यां आदधे। आहितवान्। चित्रयामं नानाविधगमनं हरिकेशं पिंगलार्चिषं सुदीप्तिं
शोभनदीप्तिं तमग्निं नव्यसे नवतराय सुविताय सुष्ठु प्राप्तव्याय धनाय तदर्थं ईमहे॥ ॥अथ चतुर्दशी॥ शुचिं न यामन्निषिरं
स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधं॥ अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत्॥ ॥नेति संप्रत्यर्थे। शुचिं दी-
प्तिं यामनि यज्ञे इषिरं एषणीयं स्वर्दृशं सर्वदृशं सर्वपदार्थज्ञानयुक्तं दिवः द्युलोकस्य केतुं प्रज्ञापकं रोचनस्थां रोचनस्थं रोचनः सू

यः तस्मिन्नृतिग्वंतं उषर्बुधं अग्निहोत्रकर्मरूपेण उषसि प्रबुध्यमानं दिवः स्वर्गस्य मूर्धानं प्रधानं अप्रतिष्कुतं अप्रतिहतशासं वा
जिनमन्नवंतं महतमहांतं तमग्निं नमसा स्तोत्रेण ईमहे याचामहे॥ ॥अथ पंचदशी॥ मंद्रं होतारं शुचिमद्वयाविनं दमूनसमुक्थ्यं
विश्वचर्षणिं॥ रथं। न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे॥ ॥मंद्रं स्तुत्यं होतारं देवानामाह्वातारं शुचिं सर्वदा शुद्धं अद्व
याविनं द्वयहीनं अकुटिलं दमूनसं दानमनसं उक्थ्यं श्रेष्ठं विश्वचर्षणिं विश्वस्य द्रष्टारं चित्रं नानाविधवर्णं रथं न रथमिव वपुषा
य रूपार्थं दर्शतं दर्शनीयं सदमित् सदैव मनुर्हितं सर्वेभ्यो मनुष्येभ्यो हितं अग्निं रायो धनानि ईमहे याचामहे। अत्र याश्चार्थत्वाद्
स्य द्विकर्मकत्वं॥ ॥इति द्वितीयस्याष्टमे एकोनविंशो वर्गः॥ ॥वैश्वानराय इत्येकादशर्चं तृतीयं सूक्तं वैश्वामित्रं आग्नेयमनुक्रमणिका।
वैश्वानराय सैकादशेति पूर्वे सूक्ते वैश्वानरीयं तु जागतं त्विति सूक्तत्वादस्यापि सूक्तस्य जगती छंदः वैश्वानरोग्निर्देवता। अस्य सूक्त
स्य अग्निष्टोमे आग्निमारुते शस्त्रे विनियोगः॥ सूत्र्यते हि। वैश्वानराय पृथुपाजसे शंनः करत्यर्वत इति॥ ॥तत्र प्रथमा॥ वैश्वान
राय पृथुपाजसे विपो रत्ना विधंत धरुणेषु गातवे॥ अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत्॥ ॥विपो मेधाविनः

स्तोतारः पृथुपाजसे बहुलाय वह्ननाय व्यापाजः शब्दस्य बलंम नाम्नोः पाठात् वैश्वानराय अग्नये धरुणेषु धर्मेषु यज्ञेषु रत्नारमपी
यानि स्तोत्राणि गातवे सन्मार्गलाभाय विधंत परिचरंति कुर्वंति अमृतः मरणरहितोऽग्निः देवान् दुवस्यति हविषां प्रदानेन परिचरति
हि प्रसिद्धौ। अथातः कारणात् कोऽपि सनता सनातनानि धर्माणि यज्ञान् न दुष्येत् न दूषयति। ॥द्वितीया॥ अंतर्दूतो रोदसी दस्म ईय
ते होता निषत्तो मनुषः पुरोहितः॥ क्षयं बृहंतं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः॥ ॥दस्मो दर्शनीयो होताग्निः दूतः दे
वानां दूतः सन् रोदसी रोदस्योर्द्यावापृथिव्योः अंतर्मध्ये ईयते गच्छति। मनुषः मनोर्जातस्य मनुष्यस्य पुरोहितः आहवनीयरूपे
ण पुरोहितः स्थापितः निषत्तो निषण्णः सन् असिद्युभिर्दीप्तिभिर्बृहं महांतं क्षयं यज्ञगृहं परिभूषति। अलंकुरुते। देवेभिर्देवैः
इषितः प्रेषितो धियावसुः प्रज्ञया व्याप्तः एतद्द्वे अग्निविशेषणे॥ ॥अथ तृतीया॥ केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं
महयंत चित्तिभिः॥ अपांसि यस्मिन्नधि संदधुर्गिरस्तस्मिन्त्सुम्नानि यजमान आ चके॥ ॥यज्ञानां केतुं प्रज्ञापकं विदथस्य यज्ञस्य
गृहस्य वा साधनं प्राप्तिसाधनं असाधारणकारणं सतमग्निं विप्रासो विप्राः चित्तिभिः स्वकर्मभिः महयंत पूजयंति। किंच गिरः स्तो

द्वि.अ.८
॥४३०॥

तारः यस्मिन्नग्नौ अपांसि स्वानुष्ठेयानि कर्माणि अधि अस्ं दधुः संदधते तस्मिन्नग्नौ सुम्नानि सुखानि प्राप्य आ चके प्रकाशते।
अथ तस्मिन्नग्नौ सुम्नानि सुखानि आ चके कामयते॥ ॥अथ चतुर्थी॥ पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघतां॥
आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भंदते धामभिः कविः॥ ॥यज्ञानां पिता पालयिता विपश्चितां विदुषां स्तोतॄणां असुरः बलप्रदः
वाघतां ऋत्विजां वयुनं प्रज्ञासाधनं विमानं मीयते फलमिति विमानं यज्ञादिकर्मसाधनं सोग्निः भूरिवर्पसा पार्थिववैद्युतादिरूपे
ण रोदसी द्यावापृथिव्यौ आ विवेश प्रविशति। पुरुप्रियः मनुष्येषु अधिकं प्रियः अथवा पूरणां श्रेष्ठानां प्रियः धामभिस्तेजोभिर्युक्तः
कविरग्निर्भंदते यजमानेन स्तूयात॥ ॥अथ पंचमी॥ चंद्रमग्निं चंद्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदं॥ विगाहं तूर्णिं तविषीभि
रावृतं भूर्णिं देवास इह सुश्रियं दधुः॥ ॥देवासो देवाः चंद्रमाह्लादकं रथो यस्येति वा तं हरिव्रतं पिंगळवर्णं हरित्वचं वा हरित्व
चमिति शाखांतरं अप्सुषदं अप्सु सीदंतं स्वर्विदं सर्वज्ञं विगाहं विगाहमानं सर्वत्र व्याप्तं तूर्णिं क्षिप्रगामिनं शत्रूणां हिंसितारं वा
तविषीभिः बलैरावृतं भूर्णिं भर्तारं सुश्रियं शोभनदीप्तिं वैश्वानरं इह लोके दधुः॥ इति द्वितीयस्याष्टमे विंशो वर्गः॥ ॥अथ षष्ठी॥ अ

श्री
॥४३०॥

८

ग्निर्देवेभिर्मनुषश्चजंतुभिस्तन्वानोयज्ञंपुरुपेशसंधिया॥रथीरंतरीयतेसाधदिष्टिभिर्जीरोदमूनाअभिशस्तिचातनः॥ ॥पुरु
पेशसंबहुरूपंपेशइतिरूपनामपुरोडाशपशुसोमहविर्भेदैःएकाहाहीनसत्रात्मकभेदैरवांतरभेदैश्चनानाविधरूपंयज्ञंतन्वा
नःकुर्वन्रथीःसर्वस्यलोकस्यनेताजीरःक्षिप्रकारीदमूनाःदानमनावाअभिशस्तिचातनःअभिशस्तीमरातीनांयज्ञविघ्नस्यका
रिणांरक्षसांचातयितानाशयितानाशयिताग्निःअंतःद्यावापृथिव्योर्मध्येईयतेगच्छति॥ ॥अथसप्तमी॥अग्नेजरस्वस्वपत्यआयु
न्यूर्जापिन्वस्वसमिषोदिदीहिनः॥वयांसिजिन्वबृहतश्चजागृवउशिग्देवानामसिसुक्रतुर्विपां॥ ॥हेअग्नेस्वपत्येसुपुत्र्यैःआयुनिआ
युषिनिमित्तभूतस्यैषा।आयुषिनिमित्तेजरस्वदेवान्स्तुहि।हतोरमधिश्रायउजरसेनान्नेनवापिन्वस्वदेवान्प्रीणयनोस्माकं
इषःसस्यार्थवृष्टीःसंदिदीहिसंदीपय।वयांसिअन्नानिचवयःस्वघ्नेत्यन्ननामसुपाठात्।जिन्वदेहि।हेजागृवेसर्वदाजागरणशी
लबृहतःमहतोयजमानस्यजिन्वतिसंबंधःसुक्रतुःशोभनकर्माशोभनयज्ञोवाचंविपांमेधाविनांदेवानांउशिक्कामयितासि॥ ॥अ
थाष्टमी॥विश्पतिंयह्वमतिथिंनरःसदायंतारंधीनामुशिजंचवाघतां॥अध्वराणांचेतनंजातवेदसंप्रशंसंतिनमसाजूतिभिर्वृधे॥ ॥

नरो नेतारः स्तोतारो वा विश्पतिं विशां मनुष्याणां पतिं विश्वस्य पतिमिति वा यद्वा महांतं अतिथिं सर्वस्यातिथिभूतं धीनां बुधी
नां कर्मणां वा यंतारं नियंतारं वाघतान्नृत्विजां च उशिजं कांतमनो यज्ञं अध्वराणां यागानां चेतनं प्रज्ञातनं जूतिभिर्वेगैर्युक्तं जातवे
दसमग्निं दधे दध्वये समर्धये नमसा नमस्कारेण स्तुतिभिः प्रशंसंति प्रशंसां कुर्वंति॥ ॥अथ नवमी॥ विभावा देवः सुरणः प
रि क्षितीरग्निर्बभूव शवसा सुमद्रथः॥ तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः॥ ॥विभावा दीप्तिमान् देवः सुयमः
सुरणः अत्र वर्णलोपः छांदसः शोभनं रमयतीति सुरणः सुमद्रथः शोभनरथः अग्निः शवसा बलेन क्षितीः सर्वाः प्रजाः परिबभू
व परितोऽगृह्णाति। अत्र भवतेरुपसर्गवशात् परिग्रहार्थत्वं भूरिपोषिणः बहूनां पोषयितुः पालयितुः दमे यज्ञगृहे दम इति गृ
हनामसु पाठात् निवसतः तस्याग्नेर्व्रतानि कर्माणि वयं सुवृक्तिभिः स्तोत्रैरुपभूषेम सुष्टु प्रकाशयामः॥ ॥अथ दशमी॥ वैश्वानर
तव धामान्या चके येभिः स्वर्विदभवो विचक्षण॥ जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना॥ ॥हे वैश्वानर तव धा
मानि त्वत्संबंधीनि तेजांसि आ चके अभिष्टौमि। हे विचक्षण प्राज्ञ त्वं येभिर्यैस्तेजोभिः स्वर्वित् सर्वज्ञो भवः भवसि। जातमात्रस्त्वं भु

वनानि भूतजातानि रोदसी द्यावापृथिव्यौ आपृणः आपूरयः हे अग्ने विश्वा विश्वानि सर्वाणि भूतानि त्मना आत्मना परिभू
रसि परिगृहीतासि॥ ॥अथैकादशी॥ वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः॥ उभा पितरा महयन्नजा
यताग्निर्द्यावापृथिवी भूरिरेतसा॥ ॥वैश्वानरस्याग्नेः दंसनाभ्यः तोषकारीभ्यः क्रियाभ्यः बृहन्महत्स्थानं भवतीति यत्तत्
दवितथं। यतः कारणादेकः मुख्यः कविरग्निः स्वपस्यया शोभनयज्ञादिकर्मेच्छया यजमानादिभ्यो धनमरणमददाति। सो
यमग्निर्भूरिरेतसा बहुरेतस्कौ उभा उभौ पितरा मातापितरौ द्यावापृथिव्यौ महयन्पूजयन्नजायत॥ ॥इति द्वितीयस्या
ष्टकाष्टमे एकविंशो वर्गः॥ ॥समित्समित्येकादशर्चं चतुर्थं सूक्तं वैश्वामित्रं त्रैष्टुभं। अत्रानुक्रमणिका॥ समित्समिद्धाप्रिय
इति। इदिश्वाहान्ताः पूर्वोक्ताः प्रत्यृचं देवता पशौ। विश्वामित्राणां आप्रीसूक्ते दर्शपूर्णमासयोः पत्नीसंयाजेषु चतुर्थप
ज्यैवमिसेषाय इति प्रत्यृचं देवता। सूचितं च। इह त्वष्टारमग्रियं तन्नस्तुरीयमध पोषयित्नु देवत्वष्टा सविता विश्वरूप
इति॥ ॥तत्र प्रथमा॥ समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः॥ आ देव देवान्यजथाय वक्षि सखा सखीं

न्कृमनायक्ष्यग्ने॥ ॥समित्समितू अस्यर्थं समिध्यः त्वंसुमनाः बोधिबुध्यस्व। शुचाशुचाअत्यर्थंप्रसर्पके णज्योतिषायुक्तः त्वंवस्वः
वसुनो धनस्यतद्विषयांसुमतिंशोभनांबुद्धिंअस्मेअस्मभ्यंरासि। देहिहेदेवद्योतमानदेवान्यजनीयान्यक्षियजस्व॥ ॥
अथद्वितीया॥ यंदेवासस्त्रिरहन्नायजंतेदिवेदिवेवरुणोमित्रोअग्निः॥ सेमंयज्ञंमधुमंतंकृधीनस्तनूनपाद्घृतयोनिंविधंतं॥ ॥
वरुणोमित्रोग्निःएतेत्रयोदेवाः यमग्निंदिवेदिवेप्रतिदिवसमहन्अहनित्रिःप्रातर्मध्याह्नसायंतनेषुसवनेषुत्रिवारंआ
यजंते। हेतनूनपात्तनूनांशरीराणांपातःसत्वंघृतयोनिंघृतस्योदकस्याकारिणंविधंतंविधीयमानंक्रियमाणं नोस्मदीयंइ
मंयज्ञंमधुमंतंमधिस्वादकंनामवष्म्यादिफलयुक्तंकृधिकुरु॥ ॥अथतृतीया॥ प्रदीधितिर्विश्ववाराजिगातिहोतारमिळःप्रथमंयज
ध्यै॥ अच्छानमोभिर्वृषभंवंदध्यैसदेवान्यक्षदिषितोयजीयान्॥ ॥विश्ववाराविश्वैर्जनैर्वारणीयादीधितिः स्तुतिःदीप्तिर्वाहोता
रंदेवानामाह्वातारमग्निंप्रजिगातिजिगातुप्रकर्षेणागच्छतुप्रथमंमुख्यंअच्छआभिमुख्येनवृषभंसंपदांवर्षितारंवंदध्यैवंदि श्री
तुंयोग्यमितिशेषः। अग्निंनमोभिर्नमस्कारैः सहइळःइषःदेवीरूपाण्यन्नानियजध्यैप्रीणयितुंप्रजिगातु। इषनःअस्माभिः ॥४३२॥

प्रेरितः यजीयान् यष्टृतमः सोऽग्निर्देवान् यक्षत् यक्षतु॥ ॥अथ चतुर्थी॥ ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि।
दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः॥ ॥वां युवयोः अग्नेस्त्र बर्हिषश्चोभयोर्वामित्युच्यते सहितिः सहितस्याग्ने
र्देवतात्वात् ऊर्ध्व उन्नतः गातुर्यज्ञमार्गो अध्वरे यज्ञे अकारि आश्रयः क्रियते शोचींषि अर्चिष्मंति रजांसि हवींषि ऊर्ध्वा ऊर्ध्वप्र
स्थिता होताग्निर्दिवः दीप्यमानस्य यागगृहस्य नाभा नाभौ मध्ये मध्यप्रदेशे न्यसादि निषीदति देवव्यचाः देवैः व्याप्तं बर्हिः चा
र्थे वाशब्दः विस्तृणीमहे विशेषेण स्तृणीमः॥ ॥अथ पंचमी॥ सप्त होत्राणि मनसा वृणाना इन्वंतो विश्वं प्रति यन्नृतेन। नृपेशसो
विदथेषु प्र जाता अभीमं यज्ञं वि चरंत पूर्वीः॥ ॥मनसा वृणानाः प्रार्थ्यमानाः ऋतेनोदकेन विश्वमिन्वंतः प्रीणयंतः देवाः सप्त हो
त्राणि होतृणां कर्माणि प्रति यन् प्रतिगछंति। अतः परं स्तुतिः नृपेशसः नररूपाः विदथेषु यागेषु जाताः उत्पन्नाः पूर्वीः बह्व्यः प्रतिग्र
हवस्यो यज्ञद्वाराभिमानिनी देवताः इममस्मदीयं यज्ञं प्रविचरंत प्रविचरंतु॥ ॥इति द्वितीयस्याष्टमे द्वाविंशो वर्गः॥ ॥अथ षष्ठी॥ आ
भंदमाने उषसा उपाके उत स्मयेते तन्वा३ विरूपे। यथा नो मित्रो वरुणो जुजोषदिंद्रो मरुत्वाँ उत वा महोभिः॥ ॥भंदमाने स्तूयमाने

उपाके परस्परं संगते उषसानक्ता पेक्षया द्विवचनं नक्तोषसे रात्र्यहनी आगच्छतां उत अपि च विरूपे पृथग्रूपे तन्वा प्रकाशरू
पिणा शरीरेणास्मयेते प्रकाशते मित्रावरुणाः उत वा अपि च इंद्रः मरुत्वांश्च नो स्मान् जुजोषत् यथा शोभेत तथा महोभिर्युक्ते इमे
द्यावापृथिव्यौ कुरुतां॥ ॥अथ सप्तमी॥ दैव्या होतारा प्रथमा न्यृंजे सप्त पृक्षासः स्वधया मदंति। ऋतं शंसंत ऋतमित्त आहुरनु
व्रतं व्रतपा दीध्यानाः॥ ॥दैव्या दैव्यौ प्रथमा प्रथमौ मुख्यौ होतारौ आहूतारौ न्यृंजे प्रसाधयामि। ऋतं उदकं शंसंतः आशंसमा
नः सप्त पृक्षासः पृक्षमन्नं तद्वंत ऋत्विजः तमग्निं स्वधया सोमेन हविषा मदंति मादयंति मद्रुतपा व्रतानां कर्मणां रक्षितारः दी
ध्यानाः अथवा स्वकर्मभिरग्निं दीपयंत ऋत्विजः अनुव्रतं व्रतेषु व्रतमिति अग्निमेवाहुः। अग्निमेव ऋतं ऋतमाहुरित्यर्थः। ए
वकारार्थमिद्द्वः॥ ॥अथाष्टमी॥ आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः॥ सरस्वती सारस्वतेभिरर्वाक् तिस्रो
देवीर्बर्हिरेदं सदंतु॥ ॥भारती भिः भरतस्य सूर्यस्य संबंधिनीभिः सजोषाः संगता भारती वाक् आगच्छतु। देवैर्मनुष्येभिः म
ध्यमस्थानैः सह सरस्वती माध्यमिका वाक् आगच्छतु तिस्रो देव्यः विमलाभा रुचः आगच्छंतु अर्वागाभिमुख्यं एतद्बर्हिः सदंतु

आसीदंतु॥ ॥अथनवमी॥तन्नस्तुरीपमधपोषयित्नुदेवत्वष्टर्विरराणः स्यस्व॥यतोवीरःकर्मण्यःसुदक्षोयुक्तग्रावाजायतेदे
वकामः॥ ॥हेदेवत्वष्टः सृष्टिकर्त्तः विरराणः त्वंअधः अनंतरं नोस्मान्तुरीयंतारकंतत्प्रसिद्धंरेतः विष्यस्वमोचयस्व।यतो
विमोचनाद्वीरः सत्ववान्कर्मण्यः कर्मसुकुशलः सुदक्षः सुबलः युक्तग्रावाअभिषवार्थंग्रावायुक्तः सोमसु दित्यर्थः देवका
मः देवान्कामयमानः पुत्रोजायतेजायते॥ ॥अथदशमी॥वनस्पतेवसृजोपदेवानग्निर्हविः शमितासूदयाति॥सेदुहोतास
त्यतरोयजातियथादेवानांजनिमानिवेद॥ ॥हेवनस्पतेदेवानुपसृजसमीपेकुरु।शमितापशोः संस्कर्ता।अग्निः वनस्पतिश्च
हविः सूदयातिदेवान्प्रतिप्रेरयतु।सत्यतरः अत्यर्थंसत्यः सत्यतरः सत्यस्वरूपः सइत्सएवहोता।यजातियजतु।यथा
यतः कारणात्सएवाग्निः जनिमानिजन्मानिवेदवेत्तिअंतः सएवयजत्वित्यर्थः॥ ॥अथैकादशी॥आयाह्यग्नेसमिधानोअ
र्वाङिंद्रेणदेवैः सरथंतुरेभिः॥बर्हिर्नआस्तामदितिः सुपुत्राः स्वाहादेवाअमृतामादयंतां॥ ॥हेअग्नेअर्वाक्अस्मदभिमुखं
समिधानः ज्वालारूपेणदीप्यमानः त्वंआयाहिदेवतारूपेणागच्छ।कथमितिउच्यते।नोस्माकंयज्ञंइंद्रेणदेवैः।तुरेभिः त्व

द्वि·भा·८
॥४३४॥

त्वरमाणोदेवैः सरथं समानरथं यथातथाआपाहि। किंचवसुपुत्राअदितिरग्निनो बर्हिः आस्तांअध्यास्तांस्वाहाकारेणायुक्ताअ
मृताः नित्यादेवाः सहमादयंतां॥ तृप्यंतु॥ ॥इतिद्वितीयस्याष्टमेत्रयोविंशोवर्गः॥ ॥प्रत्यग्निरुषसइत्येकादशर्चं पंचमंसूक्तंवैश्वा
मित्रंत्रैष्टुभमाग्नेयं। अत्रानुक्रमणिका। प्रत्यग्निरिति। प्रातरनुवाकाश्विनशस्त्रयोरिदमादिसूक्तेयस्यविनियोगः। सूत्रितंच।
प्रत्यग्निरुषसइतितिस्रोणीति। इळामग्नइति। अस्योक्तोविनियोगः॥ ॥तत्रप्रथमा॥ प्रत्यग्निरुषसश्चेकितानोबोधिविप्रःपदवीः
कवीनां॥ पृथुपाजादेवयद्भिःसमिद्धोक्षेपद्वारातमसोवह्निरावः॥ ॥चेकितानोजानन्विप्रःमेधावीकवीनांक्रांतदर्शांपदवीमा
र्गान्गच्छन्योग्निःप्रत्यबोधिबुध्यते। पृथुपाजाःपृथुतेजाःदेवयद्भिर्देवकामैःसमिद्धःसम्यक्दीप्तःसवह्निःतमसःअज्ञानस्य
द्वाराआगमस्यद्वाराणिअपसःअपवृणोति॥ ॥अथद्वितीया॥ प्रेद्धोग्निर्वावृधेस्तोमेभिर्गीर्भिः स्तोतॄणांनमस्यउक्थैः॥ पूर्वीरृ
तस्यसंदृशश्चकानःसंदूतोअद्यौदुषसोविरोके॥ ॥नमस्यःपूज्योयोग्निःस्तोतॄणांस्तोतॄगःशीर्भिवाग्निरुक्थैःशस्त्रैश्चप्रव
वृधे। वृद्धिंप्राप्नोति। दूतः देवानांदूतःपूर्वीर्बह्वीःऋतस्यादित्यस्यसंदृशःदीप्तीःचकानःकामयमानःसन्उषसःविरोकेविरोचने

श्री
॥४३४॥

११

प्रातःकालेसमयेोतद्योतते॥ ॥अथतृतीया॥ अधाय्यग्निर्मानुषीषुविक्ष्वपांगर्भोमित्रऋतेनसाधन्॥ आहर्यतोयजतःसान्वस्था
दभूदुविप्रोहव्योमतीनां॥ ॥मित्रः यजमानानां मित्रभूतः ऋतेन सत्येन साधन् अपांगर्भोग्निः मानुषीषु मनोः संबंधिनीषु विक्षु प्रजा
सु अधायि देवैराहितः किंच हर्यतः स्पृहणीयः यजतो यष्टव्यः स सानु उच्छ्रितं धिष्ण्यं उत्तरवेद्याख्यं अस्थात् अध्यतिष्ठत् विप्रः प्रा
ज्ञः अग्निः मतीनां मंत्राणां स्तोतॄणां हव्यः स्तुत्यः अभूत्॥ ॥अथचतुर्थी॥ मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवे
दाः॥ मित्रो अध्वर्युरिषिरो दमूना मित्रः सिंधूनामुत पर्वतानां॥ ॥इयमृक् अग्निं सर्वात्मकत्वेन स्तौति। यं यदा समिद्धोग्निः तदा मि
त्रो भवति। सूर्यो भवति। मित्र एव सन् होता भवति। वरुणो भवति। जातवेदाः जातप्रज्ञः समिद्धः अध्वर्युर्भवति। दमूनाः दममनः दा
नमना वा स इषिरः प्रेरको वायुर्भवति। उत अपि च सिंधूनां नदीनां पर्वतानां च सहायो भवति॥ ॥अथपंचमी॥ पाति प्रियं रिपो अ
ग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य॥ पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः॥ ॥ऋष्वो दर्शनीयोग्निः वेः गंतव्याः
सर्वव्यापायाः रिपोः भूम्याः प्रियं अग्रं प्रथमं पारं स्थानं पाति रक्षति। यह्वो महान् सूर्यस्य चरणं चरत्यनेनेति चरणमंतरिक्षं पाति।

द्वि·भा·८
॥४३५॥

नाभानाभौऽन्तरिक्षस्य मध्ये सप्तशीर्षाणि सप्तगणं मरुद्ग्यां[?] पाति। देवानामुपमादं उपमादकं यज्ञं पाति रक्षति॥ ॥इति द्वितीयस्या
ष्टमे चतुर्विंशो वर्गः॥ ॥अथ षष्ठी॥ ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान्॥ ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी
रक्षत्यप्रयुच्छन्॥ ॥ऋभुर्महान् विश्वानि सर्वाणि वयुनानि ज्ञातव्यानि पदार्थानि विद्वान् जानन् देवोऽग्निः ईड्यं स्तुत्यं चारु मनो
ज्ञं नाम जलं चक्रे। करोति नामेत्युदकनाम सुपाठात्। वेर्व्यासस्य ससस्य स्वपतः शांतस्य च लस्याग्नेः चर्म रूपं घृतवद्दीप्तिमद्भव
ति। सोऽग्निः सज्वलमप्रयुच्छन् अप्रमाद्यन् रक्षति पालयति॥ ॥अथ सप्तमी॥ आ योनिमग्निर्घृतवंतमस्थात्पृथुप्रगाणमुशंत
मुशानः॥ दीद्यानः शुचिरृष्वः पावकः पुनः पुनर्मातरा नव्यसी कः॥ ॥उशानः कामयमानोऽग्निः घृतवंतं दीप्तिमंतं पृथुप्रगाणं पृ
थुगीतिं उशंतं कामयमानं योनिं स्थानमायतनं आ अस्थात् अतिष्ठति। दीद्यानः द्योतमानः शुचिर्दीप्तो नीयः ऋष्वो ना   ऋ
ष्वः महान् पावकः अन्येषां शोधयिताग्निः मातरा मातरौ द्यावापृथिव्यौ पुनः पुनः नव्यसी नव्यतरौ कः करोति॥ ॥अथाष्टमी॥ स
द्यो जात ओषधीभिर्ववक्षे यदी वर्धंति प्रस्वो घृतेन॥ आप इव प्रवता शुंभमाना उरुष्यदग्निः पित्रोरुपस्थे॥ ॥सद्यो जातोऽग्निः यदि

श्री
॥४३५॥

१२

यदाओषधीभिर्वर्षेउत्पद्यतेतदाप्रवताप्रवणेनमार्गेणगच्छंत्यःआपइववृत्सुंभमानाःशो।भमानास्ताओषध्यःप्रसूवःफलानिप्र
सुवानाःघृतेनोदकेनवर्धयंति।पित्रोर्द्यावापृथिव्योरुपस्थेमध्यप्रदेशेवर्धमानोग्निःउरुष्यतुअस्मान्रक्षतु॥ ॥अथनवमी॥
उदुष्टुतःसमिधायह्वोअद्यौद्वर्ष्मन्दिवोअधिनाभापृथिव्याः॥ मित्रोअग्निरीड्योमातरिश्वादूतोवक्षद्यजथायदेवान्॥ ॥उद्
तिपादपूरणः।स्तुतःअस्माभिःस्तुतःसमिधासमिंधनेनयह्वोमहानग्निःपृथिव्याउत्तरवेद्यानाभानाभौमध्यप्रदेशे।स्थितःस
न्दिवःअंतरिक्षस्यवर्ष्मन्वर्ष्माणिरूपेणउद्द्योतद्द्योततेमित्रःसर्वेषांमित्रभूतःईड्यःस्तुत्यःमातरिश्वाअंतरिक्षेश्वसिति
प्राणितिसूर्यरूपेणचेष्टतइतिमातरिश्वाअथवामातरिअंतरिक्षेश्वसितिनिवसतीतिमातरिश्वा।तथाहयास्कः।मातर्यंतरिक्षे
श्वसितिमातर्याश्विनीतितिवा।दूतःदेवानांदूतःसन्यजथाययज्ञायदेवान्वक्षत्आवहतु॥ ॥अथदशमी॥उदस्तंभीत्समि
धानाकमृष्वोअग्निर्भवन्नुत्तमोरोचनानां॥यदीभृगुभ्यःपरिमातरिश्वागुहासंतंहव्यवाहंसमीधे॥ ॥ऋष्वोमहानग्निःसमि
धाचतेजसानाकंउदस्तंभीत्।उदस्तभ्नात्रोचनानांशोभमानानांतेजसांमध्येउत्तमोवैभवत्।उत्कृष्टतमोभवत्।मातरिश्वा

वायुः स्तृगुभ्यः आदित्यस्य रश्मिभ्यः आदित्यगुहायां संतं हव्यवाहं हव्यानां वोढारं अग्निं यदिह विभ्वसः विश्वाः प्रजा होतारः श्रु
क्रे। दीक्षितं अर्चिः ईळते॥ ॥अथैकादशी॥ इळामग्न इति पूर्वं व्याख्यातं॥ ॥इति द्वितीयस्याष्टमे पंचविंशो वर्गः॥ ॥प्र कारव इत्येकादशर्चं
षष्ठं सूक्तं वैश्वामित्रमाग्नेयं। प्र कारव इत्यनुक्रांतत्वात् प्रातरनुवाकाश्विनशस्त्रयोः सूक्तविनियोगः॥ पूर्वसूक्त एव प्रसंगिरुषस
स्त्वीणीत्यनेनोक्तः आग्नेये पशौ हविषो याज्या। सूत्रितं च। प्र कारवो मनना वच्यमाना एकाचेतत्सरस्वती नदीनामिति ऐभिर
ग्न इति पत्नीवतग्रहस्य याज्या सूत्रितं च। आग्नीध्रः पात्नीवतस्य यजत्यैभिरग्ने सरथमिति॥ ॥तत्र प्रथमा॥ प्र कारवो मनना व
च्यमाना देवद्रीचीं नयत देवयंतः। दक्षिणावाड्वाजिनी प्राच्येति हविर्भरंत्यग्नये घृताची॥ ॥हे कारवः कर्तारः देवयंतं देवकामा
यूयं मननाम मननं नमंत्रेणावच्यमानाः प्रेयमाणाः देवद्रीचीं देवानां चनीं स्रुवं प्रणयत प्रकर्षेणानयत प्रापयत दक्षिणावाड् आ
हवनीयस्य दक्षिणात उह्यमाना वाजिनी अन्नवती प्राची प्रागग्रा अग्नये अस्यार्थं हविर्भरंती हविर्धारयंती घृतेनोक्ता स्रुक् एति
आगच्छति॥ ॥अथ द्वितीया॥ आ रोदसी अपृणा जायमान उत प्ररिक्था अध नु प्रयज्यो॥ दिवश्चिदग्ने महिना पृथिव्या वच्यंतां

तेवह्नयः सप्तजिह्वाः॥ ॥हेअग्नेजायमानस्त्वंरोदसीद्यावापृथिव्योआअपृणाः आपूरय।किंचहेप्रयज्योयष्टव्य दिवश्चित् दिवश्चां
तरिक्षात्पृथिव्याश्चमहिम्नोहिमहिम्नाप्ररिक्थाः अतिरिक्त वसिअनेनवह्नेरतिशयत्वउक्तः।एवंविधस्यतेतववह्नयः।अग्नयःश
भृतावह्नयः।अग्नयःआहवनीयादयःवच्यंतां किंविधास्तेसप्तजिह्वात्मकाः॥ ॥अथतृतीया॥द्यौश्चत्वापृथिवीयज्ञियासोनिहोतारंसा
दयंतेदमाय॥यदीविशोमानुषीर्देवयंतीःप्रयस्वतीरीळतेशुक्रमर्चिः॥ ॥द्यौश्चांतरिक्षंपृथिवीचयज्ञियासःयज्ञार्हादेवाश्चहोतारं
त्वांदमायदमोयज्ञःतस्मैअर्थंनिषादयंतेउपशमयंति।यदियदामानुषीःमनोःसंबंधिन्यःदेवयंतेर्देवकामाःप्रयस्वतीःहेप्रका
द्यमानाःपूर्वाःपुराणीःउषःउषसःअनुमासिमंद्रस्यस्तुसस्यहेतुःतवरोकान्देवास्तोतारःवनयंतस्तुवंति॥ ॥अथचतुर्थी॥
महान्सधस्थेध्रुवआनिषत्तोंतर्द्यावामाहिनेहर्यमाणः॥आस्क्रेसपत्नीअजरेअमृक्तेसबर्दुघेउरुगायस्यधेनू॥ ॥महान्अ
धिकोहर्यमाणःयजमानादिभिःकाम्यमानःयद्वायजमानायमानःअग्निःमाहिनेमहिम्नायुक्तेसधस्थेस्वकीयेस्थानेध्रुवःअ
चलःसन्निषत्तःनिषण्णोभवति।आस्क्रेआक्रमणशीलेसपत्नीसमानएकःसूर्यःपतिर्ययोस्तेसपत्न्योअजरेजरारहिते

अस्मे के अन्येनाहिंसिते सबर्दुघे सबरित्यमृतमुदकं तस्य दोग्ध्र्यौ द्यावापृथिव्यौ उरुगायस्य पृथुगमनस्य अधिकस्तुतेर्वा
अग्नेः प्रीणयित्र्यौ प्रभवतः॥ ॥अथ पंचमी॥ व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततंथ। त्वं दूतो अभवो जायमान
स्त्वं नेता वृषभ चर्षणीनां॥ ॥हे अग्ने महतः सर्वोत्कृष्टस्य ते तव व्रतानि त्वत्संबंधीनि कर्माणि महामहानि महांति भवंति तव
क्रत्वा क्रतुना प्रकाशेन रोदसी द्यावापृथिव्यौ आततंथ विस्तृतवानसि त्वं दूतो अभवः भव। वृषभ चर्षणि त्वं जायमानः सन्च
र्षणीनां यजमानानां नेतासि फलप्रापकोसि॥ ॥इति द्वितीयस्याष्टमे षड्विंशो वर्गः॥ ॥अथ षष्ठी॥ ऋतस्य वा केशिना योग्याभि
र्घृतस्नुवा रोहिता धुरि धिष्व। अथा वह देवान्देव विश्वान्स्वध्वरा कृणुहि जातवेदः॥ ॥हे देव केशिना प्रशस्तकेशवतो योग्या
भिः योजनसाधनभूताभिः रश्मिभिर्युक्तौ घृतस्नुवा घृतक्षरंतौ अश्वौ ऋतस्य यज्ञस्य वा शब्दः अर्थे धुरि विधिष्व। धेहि योजय
रथे। अथानंतरं विश्वान् सर्वान् देवान् सम्यक् आवह। हे जातवेदः तान् स्वध्वरा स्वध्वरान् शोभमानाध्वरान् कृणुहि
कुरु॥ ॥अथ सप्तमी॥ दिवश्चिदा ते रुचयंत रोका उषो विभातीरनु भासि पूर्वीः॥ अपो यदग्न उशधग्वनेषु होतुर्मंद्रस्य

पनयंतदेवाः॥ ॥हेअग्नेयदावनेषुअरण्येषुअपःउशधक्कामयमानोदहश्चवर्तसे।तदारोकाश्चत्वदीयादीदायदिवश्चितस्
यादपिआरुचयंतआरोचंतेविभातीःविशेषेणभांतीःयदासमीधमभैधततदानाकंअस्तभ्नादितिसंबंधः॥ ॥अथाष्टमी॥
उरौवायेअंतरिक्षेमदंतिदिवोवायेरोचनेसंतिदेवाः॥ऊमावायेसुहवासोयजत्राआयेमिरेरथ्योअग्नेअश्वाः॥ ॥उरौविस्तीर्णे
तरिक्षेयेदेवाःमदंतिहृष्यंती।दिवःसूर्यस्यरोचनेप्रकाशनेआलोकेयेदेवाःसंतिऊमाःऊमसंज्ञकाःपितरःसंति।यश्चवायेदेवाः
सुहवासःशोभनाह्वानाःआयेमिरेआयच्छंति।रथ्यःरथिनःतवअश्वाःसंति।हेअग्नेतैःसर्वैःसार्धंआयाहीतिउत्तरेणवासंबं
धः॥ ॥अथनवमी॥ऐभिरग्नेसरथंयाह्यर्वाङ्नानारथंवाविभवोह्यश्वाः॥पत्नीवतस्त्रिंशतंत्रींश्चदेवाननुष्वधमावहमादयस्व॥ ॥
हेअग्नेएभिःपूर्वोक्तैर्देवगणैःसार्धंसरथंसमानरथंवात्वदधेसमारोप्यआयाहियतःकारणात्तेअश्वाःविभवःप्रभवःस
मर्थाःहिःप्रसिद्धौपत्नीवतःपत्नीभिःसहितान्त्रिंशतंत्रींश्चत्रयश्चत्रिंशतंदेवांश्चअनुष्वधंसोममुद्दिश्यआवहमादयस्वसो
मेनेतिविशेषः॥ ॥अथदशमी॥सहोतायस्यरोदसीचिदुर्वीयज्ञंयज्ञमभिवृधेगृणीतः॥प्राचीअध्वरेवतस्थतुःसुमेकेऋता

वरीऋतजातस्यसत्ये॥ ॥त एव होताभवति उर्वी विस्तीर्णे रोदसी चित् द्यावापृथिव्याविव प्रियस्याग्नेः यज्ञंयज्ञं सर्वंयज्ञं वृधे समृध्यर्थे
अभिगृणीतःप्रशंसतः ऋतजातस्य जातसत्यस्य यस्य हेतुः सुमेके सुरूपे ऋतावरी उदकवत्यौ सत्यचरूपे प्राची अनुकूले तस्थतुः
तिष्ठतः कथमिव अध्वरा इव अध्वराविव च यज्ञाविव॥ ॥अथैकादशी॥ इळामग्न इति इयमृक् पूर्वमेव व्याख्याता॥ ॥छ॥ ॥छ॥ ॥
॥इति द्वितीयस्याष्टमे सप्तविंशो वर्गः॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥
॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचि
ते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके ऽष्टमोध्यायः संपूर्णः॥ ॥श्री पांडुरंगार्पणमस्तु॥ ॥छ॥ ॥
श्री शुभमस्तु सर्वजगतः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

पन्नयंत देवाः॥ ॥हे अग्ने यदा वनेषु अरण्येषु अपः उशधक् कामयमानो दहन्न्वर्तसे। तदा रोकाश्च त्वदीया दीप्तयः दिवश्चित् सू
र्याद् अपि आरुच यंत आरोचंते विभातीः विशेषेण भांतीः यदा समी धमसे धतत दाना कं अस्त्रत्भ्यादिति संबंधः॥ ॥अथाष्टमी॥
उरौ वा ये अंतरिक्षे मदंति दिवो वा ये रोचने संति देवाः॥ ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः॥ ॥उरौ विस्तीर्णे अं
तरिक्षे ये देवाः मदंति हृष्यंती। दिवः सूर्यस्य रोचने प्रकाशने आलोके ये देवाः संति ऊमाः ऊमसंज्ञकाः पितरः संति। यष्टव्याये देवाः
सुहवासः शोभनाह्वानाः आयेमिरे आयच्छंति। रथ्यः रथिनः तव अश्वाः संति। हे अग्ने तैः सर्वैः सार्धं आयाहीति उत्तरेण संबं
धः॥ ॥अथ नवमी॥ ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः॥ पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्व॥ ॥
हे अग्ने एभिः पूर्वोक्तैर्देवगणैः सार्धं सरथं समानरथं वा त्वद्धे समारोप्य आयाहि यतः कारणात् ते अश्वाः विभवः प्रभवः स
मर्थाः हि प्रसिद्धौ पत्नीवतः पत्नीभिः सहितान् त्रिंशतं त्रीं च त्रयस्त्रिंशतं देवांश्च अनुष्वधं सोमम् उद्दिश्य आवह मादयस्व तो
मेनेति विशेषः॥ ॥अथ दशमी॥ स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः॥ प्राची अध्वरेव तस्थतुः सुमेके ऋता

द्वि॰सं॰भा॰८
॥५३१॥

१०१
१

101
1

श्री
॥५३१॥